PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 2

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

II

Adhyāya 1 Pāda 1 Āhnika 5-7

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1975

© Institut Français d'Indologie 1975

Imprimerie de Sri Aurobindo Ashram
Pondichéry, Inde

MAHĀBHĀSYA PRADĪPA VYĀKHYĀNĀNI

महाभाष्यप्रदीपव्याख्यानानि

(प्रथमाध्याये प्रथमपादे ५–७ आह्निकानि)

प्रथमाध्यायस्य प्रथमे पादे पञ्चममाह्निकम्

लघुविवरणम्

ईदूदेद् द्विवचनं प्रगृह्यम् १. १. ११

[१, २१३]

व्यक्तौ पदार्थे [1]भिन्नकालनिवृत्त्यर्थं वा तपरत्वं गुणान्तरयुक्तानां ग्रहणार्थं वा। नाद्य इत्याह— **ईदूतोरिति**। द्वितीयं निरस्यति — **उदात्तादीनामिति**। अस्तु तर्हि जातौ पदार्थे भिन्नकालनिवृत्त्यर्थं तपरत्वमिति, नेत्याह — **जातीति**। ननु तर्हि व्यक्तावेव पदार्थे एकारस्याण्त्वात् सवर्णग्रहणेन प्लुतानां प्रगृह्यसंज्ञा मा भूदित्येवमर्थं तपरत्वं स्यादित्यत आह — **प्लुतानां चेति**। 'प्लुतानां तु' इत्यनुपपन्नम्, जातौ पदार्थे जातेस्तपरत्वे साक्षादसंभवाद्व्यक्तिद्वाराश्रीयमाणे दीर्घाणामिव [2]प्लुतानामप्याश्रितत्वात् प्रगृह्यसंज्ञा भविष्यतीत्यत आह — **व्यक्तीति**। नन्वसिद्धत्वेऽपि[3] प्लुतस्य तेन [4]दीर्घस्य निर्वर्तितत्वात् कथमिव तस्य प्रगृह्यसंज्ञेत्यत आह — **शास्त्रेति**। प्रगृह्यसंज्ञा च विधीयमाना त्रिमात्रस्यैव प्रवर्तते, न तु द्विमात्रस्य प्रवृत्ता स्थानिवद्भावेन प्लुतस्येति दर्शयितुं 'प्लुतबुद्धौ' इत्युक्तम्। [5]तेनैतदप्यपास्तम् — अग्नी३इत्यत्र [6]'अनल्विधौ' इति प्रतिषेधात् [7]'यथोद्देशं संज्ञापरिभाषम्' इत्याश्रीयमाणेऽपि[8] प्लुतस्य प्रगृह्यसंज्ञा नास्तीति [9]'अप्रगृह्यस्य' इत्यनुनासिकनिषेधो न स्यादिति यदाहुः ॥

महाभाष्यप्रदीपविवरणम् (बृहत्)

[१, २१३]

किं व्यक्तिपक्ष ईदूतोस्तपरयोरुपादानं भिन्नकालनिवृत्तये वा गुणान्तरयुक्तग्रहणाय वा। नाद्य इत्याह — **ईदूतोरिति**। भिन्नकालनिवृत्तिस्तत्कालस्यैवेति नियमेन। नियमश्च सिद्धे। सिद्धिश्च पूर्वसूत्रविषय एव प्रवृत्तौ। तत्रैव च प्रवृत्तिः [10]'तपरस्तत्कालस्य' इत्यत्राण्ग्रहणानुवृत्तौ। तथा चेदूतोरनण्त्वान्न [11]'तपरस्तत्कालस्य' इति भिन्नकालनिवृत्त्यर्थं तपरत्वमित्यर्थः। ननु मानुवृतदण्-

---

[1] 'भिन्नकाल' इत्यादि 'तर्हि व्यक्तावेव पदार्थे' इत्यन्तं नास्ति — ड, ढ.

[2] प्लुतानामप्यावर्तित्वात् — ड; प्लुतानामप्यावर्तितवात् — ण.

[3] अपिशब्दो नास्ति — ड.

[4] दीर्घत्वस्य — त.

[5] तेनैतदपास्तम् — ड, ढ.

[6] पा. सू. १. १. ५६.

[7] परिभाषा २.

[8] अपिशब्दो नास्ति — त.

[9] पा. सू. ८. ४. ५७.

[10] पा. सू. १. १. ७०.

[11] पा. सू. १. १. ७०.

ग्रहणम्, [1]'तपरस्तत्कालस्य' इति च विध्यर्थं सद् गुणान्तर[2]युक्तग्रहणार्थं भविष्यतीति द्वितीयं पक्षमाशङ्क्याह — **उदात्तादीनामिति**। अस्तु तर्हि जातिनिर्देशः। तत्र ह्यण्ग्रहणानुवृत्तिं विनापि जातिनिर्देशादेव सकलव्यक्तियुक्तजातिग्रहणप्रसङ्गे यां व्यक्तिमुपादाय जातिर्निर्दिश्यते ततो भिन्नकालव्यक्त्यन्तरयुक्ता जातिर्मा ग्राहीति [3]'तपरस्तत्कालस्य' इति नियमार्थमनण्स्वपि संभवतीति चेत्, तत्र वक्तव्यम् — किं ह्रस्वानां निवृत्तये तपरत्वम्, आहोस्वित् प्लुतानां संज्ञा मा भूदिति। नाद्य इत्याह — **दीर्घेति**। नापि द्वितीय इत्याह — **प्लुतानामिति**। एवं व्यक्तिजातिपक्षद्वयेऽपि प्रयोजनं तपरत्वस्य नास्तीत्युक्त्वा व्यक्तिपक्षे एकारे जातिपक्षे त्रिष्वपीदादिषु तपरत्वे दोषप्रसङ्ग इत्याह — **इतीति**। इतिर्हेत्वर्थः। यस्मात् प्लुतानामिष्यते प्रगृह्यसंज्ञा तस्मात् प्रयोजनं केवलं नास्तीत्येव न, किं त्विष्टविघातमपि करोतीति योजना। **भेदकाश्चेति**। [4]'अनङुदात्तः' इत्युदात्तग्रहणमाकृतिपक्षे गुणान्तरयुक्तव्यक्तेरपि प्रसङ्गे तदभावाय स्यादित्यज्ञापकं गुणानामभेदकत्वस्येति भावः। एकश्रुत्या सूत्रपाठाद् भाष्ये त्रयोऽप्युदात्तादयो निर्दिष्टाः। **न हीति**। अनुनासिकत्वं प्रगृह्यत्वं चैकाधिकरणं न भवतीत्यर्थः। नन्वत्र [5]'तपरस्तत्कालस्य' इत्यस्य विध्यर्थत्वेनेहाकृतिनिर्देशे प्लुतानां न संज्ञानिवृत्तिः [6]'तपरस्तत्कालस्य' इत्यनेनेति कथं [7]प्लुतानां संज्ञा न प्राप्नोतीत्युच्यत इत्यत आह — **व्यक्तीति**। व्यक्तिपक्षे हि दीर्घा एव संज्ञित्वेनोपात्ता इति न तावदिह [8]'प्लुतानामुपादानात् संज्ञा। नापि ग्रहणकशास्त्रेण, ईदूतोरनण्त्वान्न तावत् [9]'अणुदित्सवर्णस्य' इत्यस्य प्राप्तिः। एदित्यस्याण्त्वेऽपि परत्वात् [10]'तपरस्तत्कालस्य' इत्यस्य प्रवृत्तेः, नाप्यनेनातत्कालत्वात् प्लुतानामित्यर्थः। **तपरत्वात्** केवलतपरत्वादित्यर्थः। ननु प्लुतेन निवृत्तत्वात् स्थानिनः प्लुतासिद्धत्वेऽपि न स्थान्याश्रया प्रगृह्यसंज्ञेत्यत आह — **शास्त्रेति**। ननु शास्त्रासिद्धत्वं नाम शास्त्राप्रवृत्तिः। तथा च प्लुताभावाद् यद्यपि स्थानिनः प्रगृह्यसंज्ञा सिध्यति, तथापि पुनः प्लुते कृते [11]'तस्य तत्कालत्वाभावान्न स्यात्। न च स्थानिवद्भावेन सेति वाच्यम्, [12]'अनल्विधौ' इति निषेधात्, अत आह — **प्लुतबुद्धाविति**। यद्यपि शास्त्रं प्रवृत्तम्, प्लुतश्च सन्, वस्तुतश्च द्विमात्रस्याभावः, तथाप्यसिद्धवद्भावेन शास्त्रं न प्रवृत्तमिति बुद्ध्या प्लुतबुद्धेरप्यभावात् त्रिमात्र एव द्विमात्रबुद्ध्या प्रगृह्यसंज्ञा, न स्थानिवद्भावेनेत्यर्थः। ननु प्राधान्यात् कार्यासिद्धत्वम्, न शास्त्रासिद्धत्वमाचार्याणां संमतमित्यत आह — **तथा हीति**। [13]आदेशेनापनोद्यत्वादुत्सर्गः स्थान्युच्यते, स लक्षणं निमित्तं यस्यादेशस्य तस्य भावायेत्यर्थः। [14]तुक्यसिद्धत्ववचनमेकादेशस्य शास्त्रासिद्धत्व एवोपपद्यते। तथा चैकरूप्याय सर्वत्र शास्त्रासिद्धत्वमेवेति भावः॥

---

[1] पा. सू. १. १. ७०.
[2] युक्तार्थग्रहणार्थं — च, छ.
[3] पा. सू. १. १. ७०.
[4] पा. सू. ७. १. ७५.
[5] पा. सू. १. १. ७०.
[6] पा. सू. १. १. ७०.
[7] प्लुतानां तु प्रगृह्यसंज्ञा — ट.
[8] प्लुतानामुपादानेन संज्ञा — झ.
[9] पा. सू. १. १. ६९.
[10] पा. सू. १. १. ७०.
[11] 'तस्य' इत्यस्यानन्तरम् 'असौ' इत्यधिकम् — ट.
[12] पा. सू. १. १. ५६.
[13] आदेशेनापोद्यत्वात् — च, छ.
[14] तुक्यसिद्धववनमेकादेशशास्त्रासिद्धत्व एव — झ, ञ.

महाभाष्यप्रदीपोद्द्योतनम्

अन्नम्भट्टकृतम्

[१, २१३]

ननु व्यक्तिपक्षे गुणान्तरयुक्तग्रहणार्थं तपरत्वं स्यादिति प्रयोजनसत्त्वात् प्रश्नानुपपत्तिः, अत आह — **ईदूतोरिति**। व्यक्तिपक्षे भिन्नकालनिवृत्त्यर्थं वा तपरत्वं गुणान्तरयुक्तग्रहणार्थं वा, नाद्य इत्याह — **अनण्त्वादिति**। 'तत्कालस्यैव' इति नियमेन भिन्नकालनिवृत्तिर्वाच्या, स च सिद्धे सति, सिद्धिश्च पूर्वसूत्रविषय एव प्रवृत्तौ सत्याम्, सा च तपरसूत्रेऽण्ग्रहणानुवृत्त्येत्यनण्त्वादीदूतोर्भिन्नकालनिवृत्त्यर्थं [1]तपरत्वं न युक्तमित्यर्थः। नन्वण्ग्रहणं नानुवर्तते, तपरसूत्रं विध्यर्थं सद् गुणान्तरयुक्तग्रहणार्थमिति [2]द्वितीयं कल्पं निरस्यति — **उदात्तादीनामिति**। ननु मास्त्वण्ग्रहणानुवृत्तिस्तत्सूत्रे, जातिपक्षे तपरसूत्रं नियमार्थमस्त्विति भिन्नकालनिवृत्त्यर्थमेवात्र तपरत्वमित्याशङ्क्य ह्रस्वनिवृत्त्यर्थं प्लुतनिवृत्त्यर्थं वेति विकल्प्य नाद्य इत्याह — **जातीति**। ह्रस्वोच्चारणेनैव दीर्घस्यापि प्राप्तौ दीर्घोच्चारणगौरवाद्ध्रस्वनिवृत्तिस्तपरत्वं विनापीत्यर्थः। न द्वितीय इत्याह — **प्लुतानामिति**। एवं जातिव्यक्तिपक्षयोः प्रयोजनाभावमुक्त्वा व्यक्तिपक्षे एकारे, जातिपक्षे त्रिष्वपि तपरत्वेऽनिष्टमाह — **इतीति**। इतिर्हेतौ, [3]यस्मादिष्यते प्लुतानामपि प्रगृह्यसंज्ञा, तस्मान्न केवलं प्रयोजनाभावः, किं त्विष्ट[4]व्याघातमपि करोतीति योज्यम्। **भेदकाश्चेति**। [5]'अनङुदात्तः' इत्युदात्तग्रहणमाकृतिपक्षेऽनुदात्तादिव्यावृत्त्यर्थं स्यादित्यज्ञापकं गुणानामभेदकत्वस्येत्यर्थः। उदात्तादेः स्पष्टत्वात् प्रश्नायोगमाशङ्क्याह — **प्लुतानामिति**। एकश्रुत्या सूत्रपाठाद् भाष्ये [6]त्रयोऽप्युदात्तादय उक्ताः। [7]क्वचिदनुनासिकान्तपाठः प्रामादिक इत्याह — **क्वचिदिति**। **न हीति**। प्रगृह्यत्वानुनासिकत्वयोरेकत्राभावादत्र तद्ग्रहणमनुपयुक्तमिति भावः। 'अस्ति' इति काक्वा 'सूचितमनुशयं पृच्छति— भाष्ये **किं तर्हीति**। ननु विध्यर्थस्य तपरसूत्रस्य नियमार्थत्वाभावादत्र जातिग्रहणेन प्लुतानामपि संज्ञा स्यादेव, अत आह — **व्यक्तीति**। व्यक्तिपक्षे दीर्घाणामेव संज्ञित्वेन प्लुतानां संज्ञा न स्यादित्यर्थः। **न त्विति**। व्यक्तिपक्षे नियमार्थत्वाभावादित्यर्थः। यद्यप्येकारस्याण्त्वात् [9]'अणुदित्' इत्यनेन सवर्णग्रहणात् प्लुतस्यापि संज्ञा सिध्यति, तथापि परत्वादत्र तपरसूत्रमेव प्रवर्तते नाणुदित्सूत्रमिति भावः। प्लुतेन स्थानिनो निवृत्तेः प्लुतासिद्धावपि स्थान्याश्रयसंज्ञा कथं स्यात्, अत आह— **शास्त्रेति**। ननु शास्त्रासिद्धिः शास्त्राप्राप्तिः, तथा च प्लुताभावाद् यद्यपि स्थानिनः प्रगृह्यसंज्ञा सिध्यति, तथापि पुनः प्लुते कृते तस्य सा न स्यात्, अतत्कालत्वात्। न च स्थानिवद्भावेन सा,

---

[1] तपरकरणं युक्तमित्यर्थः — अ.

[2] द्वितीयकल्पं — अ, आ, ऋ.

[3] यस्मात्प्लुतानामिष्यते प्रगृह्यसंज्ञा — म, इ, उ, ऊ, ऋ.

[4] विघातमपि — म, इ, उ, ऊ, ऋ.

[5] पा. सू. ७. १. ७५.

[6] त्रयोऽनुदात्तादयः — म.

[7] 'क्वचिदनुनासिकान्त' इत्यादि 'क्वचिदिति' इत्यन्तं नास्ति — अ, आ, इ, ऊ, ऋ.

[8] अनुशयशब्दोऽत्रानुबन्धार्थकः 'अनुशयो द्वेषे पश्चात्तापानुबन्धयोः' इति विश्वकोशात्, उक्तशेष इति भावः। अत एव 'कृतात्ययेऽनुशयवान्' इति शारीरकसूत्रे विद्यमानानुशयशब्दस्य भुक्तादवशिष्टमिति व्याख्यातं श्रीभाष्यादौ।

[9] पा. सू. १. १. ६९.

[1]'अनल्विधौ' इति [2]निषेधात्, अत आह — **प्लुतबुद्धाविति**। यद्यपि शास्त्रं प्रवृत्तम्, प्लुतेन स्थान्यपि निवृत्तः, प्लुत एवास्ति, तथाप्यसिद्धवचनेन शास्त्रं न प्रवृत्तमिति बुद्धौ प्लुतबुद्धेरप्यभावात् त्रिमात्र एव द्विमात्रबुद्धया प्रगृह्यसंज्ञा, न स्थानिवद्भावेनेत्यर्थः। ननु प्राधान्यात् कार्यासिद्धत्वमेव, न शास्त्रासिद्धत्वम्, अत आह — **तथा हीति**। आदेशापनोद्यत्वात् **उत्सर्गः** स्थानी, स लक्षणं निमित्तं यस्य शास्त्रस्य तस्य भावायेत्यर्थः। अधीत्येत्यत्र कार्यासिद्धत्वे दीर्घेण निवृत्तस्य [3]ह्रस्वस्य पुनरुत्थानाभावात् तुग् न स्यादित्याशङ्क्य 'स्थानिवद्भावो वक्तव्यः, तेन सिध्यति' इति मतान्तरनिरासपूर्वकं [4]"स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वात्' इति [5]"षत्वतुकोरसिद्धः' इत्यत्र वक्ष्यते। तथाचावैरूप्याय सर्वत्र शास्त्रासिद्धत्वमेव युक्तमिति भावः॥

रत्नप्रकाशः

शिवरामेन्द्रसरस्वतीकृतः

[१, २१३]

तपरकरणेन केषुचित् तत्कालेषु प्रगृह्यसंज्ञासंपादनेऽपि प्लुतेषु सा न संपादितैवेत्यव्याप्तिग्रस्तमेवेदं सूत्रमित्याशयेन तपरकरणप्रयोजनं तावत् पृच्छति — **किमर्थमिति**। एतेन 'ईदूतोरनण्त्वाद् भिन्नकालनिवृत्त्यर्थं नोपपद्यते तपरत्वम्। उदात्तादीनामभेदकत्वाद् गुणान्तरयुक्तानां सवर्णानां ग्रहणार्थमपि नोपपद्यते। जातिपक्षेऽपि दीर्घोच्चारणात् प्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति, प्लुतानां चेष्यत एवेतीष्टव्याघातं प्रत्युत तपरत्वं करोतीति प्रश्नः' इति निरस्तम्। ईदूतोरनण्त्वेऽपि यणादेशवारणद्वारा तत्स्वरूपप्रतिपत्त्यर्थत्वेनोदात्तादीनां भेदकत्वस्याप्यवश्यं स्वीकरणीयत्वेन तपरसूत्रविध्यर्थतायाः अपि भाष्ये उक्तत्वेन च तत्कालग्रहणार्थत्वेन च तपरकरणस्योपपन्नत्वेन कथंचित्तदनुपपत्तिकथनस्यार्किंचित्करत्वात्। सत्येव ग्रहणकशास्त्रेऽण्ग्रहणेऽकारादिशक्यतावच्छेदकत्वेन ह्रस्वदीर्घप्लुतादि[6]वृत्त्यत्वादिजातेः सर्वानुभवसिद्धह्रस्वादिमात्रवृत्त्यत्वाद्यतिरिक्तायाः कल्पनीयत्वेन ईकारोकाराभ्यां ह्रस्वप्लुतग्रहणसंभावनाया एवाभावेन प्रयत्नाधिक्याद्ध्रस्वग्रहणवारणस्य तपरकरणं प्लुतग्रहणप्रतिबन्धकमित्युक्तेश्चासंबद्धप्रलापत्वात्। 'अस्ति प्रयोजनमेतत्, किं तु प्लुतानां प्रगृह्यसंज्ञा न प्राप्नोति' इति प्रष्ट्रैव स्वाशयस्य वक्ष्यमाणत्वेन तद्विपरीताशयवर्णनानौचित्याच्च। एतेन '**तपर इति**। व्यक्तिपक्षो भेदकाश्च गुणा इति भावः' इत्यपि निरस्तम्। 'तपरसूत्रविध्यर्थता च' इत्यनुक्तत्वेन न्यूनत्वात्। 'ईदादीनां तपराणाम्' इति व्यधिकरणे षष्ठ्यौ, तपराणां वाच्या ये ईदादयस्तेषामिति। तपरशब्दस्य तन्निर्दिष्टलक्षकत्वेन समानाधिकरणे वा, तपरनिर्दिष्टानामीदादीनामिति। **ग्रहणं यथा स्यादिति**। इत्येवमर्थमिति शेषः। ननु तपराणामीदादीनां प्रगृह्यसंज्ञावचनस्य तत्कालग्रहणं प्रयोजनं न भवति, किं तु तत्र 'ईदूदेत्' इति तपरकरणस्यैव। तथा च प्रश्नप्रतिवचनयोर्वैयधिकरण्यं दोष इति चेत् सत्यम्, विशेषणाभिप्रायेणैव विशिष्टविषयः प्रश्नः प्रवृत्त इति तात्पर्यतस्तयोः सामानाधिकरण्यमस्तीति समाधेयमेतादृशे ग्रन्थे। यदि गुणा अभेदकाः, तपरसूत्रं च नियमार्थं तदा तपरकरणं यण्निवृत्तिद्वारा ईकारादिस्वरूपप्रतिपत्ति[7]लाभायैवेति

---

[1] पा. सू. १. १. ५६.
[2] प्रतिषेधात् — अ.
[3] 'ह्रस्वस्य' इति नास्ति — म.
[4] का. वा. ६. १. ८६–५. स्थानिवद्भाववचनानर्थक्यं — अ.
[5] पा. सू. ६. १. ८६.
[6] वृत्तत्वादि — ब.
[7] लाभायैव बाध्यम् — ब.

बोध्यम्। **केषामिति**। तत्कालानां सवर्णानां विशेषज्ञानाय प्रश्नः। एतेन 'प्लुतानामग्रहण-प्रसङ्गात् प्रश्नः' इति निरस्तम्। प्लुताग्रहणप्रसङ्गस्य 'केषाम्' इति प्रश्नहेतुत्वायोगात्। **उदात्तानुदात्तस्वरितानामिति**। अनुनासिकाननुनासिकभेदेन द्विविधानामिति शेषः। तेन 'ईदूतोरवसाने ईँ ऊँ इत्येतौ भवतः' इत्यादावनुनासिकादेशतयानुनासिकस्येकारादेः प्रगृह्यसंज्ञा सिध्यति। एतेन "क्वचिदनुनासिकग्रहणमप्यस्ति। तद् गुणप्रसङ्गेनोच्चारितम्। न हि प्रगृह्योऽनुनासिकः संभवति, [1]'अणोऽप्रगृह्यस्य' इत्यनुनासिकप्रतिषेधात्" इति निरस्तम्। प्रगृह्यसंज्ञाविधावनुनासिकस्योद्देश्य-तया ग्रहणस्यात्रोक्त्वेन [2]'अणोऽप्रगृह्यस्य' इति प्रतिषेधाश्रयेण प्रगृह्यानुनासिकत्वासंभवप्रदर्शनस्या-युक्तत्वात्। **अस्ति प्रयोजनमेतदिति**। काकुस्वरेणोक्तप्रयोजनाङ्गीकारेणेदं सूच्यते — अस्तीदं प्रयोजनम्, किं तु दूषणमप्यस्तीति। तद् दूषणमन्यः सामान्यतो ज्ञात्वा विशेषेण ज्ञातुं पृच्छति — **किं तर्हीति**। काकुस्वरेण चेत् प्रयोजनमङ्गीकरोषि तर्हि तत्स्वरव्यङ्ग्यदूषणं किम्, तद्वदेति भावः। **प्लुतानां त्विति**। तपरकरणेन तत्कालानां ग्रहणेऽप्यतत्कालानां प्लुतानां ग्रहणं केनापि प्रकारेण न प्राप्तमेवेति तेषां प्रगृह्यसंज्ञा न स्यादिति भावः। एतेन 'व्यक्तिपक्षाश्रयणादयं दोषः, न तपरत्वात्' इति निरस्तम्। जातिपक्षाश्रयणेऽपि दीर्घप्लुतसाधारणजातेरीदूदंशेऽसत्त्वात्। एदंशे ग्रहणकशास्त्रबलेन तत्सत्त्वेऽपि तपरकरणेनैव तद्वारणाच्च। **असिद्धः प्लुत इति**। अत्र प्लुत-शब्दस्तद्विधायकशास्त्रलक्षकः, कार्यासिद्धिपक्षस्य दूषितत्वात्। एवं सर्वत्रोन्नेयम्। तथा च दीर्घा-न्तस्यैव द्विवचनस्य प्रगृह्यसंज्ञायां सत्यां ततस्तस्य प्लुतादेशे जाते तस्य स्थानिवत्त्वेन प्रगृह्यसंज्ञा-लाभात् सर्वेष्टसिद्धिरिति भावः। न च प्रगृह्यस्य प्लुतो न भविष्यति, प्रकृतिभावविधानादिति वाच्यम्, प्लुतस्यासिद्धत्वात्। न च 'सिद्धः प्लुतः स्वरसंधौ' इति वाच्यम्, तस्य पक्षस्य दूषयिष्य-माणत्वात्। वस्तुतोऽचि परे तदञ्जिमित्तककार्यं प्रत्येव प्रकृतिभावस्य विधानात् प्लुतं प्रति प्रकृति-भावप्रसक्तिरेव नास्ति। एतेन 'शास्त्रासिद्धत्वाश्रयणात् प्लुतबुद्धा सत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रविषया बुद्धिः प्रवर्तते। तथाहि वक्ष्यति — [3]असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षण-प्रतिषेधार्थं चेति' इति निरस्तम्। शास्त्रासिद्धिपक्षमाश्रित्य प्लुत एव द्विमात्रबुद्ध्या प्रगृह्यत्वोप-पादने व्याघातात्। न हि कश्चिद् ब्रूयात् स्वमाता वन्ध्येति। ननु भवन्मते ईदूदेदन्तस्य विधीय-मानायाः प्रगृह्यसंज्ञाया अल्विधौ वर्तमानतया प्लुते तल्लाभः स्थानिवद्भावेन कथं स्यादिति चेन्न, तस्या एव संज्ञायाः शे इत्यस्योञ्चश्च विधीयमानतयाल्विधौ वर्तमानत्वाभावात्। न चार्थभेदा-च्छब्दभेद इति मते शे इत्यस्योञ्चश्च प्रगृह्यसंज्ञान्यैवेति वाच्यम्, अर्थभेदस्य शक्तिभेदमात्रेणैवोप-पन्नत्वेन वाचकवैजात्यकल्पनाया अयोगेन तत्पक्षस्य दुर्बलत्वेन प्रत्यक्षमादाय प्रबलपक्षान्तरावलम्बेनो-पपन्नस्याक्षेपायोगात्। [4]"अनल्विधौ' इति निषेधस्यानित्यत्वाच्च॥

शास्त्रि-नारायणकृतं नारायणीयम्

[१, २१३]

व्यक्तिपक्षे तकाराक्षेपो जातिपक्षे वेत्यपेक्षायां पक्षद्वयेऽपीत्याह — **ईदूतोरिति**। व्यक्ति-पक्षे[5]"तपरस्तत्कालस्य' इति सूत्रं नियमार्थं वा विध्यर्थं वा। उभयथापीह तकारफलाभाव

---

[1] पा. सू. ८. ४. ५७.
[2] पा. सू. ८. ४. ५७.
[3] का. वा. ६. १. ८६–१.
[4] पा. सू. १. १. ५६.
[5] पा. सू. १. १. ७०.

इत्युक्त्वा जातिपक्षे किं ह्रस्वनिवृत्तये तकार उत प्लुतनिवृत्तय इति विकल्प्य ह्रस्वनिवृत्तेरन्यथासिद्धत्वात् प्लुतनिवृत्तेरनभिमतत्वाच्च [1]न तकारार्थवत्त्वमिति चोक्त्वा, न केवलमर्थाभावः, अनर्थश्च तस्मादित्याह — **इष्टेति**। पक्षद्वयेऽपि फलाभावोक्तेराह — **व्यक्तीति**। तत्कालानां गुणभिन्नानां सुज्ञानत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **प्लुतानामिति**। प्लुतेष्वव्याप्त्या न त्वदीयमतं ग्राह्यम्। मन्मते तु तपरत्वफलं नेति पृच्छतीत्यर्थः। तपरत्वफलमङ्गीकृत्य सति [2]तस्मिन्ननिष्टापादनात् तद्व्यतिरेके इष्टसिद्धिरवभासते, तत्कथम्, व्यक्तिपक्षे तकाराभावेऽपीदूतोरनण्त्वाद् भिन्नकालसंज्ञाप्राप्तेः[3],अत आह — **व्यक्तीति**। भाष्यार्थस्तु — अस्त्येतत् तरपत्वफलं व्यक्तिपक्षे। स एव दोषवत्त्वादनाश्रयणीयः। अतो न तकारफलमिति। ननु [4]प्लुतकार्यासिद्धत्वात् [5]तन्निमित्तं कार्यं माभूत्, स्थानिनिमित्ता तु संज्ञा कथं स्यात्, तत्राह — **शास्त्रेति**। ननु शास्त्रासिद्धत्वेऽपि[6] स्थानिनि प्रगृह्यसंज्ञा स्यात्। ततश्च प्लुते [7]प्रगृह्यकार्यं न प्राप्नोति। न च स्थानिवत्त्वम्, अल्विधित्वात्, अत आह — **प्लुतबुद्धाविति**। बुद्धिग्रहणेनादेशे स्थानिबुद्ध्या संज्ञाप्रवृत्तिः, न तु स्थानिनि संज्ञेति दर्शितम्। ननु शास्त्रासिद्धत्वे [8]प्लुतकार्याबुद्ध्या स्थानिनि संज्ञोचिता। सत्यम्, सत्यामपि स्थानिनि संज्ञायां कृत आदेशे तत्र संज्ञार्थं व्यक्तिपक्षे लक्षणावर्तनाददोषः। शास्त्रासिद्धत्वे आप्तवचनं प्रमाणमाह — **तथा हीति**॥

[१, २१४-२१७]

(**लघुविवरणम्**) **अयं भाव इति**। आकृतिपक्षे ह्रस्वानां प्रगृह्यसंज्ञां [9]व्यावर्तयता [10]सूत्रोपात्ता व्यक्तिर्जातेर्विशेषणमित्याश्रयणीयम्। ततश्च व्यक्तिविशेषावच्छिन्नाया जातेः [11]संज्ञा विधीयमाना ह्रस्वावच्छिन्नाया इव प्लुतावच्छिन्नाया अपि न प्राप्नोतीति भावः। विशिष्टव्यक्तिर्गृह्यमाणा[12] सवर्णग्रहणात् प्लुतानामपि ग्राहिकेत्यत आह — **तथाचेति**। केचित्तु स्वरसंधिषु प्लुतस्य [13]सिद्धत्वानाश्रयणे स्वरसंधौ कृते देवदत्ता३इति 'देवदत्तेति' इत्यादौ प्लुत आदेशे श्रूयेतेत्यवश्यं स्वरसंधिषु प्लुतस्य सिद्धत्वं वक्तव्यमिति। तदसत्, आदेशस्य प्लुते कर्तव्ये स्वरसंधेः [14]'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यसिद्धत्वेन प्लुताप्रसङ्गात्॥

[१, २१४-२१७]

(**विवरणम्**) **एवमिति**। कार्यित्वेनेत्यर्थः। व्यतिरेकमुक्त्वान्वयमाह — **कार्यित्वेनेति**। **स्वरसंधीति**। स्वरसंहिताकार्येत्यर्थः। [15]संनिहितसापेक्षशास्त्रसमुदायः प्रकरणशब्दार्थः। प्रगृह्यत्व-

---

[1] 'न' इति नास्ति — ख.
[2] तपरत्व इत्यर्थः।
[3] अप्राप्तेरिति छेदः।
[4] प्लुतरूपकार्यस्यासिद्धत्वादित्यर्थः।
[5] तन्निमित्तकार्यं — क.
[6] अपिशब्दो नास्ति — क.
[7] प्रगृह्यं कार्यं — क.
[8] प्लुतरूपकार्याबुद्ध्येत्यर्थः।
[9] व्यावर्तयतां — ढ; व्यावर्तयितुम् — त.
[10] सूत्र उपात्ता — ढ, ण.
[11] सा विधीयमाना — त.
[12] ग्राह्यमाणा — त.
[13] सिद्धत्वानाश्रयेण स्वर — ढ.
[14] परिभाषा ५०.
[15] 'संनिहित' इत्यादि 'शब्दार्थः' इत्यन्तं नास्ति — छ.

हेतुक इति विशिष्टपरम्, तेन प्रगृह्यत्वेऽपीत्यर्थः। कार्यकालपक्षे च प्रगृह्यसंज्ञा स्वरसंहिताधिकारान्तःपातिनीत्यर्थः। **प्रकृतिभाव एवेति**। प्लुतहेतुक इति शेषः। स्वरसंधिमात्रविषयस्येति सिद्धत्वस्येति च 'किमेतस्य' इति भाष्ये 'एतस्य'शब्दार्थः। **इतर इति**। विप्रतिपन्नप्रगृह्यत्वव्यतिरिक्तप्रयोजनं दर्शयतीत्यर्थः। **सिद्धे हीति**। तथा च परत्वान्नित्यत्वाच्च पूर्वं प्लुत इति भावः। भाष्ये [1]'एवम्' इत्यस्य प्रगृह्यः प्रकृत्येत्यर्थः। **अनार्षः** [2]वेदमध्यापातीत्यर्थः। प्लुतकार्यस्य प्रकृतिभावस्य प्रतिषेधार्थं वतेरुच्चारणम्। 'अप्लुतः' इत्येवोक्त्या प्लुतनिषेधे प्रगृह्यस्य प्लुतस्यापि निषेधः स्यात्। अथ [3]'अप्लुतवत्' इत्युक्तेऽपि प्रगृह्यप्लुतस्य प्रगृह्याश्रयप्रकृतिभावस्यापि कस्मान्न निवृत्तिरित्यत आह — **अन्येनेति**। 'प्रगृह्यः प्रकृत्या' इत्यनेन विहितत्वान्नास्य प्रतिषेधेन निवृत्तिरिति वार्तिकार्थः। ननु प्लुताश्रये प्रकृतिभावे प्रतिषिद्धेऽपि यदि प्रगृह्याश्रयो भवत्येव वृथा तर्हि निषेध इत्यत आह — [4]**यत्रेति**। अतपराणामिति विशेषणपरं [5]भाष्यमिति मत्वा चोदयति — **नन्विति**। व्यक्तिनिर्देशेनान्यत्र गुणान्तरयुक्तग्रहणाय [6]'तपरः' इत्यस्य [7]विध्यर्थत्वे इह च जातिनिर्देशे [8]भिन्नकालस्यानिवृत्तेरुक्तत्वादिति भावः। जातिनिर्देशे ह्युक्तप्रकारेण तपरकरणस्य प्रयोजनाभावात् 'अतपराणाम्' इत्यनेन सामान्यानि विवक्षितानि। न चैवं ह्रस्वानामपि [9]प्रसङ्ग इति वक्तुं 'दीर्घाणाम्' इत्यनेन [10]विशेषितानीति परिहरति — **अयमिति**। सामान्योपादानं कयाचिद्व्यक्त्या विनाशक्यमित्यतो ह्रस्वव्यक्त्या तत्प्रसङ्गे [11]दीर्घेणोपादानाद्यत्नाद्ध्रस्वानां यद्यपि निवृत्तिरिष्टा, तथापि सा दीर्घाणां सामान्योपलक्षणत्वे न संभवतीति तेषां सामान्यविशेषणत्वं वाच्यम्, तथा च दीर्घव्यक्तिविशिष्टानां विधीयमाना संज्ञा ह्रस्वव्यक्तिविशिष्टानामिव प्लुतविशिष्टानामपि न स्यात्। न च विशेषणभूतैर्दीर्घैः सवर्णग्रहणेन प्लुता अपि बोधिता इति प्लुतविशिष्टानामपि संज्ञेति वाच्यम्, एकारस्याण्त्वात् सवर्णग्राहकत्वेऽपीदूतोरनण्त्वात् सवर्णग्रहणाभावाद् द्वयोः प्लुतविशिष्टयोर्न स्यादेव संज्ञेत्याह — **अयं भाव इति**। **ह्रस्वनिर्देशे** व्यक्त्यात्मक-[12]ह्रस्वनिर्देश इत्यर्थः। **[आकृतिपक्षे वेति।]** व्यक्त्युपलक्षिताकृतिपक्षे वेत्यर्थः। कर्मधारयभ्रमं व्युदस्यति — **प्लुत इति**। न्यायवचनयोर्न्यायबाधो न्याय्य इत्याश्रयात् सिद्धत्वं प्लुत[13]प्रकृतिभावेऽनभिधाय लक्षणावृत्तिर्भाष्यकृताश्रिता। शास्त्रीये कार्येऽसिद्धत्वम्, न च प्लुतभावित्वेन प्लुतव्यपदेशः शास्त्रीयं कार्यमिति परिहरति — **नैष इति**। न च [14]कार्यदेशा संज्ञा, अनुनासिकश्च [15]न प्रगृह्यकार्यमिति कथमनुनासिकप्रदेशे संज्ञासूत्रोपस्थितिरिति वाच्यम्, यतोऽप्रगृह्यस्येति न पर्युदासः, किं तु प्रसज्यप्रतिषेध इत्यभिप्रेत्याह — **ततश्चेति**। अभिसंधानमभिनयेन दर्शयति — **भविष्यतीति**। अयं च मन्दमध्यमौ प्रति, उत्तमाधिकारिणं प्रति पक्षान्तरमित्याह — [16]**यथाश्रुतेति** ॥

---

[1] 'मा भूदेवम्' इत्यत्रत्यैवंशब्दो विवक्षितः।
[2] वेदमध्यपातिभिन्न इत्यर्थः, लौकिक इति यावत् ॥ वेदमध्यापयतीत्यर्थः — ट; वेदमध्यापादीत्यर्थः — च.
[3] पा. सू. ६. १. १२९.
[4] तत्रेति — च, छ.
[5] भाष्यं मत्वा — ट.
[6] पा. सू. १. १. ७०.
[7] सिद्धचर्थत्वे — च, छ.
[8] भिन्नकालस्य निवृत्तेः — च.
[9] संभव इति — च, छ.
[10] विशेषितमिति — च.
[11] दीर्घव्यक्त्या सामान्योपादानादिति भावः।
[12] ह्रस्व इत्यर्थः — झ, ञ.
[13] प्रकृतिभावेन विहाय — झ; प्रकृतिभावेन विधाय — ञ.
[14] कार्यार्था संज्ञा — झ.
[15] अप्रगृह्यकार्यमिति — च, छ.
[16] या श्रुतेति — छ.

[१, २१४–२१७]

(**उद्द्योतनम्**) [1]**एवमाश्रयण** कार्यित्वेनाश्रयण। व्यतिरेकमुक्त्वान्वयमाह — **कार्यित्वेनेति** । **स्वरसंधीति**। स्वरसंहिताकार्येत्यर्थः। संहितासापेक्षशास्त्रसमुदायः प्रकरणशब्दार्थः। [2]**न प्रकृतिभाव एव** प्लुतस्येत्यादिः। **यथेति** । प्रकृतिभावव्यतिरिक्तेऽपि रोरुत्वे यथा प्लुतस्य सिद्धत्वं ज्ञाप्यते [3]तथान्यत्रापीत्यर्थः। ननु प्रकृतिभावो न संहिताकार्यम्, अत आह — **एवमिति**। प्रकरणापेक्षं ज्ञापकमिति सिद्धे सतीत्यर्थः। प्रगृह्यत्वहेतुक इति विशिष्टपरम्, तेन प्रगृह्यत्वेऽपीत्यर्थः। कार्यकालपक्षे प्रगृह्यसंज्ञापि स्वरसंहितान्तःपातिन्येवेति। **प्रकृतिभाव एवेति**। प्लुतहेतुकेत्यादिः। भाष्ये **किमेतस्येति**। स्वरसंधिप्रकरणे प्लुतसिद्धत्वस्येत्यर्थः। **इतर इति**। विप्रतिपन्नप्रगृह्यत्वव्यतिरिक्तप्रयोजनं दर्शयतीत्यर्थः। **लाघवं** 'अप्लुतादप्लुते' इत्येतदवचनरूपलाघवम्। अवक्तव्यत्वमेवाह — **सिद्धे हीति**। तथा च परत्वान्नित्यत्वाच्च पूर्वं प्लुत इति भावः। शङ्कातात्पर्यमाह — [4]**यथोद्देश इति**। कार्यकालत्वे हेतुमाह — **कार्येति** । अङ्गानां प्रधानदेशकालत्वादित्यर्थः। **अनार्षः** अवैदिकः। उपस्थिते दोषं विशदयति — **अग्नी३इतीत्यत्रेति**। **प्रतिषिद्धे** [5]'अप्लुतवत्' इत्यनेन। **इष्यत इति**। तथा च स न स्यादिति दोष इत्यर्थः। [6]इष्टमेवाह — **तदाहेति**। [7]**प्लुतकार्यस्य** 'प्लुतः प्रकृत्या' इति विहितस्य, प्रतिषेधार्थं वर्तिं विना 'अप्लुत उपस्थिते' इति [8]'प्लुतस्य निषेधे प्रगृह्यप्लुतस्यापि निषेधप्रसङ्गः। तथा च [9]'अग्नी३ इति' इत्यत्र प्रकृतिभावो न स्यात्। ननु 'अप्लुतवत्' इत्युक्तेऽपि प्रगृह्यप्लुतस्य [10]प्रगृह्याश्रयः प्रकृतिभावोऽपि कस्मान्न[11] निषिध्यते, अत आह[12] — **अन्येनेति**। 'प्लुतः प्रकृत्या' इति विहितस्यैव'अप्लुतवत्' इति निषेधः, न तु 'प्रगृह्यः प्रकृत्या' इत्यनेन विहितस्येति वार्तिकार्थः। ननु प्लुताश्रयप्रकृतिभावप्रतिषेधेऽपि यदि प्रगृह्याश्रयः स्यात् तर्हि प्लुताश्रयप्रतिषेधो व्यर्थः, अत आह — **यत्रेति**। 'देवदत्ता३ इति' इति स्थिते 'देवदत्तेति' [इति] संधिरेव भवतीत्यर्थः। अतपराणामिति विशेषणपरं भाष्यमिति मत्वा चोदयति — **नन्विति**। भाष्ये 'अतपराणाम्' इति [13]जातिनिर्देश उक्तः, 'दीर्घाणाम्' इति ह्रस्वनिवृत्तिर्विवक्षितेत्याह — **अयमिति** । समाधानतात्पर्यमाह — **अयं भाव इति**। दीर्घाणां [14]सामान्योपलक्षणत्वे यत्नाधिक्येऽपि ह्रस्वनिवृत्तिर्न संभवतीति विशेषणत्वं वाच्यम्। तथा च [15]विशिष्टव्यक्तीनामेव सामान्यानां संज्ञेति[16] [17]ह्रस्वविशिष्टानामिव प्लुतविशिष्टानामपि न

---

[1] एवमाश्रयणे कार्यित्वेनाश्रयणे — अ.
[2] 'न तु प्रकृतिभाव एव' इति तुशब्दघटितः पाठः प्रदीपे दृश्यते।
[3] तथान्यस्यापीत्यर्थः — अ.
[4] यथोद्देशमिति — म, आ, ई, उ, ऊ.
[5] पा. सू. ६. १. १२९.
[6] इष्टमेवाह — म, आ, उ.
[7] प्लुतकार्यस्येत्यादि वार्तिकार्थविवरणम्।
[8] 'प्लुतस्य' इति नास्ति — उ.
[9] अग्नी इत्यत्र — अ, म, आ, उ, ॠ.
[10] प्रगृह्याश्रयप्रकृति — म, आ, इ, उ, ऊ, ॠ.
[11] 'न' इति नास्ति — अ.
[12] 'आह' इत्यस्यानन्तरं 'भाष्ये' इत्यधिकम् — म, उ.
[13] 'जाति' इति नास्ति — ॠ.
[14] सामान्येनोपलक्षणत्वे — अ.
[15] विशिष्टा व्यक्तयो येषामिति बहुव्रीहिर्बोध्यः।। विशिष्टजातीनामेव — म, उ; विशिष्टव्यक्तीनामिव — अ; दीर्घविशिष्टजातीनामेव — इ, ऊ.
[16] इतिशब्दो नास्ति — म, इ, उ, ऊ.
[17] अत्र ह्रस्वशब्दो भावप्रधानो बोध्यः। एवमुपरि प्लुतशब्दोऽपि।

स्यादेवेत्यर्थः। एकारस्याण्त्वेन सवर्णग्राहकत्वेऽपीदूतोरनण्त्वेनाग्राहकत्वात् तयोः [1]प्लुतविशिष्टयोः संज्ञा न स्यादेवेत्याह — **अनण्त्वादिति**। **बहुवचनमिति**। [2]'सृष्टीः, प्राणभृतः' [3]इत्यादिवदित्यर्थः। अस्मिन् [4]कल्पे व्यक्ति[5]निर्देशे [6]जातिनिर्देशे वेष्टसिद्धिरित्याह — **तत्रेति**। कर्मधारयपक्षे दोषानुद्धारादाह — **प्लुत इति**। न च [7]प्लुतस्याश्रयात् सिद्धत्वमेव कुतो नोक्तमिति वाच्यम्, तथा सति न्यायेन पूर्वत्रासिद्धशास्त्रस्य बाधः स्यात्। न हि न्यायेन वचनबाधो युक्त इति [8]भाष्यकृता लक्षणाश्रितेत्याहुः[9]। शास्त्रीयकार्यं [10]एवासिद्धत्वम्। न च प्लुतव्यपदेशः शास्त्रीयं कार्यमित्याह — **नैष इति**। **तत्र** [11]बुद्ध्या कल्पने। [12]अनुनासिकनिषेधे प्लुतस्य सिद्धत्वेऽपि प्रगृह्यसंज्ञायां तस्यासिद्धत्वाच्चोद्यानुपपत्तिमाशङ्क्याह — **कार्येति**। ननु [13]'अप्रगृह्यस्य' इति पर्युदासेऽनुनासिकस्य

---

[1] प्लुतयोः संज्ञा — म, उ.

[2] सृष्टिः — अ, म, इ, उ, ऊ, ॠ.

[3] 'सृष्टीरुपदधाति' (तै. सं. का. ५. प्रश्न. ३. अनुवाक-४) इति श्रूयते। तत्र मीमांसाप्रथमाध्यायचतुर्थपादसप्तदशाधिकरणे विचारः— 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः' इति सूत्रेण सृष्टि(शब्दवान्)मान् आसामुपधानो मन्त्र इत्यर्थे यत्प्रत्यये मतुब्लुकि छान्दसत्वाद्यत्प्रत्ययलोपे सृष्टिशब्दस्तच्छब्दघटितमन्त्रोपधेयेष्टका वदति। अत्र वाक्ये उपधानगुणत्वेन ते मन्त्रा विधीयन्ते, उपदधातीत्याख्यातसंबन्धात्। न चार्थवादत्वमस्य युज्यते, विध्यन्तरैकवाक्यत्वाभावात्, इति पूर्वपक्षे, अग्निचयनप्रकरणपठितत्वात् तेषां मन्त्राणां सामान्यतः प्राप्तत्वाल्लिङ्गेन विशेषसंबन्धावगमात् तानन्द्येष्टकोपधानं विधीयते। सृष्टिशब्देनानुवादस्तु 'यथासृष्टमेवावरुन्धे' इति वक्ष्यमाणार्थवादोपपत्त्यर्थः। तस्मान्मन्त्रानुवादी सृष्टिशब्दोऽर्थवाद इति सिद्धान्तः। ते च मन्त्राः 'एकयास्तुवत' इत्यारभ्य तैत्तिरीयसंहितायां चतुर्थकाण्डे तृतीयप्रश्ने नवमेऽनुवाके पठिताः सप्तदश। अत्र यद्यपि चतुर्दशस्वेव सृष्टिशब्दो वर्तते, न त्रिषु 'एकयास्तुवत प्रजा अधीयन्त' 'सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैताम्' 'त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्' इति। तथापि द्वितीयादिषु बहुषु मन्त्रेषु 'ब्रह्मासृज्यत, भूतान्यसृज्यन्त' इत्यादिना सृजधातोः प्रयुक्तत्वादेषां त्रयाणां सृजधातुरहितानामपि तत्साहचर्याल्लक्षणया सृष्टिशब्देन बोध्यत्वमिति। 'प्राणभृत उपदधाति' (तै. सं. ५. २. १०) इत्यत्रापि पूर्ववन्मन्त्रविधिरिति पूर्वपक्षः। तथैव लिङ्गप्रकरणप्राप्तमन्त्रानुवादेनेष्टकोपधानविधिरिति सिद्धान्तः। 'रेतस्येव प्राणान् दधाति' इति वक्ष्यमाणार्थवादोपपत्त्यर्थं प्राणभृच्छब्देन मन्त्रानुवादः। पूर्वत्र द्वितीयादिमन्त्रेषु बहुषु सृष्टिलिङ्गमुपलभ्यते। अत्र तु प्रथममन्त्रमात्रे 'अयं पुरो भुवस्तस्य प्राणो भौवायनः' (तै. सं. ४. ३. २.) इति प्राणभृल्लिङ्गमाम्नायते, नोपरितनेषु चतुर्षु। 'प्राणभृतः' इत्यनेन चतुर्णामपि विवक्षाप्रतीत्या प्राणभृच्छब्देन तत्साहचर्याल्लक्षणया पञ्चापि मन्त्रा बोध्यन्त इति 'लिङ्गसमवायात्' इति (मीमांसा. १. ४. १८. अधिकरणे) सिद्धान्तितम्। तदत्रानुसंधेयम्।

[4] पक्षे — म, उ.

[5] 'निर्देशे' इत्यनन्तरं 'वा' इत्यधिकम् — म.

[6] 'जातिनिर्देशे' इति नास्ति — ऊ.

[7] प्लुतस्याश्रयित्वात् सिद्धत्वमेव — म, उ.

[8] 'भाष्यकृता' इति नास्ति — म.

[9] विवरणकारा इत्यर्थः।

[10] एवकारो नास्ति — अ, इ, ऊ.

[11] बुद्धिकल्पने — म, उ.

[12] 'अनुनासिक' इत्यादि 'कार्येति' इत्यन्तं नास्ति — इ, उ, ऊ.

[13] पा. सू. ८. ४. ५७.

प्रगृह्यकार्यत्वाभावात् तत्र प्रगृह्यसंज्ञायाः कथमुपस्थानम्, अत आह — **ततश्चेति**। [1]'अप्रगृह्यस्य' इति प्रतिषेधः, तस्य प्रगृह्यसंज्ञाकार्यत्वमस्तीत्यर्थः। यद्यपि पर्युदासे एकवाक्यता, प्रतिषेधे वाक्यभेदः, तथाप्येतद्भाष्यसंगतये वाक्यभेदोऽङ्गीक्रियत इति भावः। भाष्ये **प्रगृह्यकार्यं** प्रतिषेधरूपम्। यथोद्देशपक्षमाक्षिपति — **कथमिति**। अभिसंधानमभिनयति — **भविष्यतीति**। अयं पक्षो मन्दमध्यमौ प्रतीत्याह — **यथेति**। उत्तमाधिकारिणं प्रति पक्षान्तरमित्याह — **महेति**। एवं पक्षद्वयस्यापि संभवे क्वचित् कश्चित् पक्षः [2]कार्यानुरोधेनाश्रीयत इति भावः॥

[१, २१४–२१७]

(**रत्नप्रकाशः**) **सिद्धः प्लुत इति**। तथा च परत्वात् प्लुते कृते तस्येदूद्ग्रहणेनाग्रहणात् प्रगृह्यसंज्ञा न स्यादिति भावः। **सतो हि कार्यिण इति**। स्वरसंधिषु प्लुते सिद्धे सत्येव यणादिप्रसक्तौ प्लुतस्य प्रकृतिभावो विधातुमुचित इति प्रकृतिभावविधानं प्लुतस्य तत्र सिद्धत्वं ज्ञापयतीति भावः। एतेन "असिद्धत्वे 'प्लुतः प्रकृत्या' इत्येवमाश्रयणायोगात् कार्यित्वेनाश्रयणादसिद्धत्वाभावोऽनुमीयते। सामान्येन च स्वरसंधिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते, न तु प्रकृतिभाव एव, यथा रोरुत्व एव। सोत्सर्गं सापवादं च प्रकरणमिति प्रकृतिभावेऽपि प्रगृह्यत्वहेतुके सिद्धत्वमुच्यते" इति निरस्तम्। 'अनुमीयते' इत्यन्तग्रन्थेनोत्वं प्रति रुत्वमिव प्रकृतिभावं प्रति प्लुतः सिद्ध इत्यनुमीयत इत्यर्थस्यैव प्रतीत्या तादृशीं दुष्टां फक्किकां लिखित्वा तस्याः सामान्यतः स्वरसंधिप्रकरणपरत्वप्रतिज्ञया ज्ञापकत्वोपपादनेनाचातुर्यस्य प्रकटनात्। उत्वं प्रति रुत्वस्येव प्रकृतिभावं प्रत्याश्रयात् सिद्धत्वमाश्रित्यैव तदानर्थक्यपरिहाराय तेन प्लुतस्य स्वरसंधौ सिद्धत्वं ज्ञाप्यत इति वक्तव्यत्वेन प्रकृतिभाव एव सिद्धत्वं ज्ञाप्यत इति मूर्खेणाप्यवक्तव्यतया तन्निराकरणस्यात्यन्तमौर्ख्यावहत्वात्। प्रगृह्यसंज्ञां प्रत्येव प्लुतसिद्धत्वस्य शङ्कित्वा साधयिष्यमाणत्वेन प्रगृह्यत्वाश्रितप्रकृतिभावं प्रति प्लुतसिद्धत्वकथनस्यात्यन्तासंबद्धप्रलापत्वाच्च। **किमेतस्य ज्ञापन इति**। प्लुतशब्देन प्लुतभावी लक्षणीयः। तथा च तस्य प्रकृतिभावविधानमुपपद्यत एवेति तदपहाय प्लुतशब्दं शक्यार्थपरमेवाश्रित्योक्तार्थज्ञापकत्वं किमर्थमाश्रीयत इति भावः। एतेन 'प्रकृतिभाव एवाश्रयात् सिद्धत्वमस्त्विति प्रश्नः' इति निरस्तम्। प्रकृतिभावं प्रत्याश्रयात् सिद्धत्वमात्रेऽभ्युपगम्यमाने तत्प्रकृतिभावानर्थक्यानिराकरणात्। **एतन्न वक्तव्यमिति**। [3]'अतो रोः' इत्येव सूत्रं कर्तव्यम्। तत्र प्लुतस्य सिद्धत्वेन दीर्घस्येव तस्यापि तपरकरणेनैव वारणादिति भावः। उपलक्षणं च तज्ज्ञेयम्, अप्लुतवत्त्वातिदेशोऽप्युपपन्न इत्यस्य। तथा च सिद्धत्वज्ञापनाश्रयणे लाघवादिकं प्रयोजनमिति फलितम्। ननु स्वरस्य स्वरे परे यत्कार्यं क्रियते तत् स्वरसंधिशब्देनोच्यते। प्रकृते च रेफस्याचि परे उत्वं क्रियत इति हल्संधिरेवायं भवतीति कथमत्र प्लुतस्य सिद्धत्वमिति चेन्न, स्वरसंधिशब्दस्य स्वरसंधिप्रकरणपरत्वात्, उत्वस्य च तत्प्रकरणान्तर्गतत्वात्। सिद्धान्त्याह — **किमतो यत् सिद्ध इति**। **संज्ञाविधावसिद्ध इति**। यथोद्देशपक्षे न्यायसिद्धे लघुभूत आश्रिते [4]तस्य स्वरसंधिप्रकरणानन्तर्गतत्वादिति भावः। तं भावमजानन् कार्यकालपक्षाज्ञानेनैव तथोक्तमिति मन्यमान आह — **संज्ञाविधौ चेति**। **कार्यकालमिति**। [5]'शासिवसिघसीनां च' इत्यत्र घसिग्रहणेन ज्ञापितेयं परिभाषा गौरवावहापि लक्ष्यानुसारेण क्वचिदाश्रीयते, न तु सर्वत्रेति ज्ञाना-

---

[1] पा. सू. ८. ४. ५७.
[2] कार्यानुरोधेनाङ्गीक्रियत इति — अ; कार्यानुरोधेनाश्रित इति – उ.
[3] पा. सू. ६. १. ११३.
[4] संज्ञाविधेरित्यर्थः।
[5] पा. सू. ८. ३. ६०.

भावादेतत्परिभाषा वाचनिकी सार्वत्रिकी चेति मन्यते। एतेन 'कार्यार्थत्वाद् गुणानां कार्यस्य च प्राधान्यात् प्रधानदेशत्वस्य न्याय्यत्वादित्यर्थः' इति निरस्तम्। शाल्यादिक्षेत्राणां पुरुषार्थत्वेऽपि पुरुषसदेशत्वादर्शनात्। नामकरणस्य व्यवहारार्थस्यापि व्यवहारकालत्वादर्शनाच्च। [1]'तुष्यतु दुर्जनः' इति न्यायेन कार्यकालपक्षमभ्युपेत्यैव प्लुतस्य प्रगृह्यत्वे प्रयोजनं पृच्छति — **किं पुनरिति। उपस्थित इति**। अनार्ष इतिशब्द इत्यर्थः। 'अप्लुतवदुपस्थित इत्यत्र' इति तु मन्दबुद्धचनुग्रहाय केनचिदुपरि लिखितं सत् मूर्खलेखकेन मूलमध्ये लिखितम्। न ह्येतादृशी भाष्यकारशैली दृश्यते। **पठिष्यति हीति**। [2]'अप्लुतवदुपस्थिते' इति सूत्र इति शेषः। **प्रगृह्याप्लुतेति**। यस्य प्लुतस्य प्रगृह्यसंज्ञा भाविनी तस्येत्यर्थः। ननु वत्करणे सति तेनाप्लुतकार्यस्य यणादेरतिदेशात् प्लुतत्वप्रगृह्यत्वोभयाश्रितमपि प्रकृतिभावं बाधित्वा यणादिप्रवृत्तौ वत्करणाभावे यल्लक्ष्यं सिध्यति तदेव वत्करणेऽपीति व्यर्थमेव तत्र वत्करणमित्यत उक्तम् — **अन्येन विहितत्वादिति**। [3]'अप्लुतवत्' इत्यनेनाप्लुतवद् व्यवहर्तव्य इति व्यपदेशमात्रेऽतिदिष्टेऽन्येनैव [4]'इको यणचि' इत्यादिना यणादेर्विहितत्वात् तस्य च प्रगृह्याश्रयप्रकृतिभावेन बाधात् प्लुतस्य श्रवणं भवति। वत्करणाभावे तु तन्नेति वैषम्यमिति भावः। तदेवं कार्यकालपक्षाश्रयेण मन्दबुद्धयापादितं दूषणं [5]'तुष्यतु दुर्जनः' इति न्यायेनाङ्गीकृत्य [6]पक्षान्तरे विचारयितुं परिगृह्णाति — **यदि पुनरिति**। एवं तर्हीत्यर्थः। **दीर्घाणामतपराणामिति**। 'ईदादीनां तपराणाम्' इत्यत्रैव वैयधिकरण्यं सामानाधिकरण्यं वा षष्ठ्योर्ज्ञेयम्। एतेन 'ननु व्यक्तिपक्षाश्रयणात् प्लुतानां न सिध्यति, न पुनस्तपरत्वात्। अयमत्राशयः — आकृतिपक्ष आश्रयिष्यते। दीर्घोच्चारणप्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति, प्लुतानां तु प्रवर्तिष्यते' इति निरस्तम्। व्यक्तिपक्षाश्रये सत्येव ग्रहणकशास्त्रे ह्रस्वदीर्घप्लुतादिवृत्तेरत्वादिजातेरकारादिशक्यतावच्छेदकतया कल्पनीयत्वेन व्यक्तिपक्ष इव जातिपक्षेऽपीदूतोरनणोरित्वोत्वजातिबोधकत्वासंभवात्। तपरत्वपरित्यागे एकारांशे प्लुतग्रहणस्य जायमानत्वेन तावतैव तपरपक्षादतपरपक्षे विशेषसिद्धया ईदूतोः प्लुतग्राहकत्वोपपादनक्लेशस्य व्यर्थत्वाच्च। एतेन **'एवमपीति**। अयं भावः — आकृतिपक्षे यथा ह्रस्वानां प्रयत्नाधिक्यान्न भवति, तथा दीर्घोच्चारणसामर्थ्याद् विशिष्टव्यक्तिस्थैवाकृतिर्गृह्यत इति प्लुतानां न स्यात्। यथा स्थूलं गामानयेत्युक्ते न कृशस्यानयनं भवतीत्याकृतिपक्षेऽपि विशिष्टैव व्यक्तिर्गृह्यते। तथा चानण्त्वादीदूतौ ग्राहकौ न स्याताम्' इत्यपि निरस्तम्। गोत्वादिजातिवद्ध्रस्वदीर्घप्लुतसाधारण्येनानुगतानुभवसिद्धजातिविशेषस्याभावेनाकृतिपक्षाश्रयणस्यैवात्रासंभवेन तत्स्वीकारेणात्यन्तासंबद्धप्रलापमात्रेण समाधानानौचित्यात्। स्थूलकृशादिशब्दवदिकारेकारादिशब्दानां भिन्नशक्यतावच्छेदकविशिष्टपरत्वमेव हि लोकसिद्धम्। तदभिप्रायेणैव तदुक्तदृष्टान्तदार्ष्टान्तिकभावोऽप्युपपन्नो भवति। ग्रहणकशास्त्रबलाद् उदित्ककारादिशक्यतावच्छेदकस्य कखगघङादिवृत्तेः कुत्वादेरिवाण्रूपाकारादिशक्यतावच्छेदकस्य ह्रस्वदीर्घप्लुतादिवृत्तेरत्वादेः स्वीकारेऽपि न तद्बलेनाकृतिपक्ष आश्रयितुं शक्यते। अन्यथा जातिपक्षे ककारादिशब्दोऽपि कुत्वादिविशिष्टानां कखगघङादीनां बोधकः स्यात्। एतेन [7]'सवर्णेऽण्ग्रहणप्रत्याख्यानमपि वार्तिककारकृतमसंबद्धमिति सिद्धम्। उदिद्ग्रहणस्वीकारेणाण्ग्रहणप्रत्याख्यानस्यार्धजरतीयत्वात्। **अनण्त्वादिति**। अणुदित्सूत्रेऽण्ग्रहणेनाक्षरसमाम्नायिकानामेव बोधनादिति भावः। ननु अणुदित्सूत्रप्रवृत्त्युत्तरमनुसंधीयमाने "अकः सवर्णे दीर्घः' इत्यादावगादिपदेनेव पुनरनुसंधीयमानेऽणुदित्सूत्रे-

---

[1] लौ. न्या. द्वितीयभागे पुटम् ३५.
[2] पा. सू. ६. १. १२९.
[3] पा. सू. ६. १. १२९.
[4] पा. सू. ६. १. ७७.
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[6] द्वितीयाद्विवचनमिदम्।
[7] सवर्णग्राहकसूत्र इत्यर्थः।
[8] पा. सू. ६. १. १०१.

ञ्णपदेनाकारादीनामपि ग्रहणात् तेषामपि सवर्णग्राहकत्वं भविष्यति। न च पुनरनुसंधीयमानस्यार्थविशेषपरत्वमप्रसिद्धमिति वाच्यम्, [1]'आदिरन्त्येन सहेता' इति सूत्रस्य तथा दर्शनात्। तद्धि प्रथमं हकारसमीपलकारमात्रपरेत्पदघटिततया अल्हल्वल्रल्झल्शल्प्रत्याहारमात्रबोधकम्। तदनन्तरं तु हलननुनासिकाजुभयवाचकेत्पदघटिततया रप्रत्याहारबोधकमिति चेत्, सत्यम्, ग्रहणकशास्त्रस्य प्रथमप्रवृत्तिलब्धार्थमादायैव सर्वत्र निर्वाहस्य कर्तुं शक्यत्वात् तस्य पुनरनुसन्धानलब्धार्थविशेषो नाश्रयणीय इत्याशयेनैवमुक्तमिति ज्ञेयम्। **ह्रस्वानामिति**। [2]आगमशास्त्रमर्यादया एकारस्यापि ह्रस्वत्वात् ह्रस्वशब्दस्य वा छत्रिशब्दवत् तद्घटितलक्षकत्वाद् बहुवचनोपपत्तिः। इदानीं यथाश्रुतमेव सूत्रं व्यवस्थापयति — **तस्मादिति**। यस्मात् प्रकारान्तरं न संभवति तस्मादित्यर्थः। यद्यप्यतपरपक्ष एकारस्य प्लुतग्राहकत्वात् तपरपक्षापेक्षयाधिकलक्ष्यसिद्धिर्भवति, तथापि ईकारोकारांशे तस्मिन्नपि पक्षे स्थानिवद्भावेनैव प्लुतस्य प्रगृह्यसंज्ञा संपादनीया। तथा चैकारांशेऽपि तेनैव प्लुतस्य प्रगृह्यसंज्ञा भविष्यतीति यण्निवृत्तिद्वारा ईकारादिस्वरूपप्रतिपत्तिरपि स्फुटा भवतीति तपरपक्ष एव समीचीन इति भावः। **प्लुतभावीति**। प्लुतो भावी यस्य स इत्यर्थः। ननु प्लुतस्यासिद्धत्वात् 'प्लुतभावी प्रकृत्या' इत्येवमप्याश्रयणं न युज्यत इति चेन्न, प्लुतस्यासिद्धत्वादेव प्लुतशब्दस्य प्लुतभाविलक्षकताया आश्रितत्वेन तत्र [3]प्लुतासिद्धत्वस्य गुणत्वेन दोषत्वाभावात्। [4]"उत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चासिद्धवचनम्' इति भाष्ये आदेशशब्देन निष्पन्नस्यैवादेशस्य ग्रहणात्। प्रकृतेऽनिष्पन्नत्वादेवादेशस्याश्रवणाच्च। एतेन 'प्लुतोऽसिद्ध इति व्यवहारवत् प्लुतभावीत्यत्रासिद्धत्वं न' इति निरस्तम्। लोकव्यवहारं प्रति त्रैपादिकासिद्धताया अबोधितत्वेन वैषम्यात्। कार्यकालपक्षमाश्रित्याह — **एवमपीति**। **किं न एतेनेति**। ज्ञापकसिद्धेन गौरवग्रस्तेन क्वाचित्केनेति शेषः। **यथोद्देशमेवेति**। लाघवानुगृहीतं न्यायसिद्धं सार्वत्रिकमिति शेषः। एतेन 'कथं पुनरयं पक्षः, यावता कार्यार्थत्वात् संज्ञापरिभाषस्य कार्यकालतैव न्याय्या। नैष दोषः, यदानुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमभिसंधाय भविष्यति किंचिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते तदा संभवत्येवायं पक्षो यथाश्रुतग्राहिप्रतिपत्त्रपेक्षः। महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्त्रपेक्षस्तु कार्यकालपक्षः' इति निरस्तम्। महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्त्रपेक्षयैव भाष्यकृता यथोद्देशपक्षस्य स्थापितत्वात्। महावाक्यार्थपर्यालोचनासमर्थानामस्मदादीनां कार्यकालपक्षाश्रयणासंभवापत्त्या तत्पक्षानर्थक्यापत्तेश्च। **तत्काला एवेति**। तथा च तेषां [5]प्रगृह्यसंज्ञायां सत्यां प्लुते जाते [6]तस्य स्थानिवत्त्वेन प्रगृह्यसंज्ञा भविष्यतीति भावः। अन्यत् सर्वं प्रागेवोक्तम्॥

---

[1] पा. सू. १. १. ७१.

[2] अत्र स्फुटमाशयो न ज्ञायते। 'प्रकृत्यान्तःपादमव्यपरे' इत्यस्मिन् विषये 'सात्यमुग्रिराणयनीया अर्धमेकारमर्धमोकारं चाधीयते' इति भाष्ये उच्यते। अत्र कैयटः 'अन्तःपादस्थस्याव्यपरस्याकारस्य अर्धमेकारमर्धमोकारं च विदधति' इत्याह। अकारस्य स्थाने आदेशत्वेनार्धैकारस्य विधानात् 'सुजाते ए अश्व' इत्यकारलेखः प्रामादिक इति नागेशः। परं तु शब्दकौस्तुभेऽप्ययं पाठो दृश्यते। तेनायमर्धैकारः एङोऽव्यपरेऽति परे आगमरूपत्वेनाभिसंहितः स्यादिति भाति। तदभिप्रायेणात्रैवमुक्तं स्यादिति भाति।

[3] प्लुतसिद्धत्वस्य — ब.

[4] महाभाष्यम् ६. १. ८६.

[5] प्रगृह्यसंज्ञायां तस्य प्लुते — ब.

[6] प्लुतस्येत्यर्थः।

[१, २१४-२१७]

(**नारायणीयम्**) प्लुतशब्देन प्लुतभाविलक्षणात् सत एव [1]कार्यविध्युपपत्तेः कथमसतस्तद्विध्यनुपपत्त्या [2]प्लुतसिद्धत्वज्ञापनम्, अत आह — **असिद्धत्व इति**। मुख्यमादाय ज्ञापनसंभवे न लक्षणोचितेति भावः। नन्वाश्रयात् प्रकृतिभाव एव तस्य सिद्धत्वमस्त्वित्यत आह — **सामान्येनेति**। **यथेति**। व्यतिरेकदृष्टान्तः — यथा तत्रोत्व एव सिद्धत्वमाश्रितं नेह तथेति। यदि च प्लुतस्य प्रकृतिभाव एव सिद्धत्वं स्वरसन्धावसिद्धत्वं तदा स्वरसन्धेस्तस्मिन् प्राप्तत्वात् प्रकृतिभाववचनमनर्थकम्। ननु प्लुतस्य प्रगृह्यत्वं प्रगृह्याश्रयप्रकृतिभावार्थं प्रार्थ्यते। स च प्रकृतिभावो न स्वरसन्ध्यन्तर्गत इति तस्मिन् प्लुतस्यासिद्धत्वान्नास्त्यनिष्टमित्यत आह — **सोत्सर्गमिति**। अत एव प्रकरणस्योभयानुगतत्वात् 'सामान्येन' इत्युक्तं प्राक्। **उच्यत इति**। 'सिद्धः प्लुतः स्वरसन्धिषु' इति स्वरसन्धिपदेन तस्यैव विवक्षितत्वात्। ननु सिद्धत्वाज्ञापने स्वरसंधिः प्लुतस्य स्यात्, तत्कथं प्रयोजनप्रश्न इत्यत आह — **प्रकृतीति**। सामान्यज्ञापनस्य फलं पृच्छचत इत्यर्थः। अनन्यथासिद्धं फलं वाच्यमित्यत आह[3] — **इतर इति**। अन्यदेशे पठितस्य कथमन्यदेशत्वम्, अत आह— **कार्येति**। देशान्तरपाठस्त्वनेकोपकाराय। तदुक्तं हरदत्तमिश्रैः —

[4]अनेकस्य प्रधानस्य शेषभूता भवन्त्विति।
एताः केवलमाचार्यः पृथग्देश उपादिशत्॥ इति॥

दोषं विशदयति — **अग्नी इतीति**। 'वद्वचनम्' इति षाष्ठिकवार्तिकस्यायमर्थः — वत्करणेऽसति प्लुतस्यैव प्रतिषेधः स्यात्, न तु तत्कार्यप्रकृतिभावस्येति वत्करणम्। [5]न तु विशेषः स्वरसन्धौ सतीत्यत आह — **प्लुतेति**। [6]यदि हि प्लुतप्रतिषेधस्तदा प्रगृह्यसंज्ञाविषयेऽपि निषेधात् प्लुतश्रवणं न स्यात्। तत्कार्यनिषेधे तु प्लुताश्रयप्रकृतिभावनिषेधेऽपि प्रगृह्याश्रये तस्मिन् प्लुतश्रवणं सिध्यतीति। [7]अन्येन प्रगृह्यग्रहणेन। 'यदि पुनः' इति ग्रन्थः किं व्यक्तिपक्षाश्रयेणाकृतिपक्षाश्रयेण वा। नाद्य इत्याह —**नन्विति**। द्वितीये त्वतिप्रसङ्गं परिहरन् चोदकाभिप्रेतत्वं तस्याह — **अयमिति**। चोदकाभिप्रायानवबोधेन न परिहारः, तथा सति तदभिप्रायस्याविष्कृत्य [8]निरस्यत्वात्, अतो गूढाभिसंधिचोद्यस्य परिहारोऽपि तथेति मन्वानोऽभिसंधिं प्रकटयति — **अयमिति**। [9]**स्थूलमिति**। इतरानुपादानमात्रे दृष्टान्तः। [10]मध्यमपरिमाणानयनचोदनायां न्यूनाधिकपरिमाणानयनाभावस्तु सर्वसाम्य उदाहार्यः। **इतीति**। इतिर्हेतौ। यतो विशिष्टव्यक्तिस्थाकृतिर्गृह्यतेऽत आकृतिपक्षेऽपि [11]विशिष्टा व्यक्तिर्गृह्यत इत्यन्वयः। गूढाभिसंधिं विवृत्य यथाश्रुतं व्याचष्टे — **तथा चेति**। पक्षद्वयेऽपि विशिष्टव्यक्तिपर्यवसानाद् ग्रहणकशास्त्रेण विना न व्यक्त्यन्तरग्रहणमित्यर्थः। एकारोऽपि ह्रस्वो निर्दिश्यत इति भ्रमं वारयति — **ह्रस्वेति**। तद्ध्रस्व[12]निर्देशेऽसदनुवादोऽनण्त्वादग्राहकता

---

[1] कार्यसिद्धयुपपत्तेः — क; कार्यासिद्धयुपपत्तेः — ख.
[2] प्लुतासिद्धत्व— ख.
[3] आह — तदेति। अन्यदेशे — ख.
[4] पदमञ्जर्यां पूर्वत्रासिद्धमिति सूत्रे। तत्र 'पृथग्देशा उपादिशत्' इति दृश्यते।
[5] ननु विशेषस्वर — क, ख.
[6] यदा हि — ख.
[7] अनेन — क.
[8] निरस्तत्वात् — ख.
[9] स्थूलामिति — क, ख.
[10] मध्यमपरिमाणेति बहुव्रीहिः, एवं न्यूनाधिकपरिमाणेत्यपि।
[11] विशिष्टव्यक्तिः — ख.
[12] निर्देशेऽनुवादः — क.

च स्यात्। षष्ठीसमासभ्रमं वारयति — **प्लुत इति**। यस्य हि विकारप्राप्तिस्तस्य प्रकृतिभावो वाच्यः। न च प्लुतस्यासिद्धत्वाद् विकारप्राप्तिरिति तद्भाविलक्षणा। **न च तत्रेति**। शास्त्रीयकार्येऽसिद्धत्वम्, न बुद्धिपरिकल्पनं शास्त्रीयं कार्यम्। अनुनासिकनिषेधे प्लुतस्य सिद्धत्वेऽपि प्रगृह्यसंज्ञायामसिद्धत्वाच्चोद्यानुपपत्तिमाशङ्क्याह — **कार्येति**। [1]'पक्षान्तरैरपि परिहारा भवन्ति' इति न्यायमभिप्रेत्याह — **यथेति**। पक्षयोः साम्येऽयं न्यायः, इह तु न साम्यमिति शङ्कते — **कथमिति**। न्याय्यत्वान्याय्यत्ववैषम्यं परिहरति — **नेति**। इदं तु वैषम्यं नैकतरप्राबल्यकारणमित्यभिसन्धायाह — **यथेति**॥

[१, २१७–२२०]

(**लघुविवरणम्**) [2]प्रथमातिक्रमे कारणं नास्तीत्यभिप्रेत्याह — **ईदादय इति**। **द्विवचनान्तत्वं** [3]द्विवचनावयवकत्वमित्यर्थः। संनिहितासंनिहितयोः संनिहितस्यैव [4]संज्ञित्वं न्याय्यमित्यभिप्रेत्याह — **अथेति**। ननु [5]प्रथमातिक्रमे कारणाभावात् 'एकस्य विधिः' इत्यत्रेदूतावुदाहर्तव्यावित्यत आह — **ईदूतोरिति**। तच्छब्देनेदादयः परामृश्यन्त इति शङ्कां निवर्तयति — **द्विवचनान्तमिति**॥

[१, २१७–२२०]

(**विवरणम्**) **ईदादय इति**। प्राथम्यात् [6]'अदसो मात्' इत्यनेनैकरूप्याच्चेति शेषः। [7]**तदेति**। अन्तशब्दस्यावयववचनत्वात् [8]'तदन्तस्येति बहुव्रीहित्वाच्चेत्यर्थः। **अथेति**। आनन्तर्यात् [9]'येन विधिस्तदन्तस्य' इत्यस्यानुग्रहार्थं चेत्यर्थः। 'अप्रधानेन' इत्यनेन तदन्तस्येति बहुव्रीहिरित्याह। अशाब्दस्य वचनसामर्थ्यादपि कथं [10]स्यादित्यत आह — **द्विवचनेति**। **गौणस्येति**। जघन्यतासामान्येन लाक्षणिकं गौणशब्देनाभिप्रेतम्। ननु 'खट्वे' इति यथा द्विवचनमसहायम् एवम् 'अग्नी, वायू' इत्यत्रापीति [11]प्राथम्यान्नेदूतावतिक्रमणीयावित्यत आह — **ईदूतोरिति**। ईदूतोर्विशेषणत्वेऽपि [12]तदन्तविधिबाध इति भावः। एति तु [13]तदन्तविधिरेदन्तसंभवान्न बाधनीय इति भावः। **नाश्रितं** वार्तिककृतेति भावः। **प्रत्ययेति**। [14]'यस्मात् प्रत्ययविधिः' इत्यनेन साधिता प्रत्ययग्रहणपरिभाषा [15]'येन विधिस्तदन्तस्य' इत्यस्मात् परेति सा पूर्वं प्रवर्तत इति भावः। **आदेशेनेति**। [16]'तवकममकावेकवचने' इत्येकार्थयोर्युष्मदस्मदोर्विहितेनेत्यर्थः। **प्रकृतिभावेन** अन्यथानुपपद्यमानेनेत्यर्थः। **प्रतिविधानार्थं** प्रत्ययलक्षणनिरासार्थमित्यर्थः। **सुतरामिति**। अनाश्रयणादाश्रयणं गुरु, अकरणाच्च

---

[1] महाभाष्यम् माहेश्वरसूत्रम् २. पक्षान्तरेऽपि — क.
[2] प्रथमातिक्रमणे — ड, ढ.
[3] द्विवचनावयवत्वमित्यर्थः — ड, ढ.
[4] संज्ञात्वं — ड, त.
[5] प्रथमातिक्रमणे — ड, ढ.
[6] पा. सू. १. १. १२.
[7] 'तदेति' इत्यादि 'अशाब्दस्य' इत्यन्तं नास्ति — च, छ.
[8] 'तदन्तस्येति' इत्यस्यानन्तरं चकारोऽधिकः — ञ.
[9] पा. सू. १. १. ७२.
[10] प्रगृह्यसंज्ञेति शेषः।
[11] 'प्राथम्यात्' इति नास्ति — च, छ, ञ, ट.
[12] तदन्तविधिर्बाधत इति — च, छ.
[13] तदन्तविधिरेतदन्त — ट.
[14] पा. सू. १. ४. १३.
[15] पा. सू. १. १. ७२.
[16] पा. सू. ४. ३. ३.

करणं गुरु, तस्य च ज्ञापकत्वेनाश्रयणमिति सुतरां गौरवमित्यर्थः। श्रुतस्य श्रुतेन तदन्तविधिरन्तरङ्गः, श्रुतस्य च श्रुतेन संबन्धोऽन्तरङ्ग इति पूर्वमीदादिभिर्द्विवचनस्य तदन्तविधिरिति 'ईदादिभिः' इति पक्षान्तरं भाष्ये दर्शितम्। तस्य फलं दर्शयति — [1]**अत्रेति**। **साक्षादिति**। द्विवचनमनपेक्ष्येत्यर्थः। **समुदायस्य** प्रत्ययान्तस्येत्यर्थः। **च्विप्रत्ययः** तस्य च सर्वापहारी लोप इत्यर्थः। **शीशब्दस्येति**। तद्धितान्तत्वेन प्रातिपदिकत्वे प्रातिपदिकावयवत्वाच्छीशब्दस्येत्यर्थः। **तस्येति**। [2]'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वे सतीति शेषः। **ईकारान्तमिति**। अन्तवद्भावेनेत्यर्थः। अत्र पक्षे न द्विवचनेनेदादि विशेष्यत इति कथम् 'ईदादि च द्विवचनम्' इति भाष्यमित्यत आह — **ईदादीति**। यच्छ्रूयते सूत्रे द्विवचनं तदीदाद्यन्तमिति भाष्ययोजनामभिप्रेत्य तात्पर्यार्थमाह — **तदन्तविधिरिति**। अनित्यो लुक्, शीभावो नित्यश्चेदतुल्यबलत्वात् 'परत्वात्' इति पूर्वोक्तमनुपपन्नं स्यादिति 'शीभावोऽप्यनित्यः' इत्युक्तं भाष्ये। 'अग्नी' इत्युपलक्षणम्, खट्वे इत्यपि द्रष्टव्यम्। तृतीयोऽपि मध्यमो भवतीति तद्व्युदासायाह — **द्वितीय इति**। **अप्रमाणं** वृत्तिकारोक्तमित्यर्थः॥

[१, २१७–२२०]

(**उद्द्योतनम्**) **ईदादय इति**। प्राथम्यात् [3]'अदसो मात्' इत्यनेनैकरूप्याच्चेत्यर्थः। **तदेति**। अन्तशब्दस्यावयववाचित्वात् 'तदन्तस्य' इत्यस्य बहुव्रीहित्वाच्चेत्यर्थः। यद्यपि [4]'आद्यन्तवदेकस्मिन्' [5]'इतीदूदेतां द्विवचनानां द्विवचनान्तत्वं संभवति, तथापि फलतो विशेषाभावात् [6]सामानाधिकरण्येनैवान्वयो युक्त इति **भावः**। **अथेति**। आनन्तर्यात् [7]'येन विधिस्तदन्तस्य' इत्यस्यानुग्रहाच्चेत्यर्थः। 'अप्रधानेन' इत्यनेन 'तदन्तस्य' इति बहुव्रीहिरिति दर्शितम्। अवचनार्थे वचनात् कथं स्यात्, अत आह — **द्विवचनावयव इति**। अमुख्यत्वसाम्याल्लाक्षणिकं गौणशब्देनोक्तम्। 'खट्वे' इत्यत्रैकारस्य प्रातिपदिकान्तत्वान्न द्विवचनत्वम्, अत आह — **अन्तादिवदिति**। [8]'नन्वीदाद्यन्तपदस्याप्येकत्वात् 'एकस्य' इत्यनेन न तद्व्यावृत्तिः, अत आह — **असहायस्येति**। वर्णमात्रस्येत्यर्थः। ननु 'खट्वे' इत्यत्र यथा द्विवचनमसहायमेवम् 'अग्नी, वायू' इत्यत्रेदूतावपीति [9]'किमिति भाष्ये [10]'नोदाहृतौ, अत आह — **ईदूतोरिति**। **केवलयोरिति**। ससहायौ न संभवत इत्यर्थः। **वचनेति**। तदन्तविधिबाधेनेति भावः। **संभवादिति**। तथा च तत्र न तदन्तविधिर्बाधनीय इति भावः। ननु [11]'येन विधिस्तदन्तस्य' इत्यत्र [12]'स्वस्य च रूपस्य' इत्यङ्गीकारात् कथम् 'एकस्य विधिः' इति वार्तिकम्, अत आह — **येनेति**। **नाश्रितं** वार्तिककृतेत्यर्थः। [13]एतत्पक्षमुज्जीवयति

---

[1] तत्रेति — च, छ, ट.
[2] पा. सू. १. १. ३८.
[3] पा. सू. १. १. १२.
[4] पा. सू. १. १. २१.
[5] इतीदूदेद्द्विवचनं द्विवचनान्तं — म, आ; ईदूदेदन्तं द्विवचनान्तं — उ; ईदूदेद्द्विवचनान्तत्वम् — ऋ.
[6] सामानाधिकरण्येनान्वयः — म, उ.
[7] पा. सू. १. १. ७२.
[8] नन्वीदाद्यन्तस्याप्येकत्वात् — म, आ.
[9] तत्किमिति — अ.
[10] नोदाहृतम् — अ, आ, ऋ.
[11] पा. सू. १. १. ७२.
[12] 'स्वस्य च रूपस्य' इत्यादि 'वार्तिककृतेत्यर्थः' इत्यन्तं नास्ति — अ.
[13] 'एतत्पक्षम्' इत्यादि 'यस्मात्प्रत्ययविधिरित्यत्र' इत्यन्तं नास्ति — अ.

— **प्रत्ययग्रहण इति**। [1]'यस्मात् प्रत्ययविधिः' इत्यत्र 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य[2] ग्रहणम्' इति परिभाषा साधिता। सा परत्वात् [3]'येन विधिः' इत्यतः पूर्वं प्रवर्तत इति भावः। **चतुर्थेति**। 'ईदाद्यन्तं यद् द्विवचनं तदन्तम्' इति पक्षेत्यर्थः। 'दोषान्तरेण' इत्येतदेव विशदयति — [4]**दोषसद्भावेनेति**। **आदेशेनेति**। [5]'तवकममकावेकवचने' इत्येकार्थवाचिनोर्युष्मदस्मदोर्विहितेनेत्यर्थः। **प्रकृतिभावेन** अन्यथानुपपद्यमानेन। ज्ञापकत्वमुपपादयति — **ईदूताविति**। ज्ञापनप्रयोजनं कुमार्योरगारमित्यत्र प्रगृह्यसंज्ञाभाव एव। 'तर्तहि' इत्यनेन तृतीयकल्पे[6] गौरवं दूषणमुक्तम्। तद्विशदयति — **आद्यन्तवदिति**। **अयम्** अथवेति पक्षः। **प्रतिविधानार्थं** प्रत्ययलक्षणनिरासार्थम्। अनाश्रयणादाश्रयणं गुरु, अकरणात् करणं गुरु, तस्य ज्ञापकत्वाश्रयणमतिगुर्विति 'सुतराम्' इत्युक्तम्। श्रुतस्य श्रुतेनान्वयात् तदन्तविधिश्चान्तरङ्ग इति पूर्वमीदादिभिर्द्विवचनस्य[7] तदन्तविधिः, पश्चाद् 'द्विवचनेनेति 'ईदादिभिः' इति पक्षान्तरं भाष्य उक्तम्। तस्य प्रयोजनमाह — **अत्रेति**। **साक्षात्** द्विवचनव्यवधानं विना। **समुदायस्य** प्रकृतिप्रत्ययसमुदायस्य। अत्रातिव्याप्तिमुपपादयति — **शुक्लशब्दादिति**। **तत इति**। [9]'अभूततद्भावे' [10]इत्यनेन। **शीशब्दस्येति**। च्व्यन्तस्य तद्धितान्तत्वेन प्रातिपदिकत्वादित्यर्थः। **तस्येति**। [11]'तद्धितश्चासर्वविभक्तिः' इत्यव्ययसंज्ञायां सत्यामित्यर्थः। **ईकारान्तमिति**। अन्तवद्भावेनेत्यर्थः। अस्मिन् कल्पे द्विवचनं नेदादिविशेषणमिति 'ईदादि [12]च द्विवचनम्' इति भाष्यायोगमाशङ्क्याह — **ईदादिशब्देनेति**। यच्छ्रूयते सूत्रे द्विवचनं तदीदाद्यन्तमिति [13]भाष्ययोजनामभिप्रेत्य तात्पर्यार्थमाह — **तदन्तविधिरिति**। 'शुक्लचास्ताम्' इत्यत्र श्रूयमाणेकारपरत्वेनैव [14]व्याख्यायताम्, अत आह — [15]**यस्त्वयमिति**। भाष्ये [16]**अत्राप्यकृते शीभाव इति**। तथाच च्व्यन्तस्येदन्तद्विवचनान्तत्वाभावान्न प्रगृह्यत्वप्रसङ्ग इत्यर्थः। भाष्ये **शीभावे कृते लुगिति**। तथाच च्व्यन्तातिप्रसङ्गदोषः स्थित इत्यर्थः। अनित्ये लुकि शीभावो नित्यश्चेत् 'परत्वात्' इति पूर्वोक्तहेतुरसमर्थितः स्यादिति मत्वा भाष्ये 'शीभावोऽप्यनित्यः' इत्युक्तम्। उक्तरीत्या अनित्यत्वात् 'अथापि' इति भाष्यमयुक्तम्, अत आह — **स्थानीति**। एवं सति [17]'शब्दान्तरस्य प्राप्नुवन् विधिः' इति क्वापि न प्रवर्तेत, अत आह —**अथवेति**। [18]'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति परिभाषया लुग्बाधक इत्यर्थः। भाष्ये **एवमपि** च्व्यन्तेऽतिव्याप्त्यभावेऽपीत्यर्थः। नन्वतिव्याप्त्यादेरभावात् 'दोषः' इत्ययुक्तम्, अत आह — **पक्षस्येति**। 'अवश्यम्' इत्यस्य तात्पर्यमाह — **यदाश्रयणेति**। 'अग्नी' इत्युपलक्षणम्, वायू खट्वे इत्यपि ज्ञेयम्। तृतीयोऽपि मध्यमो भवति, अत आह — **द्वितीय एवेति**। **अप्रमाणं** मूलशून्यम्। एतत् 'मणीवादेर्न' इति वृत्तिकारवाक्यम्। उदाहरणानामन्यथासिद्धिमाह — **मणीवेति**।।

---

[1] पा. सू. १. ४. १३.
[2] 'तदन्तस्य' इत्यस्यानन्तरं चकारोऽधिकः —अ, आ, ऋ.
[3] पा. सू. १. १. ७२.
[4] दोषसंभवेनेति — अ, आ, इ, ऊ, ऋ.
[5] पा. सू. ४. ३. ३.
[6] कल्पे दूषणं गौरवमुक्तम् — अ.
[7] 'द्विवचनस्य' इत्यादि 'ईदादिभिः' इत्यन्तं नास्ति — आ, ऋ.
[8] द्विवचनेनेदादेरिति — म, उ.
[9] का. वा. ५. ४. ५०–१.
[10] इत्यादिना — म, उ.
[11] पा. सू. १. १. ३८.
[12] चकारो नास्ति — अ, म, आ, इ.
[13] भाष्ययोजनमभिप्रेत्य — अ, आ, ऋ.
[14] व्याख्येयम् — अ.
[15] यदयमिति — म, आ, इ, उ, ऋ.
[16] अत्राप्रकृते — अ, आ.
[17] परिभाषा ४३ .
[18] परिभाषा ५२.

[१, २१७-२२०]

(**रत्नप्रकाशः**) विशेषणविशेष्यभावे कामचारेण द्वेधा सूत्रार्थसंभवात् पृच्छति — **कथमिति**। **ईदादयो यद् द्विवचनमिति**। यदा ईदादयो द्विवचनेन विशेष्यन्ते तदा तदन्तविधितदभावयोर्विशेषाभावाद् द्विवचनान्तं द्विवचनरूपं वा ईदूदेत् ईदूदेद्रूपं द्विवचनमेव भवतीत्याशयेनैवमुक्तम्। ईदादिभिर्यदा द्विवचनं विशेष्यते तदा तदन्तविधिना विशेषावगतिर्भवतीति मत्वाह — **ईदाद्यन्तं यद् द्विवचनमिति**। एतेन "ईदादयो यदि संज्ञिनस्तद्विशेषणं तु द्विवचनं तदा द्विवचनान्तत्वमीदादीनां न संभवतीति द्विवचनानामेवेदादीनां संज्ञया भाव्यम्। अथ द्विवचनं संज्ञि, तद्विशेषणमीदादयस्तदा तदन्तविधिरप्रधानेन प्रधानस्येति 'ईदाद्यन्तं द्विवचनम्' इति पक्षः" इति निरस्तम्। हरी, विष्णू, गङ्गे इत्यादौ द्विवचनस्येदाद्यन्तत्ववदीदादेरपि द्विवचनान्तत्वसंभवात्। सर्वथा द्विवचनस्यैव संज्ञित्वस्य भगवता दर्शितत्वेन 'ईदादयो यदि संज्ञिनः' इत्यस्याप्ययुक्तत्वात्। वस्तुगत्या तत्पक्ष ईदादीनां संज्ञित्वसंभवेऽपि संज्ञिशब्दस्य विशेष्यपर्यायत्वाभावेन तदुपादानानौचित्याच्च। **अन्त्यस्येति**। द्विवचनस्य यदन्त्यं तस्येत्यर्थः। [1]**वचनादिति**। [एकारस्य द्विवचनस्याभावाद् द्विवचनशब्दसामर्थ्यात् तदन्त्ये लक्षणेति मन्यते। एतेन 'वचनादिति।'] द्विवचनावयवे द्विवचनशब्दो वर्तिष्यत इत्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वाभावात्। 'वचनात्' इति हेतोरनुपपादनात्। 'अस्ति वचने प्रयोजनम्' इत्युत्तरग्रन्थाननुगुणत्वाच्च। **खट्वे इति**। स्थानिवद्भावेनात्रैकारो द्विवचनम्। [2]"अन्तादिवच्च' इति हि प्रत्याख्यातम्। सूत्रकृन्मते तु तेनैवादिवद्भावात् स द्विवचनम्। तथाच शक्यार्थसंभवे द्विवचनशब्दस्तदन्त्यपर एदंशे न भविष्यतीति भावः। **एकस्येति**। मुख्येदूदन्तासंभवेन वचनसामर्थ्यात् तत्र व्यपदेशिवद्भावाङ्गीकारेऽप्येदन्तस्य मुख्यस्य संभवेन व्यपदेशिवद्भावाश्रयणं न युज्यत इति मन्यते। [3]"येन विधिस्तदन्तस्य' इत्यत्र तु स्वग्रहणं नानुवर्तते। [4]"तस्य च' इति वचनं यद्यपि तत्सूत्रगतप्रयोजनवार्तिकशेषतया वर्तते, [5]"वर्णग्रहणं च सर्वत्र' इति च तत्र प्रयोजनवार्तिकमस्ति, तथापि तदज्ञानमूलकमेवेदं बोध्यम्। एतेन [6]"'येन विधिस्तदन्तस्य' इत्यत्र [7]'स्वरूपस्येति नाश्रितमिति दोषोपन्यासः" इति निरस्तम्। 'अनाश्रितम्' इत्यनेन तत्र स्वरूपस्येत्यनुवर्तत एव, तेन चात्र स्वरूपस्यापि संज्ञा भवतीति सूचनात्। न चेष्टापत्तिः, तत्रत्येन [8]"तस्य च' इति वार्तिकेन तद्भाष्येण च विरोधात्। न च [9]"तस्य च' इति वचनमेव व्यर्थम्, 'स्वम्' इत्यस्यानुवृत्त्यैव सिद्धेरिति वाच्यम्; स्वग्रहणमुपेक्ष्य [10]"तस्य च' इति वचनस्यैव तत्र स्थापयिष्यमाणत्वात्। **न वेति**। तादृशे मुख्ये संभवत्यपि शास्त्रेऽस्मिन् व्यपदेशिवद्भाव आश्रीयत एव। तदर्थमेव [11]"आद्यन्तवदेकस्मिन्' इति व्यपदेशातिदेशस्वीकारादिति भावः। येनविधिसूत्रगतप्रयोजनवार्तिकशेषेण [12]"तस्य च' इत्यनेनापि सिद्धमेतदित्यन्यदेतत्। **अथवैवं वक्ष्यामीति**। शब्दस्वरूपस्य विशेष्यतासंभवेनेदादीनां द्विवचनस्य च विशेषणत्वमाश्रित्येति शेषः।

---

[1] 'वचनादिति' इत्यस्यानन्तरं 'ब' मातृकायां कियांश्चिद् ग्रन्थस्त्रुटितः। सोऽभ्यूह्य कुण्डलान्तर्निवेशितः।

[2] पा. सू. ६. १. ८५

[3] पा. सू. १. १. ७२.

[4] का. वा. १. १. ७२–१५.

[5] का. वा. १. १. ७२–२७.

[6] पा. सू. १. १. ७२.

[7] अर्थानुवादोऽयम्।

[8] का. वा. १. १. ७२–१५.

[9] का. वा. १. १. ७२–१५.

[10] का. वा. १. १. ७२–१५.

[11] पा. सू. १. १. २१.

[12] का. वा. १. १. ७२–१५.

एतेन [1]"'प्रत्ययग्रहणे यस्मात्' इति द्विवचनेन तदन्तविधिः। पश्चाद् द्विवचनान्तमीदादिभिर्विशेष्यत इत्ययं तृतीयः पक्षो भवति" इति निरस्तम्। 'प्रत्ययग्रहणे यस्मात्' इति परिभाषाया अङ्गसंज्ञासूत्रे 'यस्मात् प्रत्ययविधिस्तदादि प्रत्यये' इत्यंशं विभज्य भाष्यकृता साधितायास्तदन्तस्येति शब्दशून्यायास्तदादिनियमपरायास्तदन्तविधिपरत्वासंभवात्। कथंचित् तत्र तदन्तस्येति पदे व्यवस्थापितेऽपि [2]"प्रत्ययग्रहणं चापञ्चम्याः' इति [3]'येन विधिः' इति सूत्रे साक्षात् तदन्तविधिप्रयोजनप्रदर्शनपरवार्तिकस्य सत्त्वेन [4]"स्त्रीप्रत्यये नानुपसर्जने' इति निषेधानुरोधेन च तत्परिभाषायास्तदादिनियमपरताया एव स्वीकर्तुमुचितत्वात्। द्विवचनेन विशेषितस्यैवेदादिभिः पश्चाद् विशेष्यतेत्यत्र मानाभावात्। 'ईदाद्यन्तं यद् द्विवचनान्तम्' इति वदता भगवता ईदादिविशेषितस्यैव द्विवचनेन विशेषणाच्च। **द्विवचनान्तमिति**। यद्यपि [5]"संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति' तथाप्यस्य पक्षस्य परिष्कारोत्तरं भाष्यकार एव तद्वक्ष्यतीति नापूर्वम्। एतेन 'चतुर्थपक्षप्रतिक्षेपाय वक्ष्यत्येवैतद् भाष्यकारः' इति निरस्तम्। 'अथवैवं वक्ष्यामि' इत्येवंरूपां प्रतिज्ञां विनैव पक्षान्तरपरिग्रह [इत्यत्र मानाभावात्।] 'ईदादिभिर्द्विवचनं विशेषयिष्यामः' [6]इत्येव तत्र भाष्यकृता वक्ष्यमाणत्वेन तस्य तृतीयपक्षपरिष्काररूपताया एवौचित्येन चतुर्थपक्षपरिग्रहरूपत्वाभावात्। एतेन 'दोषान्तरेणैतं[7] पक्षं निराकर्तुमाह — **लुकि प्रतिषेध इति**। दोषसद्भावेनैवास्य पक्षस्य निराकरणात् तदन्तविध्यभावोऽत्र नोक्तः' इत्यपि निरस्तम्। 'एतम्' इत्यत्रैनादेशाकरणात्। 'दोषसद्भावेन' इत्यत्र दोषान्तर[8]सद्भावेनेत्यनुक्तेः। परिष्कारविशेषेणोक्तदूषणं परिहृत्य तदन्तविध्यभावोक्त्यैवास्य पक्षस्य निराकरिष्यमाणत्वाच्च। ननु [9]"सत्यम्' इत्यादि 'चोद्यम्' इत्यन्तग्रन्थेन व्यवधानात् 'दोषान्तरणैतम्' इत्यादेरन्वादेशत्वमेव नास्तीति न तत्रैनादेशप्रसक्तिरिति चेन्न, **अनु** पश्चात् आदेशोऽन्वादेश इत्येवान्वादेशशब्दार्थस्य प्रसिद्धत्वेन तत्रानुशब्दस्यानन्तर्यार्थकत्वाश्रयणे मानाभावात्। भाष्यगतादेशान्वादेशोदाहरणवाक्ययोर्मध्ये वाक्यान्तरप्रसक्त्यभावेनैवानन्तर्योपपत्तौ तदनुसारेणान्वादेशशब्दार्थसंकोचाभावात्। तत्संकोचे एतच्छब्देन तत्परामर्शस्यापि संकोचापत्तेश्च। **कुमार्योरगारमिति**। वृत्तौ विशेषणानामेकत्वविशिष्टतैव, न तु द्वित्वबहुत्वविशिष्टतेति त्वौत्सर्गिकम्, अर्थप्रकरणादिवशेन द्वित्वादिविशिष्टताया अपि संभवादिति भावः। एतेन 'कथं पुनरस्य द्विवचनान्तस्य समासः, यावता वृत्तौ संख्याविशेषो नावगम्यते। नैष दोषः। यथा तावकीन इत्यादावादेशेन संख्याविशेषो व्यज्यते तथेहापि सत्यां प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वं व्यज्येतेति दोषोपन्यासः' इति निरस्तम्। एकत्वस्यापि संख्याविशेषत्वेन सर्वत्रैव वृत्तौ संख्याविशेषस्य गम्यमानत्वेन शङ्कायास्तुच्छत्वात्। संख्याविशेषावगमे प्रगृह्यसंज्ञा, तस्यां च संख्याविशेषावगम इत्यन्योन्याश्रयेण समाधानस्यापि तुच्छत्वात्। वृत्तौ विशेषणानां प्रायेणैकत्वविशिष्टतायाः प्रतीयमानत्वेन 'यथा तावकीनः' इत्यादिनैकत्वसंख्याविशेषाभिव्यक्तेर्दृष्टान्ततानौचित्याच्च। **प्रत्ययलक्षणेनेति**। [10]"प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रस्य विधायकत्वाभिप्रायेणेदम्। वस्तुतस्तु तस्य

---

[1] परिभाषा २३.
[2] का. वा. १.१.७२–२८.
[3] पा. सू. १. १. ७२.
[4] महाभाष्यम् ६. १. १३. अर्थानुवादोऽत्र बोध्यः।
[5] परिभाषा २७.
[6] इत्येवं तत्र — ब.
[7] प्रदीपे 'इमम्' इति पाठो दृश्यते। 'एतम्' इति तत्स्थाने रत्नप्रकाशकृल्लब्धः पाठः।
[8] सद्भावेनेत्युक्तेः — ब.
[9] प्रदीपे 'चतुर्थपक्षप्रतिक्षेपाय' इत्यतः प्राक् 'सत्यम्' इति पाठ इति सूच्यतेऽनेन।
[10] पा. सू. १.१. ६२.

नियमार्थताया व्यवस्थापितत्वेन स्थानिवद्भावेन द्विवचनलोपस्य द्विवचनसंज्ञायामेव तद् द्विवचनान्तं बोध्यम्। **सप्तम्यामर्थग्रहणमिति**। 'ईदूतौ सप्तमी' इत्येतावतैव 'ईदूदन्तं सप्तम्यन्तं प्रगृह्यम्' इत्यर्थलाभात् [1]"सोमो गौरी अधिश्रितः' इत्यादौ गौर्यादेः प्रत्ययलक्षणेन सप्तम्यन्तत्वाच्च सिद्धेऽर्थग्रहणं व्यर्थं सज्ज्ञापकं संपद्यत इति भावः। **तर्त्तीह [2]ज्ञापनार्थमिति**। तथा च गौरवं दोषः स्यादिति भावः। ज्ञापकाश्रयणमन्तरेणैव परिष्कारविशेषेण 'कुमार्योरगारं कुमार्यगारम्' इत्यादावतिप्रसङ्गो वारयितुं शक्यत इत्याशयेनाह — **न कर्तव्यमिति**। **ईदादिभिर्द्विवचनं विशेषयिष्याम इति**। तदन्तलक्षकैरीदादिभिर्द्विवचनान्तविशेषणद्वारा द्विवचनं विशेषयिष्याम इति भावः। **ईदादिविशिष्टेनेति**। ईदादिविशेषितेनेत्यर्थः। **तदन्तविधिरिति**। फलित इति शेषः। फलितार्थमेव स्पष्टं दर्शयति — **ईदाद्यन्तं यदिति**। **तदन्तमिति**। ईदाद्यन्तद्विवचनान्तमित्यर्थः। एतेन 'द्विवचनान्तमित्यर्थः' इति निरस्तम्। न्यूनतादोषात्। **ईदाद्यन्तमिति**। ईदाद्यन्तान्तमित्यर्थः। ईदादिशब्दोऽत्रेदाद्यन्तलक्षकः, तेन च तदन्तविधिरित्युक्तं प्राक्। एवं च कुमार्यगारमित्यत्र ओस् सकारान्तं द्विवचनम्, न त्वीदाद्यन्तमिति न दोषो भवति। नन्वीदादिशब्देन तदन्तलक्षकेण द्विवचनान्तं विशेष्यते चेत् तावता ईदादिभिर्द्विवचनं कथं विशेषितं भवति, [3]"पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति नियमादिति चेन्न, 'देवदत्तपुत्रपुत्रो यज्ञदत्तपुत्रः' इत्यादौ देवदत्तपुत्रत्वादिना यज्ञदत्तादेरिवेदादिभिरपि द्विवचनस्यार्थिकविशेषणसंभवात्। एतेन 'ईदादिभिः साक्षात् समुदायस्य संबन्धाभावादीदादिशब्देनेदाद्यन्तमुच्यते। तेनेदाद्यन्तान्तमित्यर्थः' इति निरस्तम्। ईदादिभिः साक्षात् समुदायस्य संबन्धसत्त्वेनैव तृतीयपक्षस्योत्थानात्। आर्थिकद्विवचनविशेषणलाभायेदादिशब्देनेदाद्यन्तं लक्ष्यत इत्येव तत्र वक्तुमुचितत्वाच्च। **शुक्ल्यास्तामिति**। शुक्लशब्दाद् द्विवचनम् 'औ' इति, तस्य [4]"नपुंसकाच्च' इति शीभावः, ततश्च्विप्रत्ययः, शीशब्दस्य [5]"सुपो धातुप्रातिपदिकयोः' इति लुक्। [6]"वेरपृक्तस्य' इति वलोपः। [7]"अस्य च्वौ' इतीत्वम्। ततः सुप्, तस्य "अव्ययात्' इति लुक्। तत्र शीशब्द ईकारान्तं द्विवचनमिति तदन्तस्य शुक्लीशब्दस्य प्रगृह्यत्वप्रसङ्ग इति भावः। **ईदादि च द्विवचनमिति**। सूत्रस्थेदादिशब्दस्य तदन्तलक्षकत्वसूचनायैवमुक्तम्। ईदाद्यन्तं च द्विवचनमिति तस्यार्थः। यत्तूक्तम् "क्वचित्तु पाठः 'ईदाद्यन्तं च श्रूयते' इति, तत्रैवं व्याख्येयम् — ईदाद्यन्तं च श्रूयते सूत्रे, तदन्तविधिरीदादिभिर्द्विवचनस्याश्रीयत इत्यर्थः। यस्त्वयम् [8]"अस्य च्वौ' इतीकारः स द्विवचनस्य न कश्चिदिति न तदभिप्रायेण भाष्यं व्याख्येयम्" इति। तत्रेदं वक्तव्यम् — 'ईदाद्यन्तं च श्रूयते' इति क्वाचित्कोऽपपाठ इत्येव वक्तुमुचितम्। 'शुक्ली' इति रूपापेक्षया तस्यानर्थक्यात्। न हि 'ईदाद्यन्तान्तं द्विवचनान्तम्' इति पक्षे संज्ञिनः श्रूयमाणेदाद्यन्ततापेक्षितेति सूत्राक्षरादायाति, येन तदुक्तिः प्रकृतोपयोगिनी स्यात्। 'ईदाद्यन्तं श्रूयते' सूत्र इति शेष इत्यध्याहारेण तदुपपादनं न युज्यते। सूत्रे ईदादिशब्दस्य श्रूयमाणत्वेऽपीदाद्यन्तस्याश्रूयमाणत्वात् तत्कथनस्य प्रकृतानुपयोगाच्च। अत एव 'ईदाद्यन्तं च, ईदाद्यन्तलक्षकं च श्रूयते सूत्रे' इत्यपि तदुपपादनं न युज्यते, प्रकृतानुपयोगात्। 'ईदादिभिर्द्विवचनं विशेषयिष्यामः' इत्यत्रैव तादृशवचनस्योपयोगात्। अत एव 'ईदादिभिस्तदन्तविधिराश्रीयते' इत्यर्थस्तस्य न संभ-

---

[1] ऋ. सं. ९. १२. ३.
[2] 'ज्ञापकार्थम्' इति भाष्यस्थाने 'ज्ञापनार्थम्' इति पाठः स्वीकृतः।
[3] लौ. न्या. साहस्री पृष्ठम् १०८.
[4] पा. सू. ७. १. १९.
[5] पा. सू. २. ४. ७१.
[6] पा. सू. ६. १. ६७.
[7] पा. सू. ७. ४. ३२.
[8] पा. सू. २. ४. ८२.
[9] पा. सू. ७. ४. ३२.

वति, तेन तस्याप्रतीयमानत्वात्। तत्संभवेऽपि प्रकृतानुपयोगादिति। **अथापि कथंचिदिति**। यदि भुवो वुक इव कृताकृतप्रसङ्गित्वमात्रेणैव नित्यता लुक आश्रीयेतेति भावः। एतेन 'स्थानिविशेषानपेक्षायां कृताकृतप्रसङ्गित्वेन लुक्शास्त्रस्य प्रवर्तनादित्यर्थः' इति निरस्तम्। 'अथापि कथंचिन्नित्यो लुक् स्यात्' इति भाष्यस्य तदर्थकत्वाभावात्, तद्भावकत्वाभावात्, तच्छेषकत्वाभावाच्च। 'कृताकृतप्रसङ्गित्वमात्रेण' इत्येतावानेव हि तत्र शेषोऽपेक्ष्यते। एतेन "अथवा नित्यत्वेन बाधकत्वं लक्ष्यते। तेन [१]'अन्तरङ्गानपि' इति शीभावस्य लुग् बाधक इत्यर्थः" इत्यपि निरस्तम्। नित्यत्वेन बाधकत्वे लक्षितेऽपि तस्य भाष्यस्य तदर्थकत्वाभावात्। [२]'अन्तरङ्गानपि' इति परिभाषयापि शीभावं बाधित्वा लुग्भवतीत्यन्यदेतत्। **एवमपि दोष इति**। प्रकृते तादृशसूत्रार्थासंभवरूपो दोष इति भावः। एतेन [३]'अस्य पक्षस्योत्थानमेव नास्तीत्येतत्पक्षासंभव एव दोषः' इति निरस्तम्। 'देवदत्तपुत्रपुत्रो यज्ञदत्तपुत्रः' इत्यादाविव 'ईदाद्यन्तान्ता द्विवचनान्ताः' इत्यादावस्य पक्षस्य संभवात्। पक्षोत्थानाभावस्यैव पक्षासंभवत्वेन तयोर्हेतुहेतुमद्भावासंभवाच्च। **अन्यत्र संज्ञाविधाविति**। ज्ञापनफलमन्यत्र भवतीत्याशयेन 'अन्यत्र' इत्युक्तम्। ज्ञाप्यांशस्तु 'संज्ञाविधौ' इत्यादिरेव। तृतीयपक्षाभ्युपगमेनापि दूषणमाह — **अवश्यं खल्विति**। यद्दूषणभिया तृतीयपक्षः परिगृहीतस्तद्दूषणमत्राप्यस्तीति भावः। तदेवं तृतीयपक्षे दूषिते निर्दुष्टत्वान्मध्यमपक्ष एव स्थित इत्युपसंहरति — **तस्मादिति**। यस्मात् प्रथमतृतीयपक्षयोरव्याप्त्यसंभवौ, तस्मादित्यर्थः। **मध्यम इति**। इतोऽपि भाष्यात् पक्षत्रयमेवोट्टङ्कितं ज्ञेयम्। अन्यथा तृतीयपक्षव्यावृत्तये 'द्वितीयः पक्षः' इत्येवोक्तं स्यात्॥

[१, २१७–२२०]

(**नारायणीयम्**) तदन्तविधेरविकल्पितत्वात् पक्षद्वयानुपपत्तिमाशङ्क्याह — **ईदादय इति**। नन्वीदादीनां विशेष्यत्वे तैस्तदन्तविध्यभावः, विशेषणेन तु तदन्तविधौ नायं पक्षः संभवतीत्यत आह — **तदेति**। अन्तशब्दस्यावयववचनत्वाद् द्विवचनान्तत्वमीदादीनां न संभवति। लक्ष्यानुसारिपक्षस्य निश्चेयत्वात् कथं प्रश्न इत्यत आह — **तत्रेति**। [४]'यश्चोभयोः' इति न्यायाविषयत्वमाह — **एकार इति**। [५]'वचनाविषयत्वे चोदिते कथं वचनादिति परिहारः, तत्राह — **द्विवचनेति**। ननु फलसत्त्वं कथं फलान्तरप्रतिबन्धकम्, अत आह — **मुख्य इति**। मुख्यत्वमुपपादयति — **अन्तेति**। एकशब्दस्य संख्या[६]वाचित्वे तदन्तविषये एकस्य स्यादित्यत आह — **असहायस्येति**। 'अग्नी' इत्यादेरप्यसहायस्यानुदाहरणे निमित्तमाह — **ईदूतोरिति**। ननु श्रुतद्विवचनं परित्यज्य कथमश्रुततदन्तस्येदादि विशेषणम्, यत एतत्पक्षः संभवेत्, अत आह — **प्रत्ययेति**। श्रुतत्वेऽपि द्विवचनस्य तदन्तसंज्ञात्वान्न स्वयं विशेषणसंबन्धार्हत्वमिति भावः। द्विवचनस्य विशेषणत्वस्फुरणात् प्रागीदादिविशेषणानुभवे [७]'ईदाद्यन्तद्विवचनान्तपक्षो वक्ष्यते। अयं तु पक्षः प्रतीत[८]विशेषणत्वस्येदाद्याकाङ्क्षायामित्याह — **पश्चादिति**। अर्थग्रहणं सप्तमीलोपे यथा स्यादित्येवमर्थमिति कथं ज्ञापकमित्यत आह — **ईदूताविति**। अनन्यगत्या गौरवमङ्गीकार्यमित्यत आह — **आद्यन्तवदिति**। **अधिक-**

---

[१] परिभाषा ५२.
[२] परिभाषा ५२.
[३] प्रदीपे 'पक्षस्योत्थानमेव' इत्यत्र 'अस्य पक्षस्योत्थानमेव' इति पाठः स्वीकृतः।
[४] लौ. न्या. साहस्री. पृष्ठम् २४५.
[५] वचनविषयत्वे — क.
[६] वाचित्वेऽसिद्धविषये — क, ख.
[७] ईदाद्यन्तशब्दो द्विवचनस्य विशेषणम्।
[८] विशेषणस्येदादि — क.

मिति। द्वितीये हि पक्षेऽन्यार्थवचनाश्रयणम्, अत्र त्वनन्यार्थार्थग्रहणमित्यर्थः। तृतीयपक्षेऽर्थग्रहणाश्रयणं गौरवमित्युक्त्वास्मिन् पक्षे तन्नेत्युक्तम्। तत् कथमित्याशङ्क्यार्थग्रहणपरिहार्यदोषासत्त्वादित्याह — **अत्रेति**। [1]**द्विवचनान्तमिति**। ननु यत्पदोपस्थापितस्य तच्छब्देन परामर्शः सुज्ञान इति तत्पदार्थविवरणं व्यर्थम्। अत्राहुः — न परामृश्यपरिज्ञानाय विवरणमिदम्, किं तु संज्ञाविधौ प्रत्ययग्रहणेऽपि[2] तदन्तविधिमङ्गीकृत्य चिन्तेयमिति कृत्वा[चिन्ता]प्रोद्घाटनायेति। यद्वा, तच्छब्देन द्विवचनमात्रपरामर्शः, न त्वीदादिविशिष्टस्य, तस्येदाद्यन्तमित्यनेन प्रतिपत्तेरिति विवरणसाफल्यम्। 'तदन्तमीदाद्यन्तम्' इत्यस्यैकग्रन्थत्वे उपक्रमाननुसारः, तृतीयपक्षादभेदश्चेति भिन्नग्रन्थत्वम्। ततश्च पर्यवसन्नार्थत्वात् 'ईदाद्यन्तान्तम्' इति भाव्यम्, अत आह — **ईदादिभिरिति**। ईदादिशब्दस्य मुख्यार्थत्वे परम्परासंबन्धे बहुव्रीहिर्वाच्यः। तस्माद्वरममुख्यार्थत्वमित्यर्थः। प्रातिपदिकात् तद्धितोत्पत्तौ दोषाभावात् सुबन्तात् तद्धितविधानाङ्गीकारेण चोद्यमित्याह — **शुक्लशब्दादिति**। शीशब्दस्येदाद्यात्मकद्विवचनत्वेऽप्येतत्पक्षे सूत्रार्थस्योदाहरणे वक्तव्यत्वादाह — **ईदादिशब्देनेति**। **न कश्चिदिति**। द्विवचनसंबन्धी न भवतीत्यर्थः। अत्र हि पक्षे ईदाद्यन्तत्वं द्विवचनस्यापेक्षितम्, न यस्य कस्यचित्। नित्यत्वाभ्युपगमे निमित्तमाह — **स्थानीति**। [3]यदास्यास्मिन् काले [4]प्राप्तम्, अस्यास्मिन्निति विशेषो न विचार्यते, कालद्वयप्राप्तिमात्रं तु चिन्त्यते तदा नित्यत्वमक्षतमित्यर्थः। **शास्त्रस्येति**। शास्त्रगततया नित्यत्वं चिन्त्यमिति दर्शयति। कार्यगततया चिन्त्यमाने प्रागप्राप्तस्य लुकः शीभावोत्तरकालप्राप्तेरनित्यत्वं स्यात्। अदर्शनं हि प्रतियोगिभेदाद् भिद्यते। नित्यत्वसमर्थनक्लेशो व्यर्थः, लुकः प्राक्प्रवृत्तिमात्रस्य प्रस्तुते साध्यत्वादित्यभिप्रायेणाह — **अथ वेति**। अव्याप्त्यतिव्याप्तिवदसंभवस्यापि लक्षणदूषणत्वाद् दोषत्वोक्तिर्युक्तेत्याह — **पक्षस्येति**। अन्यार्थवचनाश्रयणं कथं दूषणत्वेनोच्यत इत्यत आह — **यदिति**। तृतीयस्यापि मध्यमत्वसंभवादाह — **द्वितीय इति**॥

अदसो मात् १. १. १२.

[१, २२०–२२२]

(**लघुविवरणम्**) ननु [5]सूत्रोपलक्षणार्थत्वे प्राथम्यात् 'अदसः प्रगृह्यसंज्ञायाम्' इति वक्तव्यमित्याशङ्क्य नैतत्सूत्रोपलक्षणार्थम्, किंतु [6]दोषप्राप्तिनिमित्त[7]प्रतिपादनाय मादित्युक्तमित्यभिप्रेत्याह — **अस्मिन्निति**। नन्वीत्वोत्वयोरसिद्धत्वेऽपि 'ईदूदेत्' इत्यनुवर्तनात् 'अमी अत्र' इत्यत्र मात्परस्यैकारस्य प्रगृह्यसंज्ञा भविष्यतीत्यत आह — **चशब्दादिति**। "अप्रगृह्यस्य' इति प्रसज्यप्रतिषेधमाश्रित्य 'वचनार्थो हि' इत्युक्तम्॥

[१, २२०–२२२]

(**विवरणम्**) ननु प्रगृह्योपलक्षणत्वेन कस्यचिदुपादाने प्राथम्यात् 'अदसः' इति वक्तुमुचितम्,

---

[1] द्विवचनान्तत्वमिति — क, ख.
[2] अपिशब्दो नास्ति — क.
[3] यदा ह्यस्मिन् — ख.
[4] लुक्स्वरूपमिति विशेष्यं बोध्यम्।
[5] तत्रोपलक्षणार्थत्वे — ड.
[6] आरोपितनिमित्त — ड.
[7] प्रदर्शनाय — ड, त.
[8] पा. सू. ८. ४. ५७.

[1]न तु 'मात्' इति, अत आह — **अस्मिन्निति**। यदि मादित्युपादाय प्रगृह्यसंज्ञा विधीयते [2]तदायं दोषः। यदि तु दात्परयोः पदान्तयोरौकारैकारयोः प्रगृह्यसंज्ञा विधीयते ततो न स्याद्दोष इति वक्तुं 'मात्' इत्युक्तम्, न संज्ञोपलक्षणत्वेनेत्यर्थः। **एकादेशः** [3]'एङः पदान्तादति' [4]इत्यनेन। **पूर्वाभावे** पूर्वप्रसङ्गाभाव इत्यर्थः। नन्वन्यार्थेदूदेदुपजीवनाय प्रगृह्यप्रकरणे करणमित्यत आह — **न चेति**। न केवलमत्र करणे लाघवाभावः, प्रत्युत गौरवमिति सूचनाय 'मादिति वा' इत्युक्तम्। यतोऽणो विधीयते ततः 'असौ' इत्यत्राप्रसङ्गः, यतश्चावसाने ततः 'अमुके' 'अमुकाभ्याम्' [5]इत्युकारस्याप्रसङ्गः। **प्रकरणोत्कर्षेण** अनुनासिकसंनिध्यतिक्रमेणेत्यर्थः। **सर्वेति**। प्रकृतिभावानुनसिकप्रतिषेधार्थेत्यर्थः। **विकल्पार्थ इति**। यद्यपि प्रतिषेधोऽपूर्ववचनसाध्यः, विप्रतिषेधेन प्रगृह्यसंज्ञा नापूर्ववचनमपेक्षत इत्यतुल्यबलत्वम्, तथापि कार्यकालपक्षाश्रयेण विप्रतिषेधसमर्थनक्लेशात् तुल्यबलत्वं मन्यते। ननु 'प्रगृह्यसंज्ञाभिनिर्वर्तमाना' इत्यादिवक्ष्यमाणप्रकारेण घटत एव विरोध [6]इति कथमयुक्ततेत्यत आह— **इष्टेति**। 'यो युज्यते' इत्यनेन योग इति कर्मणि घञ्, द्विकार्यशब्दस्य च द्विगोः पात्रादित्वात् स्त्रीत्वरहितस्य योगशब्देन [7]'कर्तृकरणे कृता बहुलम्' इति समास इति च दर्शितम्। 'असंभवोऽपि' इति भाष्यस्य केवलासंभवोऽपीत्यर्थमभिप्रेत्य 'अपि'शब्दसमुच्चेयं[8] दर्शयितुमाह — **असंभव एवेत्यादिना**। नन्वसंभवस्य द्विकार्ययोगमात्रेण समुच्चयो [9]यथाश्रुतमस्तु, किं द्विकार्ययोगासंभवेन सह केवलासंभवस्य समुच्चयेनेत्यत आह — **तथा हीति**। **द्विर्वचनं** [10]'इलौ' इत्यनेन॥

[१, २२०–२२२]

(**उद्द्योतनम्**) ननु प्राथम्यात् 'अदसः प्रगृह्यसंज्ञायाम्' इति वक्तव्यम्, न तु 'मात्' इति, अत आह — **अस्मिन्निति**। 'मात्' इत्युक्तेरयं दोषः। 'अदसो दादेदौतोः पदान्तयोः' इति सूत्रकरणे नायं दोष इति सूचयितुं 'मात्' इत्युक्तमिति भावः। भाष्ये अय् आव् एकादेश इति विग्रहः। **एकादेशः** [11]'एङः पदान्तादति' इत्यनेन। भाष्ये क्रमेणोदाहरणानि — **अमी आसत इत्यादि**। 'अदे आसते' इत्यत्रायादेशः, 'अदौ आसाते' इत्यत्रावादेशः, 'अदे अत्र' इत्यत्रैकादेशः, इति विवेकः। [12]अनुक्तसमुच्चयार्थश्चशब्द इत्याह — **चशब्दादिति**। यद्यपीत्वोत्वयोरसिद्धत्वादेवायादिप्राप्तिः, तथापि वार्तिके प्रस्तुतपरामर्शितच्छब्देन मः परामृष्टः। तेनेत्वोत्वे उपलक्षिते इति तद्व्याख्यानभाष्येऽपि मत्वासिद्धिविवक्षावश्यकीति भावः। [13]संज्ञिनिर्वचननिमित्तस्याप्यसिद्धत्वं संज्ञाभावप्रयोजकमिति तदसिद्धत्वं वर्ण्यमेव। ननु [14]कार्यासिद्धत्वे स्थानिनो निवृत्तस्य न स्वकार्यप्रवर्तकत्वम्, अत आह — **शास्त्रेति**। [15]यद्वा, ननु प्रगृह्यसंज्ञायामीत्वोत्वयोरसिद्धत्वान्न तयोः संज्ञे-

---

[1] 'न तु' इत्यस्यानन्तरं 'परम्' इत्यधिकम् — च, छ, झ, ञ.
[2] ततोऽयं — ञ.
[3] पा. सू. ६. १. १०९.
[4] इत्ययम् — झ.
[5] इत्युकारस्य प्रसङ्गः — च, छ.
[6] इति कथमयुक्तेत्यत आह — छ; इति चोद्यमयुक्तमित्यत आह — झ, ञ.
[7] पा. सू. २. १. ३२.
[8] समुच्चयं — छ, ञ, ट.
[9] यथाश्रुतमेवास्तु — च, छ.
[10] पा. सू. ६. १. १०.
[11] पा. सू. ६. १. १०९.
[12] 'अनुक्तसमुच्चयार्थः' इत्यादि 'तदसिद्धत्वं वर्ण्यमेव' इत्यन्तं नास्ति — इ, उ, ऊ.
[13] संज्ञिनि निर्वचननिमित्तस्यापि — अ; संज्ञिनिर्वचनस्यापि — म, आ.
[14] कार्यसिद्धत्वे — अ, आ.
[15] 'यद्वा' इत्यादि 'प्रगृह्यसंज्ञाविधिर्वा' इत्यन्तं नास्ति — इ, उ, ऊ.

त्यसति प्रकृतिभावे तयोर्यणः प्रसङ्गदोषो वाच्यः, न त्वयादिप्रसङ्गदूषणं वाच्यम्, अत आह — **शास्त्रेति**। **स्थानिलक्षणम्** [1]अयादि। [2]**आदेशलक्षणः** यणादिः प्रगृह्यसंज्ञाविधिर्वा। उपपादितमेतदधस्तात्। **पूर्वाभावे** पूर्वप्रसङ्गाभावे। **नाजानन्तर्य इति**। अयादावचोरानन्तर्यस्याश्रयणादित्यर्थः। **आश्रयादिति**। रोरुत्ववदित्यर्थः। असिद्धेऽपि वचनस्याभिधेयमस्ति, अत आह — **प्रयोजनमिति**। 'नैकम्' इत्यस्य विषयसंकोचमाह — **अनेकेति**। **संज्ञा** परिभाषाया अप्युपलक्षणम्। संकोचे बीजमाह — **अन्यदिति**। [3]नन्वन्यार्थमीदूदेदुप[4]जीवनायात्र करणमित्याशङ्क्य तदनुपयोगमाह — **न चेति**। लाघवान्तरमाह — **मादिति वेति**। अकरणमेवाह — **यस्मादिति**। अण इत्युक्तेः 'असौ' इत्यत्रौकारस्य, अवसान इत्युक्तेः 'अमुके' 'अमूकाभ्याम्' [5]इत्यत्रोकारस्याकारस्य चाप्रसङ्गः। अत्र करणस्य प्रयोजनमाह — **तदेवमिति**। **प्रकरणोत्कर्षेण** अनुनासिकसंनिध्यतिक्रमेण[6]। **सर्वेति**। प्रकृतिभावानुनासिकप्रतिषेधार्थेत्यर्थः। वार्तिकापेक्षो वाकारो न भाष्यापेक्ष इत्याह — **अयाविति**। यद्यपि प्रतिषेधो वचनसाध्यः, विप्रतिषेधस्तु नापूर्ववचनमपेक्षत इत्यतुल्यबलत्वम्, तथापि कार्यकालपक्षाश्रयणेन विप्रतिषेधसमर्थनक्लेशात् तुल्यबलतेति भावः। ननु विरोधस्य वक्ष्यमाणरीत्या सत्त्वात् कथमयुक्तः, अत आह — **इष्टेति**। [7]वक्ष्यमाणाभिप्रायेण 'करिष्यते' इत्युक्तम्, नापूर्ववचनाभिप्रायेणेत्याह — **आश्रयिष्यत इति**। योग इति कर्मणि घञन्तः, द्विकार्यशब्देन "कर्तृकरणे कृता बहुलम्' इति समास इत्यभिप्रेत्याह — **द्वाभ्यामिति**। द्वित्वयुक्ते कार्ये द्विकार्ये इत्युत्तरपदलोपी तत्पुरुषः। समाहारद्विगुस्तु न भवति, पात्रादित्वेन स्त्रीत्वाभावेऽपि द्वाभ्यामिति विग्रहायोगात्। तात्पर्यकथनमेतन्न विग्रहवाक्यमित्यङ्गीकारे द्विगुरेवास्तु। 'असंभवोऽपि' इति भाष्यस्य केवलासंभवोऽपीत्यर्थं वदन्नपिशब्दसूचितं[8] समुच्चयं दर्शयति — **असंभव एवेति**। नन्वसंभवस्य यथाश्रुतद्विकार्ययोगेनैव समुच्चयोऽस्तु, किं द्विकार्ययोगासंभवेन, अत आह — **तथा हीति**। **अदधादिति**। धाञो लङ [10]'जुहोत्यादिभ्यः श्लुः' [11]'श्लौ' इति द्विर्वचनम्। अभ्यासह्रस्वः, [12]'अभ्यासे चर्च' अडागमः, [13]'इतश्च' [14]'इतीकारलोपः'। **त्रपूणामिति**। नुम् प्रकृतेः, नुट् प्रत्ययस्येत्येकस्य द्विकार्ययोगो नास्ति। नुमा ह्रस्वान्तत्वं नुण्निमित्तं विहन्यते, नुटश्च्परत्वं नुम्निमित्तं विहन्यत इति केवलोऽसंभवः। साक्षाद् बाधकत्वाभावेऽपि कार्यद्वारा तदस्तीत्याह — **प्रकृतिभावेति**॥

[१, २२०–२२२]

(**रत्नप्रकाशः**) **मादिति**। परस्येति शेषः। तमेव [15]परामृशति — **तस्येति**। एतेन '**मात्प्रगृह्येति**। अस्मिन् सूत्रन्यास इत्यर्थः' इति निरस्तम्। 'तस्य' इति तच्छब्देन परामर्शानुपपत्त्या

---

[1] अयादिः — म, आ.
[2] 'आदेशलक्षणं यणादि' इत्युचितं भाति।
[3] नन्वस्यार्थे ईदूदेदुप — म; उ.
[4] जीवनायात्राकरण — उ.
[5] इत्यत्रोकारस्याप्रसङ्गः — आ; इत्यत्रोकारस्य चाप्रसङ्गः — अ, इ, ऊ, ॠ.
[6] सांनिध्यातिक्रमेण — म, उ.
[7] वक्ष्यमाणरीत्या करिष्यते — अ.
[8] पा. सू. २. १. ३२.
[9] 'अपिशब्दसूचितम्' इति नास्ति — म, इ, उ, ऊ; अपिशब्ददर्शितम् — अ.
[10] पा. सू. २. ४. ७५.
[11] पा. सू. ६. १. १०.
[12] पा. सू. ८. ४. ५४.
[13] पा. सू. ३. ४. १००.
[14] इतीलोपः — म, आ, इ, उ, ऊ, ॠ.
[15] परामर्शति — ब.

तद्भाष्यस्य तदर्थकत्वाभावात्। **ऊत्वस्य चेति**। चान्मत्वस्य। तदपि तद्विधायकशास्त्रपरम्। **असिद्धत्वादिति**। यथोद्देशपक्ष इति शेषः। कार्यकालपक्षे हि बहिरङ्गपरिभाषयेत्वोत्वविधिसदेशया बहिरङ्गस्यायादिशास्त्रस्यासिद्धत्वादीत्वोत्वे स्त एव। यत्तूक्तम् [1]"'नाजानन्तर्ये' इति निषेधाद् बहिरङ्गपरिभाषात्र न प्रवर्तते" इति। तन्न, अन्तरङ्गे ऊत्वादावजानन्तर्याभावात्। न हि 'दात्परस्य उदूतौ स्तो दस्य मश्च' इत्युक्तेऽजानन्तर्यं गम्यते। 'अमुमुयङ्' इत्यादौ रेफस्यापि दात्परस्योत्वविधानात् फलतोऽप्यजानन्तर्यनियमाभावात्। 'अमू' इत्याद्युदाहरणविशेषेऽजानन्तर्यमस्तीति चेन्न, सूत्राक्षरोपरि प्रतीयमानस्यैवाजानन्तर्यस्य तत्र ग्रहीतुमुचितत्वात्। [2]"एत ईद्बहुवचने' इत्यत्राजानन्तर्ये सत्यपि तन्निषेधस्यानित्यत्वादिष्टसिद्धिः। यदप्युक्तम् — द्विपदाश्रयत्वाद्बहिरङ्गा अयादयोऽन्तरङ्गेष्वीत्वादिष्वसिद्धा इति पूर्वाभावे कथं [3]"पूर्वत्रासिद्धम्' इतीत्वादीनामसिद्धत्वं स्यात्, इति। तदपि न, ईत्वादिशास्त्रं प्रत्ययादिशास्त्रस्यासिद्धत्वेऽपि [4]"पूर्वत्रासिद्धम्' इति सूत्रापेक्षयासिद्धत्वाभावात्। ननु तर्हि [5]"पूर्वत्रासिद्धम्' इति परिभाषा बहिरङ्गपरिभाषया कथं बाध्यतेऽत्रेति चेत्, कार्यकालपक्षे परत्वादिति गृहाण। 'वचनार्थो हि सिद्धे' इति वार्तिकशेषमवतारयति — **ननु चेति**। **वचनसामर्थ्यादिति**। अदसो मात्परस्य प्रगृह्यसंज्ञाविधानसामर्थ्यात् प्रकृतसूत्रं प्रति मीत्वमूत्वे सिद्धे इत्ययादीन् बाधित्वा ते भविष्यत इति भावः। एतेन 'यथोद्देशपक्षे आश्रयात् सिद्धत्वं भविष्यतीत्यर्थः' इति निरस्तम्। ननु चेत्यादिभाष्यस्य तदर्थकत्वाभावात्। [6]"नैकं प्रयोजनम्' इति वक्ष्यमाणभाष्यस्वरसेन कार्यकालपक्षेऽपि प्रकृतिभावप्रदेशस्य प्रकृतसूत्रापेक्षया सिद्धत्वलाभेन यथोद्देशपक्षनिर्देशानौचित्याच्च। **वचनार्थो हि सिद्ध इति**। **सिद्धे** ईत्वादौ यत् प्रगृह्यकार्यं तत् **वचनस्य** प्रकृतसूत्रस्य **अर्थः** प्रयोजनं **हि** यतो भवति, अत इत्यर्थः। तेन वचनस्येत्वादिसिद्धत्वसंपादने सामर्थ्यं नास्तीति तु गम्यते। गम्यमानमेव तावदाह — **नेदं वचनाल्लभ्यमिति**। **इदम्** ईत्वादिसिद्धत्वं, **वचनात्** वचनसामर्थ्यात्, न लभ्यमित्यर्थः। **प्रगृह्यसंज्ञाकार्यमिति**। तदिति शेषः। तस्मात् तदर्थमेवेदं सूत्रं स्यात्, न त्वीत्वादिसिद्धत्वसंपादनद्वारा प्रकृतिभावरूपप्रगृह्यसंज्ञाकार्यार्थमित्याशयेनोपसंहरति — **तदर्थमेतत् स्यादिति**। ननु किं तत् प्रगृह्यसंज्ञाकार्यमित्यपेक्षायां तदुत्तरत्वेन स्पष्टप्रतिपत्तये सूत्रमेव पठति — **अणोऽप्रगृह्यस्येति**। **योगारम्भमिति**। 'अदसो मात्' इत्येवंरूपस्य गुरुभूतस्य **योगस्य**, **आरम्भं** करणमित्यर्थः। एतेन 'अनेककार्यसिद्धचर्थं संज्ञासूत्रं नैकेन प्रयुज्यत इत्यर्थः' इति निरस्तम्। [7]"शे' इति संज्ञासूत्रस्यैकेनैव प्रकृतिभावेन प्रयुक्तत्वात्। **एतावदिति**। अनुनासिकवारणमात्रमित्यर्थः। **अदसो नेतीति**। सार्धमात्रालाघवादिति भावः। 'असुका' इत्यत्र तु कार्यकालपक्षे बहिरङ्गस्य टाबेकादेशस्यासिद्धत्वान्निषेधो न भवति। एतेन "न च तत्रेदूदेद्ग्रहणं कर्तव्यम्, मादिति वा। यस्मादणोऽवसानेऽनुनासिको विधीयते। पूर्वेण णकारेणाण्ग्रहणमिति 'असौ, अमुके, अमुकाभ्याम्' इत्यादावनुनासिकस्याप्रसङ्ग एव" इति निरस्तम्। व्यर्थत्वात्। न हि तं विना किंचिदनुपपन्नं भवति, तदर्थस्य बालकेनापि बुद्धत्वात्। यदप्युक्तम् — तदेवं कार्यकालेऽपि संज्ञापरिभाषे प्रकरणोत्कर्षेण विधीयमाना प्रगृह्यसंज्ञा सर्वप्रगृह्यसंज्ञाकार्यार्था सत्यसिद्धत्वं बाधिष्यत इत्यर्थः, इति। तदपि न, सर्वत्र प्रकरणोत्कर्षेण विधीयमानानामेव संज्ञानां कार्यकालपक्षे कार्यसदेशताया अभ्युपगम्यमानत्वेन 'प्रकरणोत्कर्षेण विधीयमाना' इत्यंशस्यानर्थक्यात्। 'वचनार्थो हि सिद्धे' इति वार्तिकांशे 'नैकं प्रयोजनम्'

---

[1] परिभाषा ५१.
[2] पा. सू. ८. २. ८१.
[3] पा. सू. ८. २. १.
[4] पा. सू. ८. २. १.
[5] पा. सू. ८. २. १.
[6] नैकप्रयोजनं — ब.
[7] पा. सू. १. १. १३.

इति दूषिते 'ननु च' इत्यादितदवतारिकाया एव सुस्थत्वेनान्यस्यापि सर्वस्यानर्थक्याच्च। ननु 'हे असुक' इत्यत्रानुनासिकनिषेधापत्त्या 'अदसो न' इति वक्तुं न शक्यते। तत्र 'अदसो न मात्' इत्युक्ते [1]विपरीतं गौरवं स्यात्। न च त्यदादीनां संबोधनं नास्तीति वाच्यम्, तस्य न्यायमूलकस्य कियच्छब्दमात्रविषयत्वात्। 'हे स' इति वत् 'हे असुक' इत्यस्य संबुद्धचन्तस्य स्वीकारे बाधकाभावात्। तथा च 'वचनार्थो हि सिद्धे' इति वार्तिकांशो न दूषित एवेत्यस्वरसादाह — **विप्रतिषेधाद्वेति**। 'वचनसामर्थ्यात्' इत्यनेन हेतुना सह 'विकल्पार्थो वाशब्दः। प्रगृह्यसंज्ञावचनस्य सामर्थ्याद्वा ईत्वोत्वे अयादीन् बाधित्वा भवतः, विप्रतिषेधाद्वा अयादीन् बाधित्वा ते भवत इति। एतेन 'अयावेकादेशप्रतिषेधो वा वक्तव्यः, विप्रतिषेधाद्वा प्रगृह्यसंज्ञा, इति विकल्पार्थो वाशब्दः' इति निरस्तम्। हेतुसमभिव्याहृतस्य वाशब्दस्य हेत्वन्तरेणैव सह स्वसमभिव्याहृतहेतोर्विकल्पबोधकतौचित्यात्। विप्रतिषेधाद् भवन्ती प्रगृह्यसंज्ञा वचनमन्तरेणैव भवतीति 'अयादिप्रतिषेधो वा वक्तव्यः, विप्रतिषेधात् प्रगृह्यसंज्ञा वा वक्तव्या' इति वक्तव्यतायां विकल्पासंभवाच्च। यदप्युक्तम् — नैकं प्रयोजनमित्यादिस्तु भाष्यकारेणोक्तः, न तु वार्तिककारेणेति [2]न तदपेक्षया विकल्पः, इति। तदपि न, 'नैकं प्रयोजनम्' इत्यादेर्वार्तिककारोक्तत्वेऽपि तेन सह विप्रतिषेधस्य विकल्पासंभवात्। कथंचित् 'नैकं प्रयोजनम्' इत्यादिशब्देन यद्धेतुप्रतिपादकः स ग्रन्थः स हेतुः परामृश्यत इत्याश्रित्य तेन सह प्रकृतहेतोर्विकल्पः संभवति चेदपि 'विप्रतिषेधाद्वा' इत्यस्य वार्तिककारोक्तत्वे मानाभावाच्च। **नैष युक्तो विप्रतिषेध इति**। [3]विप्रतिषेधेन विप्रतिषेधसाध्या प्रगृह्यसंज्ञाप्रवृत्तिर्लक्ष्यते। सा न युक्तेत्यर्थः। एतेन '**नैष युक्त इति**। इष्टसिद्धय इति भावः' इति निरस्तम्। विप्रतिषेधेन सर्वत्रेष्टसिद्धेरेव संपादनीयत्वेन तस्यासंबद्धप्रलापत्वात्। न हि क्वचिदनिष्टसिद्धये विप्रतिषेधो युक्तो भवति, येन तदुपपन्नं भवेत्। **करिष्यत इति**। कार्यकालपक्षे परा प्रगृह्यसंज्ञेत्याश्रयिष्यत इति भावः। तं भावमजानन् यथाश्रुतग्राह्याह — **सूत्रविपर्यास इति**। इतरः स्वाभिप्रायमाह — **एवं तर्हि परैवेति**। तर्हिशब्दोऽप्यर्थे। **एवमपि** सूत्रविपर्यासेऽकृतेऽपि परैवेत्यर्थः। **द्विकार्ययोगो हीति**। इदम् [4]"इको गुणवृद्धी' इति सूत्रे व्याख्यातम्। **अयादीन् बाधत इति**। अयादिबाधकेत्वोत्वयोः सिद्धत्वसंपादनद्वारेति शेषः। एतेन 'प्रकृतिभावविधानात्' इति निरस्तम्। ईत्वोत्वयोरसिद्धचा अयादीनां प्रसक्तत्वेनाद्यापि प्रगृह्यसंज्ञाया अनिष्पन्नत्वेन 'प्रकृतिभावविधानादयादीन् बाधते' इत्यस्यासंबद्धप्रलापत्वात्। **प्रगृह्यसज्ञानिमित्तमिति**। ईत्वमूत्वं च। एतेन [5]"न हि कार्यी निमित्ततयाश्रीयते' इति परिभाषामाश्रयन्तो निरस्ताः। संज्ञाया अपि शास्त्रीयकार्यत्वेन तां प्रति कार्यिणोरीत्वोत्वयोस्तामेव प्रति निमित्तताया भगवतैवोक्तत्वात्॥

[१, २२०–२२२]

(**नारायणीयम्**) न्यासानुवादेन दूषणकीर्तनस्य फलमाह — **अस्मिन्निति**। यदि मुत्वादिस्थानिनि संज्ञाप्रवृत्तावनुकूलं लक्षणं क्रियते तदा न दोष इति भावः। अनुक्तसमुच्चयार्थश्चशब्द इत्याह — **चशब्दादिति**। यद्यपीत्वोत्वयोरसिद्धत्वादयादिप्राप्तिः[6], तथापि वाक्ये प्रस्तुतपरामर्शिना

---

[1] विपरीतगौरवं — ब.
[2] अर्थानुवादोऽयम्।
[3] अत्रत्यविप्रतिषेधशब्देनेत्यर्थः।
[4] पा. सू. १. १. ३.
[5] परिभाषा १०.
[6] 'अयादिप्राप्तिः' इत्यादि 'प्रगृह्यसंज्ञायामीत्वोत्वयोरसिद्धत्वात्' इत्यन्तं नास्ति — क.

तच्छब्देन [1]मः परामृष्टः, तेनेत्वोत्वे उपलक्षिते इति तद्व्याख्यानभाष्येऽपि मत्वासिद्धत्वविवक्षावश्यकीति भावः। संज्ञिनोरिव च निमित्तस्याप्यसिद्धत्वं संज्ञाभावप्रयोजकमिति तदसिद्धत्वं वर्ण्यमेव। ननु प्रगृह्यसंज्ञायामीत्वोत्वयोरसिद्धत्वान्न तयोः संज्ञेत्यसति प्रकृतिभावे तयोर्यण्प्रसङ्गदोषो वाच्यः, न त्वयादिदूषणं वाच्यमित्यत आह — [2]**शास्त्रेति**। **स्थानिलक्षणम्** अयादि,' [3]**आदेशलक्षणं** यण् प्रगृह्यसंज्ञाविधिर्वा। **पूर्वाभाव इति।** पूर्वशास्त्रीयविधेः कर्तव्यताबुद्ध्यभाव इत्यर्थः। **नाजानन्तर्य इति**। अयादिविधाविहाजानन्तर्याश्रयणम्। प्रौढिवादश्चायम्, अन्तरङ्गे तदाश्रयणे निषेधस्य टीकाकृत्संमतत्वात्। वस्तुतस्त्वस्तु बहिरङ्गासिद्धत्वम्, अस्तु चेत्वादीनां प्राक् प्रवृत्तिः, कृतेषु तेषु स्थानिबुद्ध्या अयादिप्रसङ्गः। [4]न चास्यामवस्थायामयाद्यसिद्धत्वम्, अन्तरङ्गे कर्तव्य एव बहिरङ्गासिद्धत्वविधानादित्यत्र तात्पर्यम्॥

अन्ये त्वेतद्ग्रन्थपर्यालोचनया [5]अविशेषेण निषेधः संमतः। असिद्धत्वेन च यत्कार्यस्य प्रवृत्तिर्निवृत्तिर्वोच्यते तस्मिन्नजानन्तर्याश्रयणमपेक्षितमिति [6]'न धातुलोप'सूत्रगतस्य 'यत्र कार्यविधौ' इति टीकाग्रन्थस्यार्थः। अत एव 'पचावेदम्' इत्यादावपि नानिष्टमिति वदन्ति॥

यथोद्देशेति। अस्मिन् पक्षे संज्ञायां मत्वादेरसिद्धत्वे निर्विषया सेत्यसिद्धत्वबाधनेन सा प्रवर्तत इति प्रकृतिभावादिसिद्धिः। [7]अत्रापि पक्षे संज्ञाप्रवृत्तिमात्रं सिध्यति, न त्वयाद्यभावः, तेष्वीत्वादीनामसिद्धत्वात्। न च संज्ञावैयर्थ्यम्, अनुनासिकपर्युदासार्थत्वादिति 'हरदत्तमिश्रा आहुः। टीकाकारस्य तु कार्यार्थसंज्ञायामसिद्धत्व[8]बाधनात् संज्ञानिमित्तकार्येष्वपि तद्बाध इति संमतम्। उक्तं हि पूर्वसूत्रे एतत्पक्षोपपादनकाले 'अनुद्दिश्य प्रयोजनविशेषं संज्ञाप्रणयनम्' इति। ततश्च प्रयोजनमात्राभिसंधिरित्यस्मिन् वाक्येऽसिद्धत्वबाधनं संज्ञानिमित्तसकलप्रयोजनसिद्ध्यर्थमेव। अनुनासिकपर्युदासे सिद्धत्वेऽपि [10]संज्ञायामसिद्धत्वात् कथं तद्बाधमन्तरेण वचनोपपत्तिः, अत आह — **कार्येति**। [11]वार्तिकमात्रनिरीक्षकं मन्दमनुगृह्णाति — **वचनस्येति**। सर्वत्रैतादृशस्थल इत्थं व्याख्यानम्। सूत्रत्वस्यानेकप्रयोजनत्वव्याप्तौ व्यभिचारं विशेषणदानेन निरस्यति — **संज्ञेति**। 'अदसो नेति ब्रूयात्' इत्युक्तम्। तत्र किं संज्ञाकालीनविशेषणानां सिद्धवत्कारः, उत न्यासस्वरूपमित्थमेव। आद्ये तत्र करणे गौरवात् तत्परिहाराय संज्ञासूत्रमप्येकप्रयोजनं कार्यमिति नैतत्सामर्थ्यादनेकफलकल्पनासिद्ध-[त्व]बाधनेनोचिता। अन्त्ये त्वतिप्रसङ्गो निषेधस्येत्याशङ्क्यान्त्यमाश्रित्यातिप्रसङ्गं परिहरति — **न चेत्यादिना**। **अप्रसङ्ग एवेति**। ततश्च प्रसङ्गपूर्वत्वान्निषेधस्याप्यनवतारः। ननु तर्हि मास्तु गौरवम्, लाघवमपि तु नास्ति पदसाम्यात्, तत् कथमिह करणादसिद्धत्वबाध इत्याशङ्क्य न गुरुन्यासकरणात् तद्बाधवर्णनम्, किं तु प्रकरणोत्कर्षणादित्याह — **तदेवमिति**। यदि ह्यनुनासिकनिषेधार्थत्वेनास्य तत्रैवोपस्थानमभविष्यत् तत्प्रकरण एवेदं सूत्रमवक्ष्यत्। अतोऽनेकार्थत्वमस्येति देशान्तरेऽप्युपस्थानम्। यदि च तत्रास्य व्यापारकालेऽसिद्धत्वमीदादेस्तदा तत्रैतदुपस्थानं व्यर्थं स्यादिति तद्बाधनकल्पनमित्यर्थः।

---

[1] यः — ख.

[2] 'प्रदीपे 'शास्त्रस्यासिद्धत्वाच्च' इत्यत्र 'शास्त्रासिद्धत्वाच्च' इति पाठो निर्णयसागरमुद्रिते।

[3] आदेशलक्षणः — क.

[4] न चास्यामयाद्यसिद्धत्वम् — ख.

[5] अविशेषनिषेधः — क.

[6] पा. सू. १. १. ४.

[7] इत आरभ्य हरदत्ताशयवर्णनम्।

[8] पदमञ्जर्याम् अदसो मात्सूत्रे।

[9] बाधात् — क.

[10] संज्ञाया असिद्धत्वात् — ख.

[11] 'वार्तिक' इत्यादि 'वचनस्येति' इत्यन्तं नास्ति — क.

अपिशब्दाद्यथोद्देश इष्टसिद्धिरयत्नतः ।
इति द्योतितमस्माभिर्विस्तृता सा पुरैव तु ॥

अयाद्यप्रसङ्गे 'विप्रतिषेधाद्वा' इति हेतुविकल्पनात् प्रागपि [1]तत्कीर्तनेन भाव्यं वार्तिके। न च तदस्ति, वचनसामर्थ्यस्य 'वचनार्थो हि सिद्धे' इत्यादिना दूषितत्वात्। अतस्तर्ह्यर्थे व्याख्येयो वाशब्दो भाष्यकृतेत्यत आह — **विकल्पार्थो वाशब्द इति**। व्याख्यात इति शेषः। तत्रोक्तानुपपत्तिं परिहरति — [2]**अयाविति**। निषेधवचनादयादीनामभावो विप्रतिषेधाद्वेति विकल्पः।

गुरूपायमपेक्ष्याथ लघूपायविकल्पनम्।
[3]कल्पतेऽनन्यगत्यात्र गतिमन्यां निरस्यति ॥

नैकमिति। 'विप्रतिषेधाद्वा' इति वार्तिकेऽयादीनामीत्वादीनां च विप्रतिषेधोऽभिमतः। भाष्यकारोऽप्यग्रे दर्शयिष्यति। न्यायव्युत्पादनार्थं तु संज्ञाया अयादीनां च विप्रतिषेधं वार्तिकार्थत्वेनादावदर्शयत्। तत्र तुल्यबलविरोधाद् विप्रतिषेधोपपत्तेः 'नैषः' इति [4]ग्रन्थायोगं परिहरति — **इष्टेति**। सूत्रभेदं परिहरति — **आश्रयिष्यत इति**। तर्हि चोद्यानुपपत्तिः, अत आह — **इतर इति**। एवं तर्हि 'पराश्रयिष्यते' इत्येतावद्वक्तव्यमित्याशङ्क्य तथाच [5]वचनेन स्पष्टमभिप्रायवेदनमित्याश्रयणप्रकारोऽपि वर्ण्यत इत्याह — **अभिप्रायमिति**। 'स तु' इत्यतः प्राक्तनग्रन्थो व्याख्यातः [6]सूत्रान्तरे। असंभवस्यैव विप्रतिषेधत्वे 'नावश्यम्' इति ग्रन्थे द्विकार्ययोगस्यापि तत्त्वावभासः कथमित्यत आह — [7]**स त्विति**। नावश्यं द्विकार्ययोगे सत्यसंभवस्य विप्रतिषेधत्वम्, किंतु केवलस्यापीति भाष्यार्थं इत्यर्थः। ततश्च विप्रतिषेधव्यापकत्वादसंभवस्यैव तत्प्रयोजकत्वम्, [8]न क्वचित् तत्सहचारिणो द्विकार्ययोगस्य। अस्यापि प्रयोजकत्वेऽसंभवविरहे द्विकार्ययोगमात्रादपि प्रयोज्यापत्तेरित्याह — **तथा हीति**। [9]यथैवासंभवव्यावृत्त्या विरोधव्यावृत्तिर्न तथा द्विकार्ययोगव्यावृत्त्या तद्व्यावृत्तिः, अतोऽपि न तस्य तत्प्रयोजकत्वमित्याह — **क्वचिदिति**। **असंभवपदात्** तन्मूलविरोधो लक्ष्यते। संज्ञाप्रवृत्त्या अयादिनिमित्ताक्षतेः कथं बाधकत्वम्, अत आह — **प्रकृतीति**। निमित्तशब्देन कार्यहेतुमात्रमुच्यते, न परनिमित्तमित्यभिप्रेत्याह — **ईत्वमिति** ॥

[१, २२३–२२६]

(**लघुविवरणम्**) भाष्ययोजना — 'सत्यसंभवे युक्तो विप्रतिषेधः' इति ब्रुवता असंभवस्य तुल्यत्वादयादीनामीत्वादीनां च विप्रतिषेध उपक्षिप्तः, तमाक्षिपति — **एवमपीति**। तत्र हेतुमाह — **सतोर्हीति**। युगपत्प्राप्तयोरित्यर्थः। **न चात्रेति**। अयादिषु कर्तव्येष्वीत्वोत्वे न प्राप्नुत [10]इत्यर्थः। **व्याख्यानान्तरमिति**। 'सत्यसंभवे' इत्यनेन प्रगृह्यसंज्ञाया [11]अयादीनां चासंभवेन विप्रति-

---

[1] हेतुकीर्तनेनेत्यर्थः।
[2] कथं त्विति — क.
[3] कल्प्यते — ख.
[4] ग्रन्थयोगं — ख.
[5] वदनेन — ख.
[6] इको गुणवृद्धी इत्यत्र क्रोष्ट्रीयमतोपन्यासप्रकरणे।
[7] प्रदीपे 'स च कदाचित्' इत्यत्र 'स तु कदाचित्' इति निर्णयसागरमुद्रिते पाठः।
[8] न क्वचित्सहकारिणः — क.
[9] यदैवासंभव — ख.
[10] 'इत्यर्थः' इति नास्ति — ड, ढ.
[11] अयादीनां च संभवेन — ड, ढ; अयादीनामसंभवेन — ण.

षेधः समर्थितः, तमाक्षिपति — **एवमपीति**। तत्र हेतुः — **सतोर्हीति**। [1]नन्वयादीनामत्र प्राप्तिरस्त्येवेत्यत आह — **न चात्रेति**। [2]प्रगृह्यसंज्ञा प्राप्नोतीति शेषः। कुत इत्यत आह — **ईत्वोत्वे इति**। नेत्येतत् काकाक्षिवत् 'स्तः' इत्यनेन प्राक्तनेनापि संबध्यत [3]इत्येतद् व्याख्यानन्तरम्। तस्य च क्लिष्टत्वमध्याहारादेः। अथवा क्लिष्टत्वं बाधितत्वम्, तच्च संज्ञायाः प्रकृतिभावार्थत्वात् [4]तस्य चायाद्यपवादत्वात् तदर्था [5]प्रगृह्यसंज्ञाप्यपवाद इत्युत्सर्गापवादयोर्विप्रतिषेधस्यायुक्तत्वेनेति भावः। 'स्वरे' इत्येतद् व्याचष्टे — **अचीति**। 'बहिष्पदलक्षणे' इत्येतद् व्याचष्टे — **द्वितीयपदेति** ॥

[१, २२३–२२६]

(**विवरणम्**) 'एवमपि' इत्यादिभाष्यस्यायमर्थः — 'सत्यसंभवे' इत्यनेन विप्रतिषेधः समर्थ्यते प्रगृह्यसंज्ञाया अयादीनां च। न च संज्ञाया अयादीनां च युगपत्प्राप्तिः। असतोर्हीदूतोरयादीनां प्राप्तिः, सतोश्च तयोः संज्ञायाः। न च युगपत्तयोः सत्त्वासत्त्वे संभवतः, येन विप्रतिषेधः संज्ञाया अयादीनां च स्यात्। [6]ब्रवीति चायं [7]प्रगृह्यस्यायादीनां च विप्रतिषेधम्। [8]तन्नूनं प्रगृह्यनिमित्तत्वादीदूतौ प्रगृह्यशब्देनाभिप्रेत्य तयोरयादीनां च विप्रतिषेधमभिप्रैति। [9]तमप्याक्षिपामीत्याह — **एवमपीत्यादि**। **सतोर्हीति**। युगपत्प्राप्तयोरित्यर्थः। किमत इत्यत आह — **न चेति**। अयादिषु प्राप्तेष्वित्यर्थः। **स्तः** प्राप्नुतः, आत्मानं दर्शयत इत्यर्थः। **उभयमसिद्धं** [10]'पूर्वत्रासिद्धम्' इत्यनेनेत्यर्थः। परिहरति — **आश्रयादिति**। तद्व्याचष्टे — **प्रगृह्येति**। **असिद्धत्वाभावात्** अयादीन् प्रतीति शेषः। **तथा हीति**। 'सतोर्हि' इत्यनेन युगपत्प्राप्तयोर्विप्रतिषेध इत्युक्त्वा व्यतिरेककथनावसरे 'ईत्वोत्वे न स्तः' इति वचनादयादीनामीत्वोत्वयोश्च विप्रतिषेधाक्षेपः प्रतीयते। [स] 'सत्यसंभवे' इत्यनेनेत्वोत्वयोरयादीनां च विप्रतिषेधेऽभिमत उपपद्यत इति भावः। केचित्तु — असंभवं प्रगृह्यसंज्ञाया अयादीनां चोरपाद्यायादीनामीत्वोत्वयोश्च विप्रतिषेधाभिधानमसमञ्जसं मन्यमानाः 'सत्यसंभवे' इत्यनेनापि [11]प्रगृह्यायादीनां परस्परं विप्रतिषेधो [12]युक्तोऽभिहित इति मन्वानाः 'एवमपि' इत्यादिग्रन्थमन्यथा व्याचक्षते। **सतोर्हीति**। युगपत्प्राप्तयोरित्यर्थः। किमत इत्यत आह — **न चेति**। [13]**अत्र** अयादिप्राप्तिस्थले, 'प्रगृह्यसंज्ञा [14]प्राप्नोति' इत्यध्याहारः। कुतो न प्राप्नोति संज्ञेत्यत आह — **ईत्वेति**। ईत्वोत्वे, उपरितननञ्आकर्षणेन न स्तः, नापि मकार इति योजना। असत्त्वे हेतुः — **उभयमिति**। अयादीन् प्रतीति शेषः। परिहरति — **आश्रयादिति**। [15]संज्ञित्वेनेति शेषः। संज्ञायाः कार्यित्वेनाश्रयादीत्वादीनामसिद्धत्वाभावात् स्वनिमित्तेत्वादिप्रवर्तनद्वारा प्रगृह्यसंज्ञा विप्रतिषेधेनायादिभ्यः प्राक् प्रवर्तत इति। तदिदं व्याख्यानन्तरमध्याहारादिप्रसङ्गात्

---

[1] नन्वयादीनामप्राप्तिः — ण.
[2] 'प्रगृह्यसंज्ञा' इति नास्ति — ड, ढ.
[3] इति तद्व्याख्यानान्तरस्य क्लिष्टत्वं — ड, ढ
[4] 'तस्य चायाद्यपवादत्वात्' इति नास्ति — त.
[5] प्रगृह्यसंज्ञापवाद इति — ण.
[6] ब्रवीति चाचार्यः — ट.
[7] प्रगृह्यसंज्ञाया इत्यर्थः।
[8] 'तत्' इति नास्ति — झ, ञ.
[9] तमप्यहमपाकरोमीत्याह — ञ.
[10] पा. सू. ८. २. १.
[11] प्रगृह्यादीनां — छ, झ, ञ.
[12] युक्तोऽभिमत इति — ट.
[13] तत्र — ट.
[14] 'न च' इति भाष्यस्थनञ्ना न प्राप्नोतीति लभ्यत इति भावः।
[15] 'संज्ञित्वेनेति शेषः' इति नास्ति — छ, ट.

संज्ञाया अयादीनां च सम्यग् युगपत्प्राप्त्यनुपपादनाच्च [1]क्लिष्टत्वेन नोक्तमित्याह — **अत्रेति**। लाघवमप्याह — **प्लुतस्य चेति**। **यथोद्देशेति**। तत्र हि न परा प्रगृह्यसंज्ञेति न विप्रतिषेधेनेष्टसिद्धिः, नापि सिद्धे प्रगृह्यकार्ये संज्ञा सप्रयोजनेति भावः। **कार्येति**। तत्र हि सिद्धे प्रगृह्यकार्ये वचनं सप्रयोजनमिति योगविभागाश्रयणमर्थवदिति भावः। 'अदसः' इति पञ्चमी चेदुत्तरत्र 'मात्' इत्यस्य न विशेषणं स्यात्। अवयवषष्ठी चेत् 'अमी' इत्यादाववयवत्वं [2]दुर्बोधमित्यतः [3]संबन्धमात्रे षष्ठीं दर्शयति — **संबन्धेति**। [4]नन्वयं मात्परो न भवतीत्यत आह — **अदस इत्यनेनेति**। नन्वदसः प्रगृह्यसंज्ञायां न किंचित्कार्यं, प्रगृह्यकार्यस्य सर्वस्याज्निबन्धनत्वात्। अतः कस्याचः प्रगृह्यसंज्ञेत्यपेक्षायामीदूदेत्समुदायो [5]वापेक्ष्येत, [6]आनन्तर्यादेद्मात्रं वा। अतः कथं [7]'एत्' इत्यस्य निवृत्तिर्भाष्यकृतोच्यत इत्यत आह — **ईदूतोरेवेति**। [8]**मशब्देनेति**। लक्षणया प्रतिपादितः। **असिद्धत्वमेवेति**। ततश्चाश्रयात् सिद्धत्वं विनैवायादीनामीत्वोत्वयोश्च विप्रतिषेधोपपत्तिरित्यर्थः। **सिद्ध इति**। प्रगृह्यसंज्ञायां सिद्धत्ववचनमीदूतोरयादीन् प्रति सिद्धत्वं विना सप्रयोजनं नेति सामर्थ्यात् तान् प्रत्यपि तौ सिद्धावित्यभिप्रायः। नन्विहासति विशेष्ये कथमेतावता तदन्तविधिरित्यत आह — [9]**पूर्वत्रेति**। [10]तदन्तस्यैवेत्यर्थाधिकारपक्ष इति भावः। **शब्दमात्रमिति**। विशेष्यस्य [11]चात्राभावान्न तदन्तविधिरित्यर्थः। ननु [12]'एत्' इत्यस्य निवृत्तत्वादत्र [13]नास्ति प्रसङ्ग इति [14]कस्मान्नोक्तमित्यत आह — **योगेति**॥

[१, २२३–२२६]

(**उद्द्योतनम्**) 'एवमपि' इति भाष्यस्यायमर्थः — 'सत्यसंभवे' इत्यनेनायादीनां संज्ञायाश्च विप्रतिषेधः समर्थ्यते। न च संज्ञाया अयादीनां च [15]युगपत्प्राप्तिः। असतोर्हीदूतोरयादीनां[16] प्राप्तिः, सतोश्च तयोः संज्ञायाः। न च युगपत् तयोः सत्त्वासत्त्वे संभवतः, येन संज्ञाया अयादीनां च [17]विप्रतिषेधः संभवेत्। ब्रवीति चायं संज्ञाया अयादीनां च विप्रतिषेधम्। नूनमसौ संज्ञानिमित्तेदूतौ संज्ञाशब्देनाभिधाय तयोरयादीनां च विप्रतिषेधमभिप्रैति। तमप्याक्षिपामीत्याह **एवमपीति**। **सतोर्हीति**। युगपत्प्राप्तयोरित्यर्थः। ततः किम्, अत आह — **न चेति**। **अत्र** अयादिषु प्राप्तेषु। **स्तः** प्राप्नुतः, आत्मानं दर्शयत इति यावत्। **असिद्धं** [18]'पूर्वत्रासिद्धम्' इत्य-

---

[1] क्लिष्टत्वेनोक्तमित्याह — ज, ञ.
[2] दुःसाधमित्यतः — च, छ.
[3] संबन्धमात्रषष्ठीं — च, छ, ट.
[4] नन्वेवं मात् — च, छ, ट.
[5] वापेक्ष्यते — च, छ, झ, ञ.
[6] आनन्तर्यमेज्मात्रं — झ, ञ; आनन्तर्यादेतन्मात्रं — ट.
[7] एतदित्यस्य — ट.
[8] माशब्देनेति — च, छ, ट.
[9] प्रदीपे 'पूर्वसूत्रे हि' इत्यस्य स्थाने 'पूर्वत्र हि' इति मद्रपुरीमुद्रिते पाठः। सोऽत्र स्वीकृतः।
[10] तदर्थस्यैवेति — च, छ, ट.
[11] वात्राभावात् — च, छ, ट.
[12] एतदित्यस्य — छ.
[13] नातिप्रसङ्ग इति — च, छ, ट.
[14] कस्मान्न भवतीत्यत आह — च, छ.
[15] 'युगपत्प्राप्तिः' इयादि 'ब्रवीति चायं संज्ञाया अयादीनां च' इत्यन्तं नास्ति — ऊ.
[16] 'अयादीनाम्' इत्यस्यानन्तरं चकारोऽधिकः — अ.
[17] 'विप्रतिषेधः' इत्यादि 'अयादीनां च' इत्यन्तं नास्ति — अ.
[18] पा. सू. ८. २. १.

नेन। परिहरति — **आश्रयादिति** भाष्यम्। तद्व्याचष्टे — **प्रगृह्येति**। **असिद्धत्वाभावात्** अयादीन् प्रतीत्यादिः। ननु तेषां सिद्धत्वेऽप्यनेन केषां विप्रतिषेधो निरूप्यते, अत आह — [1]**ईदादीनां तेषामिति**। नन्वयादीनां संज्ञायाश्च विप्रतिषेधस्याक्षिप्तत्वात् कथमीदादीनां तन्निरूपणम्, अत आह — **तथा हीति**। 'सतोर्हि' इत्यनेन युगपत्प्राप्तयोर्विप्रतिषेध इत्युक्त्वा व्यतिरेककथनावसरे 'ईत्वोत्वे न स्तः' इति वचनादीत्वोत्वयोरेव विप्रतिषेधाक्षेपः प्रतीयत इत्यर्थः। [2]एतदनुसारेण 'एवमपि' इति भाष्यं पूर्वमेवास्माभिर्व्याख्यातम्। कार्यद्वयस्य सावकाशत्वं वदन्निष्टसिद्धिमाह — [3]**तत्रेति**। केचित्तु प्रगृह्यसंज्ञाया अयादीनां चासंभवोपपादनानन्तरं तत्रैवाक्षेपो युक्तः, नेत्वोत्वयोरिति मन्यमानाः 'एवमपि' इत्यादिभाष्यमेवं व्याचक्षते। **'सतोः** युगपत्प्राप्तयोः। किमतः, अत आह — **न चेति**। **अत्र** अयादिप्राप्तिस्थले, प्रगृह्यसंज्ञा प्राप्नोतीत्यध्याहारः। कुतो न प्राप्नोति, अत आह — **ईत्वेति**। ईत्वोत्वे नेत्यर्थः। नकारस्यावृत्त्या पूर्वपराभ्यामन्वयः। यत ईत्वोत्वे न स्तः, नापि मकार इत्यर्थः। असत्त्वे हेतुः — **उभयमपीति**। अयादीन् प्रतीत्यादिः। परिहरति — **आश्रयादिति**। प्रगृह्यसंज्ञायामीदादीनां कार्यित्वेनाश्रयणादसिद्धत्वाभावादीत्वोत्वप्रवर्तनद्वारा संज्ञा पूर्वं प्रवर्तते' इति। इदं व्याख्यानमध्याहारादि[4]दोषान्नोक्तमित्याह — **अत्रेति**। [5]'ससजुषो रुः' इत्यनन्तरं वचनशङ्कां वारयति — **रोः सुपीति**। [6]ननु षष्ठे [7]'ऋत उत्' इत्यत्र उग्रहणं कर्तव्यम्। अत्र [8]'रोः सुपि' इत्यतो रुग्रहणानुवृत्तावप्युग्रहणं कर्तव्यमिति को विशेष इत्याशङ्क्य एवंकरणे [9]'पूर्वत्रासिद्धम्' इति [10]शास्त्रमबाधितं भवतीत्याह — **एवं चेति**। [11]तत्र हेतुः — **अत्रेति**। [12]'रोः सुपि' 'अत उरति' इति पाठ इत्यर्थः। **प्राप्तोति**। [13]अप्राप्तस्य बाधायोगादित्यर्थः। लाघवमप्याह — **प्लुतस्य चेति**। **यथोद्देशेति**। तत्र न परा प्रगृह्यसंज्ञेति विप्रतिषेधान्नेष्टसिद्धिः, [14]नापि सिद्धप्रगृह्यकार्ये संज्ञा सप्रयोजनेति सामर्थ्याश्रयणमिति भावः। **कार्येति**। [15]तत्र सिद्धे प्रगृह्यकार्ये वचनं सप्रयोजनमिति योगविभागाश्रयणमर्थवदिति भावः। योगविभागप्रयोजनं भाष्य एव व्यक्तमिति भावः। 'अदसः' इति पञ्चमी चेत् 'मात्' इत्यस्य विशेषणं न स्यात्। अवयवषष्ठीत्वे 'अमी' इत्यादावन्तवद्भावेनावयवत्वप्रतीतिः क्लिष्टा स्यात्, अत आह — **संबन्धसामान्य इति**। भाष्ये [16]**एको यत्सिद्ध इति**। [17]'अणोऽप्रगृह्यस्य' इति [18]प्रगृह्यप्रतिषेध इत्यर्थः। भाष्ये **अपरः** प्रगृह्यप्रकृतिभावः। अत्रेदूदेतामभावात् कथं प्रगृह्यसंज्ञा, अत आह —

---

[1] प्रदीपे 'ईत्वादीनां तेषाम्' इत्यस्य स्थाने 'ईदादीनां तेषाम्' इत्यन्नंभट्टपाठ इति प्रतीयते।
[2] तदनुसारेण — अ.
[3] अत्र त्विति — अ; अत्रेति — आ, इ, ऊ, ॠ.
[4] आदिशब्दो नास्ति — म, उ.
[5] पा. सू. ८. २. ६६.
[6] 'ननु षष्ठे' इत्यादि 'को विशेष इत्याशङ्क्य' इत्यन्तं नास्ति — म, इ, उ, ऊ.
[7] पा. सू. ६. १. १११.
[8] पा. सू. ८. ३. १६.
[9] पा. सू. ८. २. १.
[10] शास्त्रं बाधितं — अ; शास्त्रं न बाधितं — आ, ॠ; शास्त्रबाधितं — ऊ.
[11] अत्र — म, इ, उ, ऊ.
[12] पा. सू. ८. ३. १६.
[13] प्राप्तस्य — ॠ.
[14] 'नापि सिद्ध' इत्यतः 'सप्रयोजना' इत्यन्तं नास्ति — म, इ, उ, ऊ.
[15] 'तत्र सिद्धे' इत्यादि'अर्थवदिति भावः' इत्यन्तं नास्ति — म, इ, उ, ऊ.
[16] 'एको यत्तत्सिद्धे' इत्यस्य स्थाने 'एको यत्सिद्धे' इति भाष्यपाठोऽन्नंभट्टस्येति भाति।
[17] पा. सू. ८. ४. ५७.
[18] प्रगृह्यस्यानुनासिकनिषेध इत्यर्थः।

अदस् इत्यादि। **अत्वं** त्यदाद्यत्वम्। **एत्वम्** [1]'आङि चापः' इत्यनेन। मात्परत्वाभावा-[2]दत्राप्राप्तिमाशङ्क्याह —**अदस इत्यनेनेति**। ननु 'अदस ईदादयः प्रगृह्याः' [3]इत्युक्ते एदन्त-निवृत्तिः कथमुक्ता, अत आह — **ईदूतोरेवेति**। [4]अत्र बहुत्वमविवक्षितमिति भावः। ननु स्वरित-लिङ्गेन [5]कियत्पर्यन्तमनुवृत्तस्य हि निवृत्तिः, सात्र न संभवति, स्वरितत्वाभावात्, अत आह — **अननुवृत्तिरेवेति**। **यद्येवम्** एदित्यस्याननुवृत्तौ। **सतीति**। योगविभागार्थं माद्ग्रहणमित्यर्थः। 'अथवा' इति पक्षे योगविभागानुपयोगादाह — **एकेति**। **स्थानी** दकारः, **उक्तः** [6]लक्षणया। ईदूदर्थश्च स्थानी ईदूच्छब्देनोच्यत इत्यर्थः। तेनादसो दात्परयोरेदौतोः प्रगृह्यसंज्ञेत्युक्तं भवति। ननु 'मार्थात्' इत्यादिव्यपदेशेऽप्याश्रयात् सिद्धत्वमावश्यकमिति नेदं समाधानान्तरं स्यात्, अत आह — **न चेति**। [7]शास्त्रीये कार्येऽसिद्धत्वम्, न च व्यपदेशः शास्त्रीयं कार्यम्, अन्यथा 'प्लुतोऽसिद्धः' इति व्यपदेशोऽपि न स्यादिति पूर्वसूत्रे उक्तमित्यर्थः। **असिद्धत्वमेवेति**। ततश्चाश्रयात् सिद्धत्वं 'विनैवायादीनामीत्वोत्वयोश्च विप्रतिषेधोपपत्तिरित्यर्थः। 'स्वरे बहिष्पदलक्षणे' इति विशिष्टमेकं प्रयोजनम्, तद्व्याचष्टे — [8]**स्वरे अचीति**। **द्वितीयपदेति**। द्वितीयपदस्थेऽचि यत्कार्यं प्रकृति-भावलक्षणं [10]तत्र सिद्धे वक्तव्ये इत्यर्थः। 'बहिष्पदलक्षणे' इत्यस्य व्यावर्त्यमाह — **तेनेति**। 'प्रगृह्य' इत्यनेनास्य पौनरुक्त्यं निराह — **प्रगृह्येति**। **सिद्धे लक्ष्ये** अमू आसाते इत्यादिलक्ष्ये। प्रगृह्य-संज्ञायां सिद्धत्ववचनमीदूतोरयादीन् प्रति सिद्धत्वं विना निष्प्रयोजनमिति सामर्थ्यात् तान् प्रत्यपि [11]तौ सिद्धाविति भावः। ननु मात्परस्यैतः प्रगृह्यसंज्ञायां कथं सकि दोषः, अत आह — **मात्पर-मिति**। नन्विहासति विशेष्ये कथमेतावता तदन्तविधिः, अत आह — **पूर्वत्रेति**। [12]**तदर्थस्येति**। अर्थाधिकारपक्ष इति भावः। **शब्दमात्रमिति**। [13]विशेष्याभावाच्चात्र न तदन्तविधिरिति भावः। शब्दमात्रानुमाने इष्टसिद्धिमाह — **तत्रेति**। नन्, 'एत्' इत्यस्य निवृत्तत्वान्नात्र[14] प्रसङ्ग इत्येव किमिति नोक्तम्, अत आह — **योगेति**। **तन्निवृत्त्येति**। इहेदमपि समाधानं [15]भवतीत्युक्तमित्या-शयः॥

[१. २२३–२२६]

(**रत्नप्रकाशः**) 'अयादीन् बाधते' इति भाष्यस्याशयमजानन्नाह — **एवमपीति**। कार्यकाल-पक्षे प्रगृह्यसंज्ञासूत्रस्य प्रकृतिभावसदेशत्वेन परत्वेऽपीति भावः। **न चात्रेत्वोत्वे स्त इति**। तथा च

---

[1] पा. सू. ७. ३. १०५. एवमुपपादनात् 'एत्वम्' इत्यस्मात् पूर्वं प्रदीपे 'आङि चाप इति' इत्यन्नंभट्टपाठे नास्तीति प्रतीयते। दृश्य-मानेषु मुद्रितेषु प्रदीपेषु 'आङि चाप इत्येत्वम्' इत्युपलभ्यते।

[2] 'अत्र' इति नास्ति — म, उ.

[3] इत्युक्त्वा — ऊ.

[4] तत्र — म, इ, उ, ऊ.

[5] कतिपयसूत्रपर्यन्तमित्यर्थः।

[6] 'लक्षणया' इति नास्ति — इ, ऊ.

[7] शास्त्रीयकार्ये — म, उ, ऊ.

[8] विनाप्ययादीनां — म, उ.

[9] प्रदीपे 'स्वर इति। अचीत्यर्थः' इत्यस्य स्थाने 'स्वरे अचि' इत्यन्नंभट्टपाठ इति भाति।

[10] तत्रासिद्धे — अ, आ, इ, ऋ.

[11] 'तौ' इति नास्ति — अ, आ, इ, ऋ.

[12] प्रदीपे 'तदन्तस्यैवानुवृत्तिः' इत्यत्र 'तदर्थस्यै-वानुवृत्तिः' इति मद्रपुरीमुद्रिते पाठः।

[13] विशेष्यभावच्चात्र — अ, आ.

[14] नातिप्रसङ्गः — म, उ.

[15] भवतीत्याशयः — म.

तयोः क्रियमाणा प्रगृह्यसंज्ञापि नास्त्येवायादीन् प्रतीति भावः। **उभयमिति**। ईत्वोत्वयोः संज्ञित्वेनैकरूप्यात् तत् तन्निमित्तं मकारश्चेत्युभयमयादीन् प्रत्यसिद्धमिति भावः। **आश्रयात् सिद्धत्वमिति**। ईत्वाद्यनुवादेन प्रगृह्यसंज्ञाया विधीयमानत्वेन तां प्रति जायमानमीत्वादिसिद्धत्वं 'वृद्धकुमारीवरन्यायेनायादीन् प्रत्यपि भवति। तथा चेत्वादिकं प्रवर्त्य ततः प्रगृह्यसंज्ञा भविष्यतीति भावः। एतेन 'प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणादसिद्धत्वाभावादीत्वादीनां तेषामयादीनां च विप्रतिषेधो निरूप्यते। तथाहि 'सतोर्हि विप्रतिषेधो भवति' इति पूर्वपक्षे ईदादीनामेव विप्रतिषेध आक्षिप्तः' इति निरस्तम्। अयादिभिः सह प्रगृह्यसंज्ञाया एव विप्रतिषेधस्योपक्रान्तत्वेन तस्यैवाक्षिप्य समाहितत्वेनानयोरप्याक्षेपसमाधानयोस्तत्परत्वेनैवोपपादयितुमुचितत्वात्। प्रगृह्यसंज्ञानैरपेक्ष्येणायादीनामीदादीनां च विप्रतिषेधनिरूपणासंभवाच्च। एतेन 'अत्र व्याख्यानान्तरं क्लिष्टत्वान्नोपन्यस्तम्' इत्यपि निरस्तम्। तस्याक्लेशैनैव भाष्यानुगुण्येन मयोपपादितत्वात्। प्रसङ्गात् पृच्छति — **किं पुनरिति**। **यत्रैवेति**। [२]'रोः सुपि' इत्यस्यानन्तरम् 'अत उरति' इति वक्तव्यमिति भावः। **तस्मात् तत्रेति**। यथाश्रुते [३]'अतो रोरप्लुतादप्लुते' इत्येव स्वस्थाने विद्यमाने सति तस्यासिद्धत्वाभावोऽङ्गीकर्तव्य एवेति भावः। तदेवं 'विप्रतिषेधाद्वा' इति पक्षे निर्दुष्टे स्थितेऽपि 'प्रगृह्यसंज्ञावचनसामर्थ्यात्' इति प्रथमपक्षसमकक्षं पक्षान्तरं वक्तुं प्रथमं तावत् स्मारयति — **अथवेति**। एतेन 'यथोद्देशपक्षाश्रयेणैतदुच्यते' इति निरस्तम्। पक्षद्वयसाधारण्येनैवास्य प्रवृत्तत्वात्। पक्षान्तरमाह — **अथवेति**। एतेन 'कार्यकालेऽयं पक्षः' इति निरस्तम्। प्रगृह्यसंज्ञाकार्यद्वयापेक्षया तत्संज्ञाशास्त्रस्यापि द्वैविध्याश्रयणेन यथोद्देशपक्षेऽपि योगद्वयसंभवात्। **अदस इति**। अवयवषष्ठीयमीदाद्यपेक्षया। एतेन 'संबन्धसामान्ये षष्ठीयम्, अदसः संबन्धिन ईदूदेत इति' इति निरस्तम्। 'गौर्यसौ' इत्यादौ सामीप्यसंबन्धे गौर्यादीकारादीनां प्रगृह्यसंज्ञाप्रसङ्गात्। **माच्च पर ईदादय इति**। अत्रैकारस्यानुवृत्तावपि न दोषः, मात्परस्य तस्यासंभवादेवातिप्रसङ्गाभावादित्याशयेन बहुवचननिर्देशः। एवमुत्तरत्र ज्ञेयम्। **इहापि तर्हि प्राप्नोतीति**। 'अदसः' इत्यनेन प्रगृह्यसंज्ञेति शेषः। **प्रकृतिभावः प्रसज्येतेति**। 'अदे आ, अदे ओस्' इत्यवस्थायामिति शेषः। तथा च तत्र मूत्वे कृते 'अमू आ, अमू ओस्' इत्येव स्यात्, न तु 'अमुया, अमुयोः' इति स्यादिति भावः। **पदान्तप्रकरण इति**। तथा च [४]'एङः पदान्तादति' इति सूत्रात् पदान्तादित्यनुवर्त्य प्रथमया [५]'विपरिणम्य 'प्लुताश्च प्रगृह्याश्च पदान्ताः प्रकृत्या स्युः' इति व्याख्यानान्न 'अमुया' इत्यादौ प्रकृतिभावः स्यादिति तत्र प्रगृह्यसंज्ञायामपि न दोष इति भावः। **अमुकेऽत्रेत्यत्र प्राप्नोतीति**। 'अदसः' इत्यंशेन प्रगृह्यसंज्ञेति शेषः। एदन्तपरमेद्ग्रहणमित्यर्थः। **निवृत्तमिति**। अस्वरितत्वादिति शेषः। न चैवं सति माद्ग्रहणं व्यर्थमिति वाच्यम्, तस्य योगविभागार्थत्वात्। अस्मिन् पक्षे एकारांशेऽस्वरितत्वं प्रतिज्ञेयं भवतीत्यस्वरसादेकयोगपक्ष एव परिहारान्तरमाह — **अथवेति**। **मार्थादीदाद्यर्थानामिति**। मः **अर्थः** आदेशतया प्रयोजनं यस्य स मार्थः, तस्मात् परे ये **ईदाद्यर्थाः** ईदादिस्थानिनस्तेषामित्यर्थः। न चास्मिन् पक्षे 'अमी आसते' इत्यादौ प्रकृतिभावादीत्वादिकमेव न स्यादिति वाच्यम्, तदप्रवृत्तौ

---

[१] महाभाष्ये ८. २. ३. अयं न्यायः प्रतिपादितः— वृद्धकुमारी इन्द्रेणोक्ता वरं वृणीष्वेति, सा वरमवृणुत—पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति। न च तावदस्याः पतिर्भवति, कुतः पुत्राः कुतो गावः कुतो धान्यम्। तत्रानयैकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवति, इति।

[२] पा. सू. ८. ३. १६.

[३] पा. सू. ६. १. ११३.

[४] पा. सू. ६. १. १०९.

[५] 'विपरिणमय्य' इत्युचितं भाति। अन्तर्भावितण्यर्थकत्वं वा बोध्यम्।

प्रगृह्यसंज्ञाया एवाप्रसक्तेः। अचि परे तदज्निमित्तककार्यं प्रति प्रकृतिभावस्य विहितत्वेनेत्वादिकं प्रति प्रकृतिभावाप्रसक्तेश्च। अस्मिन् पक्षेऽयावेकादेशान् प्रत्येव प्रकृतिभावो ज्ञेयः। 'अमी आसते' इत्यादौ त्वीत्वादेरसिद्धत्वादेव यण् न भवतीति तस्य प्रगृह्यसंज्ञाभावेऽपि दोषो नास्ति। स्थानिवद्भावेन प्रगृह्यसंज्ञा तस्य भवतीत्यनुनासिकोऽपि न भवत्यवसाने। यद्यप्ययं निर्दुष्टः सुबोधश्च, तथापि विषयव्याप्त्यर्थं वार्तिककाराभिमतं पक्षान्तरमाह — **उक्तं वेति**। [1]'स्वरितो वानुदात्ते पदादौ' इति सूत्रे वार्तिककारेणेति शेषः। **स्वरे बहिष्पदलक्षण इति**। बहिर्भूतमदःशब्दादन्यत् पदं लक्षणमाश्रयो यस्य तादृशे, **स्वरे** अचीत्यर्थः। तेन 'अमुया, अमुयोः' इत्यादौ न दोष इति भावः। यद्यपि 'प्रगृह्यसंज्ञायामदस ईत्वोत्वे सिद्धे' इत्युक्तेऽपि सिध्यति, तथापि मन्दबुद्धयनुग्रहाय 'स्वरे बहिष्पदलक्षणे' इति पृथक् पठितम्। **तत्र सकि दोष इति**। पूर्वसूत्र इवेदादयस्तदन्तपरा इति ईदाद्यन्तमेव माद्ग्रहणेन विशेष्यत इति मन्यते। एतेन 'पूर्वसूत्रे तदन्तं गृहीतमिति तदन्तस्यैवानुवृत्तिरिति भावः' इति निरस्तम्। अर्थानुवृत्तेरत्र शास्त्रे [2]कुत्राप्यस्वीकारात्। **ग्रहणविशेषणत्वादिति**। पूर्वसूत्रे द्विवचनं प्रतीदादीनां विशेषणत्वात् तदन्तविधिराश्रितः। अत्र त्वीदादीनामेव प्राधान्यात् त एव माद्ग्रहणेन विशेष्यन्त इति नोक्तदोष इति भावः। उकारेण ककारेण च व्यवधानाद्धि तत्रैकारस्य प्रगृह्यसंज्ञा न प्राप्नोति। तथा चात्र माद्ग्रहणं ज्ञापयति — एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः, इति परिभाषास्तीति। एतेन 'योगविभागे दोषप्रसङ्गादेदन्तमिति निवृत्तमित्युक्तम्। एकयोगे तु तन्निवृत्त्या न प्रयोजनमिति न वा ग्रहणविशेषणत्वादित्युत्तरमुक्तम्' इति निरस्तम्। ग्रहणविशेषणेनैवैकारस्य निवर्तितत्वेन 'अमुकेऽत्र' इत्यत्र तन्निवृत्तिप्रयोजनस्य च सत्त्वेन तस्य व्याहतत्वात्॥

[१, २२३–२२६]

(**नारायणीयम्**) एवं तावद्बहिरङ्गायाद्यसिद्धत्वादन्तरङ्गेत्वादिषु कृतेषु तेषामसिद्धत्वादयादिप्राप्तावाश्रयात् सिद्धत्वेन संज्ञाप्राप्तौ च विप्रतिषेधस्तयोरुपन्यस्तः। अत्रेदं निरूपणीयम् — किं यथोद्देशे संज्ञायामीत्वादेरुत कार्यकाल इति। नाद्यः, संज्ञाया अयादिबाधकत्वानुपपत्तेः। अन्त्येऽनुनासिकपर्युदासार्थसंज्ञायामसिद्धत्वाभावात् प्रकृतिभावार्थायां तस्यामसिद्धत्वबाधानुपपत्तेर्नायादिभिः संज्ञायाः स्पर्धोपपत्तिः। न च प्रकरणोत्कर्षात् सर्वार्थत्वं संज्ञाया इत्यसिद्धत्वबाधः, 'आश्रयात्सिद्धत्वम्' इत्यस्य स्वारस्यभङ्गात्। किं च प्रकृतिभावस्यायाद्यपवादत्वेन तदर्थसंज्ञाया अपि तथात्वमिति नायं विप्रतिषेधः। उक्ताद्यानुपपत्त्यभावेऽप्यनुपपत्त्यन्तरान्न विप्रतिषेध इति समीचीनः। अतोऽयादेरीत्वादेश्च विप्रतिषेधो वार्तिकाभिमत इति। 'एवमप्ययुक्तो विप्रतिषेधः, सतोर्हि,' इति तस्यैवाक्षेपः कृतः। तस्य चायमर्थः — संज्ञाया अयादीनां च विप्रतिषेधे निरूप्यमाणेऽपि तदयुक्ततेत्यर्थः। **न स्तः** न प्राप्नुतः, अयादिप्राप्तिवेलायाम्। नन्वस्तु संज्ञायामाश्रयात् सिद्धत्वमीत्वादेः, अयादींस्तु प्रत्यसिद्धत्वात् कथं विप्रतिषेध इति शङ्कां परिहरति — **प्रगृह्येति**। प्रकृतिभावार्थसंज्ञाविधानमयादीन् प्रत्यसिद्धत्वेनानर्थकं स्यादिति तान् प्रत्यपि सिद्धत्वमित्यर्थः। **परत्वादिति**। बहिरङ्गासिद्धत्वं तु [3]'नाजानन्तर्ये' इति निषेधान्नास्तीति मन्यते। न चास्मिन् पक्षे

---

[1] पा. सू. ८. २. ६.

[2] 'कुत्राप्यस्वीकारात्' इत्यस्यानन्तरं 'तदपि न, प्रकारेणैतो' इति 'ब' मातृकायां दृश्यते। तस्य प्रकृते संगत्यभावात् त्यागः कृतः।

[3] परिभाषा ५१.

ईत्वादिषु कृतेषु स्थानिबुद्ध्यादिप्राप्तिः, सकृद्गतिन्यायाश्रयणात्। [1]असिद्धत्वाबाधनेनापि [यत्] क्रियते तद्व्याख्यानं तु क्लिष्टमित्याह — **अत्रेति**। ईत्वोत्वयोः सतोः संज्ञाया अयादेश्च विप्रतिषेधः, ते तु न स्तः, न सद्बुद्धिगोचरत्वमनयोरित्यर्थः। असिद्धत्वेनादेशलक्षणप्रतिषेधान्न संज्ञाप्राप्तिरिति यावत्। क्लेशस्तु वर्णितोऽस्माभिः। [2]दृष्टान्तासिद्धिमुक्तामुपपादयति — **रोरिति**। ननु षष्ठे रुग्रहणमत्र तु 'उ'ग्रहणमिति को विशेषः, तत्राह — **एवं चेति**। न केवलं प्रतिपत्तिलाघवम्, अपि तु पदलाघवमपीत्याह — **प्लुतस्येति**। वचनसामर्थ्यस्य 'वचनार्थो हि' इत्यसिद्धत्वमिधानादाह — **यथेति**। संभवत्येकवाक्यत्वे तद्भेदः किमर्थ इत्यत आह — **कार्येति**। यद्यप्यत्रापि वचनसामर्थ्यमुपपादितमेव, तथापि विस्पष्टप्रतिपत्तये [3]वाक्यभेदाश्रयणम्। पञ्चमीशङ्कां निरस्यति — **संबन्धेति**। एकादेशस्यान्तवद्भावाददस्संबन्धित्वात् तत्स्थानिकस्येत्वादेरपि तत्संबन्धित्वम्। अत एवादसा पौर्वापर्याभावात् पञ्चम्यनुपपत्तिः। मुत्वोत्तरकालमीदाद्यभावात् प्राक्तु मोर्मात्परत्वाभावात् कथमिह प्रसङ्ग इत्यत आह — **अदस् इत्यादिना**। द्वन्द्वनिर्दिष्टे कथमेकदेशानुवृत्तिः, अत आह — **ईदूतोरिति**। [4]शब्दाधिकार इति भावः। दृष्टाधिकारस्य परावर्तनं निवृत्तिरिह [न] संभवतीत्यत आह — **अननुवृत्तिरिति**। प्रत्यासत्त्या विविक्तविषयत्वमस्य निवारयति — **एकेति**। तद्वाक्यभेदाश्रयणाल्लक्षणाश्रयणं लघ्वित्याह — [भाष्ये] [5]**त एवमिति**। [6]निवर्तमानस्य कथं तादर्थ्यमित्याशङ्क्य तत्सिद्धावुपयोगित्वादित्यभिसंधायाह — **मार्थ एवेति**। [7]संहितासाम्यादसिद्ध इति पदच्छेदभ्रमं वारयति — **असिद्धत्वमेवेति**। नानार्थत्वादाह — **अचीति**। बहिष्पदेन भेदो लक्ष्यत इत्याह — **द्वितीयेति**। लक्षणशब्देन तात्स्थ्यलक्षणेति दर्शितम्। अचीति सप्तम्या तु निमित्तेन कार्याक्षेपः। **प्रपञ्चार्थ इति**। अमुयेत्यादौ कालद्वयेऽपि संज्ञाया अप्राप्तेरेतावतापि सिद्धिः। एकारस्य मात् परत्वाभावादाह — **मादिति**। विशेष्यासंनिधाने कथं तदन्तविधिः, तत्राह — [8]**पूर्वत्रेति**। तर्हीदादौ[9] विशेषणत्वेन कथं परिहारः, न ह्यन्यार्थं प्रकृतमन्यार्थं भवतीत्याह — **स्वरितत्वेनेति**। एत्वनिवृत्त्यैव परिहारे वाच्ये ग्रहणविशेषणतया परिहारः किमित्याश्रितः, तत्राह — **योगेति**। [10]**प्रयोजनाभाव इति**। यद्यप्यनुवृत्तावपि तदभावः, तथाप्येकदेशनिवृत्तेर्दुर्ज्ञानत्वादनुवृत्त्याश्रयः परिहारः॥

विस्तरोऽपि विशेषज्ञैर्विद्वद्भिः क्षम्यतामिह।
अन्ये सहस्रं तं दृष्ट्वा कुप्येयुर्वा न नः क्षतिः॥

---

[1] असिद्धत्वबाधनेनापि — क.
[2] दृष्टान्तसिद्धिम् — क.
[3] वाक्ये भेदाश्रयणम् — क.
[4] पूर्वसूत्रे तदन्तपरयोरत्र तत्त्वाभावादिति भावः।
[5] तेनेति — क.
[6] वर्तमानस्य — क.
[7] भाष्ये 'स्वरे बहिष्पदलक्षणे प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये' इत्यत्र 'स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये, प्रगृह्यसंज्ञायां च' इति निर्णयसागरमुद्रिते पाठः। सोऽत्राभिसंहितः।
[8] प्रदीपे 'पूर्वसूत्रे हि तदन्तम्' इत्यत्र 'पूर्वत्र तदन्तम्' इति मद्रपुरीमुद्रिते पाठः।
[9] ईदादिनिरूपितविशेषणत्वेनेत्यर्थः।
[10] प्रदीपे 'न प्रयोजनमिति' इत्यत्र 'प्रयोजनाभाव इति' इति पाठोऽभिमत इति भाति॥ प्रयोजनाभावादिति — क.

[१, २२६–२२७]

(**लघुविवरणम्**) भाष्ये इहैव कस्मान्न भवतीत्यभिप्रेतमित्यभिप्रेत्याह — **अत्र हीति**। ननु [1]'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषा वचनमन्तरेण कथं [2]लभ्येत्यत आह — **स्वमिति**। स्वं शब्दस्येत्येव रूपपरिग्रह इत्यन्वयः। तत्र हेतुः — **अन्तरङ्गत्वादिः**। प्रतीतावुपदेशानपेक्षत्वम् **अन्तरङ्गत्वम्**। **अहेयत्वम्** अर्थपदार्थकत्वेऽपि स्वरूपापरित्यागात्। **असाधारणत्वं** शब्दान्तरस्य तत्प्रतिपादकस्याभावात्। रूपवदिति भिन्नं पदम्॥

[१, २२६–२२७]

(**विवरणम्**) प्रश्नभाष्येऽवधारणं विवक्षितमित्यभिप्रेत्य तत्र युक्तिमाह — [3]**अत्र हीति**। **युष्मे इति**। [4]'सुपां सुलुक्' इति विहित[5]विभक्त्यादेशे शेशब्द इत्यर्थः। शेश्चासावर्थवांश्चेति कर्मधारयं कृत्वा ग्रहणशब्देन षष्ठीसमासो वार्तिकेऽभिप्रेतः। **अन्तरङ्गत्वं** संगतिग्रहणमन्तरेण प्रतीयमानत्वम्, रूपशब्देन जातेरभिधानात् स्वसमवेतत्वं वा। यदा यदा शब्दोच्चारणं तदा तदा प्रतीयमानत्वम् **अहेयत्वम्**। शब्दान्तरोच्चारणे प्रतीयमानत्वाभावः **असाधारणत्वम्**। अर्थस्तु नैवम्, स्वप्रतीतौ संगतिग्रहणापेक्षत्वात् स्वासमवेतत्वात् शब्दोच्चारणेऽपि इतिशिरस्कत्वे प्रतीयमानत्वाभावात् पर्यायैश्च प्रतिपादनादित्यर्थः। **रूपवदिति**। न्यायात् [6]'स्वं रूपम्' इति वचनाच्च यथा रूपं गृह्यतेऽन्यत्र [7]तथार्थोऽपि। तथा च युगपदुभयानुग्रहायार्थवतो रूपस्य ग्रहणमित्यर्थः। **अर्थान्तराप्रादुर्भावात्** अर्थविशेषाप्रतीतेरित्यर्थः। **मत्वर्थीयः** लोमादित्वाच्छः। **अवयवेति**। यथा शुक्लैस्तन्तुभिरारब्धः पटः शुक्लः, न नीलः, नापि नीरूपः, तथार्थवत्समुदायस्यापि नात्यन्तविलक्षणार्थयोगः, नाप्यानर्थक्यमित्यर्थः। न्यायलब्धमेतदित्याह — **प्रतिपदेति**। सूत्रे साक्षान्निर्दिष्ट इत्यर्थः। **बहिरङ्गेति**। [8]लक्षणानुसारेण लक्ष्यं [9]कल्प्यत इत्यर्थः। **वाक्यस्य** पदसमूहस्येत्यर्थः। **हरिशशब्दवाच्योऽर्थः** [10]प्रकृत्यर्थविशिष्टो मत्वर्थः। **न शेति**। मत्वर्थमात्रेणेत्यर्थः। यद्यपि प्रत्यक्षानुमानिकयोः प्रत्यक्षस्यैव ग्रहणं न्याय्यम्, झटिति प्रतीतेः, तथाप्यङ्गभूतशब्दमात्रसंबन्धिनो न्यायादङ्गभूतार्थाश्रयरूपग्रहणानुगतार्थवद्ग्रहणपरिभाषा प्रबलेति भावः॥

[१, २२६–२२७]

(**उद्द्योतनम्**) प्रश्नभाष्ये इहैवेत्यवधारणं विवक्षितमित्यभिप्रेत्य तत्र युक्तिमाह — [11]**अत्रेति**।

---

[1] परिभाषा १४.
[2] लभ्यत इत्यत आह — ड, ढ.
[3] अत्रेति — ञ.
[4] पा. सू. ७. १. ३९.
[5] विभक्त्यादेशशेशब्द इत्यर्थः — ट.
[6] पा. सू. १. १. ६८.
[7] तथा तत्रार्थोऽपि — च, छ.
[8] 'लक्षणानुसारेण' इत्यस्यानन्तरम् 'एकम्' इत्यधिकम् — झ, ञ.
[9] कल्पयत इत्यर्थः — च, छ, ञ; कथ्यत इत्यर्थः — ट.
[10] प्रकृतिविशिष्टः — ञ.
[11] तत्रेति — आ.

युष्मे इति। [1]'सुपां सुलुक्' इत्यादिना [2]विभक्त्यादेशे शेशब्द इत्यर्थः। **अनुमेयं** शेरूपमित्यनुषङ्गः। भाष्ये **अर्थवत इति**। शेश्चासावर्थवांश्च तस्य ग्रहणमिति वार्तिके विग्रहोऽनेन सूचितः। विशेषणत्वस्य विवक्षाधीनत्वात् शे इत्यस्य तत्त्वमविरुद्धमिति भावः। ननु [3]'अग्नेर्ढक्' इत्यादौ शब्देनार्थप्रतीतावर्थे कार्यासंभवात् तद्वाचकशब्दमात्रे वैश्वानरादावपि तत्प्रसङ्गनिरासाय [4]'स्वं रूपम्' इति नियम्यते। [5]तत्रार्थवद्ग्रहणस्य कः प्रसङ्गः, अत आह — **स्वमिति**। [6]संगतिग्रहणं विना प्रतीयमानत्वम् **अन्तरङ्गत्वम्**। [7]रूपशब्देन जात्यभिधाने स्वसमवेतत्वं वा। शब्दोच्चारणे [8]सर्वदा प्रतीयमानत्वम् **अहेयत्वम्**। शब्दान्तरोच्चारणेऽप्रतीयमानत्वम् **असाधारणत्वम्**। अर्थस्तु संगति-[9]ग्रहण विना न प्रतीयते, स्वासमवेतश्च, शब्दोच्चारणेऽपि इतिपरत्वे शब्दस्य न प्रतीयते, पर्यायान्तरेण च प्रतीयत इति नैवंविध इत्यर्थः। **रूपवदिति**। [10]'स्वं रूपम्' इति वचनान्न्यायाच्च यथान्यत्र रूपं गृह्यते तथात्रार्थोऽपि। तथाच युगपदुभयानुग्रहायार्थ[11]वत्स्वरूपस्य ग्रहणमित्यर्थः। 'काशे' इत्यत्र 'शे' इत्यस्यानर्थकत्वमाह — **अत्रेति**। **अर्थान्तरेति**। अर्थविशेषाप्रतीतेरित्यर्थः। **अत्र** बभ्रुश इत्यादौ। लोमादित्वाच्छः। **अवयवेति**। यथा शुक्लतन्त्वारब्धः पटः शुक्लः, न नीलो नाप्यरूपः, तथार्थवत्समुदायस्यापि नात्यन्तविलक्षणार्थयोगः, नाप्यानर्थक्यमित्यर्थः। न्यायसिद्धमेतदित्याह — **प्रतिपदेति**। सूत्रे साक्षान्निर्दिष्ट इत्यर्थः। **बहिरङ्ग** विलम्बिता, लक्षणानुसारेण लक्ष्यस्य कल्प्यत्वादित्यर्थः। **वाक्यस्य** पदसमुदायस्य। **वाच्यार्थः** प्रकृत्यर्थ[12]विशिष्टो मत्वर्थः। [13]तद्गतयोः संख्याधिकरणशक्त्योः [14]प्रतिपादन इति विग्रहः। यद्यपि [15]'प्रत्यक्षानुमानयोः प्रत्यक्षं बलीयः' इति काशे इत्यादेरेव ग्रहणं युक्तम्, तथापि शब्दस्यार्थप्रतीत्यङ्गत्वेन [16]प्रधानभूतार्थाश्रयार्थवद्ग्रहणपरिभाषा प्रबलेति भावः॥

[१, २२६–२२७]

(**रत्नप्रकाशः**) **इह कस्मादिति**। शेरूपाविशेषादिति मन्यते। एतेन "अत्र हि प्रत्यक्षमेव शे इति रूपम्। 'युष्मे, अस्मे' इत्यत्र तु शकारस्यानुबन्धस्य स्मरणादनुमेयमिति प्रश्नः" इति निरस्तम्। [17]'प्रत्यक्षानुमितयोः प्रत्यक्षस्यैव ग्रहगम्' इति परिभाषां निर्मूलां निष्प्रयोजनां चाश्रित्य प्रष्टुरेतादृशाशयवर्णनस्य 'शेऽर्थवद्ग्रहणात्' इति परिहारग्रन्थेनापरिहार्यस्य कल्पयितुमनुचितत्वात्। परिहारग्रन्थाभिप्रायवर्णनव्याजेन स्वयमपि तस्यापरिहृतत्वाच्च। **शेऽर्थवद्ग्रहणादिति**। नातिप्रसङ्ग इति शेषः। 'शे' इति सूत्रेऽर्थवतो ग्रहणान्नोक्तस्थलेऽतिप्रसङ्ग इति भावः। **अर्थवतः**

---

[1] पा. सू. ७. १. ३९.
[2] विभक्त्यादेशे शब्द इत्यर्थः — इ, ऊ; विभक्त्यादेशे शे इत्यर्थः — उ.
[3] पा. सू. ४. २. ३३.
[4] पा. सू. १. १. ६८.
[5] अत्रार्थवद्ग्रहणस्य — म.
[6] शक्तिग्रहगमित्यर्थः।
[7] 'रूपशब्देन जात्यभिधाने' इति नास्ति — इ, ऊ.
[8] सर्वथा — म, आ, उ, ॠ.
[9] ग्रहं विना — अ, म.
[10] पा. सू. १. १. ६८.
[11] वतो रूपस्य — आ, इ, ऊ, ॠ.
[12] विशिष्टमत्वर्थः — अ, आ, ॠ.
[13] तद्गतसंख्या — म.
[14] प्रदीपे 'प्रतिपादनाय प्रवृत्ता' इत्यस्य स्थाने 'प्रतिपादने प्रवृत्ता' इत्यन्नंभट्टपाठ इति भाति।
[15] लौ. न्या. साहस्री पृष्ठम् ७०.
[16] प्रधानभूतार्थवद्ग्रहण — अ.
[17] लौ. न्या. साहस्री. पृष्ठम् ७०.

शेशब्दस्येति। अर्थवांस्तत्र शेशब्द एव संभवतीत्येवमुक्तम्, न तु 'शेऽर्थवत्' इत्यस्य समानाधिकरणसमासरूपतामाश्रित्य। तस्य तथात्वे 'अर्थवच्छेग्रहणात्' इति वक्तव्यं स्यात्, विशेषणस्योपसर्जनपूर्वनिपातौचित्यात्। मदुक्तरीत्योपपत्तौ तस्य राजदन्तादित्वकल्पने मानाभावाच्च। एतेन 'स्वं शब्दस्येत्येवान्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपपरिग्रहे सिद्धे रूपवदर्थस्याप्यङ्गीकरणार्थं रूपग्रहणं कृतम्' इति निरस्तम्। पूर्वसूत्रे व्याख्यानान्तरं क्लिष्टत्वान्नोपन्यस्तम्' इत्युक्तवतात्रैवं वक्तुमनुचितत्वात्। न ह्येतेन कश्चनार्थोऽत्रावश्यकः प्रतिपादितो भवति। बालकेनाप्यर्थवत्परिभाषावलम्बनेनेदं परिहारपरं भाष्यं प्रवृत्तमिति ज्ञातुं [1]शक्यत्वेन [2]'स्वं रूपम्' इति सूत्रे तत्परिभाषाया भगवतैवोपपादयिष्यमाणत्वेन चात्र तस्यानावश्यकता, दुर्बोधत्वेनाध्येतृक्लेशहेतुत्वं च। अध्यापकानामपि हि तदुपात्तहेतूनां निर्दुष्टंतयोपपादने महान् क्लेशो भवति। तस्माद्यत्किंचिदेतद् भवति। **एवमपीति**। अर्थवत्परिभाषाश्रयणेऽपीत्यर्थः। **हरिश इति**। 'काशे' इत्यादौ शशब्दस्यानर्थकत्वात् तद्घटितस्य 'शे' इति समुदायस्यानर्थकत्वमस्तु नाम। अत्र तु शशब्दोऽप्यर्थवानेवेति तत्समुदायोऽर्थवान् भविष्यतीति मन्यते। एतेन 'अत्र शशब्दोऽनर्थकः, सप्तम्येकवचनमर्थवत्। तयोः समुदायोऽर्थान्तराप्रादुर्भावादनर्थकः' इति निरस्तम्। सिद्धान्तवादिनार्थवत्समुदायत्वेनार्थवत्त्वस्य वा अनर्थकसमुदायत्वेनानर्थकत्वस्य वा वक्तुमशक्यत्वेन पूर्वपक्ष्याशयस्येव सिद्धान्त्याशयस्य तथा वर्णयितुमयुक्तत्वात्। विशिष्टार्थपरत्वबोधकमानाभावेनैव तस्यानर्थक्यसिद्धेश्च। [3]'तुष्यतु दुर्जनः' इति न्यायेन समाधानान्तरमाह — **एवं तर्हीति**। **लक्षणप्रतिपदोक्तयोरिति**। यत्तूक्तम् — प्रतिपदोक्ते हि झटिति प्रतिपत्तिरन्तरङ्गा भवति। लाक्षणिके तु लक्षणानसंधानद्वारेण बहिरङ्गा, इति। तन्न, प्रतिपदोक्तलाक्षणिकयोरन्तरङ्गबहिरङ्गतावर्णनस्यानर्थक्यात्। तयोरन्तरङ्गबहिरङ्गतावैपरीत्येऽपि लक्षणप्रतिपदोक्तपरिभाषया निर्णयसंभवात्। अन्यथा लक्षणप्रतिपदोक्तपरिभाषानर्थक्याच्च। वस्तुतस्त्वर्थवत्परिभाषात्रापि प्रवर्तत एवेत्याह — **अथवेति**। प्रत्ययानां प्रकृतिसंनिधाने ताभिः सहैव विशिष्टार्थबोधकत्वं न त्वप्रकृतिभिरिति नियमात् प्रकृते तद्धितविभक्त्योः प्रकृतिप्रत्ययभावानापन्नयोः समुदायस्य विशिष्टार्थाबोधकत्वेनानर्थक्यमित्याशयेनाह — **एकोऽत्र विभक्त्यर्थेनेति**। **एकः** सप्तम्येकवचनात्मकः प्रत्ययः। विभक्तिः **अर्थः** प्रयोजनं यस्य तेन हरिशशब्देन सहार्थवानिति भावः। **समुदायोऽनर्थक इति**। उक्तविभक्तितद्धितयोरिति शेषः॥

[१, २२६–२२७]

(**नारायणीयम्**) 'इह' इति किम् इहापीत्यर्थः, उत इहैवेत्यपेक्षायामाह — **अत्र हीति**। **प्रत्यक्षमिति**। अविलम्बेन शेत्वप्रतिपत्तिरित्यर्थः। **अनुमेयमिति**। कार्यार्था हि संज्ञा, कार्यं च प्रयोगे, नोपदेशे। ततश्चोपदेशे शेरूपस्य प्रयोगेऽतद्रूपत्वान्न तत्र शेत्वं झटिति परिस्फुरति, शास्त्रस्मृत्यायत्तत्वात् तत्त्वावभासस्य। अतश्चानिष्टविषय एव प्राप्तिश्चोद्यत इत्यर्थः। उभयोर्ग्रहणप्रसक्तौ प्रत्यक्षग्रहणस्य न्याय्यत्वम्। इह त्वर्थवत्परिभाषयानर्थकग्रहणप्रतिपत्तिरेव[4] नेत्युक्तम्। तत्र किमेषा वक्तव्येत्याशङ्क्य ज्ञापकात् सिद्धिमाह — **स्वमिति**। प्राक्स्फुरणादन्तरङ्गत्वम्, अहे-

---

[1] 'शक्यत्वेन' इत्यस्यानन्तरं 'हि' इत्यधिकम् — ब.

[2] पा. सू. १. १. ६८. 'स्वं रूपम्' इत्यादि 'उपपादयिष्यमाणत्वेन चात्र' इत्यन्तं 'यत्किंचिदेतद् भवति' इत्यस्यानन्तरं दृश्यते 'ब' मातृकायाम्। अर्थानुरोधेनात्र तन्निवेशितम्।

[3] लौ. न्या. द्वितीयभागे पुटम् ३५.

[4] अनर्थग्रहप्रतिपत्तिरेव — क.

यत्वं नानार्थेष्वपि स्वरूपापरित्यागात्। ननु लौकिकमर्थवत्त्वं 'युष्मे' इत्यादिष्वपि पदैकदेशस्य नास्ति। काल्पनिकं तु प्रस्तुतेऽपि प्रत्ययेऽस्ति चेदर्थसंबन्धादवगच्छतीत्यत आह — **अत्र चेति**। यद्यप्यनर्थकसंबन्धेऽप्येकारस्यार्थानपायः, शेशब्दस्त्वनर्थक एव। शेत्वसामानाधिकरण्यं ह्यर्थवत्त्वस्यापेक्षितम्, तदाह — **[समुदाय इति**। ननु 'एवमपि' इति शङ्कायुक्ता[1], हरिशे इत्यत्र 'शे' इत्यस्यार्थवत्त्वाननुभवात्, अत आह] — **अत्र होति**। अनुभवानालोचनेनानुमानादर्थवत्त्वमाशङ्क्यत इत्यर्थः। न्यायोऽयमित्याह — **प्रतीति**। विमतः समुदायोऽर्थवान् तत्समुदायत्वात् संमतवदित्यनुमानस्य किं दूषणं सिद्धान्तेऽभिमतमित्यत आह — **अर्थवदिति**। व्यभिचारो दर्शितः। [2]भूयसा दृष्टसाहचर्ययोर्धर्मयोर्व्यभिचार उपाधिकृत इति मत्वाह — **[पदार्थानामिति**। समुदाय]स्यार्थवत्त्वेऽवयवप्रतिपाद्यानामन्वययोग्यत्वं प्रयोजकम्, न त्वर्थवत्समुदायत्वम्। अस्मिन् सत्यपि दशादिवाक्ये तद्विरहे साध्य[स्यार्थवत्त्वस्याभावात्। प्रकृतेऽपि समन्वयवि]रहात् साध्यविरहमाह — **इहापीति**। प्रातिपदिकार्थगतसंख्यादिप्रतिपादकत्वं हि विभक्तेः, [3]तच्च तद्धितान्तमित्यर्थः॥

निपात एकाजनाङ् १. १. १४.

[१, २२७–२३०]

(**लघुविवरणम्**) बहुव्रीहौ 'एव' इत्यादिरनेकाज् निपातो व्यावृत्तः। **अन्यतरनिवृत्त्येति**। निपातेनाचि विशेष्यमाणेऽजात्मकस्य [4]निपातस्य ग्रहणात् तदन्तनिवृत्त्यार्थवत्त्वम्, अचा तु निपाते विशेष्यमाणे तदन्तविधौ सत्यजन्तस्य प्रगृह्यसंज्ञाविधानसामर्थ्याद्व्यावर्त्यान्तराभावात् केवलस्याचो निवृत्त्यार्थवत्त्वम्। तत्र [5]'पूर्वस्मिन् पक्षे [6]'येन विधिस्तदन्तस्य' इति परिभाषा निपातान्तस्याचोऽसंभवादचश्च विशेष्यत्वादिह न भवति। फलतस्तु [7]'आद्यन्तवदेकस्मिन्' इति परिभाषा भवति। [8]'उत्तरस्मिन्नपि पक्षे [9]'आद्यन्तवदेकस्मिन्' इति परिभाषेह न भवति, परिभाषान्तरं त्विह भवतीति [10]विवेकः। ईषदर्थादिषु [11]वर्तमानस्याकारस्य ङित्त्वे गमकमाह — **ईषदर्थ इत्यादिना**॥

[१, २२७–२३०]

(**विवरणम्**) **आनर्थक्यात्** अर्थवत्त्वानिश्चयादित्यर्थः। **कल्पितरूपत्वात्** प्रत्ययस्येत्यनुषङ्गः। **कल्पनायाश्चेति**। अत एव हि केचित् शतिपं प्रत्ययं कल्पयन्ति, अन्ये तु शप्तिपौ। तत्रेयतोऽर्थवत्त्वमिति न निश्चेतुं शक्यत इत्यर्थः। **अन्वयेति**। व्याकरणार्थानुसंधानानुगृहीताभ्यामिति शेषः। केवलस्य प्रयोगाभावेनानर्थक्ये सूत्रस्यासंभवित्वं वार्थवत्परिभाषानाश्रयणं वा प्रसज्येतेत्याह — **निपातोऽपीति**। **एकग्रहणेति**। निपातेनाचो विशेषणादेकत्वसंख्यायाश्च विवक्षितत्वात्

---

[1] अयुक्तेति छेदः।
[2] भूयसो दृष्ट — क.
[3] प्रातिपदिकं चेत्यर्थः।
[4] निपातस्याग्रहणात् — ङ, ढ.
[5] 'पूर्वस्मिन्' इत्यस्यानन्तरम् 'अपि' इत्यधिकम् — ण.
[6] पा. सू. १. १. ७२.
[7] पा. सू. १. १. २१.
[8] इतरस्मिन्नपि — ण.
[9] पा. सू. १. १. २१.
[10] शेषः — ङ, ढ.
[11] 'वर्तमानस्य' इति नास्ति — ण.

[1]कर्मधारयार्थलाभादन्तरेणाप्येकग्रहणमित्यर्थः। कथमन्तरङ्गत्वमित्यत आह — **वर्तीति**। समासे श्रूयमाणं पदं वर्तिपदम्, तदर्थप्राधान्यादित्यर्थः। 'अजेव यो निपातः' इति भाष्यस्य निपातेनाज् विशेष्यत इत्यर्थः। 'किम्' इत्यस्य विशेषणविशेष्यभाववैपरीत्यस्यापि संभवान्नाभिलषितविशेषणविशेष्यभावनियमसिद्धिरित्यर्थः। 'तत्र स्यात्' इत्यस्य चाजन्ते स्यादित्यर्थः। **प्रकृतिभावात्** प्रगृह्यनिबन्धनादित्यर्थः। ननु प्रगृह्यसंज्ञायां कस्माद्द्रुत्वस्यासिद्धिरुच्यते न पुनरुत्व इत्यत आह — **उत्वे त्विति**। **अन्यतरनिवृत्त्येति**। यदा निपातेनाज् विशेष्यते तदा तदन्तपरिभाषाप्रसक्तिरेव[2] निवृत्तिः, [3]यदा त्वचा निपातो विशेष्यते [4]तदाजन्तो यो निपात इति विशेषणसामर्थ्यादजन्तस्यैवेत्यवधारणेन मुख्याजन्तपरिग्रहात् [5]'आद्यन्तवत्' इत्यस्य निवृत्तिः, एवमन्यतर[6]निवृत्त्येत्यर्थः। **अज्मात्रं गृह्यते** निपातेनाचो विशेषणेनेत्यर्थः। **विपर्ययः** अचा निपातस्य [7]विशेषणेनाजन्तस्य [8]परिग्रहात् केवलस्याचो निवृत्तिः। इति विशेषाभावादित्यत्र **विशेषाभावात्** कारणाभावादित्यर्थः। **संज्ञा** [9]'येन विधिस्तदन्तस्य' इति। **तन्मूलेति**। तदन्तविधौ हि सति प्रगृह्यसंज्ञा [10]तदन्तकार्यमित्यतस्तदन्तविधिमूलेत्यर्थः। [11]'आद्यन्तवत्' इत्यस्य प्रवृत्तयेऽचा निपातो विशेष्यते। तदन्तविधिसिद्धये चेत् स्यादेवाजन्तस्य संज्ञा। अन्यथा [12]मुख्याजन्तदर्शनादतिदेशेन प्रापणायोगादित्यतः परिहारान्तरमुक्तम्। अजात्मकनिपातसमुदायनिवृत्त्यर्थमेकग्रहणं स्यादित्यत आह — **संज्ञाया इति**। प्रधानप्रयुक्ता संख्या गुणं नियच्छति, न तु [13]गुणप्रयुक्ता संख्या प्रधानं नियन्तुमलमित्यर्थः। समुदायद्विर्वचनन्यायोऽत्र नास्ति, समुदायसंज्ञयावयवानामननुग्रहात्। नापि [14]निपातसंज्ञकसमुदायस्य निपातग्रहणेन ग्रहणम्, एकैकस्मिन्निपातेऽपि संज्ञाविधानसंभवादित्यादिचोद्याभावाभिधानाय [15]'शङ्कानिरासार्थम्' इति शङ्काग्रहणम्। दन्भेः सन्, [16]'दम्भ इच्च' इतीत्वमचः, दिन्भ् स इति स्थिते [17]'सनीवन्तर्ध' इतीडभावपक्षे इक्समीपो नकारः, न तस्मात् परो झलादिः सन्, यस्माच्च भकारात्परः, न स इक्समीप इति [18]'हलन्ताच्च' इति कित्त्वाभावात् [19]'अनिदिताम्' इति नलोपो न स्यादिति चोदिते वक्ष्यते — दन्भेः परस्य सनः कित्त्वं सिद्धम्, कुतः, हल्ग्रहणस्य जातिवाचकत्वादिति। तथा च जातेरेकत्वादिक्समीपत्वं ततश्च सनः परत्वमित्युभयं घटत इति कित्त्वान्नलोपोऽभ्यासलोपश्च [20]भष्भावश्चत्वं चेति सिद्धं धिप्सतीति भाष्योदाहृतवार्तिकार्थः। **विभागप्रदर्शनाय** अवगमायेत्यर्थः। भाष्यगतश्लोके स्वशब्देन पूर्वमनिर्दिष्टत्वात् 'आतमेतम्' इत्येनादेशो न कृतः॥

---

[1] एकग्रहणमन्तरेणापि कर्मधारयार्थलाभादित्यन्वयः।
[2] अप्रसक्तिरिति छेदः।
[3] यदा चाचा — च, ज; यदा वाचा — झ.
[4] तदाजन्ता ये निपाता इति — ट.
[5] पा. सू. १. १. २१.
[6] निवृत्तेरित्यर्थः — झ.
[7] विशेषणेन तदन्तस्य — झ.
[8] परिग्रहः। केवलस्याचः — झ, ज, ट.
[9] पा. सू. १. १. ७२.
[10] तदन्तस्य कार्येत्यतः — झ; तदन्तकार्येत्यतः — ज.
[11] पा. सू. १. १. २१.
[12] मुख्याजन्ते दर्शनात् — च, छ, झ, ज, ट.
[13] गुणप्रयुक्तसंख्या — झ, ज.
[14] निपातसमुदायस्य — च, छ, ट.
[15] 'शङ्काया निरासार्थम्' इति प्रदीपस्थाने 'शङ्कानिरासार्थम्' इति समस्ततया विवरणकृदभिमतोऽन्नंभट्टाभिमतश्च पाठ इति प्रतीयते।
[16] पा. सू. ७. ४. ५६.
[17] पा. सू. ७. २. ४९.
[18] पा. सू. १. २. १०.
[19] पा. सू. ६. ४. २४.
[20] भष्भावश्चेति — च, छ.

[१, २२७–२३०]

(**उद्द्योतनम्**) शङ्कातात्पर्यमाह — **निपातस्येति**। **आनर्थक्यात्** अर्थवत्त्वानिश्चयात्। **कल्पितरूपत्वात्** प्रत्ययस्येत्यनुषङ्गः। **कल्पनाया इति**। केचित् [1]'शतिप् इत्येकं प्रत्ययं कल्पयन्ति, अन्ये तु प्रत्ययद्वयम्। तत्र कियतोऽर्थवत्त्वमिति न निश्चय इत्यर्थः। **अन्वयेति**। व्याकरणानुगृहीतेत्यादिः। केवलस्य प्रयोगाभावादानर्थक्यं निपातस्यापि। तथा [2]चात्रार्थवत्परिभाषाङ्गीकारे सूत्रानर्थक्यं स्यादिति तदनाश्रयणात् प्रत्ययस्यानर्थक्येऽप्यतिव्याप्तिः [3]स्यादित्याशयेनाह— **निपातोऽपीति**। प्रत्ययकल्पनाया अनियमपक्षे प्रत्युदाहरणान्तरमाह — **अततेर्ड इति**। [4]'अन्येष्वपि दृश्यते' इति [5]'दृशिग्रहणाड्ड इत्यर्थः। **एकग्रहणेति**। निपातेनाचो विशेषणादचा तदन्तविधेरभावात् 'निपातरूपो योऽच्' इत्येकग्रहणं विनापि कर्मधारयार्थलाभाद् बहुव्रीह्यर्थमेव तदित्यर्थः। बहुव्रीहावनिष्टमाह — **ततश्चेति**। अन्तरङ्गत्वे [6]हेतुः — **वर्तीति**। समस्यमानपदं वर्तिपदं, तदर्थप्राधान्यादित्यर्थः। अजेव यो निपात इति [7]भाष्यं निपातेनाज् विशेष्यत [8]इत्यभिप्रायम्। भाष्ये **किं वक्तव्यमिति**। अचो [9]निपातविशेषणत्वस्यापि संभवान्निपातेनाज्विशेषणमिति [10]न सिध्यतीत्यर्थः। **प्रगृह्यसंज्ञायामिति**। प्रगृह्यसंज्ञायाः प्रकृतिभावः प्रयोजनम्। स च संधिकार्यनिवृत्त्यर्थः। रुत्वस्योत्वरूपसंधिकार्यसंभवेऽप्यनेन प्रगृह्यसंज्ञायां रुत्वस्यासिद्धत्वाद् दोषाभावः। सकारस्य तु संधिकार्यान्तराभावात् तन्निवृत्त्यर्थप्रकृतिभावार्थप्रगृह्यसंज्ञायाः प्रयोजनाभाव इत्यर्थः। नन्वेवमुत्वेऽपि रुत्वमसिद्धं स्यात्, अत आह — [11]**उत्व इति**। अनेन प्रगृह्यसंज्ञा तु न रुत्वाश्रयेति नाश्रयात् सिद्धत्वमिति भावः। **अन्यतरेति**। [12]'येन विधिः' [13]'आद्यन्तवत्' इत्यनयोरन्यतरेत्यर्थः। यदा निपातेनाज् विशेष्यते तदा तदन्तपरिभाषाया अप्रवृत्तिरेव निवृत्तिः। [14]यदाचा निपातो विशेष्यते तदाजन्तो यो निपात इति मुख्याजन्तसंभवात् [15]'आद्यन्तवत्' इत्यस्याप्रवृत्तिरेव निवृत्तिः। **अज्मात्रमिति**। निपातेनाज्विशेषणादित्यर्थः। **विपर्ययः** अचा निपातस्य विशेषणात् [16]'अजन्तो यो निपातः' इति मुख्यतदन्तं गृह्यते, अज्मात्रं निरस्यत इत्येवंरूपः। **विशेषाभावात्** कारणाभावात्। **संज्ञा** [17]'येन विधिस्तदन्तस्य' इति। [18]'एरच्' इत्यादाविकारस्तदन्तस्य संज्ञेति भावः। सावकाशत्वमुपपादयति — **तत्रेति**। तयोर्मध्य इत्यर्थः। **ओरावश्यक इति**। [19]उवर्णमात्रघातोरभावादित्यर्थः। [20]अत्रापि तदन्तविधिरस्तु, अत आह — **अत्रेति**। **तन्मूला** [21]'येन विधिः' इति परिभाषामूला। [22]'येन विधिः' इति प्रवृत्तावेकस्मिन्

---

[1] शप्तिप् — अ, आ, इ, ऊ, ऋ.
[2] चार्थवत्परिभाषाङ्गीकारे — अ.
[3] 'स्यात्' इति नास्ति — म, उ, ऋ.
[4] पा. सू. ३. २. १०१.
[5] दृशिर्ग्रहणार्थः — म.
[6] हेतुमाह — वर्तीति — म.
[7] भाष्ये — म, इ, उ, ऊ.
[8] इत्यभिप्रायः — म, इ, उ, ऊ.
[9] 'निपात' इति नास्ति — अ, आ, इ.
[10] न संभवतीत्यर्थः — अ.
[11] रुत्वमिति — अ, म, उ, ऋ.
[12] पा. सू. १. १. ७२.
[13] पा. सू. १. १. २१.
[14] यदा च निपातः — अ, म, उ.
[15] पा. सू. १.१. २१.
[16] 'अजन्तो यो निपात इति' इति नास्ति — म, आ, इ, उ, ऊ, ऋ.
[17] पा. सू. १. १. ७२.
[18] पा. सू. ३. ३. ५६.
[19] उवर्णमात्रस्य धातोः — अ.
[20] तत्रापि — म, आ, उ, ऋ.
[21] पा. सू. १. १. ७२.
[22] पा. सू. १. १. ७२.

[1]मुख्यतदन्तासंभवे [2]'आद्यन्तवत्' इति प्रवर्तत इति मूलाभावे मूलिन्यपि न प्रवर्तत इत्यर्थः। अचा निपातस्य विशेषणेन [3]'आद्यन्तवत्' इत्यस्य प्रवृत्तये प्रथमं [4]तदन्तविधिप्रवृत्त्यङ्गीकारे मुख्यतदन्तसंभवेन प्रगृह्यसंज्ञायास्तत्रापि प्रवृत्तेः, [5]'आद्यन्तवत्' इत्यनेनैकस्यापि संज्ञायां 'प्रेदम्' इत्यादेरनिवृत्तिः, अत आह — **अथवेति**। [6]अजात्मकसमुदायव्यावृत्त्यर्थमेकग्रहणं किं न स्यात्, अत आह — **संज्ञाया इति**। अचीव निपातेऽप्येकत्वं विवक्षितमिति निपातसमुदायस्यापि निवृत्तिर्ज्ञेया। समुदायद्विर्वचनन्यायोऽत्र नास्ति, समुदायसंज्ञयावयवानामननुग्रहात्। ज्ञापकत्वमुपपादयति — **अच्समुदायेति**। उक्तरीत्या समुदायग्रहणाप्रसङ्गात् **शङ्कानिरासार्थं** शङ्कामात्रनिरासार्थमित्युक्तम्। एकत्वविवक्षयैकग्रहणेन वा समुदायनिरासस्य प्रयोजनं प्रश्नपूर्वकमाह — **किं पुनरिति**। 'अ इ उ अवेहि' इति स्थित इत्यर्थः। [7]**अन्त्यस्यैवेति**। यद्यप्यत्रापि न प्रगृह्यत्वम्, तथापि समुदायस्य प्रगृह्यत्वेऽन्त्यस्य तत्कार्यम्। यथा 'पचेते' इत्यत्र द्विवचनस्य प्रगृह्यत्वेऽपि तत्कार्यमेकारस्य। ननु तत्र प्रगृह्यावयवे प्रगृह्यशब्दवृत्त्या एकारस्य प्रकृतिभावः, इह त्ववयवे 'तच्छब्दवृत्तौ पूर्वयोरपि प्रकृतिभाव उचितः। नैतत्, [9]'प्रगृह्या अचि' इति मुख्यस्याचा पौर्वापर्यमाश्रितम्। तच्च तत्र चात्र [10]चास्त्येव। प्रकृतिभावस्तु तदवयवे, तस्यैव स्वरसंधिप्राप्तेः। ततश्च यस्मिन्नचि प्रगृह्योऽनन्तरस्तस्मिन्नेव तदवयवस्यापि प्रकृतिभाव इति कुतः पूर्वयोस्तत्प्राप्तिः। एतच्च तत्र 'अचि' इति वर्तमाने पुनरज्ग्रहणाल्लभ्यत इत्यास्तां विस्तरः। **स्वरेति**। प्रगृह्यत्वाभावादित्यर्थः। ननु 'निपातः' इत्येकत्वस्य विवक्षितत्वान्न समुदायस्य संज्ञाप्रसङ्गः, अत आह — **अच्समुदायेति**। [11]तुल्यन्यायत्वादजनुसारित्वाच्चेत्यर्थः। अजनुरोधेन निपातसमुदायग्रहणे हेतुमाह — **एकेति**। [12]भाष्ये **दन्भेरिति**। दन्भेः सन्, दन्भ् स इति स्थिते [13]'सनीवन्तर्ध' इतीडभावपक्षे सन इक्समीपाद्धलः परत्वाभावेन [14]'हलन्ताच्च' इति कित्त्वाभावात् [15]'अनिदिताम्' इति [16]नलोपो न स्यादिति शङ्कते वक्ष्यते — दन्भेः परस्य सनः कित्त्वं सिद्धम्, हल्ग्रहणस्य जातिवाचकत्वात्। तथाच जातेरेकत्वादिक्समीपत्वं सनस्ततः परत्वं चेति [17]कित्त्वान्नलोपोऽभ्यासलोपो भष्भावश्चेति सिद्धं धिप्सतीति वार्तिकार्थः। तत्र ङित्त्वे मानम् — **आङीषदर्थ इति**। **उक्तं** [18]कोशेषु। उपसर्गत्वे मानम् — **प्रादिष्विति**। तेषामुपसर्गसंज्ञत्वादिति भावः। मर्यादाभिविध्योर्ङित्त्वे मानम् — **आङः मर्यादेति**। एतयोः क्रमेणोदाहरणे आह — **आ उदकेति**। भाष्योक्तं मर्यादोदाहरणमित्यर्थः। तयोर्भेदमाह — **तेनेति**। 'वाक्य' इत्येतद्व्याचष्टे — **पूर्वेति**। 'स्मरण' इत्येतद्व्याचष्टे — **तथा स्मृतेरिति**॥

---

[1] मुख्ये तदन्तासंभवे — म, उ.
[2] पा. सू. १. १. २१.
[3] पा. सू. १. १. २१.
[4] तदन्तविध्यङ्गीकारे — अ, आ.
[5] पा. सू. १. १. २१.
[6] अजात्मकनिपातसमुदाय — म, आ, उ, ऊ, ॠ.
[7] 'अन्त्यस्यैवेति' इत्यादि 'लभ्यत इत्यास्तां विस्तरः' इत्यन्तं नास्ति — इ, उ, ऊ.
[8] तच्छब्दवृत्तेः पूर्वयोरपि — म, आ.
[9] पा. सू. ६. १. १२५.
[10] चास्यैव — म.
[11] तुल्यानुसारित्वादजाश्रयत्वाच्चेत्यर्थः — अ; तुल्याश्रयत्वादजनुसारित्वाच्चेत्यर्थः — आ, इ, ॠ.
[12] भाष्ये 'दम्भेः' इति दृश्यते। 'दन्भेः' इत्यन्नम्भट्टस्वीकृतः पाठः।
[13] पा. सू. ७. २. ४९.
[14] पा. सू. १. २. १०.
[15] पा. सू. ६. ४. २४.
[16] न्लोपः — म, उ, ॠ.
[17] कित्त्वान्नलोपाभ्यासलोपौ — म.
[18] 'आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे' इत्यमरे नानार्थवर्गे।

[१, २२७–२३०]

(**रत्नप्रकाशः**) **निपात इति किमर्थमिति**। 'अनाङ' इति पर्युदासान्निपात एवैकाज् ग्रहीष्यत इति भावः। एतेन 'निपातस्यैवैकाचोऽर्थवत्त्वात् प्रत्ययस्य केवलस्य प्रयोगाभावादानर्थक्यात् कल्पितरूपत्वात् कल्पनायाश्च नियमाभावात् प्रश्नः' इति निरस्तम्। निपातातिरिक्तस्यापि विष्ण्वादिवाचकाकारादेरेकाचोऽर्थवत्त्वात्। [1]'न केवला प्रकृतिः' इत्यादिनिषेधेन प्रत्ययस्येव प्रकृतेरपि केवलायाः प्रयोगाभावात्। लुप्तप्रत्ययिकायाः प्रकृतेरिव लुप्तप्रकृतिकस्य प्रत्ययस्यापि प्रयोगसंभवात्। परमार्थतो वाक्यस्यैवार्थवत्त्वेन तस्यैवावयवशः प्रकृतिप्रत्ययविभागकल्पनया अन्वाख्येयत्वेन प्रत्ययस्येव प्रकृतेरपि कल्पितरूपत्वात् प्रत्ययांश इव प्रकृत्यंशेऽपि कल्पनाया अनियमाच्च। प्रत्ययस्य प्रकृतिवत् प्रशस्तार्थकत्वं नास्तीति त्वन्यदेतत्। **चकारात्रेति**। निपातत्वेनैव सादृश्यं ग्राह्यमित्यत्र नियामकाभावेनार्थवत्त्वेन साम्यस्य णलादावपि संभवान्निपातग्रहणमावश्यकमिति भावः। नन्वेवं [2]'नञिवयुक्त'न्यायो निर्विषयः स्यादिति चेन्न, व्याख्यानपरिभाषावलम्बनेन [3]'जाग्रोऽविचिण्णल्ङित्सु' इत्यादौ वृद्धिनिमित्तत्वगुणवृद्धिप्रतिषेधनिमित्तत्वादिना सादृश्य आश्रिते तत्र तस्य चारितार्थ्यात्। एतेन 'अन्वयव्यतिरेकाभ्यां प्रत्ययस्याप्यर्थवत्त्वम्। निपातोऽपि केवलो न प्रयुज्यते, द्योतकत्वादिति साम्यमेव निपातप्रत्ययय्योः' इति निरस्तम्। शङ्काया अनौचित्यस्योक्तत्वात् तदभ्युपगमेनैतादृशसमाधानस्याप्यचमत्कारावहत्वात्। **एकाजिति किमर्थमिति**। प्रयोजनज्ञानद्वारा तस्य तत्पुरुषबहुव्रीह्यन्यतरत्वं निर्णेतुं प्रश्नः। एतेन 'एकग्रहणसामर्थ्याद् बहुव्रीहिं मन्यते। तथाच 'प्रेदं ब्रह्म' इत्यनिष्टनिवृत्तिर्न कृतेति प्रश्नः' इति निरस्तम्। 'प्रेदं ब्रह्म' इत्यादेरनिष्टत्वं जानता 'एकाच्' इत्यस्य कर्मधारयत्वमेव निश्चित्यैकग्रहणं किमर्थमित्येव प्रष्टव्यत्वात्। **तत्पुरुषोऽयमिति**। लक्ष्यानुरोधेन तस्यैवाश्रयणमुचितमिति भावः। एतेन 'अन्तरङ्गत्वाद्धातिपदार्थप्राधान्याच्चेति भावः' इति निरस्तम्। वैयाकरणमते तत्पुरुषस्यान्तरङ्गत्वे मानाभावात्। अन्यपदार्थप्राधान्येऽपि [4]"एकाचो द्वे प्रथमस्य' [5]"एकाच उपदेशेऽनुदात्तात्' इत्यादौ बहुव्रीहेराश्रयणात्। वैयाकरणसरणिमुत्सृज्योत्पथेन गमने औचित्यप्रयोजनयोरभावाच्च। **नार्थं एकग्रहणेनेति**। निपातेनैवाचो विशेषणसंभवादिति भावः। **इह कस्मादिति**। अचा निपातविशेषणम्, संभवादिति भावः। अचा निपाते विशेषितेऽपि 'अजेव यो निपातः' इति लभ्यत इति प्रतिजानीते — **अजेवेति**। तदाशयं बोद्धुमन्यो हास्येन पृच्छति — **किं वक्तव्यमेतदिति**। **अज्ग्रहणसामर्थ्यादिति**। विशेषणतयेति शेषः। **अच्चान्यच्चेति**। अज्झल्समुदायात्मकश्चेदित्यर्थः। **नैव दोषो न प्रयोजनमिति**। हलन्तस्य निपातस्य प्रगृह्यसंज्ञायामपि दोषो नास्ति। अत एव तद्व्यावृत्तिरज्ग्रहणस्य प्रयोजनं [न] भवतीति भावः। ननु 'पुरोऽहिः' इत्यादौ पुरस्प्रभृतेः प्रगृह्यसंज्ञायां [6]"ससजुषो रुः' इति रुत्वं न स्यादिति चेन्न, रुत्वस्यासिद्धत्वेन तदज्निमित्तककार्यत्वाभावेन च तं प्रति प्रकृतिभावाप्रवृत्तेः। वस्तुतस्तु उत्वस्य तदज्निमित्तककार्यत्वेन प्रकृतिभावं प्रति सिद्धत्वेन चोत्वं प्रति प्रकृतिभावः स्यादेवेति दोषोऽस्त्येव। न च रुत्वस्यासिद्धत्वात् तदादेश उत्वमप्यसिद्धप्रायमिति तत्प्रति प्रकृतिभावो न प्रवर्तत इति वाच्यम्, आद्गुणं प्रत्यपि रुत्वस्यासिद्धत्वेनोत्वस्यासिद्धप्रायत्वेन गुणोऽपि न स्यादिति 'शिवोऽर्च्यः' इत्यादिरूपासिद्धिप्रसङ्गात्। तस्मादयुक्तोऽयं पक्ष इति निपातेनाज् विशेष्यत इति पक्ष एव समीचीनः।

---

[1] महाभाष्यम् १. २. ६४.
[2] परिभाषा ७५.
[3] पा. सू. ७. ३. ८५.
[4] पा. सू. ६. १. १.
[5] पा. सू. ७. २. १०.
[6] पा. सू. ८. २. ६६.

एतेन यथाश्रुतभाष्यानुयायिनो निरस्ताः। यथाश्रुतभाष्यस्य प्रष्टृबुद्धिपरीक्षार्थमेव प्रवृत्तत्वसंभवात्। **एवमपीति**। अचा निपातविशेषणस्य हलन्तव्यावृत्तेरप्रयोजनत्वेनाजन्तविशेषव्यावृत्तेरेव प्रयोजनत्वेऽपीत्यर्थः। **परिभाषयोरिति**। [1]'प्रकृतिवदनुकरणम्' इत्यतिदेशरूपायाः [2]'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति संज्ञासूत्ररूपायाश्च परिभाषायाः सूत्त्वेनातिदेशसंज्ञासूत्रयोः परिभाषात्वोक्तावपि न काचित् क्षतिरिति भावः। **सावकाशयोरिति**। निरवकाशस्य बाधकत्वादेवमुक्तम्। सावकाशत्वं च तयोः [3]'एकाचो द्वे' [4]'एकाच उपदेशे' इत्यादावाद्यस्य, [5]'गोस्त्रियोरुपसर्जनस्य' इत्यत्र द्वितीयस्य। **समवस्थितयोरिति**। इह प्राप्तयोरित्यर्थः। **भविष्यतीति**। कृतार्थेति शेषः। **न भविष्यतीति**। प्रवृत्तिनिमित्तसत्त्वेन मुख्याजन्तो यस्तस्याग्रहणात् प्रवृत्तापि कृतार्था न भवतीति भावः। एतेन "यदि तर्हि लिङ्गेन तदन्तविधिर्निराक्रियते तदा तन्मूलाद्यन्तवत्परिभाषा कथं प्रवर्तते। नैष दोषः, [6]'आद्यन्तवत्' इत्यस्योपस्थानाय तदन्तविधिः प्रथमं संनिधीयते। पश्चात्तु लिङ्गात् परित्यज्यते" इति निरस्तम्। एकत्र तदन्तविधिप्रवृत्त्यप्रवृत्त्युभयाश्रयणानौचित्यात्। न हि प्रवृत्तस्याप्रवृत्तत्वमप्रवृत्तस्य वा प्रवृत्तत्वमसिद्धवचनमन्तरेण युक्त्या प्रतिपादयितुं शक्यते। यदप्युक्तम् — 'अथवा लिङ्गादज्ग्रहणं निपातेन विशेष्यत इति विशेष्येण तदन्तविधेरभावादतिदेशस्यापि मा भूत् प्रवृत्तिः, तत्फलसंपत्त्या तूक्तम् — परिभाषा[7]प्रवृत्तिरिति, इति। तदपि न, विशेषणविशेष्यभावव्यत्यये ज्ञापकाश्रयणस्य भाष्यकृता कुत्राप्यकृतत्वात्। प्रकृतभाष्यग्रन्थस्वरसभङ्गाच्च। तदेवमज्ग्रहणस्य विशेषणसमर्पकत्व 'एव लक्षणं निर्दुष्टं संपन्नमित्यतिरिच्यमानमेकग्रहणं ज्ञापकं संपद्यत इत्याह — **एवं तर्हीति**। **अन्यत्रेति**। ज्ञापनफलमन्यत्रैव भवतीत्याशयेनैवमुक्तम्, न तु ज्ञाप्यकोटावन्यत्रेति निविष्टमिति, तादृशार्थज्ञापनासंभवात्। न हि तादृशेऽर्थे ज्ञापिते तेन तदानर्थक्यं गच्छति। अन्यथा दिवा अभुञ्जानस्य पीनत्वान्यथानुपपत्त्या रात्रिजागरणादिकल्पनं युक्तिमत् स्यात्। तस्मात् सामान्येन 'वर्णग्रहणे जातिग्रहणम्' इति ज्ञाप्यांशो बोध्यः। **जातिग्रहणमिति**। तज्जातीयस्यैकस्यैवानेकस्यैव[वा] यथासंभवं ग्रहणमित्यर्थः। एवं च 'अ इ उ अपेहि' इत्यादौ 'अ इ उ' इत्यादिनिपातरूपाच्समुदायस्यैव संज्ञा प्राप्ता, सा मा भूत्, किं त्वेकैकस्यैव निपातरूपस्याचो यथा स्यादित्येवमर्थमेकग्रहणं संपद्यत इति तस्य तज्ज्ञापकता युक्ता भवति। ननु 'अ इ उ' इत्यादेर्निपातसमुदायस्य कुत्रापि लौकिकवाक्ये प्रयोगाभावेनैकैकस्यैव निपातस्य प्रगृह्यसंज्ञा भविष्यतीति प्रकृते एकग्रहणमुक्तार्थज्ञापकमपि न भवतीति चेन्न, लक्षणैकचक्षुष्काणामस्माकं तत्प्रयोगाभावनिर्णयायोगेन प्रकृतलक्षणानुरोधेन 'अ इ उ' इत्यादेः प्रगृह्यसंज्ञायां तत्र संहितापक्षेऽकारेकारयोर्गुणेऽयादेशे च 'अयु अपेहि' इत्यादिप्रयोगस्योन्नेतुं शक्यत्वेन तस्योक्तज्ञापकत्वसंभवात्। ननु तत्र निपातत्रयसमुदायस्येव तदन्तर्गतनिपातद्वयसमुदायस्यापि प्रगृह्यसंज्ञायामाद्गुणोऽपि न भविष्यतीत्येव युक्तमिति चेन्न, यथासंभवमेकस्यैवानेकस्यैव वा ग्रहणमिति ज्ञाप्यांशस्योक्तत्वेन वचनासंभवे बहूनामेव संज्ञायाः प्रसक्तत्वात्। अन्यथा द्वयोः समुदायस्येव तत्रैकस्यापि संज्ञा स्यादित्येकग्रहणं ज्ञापकमपि न स्यात्। **यदुक्तमिति**। [9]'हलन्ताच्च' इति सूत्र

---

[1] परिभाषा ३६.
[2] परिभाषा ७२.
[3] पा. सू. ६. १. १.
[4] पा. सू. ७. १. १०.
[5] पा. सू. १. २. ४८.
[6] पा. सू. १. १. २१.
[7] भविष्यतीत्यस्यार्थतोऽनुवादोऽयम्।
[8] एव वा लक्षणं — ब.
[9] पा. सू. १. २. १०.

इति शेषः। यत्तूक्तम् — संज्ञाया विधीयमानत्वात् प्राधान्यात् संज्ञिनो गुणत्वात् [१]'पशुना यजेत' इतिवत् संख्याया विवक्षायां सिद्धायामेकग्रहणमन्यत्र जातिसंप्रत्ययार्थम्। अच्समुदायग्रहण-शङ्कानिरासार्थं ह्येकग्रहणं ज्ञापनफलं संपद्यते, इति। तन्न, ग्रहोद्देशेन विधीयमानस्यापि संमार्गस्य प्राधान्याभावात्। संज्ञायाः संज्ञ्यर्थत्वेन संज्ञापेक्षया संज्ञिन एव प्राधान्यात्। अत एव [२]'प्रधाना-वृत्तौ गुणावृत्तिः' इति न्यायेन वृद्धयादिसंज्ञाया आकारादौ प्रत्येकं प्रवृत्तेः। गुणगतसंख्याया विव-क्षिततेति जैमिनीयैरपि कुत्राप्यनुक्तत्वात्। वैयाकरणरीतिमनुसृत्यैव सर्वत्र भाष्यकृता ज्ञापकस्योप-पादितत्वेनास्मदादिभिरपि तथैव ज्ञापकवर्णनस्यौचित्येन जैमिनिमतानुसारेण तद्वर्णनस्याध्येतृदुःख-हेतुत्वेनानौचित्याच्च। **अनाङिति किमर्थमिति**। ङकारस्यानुबन्धस्य प्रयोगसमवायित्वाभावेन तदनुबन्धकपरिचयस्य दुःसंपादत्वादयुक्तोऽयं पर्युदास इति भावः। एतेन 'ङिदङितोराकारयो-र्विषयविभागप्रदर्शनाय प्रश्नः' इति निरस्तम्। तादृशप्रश्नस्य 'क्व पुनरयं सानुबन्धकः क्व पुनरयं निरनुबन्धकः' इति करिष्यमाणत्वेन प्रकृतप्रश्नस्य तदभिप्रायकत्वकल्पनानौचित्यात्। **इदमिति**। 'अनाङ्' इत्यत्र आङ् इतीत्यर्थः। **ईषदर्थ इति**। आ उष्णम् ओष्णम्। [३]'आङीषदर्थ इति वक्तव्यम्' इति सौनागवचनं [४]'कुगति' इति सूत्रे भाष्यकृतैव पठितम्। **क्रियायोगे** आ इतः एतः। प्रादिगणे हि 'आङ्' इति पठितम्। **मर्यादाभिविधौ चेति**। मर्यादायुक्तोऽभिविधि-रिति शाकपार्थिवादिः। अन्यथा 'अभिविधौ' इति [५]'पुंल्लिङ्गनिर्देशानुपपत्तेः। तेन विना **मर्यादा**। आ उदकान्तात्-ओदकान्तात्। तेन सह **अभिविधिः**। आ अहिच्छत्रात्-आहिच्छत्रात्। [६]'आङ् मर्यादाभिविध्योः' इति समासविधायकं हि सूत्रम्। **य इति**। आदिति शेषः। **एतमिति**। पूर्ववाक्यस्य यच्छब्दघटितस्य नित्यमुत्तरवाक्यसापेक्षत्वेनार्धोक्तिरूपत्वादुक्तस्य पुनरुक्तिरूपान्वा-देशोऽत्र नास्तीत्येनादेशाभावः। **वाक्यस्मरणयोरिति**। [७]'वाक्यस्यान्यार्थत्वसूचकः स्मरणाविष्कार-सूचकश्च य आत् सोऽनाङित्यर्थः। तत्राद्यो यथा देवदत्तो विष्णुमित्रं प्रत्याह 'यज्ञदत्तं केनचिदु-पायेन ताडयिष्यामि' इति। तं [८]'समाचारं [९]'स्वमित्राय यज्ञदत्ताय निवेदितवान् विष्णुमित्रः। ततो दिनान्तरे देवदत्तो यज्ञदत्तमाजुहाव 'आयाहि यज्ञदत्त, वनं गत्वा पत्राण्यानेष्यावः' इति। तच्छ्रुत्वा देवदत्तं प्रत्याह यज्ञदत्तः 'आ एवं नु मन्यसे' इति। अत्र ह्याकारात् ताडयिष्यामीति किं मन्यस इत्येतदर्थपरता 'एवं नु मन्यसे' इत्यस्य गम्यते। द्वितीयो यथा 'आ एवं किल तत्' इति। अत्र ह्याकारेणाभिमतार्थस्मरणं सूचितं भवति। अत्रेदमवधेयम् — 'ईषदर्थे' इत्यादिश्लोकस्य ङितो वान्यस्य वा लक्षणकथने न तात्पर्यम्। किंतु सूत्रवार्तिककाराभ्यां यत्राकारो ङकारसहितः पठि-तस्तत्र स ङित्, अन्यत्राङिदिति ज्ञेयमित्यत्र। तेन [१०]'आङोऽनुनासिकश्छन्दसि' इत्यत्र सप्तम्यर्थ-वृत्तेराकारस्य ङित्त्वम्, 'आ आगम्यते' इत्यादावङ्गीकाराद्यर्थवृत्तेरातोऽङित्त्वं च सिध्यति। एतेन [११]'अङिल्लक्षण एव श्लोकस्य तात्पर्यं, लाघवात्' इति वदन्तः परास्ता इति॥

---

[१] मीमांसायाम् ४. १. ५३. तमेऽधिकरणे 'अग्नीषोमीयं पशुमालभते' इति वाक्योद्धरणेन विचारः कृतः, तस्यार्थानुवादः 'पशुना यजेत' इति, इति भाति।

[२] जैमिनीयन्यायमाला ३. १. ७. अधिकरणे.

[३] सौनागवार्तिकम् २. २. १८.

[४] पा. सू. २. २. १८.

[५] एकवचनं तु समाहारद्वन्द्वेन सुसाधमिति भावः।

[६] पा. सू. २. १. १३.

[७] वाक्यस्यान्यार्थत्वासूचकः — ब.

[८] वृत्तान्तमित्यर्थः।

[९] स्वामित्राय — ब.

[१०] पा. सू. ६. १. १२६.

[११] श. कौ. पुटम् १३२.

[१, २२७–२३०]

(**नारायणीयम्**) [प्रयोजनाज्ञा]नान्न प्रश्नः, परं तु तस्यान्यथासिद्धिमभिप्रे[त्ये]त्याह — **निपा-तस्यैवेति**। ननु लौकिकार्थवत्त्वाभावेऽपि तत्र तत्रार्थे ततत्प्रत्ययानुशासनादर्थवत्त्वं तस्मिन्नप्यव-गम्यत इत्यत आह — **कल्पितेति**। नित्याखण्डे पदे प्रत्ययादिविभागो न पारमार्थिकः। अतः [1]स्वप्नावसिते राजनि विभूत्यव[गति]वत् कल्पितस्वरूपे प्रत्ययेऽर्थवत्त्वावगतिर्मिथ्येत्यर्थः। ननु कल्पितस्यापि शास्त्रव्यवहाराङ्गत्वं न विरुद्धमित्यत आह — **कल्पनाया इति**। यथा 'विंशति' इत्यत्र शतेः प्रत्ययत्वं तेर्वेति न नियमः। ततश्च प्रत्ययत्वसामानाधिकरण्येन परिकल्प्यमर्थवत्त्वम्। [2]तदेव न नियताधिकरणमिति न कल्पितेष्वर्थवताव्यवस्थितिरित्यर्थः। ननु लौकिकार्थवत्त्वाभावात् कथं प्रत्ययः प्रत्युदाहृत इत्यत आह — **अन्वयेति**। प्रातिपदिकत्वेऽर्थवत्परिभाषाप्रवृत्तौ च कल्पितस्याप्युपयोगः। तथाचोक्तम् — [3]'शेऽर्थवद्ग्रहणात्' इति। न च कल्पनानियमः[4], इह व्याकरणे णल एवात्रोदाहरणे प्रत्ययत्वस्य नियमतः प्रतिपत्तेः। विंशत्यादावपि स्मृतिर्नियता, व्याख्याने त्वनियमः। यत्रापि [5]'तद्धितो वा' इत्यादिना स्मृत्यनियमस्तत्रापि यस्मिन् पक्षे यस्यार्थ-वत्त्वं तत्र कार्यमिति न कश्चिदपि दोषः। प्रत्ययार्थवत्त्वाभावे [6]'केवलस्य प्रयोगाभावात्' इति यो हेतुः [स] समानो निपातेष्वपीत्याह — **निपात इति**। पदस्यैव मुख्यमर्थवत्त्वमिति तदेव व्यावर्त्यं कीर्त्यमिति निर्बध्नन्तं प्रति [7]'तुष्यतु दुर्जनः' इति न्यायमनुसरन्नाह — **अततेरिति**। प्रेदमित्यादि-व्यावर्त्यसत्त्वादाक्षेपः कथमित्यत आह — **एकेति**। निपातेनाचि विशेष्यमाणे कर्मधारयसाध्यलाभा-देकग्रहणाद् बहुव्रीहिरयम्। तत्र चानेकाज् व्यावर्त्यः। प्रेदमित्यादि तु न व्यावर्त्येतेति तदकरण-मेवेष्टसिद्ध्यर्थमस्त्वित्याक्षिपतीत्यर्थः। निर्णायकमाह — **अन्तरङ्गत्वादिति**। तत्र हेतुः — **वर्तीति**। एकग्रहणसामर्थ्यं तु ग्रन्थे निराकरिष्यते। भाष्ये **किमिति**। अचा निपातः कस्मान्न विशेष्यत इति प्रश्नः। **अच्चान्यच्चेति**। अज्झलात्मकमित्यर्थः। दोषमाशङ्कते — **नन्विति**। ततश्चैत-द्दोषनिवृत्तयेऽज्ग्रहणं निपातविशेषणमपि सफलमित्यर्थः। **असिद्धत्वादिति**। ततश्च न सा तस्मिन् कार्यमुद्दिश्य प्रवर्तते। स्थानिनि तर्हि कार्यमुद्दिश्य प्रवर्तताामित्यत आह — **सकारस्येति**। प्रगृह्यत्वनिबन्धनकार्यं सकारस्य नास्तीत्यर्थः। ननु रुत्वस्यासिद्धत्वे उत्वमपि न स्यात्, अतस्तस्य सिद्धत्वमेषितव्यमिति कथमसिद्धत्वेन परिहारः, तत्राह — **उत्व इति**। ततश्च तत्रैव सिद्धत्व-मित्यसिद्धत्वपरिहारः संगतः ॥

ननु "ईदूदेत्' इत्यत्र शास्त्रासिद्धत्वात् स्थानिबुद्ध्या आदेशे संज्ञाप्रवृत्तौ तन्निबन्धनं कार्यमादेशे भवतीत्युक्तम्, इह तु रुत्वासिद्धतया संज्ञातन्निमित्तकार्ययोरभाव उच्यते। नैष दोषः, तत्रापि नादेशगतकार्यमुद्दिश्य संज्ञाप्रवृत्तिः, तस्यासिद्धत्वात्। किं तु स्थानिगततदुद्देशेन। कार्य[8]निर्वृत्ति-स्त्वन्यथा, यथा पुरुषे वृक्षत्वभ्रमाच्छरपातेऽपि पुरुषे क्षतिः। इह तु न स्थानिनि, नाप्यादेशे कार्यो-द्देश इत्युक्तम् ॥

हलन्तव्यावृत्तिफलेऽज्ग्रहणस्य निरस्तेऽज्मात्रप्रतिपत्तिरेवेह फलमिति परिशेषात् 'एवमपि' इति चोद्योत्थितिः कथम्, अत आह — **अन्यतरेति**। हलन्तव्यावृत्तिनिरासके तस्मिन् सति केवलस्यैव

---

[1] स्वप्नावसितराजनि — क.
[2] तदेव तु नियताधिकरणमिति — क.
[3] का. वा. १. १. १३— १.
[4] अनियम इति छेदः।
[5] का. वा. ३. १. ९६–३.
[6] केवलप्रयोगाभावादिति — क.
[7] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[8] पा. सू. १. १. ११.
[9] निवृत्तिस्तु — क.

यथा स्यात् तदन्तस्य मा भूदिति किं कल्प्यताम्, उत तदन्तस्यैव यथा स्यात् केवलस्य मा भूदिति [1]विशयात् परिशेषासिद्धिरित्यर्थः। [2]अनयोस्तद्व्यपदेशे तद्गतगुणनिमित्तमाह — **पारार्थ्येति**। तदिह **परिभाषयोरिति**। परार्थयोरित्यर्थः। इदं च समवस्थितिनिमित्तकीर्तनम्। सावकाशत्वस्य समवस्थित्यनिमित्तत्वात् तत्कीर्तनं किमर्थमित्याशङ्क्य न तन्निमित्ततया तत्कीर्तनम्, किं तु विनिगमनाविरहहेतुतयेत्याह — **निरवकाशस्येति**। **ओरिति**। आद्यन्तवद्भावस्य प्रयोजनाभावादत्राप्रवृत्तिः। न तूवर्णमात्रो धातुरस्ति। [3]सत्यपि वा तत्रानभिधानात् प्रत्ययाभावं मन्यते। स्वदेशेऽवस्थानं विवक्षितं न भवति, प्राप्तपरित्यागे निमित्तप्रश्नस्य वाक्यार्थत्वादित्याह — **इहेति**। **परित्यज्यत इति**। कार्यपरित्याग एव तत्परित्यागः। तदयमर्थः — सति तदन्तविधौ सति चाद्यन्तवद्भावे पश्चादज्ग्रहणफलनिरीक्षायामन्यतरस्मिन् कार्यव्यावृत्तेः कल्प्यत्वे लिङ्गात् केवले तदकल्पनात् परिशेषात् तदन्ते तत्कल्पनमिति प्रवृत्तोऽपि तदन्तविधिः कार्यानुपपादनात् परित्यक्तकल्प इति। कल्पनागौरवाद् बिभ्यद् व्याख्यान्तरमाह — **अथवेति**। 'द्वयोः परिभाषयोः' इत्यादिस्तु ग्रन्थः प्रथमव्याख्यामुपपद्यतेतराम्। अत्र तु क्लेशेन योज्यः। कल्पनालाघवात्तु ग्रन्थस्वारस्यमुपेक्ष्य व्याख्यान्तरं कृतम्। नन्वेकग्रहणव्यावर्त्यस्य प्रेदमित्यादिकस्यान्यथासिद्धत्वेऽप्यच्समुदायस्तु व्यावर्त्यो व्यक्त्याकृतिपक्षयोः, तत् कथं तेनाकृतिपक्षज्ञापनमित्यत आह — **संज्ञाया इति**। व्यक्तिपक्षे संख्याविवक्षयाच्समुदायव्यावर्तनादेकग्रहणमतिरिच्यमानं वर्णग्रहणे जातिग्रहणं ज्ञापयतीत्यर्थः। ननु तदेव तस्य ज्ञापकम्, यस्मिन् ज्ञापिते यत् फलवत्, इतरथा चानर्थकम्। न चेहाकृतिग्रहणेऽप्येकग्रहणसाफल्यम्, जातिपक्षेऽप्यच्समुदायस्य संज्ञाप्रवृत्तेः[4], समुदायेनैकजात्य[न]भिव्यञ्जनात्। नच प्रतिव्यक्ति जात्यभिव्यक्त्या समुदाये प्राप्तिः, एकत्वविवक्षया तन्निरासात्। तथा च तत्र तत्र भाष्यम् [5]'सा तु प्रत्येकं परिसमाप्यते' इति। ततश्च यथा प्रातिपदिकसमुदायाद्विभक्त्यभावः सुबन्तसमुदायस्य समासाभावश्च, तथाच्समुदायस्य [6]संज्ञाप्राप्तिरित्यन्तानर्थकमेकग्रहणम्। इतरथानर्थक्यं तु ज्ञापकबीजमित्यत आह — [7]**अच्समुदायस्येति**। यद्यपि जातिपक्षेऽप्यच्समुदायस्य नास्ति वास्तवी प्राप्तिः, तथापि प्राप्त्याशङ्कामात्रं तत्र भवति, जातिविषयचोदनासु 'ब्राह्मणो न हन्तव्यः' इत्यादौ क्वचित् समुदायेऽपि चोद्यमानसमन्वयात्। व्यक्तिपक्षे तु शङ्कापि नास्तीति तन्निवारणार्थमेकग्रहणमुक्तार्थज्ञापकमेवेत्यर्थः। ननु शङ्कानिवृत्तये विशेषणदाने शास्त्रगौरवमित्यत आह — **ज्ञापनेति**। न हि सर्वत्र शङ्कानिरासाय यत्नः क्रियते, यतः शास्त्रगौरवम्। किं त्विहैव ज्ञापनफलमुद्दश्य तदर्थविशेषणमित्यर्थः। ननु [8]'समुदायस्य सत्यां संज्ञायां यद्यनिष्टं स्यात् तदा तत्र प्राप्तिशङ्कोच्छेद्या नान्यथेत्याशङ्कते — **किं पुनरिति**। तस्य संज्ञायां यद्यपि नानिष्टम्, तथापि तस्यैव सा तत्र स्यादित्यनिष्टापत्तिरप्याशङ्किता, न वास्तवी, द्विर्वचनन्यायस्य संज्ञास्वभावात्। **अन्त्यस्यैवेति**। यद्यप्यत्रापि न प्रगृह्यत्वम्, तथापि समुदायस्य प्रगृह्यत्वेऽन्त्यस्य तत्कार्यम्, यथा पचेते इत्यत्र द्विवचनस्य प्रगृह्यत्वेऽपि तत्कार्यमेकारस्य। ननु तत्र प्रगृह्यावयवे प्रगृह्यशब्दवृत्त्या एकारस्य प्रकृतिभावः, इह त्ववयवे तच्छब्दवृत्तौ पूर्वयोरपि प्रकृतिभाव उचितः। नैतत्, 'प्रगृह्योऽचि' इति मुख्यस्य प्रगृह्यस्याचा पौर्वापर्यमाश्रितम्। तच्च तत्र चात्र चास्त्येव। प्रकृतिभावस्तु

---

[1] विषयात् — क.
[2] अतस्तद्व्यपदेशे — क.
[3] नन्वस्ति 'उङ् शब्दे' इति धातुरित्यत आह — सत्यपीति।
[4] अप्रवृत्तेरिति छेदः।
[5] महाभाष्यम् २. १. १.
[6] संज्ञाया अप्राप्तिरित्यर्थः।
[7] प्रदीपे 'अच्समुदायग्रहणशङ्कायाः' इत्यत्र 'अच्समुदायस्य ग्रहणशङ्कायाः' इति पाठोऽभिमत इति भाति।
[8] समुदायस्यासत्यां — क.

तदवयवे, तस्यैव स्वरसंधिप्राप्तेः। ततश्च यस्मिन्नचि प्रगृह्योऽनन्तरस्तस्मिन्नेव तदवयवस्यापि प्रकृतिभाव इति कुतः पूर्वयोस्तत्प्राप्तिः। एतच्च तत्राचीति वर्तमाने पुनरज्ग्रहणाल्लभ्यत इत्यास्तां विस्तरः। ननु [1]समुदायस्यानिपातत्वात् संज्ञाया अप्राप्तिरिति कथं तत्र संज्ञाप्राप्तिशङ्कानिवारकमेकग्रहणं ज्ञापकमित्यत आह — **अच्समुदायेति**। इदमप्याशङ्कितं न वास्तवम्, मुख्यनिपातसंभवे तत्समाहारग्रहणस्यानुचितत्वात् ॥

[2]आकृतौ स्नेहमाचार्यः शङ्कितानिष्टवारणम्।
कुर्वन् विज्ञापयत्येष तत्कर्तृपितृवत् सुते ॥

आङः प्रगृह्यत्वानिष्टेः प्रश्नः कथमित्यत आह — **ङिदिति**। अङितो निषेधाशङ्का कथमित्यत आह — **अनुबन्धेति**। अनुबन्धाहितरूपविशेषाभावात् कथं तन्निवृत्तौ तद्वत्त्वावगतिरित्यत आह — **अर्थेति**। वक्ष्यति चैतद् भाष्यकारः [3]'अध्रुवेण निमित्तेन ध्रुवं किंचित् परिग्राह्यम्' इति। अर्थचतुष्टयेऽपि ङित्त्व आप्तवचनं प्रमाणयति — **आङित्यादि**। पदसमुदायरूपवाक्ये कथमाकारवृत्तिः, अत आह — **पूर्वेति**। वाक्यशब्देन वाक्यार्थ उच्यते। तस्मिन्नपि संसर्गात्मन्याकारवृत्त्या तदन्यथात्वं तेन लक्ष्यते। वाक्यशब्देन तदारम्भलक्षणेत्यपरेषां व्याख्येत्याह — **वाक्येति**। स्मृतिद्योतकत्वं वाक्यस्य, नाकारस्येत्याशङ्क्याह — **तथेति**। यथा वाक्यारम्भ [4]आङमात्रादवद्योत्यस्तथा स्मृतिरपीत्यर्थः। तथा च लोके 'अभिजानासि किं देवदत्त काशीपुरे कृतमावाभ्याम्' इति प्रश्ने 'आ' इति प्रतिवक्ति। तर्हि शेषवैयर्थ्यम्, तत्राह — **तत इति**। स्मरसि चेत् [5]'किं वदेति पृच्छ्यते, शेषेण विशिष्य कीर्तयतीत्यर्थः ॥

ओत् १. १. १५.

[१, २३०–२३१]

(**लघुविवरणम्**) यदा 'अनाङ्' इति प्रसज्यप्रतिषेधस्तदा प्रगृह्यसंज्ञाप्रतिषेध एव शास्त्रीयमन्तवद्भावस्य कार्यमिति [6]स्यादन्तवद्भाव इत्यभिप्रेत्याह — **आ उ ओ इत्यत्रेति** ॥

[१, २३०–२३१]

(**विवरणम्**) **दर्शनात्** वेदे। **अर्थभेदाभावेऽपि** अर्थनानात्वाभावेऽपीत्यर्थः। अवयवा अनर्थकाः, निपातसमुदाय एवार्थवानिति तात्पर्यम्। **चादिष्विति**। अन्यथा पुनःपाठो वृथा स्यादिति भावः। **पर्युदासे त्विति**। तत्र हि नान्तवद्भावस्य शास्त्रीयं [7]कार्यम्। अस्ति त्वादिवद्भावस्याङसदृशत्वेन प्रगृह्यसंज्ञेत्यत आदिवद्भाव एवेत्यर्थः। **प्रतिषिद्धार्थत्वादिति**। [8]'प्रतिषिद्धे प्रगृह्यसंज्ञा विषयत्वे-

---

[1] समुदायस्यानिपातनात् — क.

[2] सुते शङ्कितानिष्टवारणकर्तृपितृवत् आकृतौ शङ्कितानिष्टवारणं कुर्वन्नेष आचार्य आकृतौ स्नेहं विज्ञापयतीत्वन्वयः।

[3] महाभाष्यम् १. १. २६. अर्थानुवादोऽत्र .

[4] आकारमात्रादित्युचितं भाति, अङित्त्वात्तत्र।

[5] किमिति वदेत्यर्थः।

[6] 'स्यात्' इति नास्ति — ण.

[7] कार्यमस्ति। अस्ति तु — छ, झ.

[8] प्रतिषिद्धा प्रगृह्यसंज्ञा विधेयत्वेनार्थः — — च, छ, ट.

नार्थः प्रयोजनं यस्य तदोदित्येतत् तथा, तस्य भावस्तत्त्वम्, तस्मादित्यर्थः। [1]'निपातः' इति प्रगृह्यसंज्ञाम् 'अनाङ्' इति प्रतिषेधो बाधताम् 'ओत्' इति प्रगृह्यसंज्ञा वेति विचारे परत्वात् 'ओत्' [2]इत्येतदेव 'ओ [3]आयातम्' इत्यादौ बाधकमित्यभिप्रेत्याह — **परत्वादिति**। [4]**प्रतिषिद्धार्थमिति**। प्रतिषेध[5]निवृत्त्यर्थमपीत्यर्थः। **ओकारस्येति**। यद्यपि 'ओत्' इत्यनेन निपातस्य विशेष्यत्वे ओदन्तस्य प्रगृह्यसंज्ञा, तथापि विशेषणमिह प्रतिपदोक्तं गृह्यत इत्यभिप्रेत्य 'ओकारस्य' इत्युक्तम्। नो इत्येवमादयश्चेदानीमेकनिपाता अभिप्रेताः। अवयविनि च प्रतिपदोक्तेऽवयवा अपि प्रतिपदोक्ताः। ओ [6]इत्यप्येक एव निपातः, सूत्रं च न प्रतिषिद्धार्थम्। ओ इत्यस्य निपातसमाहारत्वे 'अनाङ्' इति पर्युदास इत्यभिप्रायः॥

[१, २३०–२३१]

(**उद्द्योतनम्**) नन्ववयवार्थादर्थान्तरं प्रतीयते चेन्निपातसमाहारो युक्तः, नान्यथा, अत आह — **अनर्थकानामिति**। **दर्शनात्** वेद इत्यादिः। **अर्थभेदेति**। अवयवानां समुदायस्य चेत्यादिः। अवयवा अनर्थकाः, निपातसमुदाय एवार्थवानित्याशयः। **चादिष्विति**। निपातसमुदायत्वे पुनःपाठवैयर्थ्यादिति भावः। आङ्सदृशस्य उकारस्येति [7]छेदः। न च "उभयत आश्रयणे नान्तादिवत्' इति वाच्यम्, अन्तवद्भावस्य शास्त्रीयकार्याभावेनानाश्रयणात्, प्रगृह्यसंज्ञारूपकार्यसद्भावादादिवद्भाव [8]एवेष्यत इति भावः। संज्ञायाः प्रयोजनमाह — **तस्या इति**। एवं च 'ओ षु यातम्' [10]इत्यत्रातिप्रसङ्गाभावात् 'ओ [11]अयातम्' इत्यत्र प्रकृतिभावसिद्धेः सूत्र एकवाक्यतासिद्धेश्च पर्युदास एव युक्त इति प्रदीपकृदाशयः। 'अदोऽभवत्' इत्यत्र निपातत्वाभावान्नातिव्याप्तिः। 'ओत्' इत्यत्र निपात इत्यनुवर्तनीयम्। अन्यथा 'शम्भोऽव' [12]इत्यत्रातिप्रसङ्गात्, अत आह — **च्व्यन्तत्वेनेति**। 'ओ षु यातम्' इत्यादौ विध्यर्थस्यास्य 'अदोऽभवत्' इत्यादावप्रवृत्तेर्नातिव्याप्तिरिति शङ्कते — **प्रतिषिद्धेति**। **प्रतिषिद्धा** प्रगृह्यसंज्ञा विधेयत्वेन **अर्थः** प्रयोजनं यस्य [13]'ओत्' इत्यस्य तत्त्वादित्यर्थः। **उभयार्थत्वादिति**। प्रतिषिद्धार्थत्वात् 'अदोऽभवत्' इत्यादौ विध्यर्थत्वाच्चेत्यर्थः। तदुपपादयति — **तथा हीति**। **परत्वादिति**। [14]'ओ षु यातम्' इत्यत्र [15]'निपात एकाच्' इति प्राप्तां प्रगृह्यसंज्ञाम् 'अनाङ्' इति प्रतिषेधो वा बाधते 'ओत्' इति प्रगृह्यसंज्ञा वेति विवक्षायां परत्वात् 'ओत्' [16]इत्येतदेव [17]बाधत इत्यर्थः। वस्तुतस्तु [18]'मध्येऽपवादन्यायेन 'अनाङ्' इति प्रतिषेधो निपातसूत्रप्राप्तिं बाधते, न 'ओत्' इत्येतत्सूत्रप्राप्तिम्, परत्वात्। तथा चेयमेव फलतो निषेधबाधिकेति 'परत्वात्' इत्यादेरर्थः। **प्रतिषिद्धार्थमपि** प्रतिषेधनिवृत्त्यर्थमपि। यद्यपि 'ओत्' इत्यनेन निपातस्य

---

[1] पा. सू. १. १. १४.
[2] इत्येव — झ.
[3] अयातम् — छ.
[4] प्रतिषिद्धार्थत्वमिति — झ, ञ, ट.
[5] निवृत्त्यर्थत्वमपीत्यर्थः — च, झ, ञ.
[6] इत्येक एव निपातः — छ; इत्यप्येकनिपातः — झ.
[7] भेदः — म, ऋ.
[8] महाभाष्यम् १. १. ५८.
[9] एवकारो नास्ति — म, उ.
[10] इत्यत्रापि प्रसङ्गाभावात् — अ.
[11] आयातम् — अ, इ, उ, ऊ, ॠ.
[12] इत्यत्रापि प्रसङ्गः — अ.
[13] 'ओदित्यस्य' इति नास्ति — अ, आ, इ, ॠ.
[14] ओ अयातम् — आ, ॠ.
[15] पा. सू. १. १. १४.
[16] 'इत्येतदेव' इत्यस्यानन्तरम् 'ओ अयातमित्यादौ' इत्यधिकम् — अ, आ; ओ आयातमित्यादौ — ॠ.
[17] बाधक इत्यर्थः — म, उ.
[18] परिभाषा ६१.

विशेषणादोदन्तस्य प्रगृह्यसंज्ञा, तथापीह विशेषणं प्रतिपदोक्तं गृह्यत इत्यभिप्रेत्याह — **ओकार-स्येति** ॥

[१, २३०–२३१]

(**रत्नप्रकाशः**) **निपातसमाहारोऽयमिति** । 'अभ्यवहारः, प्रत्यवमर्शः' इत्यादाविवैकार्थपरतया-नेकनिपातप्रयोगाङ्गीकारेऽपि बाधकाभाव इति मन्यते। **एकनिपाता इति**। चादिषु तथैव पाठादिति भावः। **ओ षु यातमिति**। आङुञोरयमेकादेशः। तस्य स्थानिवत्त्वेन निपातत्वेऽपि तथैवाङ्त्वस्यापि सत्त्वेनाङभिन्नत्वाभावात् पूर्वेण तावत् प्रगृह्यसंज्ञा न प्राप्नोति। शाकल्यस्य मते उञः प्रगृह्यत्वेन स्थानिवद्भावेन तस्य प्रगृह्यसंज्ञालाभेऽपि शाकल्येतरमते तस्य तत्संज्ञालाभार्थ-मिदम्। तेन 'ओ इति' इत्यादिप्रयोगस्तन्मतेऽपि सिध्यतीति भावः। एतेन "'आ उ ओ' इत्यत्रा-न्तवद्भावेन भवत्ययमाङिति 'अनाङ्' इति प्रतिषेधः प्राप्नोति। पर्युदासे सति न दोषः। तत्र ह्याङसदृशोकारस्याङा सहैकादेश आदिवद्भावादुकारग्रहणेन गृह्यत इति सिध्यत्येव प्रगृह्यसंज्ञा" इति निरस्तम्। उकारं स्वरूपेण गृहीत्वा प्रगृह्यसंज्ञाया अविहितत्वेन 'एकादेशस्यादिवद्भावेनो-कारग्रहणेन ग्रहणात् प्रगृह्यसंज्ञा भवति' इत्युक्तेरयुक्तत्वात्। स्थानिवत्सूत्रेणैवेष्टसिद्धिमाश्रित्यान्ता-दिवद्भावसूत्रस्य प्रत्याख्यातत्वेन वर्णाश्रये विधावन्तादिवद्भावस्यापि निषिद्धत्वेनैकादेशस्योकार-ग्रहणेन ग्रहणासंभवात्। 'अनाङ्' इत्यनेनाङभिन्नस्यैवाङसदृशस्य ग्राह्यत्वेन स्थानिवद्भावेनाङसंज्ञां निपातसंज्ञां च लब्धवतो निपातान्यत्ववदाङन्यत्वस्याप्यभावादननुबन्धकस्योकारस्य निपातस्य प्रगृह्य-संज्ञाया [अप्राप्तत्वात्।] तस्मात् प्रकृतसूत्रे प्रसज्यप्रतिषेधपर्युदासयोर्न कश्चन फलभेदः। **अदो-ऽभवदिति**। च्व्यन्तत्वादस्य निपातत्वम्। ननु 'प्रतिषिद्धार्थोऽयमारम्भः' इत्युक्तम्, कथमत्र प्रसज्यत इति चेन्न, 'ओतश्चिप्रतिषेधः' इति वार्तिकेन प्रतिषिद्धार्थताया एव व्यवस्थाप्यत्वेन विरोधा-भावात्। एतद्वचनाभावे प्रतिषिद्धार्थमारब्धस्यापि 'अदोऽभवत्' इत्यत्र प्रवृत्तौ बाधकाभावाच्च। नन्विदमेवात्र बाधकम्, अत्र प्रवृत्तौ वचनस्य सावकाशत्वेन 'अनाङ्' इति प्रतिषेधात् 'ओ षु यातम्' इत्यादावस्याप्रवृत्त्या 'प्रतिषिद्धार्थोऽयमारम्भः' इति प्रतिज्ञाहानिरिति चेन्न, [१]"अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति [२]"निपात एकाच्' इति प्राप्तस्यैव 'अनाङ्' इति निषेधस्य निवर्तकत्वात्। वस्तुतः 'आहो, उताहो' इत्यादेरेकनिपातपक्षस्यैव युक्तत्वेन न काप्यनुपपत्तिः। **प्रतिपदोक्तस्यैवेति**। एकनिपातत्वपक्ष एव स्थित इति भावः। [३]पक्षान्तरे हि सर्वे लाक्षणिका इत्यनुपपन्नमिदं समाधानं स्यात् ॥

[१, २३०–२३१]

(**नारायणीयम्**) नन्वनेकनिपातत्वेऽनेकार्थावगतिः स्यात्, न च सास्तीत्येकनिपातत्वमङ्गीकार्य-मित्यत आह — **अनर्थकानामिति**। अर्थैक्यस्यानेकत्वेऽप्युपपत्तेरेकत्वे किं प्रमाणमित्यत आह — **चादिष्विति**। सूत्राकरणलाघवे लभ्ये तदपास्यान्यथापि कृतस्य तत्फलान्तरमभिहितम्, तत् पाक्षिक-तया व्यवस्थापयति — **आ इति**। भाष्योक्तोदाहरणे संज्ञाफलादर्शनादुदाहरणान्तरमाह — **तस्या-**

---

[१] परिभाषा ६२.

[२] पा. सू. १. १. १४.

[३] निपातसमाहारपक्ष इत्यर्थः।

श्चेति। ननु [1]'ऊर्यादि'सूत्रे गतिसंज्ञा विधीयते, तत् कुतो निपातत्वम्, अत आह — **च्व्यन्तत्वेनेति**। [2]'प्राग्रीश्वरात्' इत्यत्र प्राग्वचनान्निपातसंज्ञापूर्वकतया गत्युपसर्गसंज्ञाविधानमिति च्व्यन्तस्य निपातत्वमित्यर्थः। **प्रतिषिद्धेति**। अस्य हि विषयान्तराभावे प्रतिषेधबाधकत्वम्, तद्भावे तु [3]'प्रतिषेधाश्च बलीयांसः' इति न्यायेन प्रतिषेधप्राबल्यान्न तद्बाधकत्वमस्योचितम्। तस्मात् प्रागुक्तनिषेधबाधनोपपत्तयेऽस्य [4]'विषयान्तरालाभायैकाज्ग्रहणमनाङिति नञ्रहितं वानुवर्त्यम्, निपातग्रहणेन वौकारो विशेष्यः, 'तच्च्व्यन्तत्वेऽप्राप्तिरित्यर्थः। उक्तेष्वन्यतमयत्नाभावेऽप्योदन्तनिपातमात्रस्य विधीयमाना संज्ञा परत्वान्निषेधबाधनक्षमा। न हि प्रतिपदोक्तत्वादिहेत्वभावे निषेधत्वं प्राबल्यकारणमित्यभिसंधायाह — **उभयेति**। किं निपातसंज्ञायाः प्रतिपदोक्तत्वं विवक्षितम्, उत निपातस्वरूपस्य। नाद्यः, चादिवत् च्व्यन्तस्यापि प्रतिपदं तद्विधानात्, च्व्यन्तस्य वा चाद्यपेक्षया तद्विधेः प्रतिपदसत्त्वात्। नान्त्यः, निपातस्वरूपस्य प्रतिपदोक्तत्वापेक्षाभावात्। न हि संज्ञापूर्वकविधौ संज्ञिनः प्रतिपदोक्तत्वमपेक्षितम्। न खलु प्रातिपदिकनिमित्तं कार्यं प्रतिपदोच्चारितस्य भवति, स्वरूपोपादानविषयत्वादस्याः परिभाषायाः, अत आह — **ओकारस्येति**। आहो इत्यादिवदोदन्तस्य प्रतिपदोक्तत्वाभावादाह — **[ओकारस्येति]**। ओकारस्य प्रतिपदोक्तत्वविवक्षा चेन्मूलोदाहरणे ओदन्तस्य प्रतिपदपाठादोकारस्य नान्तरीयकत्वात् कथं तत्त्वमित्यत आह — **यस्येति**। नान्तरीयकस्यापि साक्षादुच्चारणमस्तीति तत्त्वोपपत्तिरित्यर्थः॥

[१, २३१–२३३]

(लघुविवरणम्) गुणादागत इति। [5]'तत आगतः' इत्यण्। **मुखमिवेति**। [6]'शाखादिभ्यो यः' इति यप्रत्ययः। नियतत्वादपि मुख्य एवार्थो ग्राह्य इत्यभिप्रेत्याह — **अनियतश्चेति**। ननु [7]'सुवर्णं कुण्डले भवतः' इति प्रयोगाद् विकृतेः कर्तृत्वमवसीयते। तथा च 'गोऽभवत्' इत्यत्र भवनक्रियायां विकृतेर्गोरिव कर्तृत्वात् तत्र च गोशब्दो मुख्य इति न गौणमुख्यन्यायेन प्रगृह्यसंज्ञाव्यावर्तनमित्यत आह — **गोऽभवदित्यत्रेति**। वृत्तिविषये प्रकृतेः कर्तृत्वमिति भावः। **प्रकृतौ चेति**। अगवि। ननु [8]'शब्दाश्रये वृद्धयात्वे शब्दमात्रे यदि भवतस्तर्हि प्रगृह्यसंज्ञापि शब्दाश्रयत्वाच्छब्दमात्रे प्राप्नोतीत्यत आह — **स्वार्थं इत्यादिना [9]इत्युक्तं शब्दाश्रये चेत्यन्तेन**। [10]'यद्वा,' शब्दाश्रये चेत्यनुपपन्नम्, रूपग्रहणेन रूपवदर्थस्यापीह शास्त्रे ग्रहणं ज्ञापितम्। ततश्चार्थवच्छब्दाश्रयत्वेन वृद्धयात्वयोः शब्दमात्राश्रयत्वाभावादित्यत आह — **स्वार्थं इत्यादिना अभावाच्छब्दाश्रये चेत्युक्तमित्यन्तेन**। **तस्य चेति**। शब्दान्तरसंनिधानात् प्राक् प्रातिपदिकार्थस्य मुख्यव्यपदेशो गौणव्यपदेशश्च नास्तीति योजना। ननु शब्दान्तरसंनिधानात् प्राग् गौणव्यपदेशाभावेऽपि मुख्यव्यपदेशः किं न स्यादित्यत आह — **गौणापेक्षयेति**। अर्थवच्छब्दाश्रयत्वेऽपि मुख्यव्यपदेशयुक्तार्थवच्छब्दाश्रयत्वाभावेन 'शब्दाश्रये च' इत्युक्तमिति भावः। ननु वृद्धेरर्थवच्छब्दाश्रयायाः शब्दान्तरसंनिधाननिरपेक्षत्वाद् गौणमुख्यन्यायानवतारात् प्रवृत्तिः

---

[1] पा. सू. १. ४. ६१.
[2] पा. सू. १. ४. ५६.
[3] परिभाषा १२१.
[4] विषयान्तरलाभायैकाच् — क.
[5] पा. सू. ४. ३. ७४.
[6] पा. सू. ५. ३. १०३.
[7] महाभाष्यम्. पस्पशाह्निके 'सिद्धे शब्दार्थसंबन्धे' इत्यत्र।
[8] शब्दाश्रयवृद्धयात्वे — ड, ढ.
[9] 'इत्युक्तं शब्दाश्रये चेत्यन्तेन' इति नास्ति — — ड, ढ.
[10] ननु शब्दाश्रये — ण.

संभवति। आत्वं त्वम्शसोर्विधीयते। तौ च कर्मणि विधीयेते। कर्मत्वं च क्रियापेक्षयेत्यवश्यंभावि पदान्तरसंनिधानम्। तथा च 'गां [1]वाहीकमानय' इत्यत्र विशिष्टस्यानयनक्रियापेक्षया कर्मत्वेन द्वितीयोत्पत्तावाश्रयितव्यायां [2]वाहीकमिति पदान्तरसंनिधानाद् गोशब्दार्थस्य गौणत्वे गौणमुख्यन्यायेनात्वं न प्राप्नोतीत्यत आह — **तत्रेति**। **श्रौतः** द्वितीयाश्रुतितः[3] प्राप्त इत्यर्थः। **वाक्यीयो न्यायः** आकाङ्क्षासंनिधियोग्यताः। अयमभिप्रायः — द्वितीया कर्मणि विधीयमाना कर्मत्वनिर्वाहकक्रियापेक्षत्वेन क्रियापदसंनिधानमेवापेक्षते। तावता द्वितीयोत्पत्तौ तन्निमित्तात्वप्रवर्तनसमये गोशब्दार्थस्य गौणत्वं न प्रतीतमिति गौणमुख्य[4]न्यायानवतारादात्वं प्रवर्तत एव। प्रगृह्यसंज्ञा तु निपातस्य विधीयते। निपातत्वं च च्व्यन्तत्वे सति। च्विश्च प्रकृतौ वर्तमानाद्विकृतिवाचकात्। तथा च प्रगृह्यसंज्ञाविधानसमये गोशब्दार्थस्य [5]गौणत्वं प्रतीतमिति गौणमुख्यन्यायेन [6]न प्रवर्तत इति॥

[१, २३१–२३३]

(**विवरणम्**) ननु गोशब्दो निपातो न प्रतिपदोक्त [7]इत्यत आह — **ओकारस्येति**। उक्तोऽत्राभिप्रायः। ननु लक्षणेन प्रतिपादितत्वादस्यापि लाक्षणिकत्वम्, नेत्याह — **यस्येति**। **गुणादागत इति**। "तत आगतः' इत्यण्। विहितकर्मभ्यो बहिर्भूतो बाहीकः। [8]"बहिषष्टिलोपश्च' इतीकक्टिलोपौ। प्रकृतोपयोगितयार्थ उक्तः, शब्दोऽपि गुणादारोपितेऽर्थे आगतो गौणो भवत्येव। **मुखमिवेति**। [9]"शाखादिभ्यो यः' इति यः। **प्रधानत्वम्** [10]अर्थान्तरप्रतीतिनिरपेक्षतया प्रतीयमानत्वम्। शब्दस्यापि मुख्यत्वं मुखमिव [11]प्रधानत्वात्, तच्चारोपाधिष्ठानाप्रत्यायकत्वे[12] सति स्वशक्तिविषयप्रत्यायकत्वम्। **प्राथम्यात्** बुद्धिपूर्वकारोपनिरपेक्षत्वादित्यर्थः। एतद्वैलक्षण्यं गौणस्याह — **गौणे होति**। माणवकादौ सिंहादिशब्दः प्रवर्तमानः सिंहत्वाद्यारोपेणैव प्रवर्तते। शब्दस्य यद्विषया शक्तिः कल्पिता तद्विषयैव सा [13]युक्ता। आरोपे तु तद्विषयत्वं युज्यते। अन्यथान्यविषया शक्तिरन्यत्र कार्यमित्यतिप्रसङ्ग आपद्येत। अभिधेयसंबन्धो [14]नियामकश्चेन्न, स हि संयोगो वा समवायो वा सिंहत्वादौ माणवकादेर्न दृश्यत इत्यारोप एव वाच्यः। न चाभिधेयगुणयोगः संबन्धः, तथा सति सिंहत्वं प्रबोध्य तदेकार्थसमवायिनं च गुणं पश्चान्माणवकादिकं बोधयतीति शब्दस्य विरम्य व्यापारप्रसङ्गः। सिंहत्वतद्गुणयोश्च सिंहशब्दात्[15] प्रतिबोधने माणवकस्य माणवकशब्देनैव बोधितत्वात् [16]सिंहशब्दप्रयोगो मुधा स्यात्। न च शब्दे सिंहत्वादि[17]बोधनमात्रेण निवृत्त-

---

[1] याज्ञिकमानय — ड, त.
[2] याज्ञिकमिति — ड, ढ, त.
[3] श्रुतेः प्राप्त इत्यर्थः — ढ.
[4] न्यायावतारात् — ड, ढ, ण.
[5] गौणत्वमप्रतीतमिति गौणमुख्यन्यायः प्रवर्तत इति — ड, ढ, त.
[6] 'प्रगृह्यसंज्ञा' इति पूर्ववाक्यादनुषङ्गः।
[7] इत्यभिप्रेत्याह — झ, ञ.
[8] पा. सू. ४. ३. ७४.
[9] का. वा. ४. १. ८५—४.
[10] पा. सू. ५. ३. १०३.
[11] अर्थप्रतीति — ञ.
[12] प्रधानत्वम् — ट.
[13] अधिष्ठानप्रत्यायकत्वे — च, छ.
[14] 'युक्ता' इति नास्ति — झ, ञ.
[15] नियामक इति चेदित्यर्थः।
[16] शब्दाप्रतिबोधने — च, छ, टः
[17] सिंहशब्दो मुधा — ञ.

व्यापारे सिंहत्वादेरेव स्वसंबन्धिगुणसंबन्धिनि प्रतीतिः, तथा सति न सा शाब्दी स्यात्। [1]शब्दबोधितजन्यत्वेन शाब्दत्वे [2]प्रत्यक्षबोधितधूम[3]जन्याग्न्यनुमितेरपि प्रत्यक्षत्वं स्यात्। [4]यद्यप्यारोपेऽपि सिंहत्वप्रबोधो माणवकादिप्रबोधश्च, तथापि तदात्मनैव [5]स बोध्यत इति न विरम्य व्यापारः। न चैवं शौर्यादि[6]गुणस्याप्रतीतिः, प्रयोक्तुस्तावत् प्रमाणान्तरेण, श्रोतुरपि [7]शब्दारोपितसिंहत्वप्रतीत्यन्यथानुपपत्त्या। न च प्रतीतभेदस्यारोप एवं न संभवतीति वाच्यम्, न ह्ययं विशेषाग्रहणनिबन्धनो भ्रमः, किं तु बुद्धिपूर्वकः प्रतिमादौ विष्ण्वादिबुद्धिवत्। न च [न] तत्राप्यारोपस्तत्त्व[8]स्येति वाच्यम्, न ह्येवं प्रतियन्ति प्रतिपत्तारः — विष्णुसदृशीयं प्रतिमेति, किं तु विष्णुरेवेति। इयांस्तु विशेषः — अयं न बाध्यते, लोकेऽन्यत्र तात्पर्यात्। बाध्यते त्वितरः, तदभावात्। आरोपितार्थत्वाविशेषेऽपि गुणाद्यत्रारोपः स गौणः, अभिधेयसंबन्धाद्यत्रारोपः स लाक्षणिकः। एतत्सर्वमभिप्रेत्याह — **मुख्येति**। **अनियतश्चेति**। सिंहशब्दस्य माणवकबलीवर्दादिषु [9]बहुषु प्रयोगादित्यर्थः। **गोत्वमिति**। अगवीति भावः। ननु च्विप्रत्ययः प्रकृतिविकृतिभावविषयः। अगौश्च प्रकृतिः, विकृतिश्च गौः। न च तद्वचनयोः सामानाधिकरण्ये गौणत्वप्रसिद्धिः, समवायाद्धि तत्र सामानधिकरण्यम्, न त्वारोपात्। भवनक्रियायां च दृश्यते विकृतेः कर्तृत्वं [10]'पुनरावृत्तः सुवर्णपिण्डः खदिराङ्गारसदृशे कुण्डले भवतः' इति विकृतिगतद्वित्वदर्शनात्। तथा च विकृतिर्गोशब्दार्थो मुख्य एवेति न गौणमुख्य[11]न्यायस्य विषय इत्यत आह — **गोऽभवदिति**। **वृत्ताविति**। वृत्तिरिह तद्धितवृत्तिः। **संघीति**। असंघो ब्राह्मणाः संघः [12]संपद्यत इति विग्रहः। अनुबन्ध्यो गौरग्नीषोमीयस्त्वजः पशू यागद्वय[13]साधनत्वेन चोदितौ। तत्र पूर्वोक्तन्यायान्मुख्ययोरेव[14] तयोर्ग्रहणमिति 'तद्यथा' इति भाष्यार्थः। ननु रूपग्रहणेनार्थवतः शब्दस्य ग्रहणं ज्ञापितमिति निपातसंज्ञा यथार्थाश्रया, एवं वृद्ध्यात्वे अपि। न च वर्णाश्रयत्वेन तयोः शब्दाश्रयत्वं नार्थाश्रयत्वमिति वाच्यम्, वृद्धिर्हि [15]'गोतो णित्' इति कार्यातिदेशान्न वर्णाश्रयत्वेन शङ्कनीया। आत्वं त्वम्शस्भ्याम्क्षिप्तस्य प्रातिपदिकस्य [16]'ओतः' इत्यनेन विशेषणात् तदन्तविधौ वर्णोपसर्जनस्य प्रातिपदिकस्य ग्रहणात् 'ओत्' इति प्रगृह्यसंज्ञावन्न वर्णमात्राश्रयम्। एवमेव [17]'गोतो णित्' इति तपरकरणादोकारान्तोपलक्षणत्वेऽपि। तस्माच्छब्दाश्रये वृद्ध्यात्वे [18]इत्यनुपपन्नमिवेत्यत आह — **स्वार्थ इति**। यावन्न पदं तावन्न प्रयोगार्हमर्थप्रतिपादनाय। [19]न चाप्रतीतार्थं आकाङ्क्षा। न चासत्यामाकाङ्क्षायामर्थान्तरविषयपदान्तरसंनिधानम्। न च तस्मिन्नसति विरोधः स्वार्थस्येति गौणत्वस्याभावात् स्वार्थस्य तदपेक्षगौणमुख्यन्यायस्याप्यप्रवृत्तेरर्थवत्त्वाच्च तन्मात्राश्रये वृद्ध्यात्वे भवत इत्यर्थः। मुख्यव्यपदेशरहितस्वार्थसंबन्धित्वं च भाष्ये शब्दमात्रशब्दस्यार्थ इति दर्शयितुं तस्य चेत्युक्तम्। **गौणा-**

---

[1] शब्दाबाधितावगम्यत्वेन — झ; शब्दबोधितावगम्यत्वेन — ञ.
[2] प्रत्यक्षाबाधित — झ.
[3] जन्यानुमितेरपि — झ, ञ.
[4] यद्यप्यारोपे न सिंहत्व — झ, ञ.
[5] माणवकादिरित्यर्थः।
[6] गुणस्य प्रतीतिः — च, छ.
[7] 'शब्दारोपित' इति नास्ति — ट.
[8] तत्त्वज्ञस्येति — झ, ञ.
[9] 'बहुषु' इति नास्ति — ट.
[10] महाभाष्यम् पस्पशायां सिद्धे शब्दार्थसंबन्ध इत्यत्र।
[11] न्यायविषयः — झ, ञ.
[12] संपद्यन्त इति — ट.
[13] साधने चोदितौ — ट.
[14] मुख्यार्थयोरेव — झ.
[15] पा. सू. ७. १. ९०.
[16] पा. सू. ६. १. ९३.
[17] पा. सू. ७. १. ९०.
[18] इत्यनुपपन्नमेवेत्यत आह — झ, ञ.
[19] न चाप्रतीतेऽर्थे — ञ, ट.

भावे [1]गौणस्य बुद्धिसंनिधानाभाव इत्यर्थः। [2]पदव्यतिरिक्तस्य कार्यित्वेनाश्रयणं च [3]शब्दाश्रयत्वम्। ननु मा भूत् पदान्तरसंनिधाननिरपेक्षत्वात् [4]प्रथमायाः पदान्तरसंनिधानकृतगौणत्वस्याप्रतीतेर्गौण-मुख्यन्यायाप्रवृत्तौ गौरित्यत्र वृद्धयभावः, गामित्यत्रात्वं [5]तु न स्यात्। तद्धयम्शसोः, तौ च कर्मणि, तच्चेप्सिततमं कारकम्, जात्यादिविशिष्टश्च वाहीक इहेप्सिततमं कारकमिति क्रियान्वयात् पूर्वमेव गोवाहीकशब्दार्थयोर्विशेषणविशेष्यभावः। पश्चात् क्रियान्वयाद्विशिष्टस्य कर्मत्वेऽपि द्वितीया समुदायस्याप्रातिपदिकत्वात् तदभिधानाय भवन्ती प्रत्येकं विशेषणविशेष्यवाचिभ्यां प्रवर्तते। तथा च गोशब्दस्य पूर्वमेव वाहीकशब्दान्वये तदर्थस्य गौणत्वं प्रतीतमिति गौणमुख्यन्यायेन 'गां वाहीकम्' इत्यात्वं न स्यादित्यत आह —**तत्रेति**। द्वितीयाश्रुत्या प्रतिपादित इत्यर्थः। **वाक्यीयो न्यायः** सामानाधिकरण्यम्। **पश्चादिति**। श्रुतेर्वाक्याच्छीघ्रप्रवृत्तत्वादिति भावः। **विभक्ताविति**। विशेषणविशेष्यभावापत्तेः पूर्वमेवेति शेषः। अयमभिप्रायः — द्वितीया हि कारके विधीयमाना स्वोत्पत्तये क्रियान्वयमेव पूर्वमपेक्षते, न वाहीकान्वयम्। न च विशिष्टस्य कर्मत्वम्। किं तु [6]कर्मणोर्विशेषणविशेष्यभावः। उक्तं हि [7]'कटोऽपि कर्म, भीष्मादयोऽपि' इति। तत्र यथा भीष्मं कटं करोतीत्यत्रान्योन्यनिरपेक्षाभ्यां कटभीष्मशब्दाभ्यां पूर्वमेव द्वितीया, पश्चात् [8]'कर्मणोर्विशेषण-विशेष्यभावः, एवमिहापीति न वाहीकान्वयकृतं गौणत्वं पूर्वं गोशब्दार्थस्येति गौणमुख्यन्यायाप्रवर्तनादात्वे सति पश्चाच्छब्दान्तरसंनिधानाद् गौणत्वप्रतीतिर्बहिरङ्गा नान्तरङ्गकार्य[9]निवर्तनक्षमेति। **पदकार्येष्वेवेति**। गोऽभवदित्यत्र च प्रगृह्यसंज्ञा पदकार्यम्। तथाहि — निपातत्वे प्रगृह्यसंज्ञा, निपातत्वं च च्व्यन्तत्वे, च्विश्च समर्थादभूततद्भावे कृभ्वस्तियोगे विधीयमानः प्रकृतौ वर्तमानाद्विकृतिवाचकात् सुबन्ताद्विधीयते। तथाच प्रतीतं गोशब्दार्थस्य गौणत्वमिति गौणमुख्यन्यायान्न गोशब्दस्य च्व्यन्तस्य प्रगृह्यसंज्ञेत्यर्थः॥

[१, २३१–२३३]

(**उद्द्योतनम्**) नन्वव्युत्पन्नत्वाद् गोशब्दस्य तदोकारस्य न प्रतिपदोक्तत्वम्, अत आह — **ओकारस्येति**। व्युत्पत्ति[10]पक्षाश्रयणादयं दोष इति भावः। लक्षणेन प्रतिपाद्यत्वरूपलाक्षणिकत्वमस्यापि, अत आह — **यस्य हीति**। **गुणादागत इति**। [11]'तत आगतः' इत्यण्। वाहीकस्य गौणत्वमुपपादयति — **ययेति**। विहितकर्मभ्यो बहिर्भूतो बाहीकः। [12]'बहिषष्टिलोपः' [13]इतीकक्ठिलोपौ। वबयोरभेदाद् वाहीक इत्यप्युच्यते। शब्दस्यापि गुणादारोपितार्थे आगतत्वाद् गौणत्वं ज्ञेयम्। **मुखमिवेति**। [14]'इवे प्रतिकृतौ' इत्यतः 'इवे' इत्यनुवृत्तेरिवार्थे [15]'शाखादिभ्यो यः' इति यप्रत्ययः। यथाङ्गेषु मुखस्य प्राधान्यं तथा शब्दान्तरनिरपेक्षतया प्रतीयमानत्वमर्थस्य प्राधान्यम्। शब्दस्यापि

---

[1] गौणस्याबुद्धिसंनिधानादित्यर्थः — झ.
[2] पदव्यपदेशव्यतिरिक्तस्य — झ, ञ.
[3] शब्दाश्रयम् — झ, ञ.
[4] प्रथमायां — ञ.
[5] तुशब्दो नास्ति — च, छ, ट.
[6] कर्मणो विशेषण — च, छ.
[7] महाभाष्यम् २. ३. १.
[8] कर्मणो विशेषण — च, छ, ट.
[9] निवर्तिका। पद — ट.
[10] पक्षाश्रयणेनायं — अ; पक्षाश्रयेणायं — आ, इ, ऊ, ॠ.
[11] पा. सू. ४. ३. ७४.
[12] का. वा. ४. १. ८५—४.
[13] बहिषष्टिलोपो यञ्च, ईकक् चेति वार्तिकाभ्यामित्यर्थः।
[14] पा. सू. ५. ३. ९६.
[15] पा. सू. ५. ३. १०३.

स्वशक्तिविषयतादृशार्थप्रतिपादकत्वेन मुख्यत्वम्। ननु शब्दानुशासनेऽस्मिन् [1]अर्थगतो विशेषोऽनुपयुक्तः, अत आह — **तत्रेति**। **प्राथम्यात्** गौणलाक्षणिकार्थापेक्षया [2]पूर्वप्रतीतत्वादित्यर्थः। गौणान्मुख्यस्य प्रथमोपस्थितिमेवाह — [3]**गौणे ह्यर्थ इति**। **मुख्यार्थारोपेणेति**। यद्यपि सादृश्यविवक्षया 'सिंहो देवदत्तः' इति प्रयुज्यते, [4]श्रोतापि सिंहसदृशो देवदत्त इति प्रतिपद्यते, तथापि वाक्यश्रवणसमनन्तरमेव सिंहत्वप्रतीतिर्देवदत्ते [5]आहार्यारोपरूपा जायते। [6]तदप्रतीतावनुपपत्त्यभावेन सादृश्यतात्पर्य[7]ग्रहस्याप्यसंभवात्। तथाच मुख्यार्थारोपावश्यकत्वे [8]तत एव तात्पर्यग्रहसहकारेण सादृश्य[9]प्रतीत्युपपत्तौ न तत्र लक्षणा कल्प्या। न च वृत्त्यनुपस्थापितस्य शाब्दबोधाविषयत्वम्, [10]शक्यार्थसंबन्धिगुणयोगस्य [11]शक्तिभिन्नस्यापि [12]शाब्दबोधविषयत्वनियामकतया वृत्तित्दस्य पारिभाषिकतयारोपितमुख्यार्थात् [13]प्रतीतत्वस्यापि शाब्दबोधविषयत्वनियामकत्वकल्पने विरोधाभावात्। नानार्थकस्थलेऽनेकेषां वृत्त्युपस्थापितत्वेऽपि शब्दतात्पर्यविषयस्यैव शाब्दबोधविषयत्वस्य वक्तव्यत्वेन अवृत्तिविषयस्यापि तात्पर्यविषयस्य शाब्दधीविषयत्वसंभवाच्च सादृश्य[14]प्रतीत्यर्थतयैव मुख्यार्थारोपेण शब्दप्रयोगात्। अत एव वक्तुरप्याहार्यारोपपूर्वक एव 'सिंहो देवदत्तः' इत्यादिप्रयोगः। एवं च शक्त्यतिरिक्ता वृत्तिर्नास्ति, आरोपितार्थे शक्तेरेव सत्त्वात्। सादृश्यादेर्वृत्ति [15]विनैव भानाङ्गीकारात्। तस्मादारोपितार्थवृत्तित्वमेव गौणत्वम्। यद्यपीदं लाक्षणिकसाधारणं 'मञ्चाः क्रोशन्ति' इत्यादौ क्रोशनकर्तरि मञ्चत्वारोपात्, तथापि गुणाद्यत्रारोपः स गौणः, अभिधेयसंबन्धाद्यत्रारोपः स लाक्षणिक इति भेदो ज्ञेय इति [16]तात्पर्यसंग्रहः॥

गौणार्थापेक्षया मुख्यस्य प्रथमप्रतीत्या ग्राह्यत्वमुक्त्वा गौणस्यानियतत्वादपि नियतो मुख्यार्थ एव ग्राह्य इत्याह — **अनियतश्चेति**। सिंहशब्दस्य देवदत्तवृषभादिषु सादृश्यस्य नानात्वेनानियतत्वमित्यर्थः। 'गौणमुख्ययोः' इत्येतन्न वाचनिकमित्याह — **तस्मादिति**। **गोत्वमारोपितम्** अगवीत्यादिः। ननु प्रकृतिविकृतिभावविषयश्च्वप्रत्ययः, तत्रागौः प्रकृतिः, गौश्च विकृतिः, तत्र गोऽभवदित्यत्र विकृतेर्गोरिव कर्तृत्वादगवि न गोत्वारोपोपयोगः, अत आह — **गोऽभवदिति**। **वृत्तौ** तद्धितवृत्तौ। **प्रकृतेः** अगोः। **संघीति**। [17]असंघो ब्राह्मणाः संघः संपद्यत इति विग्रहः। अजस्य च गोश्च यागद्वयसाधनत्वेन विहितस्य मुख्यस्यैव पशोर्ग्रहणं न वाहीकस्येति 'तद्यथा' इति भाष्य-

---

[1] अर्थे गतः — म, आ, ऋ.
[2] पूर्वप्रतीतिकत्वादित्यर्थः — आ, ऋ.
[3] गौणेऽप्यर्थ इति — अ, आ, इ, ऊ, ऋ.
[4] श्रोत्रापि — अ.
[5] आहार्यारोपमात्रा जायते — अ.
[6] तथाप्रतीतावनुप — म, उ.
[7] ग्रहणस्याप्यसंभवात् — म, आ, उ.
[8] अत एव — म, आ, उ, ऋ.
[9] प्रतीत्युपपत्तेः — ऋ.
[10] तस्य शक्यार्थ — ऊ.
[11] शक्यभिन्नस्यापि — उ.
[12] 'शाब्दबोध' इत्यादि 'मुख्यार्थप्रतीतत्वस्यापि' इत्यन्तं नास्ति — ऊ.
[13] प्रतीतस्यापि — अ, आ.
[14] प्रतीत्यर्थमेव — म, उ.
[15] विनापि — अ, आ, ऋ.
[16] संबन्धसंग्रहः — इ, ऊ.
[17] असंघा ब्राह्मणाः — म, आ, इ. संघशब्दस्य समूहवाचित्वेनैकवचनान्तत्वात् तेन सह नञ्तत्पुरुषे 'असंघः' इत्येव ब्राह्मणा इत्यस्य विशेष्यत्वेऽपि युक्तम्। वाक्ये 'कुण्डले भवतः' इति भाष्यप्रयोगेण विकृतेः कर्तृत्वदर्शनादत्रापि संघीभवन्तीत्यस्य विग्रहवाक्ये 'संघः संपद्यते' इत्येकवचनान्तप्रयोगः सम्यगेव। वृत्तौ प्रकृतेः कर्तृत्वोक्त्या ब्राह्मणानां कर्तृभूतानां बहुत्वात् 'संघीभवन्ति' इति बहुवचनान्तत्वम्। आन्महत इति सूत्रे उद्द्योते 'असंघो ब्राह्मणाः संघः संपद्यते' इति प्रदर्श्य तत्र विकृतेः कर्तृत्वं च प्रकाशयति।

स्यार्थः। ननु [1]'स्वं रूपम्' इति रूपग्रहणेनार्थवद्ग्रहणस्योक्तत्वात् कथमर्थानाश्रयणम्। न च वृद्धचात्वयोर्वर्णाश्रयत्वान्नार्थवद्ग्रहणमिति वाच्यम्, [2]'गोतो णित्' [3]इति शब्दोपादानात्। [4]'औतोऽम्शसोः' इत्यत्राप्यम्शस्भ्यां प्रतीतप्रातिपदिकस्य 'ओतः' इति विशेषणेनौदन्तप्रातिपदिकस्यैव ग्रहणात्, अत आह — [5]**स्वार्थ इति**। 'शब्दाश्रये च' इत्यनेनार्थानपेक्षा नोक्ता, किंतु विभक्तिविधौ गौणमुख्यन्यायाप्रवृत्तिः, [6]गौणमुख्यत्वप्रतीतेः पदान्तरसंबन्धानन्तरभावित्वेन पदसंस्कारकालेऽभावादिति समुदायार्थः। **मुख्यव्यपदेशः** [7]मुख्यत्वप्रतीतिः, विभक्त्युत्पत्तिकाल इत्यादिः। **गौणाभावे** गौणप्रतीत्यभावे। 'गौस्तिष्ठति, गामानय' इत्यत्रापि प्रकरणादिना गौणार्थज्ञानस्य पश्चाद्भावित्वाद्विभक्तिकाले गौणमुख्यन्यायाप्रवृत्तिर्ज्ञेया। ननु 'गां वाहीकमानय' इत्यत्र गोशब्दप्रतिपाद्यमान्द्यादिविशिष्टस्य[8] वाहीकस्य कर्मत्वाद् द्वितीयोत्पत्तिकाले गौणत्वप्रतीतेः 'गाम्' इति द्वितीया न स्यात्, अत आह — **तत्रेति**। [9]अरुणाधिकरणन्यायेनेहापि [10]'कटं करोति भीष्मम्' इत्यादिभाष्यानुरोधेन च कारकाणां क्रियान्वय एव [11]प्रथमम्, पश्चात् परस्पराकाङ्क्षया कारकाणामेव विशेषणविशेष्यभावेनान्वय इति विभक्तिकाले न गौणत्वप्रतीतिरित्यर्थः। **प्रादुर्भावः** ज्ञानम्। **पदकार्येष्वेवेति**। प्रकृतौ वर्तमानाद्विकृतिवाचकात् सुबन्ताच्च्विर्विधीयते। च्व्यन्तस्य च निपातत्वेन प्रगृह्यत्वमिति प्रगृह्यसंज्ञायाः पदकार्यत्वात् गोऽभवदित्यादौ गौणमुख्यन्यायः प्रवर्तत एवेति भावः। **उक्तमिति**। भाष्ये शब्दपदं प्रातिपदिकपरमित्यर्थः॥

[१, २३१–२३३]

(**रत्नप्रकाशः**) गोऽभवदिति। उणादीनामव्युत्पन्नत्वात् [12]'गोपयसोर्यत्' इत्यादौ प्रतिपदोक्तो द्रव्याण्यनूद्य प्रातिपदिकेन गुणो विधीयते 'यानि ज्योतिष्टोमे साधनानि तानि सर्वाण्यरुणानि कर्तव्यानि' इति पूर्वपक्षे, सिद्धान्तः— गुणस्यामूर्तत्वेऽपि स्ववाक्यश्रुते एकहायनीशब्दप्रतीते द्रव्ये साधनभूतेऽवच्छेदकत्वं हायनाक्षिवत् संभवति। तद्द्वारा क्रयेणान्वयो भवति। एवं सति वाक्यभेदोऽपि नास्ति। गुणस्यैव तृतीयाश्रुत्या साधनत्वश्रवणेऽपि तस्य च द्रव्यद्वारकत्वमन्तरानुपपत्त्या द्रव्यावच्छेदकत्वं कल्प्यते। ग्रहचमसादिद्रव्यावच्छेदे श्रूयमाणक्रयसाधनत्वासिद्धेश्च। तस्मात् क्रयेण साक्षादन्वितयोरेकहायनीद्रव्यगुणयोः पश्चादर्थापत्त्या परस्परावच्छेदकत्वेनान्वयः। तथा सति 'आरुण्यविशिष्टैकहायन्या क्रीणाति' इत्यर्थः पर्यवस्यति, इति। सोऽत्रानुसंधेयः।

---

[1] पा. सू. १. १. ६८.
[2] पा. सू. ७. १. ९०.
[3] इति गोशब्दोपादानादित्यर्थः॥ इति णिच्छब्दोपादानात् — म, आ, उ, ऋ.
[4] पा. सू. ६. १. ९३.
[5] 'स्वार्थेति' इत्येव प्रतीकः — अ, म, आ, इ, उ, ऊ, ऋ. कोशेषु दृश्यते.
[6] गौणमुख्यप्रतीतेः — अ, म, उ, ऋ.
[7] मुख्यप्रतीतिः — अ.
[8] विशिष्टवाहीकस्य — म, उ.
[9] मीमांसा. ३. १. ६. अधिकरणे विचारः— ज्योतिष्टोमे 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति श्रूयते। तत्रारुण्यस्यामूर्तत्वात् तृतीयाश्रुतिप्रतीतक्रयसाधनत्वं न संभवति। ततश्च तृतीयाश्रुतेर्विनियोजकत्वाभावेन प्रकरणाद् ग्रहचमसादिद्रव्येष्वारुण्यं विनियुज्यते। तथा च 'अरुणया' इति तृतीयाश्रुत्या साधनभूतानि प्राकरणिकानि
[10] महाभाष्यम् २. ३. १.
[11] प्रथमः — म.
[12] पा. सू. ४. ३. १६०.

गोशब्द ओकारान्त इति भावः। एतेन "ओकारस्यात्र प्रतिपदोक्तत्वमस्ति, [1]'गमेर्डोः' इति साक्षादुच्चारणात्। यस्य हि साक्षादुच्चारणं नास्ति [2]'आद् गुणः' इत्यादिसामान्यलक्षणेन यद्रूपं निष्पाद्यते तल्लाक्षणिकमुच्यते" इति निरस्तम्। ओकारांश एव लाक्षणिकत्वमुक्तं न त्वोकारान्तांश इत्यत्र मानाभावात्। ओकारान्तांशे तूभयत्र लक्षणवशसंपन्नत्वाविशेषेण लाक्षणिकत्वादयुक्तमेवेदं स्यात्। न हि सामान्यलक्षणेन यद्रूपं निष्पाद्यते तदेव लाक्षणिकं न तु लक्षणेन संपन्नस्वरूपं लाक्षणिकमित्यत्र किंचिन्नियामकमस्ति। **गौणमुख्ययोरिति**। गोशब्दोऽत्र गौणार्थको भवतीत्येतावन्मात्रेणोभयत्र[3] लौकिकन्याय आश्रितः, न तु वार्तिकं विनानेनैव न्यायेनातिव्याप्तिर्वार्यत इति। प्रगृह्यसंज्ञाया अपि वृद्धचात्वसमकक्षत्वेनानेन न्यायेन वारणासंभवात्। न हि निपातसंज्ञायामर्थं आश्रितः, वृद्धचात्वयोस्तु स नाश्रित इति युक्तिमत्। किं च गौणत्वमात्रेणात्र प्रगृह्यसंज्ञा चेन्न स्यात् तर्हि निपाताव्ययसंज्ञे अपि न स्याताम्। तस्माद्वार्तिकेनैवात्र वारणम्, न तु प्रकृतन्यायेन। प्रयोजनं त्वस्य न्यायस्य माणवकादिलक्षकाग्न्यादिशब्देभ्यो ढगादिवारणम्। 'अग्निः' इति कस्यचित् तेजस्वित्वादिशून्यस्य संज्ञा चेत् तत्र [4]प्रसिद्धाप्रसिद्धन्यायेन ढगादिवारणम्। प्रसिद्धमुख्ययोरप्रसिद्धगौणयोश्च पर्यायत्वाभावेनैकया परिभाषया अपरस्या गतार्थता न। एतेन प्रसिद्धाप्रसिद्धपरिभाषया गतार्थतां वदन् [5]कौस्तुभकृन्निरस्तः। [6]'युष्मद्युपपदे' [7]'अस्मद्युत्तमः' इत्यादौ युष्मदस्मदादेशो न भवति, 'अतित्वम्' 'अत्यहम्' इत्यादौ भवतीति वैषम्यस्य दुरुपपादत्वात्। अस्मन्मते तु "युष्मद्युपपदे' इत्यादौ प्रसिद्धाप्रसिद्धपरिभाषयादेशवारणं भवति। 'अतित्वम्' इत्यादौ प्रसिद्धशब्दमात्राश्रये परिभाषाद्वयस्य तस्याप्रवर्तनादादेशा भवन्तीति सर्वमनवद्यम्। यत्तु तेनैवोक्तम्[8]—पूर्वसूत्र इवात्रापि प्रतिपदपठितानामेव प्रगृह्यसंज्ञा, इति। तन्न, अत्र 'ओतश्चिच्वप्रतिषेधः' इति वदता वार्तिककृता पूर्वसूत्रे च्व्यन्तस्य प्रगृह्यत्वं भवतीति सूचनात्। एतेन [10]"स्वं रूपम्' इत्यत्र रूपग्रहणेनार्थपरिग्रहस्य ज्ञापितत्वादर्थवतः कार्येण भवितव्यम्। स चार्थः प्राथम्यान्मुख्य एव गृह्यते। गौणे ह्यर्थे शब्दः प्रवर्तमानो मुख्यार्थारोपेणैव प्रवर्तते। अनियतश्च गौणोऽर्थः। तस्माल्लौकिकोऽयं न्यायो गौणमुख्ययोरिति' इति निरस्तम्। प्रकृतसूत्रेऽर्थवतः कस्यापि शब्दस्य ग्रहणाभावेन [11]'स्वं रूपम्' इत्यादेरसंबद्धप्रलापत्वात्। न हि निपातशब्द ओच्छब्दो वा 'स्वं रूप'सूत्रविषयः, तस्य शब्दशास्त्रे कृता या संज्ञा [12]तदात्मकत्वात्। **शब्दाश्रये च वृद्धचात्वे इति**। ननु [13]'गोतो णित्' इत्यत्र [14]"ओतो णिदिति वाच्यम्' इत्युक्तत्वात् [15]'औतोऽम्शसोः' इत्यत्रैव वर्णग्रहणेऽर्थवद्ग्रहणपरिभाषाया अप्रवृत्तत्वेन शब्दमात्राश्रये वृद्धचात्वे इति तयोर्गौणेऽपि प्रवृत्तिरस्तु। [16]'जराया जरसन्यतरस्याम्' इत्यादौ जराशब्दप्रभृतीनामर्थवतामेव ग्रहणात् 'स्त्रियो जरसः' इत्यादौ गौणे जरसा-

---

[1] उणादिसूत्रम् २३५.
[2] पा. सू. ६. १. ८७.
[3] दृष्टान्ते दार्ष्टान्तिके चेत्यर्थः।
[4] प्रसिद्धाप्रसिद्धयोः प्रसिद्धे कार्यं भवतीति विवक्षितम्।
[5] श. कौ. पृष्ठम् १३५.
[6] पा. सू. १. ४. १०५.
[7] पा. सू. १. ४. १०७.
[8] पा. सू. १. ४. १०५.
[9] श. कौ. पृष्ठम् १३६.
[10] पा. सू. १. १. ६८.
[11] पा. सू. १. १. ६८.
[12] इदं सर्वमनूद्यात्रैव सूत्रे छायायां दूषितम्।
[13] पा. सू. ७. १. ९०.
[14] गोत इति तपरकरणलब्धमिदम्, न तु वार्तिकम्, अपठितत्वात्। यद्वा, वृत्तौ 'ओतो णिदिति केचित्पठन्ति'इत्युक्तत्वात् तदभिप्रायकं बोध्यम्।
[15] पा. सू. ६. १. ९३.
[16] पा. सू. ७. २. १०१.

देशादिकं कथं स्यादिति चेन्न, गौणार्थकत्वेऽप्यर्थवत्त्वसत्त्वेन तत्प्रवृत्तौ बाधकाभावात्। न चैवम् [1]'अग्नेर्ढक्' इत्यादौ तद्धितोऽपि गौणार्थात् स्यादिति चेन्न, एकस्यार्थस्यार्थान्तरसंबन्धमाश्रित्य तद्धितानां प्रवर्तनीयत्वेन तत्र गौणमुख्यन्यायेन ढगादिवारणात्। एवम् [2]'अग्नेः स्तुत्स्तोमसोमाः' [3]'मातृपितृभ्यां स्वसा' इत्यादौ चार्थद्वयसंबन्धाश्रयप्रवृत्तसमासाश्रये षत्वे तन्न्यायप्रवर्तनात् 'अग्निसोमौ' 'मातृस्वसा' इत्यादौ षत्वादिवारणं भवति। एतेन 'स्वार्थे [4]प्रवृत्तात् प्रातिपदिकाद् विभक्तावुत्पन्नायां कार्येषु कृतेषु शब्दान्तरसंनिधानाद् गौणत्वं प्रतीयते। तस्य च स्वार्थस्य मुख्यव्यपदेशो नास्ति, गौणापेक्षया संबन्धिशब्दत्वान्मुख्यव्यपदेशस्य गौणाभावेऽभावेन 'शब्दाश्रये च' इत्युक्तम्। न त्वर्थो नापेक्ष्यते। तत्र यथा श्वेतं छागमालभेतेति गुणद्रव्ययोः श्रौतः क्रियासंबन्धः, वाक्यीयात्तु न्यायात् [पश्चात् परस्परेण। एवं गां वाहीकमानयेति पूर्वं क्रियाभिसंबन्धापेक्षया विभक्तावुत्पन्नायां वाक्यीयात्तु न्यायात् सामानाधिकरण्याद्] गौणार्थप्रादुर्भावो भवतीति पदकार्येष्वेवायं न्यायो न प्रातिपदिककार्येष्वित्युक्तं शब्दाश्रये चेति' इति निरस्तम्। विशेषणवाचकस्य विशेष्यसमानविभक्तिकतालाभाय प्रातिपदिके लक्षणामङ्गीकृत्य लक्ष्यार्थपरादेव विभक्तेः प्रवर्तयितुमुचितत्वात्। एकस्मिन् प्रयोगे गौणमुख्योभयपरताया असंभवेन गौणसंभवमात्रेणैव सर्वत्र शक्यार्थे मुख्यव्यपदेशसंभवात्। [5]'गोतो णित्' इत्यत्रापि [6]'औतोऽम्शसोः' इत्यत्रेव ओकारमात्रस्यैव ग्रहणेनार्थस्यानपेक्षणादेव भाष्यकृता 'शब्दाश्रये' इत्युक्तत्वात्। वैयाकरणानां वाक्य एव विशिष्टार्थे शक्तिमङ्गीकुर्वतां जैमिनितन्त्रप्रसिद्धवाक्यीयन्यायाश्रयणानौचित्याच्च॥

[१, २३१–२३३]

(**नारायणीयम्**) **गुणादिति**। [7]'तत आगतः' इत्यण्। **मुखमिवेति**। [8]'शाखादिभ्यो यः' इति यः। नन्वर्थस्य कार्यनिमित्तत्वे गौणग्रहणं मुख्यग्रहणं चेति वर्ण्यताम्, तदेव [9]'स्वं रूपम्' इति वचनान्नास्तीत्यत आह — **तत्रेति**। **प्राथम्यात्** प्रथमोपस्थितत्वात्। परस्परव्यभिचरितार्थद्वयसत्त्वे एकस्य प्रथमं बुद्धावालेखनमित्येतत् कुत इत्याशङ्क्याह — **अनियतश्चेति**। यथा हि गोत्ववान् नियतः सास्नादिमान्, न तथा गोत्वसमानाधिकरणजाड्यादिमान् नियतः, जाड्यादेः सर्वत्र संभावितत्वात्। **तस्मादिति**। उक्तहेतुभ्यां मुख्यग्रहणस्य न्याय्यत्वात्। ननु वाहीकादावपि गोत्वनिमित्तकतया प्रयोगश्चेद् गौणमुख्यविवेकः कुतः, अत आह — **गोऽभवदिति**। ननु प्रकृतिविकृत्योरभेदविवक्षायां च्विप्रत्ययः, स च विकृतिवाचकात्, विकृतौ च गोत्वं मुख्यम्, अत आह — —**गोऽभवदिति**। रूपग्रहणाज्ज्ञापकात् सर्वत्रार्थापेक्षेति शब्दमात्राश्रयत्वेन वृद्ध्यात्वयोर्न्यायानवतारोक्तिः[10] कथम्, अत आह — **स्वार्थ इति**। अर्थानपेक्षत्वं शब्दाश्रयत्वं न भवति, किं त्वपरिस्फुरद्गौणत्वमुख्यत्वकार्यार्थापेक्षत्वं तत्। अर्थाश्रयत्वं च परिस्फुरद्गौणत्वमुख्यत्वकार्यार्थापेक्षत्वम्। ततश्च प्रातिपदिककार्येषु तदर्थापेक्षायां सत्यामपि तस्मिन् गौणत्वादिस्फूर्त्यभावान्न्यायानवतारः। पदार्थे तु पदान्तरसामानाधिकरण्याधीनगौणत्वादिस्फूर्तेः पदकार्येषु तदवतार इत्यर्थः।

---

[1] पा. सू. ४. २. ३३.
[2] पा. सू. ८. ३. ८२.
[3] पा. सू. ८. ३. ८४.
[4] 'वृत्तात्' इत्यस्यार्थानुवादोऽयम्'
[5] पा. सू. ७. १. ९०.
[6] पा. सू. ६. १. ९३.
[7] पा. सू. ४. ३. ७४.
[8] पा. सू. ५. ३. १०३.
[9] पा. सू. १. १. ६८.
[10] न्यायावतारोक्तिः — क.

ननु विभक्त्युत्पत्त्याद्यवस्थायां प्रातिपदिकार्थस्य गौणत्वस्फूर्त्यभावादौत्सर्गिकं मुख्यत्वमवसीयेत। तत् कथमुभयापरिस्फूर्तिलक्षणं शब्दाश्रयत्वमित्यत आह — **तस्य चेति**। ननु कर्मत्वादिकारकभावस्य क्रियाधीनत्वात् [तां] कथं निरपेक्ष्य प्रातिपदिकमात्राश्रयत्वेन विभक्तितन्निमित्तकार्येषु न्यायानवतार इत्याशङ्क्य क्रियापेक्षत्वेऽपि गौणत्वादिपरिस्फूर्तिनिमित्तापेक्षा नेत्याह — **तत्रेति**। क्रियापेक्षत्वाङ्गीकारे गौणत्वादिस्फूर्तिनिमित्तपदान्तरसामानाधिकरण्यमावश्यकम्, जाड्यादिविशिष्टवाहीकानयनविधौ तात्पर्यादित्याशङ्कारुणाधिकरणन्यायकीर्तनेन निरस्ता। **पदेति**। पदार्थगौणत्वादिसत्त्वात्। प्रकृते च गौणत्वप्रतीत्युत्तरकालं च्विप्रत्यये सति निपातत्वात् संज्ञाप्राप्तिरिति न्यायप्रवृत्तिरुचिता॥

उञः, ऊँ. १. १. १७–१८.

[१, २३३–२३५]

(**लघुविवरणम्**) ननु 'उञः' इति योगविभागोऽनर्थकः, एकस्मिन्नपि योगे रूपत्रयस्य सिद्धत्वात्। तथा हि — इह 'शाकल्यस्येतावनार्षे' इति वर्तते, प्रगृह्यमिति च। तत्रादेशस्य प्रगृह्यसंज्ञा स्थानिवद्भावेन सिद्धेत्युञ एव विकल्पेन विधास्यते, आदेशश्च विकल्पेनेति सिद्धमिष्टमित्याह — **इहेति**। प्रगृह्यमित्यनुवर्तमानमपि [1]'तस्मिन्निति निर्दिष्टे' इति परिभाषया षष्ठ्यन्ततया विपरिणम्येत। तथा च प्रगृह्यस्योञ ऊँ इत्ययमादेशो विकल्प्येत। प्रगृह्यसंज्ञा तु [2]पूर्वसूत्रेण नित्यैव स्यात्। न च प्रगृह्य[3]ग्रहणानुवर्तनसामर्थ्यात् सापि विकल्पेन विधीयत इति युक्तम्, उत्तरार्थमनुवर्तमानस्येह नान्तरीयकतयानुवृत्तिसंभवात् स्वरूपपदार्थकान्निपातोऽव्यावर्तनाय स्थानिविशेषणत्वसंभवाच्चेति भावः। [4]**फलरूपतयेति**। सामानधिकरण्येन संज्ञिबोधकतयेत्यर्थः॥

[१, २३३–२३५]

(**विवरणम्**) **संज्ञासिद्धिः** [5]"निपात एकाजनाङ' इत्यनेन। 'यद्युञेकादेशः' इति भाष्यं [6]'सामान्येन ज्ञापकत्वे। यदि तु प्रगृह्यसंज्ञायां [7]'ज्ञापकमित्युच्यते तदायं न स्याद्दोषः। किं तु वत्वाभावे प्रगृह्यत्वाभावात् प्रकृतिभावो न स्यात्। वत्वविकल्पस्तु हलः परे उञि सावकाशः 'किम्वस्य रुजति' इत्यादौ। **नित्यैवेति**। आदेशाभावपक्ष इत्यर्थः। **तदर्थमिति**। वितीति सिद्ध्यर्थमित्यर्थः। **तदा प्रगृह्यस्येति**। प्रगृह्यमित्यनुवर्तमानमादेशविधानसामर्थ्यादेव न तस्य संहिताकार्यप्रसक्तिरिति प्रयोजनाभावान्नादेशेन संबध्यते। किंतु षष्ठ्यन्ततया विपरिणतं सत् स्थानिना संबध्यत इति भावः। [8]'वाग्रहणमपूर्वं कर्तव्यत्वेनाभिमतमिति भ्रमं व्युदस्यति — [9]**शाकल्यश्रुतेरेवेति**। **प्रगृह्य-**

---

[1] पा. सू. १. १. ६६.
[2] निपात एकाजित्यनेनेत्यर्थः॥ पूर्वेण — ङ, ढ.
[3] ग्रहणानुवृत्तिसामर्थ्यात् — ण, त.
[4] प्रदीपे 'फलस्वरूपतया' इत्यत्र 'फलरूपतया' प्रति निर्णयसागरचौखाम्बामुद्रितयोः पाठः।
[5] पा. सू. १. १. १४.
[6] सामान्येनाज्ञापकत्वे — च, छ.
[7] ज्ञापकमित्युच्येत — ट.
[8] वाग्रहणं पूर्वं — च, छ, ट.
[9] प्रदीपे 'शाकल्यस्य श्रुतेरेव' इत्यत्र 'शाकल्यश्रुतेरेव' इति निर्णयसागरीये पाठः। सोऽत्र स्वीकृतः।

संज्ञा उञ्ञ इति शेषः। ननु प्रगृह्यशब्दस्यानुवर्तमानस्यैव प्रथमान्तस्य सतः संज्ञिपरत्वात् कथं षष्ठ्यन्तेनोञ्ञ इत्यनेन संबन्ध इत्यत आह — [1]**तत्रेति**। [2]**फलरूपतयेति**। संज्ञिपरत्वेनेत्यर्थः। **स्वरूपपदार्थक इति**। [3]स्वरूपपर इत्यर्थः॥

[१, २३३–२३५]

(**उद्द्योतनम्**) भाष्ये **इहेति**। [4]"आहो' इत्यादौ ऊँ इत्यादेशः कस्मान्न भवतीत्यर्थः। तस्य तात्पर्यमाह — **निपातेति**। ज्ञापकत्वमुपपादयति — **एकादेशे हीति**। 'आह उ आहो' इत्यत्रौकारस्य उकारग्रहणेन ग्रहणात् [5]"निपात एकाच्' इत्येव [6]प्रगृह्यत्वसिद्धेः [7]"ओत्' इति व्यर्थं सत् 'उञ्ञ एकादेश उञ्ग्रहणेन न गृह्यते' इत्येतज्ज्ञापयतीत्यर्थः। सामान्येन ज्ञापकत्वमभिप्रेत्येदमुक्तम्। प्रगृह्यसंज्ञायां ज्ञापकत्वे 'आहो' इत्यादौ ऊँ आदेशः स्यादेवेति मन्तव्यम्। भाष्ये **तस्यैष इति**। 'आहो' 'उताहो' इत्यादाविति्यर्थः। योगविभागस्य प्रयोजनमाह — **इहेति**। आदेशाभावपक्षे प्रगृह्यसंज्ञाविकल्पसिद्धये योगविभाग इत्यर्थः। **नित्यैवेति**। आदेशाभावपक्ष इत्यादिः। **तदर्थं** 'विति' इति सिद्ध्यर्थम्। योगविभागे रूपत्रयसिद्धिप्रकारमाह — **उञ्ञ इत्यत्रेति**। **प्रगृह्यस्योञ्ञ इति**। प्रगृह्यमित्यनुवर्तमानमादेशेन न संबध्यते, विधानसामर्थ्यादेव प्रकृतिभावसिद्धेः संज्ञाप्रयोजनाभावात्। अतः षष्ठ्यन्तत्वेन विपरिणतं स्थानिना संबध्यत इत्यर्थः। यद्यपि 'ऊँ' इत्यत्र प्रगृह्यमिति नानुवर्तते, प्रयोजनाभावात्। प्रगृह्याप्रगृह्यसाधारण्येनादेशेऽप्यप्रगृह्यस्थानिके विधानसामर्थ्यादेव प्रकृतिभावसंभवात्। तथापि 'उञ्ञः' इत्यत्र संज्ञाविधानात् संज्ञ्युपस्थितेरुपलक्षणाभिप्रायेण वा 'प्रगृह्यस्य' इति विशेषणमिति ज्ञेयम्। वाकारस्याधिकस्य प्रक्षेपशङ्कां वारयति — [8]**शाकल्यश्रुतेरेवेति**। 'यथा स्यात्' इत्यत्र कर्तृ[9]विशेषमाह — **प्रगृह्येति**। उञ्ञ इत्यादिः। नन्वनुवर्तमानमपि प्रगृह्यपदं संज्ञिपरं स्यात्, षष्ठ्यन्तेन 'उञ्ञः' इत्यनेन सामानाधिकरण्याभावेन संज्ञात्वासंभवात्, अत आह — **तत्रेति**। [10]**फलरूपतया** संज्ञिविशेष[11]प्रतीतिफलकतया। **प्रदेशेषु** विधिषु। **षष्ठीति**। स्थान्यादेशसंबन्धासंभवात् [12]संज्ञासंज्ञित्वसंबन्धषष्ठीत्वस्यैव योगविभागफलसिद्धये निश्चितत्वादत्रापि संज्ञापरत्वमेवेति भावः॥

[१, २३३–२३५]

(**रत्नप्रकाशः**) **इह कस्मादिति**। 'आहो' इत्यादेः पूर्वसूत्रे निपातसमाहारतोक्तेति तदनुसारेण प्रश्नः। **यदयमोदिति**। एकादेशस्यादिवद्भावात् प्रगृह्यसंज्ञायाः सत्त्वाद्वा, उञ्संज्ञामा-

---

[1] 'तत्रेति' इति नास्ति — च, छ, ञ.
[2] प्रदीपे 'फलस्वरूपतया' इत्यत्र 'फलरूपतया' इति चौखाम्बानिर्णयसागरमुद्रितपाठः।
[3] स्वरूपं पदार्थ इत्यर्थः। — ज.
[4] अहो इत्यादौ — अ, इ, उ, ऊ.
[5] पा. सू. १. १. १४.
[6] प्रगृह्यत्वे सिद्धे — अ, आ, ऋ; प्रगृह्यसिद्धौ — इ, ऊ.
[7] पा. सू. १. १. १५.
[8] 'शाकल्यस्य श्रुतेरेव' इत्यत्र प्रदीपे 'शाकल्यश्रुतेरेव' इति निर्णयसागरीयपाठः।
[9] विशेषणमाह — अ.
[10] 'फलस्वरूपतया' इत्यत्र प्रदीपे 'फलरूपतया' इति चौखाम्बानिर्णयसागरमुद्रितपाठः।
[11] प्रतीतिकतया — अ; प्रतीतिफलतया — ऊ.
[12] संज्ञासंज्ञिसंबन्ध — अ; संज्ञासंज्ञित्वसंबन्धे — म, आ, उ, ऋ.

श्रित्यापि प्रगृह्यसंज्ञायाः कर्तुं शक्यत्वाद्वा [1]'ओत्' इति व्यर्थं सदुक्तार्थज्ञापकमिति भावः। **प्रतिषिद्धार्थोऽयमारम्भ इति**। तथा च तत्र चरितार्थत्वात् [2]'ओत्' इत्यस्योक्तज्ञापकता न युज्यत इति भावः। ननु 'ओ' इत्यस्यापि 'आहो' इत्यादिस्थलगतौकारवत् स्थानिवद्भावेनैव प्रगृह्यसंज्ञालाभाद् ओत्सूत्रं व्यर्थं सदुक्तार्थज्ञापकं भविष्यत्येवेत्यत आह — **दोषः खल्वपीति**। **जानू अस्येति**। ऊकारस्य स्थानिवत्त्वेन प्रगृह्यत्वात् प्रकृतिभावः। स्थानिवत्त्वेन तस्य निपातत्वे सति [3]'निपात एकाच्' इति प्रगृह्यसंज्ञायां सत्यां वा प्रकृतिभावः। **जान्वस्येति**। पूर्वस्मात् परस्य विधित्वेऽप्यत्र स्थानिवद्भावो नास्ति, [4]'पूर्वत्रासिद्धे न स्थानिवत्' इति निषेधात्। इदानीं वस्तुतत्त्वमाह — **एवं तर्हीति**। निपातसमाहारपक्षेऽपि 'आहो इति' इत्यादिप्रयोगं साधयितुं शक्ष्यामीत्याह — **अथवेति**। **तस्यैष इति**। तस्यैवैष इति शपथनिर्णेयतया 'एकनिपाताः' इति पक्ष एव युक्त इति तत्त्वम्। अविभक्तेन सूत्रेणादेशमात्रं विधेयमिति शाकल्यमते 'ऊँ इति' इति रूपम्, अन्येषां तु मते 'उ इति' इत्येवं रूपद्वयमेव सिध्यति, मतविरोधश्च भवति, तद्रूपद्वयस्य शाकल्यस्यैव मते साधुत्वात्, अन्येषां मते साधोः 'विति' इत्यस्यासिद्धेश्चेत्याशयेनाह —**उञ इति योगविभाग इति**। **उञः शाकल्यस्येति**। [5]"निपात एकाच्' इत्येव सिद्धेऽयं योगो नियमार्थः संपद्यते 'शाकल्यस्यैव मते उञः प्रगृह्यसंज्ञा, नान्येषाम्' इति। तेनान्येषां मते 'विति' इति भावः। तत्र 'उञः' इति षष्ठीनिर्देशसामर्थ्यात् प्रगृह्यसंज्ञेति वैयधिकरण्यम्, अन्यत्र संज्ञिनः प्रथमानिर्देशात् 'प्रगृह्यसंज्ञः' इति सामानाधिकरण्यं च ज्ञेयम्। **दीर्घोऽनुनासिक इति**। स्वरूपनिर्देशलब्धानुवादमात्रमेतत्। [6]**प्रगृह्यसंज्ञश्चेति**। स आदेश इति शेषः। तस्येयं संज्ञा विधेयैव, शाकल्यस्य मते उञः प्रगृह्यसंज्ञया सह ऊँ इत्यादेशस्य वैकल्पिकत्वेन प्रगृह्यसंज्ञाया अप्राप्तत्वात्। **ऊँ विभाषेति**। प्रगृह्यसंज्ञया सहेति शेषः॥

[१, २३३–२३५]

(**नारायणीयम्**) एकनिपाता इति प्रागभिधानात् प्रश्नानुपपत्तिमाशङ्क्याह — **निपातेति**। अधिककीर्तनायोपन्यास इति भावः। अत्र च निपातशब्देन सानुबन्धो विवक्षितः। कथं कृत्वा ज्ञापकम्, अत आह — **एकादेश इति**। [7]"निपात एकाच्' इति संज्ञासिद्धिरित्यर्थः। योगविभागस्य फलं वक्तुमभिमतं तावदाह — **इहेति**। नन्वेकयोगेऽपि रूपत्रयं सिध्यति, संज्ञादेशयोरुभयोरपि शाकल्यग्रहणानवृत्त्या विकल्पितत्वादित्याशङ्क्याह — **तच्चेति**। **नेति**। श्रुतान्वयेन निराकाङ्क्षस्य प्रकृतान्वयाभावात्। न च प्रगृह्यानुवृत्तिवैयर्थ्यम्, उत्तरार्थत्वादादेशान्वयाद्वा। 'इतौ परतः' इति भाष्येऽनुक्तेस्तदननुवृत्तिशङ्का स्यात्, तदर्थमाह — **अत्रेति**। आचार्यग्रहणस्य कथं विकल्पावगमकत्वम्, अत आह — **तत्रेति**। **संज्ञैवेति**। एवकारो भिन्नक्रमः, शाकल्यस्येत्यनन्तरं द्रष्टव्यः। स्मृत्यन्तर[8]शङ्कानिवर्तनार्थं शाकल्यविशेषणं स्ववचनवैफल्यपरिहाराय 'अन्येषां न' इति वाक्यमनुमापयति। द्वितीययोगे शाकल्यग्रहणानुवर्तनस्य भाष्योक्तस्य फलमाह —**ऊँ इत्यत्र चेति**। [9]**प्रगृ-**

---

[1] पा. सू. १. १. १५.
[2] पा. सू. १. १. १५.
[3] पा. सू. १. १. १४.
[4] का. वा. १. १. ५८–३.
[5] पा. सू. १.१. १४.
[6] 'प्रगृह्यसंज्ञकश्च' इति भाष्यस्थाने 'प्रगृह्यसंज्ञश्च' इति पाठः स्वीकृतः।
[7] पा. सू. १. १. १४.
[8] शङ्कावचनान्तरं शाकल्यविशेषणं — क.
[9] 'प्रगृह्यस्योञः' इति प्रदीपस्थाने 'प्रगृह्यस्य चोञः' इति पाठ इति भाति।

ह्यस्य चेति । प्रथमान्ततयानुवृत्तस्य षष्ठ्यन्ततया विपरिणाम इत्यर्थः। न च प्रथमान्तमेवादेशेन संबध्यतामिति वाच्यम्, योगविभागवैयर्थ्यात्। तथाहि — आदेशेन तस्य संबन्धे प्रगृह्याप्रग्रह्ययोरुभयोरप्यादेशेन भाव्यम्। तस्य च प्रगृह्यत्वे 'ऊँ इति' इत्येकमेव रूपं भवति। तच्चाविभागेऽपि शाकल्यनिवृत्त्या सिध्यति। अथेत्थं कल्प्यतां — प्रगृह्यस्य प्रगृह्य ऊँ नित्यं भवतीति। एवमपि विभागवैयर्थ्यं तदवस्थम्, अविभागेऽपि शाकल्यानुवृत्त्या 'उ इति, ऊँ इति' [1]इति च रूपद्वयसिद्धेष्टीकायामुक्तत्वात्। तस्माद्विभक्तिविपरिणाम एव न्याय्यः। भाष्ये 'दीर्घः' इति त्रिमात्रताभ्रमस्य व्युदासः, 'अनुनासिकः' इति ङकारत्वविभ्रमस्य, 'प्रगृह्यसंज्ञकश्च' इति अत्रापि प्रग्रह्यग्रहणस्याकाङ्क्षां दर्शयति, इतरथा प्रगृह्याप्रगृह्ययोरादेशविकल्पे [2]चात्रिरूपापत्तेः। प्रगृह्ये सति 'ऊँ इति' अप्रगृह्ये आदेशाभावे 'वि॑ति' इति निरनुनासिकवकारः, तद्भावे तु सानुनासिकः। ततस्तदवश्यापेक्ष्यम्। पौनरुक्त्यं परिहरति — [3]**शाकल्येति** । यदि तर्हि शाकल्यश्रुतेः फलप्रदर्शनं वाग्रहणेन वार्तिके, तर्हि तद्व्याख्यानभाष्येऽन्यतरोपादानेन भाव्यमित्यत आह — **एतदेवेति**। पदव्याख्यानमात्रं भाष्ये, अन्यत्त्वस्य मदुक्तमवगन्तव्यमित्यर्थः। ननु ऊँविकल्पस्याविभागेनापि सिद्धेर्विभागफलतया कीर्तनानुपपत्तिरित्यत आह — **प्रगृह्येति** । उभयविकल्पो विभागफलम् । अविभागे त्वादेशस्यैव विकल्पः स्यादित्युक्तमेव। ऊँग्रहणं तूपलक्षणमित्यर्थः। नन्वविभागकाले श्रुतसंबन्धेन निराकाङ्क्षत्वात् प्रगृह्यग्रहणेनासंबन्धश्चेद्विभागेऽप्ययोग्यत्वादसंबन्धापत्तिरिति शङ्कते — **तत्रेति**। **फलेति**। संज्ञाकरणस्य फलं संज्ञासंज्ञिसामानाधिकरण्यम्। फलभूतसामानाधिकरण्यनिर्देशानुपपत्त्या तद्धेतुभूतः [4]संज्ञासंज्ञिभावः कल्प्यते। **द्विवचनाद्यभिधेय इति**। तस्य च न षष्ठ्यन्तेनान्वयायोग्यत्वमित्यर्थः। परिहरति — **तथापीति**। शब्दाधिकार इति भावः। आदेशविधानार्थं तु सामानाधिकरण्यानिर्देशः॥

ईदूतौ च सप्तम्यर्थे. १. १. १९.

[१, २३५–२३८]

(**लघुविवरणम्**) [5]**सप्तम्यां वेति**। [6]'सुपां सुलुक्' इति सप्तम्या लुका निर्देशः कृत इत्यभिप्रेत्योक्तम्॥

[१, २३५–२३८]

(**विवरणम्**) [7]**सप्तमीसहचरितमिति** । ईकारोकारात्मिकायाः सप्तम्या असंभवादित्यर्थः। **सप्तम्यां वेति**। 'सप्तमी' इति लुप्तसप्तमीकमिति व्याख्यास्यत इति भावः। ननु सप्तमीति प्रत्ययग्रहणात् तदन्तविधौ लुप्तायामपि सप्तम्यां प्रत्ययलक्षणेन सप्तम्यन्तत्वात् स्यात् प्रगृह्यसंज्ञेत्यत आह — **संज्ञेति**। **लोपेऽपीति**। सप्तम्यर्थ[8]सद्भावादित्यर्थः। **सतीति**। यद्यपि सप्तम्येकवचने

---

[1] इति वा रूपद्वय — क.
[2] चात्र रूपापत्तेः — क.
[3] प्रदीपे 'शाकल्यस्य श्रुतेरेव' इत्यत्र 'शाकल्यश्रुतेरेव' इति निर्णयसागरमुद्रिते पाठः।
[4] संज्ञाभावः विकल्प्यते — क.
[5] सप्तम्यां चेति — ड, ढ, ण, त.
[6] पा. सू. ७. १. ३९.
[7] सप्तमीसहेति — ट.
[8] संभवादित्यर्थः — ञ.

सत्यसति वा पूर्वसवर्णे गौरीत्यत्र न विशेषः, तथापि 'मामकी तनू' इत्युकारान्ते विशेषः। पूर्वसवर्णश्च [1]'सुपां सुलुक्' इत्यनेन। **एकादेशमिति**। परत्वात् [2]'वार्णादाङ्गं बलीयः' इति वचनाच्चेति भावः। [3]निराकर्तुः संशयार्थो यदिशब्दोऽनुपपन्न इत्यत आह — **संभावनायामिति**। 'ज्ञापकं स्यात्' इति वार्तिकशेषस्यायमर्थः — **ज्ञापकं** प्रत्ययलक्षणाभावस्येति शेषः। किं प्रयोजनमित्यत आह — **तदन्तत्व इति**। संज्ञिनो द्विवचनान्तत्वेऽभिप्रेते प्रयोजनमित्यर्थः। तस्य तात्पर्यमाह — — [4]**ईदूदेदित्यत्रेति**। भाष्ये 'कुमार्यगारम्' इत्युपलक्षणम्, शुक्ल्यास्तामित्यपि द्रष्टव्यम्। अपरितोषात् परिहारान्तरमिति दर्शयितुमाह — **संज्ञेति**। **सप्तमीसहचरितमिति**। प्रत्ययलक्षणेनेति भावः। जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्थेत्यभिप्रेत्याह — **समासस्यैवेति**। समुदायशब्देन [5]प्रधानं विवक्षितमित्यभिप्रेत्याह — **वृत्ताविति**। जहत्स्वार्थातो विशेषमाह — **स्वार्थसंसृष्टस्येति**। [6]**स्वार्थविवेकेति**। पूर्वपदार्थविवेकेत्यर्थः। **तस्यैवेति**। अर्थग्रहणसामर्थ्यादित्यर्थः॥

[१. २३५–२३८]

(**उद्द्योतनम्**) ईकारोकारात्मकसप्तम्या अभावात् तयोः सप्तमी[7]सामानाधिकरण्यासंभवात् सामर्थ्यलभ्यमर्थमाह — **सप्तमीति**। **सप्तम्यां वेति**। 'सप्तमी' इति लुप्तसप्तमीकमिति व्याख्यास्यत इति भावः। **परतः** यदीदूदन्तमित्यनुषङ्गः। संज्ञाकाले [8]साहचर्यपरत्वसंपादनाय प्रत्ययलक्षणेनेत्युक्तम्। ननु सप्तमीति प्रत्ययग्रहणात् तदन्तविधौ लुप्तायामपि सप्तम्यां प्रत्ययलक्षणेन सप्तम्यन्ततया 'सप्तम्यन्तं यदीदूदन्तं तत् प्रगृह्यम्' इति स्यादेव [9]संज्ञार्थग्रहणं विनापि, अत आह— **संज्ञाविधाविति**। **प्रतिषेधात्** तदन्तविध्यभावस्य [10]'सुप्तिङन्तम्' इत्यत्र ज्ञापितत्वात्। अस्तु सप्तम्या एव संज्ञित्वम्, अत आह — **असत्याश्चेति**। कार्यार्थी संज्ञा कार्याभावेऽनुपयुक्तेत्यर्थः। अनुपयुक्तापि संज्ञा लुप्तस्य प्रत्ययलक्षणेन वाच्या, तच्चात्र न संभवतीत्याह — **प्रत्ययनिमित्तमिति**। सर्वथापि 'गौरी' इत्यत्र संज्ञा न सिध्यतीत्याह — [11]**गौरी इत्यत्र चेति**। **लोपेऽपीति**। 'गौरी' इत्यत्रापि सप्तम्यर्थसत्त्वादित्यर्थः। भाष्ये **पूर्वसवर्ण इति**। [12]'सुपां सुलुक्' इत्यादिनात्र [13]पूर्वसवर्णदीर्घः क्रियते, न लुक्। [14]तत्रार्थग्रहणं विनापि संज्ञा सिध्यतीत्याह — **पूर्वेति**। [15]**ईकार इति**। ईकाररूपसप्तम्या एव संज्ञेत्यर्थः। यद्यपि 'गौरी' इत्यत्र लुकि पूर्वसवर्णदीर्घे [16]वा न विशेषः, तथापि प्रगृह्यत्वसिद्धये पूर्वसवर्णदीर्घत्वाश्रयणम्। 'मामकी तनू' [17]इत्युकारान्ते तु रूपे विशेषः।

---

[1] पा. सू. ७. १. ३९.
[2] परिभाषा ५५.
[3] निराकर्तुं — ट.
[4] ईदूदित्यत्रेति — — ञ, ट.
[5] प्राधान्यं — ञ.
[6] प्रदीपे 'स्वार्थस्य विवेकानवगमात्' इत्यत्र 'स्वार्थविवेकानवगमात्' इति समस्ततया पाठोऽभिमतः।
[7] सामानाधिकरण्याभावात् — अ.
[8] साहचर्यपरत्वयोः संपादनायेत्यर्थः।
[9] संज्ञाग्रहणं विनापि — अ, म.
[10] पा. सू. १. ४. १४.
[11] प्रदीपे 'गौरी इत्यत्राप्रसङ्गात्' इत्यत्र चकारघटितोऽन्नंभट्टपाठ इति भाति।
[12] पा. सू. ७. १. ३९.
[13] पूर्वसवर्णस्यैवात्र पूर्वसवर्णदीर्घशब्देन व्यवहारः क्रियते। एवं कौमुद्यामपि 'सुपाम्' इति सूत्रे दृश्यते।
[14] अत्रार्थ — म, आ.
[15] ईकारेति — म.
[16] वा विशेषो नास्ति — अ, आ.
[17] ऊकारान्ताल्लुकि पूर्वसवर्णे वा विशेषाभावात् 'उकारान्ते' इत्युक्तम्॥ इत्यूकारान्ते — अ.

बाधित्वेति। परत्वात् [1]'वार्णादाङ्गं बलीयः' इति [2]वचनाच्चेत्यर्थः। वचनादप्यशब्दार्थस्य कथं संज्ञा, अत आह — **सर्वत्रेति**। यत्र मुख्यसंभवस्तत्रैव गौणमुख्यन्यायः, न मुख्यासंभवस्थलेऽपीत्याह — **मुख्येति**। [3]अत्र सप्तम्या ईकारः [4]'सुपाम्' इत्यादिना न संभवति, अत आह — **इयादिति**। अर्थग्रहणनिराकरणप्रवृत्तस्य संशयार्थो यदिशब्दो न युक्तः, अत आह — **संभावनायामिति**। इयता ग्रन्थेनोक्तमुपसंहरति — **तस्मादिति**। 'ज्ञापकम्' इति वार्तिकम्। प्रगृह्यसंज्ञार्थं प्रत्ययान्तत्व आश्रीयमाणे प्रत्ययलक्षणाभावस्यार्थग्रहणं ज्ञापकमित्यर्थः। एतस्य [5]तात्पर्यमाह — **ईदूदेदिति**। **तृतीयेति**। ईदूदेदन्तं द्विवचनान्तमिति तृतीयः। ईदूदेदन्तं यद् द्विवचनं तदन्तमिति चतुर्थः। तयोः पक्षयोः 'कुमार्यगारम्' इत्यत्र [तृतीयपक्षे;] चतुर्थपक्षे शुक्ल्यास्तामित्युदाहरणे च प्रगृह्यसंज्ञाभावो ज्ञापनप्रयोजनमित्यर्थः। ज्ञापकत्वमुपपादयति — **इहेति**। पूर्वापरितोषात् [6]पक्षान्तरमित्याह — **संज्ञाविधाविति**। अर्थग्रहणाभावे वाप्यश्वादावतिव्याप्तिमुपपादयति — **वाप्यश्व इति**। **सप्तमीसहचरितमिति**। प्रत्ययलक्षणेनेत्यर्थः। स्वार्थं जहति पदानि यस्यां वृत्तौ सा जहत्स्वार्थेत्यभिप्रेत्याह — **समासस्यैवेति**। ननु पूर्वपदं समुदायार्थस्य प्रधानार्थस्याभिधायकं कथम्, तथापि [7]स्वार्थत्यागादतिव्याप्तिनिरासो वा कथम्, अत आह — **वृत्तौ हीति**। 'प्रधानार्थमपि' इत्यनेन समुदायार्थशब्दः समासार्थपरतया व्याख्यातः। **स्वार्थस्य** पूर्वपदार्थस्य। द्वितीयशङ्कां निराह — **सप्तम्यर्थग्रहणेनेति**। 'यावान्' इत्येतदेवाह — **केवल इति**। [8]'केवल इत्यस्यैव व्याख्यानम् — **असंसृष्ट इति**। वाक्येऽपि पदान्तरार्थसंसृष्टत्वमस्ति, अत आह — **उद्भूत इति**। एतेन समासान्तर्गतसप्तम्यर्थाद्वैलक्षण्यमुक्तम्। **तस्यैवेति**। अर्थग्रहणसामर्थ्यादित्यर्थः। भाष्ये व्याख्यातवार्तिकं सुखग्रहणार्थं पठति — **ईदूताविति**॥

[१, २३५–२३८]

(**रत्नप्रकाशः**) **ईदूतौ सप्तमीत्येवेति**। एतावतैव 'ईदूद्रूपा प्रगृह्यसंज्ञा' इत्यर्थलाभात् [9]'सोमो गौरी अधिश्रितः' इत्यादौ ङेः [10]'सुपां सुलुक्' इति पूर्वसवर्णे सवर्णदीर्घे च ईकारादिः स्थानिवद्भावेन सप्तमीति तस्य प्रगृह्यत्वे प्रकृतिभावः सिध्यतीत्यर्थग्रहणं व्यर्थमिति भावः। **लुप्तेऽर्थग्रहणाद् भवेदिति**। उक्तस्थले पूर्वसवर्ण एव भवति न तु लुगित्यत्र विनिगमकाभावाद्यदा लुक् तदोक्तसूत्रार्थाश्रयेणानिर्वाहात् तन्निर्वाहाय सप्तम्यर्थे वर्तमानमीदूदन्तं प्रगृह्यं स्यादिति सूत्रार्थमाश्रयितुमर्थग्रहणं कर्तव्यमिति भावः। एतेनोक्तशङ्कासमाधानग्रन्थौ "सप्मीसहचरितं यदीदूदन्तं सप्तम्यां वा परतस्तत् प्रगृह्यसंज्ञं भवतीत्येवं प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां [11]'सोमो गौरी अधिश्रितः' इत्यादौ भविष्यति प्रगृह्यसंज्ञेति प्रश्नः। संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादसत्यर्थग्रहणे सप्तम्या एव संज्ञिनीत्वादसत्याश्च कार्याभावात् प्रत्ययनिमित्तं यत्रान्यस्य कार्यं विधीयते तत्र प्रत्ययलक्षणस्य सद्भावात् 'गौरी' इत्यत्राप्रसङ्गादर्थग्रहणं कृतम्। अर्थग्रहणे सत्यर्थनिमित्ता संज्ञेयं भवति, न प्रत्ययश्रवणनिमित्तेति लोपेऽपि सिध्यति" इति व्याचक्षाणो निरस्तः। 'ईदूतौ सप्तमी' इत्य-

---

[1] परिभाषा ५५.
[2] न्यायाच्चेत्यर्थः — अ.
[3] तत्र — म, आ, उ, ऋ.
[4] पा. सू. ७. १. ३९.
[5] तात्पर्यार्थमाह — म, आ, इ, उ, ऊ, ऋ.
[6] पक्षान्तरमाह — अ, आ, इ, उ, ऊ.
[7] स्वार्थत्यागात् — अ.
[8] केवलपदस्यैव — म, इ, उ, ऊ, ऋ.
[9] ऋ. सं. ९. १२. ३.
[10] पा. सू. ७. १. ३९.
[11] ऋ. सं. ९. १२. ३.

नयोर्यथाश्रुतयोः सामानाधिकरण्यसंभवेन तस्यैवार्थस्य शङ्कित्वा 'नात्र सप्तमी लुप्यते' इत्यादिना स्वयमेव प्रकटयिष्यमाणत्वेन च तदपहाय सप्तमीशब्दस्य तत्सहचरितलक्षकत्वं सत्सप्तम्यन्तार्थलक्षकत्वं वाश्रित्य शङ्काग्रन्थव्याख्यानानौचित्यात्। [1]सप्तम्यन्तस्य सप्तम्यास्तल्लोपस्य वा शङ्कावसरे प्रगृह्यसंज्ञाया अनुक्तत्वेनार्थग्रहणाभावे सप्तम्याः संज्ञिनीत्वस्यास्माभिरुपपादितत्वेन तत्पक्षत्रयासंभवप्रतिपादनस्य प्रकृतानुपयोगात्। प्रकृतोपयोगिनः स्वोट्टङ्कितशङ्कापरिहारस्याकृतत्वाच्च। नन्वीदूदन्तात् सप्तम्याः कुत्रापि लुग् नाङ्गीकर्तव्यः, सर्वत्र पूर्वसवर्णेनैवेष्टसिद्धेरित्याशयेनाह — **नात्र सप्तमीति**। **पूर्वसवर्ण इति**। पूर्वसवर्ण एवेत्यर्थः। ननु सर्वत्रेदूदन्तात् ङेः पूर्वसवर्णेनेष्टसिद्धिरित्ययुक्तम्, अन्तरङ्गे पूर्वसवर्णे सति तस्य स्थानिवत्त्वेन ङिसंज्ञायां [2]'वार्णादाङ्गं बलीयः' इति सवर्णदीर्घं बाधित्वा [3]'ङेराम्' इत्यामि तस्य स्थानिवत्त्वेन ङित्त्वात् [4]'आण् नद्याः' इत्याटि 'गौर्याम्' इत्यादेरेव प्रसक्तेः। अतः सर्वत्र लुगेवाङ्गीकर्तुमुचितः। तथा च वचनसामर्थ्यात् संज्ञाविधावपि प्रत्ययग्रहणे तदन्तविधिसंभवेनेदूदन्तं यत् सप्तम्यन्तं तत् प्रगृह्यमित्यर्थलाभादेव सर्वेष्टसिद्धेर्लुक्पक्षेऽपि व्यर्थमर्थग्रहणमित्याशयेनाह तृतीयः — **पूर्वस्य चेत् सवर्णोऽसाविति**। स एवाह — **एवं तर्हीति**। एवं सतीत्यर्थः। **वचनाद् भविष्यतीति**। संज्ञाविधावपि प्रत्ययग्रहणे तदन्तविधिरिति शेषः। एतेन 'सर्वत्रैव सप्तमी लुप्यत इति वचनसामर्थ्यात् सप्तमीशब्देन सप्तमीसहचरितस्य ग्रहणान्मुख्यकल्पनासंभवे गौणकल्पना गृह्यत इत्याश्रयणात् सिध्यति' इति निरस्तम्। प्रागेव तत्कल्पनाया भाष्याननुगुणतया दूषितत्वात्। अत एव 'ज्ञापकं स्यात् तदन्तत्वे' इति प्रतीकगतं प्रथमप्रतीकसमं निरस्तम्। प्रथमो वा द्वितीयो वा वचनस्येदंशे सामर्थ्यं विघटयति — **वचनाद्यत्रेति**। **दीर्घत्वमुच्यत इति**। [5]'इयाडियाजीकाराणामुपसंख्यानम्' इत्यनेनेकाररूपमिति शेषः। **सरसी शयानमिति**। तथा चात्रेकाररूपायाः सप्तम्याः संभवेन 'ईदूदन्तं यत् सप्तम्यन्तम्' इत्यर्थो न लभ्यत इति भावः। इदमपि रूपं लुकैव सिध्यतीत्याह तृतीयः — **तत्रापि सरसी यदीति**। तथा च [6]'सरसी शयानम्' इत्यत्रापि लुगेवेति 'ईदन्तं सप्तम्यन्तम्' इत्येवेकारांशेऽप्यर्थस्य संभवाद् व्यर्थमेवार्थग्रहणमिति भावः। ईदूदेत्सूत्रे यस्तृतीयः स एवात्रापि [7]स इति 'यक्षानुरूपबलिन्यायेन तदनुगुणं तावदुत्तरमाह द्वितीयः — **ज्ञापकं स्यात् तदन्तत्व इति**। प्रत्ययलक्षणाभावस्येति शेषः। **न प्रगृह्यसंज्ञायां प्रत्ययलक्षणमिति**। प्रत्ययो लक्षणं वाच्यं यस्य तद् द्विवचनसप्तम्यादिशब्दरूपं तत् स्थानिवद्भावेन प्रत्ययलोपस्य न भवतीति ज्ञापयतीति भावः। ननु प्रथमपक्षे तृतीयेन कृतं यदाडाम्भावापादनं तत् तावदयुक्तम्, सामान्येन सर्वेषां विधीनां छन्दसि वैकल्पिकत्वस्य भाष्यकृतैव [8]'षष्ठीयुक्तश्छन्दसि' इत्यत्र 'वा' इति विभज्य साधितत्वात्। विशेषेण च [9]'जसादिषु छन्दसि वावचनं प्राङ् णौचङ्युपधायाः' इति [10]'जसि च' इति सूत्रे वार्तिककारेणोक्तत्वात् सर्वविकल्पानां च छन्दसि व्यवस्थितत्वात्। सर्वत्र लुकैवेष्टसिद्धिरित्यपि तदुक्तमयुक्तम्, इदुदन्तान्ङेः पूर्वसवर्णे सति सिध्यतो मतीबाहूप्रभृतेः, अनीकारान्तान्ङेः [11]'इयाडियाजीकाराणाम्' इतीकारे सति सिध्यतो भाष्यकृन्निर्दर्शितसरसीशब्दप्रभृतेश्च लुका असिद्धेः। एवं च ईदूद्रूपायाः सप्तम्याः सत्त्वेन

---

[1] षष्ठ्यन्तानां 'प्रगृह्यसंज्ञायाः' इत्यनेनान्वयः।
[2] परिभाषा ५५.
[3] पा. सू. ७. ३. ११६.
[4] पा. सू. ७. ३. ११२.
[5] का. वा. ७. १. ३९–१.
[6] ऋ. सं. ७. १०३.२.
[7] तृतीय इत्यर्थः।
[8] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[9] पा. सू. १. ४. ९.
[10] का. वा. ७. ३. १०९–१.
[11] पा. सू. ७. ३. १०९.
[12] का. वा. ७. १. ३९–१.

वचनस्य तत्र चारिताथ्र्यात् तदन्तविधिपक्षाङ्गीकरणमपि तदीयमयुक्तम्। एवं चैतं तृतीयपक्षमवलम्ब्य क्रियमाणम् ईदूदेत्सूत्रगतानिवार्यतदन्तविध्यसंभवदोषयुक्ततृतीयपक्षातिप्रसङ्गवारणमात्रोपयोग्यर्थज्ञापनेनात्रत्यार्थग्रहणसार्थक्यवर्णनमप्ययुक्तम्। तस्मादाद्यपक्ष एवाश्रयणीयः। आश्रिते तु तस्मिन् [1]कुशकाशावलम्बनप्रवृत्ततृतीयपक्षप्रसक्तवाप्यश्वादिपूर्वपदातिप्रसङ्गस्यापि तत्रासंस्पर्शाद् व्यर्थमेवार्थग्रहणमिति चेन्न, ईदूदन्तात् सप्तमीद्विवचनयोर्लुकि सिध्यतो 'गौरी' इत्यादेः पूर्वसवर्णेनासिद्धया तदर्थं लुकोऽप्यङ्गीकर्तव्यत्वेन तत्रेदूदूपायाः सप्तम्या अभावेन प्रगृह्यत्वाप्रसङ्गात्। तस्मात् ईदूदेत्सूत्र इवात्रापि निर्दुष्टो मध्यम एव पक्षो ग्राह्यः। एवं चार्थग्रहणसार्थक्यं स्पष्टमेव। तृतीयपक्षप्रसक्तवाप्यश्वादिपूर्वपदातिप्रसङ्गोऽप्यत्र न प्रसरतीत्याशयेनाह — **मा वा पूर्वपदस्य भूदिति**। **पूर्वपदस्य मा भूदित्येवमर्थमिति**। तत्रातिप्रसङ्गसंपादकतदन्तविधिपक्षनिराकरणेन पक्षान्तरपरिग्रहार्थमित्यर्थः। एतेन "वाप्यश्वः, नद्यातिः, इति [2]'संज्ञायाम्' इति समासे कृते सप्तमीसहचरितमीकारान्तं पूर्वपदमिति स्यात् प्रगृह्यसंज्ञेति तदर्थमर्थग्रहणम्" इति निरस्तम्। तत्पक्षस्य प्रागेव निरस्तत्वात्। **क्रियमाणेऽप्यर्थग्रहण इति**। अर्थग्रहणद्वारा सप्तम्यर्थवृत्तेरीदूदन्तस्य प्रगृह्यसंज्ञेति सूत्रार्थ आश्रीयमाणेऽपि 'वाप्यश्वः' इत्यादौ वाप्यादेः सप्तम्यर्थवृत्तित्वस्येदन्तत्वस्य च सत्त्वेन तत्र प्रगृह्यसंज्ञा कुतो नेति भावः। **जहत्स्वार्था वृत्तिरितीति**। जहत् स्वं पदं [3]यस्य स जहत्स्वः। राजदन्तादेराकृतिगणत्वात् स्वशब्दस्य परनिपातः। तादृशोऽर्थो यस्यां सा वृत्तिरिति कृत्वेत्यर्थः। तस्यां हि वृत्तावाश्रीयमाणायां समासस्यैवार्थवत्त्वं न तु तदवयवानामिति सप्तम्यर्थवृत्तिता सुतरां वाप्यादेस्तत्र नास्तीति नातिप्रसङ्गो भवति। नन्वजहत्स्वार्थपक्षाश्रयणं यतस्तदर्थं यथायथमवयवानामर्थवत्त्वमाश्रयणीयम्, तथा च कृतेऽप्यर्थग्रहणे स दोषस्तदवस्थ एवेत्याह — **अथाजहत्स्वार्थायामिति**। **समुदायार्थोऽभिधीयत इति**। समासरूपसमुदायान्तर्गतोपसर्जनीभूतार्थोऽभिधीयते, न त्वनुपसर्जनपर्यायः प्रधानभूतः। [4]"प्रधानाप्रधानयोश्च प्रधाने कार्यसंप्रत्ययः' इत्यनुपसर्जनसप्तम्यर्थवृत्ति यदीदूदन्तं तत् प्रगृह्यमित्याश्रयणात् तत्र नातिप्रसङ्ग इति भावः। एतेन 'वृत्तौ हि पूर्वपदं स्वार्थमप्यभिधत्ते प्रधानार्थमपीति स्वार्थसंसृष्टस्य प्रधानार्थस्याभिधानात् पांसूदकवत् स्वार्थस्य विवेकानवगमात् समुदायार्थो वृत्तौ संसृष्ट एवाभिधीयते। सप्तम्यर्थग्रहणेन यावानेवार्थो वाक्ये सप्तम्यन्तेनाभिधीयते केवलोऽसंसृष्ट उद्भूतस्तस्यैव ग्रहणमिति समासे न भवति प्रगृह्यसंज्ञा' इति निरस्तम्। अजहत्स्वार्थापक्षस्यापि पराभिमतस्य समर्थसूत्रे भगवता दूषयिष्यमाणत्वेन प्रकृतभाष्यस्य वैयाकरणमतपरतयैव व्याख्यातुमुचितत्वात्॥

[१, २३५–२३८]

(**नारायणीयम्**) ईदूतोरुदाहरणे सप्तमीत्वाभावात् केवलं तदर्थवृत्तित्वात् तदन्तस्य कथमर्थग्रहणमन्तरेण सिद्धिः, अत आह — **सप्तमीति**। उक्तानुपपत्त्या साहचर्यसंबन्धनिमित्तको लाक्षणिकः सप्तमीशब्द इत्यर्थः। **सप्तम्यामिति**। सप्तमीनिर्देशो लुप्तसप्तमीक इत्यर्थः। तत्साहचर्यं तत्परत्वं च कथमसत्यां तस्यां विज्ञेयम्, अत आह — **प्रत्ययेति**। लुप्तेऽपि सिद्धिप्रकारस्य वर्णित-

---

[1] यथा नद्यादौ पतितः सन्नन्यदालम्बनमलभमानो व्याकुलचित्तः कुशकाशादीनालम्बते तथा वादे दृढासु युक्तिषु निरस्तासु भ्रान्तचित्तः पुमान् निर्बलां युक्तिमवलम्बमानः कृतकृत्यो भवतीति न्यायार्थः। लौ. न्या. साहस्री. पृष्ठम् १६७.

[2] पा. सू. २. १. ४४.

[3] 'यं सः' इत्युचितं भाति।

[4] परिभाषा १०६.

त्वादर्थग्रहणफलं नेत्यत आह — **संज्ञेति**। 'सरसी' इत्यादौ मुख्यसंभवाल्लक्षणाया अयोगाल्लुप्तसप्तमीकत्वे प्रमाणाभावात् 'गौर्याम्, वध्वाम्' इत्यादावतिप्रसङ्गशङ्कया च प्रागुक्तसिद्धिप्रकारोऽयुक्त इति सिद्धवत्कृत्य प्रकारान्तरमप्याशङ्कनीयं निरस्तम्। तद्धीत्थम् — प्रत्ययग्रहणपरिभाषया सप्तमीशब्देन तदन्तं गृह्यते, तदेवेदूद्भ्यां विशेष्यत इत्यर्थग्रहणेन विनापि सिद्धिः, गौरीत्यादौ सप्तम्यन्तस्येदाद्यन्तत्वादिति। कथं [1]कार्याभावः, प्रत्ययलक्षणसत्त्वादित्यत आह — **प्रत्ययेति**। यद्यपि सत्यपि [2]लक्षणे [3]सप्तम्यामीदादिरूपत्वाभाव इति दोषः, तथापि तस्यैवाभावादेतन्नोक्तम्। पूर्वसवर्णे तस्यैकादेशे सत्यभावः सप्तम्या इत्यत्राह — **सतीति**। नन्वेकादेशे कृत उभयत आश्रयेऽन्तादिवद्भावनिषेधात् कथमाडामोः प्राप्तिः, तत्राह — **एकादेशमिति**। वार्णादाङ्गस्य बलवत्त्वात्। ननु वचनाविषये कथं वचनप्रवृत्तिः, तत्राह — **सामर्थ्यादिति**। ननु सामर्थ्यादप्यविषये प्रवृत्तिरनुचिता, अतिप्रसङ्गादित्याशङ्क्य विषयत्वं घटयति — **सप्तमीति**। गौणमुख्यन्यायस्यात्राप्रचार इत्याह — **मुख्येति**। सामर्थ्यमुपपादयति — **सर्वत्रेति**। संज्ञाविषये। न च गौर्यामित्यादिषु प्रसङ्गः, सप्तम्यामिति वाच्ये लक्षणाश्रयणसामर्थ्याल्लुप्तायां तस्यां शास्त्रीयसाहचर्यविषयेऽस्य प्रवृत्तेः। [4]हरदत्तमिश्रैस्तु वचनसामर्थ्यात् संज्ञाविधावपि तदन्तविधिः कल्पितः। ननु यत्र दीर्घत्वं तस्यैव संज्ञाविषयत्वं कुतः, व्याप्तिन्यायादुभयोर्विषयत्वं कस्मान्नेत्याशङ्क्याह — **मुख्येति**। दीर्घलक्षणं किमित्यत आह — **अत्रेति**। 'यदि'शब्दः शब्दसंदेहे नेत्याह — **संभावनायामिति**। सरसीशब्दसाधनफलमाह — **तस्मादिति**। तदन्तविधौ ज्ञापकमिति योजनाव्युदासायाह — **ईदिति**। प्रत्ययलक्षणाभावे कथमेतदर्थग्रहणं ज्ञापकमित्यपेक्षायामाह — **इहेति**। **सप्तम्यां वेति**। ननु श्रुतायामपि सप्तम्यामीदाद्यन्तस्य प्रसङ्गः। नैष दोषः, प्रकृतिभावस्य पदान्तविषयत्वादनुनासिकपर्युदासस्यावसानविषयत्वात् फलाभावादप्रसङ्गात्। अशौण्डादित्वादाह — **संज्ञायामिति**। लुप्तत्वात् कथमत्र प्राप्तिः, तत्राह — **सप्तमीति**। सप्तमीनिवृत्त्या तदर्थाभावानुमानमाशङ्क्याह — **अस्त्येवेति**। 'गौरी' इत्यादावपि तदनुमानापत्तेरर्थास्तित्वमित्यर्थः। तदुच्यते — प्रत्यये लुप्ते प्रकृतिरेव तदर्थमाहेति। जहति पदानि स्वार्थमस्यामित्यवयवार्थराहित्यं [5]जहत्स्वार्थत्वमित्यभिप्रेत्याह — [6]**समासस्यैवेति**। समुदायार्थस्य किं समुदायेनाभिधानं विवक्षितम्, उतावयवेन। नाद्यः, पूर्वपदस्य सप्तम्यर्थ[7]वृत्तित्वाहानात्। नान्त्यः, [8]जहत्स्वार्थतापत्तेः, अत आह — **वृत्ताविति**। नन्वुभयाभिधानेऽपि स्वार्थसत्त्वात् सप्तम्यर्थाहानिरित्यत्राह — **स्वार्थेति**। संसर्गोऽपि विशेषणत्वमात्रं चेत् सदोषस्तदवस्थ इत्यत आह — **पांस्विति**। अविविक्तस्यापि सत्त्वात् कथमर्थग्रहणान्निवृत्तिरित्याशङ्क्यार्थग्रहणसामर्थ्याद्विविक्तस्य ग्रहणमित्याह — **सप्तम्यर्थेति**॥

दाधा ध्वदाप् १. १. २०.

[१, २३९–२४१]

(**लघुविवरणम्**) **आत्वे कृत इति**। [9]'प्रकृतवदनुकरणं भवति' इत्यतिदेशात् [10]'अशिति' इति

---

[1] कार्यभावः — क.
[2] प्रत्ययलक्षण इत्यर्थः।
[3] सप्तम्यामीदादिपरत्वाभाव इति — क.
[4] अस्मिन्नेव सूत्रे पदमञ्जर्याम्।
[5] जहत्स्वार्थमिति — क.
[6] समासस्य वेति — क.
[7] वृत्तित्वादहानात् — क.
[8] जहत्स्वार्थतोऽर्थापत्तेः — क.
[9] परिभाषा ३६.
[10] पा. सू. ६. १. ४५.

[1]च प्रसज्य[2]प्रतिषेधाश्रयणादिति भावः। **एषामिति**। दोदेङ्घेटाम्। ननु सामान्यानुकरणपक्षे तयोर्द्वित्वादितरेतरयोगद्वन्द्वे 'दाधौ' इति प्राप्नोति, समाहारद्वन्द्वे तु नपुंसकह्रस्वत्वे सति 'दाधम्' इति स्यादित्यत आह — **पृथक् पदमिति**। **षष्ठीसमास इति**। द्वन्द्वस्तु नाशङ्कनीयः, तथा सत्य-स्त्यादीनामपि प्रकृतित्वेन घुसंज्ञा[3]प्रसङ्गादिति भावः। **प्रत्यासत्त्येति**। प्रकृतिमात्रस्य घुसंज्ञायां दाधाग्रहणवैयर्थ्यप्रसङ्गात् प्रकृतिविशेषेऽपेक्षिते प्रत्यासत्ति[4]न्यायावतार इति भावः। ननु दाधा इत्यस्य षष्ठ्यन्ततया विपरिणामेनान्वये प्रथमा[5]निर्देशवैयर्थ्यप्रसङ्गः, अविपरिणामे तु दाधां विशेष्यत्वे 'अर्थे' इत्यस्यानुवृत्तिरनर्थिका, विशेषणत्वे [6]त्वनन्वय इत्यत आह — **एतदिति**। **संनिधानादिति**। निरर्थकस्य शब्दस्यार्थवद्ग्रहणपरिभाषया घुसंज्ञाया अप्रसङ्गात् सर्वस्याप्यर्थे वर्तमानस्य घुसंज्ञायां दाधां पृथग्घुसंज्ञाविधानमनर्थकं स्यादित्यर्थविशेषाकाङ्क्षायां संनिधानाद् दाधामर्थो गृह्यत इति भावः। [7]भाष्ययोजना — प्रतिपदोक्तस्यैवेति गामादाग्रहणमपि प्रतिपदोक्तस्येति दोषः। कस्तर्हि समाधि-रित्यत आह — **गामादेति**। नन्वेतदपि कथं वचनमन्तरेण लभ्यते, अत आह कैयटः — **अस्य चेति**। घुसंज्ञायां यत्संज्ञि तन्मात्रापेक्षयेति सामान्यापेक्षयेत्यस्यार्थः। सामान्यापेक्षया च ज्ञापय-तीत्यन्वयः। तत्प्रयोजनम् — **धेटोऽपीति**। नन्वेवमपि "निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति देङ्दाण्दाञां घुसंज्ञा न स्यादित्यत आह — **निरनुबन्धकेति**। 'धेटोऽपि' इत्यत्रापिशब्देन निरनुबन्धकग्रहणपरिभाषानुपस्थानफलं सानुबन्धकानां देङादीनां घुसंज्ञासिद्धिं समुच्चिनोति। दैपः पित्त्वेन परिभाषाया अनित्यत्वं ज्ञाप्यत इति गामादाग्रहणेष्वविशेष इति लभ्यते। दारूपापेक्षया ज्ञापकेऽपि लाक्षणिकस्यापि धेटो यथा घुसंज्ञासिद्धिस्तथा प्रतिपादयति — **दो ददिति**॥

[१, २३९–२४१ [

(**विवरणम्**) **आत्वे कृत इति**। यद्यप्यनुकरणानामुपदेशाभावान्नोपदेश एजन्तत्वम्, तथापि [9]'प्रकृतिवदनुकरणं भवति' इत्यतिदेशादात्वमिति भावः। **एकशेषे कृत इति**। न द्वन्द्वे [10]कृते एकशेषः, धाशब्दयोर्द्वित्वाद् दारूपाणां [11]च चतुष्ट्वादिति भावः। नन्वात्वं भूतं जातं येषां ते आत्वभूता इत्युक्तौ दाण्दाज्धाञां घुसंज्ञा नाङ्गीकृता स्यात्, न हि ते जातात्वाः, नाप्यस्मिन्नर्थे प्रमाणमित्यत आह — **भवतेरिति**। **आत्वमिति**। द्वितीयान्तस्य भूता इत्यनेन [12]'साधनं कृता' इति समासः। तृतीयान्तत्वे तु [13]'कर्तृकरणे' इत्यनेन। **न त्विति**। अनेन पूर्वोक्तो बहुव्रीहि-र्निवर्त्यते। ननु सामान्यानुकरणपक्षे समाहारद्वन्द्व इतरेतरयोगद्वन्द्वो वा। आद्ये 'दाधम्' इति स्यात्, [14]द्वितीये 'दाधौ' इति स्यादित्यत आह — [15]**दा धा इति चेति**। विकृतानां [16]'दो दद् घोः'

---

[1] चकारो नास्ति — ण.
[2] प्रतिषेधाश्रयणाच्चात्वं क्रियत इति भावः — ण.
[3] प्रसङ्ग इति — ण.
[4] न्यायावतर इति — ण.
[5] निर्देशस्य वैयर्थ्य — ण, त.
[6] तुशब्दो नास्ति — ड, ढ.
[7] भाष्ये योजना — ड, ढ, त.
[8] परिभाषा ८२.
[9] परिभाषा ३६.
[10] कृत इति शेषः — ञ.
[11] चकारो नास्ति — ट.
[12] का. वा. २. १. ३३–२.
[13] पा. सू. २. १. ३२.
[14] 'द्वितीये' इत्यादि 'इति स्यात्' इत्यन्तं नास्ति — ञ.
[15] प्रदीपे 'दा इति धा इति पृथक् पदम्' इत्यत्र 'दा धा इति च पृथक्पदम्' इति विवरण-कृत्पाठ इति भाति।
[16] पा. सू. ७. ४. ४६.

इत्यादिसूत्रपर्यालोचनया घुसंज्ञा सुलभेति मन्वानो वार्तिककारः 'शिदर्थम्' [1]इत्येवावोचत्। भारद्वाजीयास्तु पूर्वापरपर्यालोचनासमर्थान् प्रति [2]विकृतानपि प्रयोजनत्वेनोचुः। **द्यतेरिति**। 'दो अवखण्डने' इत्यस्य श्यनि [3]'ओतः श्यनि' इति कृतलोपस्य निर्देशः। आत्वभूता उपदेश एवाकारान्ताः, तद्विलक्षणास्त्वनात्वभूता इति [4]विवक्षित्वात्वभूतान् दर्शयति — **दाणिति**। दाधां पृथगुपादानात् प्रकृतिशब्देन तद्विशेषो विवक्षित इति निश्चिते कोऽसौ विशेष इत्याकाङ्क्षायां प्रत्यासत्तिन्यायावतरणमभिप्रेत्याह — **प्रत्यासत्त्येति**। ननु 'अर्थे' इत्यनुवृत्तावप्यर्थे वर्तमाना दाधा घुसंज्ञा इत्युक्तेऽपि कथमनात्वभूतानां स्यात्, '[5]यावतार्थग्रहणानुवृत्त्या 'प्रनिदारयति, प्रनिधारयति' इत्यादावनर्थकयोर्दाधाशब्दयोर्घुसंज्ञा [6]निवर्तिता, न रूपान्तरयुक्तानां सा प्रापितेत्यत आह — **एतदिति**। अर्थवत्परिभाषयैवानर्थकयोः सा [7]निवर्तितेति पुनरर्थग्रहणानुवृत्तिर्वाक्यभेदेन रूपान्तरयुक्तानां घुसंज्ञाविधानायेत्यर्थः। '[8]पुनरुपादानादेवार्थशब्देनार्थविशेषमभिप्रेतं दाधाः संनिधानात् समर्पयन्तीत्याह — **संनिधानादिति**। **तदुभाभ्यामिति**। घुशब्दप्रकृतिशब्दमाशब्दानां द्वन्द्वे संनिधानाविशेषादुभयप्रकृतिरपि गृह्यत इत्यतः 'प्रणिदयते, प्रणिमयते' इत्यत्रापि णत्वं सिध्यतीत्यर्थः। भाष्ये [9]'एवमपि' इत्यनेन णत्वविधौ 'माङस्यति' इति निर्देष्टव्यमित्युक्तं [10]भवति। केषु दोष इत्यपेक्षायां गामादाग्रहणेष्विति पूर्वत्रापि संबध्यते। प्रतिपदोक्तस्यैव ग्रहणादित्यर्थाल्लभ्यते[11]। कथं तर्हि समाधिरित्यपेक्षायां लक्षणप्रतिपदोक्तपरिभाषाशेषत्वेन गामादाग्रहणेष्वविशेष इति द्रष्टव्यमिति प्रतिपादनायोत्तरत्रापि [12]संबध्यते। अयं च शेषो लिङ्गसिद्ध इत्याह — **अस्य चेति**। **अत्र** घुसंज्ञासूत्रे। ननु पित्त्वाल्लिङ्गाल्लक्षणप्रतिपदोक्तपरिभाषा मा प्रवर्तिष्ट दो घुसंज्ञायाम्, धस्तु घुसंज्ञायां सा स्यादेवेत्यत आह — **सामान्येति**। सामान्यं घुसंज्ञासंज्ञिमात्रम्, तदपेक्षया, **इह** सूत्रे ज्ञापयति यतोऽतो [13]धेटोऽपि, अपिशब्दाद् दाञादीनां सानुबन्धकानां कृतात्वानां च द्यत्यादीनां सिध्यति। एतदुक्तं भवति — दैपः पित्त्वं लक्षणप्रतिपदोक्तपरिभाषानुपस्थानं ज्ञापयति। अन्यथा दैपो दारूपस्य लाक्षणिकत्वाद् घुसंज्ञाप्राप्त्यभावान्नार्थो घुसंज्ञानिवृत्त्यर्थेन पित्त्वेनेति स्वशेषप्रतिषेधद्वारा निरनुबन्धकपरिभाषानुपस्थानं ज्ञापयति। अन्यथा नार्थोऽदाबिति प्रतिषेधेन। सामान्यापेक्षया [14]चेह संज्ञासूत्रे लक्षणप्रतिपदोक्तपरिभाषानुपस्थानं ज्ञापयति। अन्यथा एकदेशे प्रवृत्तिरप्रवृत्तिरेकदेशान्तर इति वैरूप्यं स्यादिति। मा भूत् सामान्यापेक्षया पित्त्वं ज्ञापकम्, तथापि [15]ज्ञापकान्तराद्धो घुसंज्ञायां लक्षणप्रतिपदोक्तपरिभाषानुपस्थितिरित्याह — **दो ददिति** ॥

---

[1] इत्यवोचत् — ञ.
[2] विकृतानामपि — छ, ञ.
[3] पा. सू. ७. ३. ७१.
[4] विवक्षामात्वभूतानामिति दर्शयति — ञ.
[5] यावदर्थ — च, छ.
[6] निवर्तते। कथं तु रूपान्तर — ञ.
[7] 'निवर्तितेति' इत्यस्यानन्तरं 'तत्र' इत्यधिकम् — ट.
[8] 'पुनरुपादानात्' इत्यतः प्राक् 'दाधाम्' इति मातृकासूपलभ्यते। तत् प्रकृतासंगतत्वात् त्यक्तम्।
[9] 'एवं क्रियमाणेऽपि' इतीह विवक्षितम्।
[10] 'भवति' इत्यस्यानन्तरम् इतिशब्दोऽधिको दृश्यते मातृकासु। सोऽनावश्यक इति भाति।
[11] इत्यर्थो लभ्यते — ञ; इत्यर्थाल्लप्स्यते — ट.
[12] 'संबध्यते' इत्यस्यानन्तरं 'प्रतिपदोक्तस्यैव ग्रहणात्' इत्यधिकम् — च.
[13] धेटोऽपि शब्दाद्दादीनां — ट.
[14] च घुसंज्ञासूत्रे — ट.
[15] ज्ञापकान्तराच्च घुसंज्ञायां — छ, ञ.

[१, २३९–२४१]

(**उद्द्योतनम्**) वार्तिकमवतारयति — **दाधेति**। **इत्याह** इत्यत आह। **आत्वे कृत इति**। यद्यप्यनुकरणानामुपदेशाभावादुपदेश एजन्तत्वं नास्ति, तथापि [1]'प्रकृतिवदनुकरणम्' इत्यतिदेशादात्वमित्याशयः। 'दो अवखण्डने, [2]देङ् पालने, धेट् पाने, डु दाञ् दाने, दाण् दाने, डु धाञ् धारणपोषणयोः' अत्र दाचतुष्टयस्य धाद्वयस्य चैकशेषं कृत्वा द्वन्द्वनिर्देश इत्याह — **एकशेष इति**। नन्वेजन्तानुकरणेन संज्ञाविधाने कृतात्वानां न स्यात्, अत आह — **कृतात्वानामिति**। [3]'सर्वे सर्वपदादेशाः' इति न्यायेनैजन्तानामाकारान्ता आदेशा इति भावः। नन्वात्वं भूतं जातं कृतं येषामिति विग्रहे डुदाञ्दाण्धाञां न स्यात्, अत आह — **भवतेरिति**। **आत्वमिति**। कर्तरि क्ते [4]'साधनं कृता' इति समासः, कर्मणि क्ते [5]'कर्तृकरणे कृता' इत्यनेनेत्यर्थः। बहुव्रीहिर्न भवतीत्याह — **न त्विति**। नन्वेजन्तानुकरणेन प्रकृतीनामपि संज्ञोक्ता, अत आह — **अस्यापीति**। ननु सामान्यानुकरणपक्षे समाहारद्वन्द्वे 'दाधम्' इति स्यात्, इतरेतरयोगद्वन्द्वे तु 'दाधौ' इति स्यात्, अत आह— [6]**दा इति धा इतीति**। एकशेषपक्षे इतरेतरयोगद्वन्द्वः, 'दाधाः' इति [7]च [8]'बहुवचनान्तमिति ज्ञेयम्। **बहिरङ्ग** विलम्बिता। **अन्तरङ्ग** शीघ्रभाविनी। ननु दाण्दाञोः प्रणिदाता, धाञः प्रणिधाता, इति सिध्यत्येव, अत आह — **द्यतेरिति**। 'दो अवखण्डने' इत्यस्य [9]श्तिपि श्यनि [10]'ओतः श्यनि' इत्योकारलोपे कृते निर्देशः। यद्यपि 'लक्षणप्रतिपद' इत्यस्यैतदनन्तरं व्याख्योचिता, तथापि वैचित्र्यात् क्रमव्यत्यय इति ज्ञेयम्। **उभयथेति**। षष्ठीसमासे आकारान्तानां न स्यात्, [11]कर्मधारये एजन्तानां न स्यादित्यर्थः। ननु कर्मधारयपक्षे 'प्रकृतयः' इत्यनन्वितम्, अत आह — **दीयत इति**। [12]'घुमास्था' इतीत्वम्। ईत्वादेरित्यादिना 'देयात्' इत्यादावेत्वग्रहः। उपदेश एवाकारान्ता आत्वभूतास्तद्भिन्ना अनात्वभूता इति मत्वाह — **दाणिति**। ननु प्रकृतिशब्देन प्रकृतिमात्रग्रहणमेव युक्तम्, न तु 'एषाम्' इति विशेषलाभः, अत आह — **प्रत्यासत्त्येति**। प्रकृतिशब्दस्य संबन्धिशब्दत्वादुपस्थितसंबन्धित्यागेनानुपस्थितसंबन्धिकल्पने मानाभावादित्यर्थः। ननु 'अर्थे' इत्यनुवृत्तावर्थवतां दाधां संज्ञा स्यात्, तेन 'प्रनिदारयति, प्रनिधारयति' इत्यादावनर्थकयोर्दाधाशब्दयोर्घुसंज्ञा मा भूत्, तत्प्रकृतीनां कथं संज्ञा स्यात्, 'नैवम्' इत्यग्रिमभाष्यानुत्थानं च, अत आह — **एतदिति**। अर्थवत्परिभाषयैवानर्थकनिवृत्तौ पुनरर्थग्रहणं वाक्यभेदेन प्रकृतीनां संज्ञाविधानार्थमित्यर्थः। भाष्ये [13]**अवश्यं तत्रेति**। [14]'नेर्गद' इति सूत्र इत्यर्थः। पुरस्तादपकर्षानुकूलतया प्रकृतिग्रहणस्थलमाह — **घुमाशब्दयोरिति**। **उभाभ्यामिति**। घुप्रकृतिमाशब्दानां द्वन्द्वे [15]कृते संबन्ध्याकाङ्क्षायां संनिध्यविशेषादुभाभ्यामपि[16] संबन्ध इत्यर्थः। भाष्ये **प्रणिमयत इति**। 'मेङ् प्रणिदाने' इत्यस्य रूपम्।

---

[1] परिभाषा ३६.
[2] देङ् लवने — म, उ.
[3] महाभाष्यम् अस्मिन्नेव सूत्र उत्तरत्र।
[4] का. वा. २. १. ३३–२.
[5] पा. सू. २. १. ३२.
[6] दा धा इति — अ, आ, इ, ऊ.
[7] चकारो नास्ति — म, आ, इ.
[8] बहुवचनमिति — म.
[9] तिपि — म, इ, उ.
[10] पा. सू. ७. ३. ७१.
[11] 'कर्मधारये' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — म, उ.
[12] पा. सू. ६. ४. ६६.
[13] अवश्यमत्रेति — उ.
[14] पा. सू. ८. ४. १७.
[15] प्रकृते — ऊ, ॠ.
[16] अपिशब्दो नास्ति — म, आ, इ, उ, ऊ, ॠ.

भाष्ये **प्रतिपदोक्तस्यैवेति**। परिभाषाया इत्यन्वयः। कुत्रैते [1]दोषा इत्यपेक्षायां गामादाग्रहणेष्विति पूर्वत्रापि संबध्यते। तत्र प्रतिपदोक्तग्रहणमेव स्यात्, तच्चानिष्टम्। [2]अतस्तत्राविशेष एवाङ्गीक्रियत इति भाष्यान्वयः। नेदं वाचनिकम्, किंतु ज्ञापकात् सिद्धमित्याह — **अस्य चेति**। प्रतिषेधे सामान्यग्रहणार्थं यत् पित्त्वं तत् 'गामादाग्रहणेष्वविशेषः' इत्यस्य लिङ्गमित्यन्वयः। **अन्यथा** [3]तत्र तत्परिभाषाप्रवृत्तौ। **अस्य** दैपो दारूपस्य। **अत्र** घुसंज्ञासूत्रे। ननु घेटो ग्रहणं न स्यात्, पित्त्वस्य दामात्रे ज्ञापकत्वात्, अत आह — **सामान्येति**। घुसंज्ञासंज्ञिमात्रापेक्षयेत्यर्थः। ननु [4]"लक्षणप्रतिपदोक्तयोः' इत्यस्याप्रवृत्तौ [5]"निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया द्यतेरेव दाग्रहणेन ग्रहणं स्यादिति 'अदाप्' इति प्रतिषेधो व्यर्थः स्यात्, अत आह — **निरनुबन्धकेति**। दैपः पित्त्वम्, 'अदाप्' इति प्रतिषेधश्च परिभाषा[6]द्वयस्याप्यप्रवृत्तिं ज्ञापयत इत्यर्थः। सामान्यज्ञापकत्वादेव गामादाग्रहणेष्वपि परिभाषाद्वयस्याप्रवृत्तिः। पित्त्वस्य सामान्यज्ञापकत्वाभावेऽपि ज्ञापकान्तरेण घेटो घुसंज्ञामाह — **दो ददिति**। इत्यत्र [7]'वा द इत्येतद् घुसंज्ञां ज्ञापयतीत्यन्वयः॥

[१, २३९–२४१]

(**रत्नप्रकाशः**) यथाश्रुतसूत्रं क्वचिदव्याप्तमिति तत्परिहारायाह वार्तिककारः — **घुसंज्ञायामिति**। **दाधाप्रकृतय इति**। दाश्च धाश्च प्रकृतयश्चेति द्वन्द्वः। केषां प्रकृतय इत्यपेक्षायां 'दाधाम्' इति संबध्यते, उपस्थितत्वादिति भावः। **किं प्रयोजनमिति**। बहुव्रीहिरयम्, अन्यपदार्थः प्रकृतिग्रहणम्। यत्तु 'दोदेङ्घेटामेजन्तानामनुकरणानि व्यवस्थाप्यात्वे कृते ददातियच्छतिदधात्यनुकरणानां चैकशेषे द्वन्द्वनिर्देशात् सिद्धा दोदेङ्घेटामपि घुसंज्ञा। कृतात्वानां चैषां स्थानिवद्भावेन सिद्धेति प्रश्नः' इति। तन्न, लक्षणप्रतिपदोक्तपरिभाषाविरोधात्। न चानुकार्यस्य यत्र लाक्षणिकत्वं तत्रैव सा प्रवर्तते, प्रकृते त्वनुकरणस्य लाक्षणिकत्वमिति वाच्यम्; विनिगमकाभावेनोभयत्र तत्प्रवृत्तेः। तदभिप्रायेणैव 'प्रकृतिग्रहणं कर्तव्यम्' इति वार्तिकप्रवृत्तेश्च। **आत्वभूतानामिति**। आत्वं प्राप्तानामित्यर्थः, आत्वयुक्तानामिति यावत्। 'भू प्राप्तौ' इत्याधृषीयाण्णिजभावे कर्तरि क्तः। **अनात्वभूतानां न स्यादिति**। तेषामपि यथा स्यादित्येवमर्थमिति शेषः। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वाद् गामादाग्रहणेष्वविशेषाच्च दोदेङ्घेटां कृतात्वानामपि घुसंज्ञा भवतीत्यनात्वभूतानामेव न स्यादित्युक्तम्। एतेन 'आत्वं भूताः, आत्वेन वा भूताः, आकारान्ता इति यावत्, न तु लक्षणेन कृतात्वा इति विज्ञेयम्। अस्याप्ययमभिप्रायः — एजन्तानुकरणत्वे प्रमाणाभावात् प्रक्रियागौरवाच्च प्रयोग एवाकारान्ता ये तदनुकरणानामयमेकशेषनिर्देशः। सामान्यानुकरणं वा दा इति धा इति च पृथक् पदं निर्दिष्टमिति' इति निरस्तम्। आत्वभूतशब्देन कृतात्वानामग्रहणमित्यत्र मानाभावात्। एजन्तानुकरणसंभवस्य स्वयमेवोक्तत्वेनाकारान्तानुकरणत्वप्रमाणस्यैवैजन्तानुकरणत्वप्रामाण्यसंभवात्। प्रक्रियागौरवस्य दोषत्वे मानाभावात्। अपूर्ववचनाश्रयणापेक्षया प्रक्रियागौरवाश्रयणस्योचितत्वात्। प्रकृतिग्रहणेन णत्ववारणस्योपायान्तरत्वसंभवात्।

---

[1] एतेन भाष्ये 'दोष एवैतस्याः' इत्यत्र 'दोषा एवैतस्याः' इत्यन्नंभट्टाभिमतः पाठ इति प्रतीयते। मद्रनगरमुद्रिते स पाठोऽधस्तात् पाठान्तरत्वेन न्यवेशि।

[2] यतस्तत्राविशेषः — इ, उ, ऊ.

[3] अत्र — म, इ, उ, ऊ.

[4] परिभाषा ११४.

[5] परिभाषा ८२.

[6] द्वयस्याप्रवृत्तिं — अ, आ, ऋ.

[7] 'वा' इति नास्ति — म, उ.

'न तु लक्षणेन कृतात्वाः' इत्यस्य स्वोक्तत्वेन 'प्रयोग एव ये आकारान्तास्तदनुकरणानामयमेकशेषनिर्देशः' इत्यनेन विरोधाच्च। लक्षणेन कृतात्वा दोदेङ्धेटोऽपि हि प्रयोगे आकारान्ताः। **शिदर्थमिति**। शित्परा ये दोदेङ्धेटस्तदर्थमित्यर्थः। **प्रणिदयते प्रणिधयतीति**। अत्र [1]'नेर्गद' इति णत्वं यथा स्यादित्येवमर्थमिति शेषः। **विकृतार्थं चेति**। लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वं [2]'गामादाग्रहणेष्वविशेषः' इति चानाश्रित्यैवमुक्तम्। **प्रणिदातेति**। द्यतेर्देङो वा रूपम्। **प्रणिधातेति**। धेटः। **कथमिति**। कर्मधारयतत्पुरुषयोरुभयोरपि संभवात् प्रश्नः। **दाधाः प्रकृतय इति**। दीयते धीयत इत्यादौ दीधीप्रभृतीनां ताः प्रकृतयः। **दाधां प्रकृतय इति**। दोदेङ्धेटः। **आत्वभूतानामिति**। दाण्दाञ्धाञ्नाम्। **तत इति**। यस्मात् 'अर्थे' इत्यनुवर्तते तस्मादित्यर्थः। **वक्ष्यामि** व्याख्यास्यामीत्यर्थः। **दाधा घ्वदाप् अर्थ इतीति**। 'दाधा' इति 'अदाप्' इति च लुप्तषष्ठीके पदे। दाञ्भिन्नानां दाधामर्थे वर्तमानो घुसंज्ञः स्यादिति सूत्रार्थलाभाद् दाधां तत्प्रकृतीनां च संज्ञा सिध्यतीति भावः। एतेन **'अर्थ इति**। एतद् द्वितीयं वाक्यम्। संनिधानाच्च दाधामर्थे यो वर्तते स घुसंज्ञ इति प्रकृतीनामपि सिध्यति' इति निरस्तम्। संभवत्येकवाक्यत्वे वाक्यभेदाश्रयणानौचित्यात्। **तत्रेति**। [3]'नेर्गद' इति सूत्रे। **मार्थं प्रकृतिग्रहणं कर्तव्यमिति**। घुमाप्रकृतीति शेषः। **तत्पुरस्तादिति**। 'घुप्रकृतिमा'[4] इत्येवं माशब्दात् पूर्वं प्रकृतिशब्दं पठित्वा [5]'देहलीदीपन्यायेन वा यथाश्रुतपाठमेवाश्रित्य लक्ष्यानुसारेण वा घुप्रकृतौ माप्रकृतौ चेति व्याख्यास्यामीति भावः। **क्रियत इति**। [6]'नेर्गद' इति सूत्रे माशब्दात् पूर्वत्र परत्र वेति शेषः। **प्रनिमिनोतीति**। [7]'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वविधानाद् भवति माप्रकृतित्वमनयोरिति भावः। **ङित इति**। 'घुप्रकृतिमाङ' इति वा 'घुमाङ्प्रकृति' इति वा तत्र पठिष्यामीति भावः। **दोष एवैतस्या इति**। एवकारो भिन्नक्रमोऽप्यर्थः, [8]'एतस्या अप्ययं निषेध इत्यर्थः। **गामादाग्रहणेष्विति**। 'गामादाधाग्रहणेषु' इति पाठो न्याय्यः। लेखकप्रमादेन क्वचिद्धाशब्दस्त्रुटितः। तन्मूलकेष्वपि पुस्तकेषु स एव पाठ इत्यन्धपरम्परया धाशब्दरहितपाठ एव सर्वैरादृतः। **अविशेष इति**। लक्षणलुग्विकरणाननुबन्धकसहचरितपरिभाषाकृतविशेषो नाश्रीयते, एतासां सर्वासामत्र निवृत्तत्वादिति भावः। तत्र लक्षणसहचरितलुग्विकरणपरिभाषाभिः 'डु दाञ् दाने' इत्यस्य ग्रहणं प्राप्तम्। अननुबन्धकलुग्विकरणपरिभाषाभ्यां 'दो अवखण्डने' इत्यस्य। लक्षणलुग्विकरणपरिभाषाभ्यां 'दाण् दाने' इत्यस्य। लुग्विकरणपरिभाषामात्रेण 'देङ् रक्षणे' इत्यस्य 'दैप् शोधने' इत्यस्य च। लक्षणपरिभाषामात्रेण 'दाप् लवने' इत्यस्य। लक्षणसहचरितपरिभाषाभ्यां 'डु धाञ् धारणपोषणयोः' इत्यस्य। धेटस्तु केनापि वचनेन ग्रहणं न प्राप्तम्। एवं स्थिते गामादाधाग्रहणवचनेन तद्विशेषानाश्रयणे बोधिते दोदेङ्धेटां कृतात्वानां, दाण्दाञ्धाञां स्वतः सिद्धात्वानां च घुसंज्ञा सिद्धा। तत्र दाधाग्रहणांशे प्रकृतसूत्रापेक्षं सामान्यतोऽविशेषज्ञापकं प्रकृतसूत्रस्थमदाब्ग्रहणम्। यदि प्रकृतसूत्रे लक्षणादिपरिभाषाकृतविशेषाश्रयणं स्यात् तदा लक्षणलुग्विकरणसहचरितपरिभाषाभिर्दाञ एव दाशब्देन ग्रहणं स्यात्, न तु दोदेङ्दाण्दाप्दैपामिति 'अदाप्'-ग्रहणं दैप्दाप्प्रतिषेधपरं व्यर्थं स्यात्। कृतं तु तत् प्रकृतसूत्रे उक्तपरिभाषाकृतविशेषानाश्रयणं

---

[1] पा. सू. ८. ४. १७.
[2] परिभाषा ११५.
[3] पा. सू. ८. ४. १७.
[4] माङ इत्येवम् — ब. 'मा इत्येवम्' इत्येवं युक्तं प्रतिभाति। उपर्येव ङिद्ग्रहणस्य वक्ष्यमाणत्वात्।
[5] लौ. न्या. प्रथमभागे पृष्ठम् ३०.
[6] पा. सू. ८. ४. १७.
[7] पा. सू. ६. १. ५०.
[8] अस्या अप्ययं — ब.

ज्ञापयति। एतेन "अस्य चार्थस्य 'अदाप्' इति प्रतिषेधे सामान्यग्रहणार्थं कृतं दैपः पित्त्वं लिङ्गम्। अन्यथास्य लाक्षणिकत्वादत्र ग्रहणं न भविष्यतीति किं प्रतिषेधार्थेन पित्त्वेन। सामान्यापेक्षया च निरनुबन्धकलक्षणप्रतिपदोक्तपरिभाषाद्वयानुपस्थानमिह ज्ञापयतीति धेटोऽपि सिध्यति। [1]"दो दद्घोः'इत्यत्र वा द इत्येतद् धेटो निवृत्त्यर्थं सद् धेटो घुसंज्ञां ज्ञापयति। न हि दधातिनिवृत्त्यर्थं 'दः' इत्येतत्, तस्य [2]"दधातेर्हिः' इति ह्यादेशविधानाद् दद्भावाप्रसङ्गात्" इति निरस्तम्। अदाब्ग्रहणस्यैव लक्षणसहचरिताननुबन्धकलुग्विकरणपरिभाषा[3]चतुष्टयाप्रवृत्तिज्ञापकताश्रयणौचित्येन तदपहाय तत्र सामान्यग्रहणार्थं कृतस्य दैपः पित्त्वस्य ज्ञापकताश्रयणानौचित्यात्। दैपः सानुबन्धकत्वासहचरितत्वयोरपि सत्त्वेन ते अपहाय लाक्षणिकत्वादग्रहणमित्युक्तौ सहचरितपरिभाषाया अप्रवृत्तेरपि तेन तन्मते ज्ञापयितुं शक्यत्वेन तदनुक्तौ च मानाभावाच्च। तस्मात् 'अदाप्' इति दाप्दैपोः प्रतिषेध एवोक्तपरिभाषाचतुष्टयस्य प्रकृतसूत्रेऽप्रवृत्तौ ज्ञापकः। दैपः पित्त्वं तु 'अदाप्' इत्यत्र सामान्यग्रहणार्थं सत् [4]"नानुबन्धकृतमनेजन्तत्वम्' इति परिभाषामात्रं ज्ञापयति। एवं च [5]"दो दद्घोः इत्यत्र द इत्यस्य न किंचिज्ज्ञापकत्वमाश्रयणीयमिति स्पष्टमेव सुधियाम्। यदि 'अदाप्'ग्रहणं दाग्रहणांश एवात्र तत्परिभाषाचतुष्टयाप्रवृत्तिं ज्ञापयतीत्याग्रहस्तर्हि तत्र द इत्यस्य धाग्रहणांशेऽत्र लक्षणसहचरितपरिभाषयोरप्रवृत्तेर्ज्ञापकत्वमस्तु। माग्रहणांशे तु विनिगमनाविरहादननुबन्धकलुग्विकरणलक्षणप्रतिपदोक्तपरिभाषाणां प्रवृत्तावप्यप्रवृत्तप्रायत्वेन तत्कृतविशेषाभावः। गाग्रहणांशे तु वाचनिक एवाविशेषः। 'गा स्तुतौ' इत्यस्यालुग्विकरणप्रतिपदोक्ताननुबन्धकस्य सत्त्वेन तस्यैव ग्रहणप्रसङ्गात्॥

[१, २३९–२४१]

(**नारायणीयम्**) येषामुपदेशगतानामनुकरणे दाधारूपसंपत्तिस्तेषां संज्ञेति विज्ञायमाने प्रकृतिग्रहणस्यानपेक्षितत्वात् प्रयोगे दाधारूपस्येदमनुकरणमिति पक्षे प्रकृतिग्रहणं चोद्यत इत्याह —**दाधेति**। **रूपान्तरेति**। शिद्विषयाणामित्यर्थः। जानन्नपि प्रयोजनमन्यथासिद्धिं मत्वा पृच्छतीत्याह — **दोदेडिति**। **आत्व इति**। [6]'अशिति' इति प्रसज्यप्रतिषेधादनैमित्तिकमात्वम्। एजन्तानुकरणे दोप्रभृतीनामशिद्विषयाणामनेजन्तत्वात् कथं संज्ञा, तत्राह — **कृतेति**। 'सर्वे सर्वपदादेशाः' इति मते स्थानिवद्भावः। प्रतीयमानमर्थान्तरं निरस्यन्नभिमतार्थं दर्शयति — **भवतेरिति**। अनात्वभूतानामपि सिद्ध्युपायो दर्शित इत्यत आह — **अस्येति**। तदनुकरणेऽस्याप्येतद्रूपोपपत्तिरेव प्रमाणमित्यत आह — **प्रक्रियेति**। प्रयोगगता अपि किं भेदेनानुक्रियन्ते उत दात्वेन धात्वेन चैकीकृताः। नाद्यः, प्रक्रियागौरवात्। अन्त्ये त्वेकवचनान्तयोरितरेतरयोगद्वन्द्वे द्विवचनप्रसङ्गः। समाहारश्चेन्नपुंसकप्रसङ्ग इत्याशङ्क्य पक्षद्वयमप्युपपादयति — **तदिति**। **निर्देश इति**। द्वन्द्व इति भावः। एजन्तानुकरणापेक्षयास्ति प्रक्रियालाघवमस्मिन्नपि पक्षे। लघुतरं तु पक्षं दर्शयन् द्वन्द्वे शङ्कितव्यं दोषं तदनङ्गीकारेण परिहरति — **सामान्येति**। कार्योदाहरणत्वाय सोपसर्गोदाहरणमित्याह — — **घुसंज्ञायामिति**। न्यायोऽयम्, न तु वचनमित्याह — [7]**लाक्षणिके हीति**। ददातियच्छत्यो-

---

[1] पा. सू. ७. ४. ४६.
[2] पा. सू. ७. ४. ४२.
[3] चतुष्टयप्रवृत्ति — ब.
[4] परिभाषा ७
[5] पा. सू. ७. ४. ४६.
[6] पा. सू. ६. १. ४५.
[7] प्रदीपे 'लाक्षणिके च' इत्यत्र 'लाक्षणिके हि' इति निर्णयसागरमुद्रिते पाठः, सोऽत्र स्वीकृतः॥ प्रदीपे 'नि, चौ, ह्' कोशेषु 'प्रणिदाता' इत्यादिः 'धेटः' इत्यन्तो ग्रन्थः, ततः

रेतद्रूपस्याधिकृतत्वादाह — **द्यतेरिति**। समस्ततया पाठे चिन्ता, न तु व्यस्ततया, तत्र संदेहाभावादित्याह — [1]**दाधेति**। संनिधानाद् [2]दाधां प्रकृतित्वमिदानीमशक्यं वक्तुम्, [3]दाधां प्रकृतित्वासंभवात्, अत आह — **ईत्वादेरिति**। ननु कर्मधारये प्रकृतिग्रहणमनर्थकं, [4]व्यावर्त्याभावात्। नैष दोषः, प्रकृतिग्रहणसामर्थ्यादवधारणमाश्रीयते — प्रकृतित्वमेव येषां न तु विकृतित्वमिति। तेन कृतात्वानां दोप्रभृतीनां व्यावृत्तिः। अत एव 'आत्वभूतानाम्' इत्येतद् दाणादिष्वनन्तरवाक्ये योजितम्। प्रतिपदोक्तपरिभाषालभ्यानुवादमात्रं चास्मिन् पक्षे प्रकृतिग्रहणम्। पूर्वमाकारान्तमात्रपरतया व्याख्यातम्, इदानीं तु प्रकृतिग्रहणादेव तद्विशेषपरतया व्याख्याति — **दाणिति**। [5]'प्रकृतयश्चैषाम्' इति किं पठनीयमित्यत आह — **प्रत्यासत्त्येति**। एतत्सूत्रानन्तरं प्रकृतयश्चेति वाच्यम्, न तु दाधापदेन समस्ततयेत्यर्थः। **एतद् द्वितीयमिति**। एकवाक्यत्वे यद्यप्यर्थे वर्तमाना दाधा इत्यव्यभिचारादविशेषणम्, दारयतौ व्यभिचारेऽप्यर्थवत्परिभाषया तद्वचवच्छेदः, तथापि संज्ञासंबन्धानुभवकाले दाधामर्थविशेषणत्वस्फूर्तिर्न स्यादित्यर्थवन्तो घुसंज्ञा इत्येतावल्लभ्यते, न तु दार्थाश्चेति। अतो वाक्यभेदाश्रयणम्। दाधा इत्यस्य षष्ठीविपरिणामेनार्थविशेषणत्वे दाधारूपाणां न स्यात्, उपलक्षणस्य कार्यानिन्वयात्। उपलक्ष्याकारसत्त्वेन तेषामपि सिद्धिकीर्तने प्रतिपत्तिगौरवमिति भावः। ननु पुरस्तादपकर्षणे 'घुप्रकृति' इति पाठे माप्रकृतेः कथं सिध्यति, तत्राह — **तदिति**। 'घुप्रकृति' इति षष्ठीसमासस्य न पदान्तरैर्द्वन्द्वः, किं तु प्रकृतिशब्दस्यैव। तत्र संनिधानाविशेषात् पूर्वोत्तरयोरुभयोः प्रकृतिर्गृह्यत इत्यर्थः। उपदेशे एजन्तानामात्वविधानादनयोश्चातथाभूतत्वादात्वप्राप्त्यभावात् कथं माप्रकृतित्वमित्यत आह — **मीनातीति**। भाष्ये **दोष इति**। अपवाद इत्यर्थः। 'दोषाः' इति बहुवचनान्तः पाठः प्रसिद्धः। तत्राविशेषपरिभाषाया[6] एकत्वेऽपि गादिविषयभेदात् कल्पितो भेदो द्रष्टव्यः। अस्या वाचनिकत्वं नेत्याह — [7]**अस्य चेति**। ननु दाग्रहणे लक्षणप्रतिपदोक्तपरिभाषाभावेऽपि निरनुबन्धकपरिभाषया सानुबन्धकानां न स्यात्। तथा धाग्रहणेऽविशेषपरिभाषाया अभावाल्लाक्षणिकधारूपस्य धेटो न स्यादित्यत आह — **सामान्येति**। सानुबन्धकदारूपस्य प्रतिषेधान्निरनुबन्धकपरिभाषाया अव्यापारो ज्ञापयितुं शक्य एव। **इहेति**। सूत्रे, न दाग्रहणे। 'सामान्यापेक्षया' इत्यत्र चैतत्सूत्रोपात्तविषयं ज्ञापकं न दामात्रविषयमिति विवक्षितम्। **धेटोऽपीति**। अपिशब्दात् सानुबन्धकदारूपाणामपि। इयं च परिभाषा पूर्वाचार्यपठिता। तदेकदेशार्थे च ज्ञापनमस्ति। तद्द्वारेण परिभाषाङ्गीकारो ज्ञाप्यते। सूत्रोपात्तविषयत्वे ज्ञापनस्य दाधाग्रहणेऽविशेष इति स्यात्, न तु दाधारूपेण परिभाषाज्ञापनमित्यतः प्रकारान्तरं धेटः संज्ञासिद्धये दर्शयति — **द इति**॥

[१, २४२–२४७]

(**लघुविवरणम्**) समानशब्दत्वमर्थत इति शङ्का स्यादित्यत आह — **समानेति**। प्रसज्य-

---

'लक्षणेति' इत्यादिः 'अन्तरङ्गा' इत्यन्तो ग्रन्थश्च समुपलभ्यते। मद्रपुरीमुद्रिते तु प्रथमं 'लक्षणेति' इत्यादिः 'अन्तरङ्गा' इत्यन्तो ग्रन्थः। ततः परं 'प्रणिदातेति' इत्यादि 'धेटः' इत्यन्तं च दृश्यते। अयमेव क्रमोऽत्रानुसृतः।

[1] दाधामिति — क.
[2] दाधाप्रकृतित्वम् — क.
[3] दाधाप्रकृतित्वासंभवात् — क.
[4] व्यावृत्त्यभावात् — क.
[5] प्रकृतिश्चैषामिति — क.
[6] गामादाग्रहणेष्विति परिभाषाया इत्यर्थः।
[7] अस्या इति — क.

मानस्याणो रपरत्वे तस्य च पूर्वान्तत्वाद् दार्धार्शब्दयोरेवार्थवत्त्वं न दाधाशब्दयोरित्यर्थवद्ग्रहण-परिभाषया घुसंज्ञा न भविष्यतीति शङ्कां निवर्तयन्नाह — **दृङ्धृङोरिति**। **अभ्युपगम्येति**। अर्थ-वद्ग्रहणपरिभाषानपेक्षयेति भावः। **तव्यस्येति**। यथायं प्रकारस्तथा "आद्यन्तौ टकितौ' इत्यत्र प्रतिपादयिष्यते। ननु तव्यस्येतव्यः क्रियमणोऽपि[1] न पदादेश इत्यत आह — **पदशब्देनेति**॥

[१, २४२–२४७]

(**विवरणम्**) समानत्वं नार्थत इत्याह — **समानश्रुतीनामिति**। नन्वर्थवतोर्दाधोर्घुसंज्ञा, इह च दार्धारावर्थवन्तौ [3]न केवलौ दाधाशब्दाविति न घुसंज्ञाप्राप्तिरित्यत आह — **तौ चेति**। तदुप-पादयति – **पश्चादिति**। 'प्रणिदापयति' इत्यत्रेवेति भावः। पश्चादित्युक्तं प्रत्याह — **उरणिति**। प्रसङ्गवाचिनः स्थानशब्दस्यानुवृत्तेरित्यर्थः। **अभ्युपगम्येति**। 'अदाप्' इति प्रतिषेधेन परिभाषा-मात्रानुप[4]स्थानज्ञापनसंभवादित्यभिप्रायः। [5]**अत्र चेति**। दाधोरक्रियावाचित्वादिति भावः। **अत्रा-पीति**। परत्वान्नित्यत्वाच्च घुसंज्ञातः पूर्वं पुगिति भावः। 'अर्थवतः' इति [6]न तन्त्रमित्याह — **अनर्थकस्येति**। **इह** सूत्र इत्यर्थः। 'प्रनिदापयति' इत्यपि भवति प्रयोजकव्यापारस्योपसर्गयोग इत्याह — [7]**यदा चेत्यादिना**। अर्थवत्परामर्शिना [8]'तच्छब्देनार्थवतः प्रयोगो लक्ष्यत इत्यभि-प्रेत्याह — **प्रयोगेति**। 'युक्तम्' इति प्रश्नस्य प्रकृतोपयोगं दर्शयति — **ततश्चेति**। कूटस्थत्वं कदाचिदवयवविचालेऽपि स्यात्, अतो भाष्ये 'अविचालिभिः' इत्युक्तम्। तस्य विवरणम् — **अनपायेत्यादि**। द्वन्द्वान्मत्वर्थीये [9]'पश्चान्नञा समासः। नन्वादेशवादिनोऽपि मतं दुष्टमित्येतावता न स्वमते दोषः परिहृत इति तदभिधानं मुधेत्यत आह — **यश्चेति**। **प्रसङ्गवाचीति**। [10]"षष्ठी स्थानेयोगा' इत्यत्र वर्तमानबुद्ध्युन्मज्जननिमज्जने च यथाक्रममादेशस्य स्थानिनश्च। [11]यथा चैतत् तथा [12]"आद्यन्तौ टकितौ' इत्यादौ प्रतिपादयिष्यति भाष्यकारः। 'सर्वपद' इत्यत्रावयवकात्स्न्यं-वचनः सर्वशब्दः, [13]पद्यमानमिति [14]"घञर्थे कविधानम्' इति कः। **बुद्धीति**। एतच्च स्थानिवत्सूत्रे भाष्यकार एव वक्ष्यति। कार्यकालत्वात् [15]"संज्ञाया णत्वदेशस्था घुसंज्ञा। ततश्च दो दाबादेशे विधीयमाने णत्वघुसंज्ञे असिद्धे इति स्थानिनि न प्रवृत्ता घुसंज्ञा, आदेशे च दाशब्दोऽनर्थक इति घुसंज्ञा न प्रवर्तत इति णत्वाप्रसङ्ग इति चोदयति — **यद्येवमिति**। परिहरति — **नेति**। संनि-पातपरिभाषया दीङो दारूपाश्रया घुसंज्ञा न भविष्यति। नापि प्रकृतिग्रहणनिबन्धना, प्रकृति-ग्रहणस्य प्रत्याख्यातत्वादिति गूढाभिसंधेः प्रश्नो भाष्ये — **कुतः पुनरिति**। अभिसंधिमविदुषः परिहारः — [**रूपग्रहणादिति**।] प्रकृतिशब्देन संनिधानाद्दाप्रकृतिर्गृह्यत इत्युक्तम्। साक्षाच्च

---

[1] पा. सू. १. १. ४६.
[2] अपिशब्दो नास्ति — ण.
[3] न केवलदाधाशब्दाविति — ट.
[4] स्थानफलसंभवादिति — ट.
[5] प्रदीपे 'अत्र दाधापेक्षया' इत्यस्य स्थाने 'अत्र च दाधापेक्षया' इति पाठोऽभिमतः।
[6] न तन्मात्रमित्याह — अ.
[7] यदि चेत्यादिना — अ.
[8] तच्छब्देनार्थवता प्रयोगः — च, छ.
[9] पश्चान्नञ् समासः — च, छ.
[10] पा. सू. १. १. ४९.
[11] यथा चैवं तथा — च, छ, अ, ट.
[12] पा. सू. १. १. ४६.
[13] पदशब्दव्युत्पत्तिप्रदर्शनमिदम्।
[14] का. वा. ३. ३. ५८–४.
[15] संज्ञानां णत्व — अ.

दाप्रकृतिसंभवे न व्यवहितस्य [1]प्रकृतिशब्देनोपादानं न्याय्यमिति मत्वा भाष्ये [2]'न च प्रकृतिप्रकृतिः' इत्युक्तम्। **अकित्त्वेति**। एचो नान्यथा संभव इति भावः। **कित्त्वमिति**। अन्यथा संनियोगशिष्टत्वादित्वमपि नेति कार्याभावाद् घुसंज्ञा न प्रवर्तत इति भावः। **अगुणेति**। [3]गुणनिमित्तप्रत्ययस्य तदा प्रसङ्गाभावादित्यर्थः। पूर्व एव परिहारः परमार्थः, प्रामाणिकत्वात्। द्वितीयस्तु तद्विपरीतत्वाद्विपरीतः। प्रतिषेधसामर्थ्यादात्वोत्तरकालं[4] स्मृतानुबन्धनिमित्तः[5] प्रतिषेधो भविष्यतीत्यत आह — **दाप् लवन इति**। **तत्वमिति**। [6]'अच उपसर्गात्तः' इत्यनेन। 'तच्च' इत्युक्तं विघटयितुं 'शक्यं तावत्' इत्युक्तं भाष्ये। **धातुष्विति**। एकस्तावद्धान्तः पठ्यते। अपरोऽपि बान्तश्चर्त्वभूतो निर्दिष्ट इति भावः। **अनैमित्तिक इति**। [7]इत्संज्ञायां सत्यामेवेत्यर्थः। [8]नन्वात एव सानुबन्धकस्य निर्देशोपपत्तेर्मेङः कृतात्वस्य निर्देशोऽसिद्ध इत्यत आह — [9]**माङ इति हीति**। अन्तरङ्गत्वाद्व्यतीहारे यो माङिति संबन्धः, न तु बहिरङ्गत्वाद्व्यतीहारे यदा माङि[ती]ति भावः। नन्वसंदेहाय 'मेङः' इत्येव कस्मान्नोक्तमित्यत आह — **उदीचामिति**। श्यन्विकरणत्वं न व्यत्ययेनेति मन्तव्यमित्याह — **दिवादिष्विति** ॥

[१, २४२–२४७]

(**उद्द्योतनम्**) वार्तिके शब्दपदं श्रुतिपरम्। तेन श्रुतिसाम्यं विवक्षितं नार्थसाम्यमित्याह — **समानश्रुतीनामिति**। **दृङ्धृङोरिति**। दृङ् आदरे, धृङ् [10]स्थैर्ये तुदादी। नन्वर्थवद्ग्रहणपरिभाषयात्र घुसंज्ञा न भविष्यति, अत आह — **तौ चेति**। तदुपपादयति — **पश्चादिति**। [11]'प्रणिदापयति' [12]इत्यत्रेवेति भावः। परिभाषायाः समूलत्वमाह — **अर्थवदिति**। **ज्ञापितत्वात्** रूपग्रहणेनेत्यादिः। 'पश्चात्' इति यदुक्तं तत्राह — **उरणिति**। प्रसङ्गवाचिनः स्थानशब्दस्यानुवृत्त्या प्रसज्यमान एवाण् रपरो भवति, न तु निष्पन्नस्याणः पश्चाद्रपरत्वमित्यर्थः। **तदवयवयोः** दाधाशब्दयोः। **अभ्युपगम्येति**। न तु पूर्वापरितोषेणेत्यर्थः। [13]'अंदाप्' इति प्रतिषेधेन दैपः पित्त्वेन च लक्षणप्रतिपदोक्तनिरनुबन्धकपरिभाषाद्वयस्येवार्थवद्ग्रहणपरिभाषाया अप्यप्रवृत्तिज्ञापनसंभवादिति केचित्। तच्चिन्त्यम्, तज्ज्ञापने सामर्थ्याभावात्। परिहारं विशदयति — [14]**घुसंज्ञेति**। **दाधापेक्षयेति**। तावन्मात्रस्य क्रियावाचित्वाभावादित्यर्थः। **अत्रापीति**। परत्वान्नित्यत्वाच्च घुसंज्ञातः पूर्वं पुगिति भावः। आगमस्य व्यपदेशाविघातकत्वमुपपादयति — **लब्धात्मकस्येति**। **भावस्य** वस्तुनः। अङ्गच्छेदग्रहणं किंचिद्वर्णलोपेऽपि व्यपदेशहानिर्नास्तीत्यत्र दृष्टान्तार्थम्। घुसंज्ञायाः पुगपेक्षया प्राथम्यमाह — **अन्तरङ्गत्वादिति**। दामात्राश्रयत्वात् संज्ञान्तरङ्गा। प्रकृतिप्रत्ययाः

---

[1] प्रकृतिशब्दोपादानं न न्याय्यमिति — अ.
[2] 'न च प्रकृतेः प्रकृतिः' इति भाष्ये 'न च प्रकृतिप्रकृतिः' इति निर्णयसागरमुद्रिते पाठो दृश्यते। सोऽत्रादृतः।
[3] गुणनिमित्तस्य प्रत्ययस्य — अ.
[4] कालस्मृतानुबन्ध — ट.
[5] निमित्तप्रतिषेधः — च, छ.
[6] पा. सू. ७. ४. ४७.
[7] संज्ञायां — अ; असंज्ञायां — ट.
[8] नन्वकारत एव — च, छ, ट.; नन्वत एव — अ.
[9] प्रदीपे 'माङ इति मेङो ग्रहणम्' इत्यत्र 'माङ इति हि मेङो ग्रहणम्' इति पाठोऽभिमतः।
[10] अवस्थान इत्यस्यार्थानुवादोऽयमिति भाति।
[11] प्रणिधापयति — म, इ, उ, ऊ.
[12] इत्यत्रैवेति — अ, म, इ.
[13] अदाबित्यादिना विवरणोक्तिरनूद्य खण्ड्यते।
[14] घुसंज्ञकेति — अ, आ, इ, उ, ऊ, ॠ.

श्रयस्त्वागमो बहिरङ्गः। वार्तिके 'अर्थवतः' इति प्रकृताभिप्रायेणोक्तम्, न तु [1]न्याये तस्योपयोग इत्याह — **अनर्थकस्यापीति। इह त्विति।** अस्मिन् सूत्र इत्यर्थः। 'प्रणिदापयति' इति पाक्षिकं णत्वम्, 'प्रनिदापयति' इत्यपि भवतीत्याह — **यदेति। प्रकृत्यर्थः** दाधार्थः। **ण्यर्थः** [2]प्रयोजक-व्यापाररूपेत्यादिः। अर्थवत्परामर्शिना तच्छब्देनार्थवतः प्रयोगो लक्ष्यते, शब्दस्वरूपे [3]उपकारकत्व-लक्षणगुणत्वासंभवादित्यभिप्रेत्याह — **प्रयोगेति**। भाष्ये **लवितेति**। [4]"सार्वधातुकार्धधातुकयोः' इति गुणेऽतो लोपे चेट्सहितमार्धधातुकं गृह्यत इत्यर्थः। 'युक्तम्' इत्यस्य प्रकृतोपयोगमाह — **ततश्चेति। दोषः** 'प्रणिदापयति' इत्यत्र णत्वाभावदोषः। भाष्ये, कूटस्थत्वं कदाचिदवयवविचालेऽपि स्यात्, अतः 'अविचालिभिः' इत्युक्तम्। तस्य विवरणम् — **अनपायेति**। द्वन्द्वान्मत्वर्थीय इनिः। पश्चान्नञ्समासः। नन्वादेशपक्षस्यापि दुष्टत्वेन स्वमते दोषो नोद्धृतः, अत आह — **यश्चेति**। उभयवादिसमाधेयं तदित्यर्थः। **प्रसङ्गवाचीति**। [5]"षष्ठी स्थानेयोगा' [6]इत्यत्रत्यः स्थानशब्द इत्यर्थः। **बुद्धीति**। स्थानिबुद्धिर्न कर्तव्या, किं त्वादेशबुद्धिरित्येवंरूपेणेत्यर्थः। **नित्यत्वम्** अनपायोपजन-[7]विकारित्वरूपम्। नित्यत्वसिद्धये आगमानामप्यादेशत्वमङ्गीक्रियते। तथा च समाधानसाम्यमिति भाष्यार्थः। तदुपपादयति — **इड् भवतीति**। पदशब्दस्य सुप्तिङन्तपरत्वे 'तव्यस्येतव्य आदेशः' इत्ययुक्तम्, अत आह — **पदशब्देनेति**। 'सर्वपद' इत्यत्रावयवकात्स्न्र्ये सर्वशब्दार्थः। पद्यमान-मिति [8]"घञर्थे कविधानम्' इति [9]कः। **बुद्धीति**। एतच्च स्थानिवत्सूत्रे [10]भाष्यकार एव वक्ष्यति। आदेशपक्षे 'प्रणिदापयति' इत्यत्र णत्वाभावं शङ्कते — **यदीति**। यद्यपि दा इत्यस्य पूर्वं घुसंज्ञायां पश्चाद्दाबादेशे स्थानिवद्भावेन तस्यापि घुसंज्ञा स्यादेव, तथापि कार्यकालपक्षे [11]संज्ञाया आदेशा-नन्तरभावित्वाद्दोषोपन्यासः। **नैष दोष इति**। वस्तुतो नित्यानामपि प्रक्रियाकालेऽनित्यत्वा-रोपेण सोच्यत इत्यर्थः। एतच्छास्त्रकृतोऽपि संमतमित्याह — **अन्यथेति**। 'दीङ् क्षये' इत्यस्य लुङि [12]'मीनाति' इत्यात्वे उपादास्तेति रूपमिति वदन् घुसंज्ञाप्राप्तिमाह — **उपादीस्त इति**। दीङो दारूपाश्रया घुसंज्ञा संनिपातपरिभाषया न भविष्यति, प्रकृतिग्रहणप्रत्याख्यानाच्च न तन्निबन्धनेति गूढाभिसंधिः पृच्छति — भाष्ये **कुतः पुनरिति**। आशयमविद्वान् परिहरति — भाष्ये **रूपग्रहणा-दिति**। **एचो विषय इति**। 'दाता' इत्यत्र 'दी तृच्' इति स्थिते गुणमकृत्वा ईकारस्यैवात्वं क्रियत इतीकारान्तस्य दाप्रकृतित्वमित्यर्थः। **एचः स्थान इति**। परत्वात् पूर्वं गुणेन भाव्यम्। [13]'आदेचः' इति स्थानिपरस्य 'एचः' [14]इत्यनुवृत्तस्य स्वप्रकृतिभूतेकारादिलक्षकत्वे मानाभावाच्चेत्यर्थः। भाष्ये [15]**न च प्रकृतिप्रकृतिरिति**। प्रकृतिशब्देन संनिधानाद् दाप्रकृतिर्गृह्यत इत्युक्तम्। तत्र साक्षात् प्रकृतिग्रहणमेव युक्तमिति भावः। **अकित्त्वेति**। अन्यथा एचोऽसंभवादित्यर्थः। **कित्त्व-**

---

[1] न्यायेन तस्योपयोगः — म, उ.

[2] प्रयोजकरूपेत्यादिः — म, उ.

[3] उपकारत्वलक्षण — अ, म, आ, इ, उ, ऊ, ऋ. कोशेषु एवमुपलम्भेऽप्यर्थौचित्यात् 'उपकारकत्वलक्षण' इति शोधितम्।

[4] पा. सू. ७. ३. ८४.

[5] पा. सू. १. १. ४९.

[6] इत्यत्र स्थानशब्द इत्यर्थः — म, उ.

[7] विकारित्वलक्षणम् — अ.

[8] का. वा. ३. ३. ५८–४.

[9] पदशब्द इति भावः।

[10] भाष्य एव वक्ष्यति — म, आ, उ, ऋ.

[11] संज्ञाया अनन्तर — म, उ.

[12] पा. सू. ६. १. ५०.

[13] पा. सू. ६. १. ४५.

[14] इत्यनुवृत्तस्य प्रकृति — म, आ, उ.

[15] भाष्ये 'न च प्रकृतेः प्रकृतिः' इत्यस्य स्थाने 'न च प्रकृतिप्रकृतिः' इति निर्णयसागरीये पाठः।

मिति। अन्यथा संनियोग[1]शिष्टत्वादित्वमपि नेति कार्याभावाद् घुसंज्ञायामपि दोषाभाव इति भावः। **अगुणविषयत्वादिति**। तदानीं गुणनिमित्तप्रत्ययसन्निधानाभावादिति भावः। [2]अत्र पूर्वपरिहार एव प्रामाणिको नोत्तर इत्याहुः। अत्र 'न हि तदनुकरणस्यात्वमस्ति' इत्यस्य किं समाधानमिति चिन्त्यम्। प्रतिषेधसामर्थ्यादात्वोत्तरकालं स्मृतानुबन्धस्य प्रतिषेधो भविष्यति, अत आह — **दाप् लवन इति**। **तत्वमिति**। [3]'अच उपसर्गात्तः' इत्यनेन। 'अपित्' इत्यनुच्यमानेऽपि 'प्रणिदापयति' इत्यस्य प्रतिषेधो न भविष्यतीत्याह — भाष्ये **शक्यमिति**। 'अदाप्' इति बकारान्तस्यैव [4]'वावसाने' इति चर्त्वेन पकारान्तत्वेन पाठ इति भावः। नन्वेवं [5]'दाब्' लवने इत्यस्य प्रतिषेधेऽपि दैपो न प्राप्नोति, अत आह — [6]**बान्ताविति**। एकस्तावत् [7]पठचत एव, अपरोऽपि बान्तश्चर्त्वभूतो निर्दिष्ट इति भावः। भाष्ये [8]"शक्यं तावदेवं वक्तुम्, सूत्रं च भिद्यते' [9]इति 'पित्प्रतिषेधाद्वा' इति वार्तिकं निरस्तम्। इत्संज्ञानिमित्तकत्वात् 'अनैमित्तिकः' इत्ययुक्तम्, अत आह — **इत्संज्ञायामिति**। सा चोच्चारणसमय एव प्रवर्तत इति भावः। 'तावत्येव' इत्यस्य तात्पर्यमाह — **प्रयोग इति**। नन्वनैमित्तिकानुबन्धलोपेनेष्ट[10]सिद्धौ ज्ञापकोपन्यासो व्यर्थः, अत आह — **अनुबन्धानामिति**। ननु माङ एवायं निर्देशः, न मेङः, अत आह — **न माङ इति**। [11]**व्यतिहारेण नित्ययोगादिति**। अन्तरङ्गाद्व्यतिहारे[12] यो माङिति संबन्धः, न तु बहिरङ्गत्वाद्व्यतिहारे [13]यदा माङिति भावः। **व्यतिमिमीत इति**। 'माङ माने शब्दे च' ह्वादिः। शपः श्लुः, द्वित्वम् [14]"भृञामित्' इत्यभ्यासस्येत्वम्। [15]'घुमास्था' इतीत्वम्। कर्म[16]व्यतिहारद्योतनाय [17]व्यतिशब्दप्रयोगः। ननु 'मेङ प्रणिदाने' इति पाठात् मेङोऽपि कादाचित्क एव [18]व्यतिहारयोगः, अत आह — **प्रणिदानमिति**। असंदेहाय 'मेङः' इत्येव कस्मान्नोक्तम्, अत आह — **उदीचामिति**। श्यन्विकरणत्वं न व्यत्यनेन मन्तव्यमित्याह — **दिवादिष्विति** ॥

[१, २४२–२४७]

(**रत्नप्रकाशः**) इदानीं [19]"गामादा' इति वचनमर्थवत्परिभाषाकृतविशेषमपि वारयतीति मन्यमान आह — **समानशब्दप्रतिषेध इति**। **प्रनिदारयतीति**। 'दृङ आदरे' इत्यतो णिच्। **प्रनिधारयतीति**। 'धृङ अवस्थाने' णिच्। तत्र वृद्धौ कृतायां दारूपो धारूपश्च वर्तत इति तयोर्घु-

---

[1] शिष्टत्वेनेत्वमपि — म, इ, उ, ऊ.
[2] विवरणकृदुक्तिमनूद्य खण्डयति—अत्रेत्यादिना।
[3] पा. सू. ७. ४. ४७.
[4] पा. सू. ८. ४. ५६.
[5] दाप् लवने — म, उ.
[6] 'बान्ताविति' इत्यस्यानन्तरं 'धातुष्विति' इति प्रतीकोऽधिकः — म, आ, इ, उ, ऊ, ऋ.
[7] दाब् लवन इतीतिभावः।
[8] 'शक्यं तावत्' इत्यादि 'सूत्रं च भिद्यते' इत्यन्तं भाष्यस्यार्थानुवादो बोध्यः। तेनान्नंभट्टाभिमतत्वेन तादृशभाष्यपाठकल्पने पूर्वग्रन्थास्वारस्यं स्यादिति भाति।
[9] इति ग्रन्थेनेत्यर्थः।
[10] सिद्धेः — अ.
[11] व्यतीहारेण — अ.
[12] व्यतीहारे — अ.
[13] यथा — म, आ, उ.
[14] पा. सू. ७. ४. ७६.
[15] पा. सू. ६. ४. ६६.
[16] व्यतीहार — अ.
[17] व्यतिप्रयोगः — म, आ, इ, उ, ऊ.
[18] व्यतीहार — अ.
[19] परिभाषा ११५.

संज्ञायां [1]'नेर्गद' इति णत्वं स्यादिति भावः। एतेन 'तौ चार्थवन्तौ। पश्चात्तु रपरत्वं क्रियमाणमागमभूतत्वादन्यत्वं न करोतीति प्राप्तिः' इति निरस्तम्। अर्थवत्परिभाषयातिप्रसङ्गवारणस्य भाष्यकृता कृतत्वेन [2]'गामादाग्रहणेष्वविशेषः' इत्यत्र परिभाषाविशेषानुपादानेन चार्थवत्परिभाषाया अप्रवृत्तिमाश्रित्यैव [3]शङ्काया वर्णनीयत्वात्। तद्वर्णितरीत्या दूषणस्य दृढत्वेन पक्षान्तराश्रयेण तत्समाधानस्यापि मौर्ख्यमात्रावहत्वात्। तस्य तादृशाशयकत्वे 'यद्येवमिहापि' इति तदीयोक्तेरुत्तरकालं प्रवर्तमानाया अयुक्ततापत्तेश्च। **अर्थवद्ग्रहणादिति**। एतेन [4]"'अर्थवद्ग्रहणे नानर्थकस्य' इत्यस्य [5]"'स्वं रूपम्' इत्यनेन ज्ञापितत्वा[6]दर्थवत्परिभाषया अदाद्ग्रहणानर्थक्यं न संपादितमिति तदप्रवृत्तिं तन्न ज्ञापयति। [7]"'उरण् रपरः' इति चाण् विधीयमान एव रपरो भवतीति वृद्धिः क्रियमाणा "'आर्' भवतीति दार्धारोरेवार्थवत्त्वं न तु तदवयवयोरिति नास्ति तयोर्घुसंज्ञा" इति निरस्तम्। [8]"'स्वं रूपम्' इत्यनेनार्थवत्परिभाषाया व्यर्थीकृतत्वस्यैव भाष्यारूढत्वेन ज्ञापितत्वे मानाभावात्। परेण सार्वधातुकार्धधातुकगुणेन वृद्धेर्बाधनाच्च। **न चैतावर्थवन्ताविति**। अत एव तयोर्घुसंज्ञाभावात् 'प्रनिदारयति' इत्यादौ णत्वं न भवतीति भावः। अर्थवत्परिभाषाया अत्राप्रवृत्तिमभ्युपेत्याह — **अनुपसर्गाद्वेति**। भावप्रधानो निर्देशः, अनुपसर्गत्वाद्वेत्यर्थः। णत्वाभावः पूर्वं दाघोर्घुत्वाभावेन साधितः, इदानीं प्रस्योपसर्गत्वाभावेनेति वाशब्दोऽप्युपपन्नः। **न चैतौ दाधौ प्रति क्रियायोग इति**। एतयोः क्रियावाचकत्वाभावादिति भावः। यस्य धातोर्वाच्या या क्रिया तद्द्योतकः प्रादिस्तं धातुं प्रत्युपसर्ग इति हि 'यत्क्रियायुक्ताः' इति वचनस्यार्थः। अतस्तत्र प्रस्य दाधौ प्रत्युपसर्गत्वाभावादुपसर्गत्वप्रयोजकवुनिमित्तकं णत्वं तदप्रयोजके घौ परतो न भवतीति तद्भाष्यशेषो बोध्यः। **यद्येवमिति**। तत्र दाधोर्घुत्वाभावेन वा प्रस्योपसर्गत्वाभावेन वा णत्वं न स्यादिति यद्युच्यत इत्यर्थः। **न वार्थवत इति**। अन्तरङ्गत्वेन घुसंज्ञायां सत्यां पुग् जात इति पुग्विशिष्टो घुग्रहणेन गृह्यत इति तस्यार्थवत्त्वमुपसर्गताप्रयोजकत्वं चास्तीति 'प्रणिदापयति' इत्यादौ णत्वं भविष्यतीति भावः। दार्धार्प्रकृत्योर्दृधृशब्दयोस्तु पूर्वं घुसंज्ञा न प्रवृत्तैव। पश्चादपि न भवति, तत्र दाधोरनर्थकत्वात्। **तद्गुणीभूत इति**। तदवयवः सन्नित्यर्थः। एतेन 'प्रयोगसंपादन उपकारक इत्यर्थः' इति निरस्तम्। अवयवत्वातिरिक्तोपकारकतायास्तत्राप्रसिद्धत्वेन वक्रताश्रयणानौचित्यात्। **अर्थवद्ग्रहणेनेति**। अर्थवानेव येन गृह्यते तेनेत्यर्थः। तेन 'अवादिपम्' इत्यत्र दस्य चर्त्वम्, 'अपाक्षीत्' इत्यत्र [10]'स्कोः' इति कलोपः, 'अचकासिष्टाम्' इत्यादौ [11]'सः स्यार्धधातुके' इति तत्वं च न भवति। एतेन 'लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचयौ व्यपदेशहानिं न कुरुतः। यथा देवदत्तस्याङ्गाधिक्याङ्गच्छेदौ। इहाप्यन्तरङ्गत्वात् कृतायां दाधोर्घुसंज्ञायां पश्चादुत्पन्नः पुगागमो घुव्यपदेशं न निवर्तयति, नाप्यर्थवत्त्वमित्यदोषः' इति निरस्तम्। 'दृष्टान्तस्यापि पुरुषारम्भो निवर्तको भवति' इति भाष्यकृतैव स्थानिवत्सूत्रे [12]'आद्यन्तौ टकितौ' इति सूत्रे चोक्तत्वेन शब्दस्वरूपविशेषे कृतायाः संज्ञाया लोकदृष्टान्तेन शब्दान्तरपरतायाः असंभवात्। आगमप्रवृत्त्युत्तरं तदागमविनिर्मुक्तस्यार्थवत्त्वासंभवादर्थवत्त्वनिबन्धनसंज्ञाया अपि तत्रागमविनिर्मुक्ते व्यप्रायिकत्वेनोत्प्रेक्ष्यानूद्यत इति बोध्यम्।

---

[1] पा. सू. ८. ४. १७.
[2] परिभाषा ११५.
[3] इदं छायायां दूषितम्।
[4] परिभाषा १४.
[5] पा. सू. १. १. ६८.
[6] यद्यप्येतद्वाक्यं प्रदीपे न दृश्यते, तथाप्याभि-
[7] पा. सू. १. १. ५१.
[8] 'रपरा' इत्येतदर्थानुवादः।
[9] पा. सू. १. १. ६८.
[10] पा. सू. ८. २. २९.
[11] पा. सू. ८. ४. ४९.
[12] पा. सू. १. १. ४६.

वस्थापनासंभवाच्च। न हि भूयास्तामित्यादौ यासुड्विनिर्मुक्तस्य तकारादेः प्रत्ययत्वमार्धधातुकत्वं वास्ति। तत्सत्त्वे हि इट् स्यात्। तस्माज्ज्ञापकसिद्धैव प्रकृतपरिभाषाङ्गीकर्तव्या। ज्ञापकं चास्यां [1]'णेरनिटि' इत्यनिड्ग्रहणम्। यदीयं न स्यात् तदा 'कारयिता' इत्यादाविटा व्यवधानेनैव णेर्लोपाभावे [2]किं तेनेति। यदप्युक्तम् 'अनर्थकस्याप्यागमो व्यपदेशहानिं न करोति, यथा सत्यपि रेफेऽकाराकारयोर्गुणवृद्धिव्यपदेशाहानिः। इह त्वर्थवतो ग्रहणादर्थवत इत्युक्तम्' इति। तदपि न, अर्थवद्ग्रहणबलेनैव तत्राकाराकारयोर्गुणवृद्धिव्यपदेशाहानेर्वर्णनीयत्वेनार्थवद्ग्रहणानर्थक्यापादनानौचित्यात्। प्रकृतपरिभाषया हि दाप्रभृतिषु विद्यमाना घ्वादिसंज्ञा पुगागमादिविशिष्टेषु दाबादिषु प्रवर्तते, न तु पुगागमादिषु सत्स्वपि दाप्रभृतीनां पुगादिविनिर्मुक्तानां घ्वादिसंज्ञास्तीति। तथात्वे भूयादित्यादाविडादिप्रसङ्गात्। **युक्तं पुनरिति**। युक्तं वेत्यर्थः। **स्यादिति**। इति यत् तदिति शेषः। यद्यपि [3]'शाखाचन्द्रादिन्यायेनासत्येव वर्त्मनि स्थित्वा सत्यप्रतीतेः संपादनीयत्वेन प्रक्रियादशायां काल्पनिकागमागमिभावप्रकृतिविकारभावयोरङ्गीकारेऽपि न नित्यत्वहानिः। वस्तुतस्तु वर्णानां नित्यत्वं नास्तीति पस्पशाह्निके [4]'सिद्धे शब्दार्थसंबन्धे' इति वार्तिके प्रपञ्चितम्। किं च पुक आगमत्वे पुगन्तस्यादेशत्वेऽपि दाप्धापोर्घुसंज्ञा भवत्येवेति प्रकृतानुपयुक्तोऽयं विचारः। तथापि कुतर्कवासनावासितान्तःकरणस्य वैयाकरणमते नित्याः शब्दा इति मन्यमानस्य लब्धावसरस्य प्रश्नोऽयम्। अयं तु तस्याशयः — अस्मिन् शास्त्रे आगमविधायकं सूत्रं सर्वमनुपपन्नम्, नित्येषु शब्देष्वागमागमिभावायोगात्। तथा च 'अर्थवत आगमः' इत्यादिप्रकृतपरिभाषाप्यागमाश्रयानुपपन्नाः इति। एतेन 'ततश्च नित्येष्वागमविरोधात् तद्द्वारेणादेशविधानाद् दाप्शब्द एवार्थवान् न दाशब्द इति तदवस्थो दोष इति भावः' इति निरस्तम्। आगमपक्षेऽपि दाप्शब्दस्यैवार्थवत्त्वं न दाशब्दस्येत्याश्रित्यैव 'प्रणिदापयति' इत्यत्र णत्वस्य साधनीयत्वेनादेशपक्षेऽपि तथैव तस्य साधयितुमुचितत्वेन तद्दूषणास्पर्शात्। 'आदेशास्तर्हीमे भविष्यन्ति' इति सिद्धान्तिवचनानुरोधेन शङ्कोपपादनानौचित्याच्च। प्रष्टुराशयं बुद्ध्वा [5]'तुष्यतु दुर्जनः' इति न्यायेनाह — **नेति**। 'युक्तम्' इति प्रश्नगतमत्रानुषज्यते, न युक्तमित्यर्थः। अयुक्तत्वमेवोपपादयति — **नित्येष्वित्यादिना**। **शब्दोपजन इति**। उपजायते स्वरूपान्तरमनेनेति **उपजनः** अवयवः। बाहुलकात् करणे घञ्। [6]'जनिवध्योश्च' इति वृद्ध्यभावः। शब्दस्य शब्दात्मको वोपजनस्तथा। तदेवं शङ्कित्राशयानुरोधेनागमागमिभावानुपपत्तिं स्वमुखेनोक्त्वा शङ्कितृमुखेनादेशादेशिभावोपपत्तिं वाचयित्वा तद्द्वारागमागमिभावं स्थापयिष्यामीत्याशयेन पृच्छति — **अथ युक्तमिति**। शङ्कितार्ह — **बाढं युक्तमिति**। स एव तदुपपादयति — **शब्दान्तरैरिति**। समाधातार्ह — **आदेशास्तर्हीति**। **अनागमकानामिति**। दाप्रभृतीनाम्। **सागमका इति**। पुगादिद्वारा दाबादय आदेशा एव तत्तदागमविधिभिर्विधीयन्त इति भावः। आगमद्वारादेशविधानं कथमुपपद्यत इत्याशयेन पृच्छति — **तत्कथमिति**। [7]'एरुः' इत्यादौ यथेकारस्योकारादेशविधानद्वारा तेस्तुर्विधीयते तथागमद्वारागम्येवादेशत्वेन विधीयत इत्याशयेनाह — **सर्व इति**। पुगादय उकारादयश्च सर्वे सर्वस्य पदस्य प्रकृतिप्रत्ययादिरूपस्यार्थवत आदेशा भवन्तीत्यर्थः। **एकदेशविकार इति**। अवयवेन विकारे सतीत्यर्थः। यस्य प्रकृतिप्रत्ययादेरवयवस्य लोपो वा भावरूपो वादेशो विधीयते स हि प्रकृतिप्रत्ययादिरवयवेन विकृतो भवति। तथागमविधानेऽपि तथात्वेऽङ्गीक्रियमाणे हि तस्यानित्यत्वं स्यात्। अतः सर्वपदादेशत्वमेव सर्वेषामभ्यु-

---

[1] पा. सू. ६. ४. ५१.
[2] इदमुपरितनं च दूषितं छायायाम्।
[3] लौ. न्या. द्वितीयभागे पृष्ठम् ७९.
[4] का. वा. १.
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[6] पा. सू. ७. ३. ३५.
[7] पा. सू. ३. ४. ८६.

पेयमिति भावः । सर्वादेशत्वाभ्युपगमे हि विध्याद्यर्थविशेषे तेः प्रसङ्गे तुः साधुर्भवति, दाप्रसङ्गे दाप् साधुर्भवतीति बोधसंभवेन विकारः कस्यापि न भवतीति युज्यते नित्यत्वम् । एतेन 'यद्यपि सर्वविकारेऽप्यनित्यत्वं यथा पिटरस्थपयसः पाकादिषु, तथापि विकाराभावप्रतिपादनपरमेतत्' इति निरस्तम् । शब्दस्यावयवनैरपेक्ष्येण सर्वविकारासंभवात् । तत्संभवे 'सर्वे सर्वपदादेशाः' इति पक्षस्यासमतत्वापत्तेश्च । यदप्युक्तम् 'यद्येवं दाशब्दस्य दाप्शब्द आदेशः क्रियत इति दा-शब्दस्यानर्थक्यप्रसङ्गः । नैष दोषः, नित्यतासमर्थनायादेशपक्ष आश्रितः । प्रक्रियायां तु कल्पिता-यामागमागमिभाव एव । अन्यथागमादेशयोर्भेदेन व्यवहारो न स्यात्' इति । तदपि न, आगमा-गमिभावप्रदर्शनद्वारैवादेशादेशिभावस्य भाष्यकृता 'सागमका आदेशाः' इति वदता प्रदर्शितत्वेना-देशादेशिभावपक्षे दूषणदानस्यागमागमिभावपक्षाश्रयेण समाधानस्य चायुक्तत्वात् । पक्षद्वयेऽपि दाप्शब्दान्तर्गतस्य दाशब्दस्यार्थवत्ताया दुरुपपादताया उक्तत्वात् । आगमागमिभावस्यानिराकृतत्वेना-देशादेशिभावाद् भेदेन व्यवहारसंभवाच्च । ननु यथा 'सागमका आदेशाः' इति पक्षे आगमा-गमिभावस्यानिराकृतत्वेनादेशादेशिभावाद् भेदः, बुद्धिपरिकल्पितस्तु स आश्रित एव, तथा एक-देशविकारोऽपि तादृश आश्रीयतामिति चेत्, ओम् । गणयतीत्यादौ "अचः परस्मिन् पूर्वविधौ' इति स्थानिवद्भावोपपादनाय तस्यावश्यकत्वात् । तदेवं 'समानशब्दप्रतिषेधः' इत्यनर्थकातिप्रसङ्गा-पादकवार्तिकं निराकृत्यान्यदप्यतिप्रसङ्गापादकं निराकर्तुमुपन्यस्यति — **दीङः प्रतिषेध इति** । **उपा-दास्तेति** । दीङो लुङस्ते[२] सिचि [३]"मीनातिमिनोति' इत्यात्वम् । **प्रकृतिग्रहणाद्दोष इति** । अशित्ये-ञ्जिनमित्ते ईकारस्यैवात्वं विधीयत इति भावः । **न चेयं दाप्रकृतिरिति** । एच एव तत्रात्वं क्रियते । ल्यप्यप्येच आत्वविधानसामर्थ्येन [४]"क्ङिति च' इति गुणनिषेधाभावसंभवादिति भावः । **संनिपात-लक्षण इति** । अकित्वसंनिपातनिमित्तमात्वं घुसंज्ञाद्वारा तद्विघातककित्त्वनिमित्तं न भवतीति भावः । वस्तुतस्तु लावस्थायामडागमे कृते दाशब्दस्य तत्रार्थवत्त्वाभावाद् घुसंज्ञाप्रसक्तिरेव नास्ति । यथा-श्रुतभाष्यं तु 'विकरणविशिष्टस्याट्' इति पक्षे ज्ञेयम् । दीङस्तृजादावात्वे कृते 'प्रणिदाता' इत्यादौ णत्वं भवत्येव । अत एव हि 'दीङः प्रतिषेधः स्थाघ्वोरित्वे' इति विषयविशेष एव प्रतिषेध उक्तः । एतेन 'अन्ये त्वाहुः — निर्देश एवैजन्तानुकरणानामात्वे कृते दाण्दाञ्धाञां चैकशेषे द्वन्द्वे च 'दाधाः' इति निर्देशाद् दीङो नास्ति प्राप्तिः । न हि तदनुकरणस्यात्वमस्ति, अगुणविषयत्वात्' इति निरस्तम् । एजन्तानामनुकरणेऽप्यात्वासंभवस्योक्तत्वात् । दोदेङ्घेटामिव दीङोऽपि कृतात्वस्य ग्रहणसंभवेन तस्यापि घुत्वसंभवाच्च । **अवदातमिति** । घुत्वे सति [५]"अच उपसर्गात्तः' इति तत्वं स्यादिति भावः । **अनेजन्तत्वादिति** । पकारलोपे कृत एजन्तत्वेऽप्युपदेश एजन्तत्वाभावादिति भावः । **अनेकान्तत्वादिति** । कार्यविशेषलाभार्थमनुबन्धेष्ववयवत्वे आरोपितेऽपि परमार्थतोऽन-वयवत्वमेव । तथा च दैप उपदेशे एजन्तत्वादात्वे सत्युभयोरपि 'अदाप्' इति प्रतिषेधो भविष्यतीति भावः । 'अदाप्' इत्युक्ते पुगन्तस्यापि प्रतिषेधः स्यात् । अतः पित्प्रतिषेध एव युक्त इत्याह — **पित्प्रतिषेधाद्वेति** । 'अदाप्' इत्युक्तेऽपि न दोष इत्याह भाष्यकारः — **शक्यं तावदिति** । **बान्त-स्येति** । धातुपाठेऽपि बान्तावेव दाप्दैपौ पठनीयाविति भावः । [६]'तदनुबन्धकपरिभाषया त्वत्र

---

[१] पा. सू. १. १. ५७.
[२] तप्रत्यय इत्यर्थः ।
[३] पा. सू. ६. १. ५०.
[४] पा. सू. १. १. ५.
[५] पा. सू. ७. ४. ४७.

[६] सोऽनुबन्धो यस्य स तदनुबन्धकः । सूत्र-निर्दिष्टानुबन्धविशिष्टस्य ग्रहणे सति तद्-भिन्नानुबन्धकस्याग्रहणमिति परिभाषार्थ इति रत्नप्रकाशकृदाशयः । 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' इति तु परिभाषान्तरमित्ये-तदभिमतम् ।

न निर्वाहः, 'दो अवखण्डने' इत्यस्य पुकि पकारभिन्नानुबन्धकत्वाभावेन 'अदाप्' इति निषेधस्य दुर्वारत्वात्। अत एवैकानुबन्धकपरिभाषयापि न निर्वाहः, दोधातोर्निरनुबन्धकत्वात्। अनेकान्तत्वपक्षे पकारे विद्यमान एवात्वे कृते दाब्रूपे संपन्ने पश्चात् पकारलोपेऽपि स दाबेवेति 'अदाप्' इति निषेधो युज्यते। एकान्ततापक्षे तु पकारलोपे सत्येवात्वेन भवितव्यमिति दाब्रूपासंपत्त्या तत्र 'अदाप्' इति निषेधो न स्यादिति मन्यमान आह — **अथैकान्तेष्विति**। **एकान्तेष्वपीति**। एकान्तानेकान्तपक्षयोर्भेदो नास्त्येव, तत्रैकान्तताया आरोपितत्वात्, अनेकान्ततायाः पारमार्थिकत्वात्। परस्परनैरपेक्ष्येण पक्षद्वयोपपादनस्य ज्ञापकनैरपेक्ष्येणासंभवात्। न्यायसिद्धपक्षद्वयैक्येनैव सर्वोपपत्तौ ज्ञापकाश्रयेण पक्षद्वयोपपादने फलाभावाच्च। तथा च लोपे सत्येव सर्वथा आत्वेन भाव्यम्। श्रुतिकृतरूपं विनानुमानिकरूपमादाय 'अदाप्' इति निषेधो भविष्यतीति नोक्तदोष इति भावः। **भूतपूर्वगतिरिति**। अनुबन्धप्रयुक्तकार्यप्रवृत्तेरिति भावः। [[1]"यक्षानुरूपबलिन्यायेन पक्षान्तरमाह — **अथवेति**। एतेन] **अथवेति**। न्यायेन सह ज्ञापकोपन्यासः' इति निरस्तम्। एकान्तपक्षेऽपि दोषाभावस्योक्तत्वात्। **मेङः सानुबन्धकस्येति**। 'मेङ् प्रणिदाने' इति व्यतिहारापरपर्यायप्रणिदानार्थकत्वेन मेङ् एव धातुपाठे पाणिनिना पठितत्वात् तस्यैव [2]"उदीचां माङः' इत्यत्र ग्रहणमुचितम्, न तु धातूनामनेकार्थत्वाश्रयेण कल्पनीयव्यतिहारार्थकस्य 'माङ् माने' इति पठितस्येति भावः। ननु तत्र 'माङः' इति निर्देशानुसारेण माङ्धातोर्व्यतिहारार्थकत्वं न कल्पनीयम्, किं तु 'व्यतिहारे' इत्यर्थानुसारेण मेङ् एव तत्र 'माङः' इति रूपमिति कल्पनीयमित्यत्र किं मानमिति चेत् [3]"प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः' इति परिभाषेति गृहाण। शब्दार्थयोर्ह्यर्थः प्रधानम्। तत्र मानं प्रकृतभाष्यमेव। एतेन "'भू सत्तायाम्' इत्याद्यर्थनिर्देश आधुनिको न तु पाणिनिकृतः" इति वदन्तः परास्ताः। तस्याधुनिकत्वे तदनुरोधेन 'माङः' इति धातुपाठे साक्षात् पठितमाङ्धातुपरित्यागासंभवेन प्रकृतज्ञापकपरभाष्यासंगतेः। [4]"भूवादयः' इति सूत्रगतं [5]"समानशब्दप्रतिषेधः' [6]"परिमाणग्रहणं च' इति वचनद्वयं तु धातुपाठस्वरूपमजानत इति तत्रैव स्फुटीकरिष्यत इति तद्वशेनार्थनिर्देशस्याधुनिकत्वं वदतां तत्सूत्रभाष्यार्थाज्ञानं स्फुटमेव। एतेन "**माङ इति**। मेङो ग्रहणं न माङः, मेङो व्यतिहारेण नित्ययोगात्। माङस्तु विवक्षावशात् 'व्यतिमिमीते' इति कादाचित्कत्वाद्व्यतिहारयोगस्य। प्रणिदानं व्यतिहार इत्येकोऽर्थः" इति निरस्तम्। प्रणिदानव्यतिहारयोरैक्ये 'व्यतिमिमीते' इत्यत्र प्रणिदानात्मकव्यतिहारो गम्यत इत्यत्र मानाभावात्। अन्यथा 'व्यतिलुनीते' 'व्यतिभवते' 'व्यतिपचते' इत्येवमादीनां व्यतिहाराणां सर्वेषां मेङ्समानार्थकतापत्तेश्च। तदेवं पाणिनिकृतं 'दैप् शोधने' इति भ्वादिपाठं निर्दुष्टतया व्यवस्थाप्य दिवादौ 'दाप् शोधने' इति पटितं चेदपि न दोष इत्याह — **अथवेति**। 'दायति' इत्यादौ शपीव श्यन्यप्याद्युदात्ततैव भवतीति स्वरेऽपि न वैषम्यमिति भावः। अस्मिन् पक्षे लक्षणप्रतिपदोक्तपरिभाषाया अत्र सूत्रेऽप्रवृत्तिज्ञापकं [7]"दो दद् घोः' इत्यत्र 'दः' इति बोध्यम्॥

। १, २४२–२४७।

(**नारायणीयम्**) साम्यं किं कृतमित्यपेक्षायां ध्वनिकृतमित्याह — **समानेति**। वर्णपदवाक्य-

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[2] पा. सू. ३. ४. १९.
[3] परिभाषा १०६.
[4] पा. सू. १. ३. १.
[5] का. वा. १. ३. १–१.
[6] का. वा. १. ३. १–२.
[7] पा. सू. ७. ४. ४६.

स्फोटाङ्गीकाराद् दाध्वनिव्यङ्ग्यस्फोटाभावान्न तत्साम्यम्। अर्थकृतसाम्यव्यवच्छेदार्थं वेदम्। अर्थवत्परिभाषानाश्रयणेन शङ्का, तदाश्रयणेनोत्तरमिति न व्याख्येयम्, तदनाश्रयणनिमित्ताभावात्। अतोऽर्थवत्त्वाश्रयेण शङ्का, आनर्थक्याश्रयेण परिहार इत्याह — **दृङ्धृङोरिति**। पुग्वतामिव रवतां प्राप्तिरिति शङ्कार्थः। एष तु विशेषो लाक्षणिकं दारूपमिति। लाक्षणिकग्रहणं त्विह भवतीत्युक्तमेव। नन्वाकारे कृते रेफश्चेदागमस्तदा पुक्तुल्यता, इह त्वार्शब्दस्य विधानमित्यत आह — **वृद्धाविति**। आकारस्यैव वृद्धिसंज्ञकत्वात् तद्विधौ प्रवृत्तं [रत्वं] नत्वार्शब्दस्यान्यत्वमिति दाव्यपदेशमर्थवत्त्वं च न निवर्तयतीत्यर्थः। अर्थग्रहणानुवृत्त्येदमुच्यत इति न भ्रमणीयमित्याह — **अर्थवदिति**। पुग्वैलक्षण्यमाह — **उरिति**। घुत्वेऽपि परिहारः 'अनुपसर्गात्' इत्युच्यते, तदयुक्तम्, घुत्वे निमित्ताभावात्। न च विहितायां वृद्धौ रेफागम इति पक्षाश्रयणं तन्निमित्तम्, तत्र तस्यास्थितेः। तथा सति घुं [1]प्रत्यनुपसर्गत्वानुपपत्तेश्च। [2]तस्मादनर्थकस्यापि घुत्वाङ्गीकारेणाभ्युपगमवादमात्रमेतदित्याह — **अभ्युपगम्येति**। रेफस्य प्रसङ्ग एव विधानात् तत्सहितस्यार्थवत्त्वं तत्र। इह तु धातुपाठे पकाररहितस्य संनिवेशादर्थवत्त्वमिति वैलक्षण्याद् रवद्दृष्टान्तेनानर्थक्यशङ्का पुग्वतोऽनुचितेत्यत्राह — **अत्रापीति**। न रवद्दृष्टान्तेन शङ्क्येयम्, किंतु धातुपाठे केवलं संनिवेशादर्थवत्त्वमङ्गीकृत्यागमोत्तरकालं तस्य हानिराशङ्क्यत इत्यर्थः। आगमे सत्यर्थवत्त्वं तत्सहितस्यैवेति शङ्कायामिडादिवदागमस्यागमिग्रहणेन ग्रहणकीर्तनमसंगतम्। न हीटः प्रत्ययग्रहणेन ग्रहणाद् धातोर्गुणसिद्धिवदिह धातुग्रहणेन ग्रहणमात्रात् प्रस्तुतशङ्कानिवृत्तिरित्यत्राह — **लब्धेति**। आगमात् प्रागर्थवति दारूपे निवर्तको नेत्यर्थः। **नापीति**। यद्यप्यर्थवत्त्वनिवृत्तावपि घुव्यपदेशस्य प्रागेव लब्धस्यानिवृत्तिः, तथाप्यर्थवत्त्वनिवृत्तिः पकारान्ते तु तत्संक्रान्तमिति घुं प्रत्यनुपसर्गत्वाण्णत्वाप्राप्तिः। नैष दोषः, [3]अर्थवत्त्वाद् घुत्वस्यापि तस्मिन् संक्रमणात्, यथेटि सत्यार्धधातुकत्वस्येडादौ [4]संक्रामः॥

केचित्तु पुकि सत्यप्यादन्तेऽर्थवत्त्वानिवृत्तिं व्याचक्षते। तदयुक्तम्, तदवयवत्वविरोधात्। न ह्यर्थवत्यागमान्तर्भविऽपि तद्रहितस्यार्थवत्त्वं समञ्जसम्। अत एव घुसंज्ञाया अन्तरङ्गत्वात् प्राक् प्रवृत्तिरुक्ता। [5]दारूपेऽर्थवत्त्वानिवृत्तौ तूत्तरकालमपि घुसंज्ञाप्रवृत्त्युपपत्तेरन्तरङ्गत्वकीर्तनमनर्थकम्। पान्तेऽर्थवत्त्वसंक्रमे यस्य दारूपत्वं न तस्यार्थवत्त्वम्, यस्य चार्थवत्त्वं न तस्य दारूपत्वमिति [6]संज्ञाप्रसक्तावन्तरङ्गत्वकीर्तनं सफलम्। स्थलान्तरे च टीका — [7]क्वचिद् द्विर्वचनसहितस्यार्थवत्त्वं [8]क्वचिदागमसहितस्येत्यादिका। अपि चेड्दृष्टान्तश्चेत्थमेव संगच्छत इत्यास्तां विस्तरः॥

तद्भक्तत्वस्य तद्ग्रहणग्रहणे प्रयोजकत्वादर्थवद्ग्रहणमयुक्तमिति शङ्कते — **अनर्थकस्यापीति**। **यथेति**। यदि सरेफस्य वृद्ध्यादिव्यपदेशो न स्याद् वृद्ध्यादि[9]चोदनायामारादीनां प्रवृत्तिर्न स्यात्। न चाकारादीनामेव चोदनाय प्रवृत्तिः, प्रसङ्गे रपरत्व[10]विधानात्त्वारादिरूपसंपत्तिरिति वाच्यम्, रपरत्वेन गुणवृद्ध्योर्ऋवर्णान्तरतमत्वव्यवस्थापनायोगात्। तस्माद्रान्तस्य गुणादिव्यपदेश एष्टव्यः। प्रस्तुताभिप्रायमेतदिति समाधत्ते — **इह त्विति**। न तर्हीदानीमिदं भवति 'प्रनिदापयति' इति,

---

[1] प्रत्यनुपसर्गानुपपत्तेः — क.
[2] अस्मादनर्थकस्यापि — क.
[3] 'अर्थवत्त्ववत्' इत्युचितं भाति।
[4] 'संक्रमः' इत्युचितम्, नोदात्तोपदेशस्येति वृद्धिनिषेधात्, उपर्यपि संक्रम इत्येव प्रयोगदर्शनाच्च। यद्वा, णिजन्तादेरजिति वा समर्थनीयम्।
[5] दारूपेऽर्थवत्त्वनिवृत्तौ — क.
[6] संज्ञाया अप्रसक्ताविवत्यर्थः।
[7] ८. ३. ८८. सूत्रे प्रदीपे। अत्रार्थानुवादः।
[8] प्रदीपे ६. ४. ६२. सूत्रे। अत्रार्थानुवादः।
[9] चोदनायामाकारादीनां — क.
[10] विधानात्त्वाकारादिरूप — क.

भवति विवक्षान्तर इत्याह — **यदा चेति** । यदोपसर्गार्थविशेषित[1]धात्वर्थनियोगस्तदा णत्वम् । धात्वर्थमात्रविषयकनियोगस्य प्राद्यर्थसंबन्धे घुं प्रत्यनुपसर्गत्वान्न णत्वमित्यर्थः । अर्थाभिधाने सहायभावस्तद्गुणभावश्चेत् तदा त्विडादीनां प्रकृतिग्रहणापातः, तस्मात् तदवयवत्वं तद्गुणभाव इत्याह— **प्रयोगेति** । आगमत्वं क्टाद्यनुबन्धयोगत्वम् । तत् तदवयवत्वे कारणम् । अवयवत्वं तद्ग्रहणग्रहणे । यद्वा, आगमत्वमवयवत्वम् । प्रयोगोपकारतद्ग्रहणाभ्यां त्वेकेन घ्वादिव्यपदेशानिवृत्तिः, [2]अपरेणार्थवत्त्वानिवृत्तिश्चोच्यत इत्यवसेयम् । आगमानुशासनाक्षेपस्य प्रस्तुतासंगतिं निवारयति— **ततश्चेति** । **तदवस्थ इति** । यस्यार्थवत्त्वं तस्य दारूपत्वाभावाद् दारूपस्य चार्थवत्त्वाभावाद् [3]घुसंज्ञाप्राप्तिरित्यर्थः । न च स्थानिवद्भावाद् घुसंज्ञा, आनुमानिकादेशत्वादित्यभिमानः । निवृत्तिवचनतां स्थानशब्दस्य मन्वानस्य चोद्यमित्याह — **तत्रापीति** । ननु नैतावतागमानशासनसमर्थनम्, अत आह — **यश्चेति** । स्थानिनिवर्तने कथं युक्तत्वम्, अत आह — **प्रसङ्गेति** । 'शब्दान्तरैः' इति भाष्यार्थमाह — [4]**तेनेति** । [5]"शब्दान्तरात्' इत्येतद्व्याचष्टे — **बुद्धीति** । नित्यपक्ष आदेशसमर्थनवदागमत्वमपि कथंचित् समर्थ्यतामित्यत्राह — [6]**आगमस्त्विति** । टित्त्वादिभङ्गादादेशत्वानुप[7]पत्तेरादेशत्वेन नाभिमतसिद्धिरित्यत आह — **इडिति** । यथा "एरुः' इत्युकारद्वारेणोकारान्तादेशस्तथेडितीकाराद्यादेशविधिरित्यर्थः । [8]"आद्यन्तौ टकितौ' इति संज्ञापक्ष आदेशत्वोपपत्तिरित्यप्याहुः । 'सर्वे' इत्यनेन प्रत्ययादिविधेरप्यादेशत्वमुच्यत इति शङ्कां निवारयति — **आगमा इति** । इह श्लोके सर्व, आदेशाः, इति च विधिद्वयम् । तत्र प्रथमे सर्वोद्देशेन सर्वपदस्थानिकत्वम् । तत्र द्वितीयं प्रासङ्गिकमानुमानिकादेशविधौ, दृष्टान्तार्थं वा । तत्र स्थानशब्दस्य प्रसङ्गवाचित्वोपपत्तयेऽर्थवतः स्थानित्वमपेक्षितम्, न तु पदस्येति पदग्रहणम् । तत्परतयैव योजयति — **पदेति** । एकदेशविकारे नित्यत्वानुपपत्तिकीर्तनात् सर्वविकारे नित्यत्वोपपत्तिरिति न भ्रमणीयम् । किं त्वेकदेशस्यादेशाङ्गीकारे स्थानशब्दस्य प्रसङ्गवाचित्वमनुपपन्नम्, अर्थाभावात् तदभिधानाय प्रसक्तिरिति वक्तुमशक्यत्वात् । पदादेशत्वे तु प्रसङ्गवचनत्वेन विकाराभावः सिध्यतीति चोद्यपूर्वकं दर्शयति — **यद्यपीत्यादिना** । **आगमागमीति** । यद्यप्यागमागमिनोः स्थान्यादेशभावाङ्गीकारः, तथापि तत्त्वेनाप्रसिद्धत्वात् पृथगुपादानम् । तदयमर्थः — मुख्यस्थान्यादेशभावद्वारेण कल्पिततद्भावद्वारेण वेति । **यद्येवमिति** । स्थानिवद्भावस्त्वानुमानिकादेशत्वान्नेति मन्यत इत्यवोचाम । ननु तत्रादेशग्रहणादानुमानिकस्यापि तस्य स्थानिवद्भावोऽस्त्येव । अत्राहुः — पुकः प्राक् संज्ञा न प्रवृत्ता स्थानिनीति नास्ति स्थानिवद्भावेन घुसंज्ञेति । यद्येवं कथमुक्तमन्तरङ्गत्वं संज्ञायां प्राक्, उक्तं यथोद्देशतामाश्रित्येति वदामः । नन्वेवमागमस्वीकारेणापि कथं परिहारः प्रागुक्तमार्गपरित्यागात् । अत्राहुः — त्यज्यते स तु मार्गः, पुक्यागमेऽपि सति संज्ञाप्रवृत्त्युपपत्तेः । न चार्थवतो दारूपत्वाभावः, तद्भक्तस्य तद्व्यपदेशलाभादन्तरङ्गत्वमते घुव्यपदेशवदिदानीं दाव्यपदेशस्य वक्तुं शक्यत्वादिति । अन्ये त्वत्रापरितुष्यन्तः स्थानिवद्भावाप्राप्तिमेवाहुः । [10]'एरुः' इत्यादौ हि [इकारोकारयोः] स्थान्यादेशभावः शब्दादवगम्यते । तदन्तयोस्त्वानुमानिकस्तद्भावः । इह त्विटा चेकार आदिरित्येव

---

[1] धात्वर्थेन नेर्योग इत्यर्थः ।

[2] अपरेणार्थवत्त्वनिवृत्तिश्च — क.

[3] घुसंज्ञाया अप्राप्तिरित्यर्थः ।

[4] 'प्रदीपे 'ततश्च सन्त एव' इत्यत्र 'तेन सन्त एव' इति पाठोऽभिमत इति भाति ।

[5] भाष्ये 'शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिः' इत्यत्र 'शब्दान्तरात् शब्दान्तरस्य प्रतिपत्तिः' इति पूनाचौखाम्बामुद्रितयोः पाठः ।

[6] आगमास्त्विति — क.

[7] पत्तिः — क.

[8] पा. सू. ३. ४. ८६.

[9] पा. सू. १. १. ४६.

[10] पा. सू. ३. ४. ८६.

शब्दव्यापारः' न त्वादेशत्वं कस्याप्यवगम्यते। उत्प्रेक्ष्यते तु केवलस्थान्यादेशभाव इति नास्ति स्थानिवद्भावप्राप्तिरिति ॥

वस्तुतस्तु कल्पान्तरकीर्तनाय स्थानिवद्भावो नोक्तः। अत एव तत्र तत्र "अनागमकानां सागमका आदेशा इति पक्षे' इत्यस्यापि पक्षस्य सिद्धान्तत्वादनुवादः। तस्माल्लौकिकप्रयोगार्हशब्देऽनुशासनप्रवृत्तावादेशत्वमेव, स्थानिवद्भावाच्चेष्टसिद्धिः। अयं तु [2]मन्दाधिकार्यनुसारेण तत्सदृशोऽन्वाख्यायते। अस्मात्तु नित्यशब्दप्रतिपत्तिः रेखागवयादिवत् सत्यशब्दस्य, तदा आगमत्वम्। अस्मिंश्च पक्षे प्रागुक्तमार्गादेवाभिमतसिद्धिरिति न किंचिदपि क्लिष्टम् ॥

अटि सति दारूपस्यानर्थकत्वादप्राप्तिः संज्ञाया इत्यत आह — **उपेति**। नित्यत्वाद्विकरणं प्रतिपदविधानादात्वं चाडागमात् पूर्वभावि मन्यते। विकरणापेक्षया [3]सोऽनित्यः, शब्दान्तरप्राप्तेः। विकरणस्तु शब्दान्तरात् प्राप्त्या। भाष्ये किमीदन्ते संज्ञाप्राप्तौ प्रतिषेधारम्भ उतादन्त इति विमृश्यादन्त एवेत्युक्तम्। न त्वटः प्रागात्वप्रवृत्तिकीर्तनेन टीकायामुपपादितम्। ईदन्तेऽपि तु संज्ञाप्राप्तिर्विषयान्तरे ज्ञेयेत्याह — **एच इति**। नन्वात्वसिचोः संश्लेषविशेषाभावात् कथमात्वं घुसंज्ञाया अनिमित्तम्, अत आह — **अकित्त्वेति**। तृजादौ संनिपातपरिभाषाभावात् संज्ञाशङ्काभिष्टत्वेन परिहरति — **अत्रेति**। न केवलं प्रतिषेधप्रत्याख्यानभाष्यादिष्टत्वावसायः, किं तु वार्तिके विशेषणदानादपीत्याह — **अत एवेति**। **अन्ये त्विति**। [4]तेषां 'दीङः प्रतिषेधः' इति वार्तिकं सिद्धानुवादमात्रम्। [5]'स्थाघ्वोः' इति चोदाहरणप्रदर्शनमात्रम्। संनिपातपरिभाषोक्तिश्च भाष्ये आत्यन्तिकाप्राप्तिप्रदर्शनायेत्यभिप्रायः। यद्वा, नाकरग्रन्थभावनम् 'अन्ये तु' इति, किं तु स्वातन्त्र्योक्तिरेवेत्यवगन्तव्यम्। न च वचनसामर्थ्याद् दैपि प्रतिषेधप्रवृत्तिः कथंचित्कीत्याह — **दाबिति**। प्रतिषेधाभावे को दोषः, तमाह — **तत्वमिति**। बान्तप्रतिषेधविज्ञाने [6]विषयालाभ इत्यत आह — **दाबिति**। [7]**सूत्रं चेति** भाष्ये। '[8]पित्प्रतिषेधफलस्य दापयतिव्यावृत्तेरन्यथासिद्धिः सूत्रभेदश्चेत्यर्थः। प्रायेण तु 'तर्हि' इति पाठः। तत्रायमर्थः — पित्प्रतिषेधस्य दापयतौ प्रतिषेधव्यावृत्तिफलेऽन्यथासिद्धेऽपि दैपि प्रतिषेधसिद्धिः फलमस्तीति पित्प्रतिषेधकर्तव्यतास्थितौ सूत्रभेदमाशङ्कत इति। बुद्धिसंनिहितस्य तच्छब्देन परामर्श इत्याह — **इदिति**। अस्तु सर्वत्रानुबन्धकार्ये भूतपूर्वगतिः, प्रस्तुते किमायातम्, अत आह — **प्रयोग इति**। पक्षद्वयेऽप्यनुबन्धानामात्वप्रतिबन्धकत्वकीर्तनात् ज्ञापकोऽन्यासः किमर्थः, अत आह — **अनुबन्धानामिति**। एकान्तपक्षे प्रागुक्तपरिहारेऽपरितोषादेतत्परिहारोपन्यास इत्यर्थः। मेङनिर्देशश्चेत् ज्ञापको भवेत्। तत्रैव तु न प्रमाणम्। माङो व्यतिहारासंभवात् [9]परिशेषः प्रमाणमिति च न, तस्यापि क्वचित् तत्संभवादित्यत आह — **माङ इति**। [10]'अर्धं नपुंसकम्' इति नियतनपुंसकसमप्रविभागवाचिग्रहणवद् व्यतिहारनियतग्रहणमित्यर्थः। ननु [11]प्रणिदानार्थकस्य कथं व्यतिहारनियमः, तत्राह — **प्रणिदानमिति**। नन्वसंदेहाय व्यतिहारविशेषणानुपादानाय चेत्थं निर्देशः कस्मान्न कृत इति शङ्कित्वा परिहरति — **उदीचामिति**। कथं यथापाठे श्यन्लाभः, तत्राह — **दिवादिष्विति** ॥

---

[1] १. १. ७२. सूत्रे प्रदीपे.
[2] मन्दाधिकारानुसारेण — क.
[3] स नित्यः — क.
[4] 'अभिप्रायः' इत्यत्रास्यान्वयः।
[5] पा. सू. १. २. १७.
[6] विषयलाभः — क.
[7] भाष्ये 'सूत्रं तर्हि भिद्यते' इत्यत्र 'सूत्रं च भिद्यते' इति पाठोऽभिमतः।
[8] वित्प्रतिषेधफलस्य — क.
[9] परिशेषप्रमाणमिति — क.
[10] पा. सू. २. २. २.
[11] प्रणिधानार्थकस्य — क.

आद्यन्तवदेकस्मिन् १. १. २१.

[१, २४७–२५१]

(**लघुविवरणम्**) **किमेकस्मिन्निति**। सभासंनयने भवः साभासंनयन इत्यत्रादिवद्भावेन मध्यवर्तिवृद्धिसंज्ञकमाश्रित्य वृद्धसंज्ञायां छो मा भूदिति 'एकस्मिन्' इति कृतम्। संख्यावाचिनि तु तस्मिन् [1]'तत्रादिवद्भावो न व्यावर्त्येतेति तदनर्थकमेव स्यादिति भावः। नन्वेकस्मिन्नाद्यन्तवदिति व्यपदेशात् 'सत्यन्यस्मिन्नाद्यन्तवद्भावात्' इत्ययुक्तमित्यत आह — **आद्यन्ताविति**। [2]आद्यन्तभावादित्यपपाठशङ्कां निवर्तयति — **क्वचिदिति**। 'तत्र' इत्यनेनाद्यन्तवद्भावस्थाने व्यपदेशिवद्भावो वक्तव्य इति प्रतिपाद्यत इत्यभिप्रेत्याह — **सर्वेति**। गौणोऽपि वा व्यपदेशः कथमित्यत आह — [3]**इह तावदित्यादिना**। **अगादिति**। [4]"इणो गा लुङि' इति [5]"गादेशः, [6]"गातिस्था' इति सिचो लुक्। ननु बहुरूपस्य धातोरन्यपदार्थत्वे तस्यैव द्विर्वचनं स्यात्, न चैवमस्तीत्यत आह — **अथवेति**। एवं कल्प्यमाने गौणमुख्य[7]न्यायावतारं निवारयति — **लोकेति**॥

[१, २४७–२५१]

(**विवरणम्**) **बहुष्विति**। [8]'सभासंनयन इत्यत्र मध्यवर्तिवृद्धिसंज्ञकस्यास्त्येकत्वसंख्येत्यादिवद्भावात् [9]"वृद्धिर्यस्याचाम्' इत्याद्यपदिष्टवृद्धसंज्ञा न निवारितेति मुधा 'एकस्मिन्' इति स्यादिति भावः। **सप्तम्यन्तादिति**। [10]"तत्र तस्येव' इत्यनेन। **सर्वातिदेशानां** रूपनिमित्ततादात्म्यशास्त्रव्यपदेशकार्यातिदेशानां [11]मध्य इत्यर्थः। **मुख्ये** व्यपदेशिनि। **गौणे** व्यपदेशिसदृशे। ननु 'आद्यन्तवद्भावात्' इति न तावद् वतिः, सत्यन्यस्मिन् मुख्याद्यन्तत्वात्। नापि मतुप् संभवति, आद्यन्तशब्दसहितशास्त्रसद्भावस्य परपूर्वसत्त्वानपेक्षत्वेन 'सत्यन्यस्मिन्' इत्यस्यायोगादित्यत आह — **आद्यन्ताविति**। आद्यन्तशब्दावित्यर्थः। **क्वचिदिति**। [12]न तत्र व्याख्यानापेक्षेत्यर्थः। **तत्र** आद्यन्तवदित्यस्य स्थाने, व्यपदेशिवदिति वक्तव्यमिति वार्तिकार्थं सिद्धवत्कृत्य गुरुन्यासकरणे प्रयोजनमाह — **सर्वेति**। आद्यन्तापदिष्टानाद्यन्तापदिष्टकार्यसिद्ध्यर्थमित्यर्थः। [13]**स तेनेति**। एकस्मिन्नित्यनपेक्ष्य[14] वक्ष्यमाणनीत्या[15] लोकव्यवहारसिद्धे 'व्यपदेशिवत्' इत्यस्मिन् तृतीयान्ताद्वतिरुक्तः। अपेक्षिते तु तस्मिन् सूत्र इवात्रापि [16]सप्तम्यन्ताद्वतिरिति द्रष्टव्यम्। भाष्ये **तस्मिन् क्रियमाणे** तस्मिन्नाश्रीयमाण इत्यर्थः। 'प्रथमस्य' इत्येतद्वाक्यभेदेन यत्र प्रथमश्चाप्रथमश्चैकाच् तत्र प्रथमस्यै-

---

[1] तदादिवद्भावः — ड; अन्तादिवद्भावः – ण.
[2] आद्यन्तसद्भावादित्यपपाठ — ड, ढ, ण.
[3] इहेत्यादिना — ड, ढ.
[4] पा. सू. २. ४. ४५.
[5] गादेशे — ड, ढ.
[6] पा. सू. २. ४. ७७.
[7] न्यायावतरम् — ण; न्यायानवतारम् – त.
[8] सभासंनयने भव इत्यत्र — ञ, ट.
[9] पा. सू. १. १. ७३.
[10] पा. सू. ५. १. ११६.
[11] 'मध्ये' इत्यस्यानन्तरं तुशब्दोऽधिकः — च, छ.
[12] न त्वत्र — ञ.
[13] अनेनेति — च, छ, ञ, ट.
[14] 'अनपेक्ष्य' इत्यस्यानन्तरम् एवकारोऽधिकः –ञ.
[15] 'नीत्या' इति नास्ति — ञ.
[16] सप्तम्यन्ताद्वतिर्द्रष्टव्यः — ञ.

वेति प्रतिपादनाय [1]'लिटि धातोः' इत्यादौ संभन्त्स्यत इत्यभिप्रेत्य पपाचेत्यत्र द्विर्वचनम् 'इहैव स्यात्' [2]इत्युक्तम्। [3]'द्विर्वचनेऽचि' इति रूपस्थानिवद्भावादज्व्यतिरिक्ताभावेन 'इयाय' इत्यादौ [4]द्विर्वचनासिद्धिरुक्ता। 'अवचनात्' इति बहुव्रीहिरित्याह — **वचनरहितमिति**। विज्ञानशब्दः करण-साधन इत्यभिप्रेत्याह — **लोकव्यवहारादिति**। मुख्यैकाज्व्यपदेशिना सादृश्यमाह — **इहेति**। **अगा-दिति**। [5]'इणो गा लुङि' [6]'णौ गमिरबोधने'। **एकोऽच्** असहायोऽजित्यर्थः। नन्वेकाचोऽवयविनो द्विर्वचनमिति यस्यायमवयवस्तस्य बहुरूपस्य भवितव्यं द्विर्वचनेन लिट्परस्य। तच्च न लिट्पर-मित्यतः पक्षान्तरमाह — **अथवेति**। काल्पनिकभेदेन षष्ठ्या भावे दृष्टान्तमाह — **एवमिति**। **शास्त्रेऽपीति**। स्वरितलिङ्गासङ्गे गौणमुख्यन्यायो नास्तीति लक्ष्यत इति हृदयम्। नन्वर्थस्यान्य-पदार्थत्वे [7]पदादिशब्दसामानाधिकरण्यानुपपत्तिरित्यत आह — **अभेदेति**। **प्रथमेति**। तस्मात् '[8]पूर्व-स्यान्यस्याभावादित्यर्थः। [9]**तथा यापीति**। संप्रति गर्भिणीत्यर्थः। **तथाविधस्येति**। अविद्य-मानपूर्वगर्भस्येत्यर्थः। **तथाविधत्वात्** अविद्यमानपूर्वागमनत्वादित्यर्थः॥

[१, २४७–२५१]

(**उद्द्योतनम्**) ननु सर्वेषां प्रत्येकमेकत्वादेकत्वं न व्यावर्तकम्, अत आह — **एकशब्द इति**। संख्यावाचित्वे बाधकमाह — **बहुष्विति**। 'समासंनयने भवः' इत्यत्र मध्यवर्त्याकारस्य वृद्धिसंज्ञक-स्यास्त्येकत्वसंख्येत्यादिवद्भावात् [10]'वृद्धिर्यस्याचाम्' इति प्राप्ता वृद्धसंज्ञा न निवारितेति 'एकस्मिन्' इत्यनेन किं कृतं स्यादिति भावः। यद्यपि षष्ठ्यन्ताद्वतावपि न बाधकम्, तथाप्युपमानोपमेययो-रेकविभक्त्यन्तत्व एव तद्भावप्रतीतेः सप्तम्यन्तादेवात्र वतिरित्याह — **एकस्मिन्निति**। **वतिः** [11]'तत्र तस्येव' इत्यनेन। **सर्वातिदेशानामिति**। रूपनिमित्तत्तादात्म्यशास्त्रव्यपदेशकार्यातिदेशानां मध्य इत्यर्थः। **व्यपदेशिवद्भावेनेति**। बहुकार्यसंग्रहाय तस्य वक्ष्यमाणत्वादित्यर्थः। **मुख्ये** व्यप-देशिनि। **गौणे** व्यपदेशिसदृशे। ननु 'आद्यन्तवद्भावात्' इत्यत्र न तावद्वतिः, सत्यन्यस्मिन् मुख्याद्यन्तत्वात्। नापि मतुप्, आद्यन्तशब्दयुक्तशास्त्रसद्भावस्य परपूर्वमत्त्वानपेक्षत्वेन 'सत्य-न्यस्मिन्' इत्याद्ययोगात्, अत आह — **आद्यन्ताविति**। आद्यन्तशब्दाविति्यर्थः। **क्वचिदिति**। तत्र न व्याख्यानापेक्षेत्यर्थः। 'आद्यन्तवत्' इति त्यक्त्वा 'व्यपदेशिवदेकस्मिन्' इति वार्तिककृतोक्तम्। तस्य प्रयोजनमाह — **सर्वकार्येति**। [12]आद्यन्तोपदिष्टानाद्यन्तोपदिष्टकार्यसिद्ध्यर्थमित्यर्थः। व्यप-देशिशब्दार्थमाह — **तत्रेति**। **तेन तुल्यमिति**। 'एकस्मिन्' इत्यनपेक्ष्य वक्ष्यमाणरीत्या लोकसिद्ध-'व्यपदेशिवत्' इत्यस्मिन् [13]'तेन तुल्यम्' इत्यनेन तृतीयान्ताद्वतिरुक्तः। वस्तुतः सूत्र इवात्रापि सप्तम्यन्ताद्वतिरिति ज्ञेयम्। भाष्ये **तस्मिन् क्रियमाणे** तस्मिन् आश्रीयमाणे। तत्र 'प्रथमस्य'

---

[1] पा. सू. ६. १. ८.
[2] इत्यनेनोक्तम् — च, छ, ज, ट.
[3] पा. सू. १. १. ५९.
[4] द्विर्वचनसिद्धिरुक्ता — ट.
[5] पा. सू. २. ४. ४५.
[6] पा. सू. २. ४. ४६.
[7] पदादिसामानधिकरण्यानुप — ट.
[8] पूर्वस्याभावादित्यर्थः — च, छ, ट.
[9] 'तथा या प्रसोष्यते' इति प्रदीपे 'तथा यापि प्रसोष्यते' इति निर्णयसागरमुद्रिते पाठः।
[10] पा. सू. १. १. ७३.
[11] पा. सू. ५. १. ११६.
[12] 'आद्यन्तोपदिष्टानाद्यन्तोपदिष्ट' इत्येव पाठः कोशेषु मद्रमुद्रिते चोपलभ्यते। 'आद्यन्ता-पदिष्टानाद्यन्तापदिष्ट' इति विवरणे। स एव युक्ततरो भाति।
[13] पा. सू. ५. १. ११५.

इत्येतद्वाक्यभेदेन यत्र प्रथमश्चाप्रथमश्चैकाच् तत्र प्रथमस्यैवेति प्रतिपादनाय [1]'लिटि धातोः' इत्यादौ संबध्यत इत्यभिप्रेत्य भाष्ये 'इहैव स्यात्' इत्युक्तम्। भाष्ये **इयायेति**। [2]इणो लिट् तिप् णल् वृद्ध्यायादेशौ। ततो [3]'द्विर्वचनेऽचि' इति रूपातिदेशादिकारमात्रस्य द्वित्वम्। [4]'अभ्यासस्यासवर्णे' इतीयङ्। तत्र बहुव्रीह्यर्थाभावाद् द्वित्वं न स्यादित्यर्थः। भाष्ये **आरेति**। 'ऋ गतौ प्रापणे च' लिट् [5]'तिप् णल् वृद्धिः, रपरत्वम्, [6]'द्विर्वचनेऽचि' इति रूपातिदेशाद् ऋकारस्य द्वित्वम्, रपरत्वं, हलादिशेषः, [7]'अत आदेः' इति दीर्घः, सवर्णदीर्घः। [भाष्ये **वक्षदिति**।] वचेर्लेट्, तस्य [8]'तिबादेशः, [9]'सिब्बहुलं लेटि' इत्यनेन धातोः परः सिप्प्रत्ययः, इपावितौ। चस्य [10]'चोः कुः' इति कुत्वम्। [11]'इण्कोः' इति सस्य षः। कषयोगे क्षः। एवं यजतेर्लेटि 'यक्षत्' इति रूपम्। 'अवचनात्' इति बहुव्रीहिरित्याह — **वचनरहितमिति**। तदपि विज्ञानविशेषणमित्याह — **यल्लोकेति**। विज्ञानशब्दः करणव्युत्पन्न इत्याह — **लोकव्यवहारादिति**। मुख्यैकाज्व्यपदेशिना सादृश्यमाह — **इहेति**। **अगादिति**। [12]'इणो गा लुङि' [13]'णौ गमिरबोधने'। [14]**एकोऽच्** असहायोऽच्। नन्वेकाचोऽवयविनो द्विर्वचनमिति यस्यायमवयवस्तस्य बहुरूपस्य द्विर्वचनेन भवितव्यम्। तच्च लिट्परस्य। न चोदाहृते लिट्परत्वमस्ति, अत आह — **अथवेति**। शब्दार्थसमुदायरूपधातौ शब्दं पृथक्कृत्य [15]'समुदायसमुदायिसंबन्धे षष्ठ्या 'एकोऽच् यस्य शब्दार्थसमुदायस्य' इति व्यपदेशः संभवतीत्यर्थः। अर्थस्य समुदायिन्यचि त्यागः, समुदाये उपादानमिति विवेकः। **एकाजिति व्यपदेशः** षष्ठ्यर्थगर्भबहुव्रीहिनिर्देश इत्यर्थः। [16]काल्पनिकभेदे षष्ठीसद्भावे दृष्टान्तमाह — **एवमिति**। **अनेकेति**। दर्शनस्पर्शनादीत्यर्थः। **एकेति**। एकक्रियायुक्तमित्यर्थः। षत्वेऽपि व्यपदेशिवद्भावं दर्शयति — **एवमिति**। **जोषिषदिति**। 'जुषी प्रीतिसेवनयोः' लेट्, पूर्ववत् प्रक्रिया। [17]'आर्धधातुकस्य' इतीट्। [18]'यक्षत्' इत्यादौ [19]'एकाचः' इति नेट्। लोकविज्ञानात् सिद्धमिति चेद् गौणमुख्यन्यायोऽवतरेत्, अत आह — **लोकेति**। **शास्त्रेऽपीति**। स्वरित[20]लिङ्गासङ्गे गौणमुख्यन्यायो नावतरतीति वक्ष्यत इत्यभिसंधिः। [21]'वर्णसमुदायः पदम्' इति लक्षितस्य [22]पदस्य प्रत्यासत्त्या ग्रहण-

---

[1] पा. सू. ६. १. ८.
[2] इण् लिट् — म, आ, इ, उ, ऊ, ॠ.
[3] पा. सू. १. १. ५९.
[4] पा. सू. ६. ४. ७८.
[5] तिप्णलौ — म, उ.
[6] पा. सू. १. १. ५९.
[7] पा. सू. ७. ४. ७०.
[8] 'तिबादेशः' इत्यस्यानन्तरं 'सिब्बहुलम्' इत्यस्मात् प्राक् 'सिप्' इत्यधिकम् — म, आ, इ, उ, ऊ, ॠ.
[9] पा. सू. ३. १. ३४.
[10] पा. सू. ८. २. ३०.
[11] पा. सू. ८. ३. ५७. इण्कोरित्यनुवर्तमाने आदेशप्रत्यययोरित्यनेनेति भावः।
[12] पा. सू. २. ४. ४५.
[13] पा. सू. २. ४. ४६.
[14] एकाच् — अ, आ, इ, उ, ऊ, ॠ.
[15] समुदायेन संबन्धे — म, उ.
[16] काल्पनिकभेदेन षष्ठी — म, आ, इ, उ, ऊ, ॠ.
[17] पा. सू. ७. २. ३५.
[18] "'वक्षत्' इत्यादौ केवलोऽपि" इति प्रदीपे 'चौ, ह, म' कोशेषु पाठो दृश्यते। निर्णयसागरीये 'वक्षदित्यादौ' इति न दृश्यते। 'यक्षदित्यादौ केवलोऽपि' इत्यन्नंभट्टपाठ इति भाति।
[19] पा. सू. ७. २. १०.
[20] लिङ्गासङ्गिगौणमुख्य — म, उ.
[21] 'वर्णसमुदायः' इत्यादि 'ग्रहणशङ्कां वारयितुम्' इत्यन्तं नास्ति — इ, उ, ऊ.
[22] पदप्रत्यासत्त्या — म; 'पदस्य' इति नास्ति — आ.

शङ्कां वारयितुं पदशब्देन पादो [1]विवक्षित इत्याह — **पादेति**। **पर्यायः** परः। [2]पदस्यापि ऋग्वयवत्वादित्थं व्याख्यानं किमर्थम्, अत आह — **तथा चेति**। तत्र पादाविवक्षायां को दोषः, तत्राह — **न त्विति**। 'अर्थमादाय वर्तिपदार्थान्यपदार्थभेदव्यपदेशः' इत्युक्तं भाष्ये। तत्र किमर्थस्यान्यपदार्थत्वम्, उत वर्तिपदार्थत्वमित्यपेक्षायामाह — [3]**पदादीनामिति**। अर्थस्यान्यपदार्थत्वे [4]"पदं नामार्थः' इति भाष्ये पदादिसामानाधिकरण्यं न स्यात्, अत आह — **अभेदेति**। **प्रथमरूपतयेति**। तस्मात् पूर्वस्यान्यस्याभावात् तथाध्यवसानमित्यर्थः। **मध्यमेति**। अनेकेषु सत्सु ज्येष्ठेन किंचित् कर्म क्रियते, मध्यमेन किंचित्, तदनेनैव क्रियत इत्यर्थः। प्रथमपुत्रेण [5]ताडनादिना हन्यते। [6]**तथा या चेति**। संप्रति गर्भिणीत्यर्थः। शरीरावयव[7]रूपगर्भस्य प्राथम्यासंभवादाह — **अपत्यपर्याय इति**। तस्य प्रथमव्यवहारे हेतुमाह — **तस्या एवेति**। **योग्यतेति**। जीविष्यति चेद् भविष्यति गर्भ इत्यध्यवसानेनेत्यर्थः। मरणानन्तरं तादृशाध्यवसानं न संभवति, जीवनेऽपि [8]'गर्भान्तराभावसंभवात्, अत आह — **स्त्र्यन्तरेषु [9]वेति**। **तथाविधस्य** अविद्यमानपूर्वगर्भस्य। **तथाविधत्वात्** अविद्यमानपूर्वागमनत्वात्॥

[१, २४७–२५१]

(**रत्नप्रकाशः**) आद्यन्तौ विद्येते यस्य तदाद्यन्तम्, अर्शआदित्वादच्। तस्मिन्निवैकस्मिन् व्यपदेशो भवतीत्यर्थः। प्रत्यासत्त्या त्वेकस्मिन् तदाद्यन्त इव व्यपदेशो भवतीत्यर्थलाभादेकस्मिन् तदन्याद्यन्तव्यपदेशस्याप्रसक्तिः। एतेन 'एकशब्दोऽसहायवाची, न संख्यावाची। बहुष्वपि व्यवस्थितस्यैकत्वसंख्यास्तीति किमेकस्मिन्नित्यनेन कृतं स्यात्' इति निरस्तम्। असहायस्य ग्रहणे 'गार्ग्यः, औपगवः' इत्यादौ प्रकृतिप्रत्ययोः परस्परसहायत्वेनासहायत्वाभावेन तत्र प्रकृतसूत्रसंचारस्य भाष्यकृता करिष्यमाणस्यासंगतत्वापत्तेः। 'पचते' इत्यादौ तकाराकारादेष्टिसंज्ञाया ज्ञाशब्दप्रभृतेर्वृद्धसंज्ञायाश्चाप्रसक्तेः। बहुषु वर्तमानस्यैकत्वसत्त्वेऽपि तस्य तदाद्यन्तवद्व्यपदेशेऽपि दोषाभावाच्च। नन्वेकशब्दस्य संख्यापरत्वेऽत्राश्रीयमाणे सभासंनयनशब्दस्याकारस्यादिव्यपदेशे सति सभासंनयनशब्दस्य वृद्धसंज्ञायां छः स्यात्। इष्यते त्वण्। तथा दरिद्रातेरिकारस्यान्तव्यपदेशे सति [10]"एरच्' इत्यच् स्यादिति चेत्, भ्रान्तोऽसि। प्रकृतसूत्रार्थमन्यथा ज्ञात्वा खल्वेवं वदसि। यदि 'एक आदिसंज्ञकोऽन्तसंज्ञकश्च' इति प्रकृतसूत्रार्थः स्यात् तदा त्वदुक्तदोषः स्यात्। तदर्थस्तु प्रागेवास्माभिर्दर्शितोऽन्य एव। तस्मिन्नाश्रिते त्वदुक्तदोषस्य तत्र स्पर्श एव नास्ति। तत्राकारेकारयोस्तदाद्यन्तवद्व्यपदेशेऽप्याकारस्य सभासंनयनाचामादित्वस्य, इकारस्य दरिद्राशब्दान्तत्वस्य चाभावात्। किं च त्वदभिमते प्रकृतसूत्रार्थे आश्रीयमाणे [11]"वृद्धिर्यस्याचाम्' इति सूत्रे आदिग्रहणं व्यर्थं स्यात्। 'यस्याचां मध्ये वृद्धिरस्ति तद्वृद्धम्' इत्यर्थकेनैवावशिष्टसूत्रेण सभासनयनस्यापि वृद्धत्वसिद्धेः।

---

[1] विवक्ष्यत इत्याह — म.
[2] 'पदस्यापि' इत्यतः प्राक् 'अर्थस्यान्यपदार्थत्वे' इत्यधिकम् — अ, आ; 'पदस्यापि' इत्यादि 'पदादीनामिति' इत्यन्तं नास्ति — इ, उ, ऊ.
[3] पादादीनामिति — म, आ.
[4] 'पदं नामार्थ इति भाष्ये' इति नास्ति — म.
[5] तापनादिना — म, उ.
[6] प्रदीपे 'तथा या प्रसोष्यते' इत्यत्र 'तथा या च प्रसोष्यते' इत्यन्नंभट्टपाठ इति भाति।
[7] 'रूप' इति नास्ति — इ, ऊ.
[8] गर्भान्तरासंभवात् — ऊ.
[9] चेति — अ, म, आ, उ, ऋ.
[10] पा. सू. ३. ३. ५६.
[11] पा. सू. १. १. ७३.

न चादिग्रहणस्यान्त्यव्यावृत्तिः फलम्, अन्त्यस्याप्यादिसंज्ञकत्वात्। तस्माद्यत्किंचिदेतत्। यदप्युक्तम् 'सर्वातिदेशानां कार्यातिदेशस्य प्राधान्यात् तस्यैवेहाश्रयणम्' इति। तदपि न, 'आभ्याम्, एभिः' [इत्यादावव्यवस्थापत्तेः।] अथोच्येत — तदाद्यन्ते यथा दीर्घादिरूपं कार्यं भवति तथा तस्मिन्नप्येकस्मिन् भवतीत्यर्थाश्रयेण दीर्घादिव्यवस्था भविष्यति। यथा [1]'चरणेभ्यो धर्मवत्' इत्यत्र धर्मे यथा चरणेभ्यः प्रत्यया भवन्ति तथा समूहेऽपि भवन्तीत्युक्ते प्रत्ययव्यवस्था, इति। तदपि न, तत्र धर्मे प्रकृतिप्रत्ययययोर्व्यवस्थितत्वेन तयोः समूहार्थकतामात्रस्य तेन बोधितत्वेन व्यवस्थासंभवेऽपि प्रकृते दृष्टान्तेषु व्यवस्थितानामपि दीर्घादीनां दार्ष्टान्तिकेऽतिदिष्टानां व्यवस्थाया असंभवात्। कथंचित् तत्र तत्संभवेऽपि [2]'एन, आय, आत्, अस्य' इत्यादाविनादयो न स्युः, तेषामकारान्ते प्रवर्तमानकार्यत्वाभावात्। अपि च 'एकाचो द्वे प्रथमार्थम्' 'षत्वे चादेशसंप्रत्ययार्थम्' इति वार्तिककृन्मते वक्ष्यमाणप्रयोजनासंग्रहः स्यात्। किं चैकशब्दस्य प्रयोजनं सभासंनयनशब्दस्य वृद्धसंज्ञावारणं दरिद्राशब्दस्येकारान्तत्ववारणं चेति [3]'वृद्धिर्यस्याचाम्' इति सूत्रगतस्वग्रन्थविरोध इति यत्किंचिदेतत्। **किमर्थमिति**। 'अस्ति प्रयोजनमेतत्' इत्यादिना स्वाशयं स्वयमेव वक्ष्यति। एतेन 'व्यपदेशिवद्भावेन सिद्धत्वान्न कर्तव्यमित्यर्थः' इति निरस्तम्। 'किमर्थम्' इति शब्दस्य तदर्थकत्वायोगात्। प्रष्ट्रैव साक्षादुक्तं तदाशयमुपेक्ष्याशयान्तरकल्पनायोगेन तस्य तद्भावकत्वासंभवाच्च। अत एव 'इतरो मुख्ये संभवति गौणे न स्यादित्याह — **सत्यन्यस्मिन्निति**।' इत्यपि निरस्तम्। 'एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न प्राप्नुवन्ति' इति कृत्वेदं वचनमारब्धमिति साक्षादुक्तत्वेनेतरस्यापि तदाशयासंभवात्। व्यपदेशिवद्भावस्य लोकसिद्धत्वेन तदाश्रयेणैव प्रकृतसूत्रस्य 'व्यपदेशिवदेकस्मिन्निति वाच्यम्' इति वार्तिकस्य च प्रत्याख्यास्यमानत्वेन संप्रति तस्योद्भूननिराकरणयोरयुक्तत्वाच्च। [4]**आद्यन्तभावादिति**। अत्राद्यन्तशब्दो भावप्रधानः, आदित्वान्तत्वयोः सत्त्वादित्यर्थः। एतेन "आद्यन्तौ विद्येते यस्मिन् शास्त्रे तदाद्यन्तवत्, तस्य भावात् प्रवर्तनादित्यर्थः। क्वचित् 'आद्यन्तभावात्' इति पाठः" इति निरस्तम्। 'सत्यन्यस्मिन् यस्मात्पूर्वं नास्ति' इत्यादिना विवरणपरभाष्याननुगुणपाठस्याश्रयेण तदनुगुणपाठस्य क्वाचित्कताकथनानौचित्यात्। आद्यन्तशब्दः सूत्रे द्वन्द्वात्मक एव, न तु द्वन्द्वप्रकृतिकार्शआद्यजन्त इति मन्वान इदं सूत्रमादित्वान्तत्वव्यपदेशमात्रपरमित्यनेन सर्वेष्टसिद्धिर्न भवतीति मत्वा सर्वलक्ष्यानुगुणं वचनान्तरमेव कर्तव्यमिति वक्तुकामो दूषणान्तरस्फोरकस्वरेण प्रयोजनं तावदङ्गीकरोति — **अस्ति प्रयोजनमिति**। अपरस्तत्स्वरेण तदीयां दूषणदित्सां विज्ञाय किं दूषणं त्वयाभिधित्सितमिति पृच्छति — **किं तर्हीति**। इतरः स्वविवक्षितमाह — **तत्र व्यपदेशिवद्वचनमिति**। 'व्यपदेशिवदेकस्मिन्' इति वचनमेव कर्तुमुचितम्, व्यापकत्वात्, न तु लक्ष्यैकदेशमात्रसाधकम् 'आद्यन्तवदेकस्मिन्' इति वचनमिति मन्यते। तस्यायमाशयः — व्यपदेशोऽवयवावयविभेदनिबन्धनो व्यवहारो यस्मिन् स व्यपदेशी; तद्वदेकस्मिन्नपि व्यपदेशो भवतीति। तथा च पच्यादावेकाच्कत्वव्यपदेशो वर्तत इति तद्वत् 'इण् गतौ' इत्यस्मिन्नेकाच्कत्वव्यपदेशेऽनेन वचनेन बोधिते द्वित्वं भवति। एवमन्यत्राप्यूह्यम्। **कार्यं भवतीति**। कार्यार्थत्वात् कार्यशब्देनात्र व्यपदेश एव बोध्यते। तदपि गम्यमानार्थप्रदर्शनपरम्, न तु तद्घटितं वचनं कर्तव्यमित्येवंपरम्; 'व्यपदेशिवदेकस्मिन्' इत्येतावतैव वचनेन दृष्टान्तविशेषणतयोपात्तस्य व्यपदेशस्यैवोपस्थितस्य 'एकस्मिन्' इति दार्ष्टान्तिकाधारनिरूपिताधेयतया बोधसंभवात्। क्रिया-

---

[1] पा. सू. ४. २. ४६.

[2] विष्णुवाचकात् 'अ' इति प्रातिपदिकात् तृतीयादिविभक्तिषु रूपाणि बोध्यानि।

[3] पा. सू. १. १. ७३.

[4] वार्तिके भाष्ये च 'सत्यन्यस्मिन्नाद्यन्तवद्भावात्' इत्यत्र सत्यन्यस्मिन्नाद्यन्तभावात्' इत्येव पाठोऽभिमतः।

पदं च सर्वत्राध्याहारलभ्यमेवेति 'भवति' इत्येतद्घटितमपि वचनं न कर्तव्यम्। एतेन 'अनेन सूत्रेण कार्यातिदेशः क्रियते' इति वदतामत्रत्यकार्यशब्दप्रयुक्तो भ्रम इति स्पष्टमेव सुधियाम्। तद्दूषणप्रपञ्चस्तु प्रागेव निदर्शितः। **एकाचो द्वे प्रथमार्थमिति**। अयं 'षत्वे चादेशसंप्रत्ययार्थम्' इति च 'तत्र व्यपदेशिवद्वचनम्' इत्युक्तवार्तिकस्यैव शेषः। **अवयवषष्ठ्येषेति**। आदेशस्य प्रत्ययस्य च यः सकारस्तस्य ष इति पक्ष एव तत्र निर्दुष्टतया व्यापकतया चाश्रयणीय इति भावः। **वक्षदिति**। वचेर्लेट्, तस्य तिप् [१]'इतश्च लोपः' इतीकारलोपः, [२]'लेटोऽडाटौ' इत्यट्। सिप् कुत्वम्। अत्र सकारमात्रं प्रत्यय इति षत्वं न स्यादिति भावः। एवं 'यक्षत्' इति यजे रूपं बोध्यम्। तच्चोपलक्षणम्, 'एषः, सुषाव' इत्यादावादेशषत्वार्थतायाः। **न वक्तव्य इति**। यथाश्रुतसूत्रेणैवार्शआद्यजन्ताद्यन्तशब्दघटितेन सिद्धत्वात्। अन्यथा [३]वचनं कर्तव्यमिति भावः। वस्तुतो विचार्यमाणे किमपि वचनमत्र नापेक्षितम्, [४]'दृष्टान्तस्यापि पुरुषारम्भो निवर्तकः' इति न्यायसंचारानुगुणस्य सूत्रकारयत्नविशेषस्य कस्याप्यभावेन लोकवच्छास्त्रेऽपि व्यपदेशिवद्भावाश्रयणे बाधकाभावादित्याशयेनाह — **अवचनादिति**। न विद्यते वचनं यस्य तस्मात् **लोकविज्ञानात्** विज्ञानसाधनाल्लोकव्यवहाराद् दृष्टान्तात् शास्त्रेऽप्यस्मिन्निष्टं सिद्धमित्यर्थः। **शालासमुदायो ग्राम इत्युच्यत इति**। तत्रैव ग्रामशब्दस्य शक्तेर्ग्रहादिति भावः। **भवति चैतदेकस्मिन्नपीति**। शक्यतावच्छेदकाभावेऽपीति शेषः। **एकशालो ग्राम इति**। दग्ध इति शेषः। तं वाक्यशेषमजानन् 'एकशालो ग्रामः' इत्यस्य व्यपदेशिवद्भावविषयता न युज्यते, अन्यपदार्थस्यावयविनः सत्त्वादित्याशयेनाह — **विषम उपन्यास इति**। [५]'तुष्यतु दुर्जनः' इति न्यायेन दृष्टान्तान्तरमाह — **यथा तर्हीति**। **वर्णसमुदायः पदमिति ... इत्युच्यते** तत्र तस्य प्रसिद्धेरिति शेषः। यत्तूक्तम् 'पादपर्यायोऽत्र पदशब्दः, तथा चैकपदा ऋगिति पाद एव विवक्षितः, न तु ऋचः कस्याश्चिदेकमेव पदं भवति' इति। तन्न, सुप्तिङन्तान्यतरस्यैव पदस्य प्रसिद्धस्य तत्र ग्रहीतुमुचितत्वात्। एकवर्णात्मकस्य [६]'पादस्येवैकपादाया ऋचः इवैकपदात्मिकाया अपि ऋचः सद्भावे बाधकाभावात्। **एकवर्णं पदमिति**। उच्चारितमिति शेषः। एवम् 'एकपदा ऋक्, एकर्चं सूक्तम्' इत्यत्रापि शेषो बोध्यः। **अत्राप्यर्थेन युक्तो व्यपदेश इति**। शब्दमात्रकर्मकशेषांशमजानतोऽर्थस्यान्यपदार्थतामाश्रित्योक्तव्यवहारसमर्थनमिदम्। **पदं नामार्थ इति**। पद्यते यत् तत् पदम् [७]'घञर्थे कविधानम्' इति कः। एवम् ऋच्यते स्तूयत इति कर्मणि क्विपि ऋक्, तथा सुष्ठूक्तं सूक्तमिति कर्मणि क्त इति मन्यते। एतेन 'अभेदोपचारादर्थ एव पदादिभिरभिधीयते' इति निरस्तम्। औपचारिकतां प्रयोगस्य निराकर्तुं प्रवृत्तस्य पुनरौपचारिकताश्रयणानौचित्यात्। पुनरपि [८]'तुष्यतु दुर्जनः' इति न्यायेनैव दृष्टान्तान्तरमाह — **यथा तर्हीति**। **बहुष्विति**। [उपलक्षणमिदम्।] द्वयोरपि हि 'अयं मे ज्येष्ठः, अयं मे कनीयान्, इति व्यवहार उपपन्नो भवति। **एतदुपपन्नमिति**। अयं व्यवहारः 'एकशालो ग्रामः' इतिवदन्यथोपपादयितुं न शक्यत इति भावः। **अयमेव मे ज्येष्ठ इत्यादि**। यस्य विवाहान्तरान्निवृत्तस्यैकपुत्रस्य प्रथमा स्त्री गर्भधारणान्निवृत्ता, तस्योक्तिरियम्। तत्रैवकार एकस्यैव ज्येष्ठादि-

---

[१] पा. सू. ३. ४. ९७.
[२] पा. सू. ३. ४. ९४.
[३] वचनं न कर्तव्यमिति — ब.
[४] महाभाष्यम् १. १. ४६.
[५] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[६] 'वर्णसमुदायः पदम्' इत्यत्रापि पदशब्दः पादपर्याय उक्त इत्यभिप्रेत्यैवमुच्यत इति बोध्यम्। 'वर्णसमुदायः पदम्' इत्यत्र तु यथाश्रुत एव, न तु पादपर्याय इत्यभिप्रायो गम्यते उद्द्योतोद्द्योतनयोः।
[७] का. वा. ३. ३. ५८–४.
[८] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

शब्दत्रयविषयत्वमिति सूचनाय। एतेन 'प्रथमरूपताध्यवसायात् ज्येष्ठ इति मध्यमकार्यकरणान्मध्यम इति, अन्यो न जनितेति बुद्धया कनीयानिति व्यपदिश्यते' इति निरस्तम्। तथात्वे [1]'प्रथमादयः शब्दास्तत्रैकस्मिन् लक्षणया प्रवर्तन्त इत्युक्तप्रायत्वेन महता यत्नेन व्यपदेशिवद्भावसाधनपरसूत्रवार्तिकभाष्यविरोधात्। तस्मादेकस्मिन् क्रियमाणो भेदनिबन्धनो व्यवहारो मुख्यसदृश औपचारिकः। तत्र जायमानं ज्ञानं 'विकल्पः' इत्युच्यते। तदुक्तं भगवता योगसूत्रेषु [2]'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति। एतेन 'इह तावत् इयायेतीण् धातुः प्रयोगभेदाद्बहुरूपः—एति, इतः, यन्ति, अयनम्, आयकः, अगात्, गमयति, इति। तस्यायमेकोऽजवयव इव लक्ष्यते। अथवा अर्थवतो धातोरयं वर्णरूप एकोऽजित्यर्थत्यागोपादानाभ्यां भवति व्यपदेश एकाजिति। एवं शिलापुत्रकस्य शरीरमित्यनेकक्रियाविषयस्यावस्थातुरिदमेकावस्थायुक्तं 'शरीरमित्यस्ति व्यपदेशः। एवं सिप्प्रत्यय इट्सहितो दृष्टः—जोषिषदित्यादौ, केवलोऽपीति तस्यायं सकार इति व्यपदिश्यते। लोकनिरूढश्चायं व्यवहार इति लोकवच्छास्त्रेऽपि व्यवहाराद् गौणमुख्यन्यायो नावतरति' इति निरस्तम्। विषयशून्यस्यैव व्यवहारस्य व्यपदेशिवद्भावविषयत्वेन तत्र विषयोपपादनक्लेशस्य भाष्यकाराद्याशयाज्ञानमूलकस्याध्येत्रध्यापकदुःखमात्रसाधकत्वात्। न हि तदुपपादितोऽर्थः कस्यचिद्बुद्धयारूढो भवति, युक्तियुक्तो वा। एतेन यद्यद्वचपदेशिवद्भावविषयोपपादनं तेन कृतं तत् सर्वमसंबद्धप्रलापमात्रमेवेति न पुनस्तद्दूषणार्थं यत्यते। **असूतायामिति**। 'षूङ् प्राणिगर्भविमोचने' इत्यस्मादविवक्षितकर्मकत्वेनाकर्मकात् कर्तरि क्तः। सूताया गर्भस्य द्वितीयाद्यन्यतमत्वनियमेनैतद् विशेषणमुपात्तम्। **असोष्यमाणायामिति**। संभवमात्रेणेदं विशेषणमुक्तम्, न तु व्यभिचारवारणाय, हतायाः सोष्यमाणताया असंभवात्। एतेन 'बहुकृत्वोऽपि प्रसूता प्रथमपुत्रेण काचिद्धन्यते। तथा यापि प्रसोष्यते सापि काचित् पूर्वोत्पन्नेन पुत्रेण हन्यत इत्युभयोरुपादानम्। नापि सूता नापि सोष्यते कुक्षिस्थेनैव गर्भेण हता प्रथमगर्भेण हतेत्युच्यते। अपत्यपर्यायो गर्भशब्दः' इति निरस्तम्। 'यापि सोष्यते सा पूर्वोत्पन्नेन हन्यते' इत्यस्य व्याहतत्वात्। गर्भशब्दस्यापत्यपर्यायत्वे मानाभावाच्च। न ह्यविद्यमानकुक्षिस्थपिण्डविशेषा काचित् पुत्रवती गर्भिणीत्युच्यते। **अनेत्यानाजिगमिषुरिति**। अत्रेदं द्वयं विशेषणमेव, [3]एत्यागतस्यागमनस्य द्वितीयाद्यन्यतमत्वनियमात्। आजिगमिषोरागमनस्य भाव्यागमनापेक्षया मुख्यप्राथम्यसंभवाच्च॥

[१, २४७–२५१]

(**नारायणीयम्**) बह्वर्थत्वादाह — **एकशब्द इति**। [4]**न त्विति**। [5]अन्यादिवाचिनस्त्वयोग्यत्वादग्रहणं निश्चित्य तस्यार्थतो व्यवच्छेदः क्रियते। संख्यायां प्रसिद्धत्वात् कथं तद्ग्रहणं नेत्याशङ्क्य व्यावर्त्याभावात् प्रसिद्धपरित्याग इत्याह — **बहुष्विति**। सभासंनयने भकाराकारस्यादिव्यपदेशनिवृत्तये एकग्रहणम्। न च संख्यावचनत्वे तद्वचवच्छेदः शक्यते कर्तुम्। अतोऽसहायवाचिग्रहणमित्यर्थः। **अस्तीति**। तथा च लोकवेदयोर्व्यवहारः 'सहस्रे शतमस्ति' इति, [6]'यन्नव-

---

[1] ज्येष्ठादयः शब्दा इत्युचितं भाति।

[2] योगसूत्रम् १. ९.

[3] एत्यागतसंबन्ध्यागमनस्येत्यर्थः।

[4] प्रदीपे 'न संख्यावाची' इत्यत्र 'न तु संख्यावाची' इति पाठः स्वीकृतः।

[5] अन्यादिशब्दवाचिनस्तु — क.

[6] तै. सं. २. २. ५. 'वैश्वानरं द्वादशकपालं निर्वपेत्' इति विहिते द्वादशकपाले 'यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति' इति पृथगनूद्यते।

कपालः' इति च। तृतीयान्ताद्वतिविधानादाह — **एकस्मिन्निति**। अतिदेशस्यानेकप्रकारत्वादाह— **सर्वेति**। प्रयोजनानां प्रसिद्धत्वादन्यतः सिद्ध्यभावाच्च कथं प्रश्न इत्याशङ्क्यान्यतः सिद्धिमाह — **व्यपदेशिवदिति**। व्यपदेशिवद्भावन्यायापरिज्ञानात् प्रयोजनकीर्तनं न भवति, तस्य प्रसिद्धत्वात्। किं तु तन्न्यायसिद्धव्यपदेशस्य गौणत्वाद्वचनमन्तरेण न लक्षणशरणानां तत्र कार्यपरिज्ञानमिति वचनारम्भफलं कीर्त्यते — **इतर इति**। [1]सत्यन्यस्मिन् मुख्यत्वात् तद्व्यपदेशस्य कथं वतिप्रयोगः, तत्राह— **आद्यन्ताविति**। लक्षणशेषत्वेनैतद्वचनं न भवति, किं तु सूत्रानारम्भायेत्यभिसंधाय यथान्यासपरित्यागेनास्य स्वीकारे कारणमाह — **सर्वेति**। धात्वादिव्यपदेशस्य पच्यादिष्विवेणादिष्वपि मुख्यत्वादनतिदेश्यत्वाद् भेदव्यपदेशः पच्यादिषु दृष्ट इणादिष्वतिदिश्यत इत्यभिप्रेत्याह — **मुख्य इति**। लोकविज्ञानस्य वचनभिन्नत्वमव्यभिचारादविशेषणमित्याशङ्क्य वचनं न कर्तव्यं लोकव्यवहारात् सिद्धेरित्येवंपरतया बहुव्रीह्याश्रयणेन योजयति — **अवचनमिति**। यद्वा, वचनमन्तरेणाभिन्ने भेदव्यवहारो लोकदृष्टान्त इतीहापि दृष्टान्तत्वमित्यभिमतसिद्धिरिति योजनाकीर्तनाभिप्रायः। अभिन्ने भेदकल्पनानिमित्तमाह — **इहेति**। **तस्यायमिति**। नन्ववयवस्य द्विर्वचनमिष्यते, अवयविद्विर्वचनं च [2]वचनार्थः। नैष दोषः, तयोरिहाभेदात्, नानाप्रयोगयोगितोपलक्षिततयावयवत्वं तद्विप्रतिरूपतयावयवित्वं चेकारस्यैवेति नानिष्टम्। यथार्थवतोऽवयवित्वकल्पनायामर्थोपलक्षितस्वरूपस्य द्विर्वचनं तथा प्रयोगभेदवतोऽवयवित्वकल्पनायां तदुपलक्षिते द्विर्वचनमिति समानम्। [3]भाष्यस्थानां दृष्टान्तानां प्राथम्य[4]व्यपदेशानुकूलत्वादेकाच्त्वप्रत्ययत्वावयवत्वाद्यनुकूलं दृष्टान्तमाह — [5]**यथेति**। ननु नानारूपे भवत्विणादौ धातौ भेदकल्पना, सिप्प्रत्यये तु कथमित्यत आह — **एवमिति**। ननु भवतु कल्पितो भेदः, मुख्ये तु चरितार्थं वचनं कथं तस्मिन् स्यादित्यत आह — **लोकेति**। गौणो द्विविधः — सांप्रतिको निरूढश्चेति। तत्र निरूढस्य मुख्यकल्पनया गौणत्वादौ मानाभावान्नैतन्न्यायावतारः। दृश्यते हि वैलक्षण्यं 'शुक्लः पटः' इति, 'यष्टीः प्रवेशय' इति च लाक्षणिकत्वाविशेषेऽपि। वर्णसमुदाय इति लक्षितस्य पदस्य प्रत्यासत्त्या ग्रहणशङ्कां वारयति — **पादेति**। पदस्यापि ऋगवयवत्वादित्थं व्याख्यानं किमर्थमित्यत आह — **तथा चेति**। [6]तत्र पादाविवक्षायां को दोषः, तत्राह — **[न त्विति।]** अर्थमादाय वर्तिपदार्थान्यपदार्थ[7]भेदव्यपदेश इत्युक्तम्। तत्र किमर्थस्यान्यपदार्थत्वमुत वर्तिपदार्थत्वमित्यपेक्षायामाह — **पदादीनामिति**। 'पदं नामार्थः' इत्यादिभाष्यार्थमाह — **अभेदेति**। 'एकवर्णं पदम्' इत्यादिवाक्यस्थपदादिशब्दैरभेदोपचारात् तदर्थाभिधानमिति भाष्यार्थ इत्यर्थः। नानावस्तुविषयाणां व्यवहाराणां कथमेकस्मिन्नुपपत्तिः, तत्राह — **प्रथमेति**। द्वितीयादिसत्त्वे पूर्वहीनस्य प्राथम्यव्यपदेशो मुख्यः, इह तु [8]'पूर्वाभावमात्रमादाय प्रयुज्यते। पूर्वोत्तरसत्त्वे मध्यमव्यपदेशादिह किंनिमित्तकतयासहाये[9] [10]मध्यमव्यपदेशः, तत्राह — **मध्यमेति**। **करणादिति**। करणाध्यवसायादित्यर्थः। प्रथमादिसत्त्वे पराभावे कनीयस्त्वं मुख्यम्। पराभावमात्रेण तु गौणं वाच्यम्। पराभावनिश्चयस्तु कुत इत्यत्राह — **अन्य इति**। मात्रादिवृद्धभावादिना तन्निश्चयः। भूतप्रसवायाः सांप्रतिकगर्भेण हनने तस्य गर्भस्य द्वितीयादिरूपत्वात् प्राथम्यव्यपदेशस्यात्यन्तमप्रसक्तेः

---

[1] सत्यस्मिन् — क.
[2] वचनार्थम् — क.
[3] भाष्यस्थायिदृष्टान्तानां — क.
[4] व्यपदेशस्यैवानुकूलत्वादित्यर्थः।
[5] प्रदीपे 'एवं शिलापुत्रकस्य' इत्यत्र 'यथा शिलापुत्रकस्य' इति पाठोऽभिमत इति भाति।
[6] तत्रापादाविवक्षायां — क.
[7] भेदे व्यपदेशः — क.
[8] पूर्वभावमात्रमादाय — क.
[9] असहाय इति छेदः।
[10] मध्यव्यपदेशः — क.

'असूतायाम्' इति विशेषणम्। [1]'अभूतप्रसवायां गौणत्वप्रतिपादनेन [2]तत्र कथं मुख्यतां प्राथम्यव्यपदेशस्य दर्शयतीत्यत आह — **बहुकृत्व इति**। गर्भशब्दस्यापत्यवाचित्वाद् भूतप्रसवायां प्रथमगर्भहननव्यपदेशो मुख्य इत्यर्थः। 'असोष्यमाणायाम्' इति विशेषणात् प्रसोष्यमाणायामेतद्व्यपदेशस्य मुख्यत्वं सूचितम्, तदयुक्तम्, प्रथमगर्भहनन[3]प्रसोष्यमाणत्वयोर्विरोधात्, तत्राह — **तथेति**। हननं हिंसामात्रम्। तच्च प्रसोष्यमाणाया उपपद्यत एव। अत्र च भाविगर्भापेक्षया प्राथम्यं मुख्यम्। [4]**कुक्षिस्थेनेति**। कुक्षिस्थत्वं न विवक्षितम्, कुक्षिस्थेन निस्सृतेन वा [5]अद्वितीयेन हतेत्यर्थः। लौकिकोक्तिस्त्वेषास्मिन् विषये 'कुक्षिस्थेन हता' इति। **अपत्येति**। उक्तोऽत्र हेतुः। औपचारिकव्यवहारेऽपि निमित्तं किंचिदपेक्षितमित्यत आह — **तत्रेति**। यदीयमजीविष्यत् प्रासोष्यतापत्यान्तरमित्युत्प्रेक्षितापत्यान्तरापेक्षया प्राथम्यमित्यर्थः। असदुत्प्रेक्षणेन प्राथम्यकल्पनाद्वरं प्रथमसदृशत्वेन तद्व्यवहार इत्यभिसंधायाह — **स्त्र्यन्तरेष्विति**। **बहुकृत्व इति**। पूर्वानुसारेणेदं बोध्यम्॥

[१, २५१–२५४]

(**लघुविवरणम्**) [6]'यस्य' इति लोपात् प्राक् 'गार्ग्यः' इत्यत्रादिव्यपदेशो मुख्य इति नैतदुदाहरणमित्यत आह — **अत्र परत्वादिति**। **क्तिन इति**। अनेकाचां क्तिन् नास्तीत्यङ्गीकृत्योक्तम्। **सौवर्य इति**। स्वरविधौ भवाः। **इत्यमिति**। [7]'एतिस्तुशास्' इति क्यपि सतीति भावः॥

[१, २५१–२५४]

(**विवरणम्**) **अनपेक्षितप्रतियोगिनोः** अनपेक्षितपरपूर्वयोरित्यर्थः। **तथापीति**। गौणमुख्यन्यायाभावाय स्वरितलिङ्गासङ्गस्य दुर्ज्ञानत्वादित्यर्थः। **कथमिति**। तदा असमप्रधानयोः साहित्यप्रतीतेरित्यर्थः। **इकारोकारयोरिति**। [8]'उपसर्गे घोः किः' [9]'सनाशंसभिक्ष उः' इत्यनयोः। अहिचुम्बकायनिरित्यत्र [10]'प्राचामवृद्धात्' इति फिन्। अग्निवेशशब्दाद् [11]गर्गादित्वाद्यञ्। **क्तिन इति**। अनेकाचो धातोर्नास्ति क्तिन्, तस्य प्रायेण प्रत्ययान्तत्वात् क्वचिच्च गुरुमत्त्वे सति हलन्तत्वात् तत्र चाकारप्रत्ययविधानात् चिरिजिर्यादिभ्यस्त्वनभिधानात् जागर्तेश्च भिदादित्वादङित्वविधानान्नास्ति [12]क्तिनित्याद्युदात्तार्थत्वासंभवान्नित्करणसामर्थ्यादेकाच [13]आदिवद्भावाभावेऽप्युदात्तत्वं भविष्यतीत्याशङ्क्य क्तिनो नित्त्वस्य प्रयोजनान्तरमुक्तम्। स्वरविधौ भवाः **सौवर्यः**। प्रत्ययान्ते च समुदाये मुख्य एवादिः संभवतीति भावः। **येन विधिरिति**। तेनैव ह्यत्र तदन्तविधिरिति भावः। **अर्थवतेति**। तत्र ह्यर्थत्यागोपादानाभ्यां भेदः सुकर इति भावः। **इत्यमिति**। [14]'एतिस्तुशास्' इत्यनेन क्यब्विधानादित्यर्थः॥

---

[1] भूतप्रसवायां — क.
[2] भूतप्रसवायामित्यर्थः।
[3] प्रसोष्यमाणत्वयोर्विशेषात् — क.
[4] प्रदीपे 'कुक्षिस्थितेनैव' इत्यत्र 'कुक्षिस्थेनैव' इति निर्णयसागरमुद्रिते पाठः।
[5] द्वितीयभिन्नेनेत्यर्थः।
[6] पा. सू. ६. ४. १४८.
[7] पा. सू. ३. १. १०९.
[8] पा. सू. ३. ३. ९२.
[9] पा. सू. ३. २. १६८.
[10] पा. सू. ४. १. १६०.
[11] गर्गादिभ्यो यञ् — ज.
[12] क्तिनित्याद्युदात्तार्थत्वसंभवात् — च, छ, ज.
[13] आदित्वाभावेऽपीत्युचितम्। उद्द्योतने तु तथैव दृश्यते।
[14] पा. सू. ३. १. १०९.

[१, २५१–२५४]

(**उद्द्योतनम्**) **मात्रम्** एव, न तु [1]पूर्वपरसद्भावोऽपि, गौरवादिति भावः। गोनर्दीयो भाष्यकार इत्याह — **भाष्यकारस्त्विति**। भाष्ये सत्यन्यस्मिन्नित्येतदेव सत्यमित्यन्वयः। **अनपेक्षितप्रतियोगिनोः** अनपेक्षित[2]पूर्वपरयोः। **तथापीति**। गौणमुख्यन्यायानवतारनिमित्तस्वरितलिङ्गासङ्गस्य दुर्ज्ञानत्वादित्यर्थः। [3]'भ्रान्तिः' इत्यनेनाकरणमपि सूचितम्। 'प्रत्यय' इत्यादि द्वन्द्वः। तत्र ञ्नितोऽप्याद्युदात्तत्वशङ्कां वारयति — **ञ्निति चेति**। **कथमिति**। यद्यपि 'प्रत्ययश्च ञ्निच्च' इत्येकविभक्त्योरेव द्वन्द्वः, तथाप्येकरूपेणैकान्वयिनोरेव द्वन्द्वः। अत्रार्थभेदेनोदात्तत्वान्वय इति भावः। **भिन्नविभक्त्योः** [4]भिन्नविभक्त्यर्थान्वयिनोः। सप्तम्यन्तयोः षष्ठ्यन्तयोर्वाद्युदात्तत्वेनान्वयो न तु विभक्तिभेद इति परिहरति — **उच्यत इति**। तत्र प्रत्ययेऽपि सप्तम्यन्तत्वं तावदाह — **प्रत्ययस्येति**। **विषयः** आधारः। विभक्त्यैक्येऽप्याधारत्वपरत्वरूपार्थभेदान्न द्वन्द्वो युक्तः, अत आह — **यद्वेति**। संबन्ध[5]सामान्ये षष्ठीत्युभयविशेषसंग्रहः, नापि विभक्त्यर्थभेद इति भावः। **भिन्नविभक्तित्वं** भिन्नविभक्त्यर्थत्वम्। स्वरस्यान्यथासिद्धिं शङ्कते — **ऋदोरबिति**। **अकारेति**। तथाच 'औपगवः' इत्यादावुदात्तत्वसिद्धिरिति भावः। **इकारेति**। [6]'उपसर्गे घोः किः' [7]'सनाशंसभिक्ष उः'। ननु सामान्येन ज्ञापकत्वादिकारादेरपि स्यात्, अतो ज्ञापकत्वमेव नास्तीत्याह — **विशेषणार्थं वेति**। भाष्ये **अहिचुम्बकायनिः** [8]'प्राचामवृद्धात्' इति फिन्। **आग्निवेश्यः** [9]'गर्गादिभ्यो यञ्'। गर्गशब्दस्यानेकाच्त्वेनादित्वसंभवादनुदाहरणत्वं परिहरति — **अत्रेति**। **स्वरेति**। [10]'न पदान्त' इति सूत्रेण। नन्वजपेक्षयादित्वाभावेऽपि व्यञ्जनापेक्षया तत् स्यात्, अत आह — **स्वरविधाविति**। नन्वनेकाचः क्तिन् नास्ति, प्रत्ययान्तानां गुरुमतां [11]चाप्रत्ययान्तानामकारप्रत्ययविधानात्, चिरिजिर्यादिभ्योऽनभिधानात्, जागर्तेर्भिदादित्वेनाङ्विधानात्। क्तिनो नित्करणसामर्थ्यादेकाच आदित्वाभावेऽप्याद्युदात्तत्वं स्यादित्याशङ्क्याऽन्यथासिद्धिमाह — **क्तिन इति**। **तादाविति**। तुर्वर्जिते निति कृत्यनन्तरो गतिः प्रकृतिस्वरः स्यात्, [12]'प्रकर्तुम्, प्रकृतिः' इत्यादौ। ननु [13]'सौवर्यः' इति वचनात् नित्कृदन्तस्याद्युदात्तत्वविधानात् 'कृतिः' इत्यादावपि मुख्यादेरेव स्वरः सिध्यति, अत आह — **सौवर्य इति**। स्वरशब्दस्तद्विधिपरः, स्वरविधिषु भवा इत्यर्थेऽणि द्वारादित्वादैच्। ननु [14]'नेटि' [15]'इट ईटि' इति [16]च ज्ञापकात् सिपोऽपीड् भविष्यति, अत आह — [17]**नेटीति**। अत एव भाष्यकृता सिबुदाहृतः।

---

[1] पूर्वापर — अ.
[2] पूर्वापरयोः — अ.
[3] 'भ्रान्तिः' इत्यादि 'सूचितम्' इत्यन्तं नास्ति–अ.
[4] 'भिन्नविभक्त्यर्थान्वयिनोः' इति नास्ति—इ, ऊ.
[5] सामान्यषष्ठीति — म, आ, उ.
[6] पा. सू. ३. ३. ९२.
[7] पा. सू. ३. २. १६८.
[8] पा. सू. ४. १. १६०.
[9] पा. सू. ४. १. १०५.
[10] पा. सू. १. १. ५८.
[11] वाप्रत्ययान्तानाम् — म, इ, उ, ऊ; च प्रत्ययान्तानाम् — ऋ.
[12] 'प्रकर्तुम्' इति नास्ति — म, उ.
[13] महाभाष्यम् ६. १. १९२.
[14] पा. सू. ७. २. ४.
[15] पा. सू. ८. २. २८.
[16] चशब्दो नास्ति — म.
[17] उद्द्योतनमातृकासु 'अ, आ, इ, उ, ऊ, ऋ' संकेतितासु 'नेटीति' इति प्रतीक उपलभ्यते। प्रदीपे 'नेटि' इति पदं नोपलभ्यते। अतः प्रतीकग्रहणात् प्रदीपे 'नेटि, इट ईटीति च ज्ञापकम्' इत्यन्नंभट्टाभिमतः पाठः स्यादित्युन्नीयते॥ नेडिति — म.

सामान्यज्ञापकत्वे तु नेदं प्रयोजनमिति भावः। **स्वस्य चेति**। [1]'येन विधिस्तदन्तस्य' इत्यत्र [2]'स्वं रूपम्' इत्यतः स्वमित्यनुवर्तनात् 'स्वस्य च' इत्यङ्गीक्रियते। तत्रैव 'यस्मिन्' इति वार्तिकम्। तत्रापि 'स्वस्य' [3]इत्यनुवर्तने स्वादेः स्वस्य च कार्यं स्यादेवेत्येतन्न प्रयोजनमित्यर्थः। ननु वार्तिककृता [4]'आडजादीनाम्' इत्यस्य प्रत्याख्यातत्वान्नेदं प्रयोजनम्, अत आह — **सूत्रेति**। ननु 'येन विधिस्तदन्तत्वे' इति वक्ष्यमाणेनैव खट्वे इत्यादि सिध्यति, [5]'येन विधिः' इत्यनेनैवात्र तदन्तविध्यङ्गीकारात्। तथा च [6]'द्विवचनप्रगृह्यत्वे' [7]इति पृथङ् न वक्तव्यम्, अत आह — **येनेति**। **अयं** द्विवचनप्रगृह्यत्व इत्ययम्। [8]**अर्थवतेति**। तत्रार्थस्य त्यागोपादानाभ्यां भेदः सुकर इत्यर्थः। ननु 'आभ्याम्' इत्यत्र 'येन विधिस्तदन्तत्वे' इत्येव सिद्धेः पृथगुपन्यासो व्यर्थः, अत आह — **अत्र द्वे इति**। अलोऽन्त्यत्वार्थमुपन्यास इत्यर्थः। अत एव भाष्ये 'अलोऽन्त्यस्य प्रयोजनम्' इत्युक्तम्। [9]**ईङ इति**। 'ईङ् गतौ' इति दिवादिः। **इत्यमिति**। [10]'एतिस्तुशास्' इत्यनेन क्यब्विधानादित्यर्थः॥

[१, २५१–२५४]

(**रत्नप्रकाशः**) स्ववचनसमानार्थकं सूत्रं स्ववचनप्रत्याख्यानेनैव प्रत्याख्यातमित्यजानन् प्रकारान्तरेणैव सूत्रं प्रत्याख्यातुं यतते — **आद्यन्तवद्भावश्चेति**। **अपूर्वानुत्तरलक्षणत्वादिति**। आद्यन्तशब्दप्रवृत्तिनिमित्ते अविद्यमानपूर्वत्वाविद्यमानोत्तरत्वे एव, न तु 'सत्यन्यस्मिन्' इत्यंशो निवेशनीयः। तथा चैकस्मिन्नपि सत्येव प्रवृत्तिनिमित्ते आद्यन्तव्यपदेशो भवतीति तदर्थमेतत् सूत्रं न कर्तव्यमिति मन्यते। तदेतद् दूषयति कुतार्किकनागगरुडायितः स्वनामग्रहणपूर्वकं भगवान् — **गोनर्दीय इति**। **सत्यमेतदिति**। अर्धाङ्गीकारसूचकमिदम्। तदुक्तप्रवृत्तिनिमित्तं स्वाभिमतप्रवृत्तिनिमित्तैकदेशतयाङ्गीकृतम्, न तु प्रवृत्तिनिमित्ततयैवेति तदुपपत्तिः। सति त्वन्यस्मिन्निति चेत्यर्थः। तथा च तेन प्रकारेण प्रत्याख्यानं सूत्रस्य न युज्यत इति भावः। एतेन 'तस्मादेकस्मिन्नाद्यन्तव्यपदेशो नास्तीति कर्तव्यो योगः। यद्यपि लौकिकेन व्यपदेशिवद्भावेनाद्यन्तव्यपदेश एकस्मिन्नपि सिध्यति, तथापि गौणत्वात् कार्येण न भवितव्यमिति यस्य भ्रान्तिः स्यात् तं प्रति योगोऽयमारब्धः' इति निरस्तम्। वार्तिककाराभिमतसूत्रप्रत्याख्यानप्रकारस्य भगवता निराकृतत्वेऽपि सूत्रस्य स्थापितत्वाभावात्। वार्तिकप्रत्याख्यानयुक्तीनां सूत्रप्रत्याख्यानेऽपि तुल्यत्वेन वार्तिकविषयन्यूनविषयकत्वाभ्युपगमेन सूत्रस्य स्थापने भगवतो वैषम्यनैर्घृण्यदोषापत्तेश्च। [11]वार्तिककारो न्यूनविषयकमपि सूत्रं स्थापितमिति मन्यमानस्तत् प्रयोजनं पृच्छति — **कानि पुनरस्येति**। भाष्यकारस्तु गूढाभिसंधिः 'व्यपदेशिवदेकस्मिन्' इति वार्तिकसमानार्थकमेव सूत्रम्। तच्च वार्तिकप्रत्याख्यानेन प्रत्याख्यातं चेदपि तत्प्रयोजनकथने न काप्यनुपपत्तिरिति मत्वा तत्प्रयोजनमाह — [12]**आदिवत्त्व इति**। **प्रत्ययञ्निदाद्यु-**

---

[1] पा. सू. १. १. ७२.
[2] पा. सू. १. १. ६८.
[3] इत्यनुवर्तमाने — ऋ.
[4] पा. सू. ६. ४. ७२.
[5] पा. सू. १. १. ७२.
[6] वार्तिके 'अन्तवद् द्विवचनान्तप्रगृह्यत्वे' इत्यत्र 'अन्तवद् द्विवचनप्रगृह्यत्वे' इत्यन्नंभट्टाभिमतः पाठः। अयं पाठश्छायायामप्युक्तः।
[7] इति व्यर्थमत आह — आ.
[8] अर्थवत इति — म, आ, इ, उ, ऋ.
[9] ईङिति — म.
[10] पा. सू. ३. १. १०९.
[11] वार्तिककाराशयानुसारीत्यर्थः।
[12] 'आदिवत्त्वे' इत्यादि भाष्यवचनमित्याशय इति भाति।

दात्तत्वे इति। प्रत्ययस्य ञ्नितोश्च संबन्धिनी आद्युदात्तत्वे प्रयोजने इत्यर्थः। एतेन 'प्रत्ययस्याद्युदात्तत्वं ञ्नित्याद्युदात्तत्वमित्यर्थः' इति भिन्नविभक्त्या द्वन्द्वं निदर्शयन् निरस्तः। 'प्रत्ययस्यादिरुदात्त इतीहैव स्यात्, ञ्नित्यादिर्नित्यमितीहैव स्यात्' इति भाष्यस्य [1]'आद्युदात्तश्च' [2]'ञ्नित्यादिर्नित्यम्' इति सूत्रार्थानुवादमात्रपरत्वेन तदनुरोधेन प्रकृतवचने भिन्नविभक्त्या द्वन्द्वनिदर्शनायोगात्। एतेन 'कथं पुनर्भिन्नविभक्त्योर्द्वन्द्वः? उच्यते, प्रत्ययस्य यदाद्युदात्तत्वं तस्य प्रत्ययो विषय इति प्रत्ययेऽपि तदुच्यते। यद्वा, ञ्निति यदाद्युदात्तत्वं तद् ञ्नितोऽपि संबन्धि भवतीति नास्ति भिन्नविभक्तित्वम्' इत्यपि निरस्तम्। तदुक्तरीत्या सूत्रे भिन्नविभक्त्या विहितयोरपि द्वन्द्वस्यैकविभक्त्यैव निदर्शनमुचितमिति सिद्धेऽपि तेन साक्षान्निर्दर्शितभिन्नविभक्तित्वापलापासंभवात्। यदप्युक्तम् "[3]'ऋदोरप्' इत्याद्युदात्तनिवृत्त्यर्थात्पित्त्वाल्लिङ्गादेकाचोऽपि प्रत्ययस्याद्युदात्तत्वं भविष्यतीति चेद् अकारविषयमेव लिङ्गं स्यादितीकारोकारयोः प्रत्यययोराद्युदात्तत्वं न स्यात्" इति। तदपि न, अगतिकगतिभूतज्ञापकाश्रयेण सूत्रप्रयोजननिराकरणानौचित्यात्। सामान्यापेक्षज्ञापकस्यापि शास्त्रे आश्रितत्वेन ज्ञापकस्य विशेषपरतावलम्बनेन तन्निराकरणपरिहारानौचित्यात्। आद्यन्तवद्भावाभावे केवलाकारादावाद्युदात्ताप्रसक्त्या [4]'अनुदात्तौ सुप्पितौ' इत्यस्य तदपवादत्वे मानाभावेन पकारस्याद्युदात्तनिवृत्तिलिङ्गत्वाभावेन ज्ञापकत्वासंभवाच्च। यदप्युक्तम् 'विशेषणार्थं वा पित्करणं स्यात् थाथादिसूत्र इत्यज्ञापकं स्यात्' इति। तदपि न, विशेषणमात्रप्रयोजनकत्वे पकारस्येत्संज्ञाया एवाभावेन पित्करणस्य विशेषणार्थतोक्तेर्व्यर्थत्वात्। **गार्ग्यः कृतिरित्यत्र न स्यादिति**। 'ञ्निति परे प्रकृतेरचामादेरच उदात्तः स्यात्' इत्यर्थाश्रयेणैवमुक्तम्। वस्तुतस्तु 'ञ्निति परे पूर्वस्यादिरुदात्तः' इत्येव तत्सूत्रार्थ आश्रयणीय इति 'कृतिः' इत्यत्र नित्स्वरो न स्यादित्यत्रैव भगवतस्तात्पर्यम्। यद्यपि [5]"सौवर्यः सप्तम्यस्तदन्तसप्तम्यः' इति पक्षे ञ्निदन्तस्यादिरुदात्त इत्यर्थलाभात् 'कृतिः' इत्यादावपि निदन्ते आदिशब्दप्रवृत्तिनिमित्तसत्त्वादेव स्वरः सिध्यति, तथापि स [6]"ञ्निति' इति सूत्रे नाश्रणीय इति वक्ष्यते। क्तिनो नित्त्वम् 'ऊर्णुतिः' [7]"तादौ च निति कृत्यतौ' इत्यत्र सावकाशम्। **जोषिषत्** जुषेर्लेट्, तस्याट्, सिप्, तस्येट्। यद्यपि [8]"इट ईटि' इत्यस्य सामान्यापेक्षं प्रकृतसूत्रार्थज्ञापकत्वं युज्यते, तथापि ज्ञापकाश्रयेण सूत्रप्रत्याख्यानमनुचितमिति भावः। एतेन "[9]"इट ईटि' इति ज्ञापकं सिज्विषयमेव स्यात्" इति निरस्तम्। **यस्मिन् विधिस्तदादित्व इति**। [10]"येन विधिः' इति सूत्रे स्वंग्रहणं नानुवर्तते। [11]"तस्य चेति वक्तव्यम्' इति वार्तिकं तु तत्सूत्रप्रयोजनवार्तिकमात्रविषयकमिति भावः। **अजाद्याट्त्व इति**। [12]"आडजादीनाम्' इति सूत्रं स्थितम्। तत्प्रत्याख्यानं तु प्रौढ्येति भावः। [13]**द्विवचनप्रगृह्यत्व इति**। येन विधिसूत्रप्रयोजनवार्तिकशेषभूतेन [14]"तस्य च' इत्यनेनापि सिद्धमेतत्। एतेन 'येन विधिस्तदन्तस्येत्यनेनैव गते प्रपञ्चार्थोऽयमुपन्यासः' इति प्रत्युक्तम्। स्वमित्यस्य तत्राननुवृत्तेः सिद्धान्ततत्वात्। **कुरुत इति**। तकाराकारस्यैकस्य टिसंज्ञायामेत्वं सिध्यतीति भावः। एतेन 'अर्थवता व्यपदेशिवद्भावात् तशब्दाकारस्या-

---

[1] पा. सू. ३. १. ३.
[2] पा. सू. ६. १. १९७.
[3] पा. सू. ३. ३. ५७.
[4] पा. सू. ३. १. ४.
[5] महाभाष्यम् ६. १. १९२.
[6] पा. सू. ६. १. १९७.
[7] पा. सू. ६. २. ५०.
[8] पा. सू. ८. २. २८.
[9] पा. सू. ८. २. २८.
[10] पा. सू. १. १. ७२.
[11] का. वा. १. १. ७२–१५.
[12] पा. सू. ६. ४. ७२.
[13] वार्तिके 'अन्तवद् द्विवचनान्तप्रगृह्यत्वे' इत्यत्र 'अन्तवद् द्विवचनप्रगृह्यत्वे' इति पाठः स्वीकृतः।
[14] का. वा. १. १. ७२–१५.

नर्थकत्वादिह प्रयोजनत्वेनोपन्यासः' इति निरस्तम्। प्रकृतसूत्रस्य व्यपदेशातिदेशकत्वस्यैव स्वीकर्तव्यत्वेन वार्तिकेन सह तस्य प्रत्याख्यानेऽपि लोकसिद्धव्यपदेशिवद्भावस्यार्थवदनर्थकसाधारणस्य शास्त्रेऽपि तत्साधारण्येनैवाश्रयितुमुचितत्वात्। तथाश्रयणे दोषाभावाच्च। **अलोऽन्त्यस्येति**। यद्यप्येतत्सूत्रप्रवृत्तिं विनापि [1]'निर्दिश्यमानस्यादेशा भवन्ति' इत्येव सिध्यति, तथापि सत्येतस्मिन्नतिदेशे [2]पर्जन्यवन्न्यायेनालोऽन्त्यपरिभाषा एकस्मिन्नपि प्रवर्तत इति भावः। **येन विधिरिति**। 'अन्तवद् द्विवचनप्रगृह्यत्वे' इत्यनेनैवैतत्सूत्रविषयस्य दर्शितत्वेऽप्युदाहरणप्रपञ्चार्थं पुनरुपादानम्। **एयमिति**। ईङो रूपम्। इणस्तु 'इत्यम्' इति भवति॥

[१, २५१–२५४]

(**नारायणीयम्**) व्यपदेशिवद्भाववचनप्रत्याख्यानादेव सूत्रप्रत्याख्यानस्याप्यन्यथासिद्धत्वात् तस्य पृथक् प्रत्याख्यानं किमर्थमित्यत आह — **इदानीमिति**। गौणत्वादाद्यादिव्यपदेशस्याबुधबोधनायारम्भ इति न च वाच्यम्, गौणत्वाभावादितीदानीं वार्तिककृतोच्यत इत्यर्थः। [3]सर्वस्मिन्नेतद्व्यवहारस्यामुख्यत्वादसहाये कथं न गौणता, तत्राह — **यद्यपीति**। लाघवादपूर्वत्वादिकमेवाद्यादिपदप्रवृत्तिनिमित्तमित्यर्थः। वार्तिककारापेक्षया कथं गोनर्दीयस्याभियुक्ततरत्वमित्याशङ्क्य च दैशिकोऽयं भाष्यकारस्य व्यपदेश इत्याह — **भाष्येति**। गौरवात् कथं विशिष्टस्य प्रवृत्तिनिमित्तत्वं भाष्यकृताङ्गीकृतमित्यत्राह — **न होति**। प्रामाणिकत्वाद् गौरवं न दोषायेत्यर्थः। **यद्यपीति**। व्याख्यातमधस्तात्। चोदयितुमभिमतं योग्यमर्थं दर्शयति — **प्रत्ययस्येति**। **कथमिति**। [4]समानविभक्तिकयोरेव चार्थवृत्तित्वमिति भावः। सामान्यविषयं ज्ञापकं भविष्यतीत्यत आह — **विशेषणार्थमिति**। **परत्वादिति**। स्वरभिन्नस्य प्राप्तेरनित्यत्वं लोपस्य। लोपे कृते स्वरस्याप्राप्तेरेवानित्यत्वम्। **स्वरविधाविति**। [5]'हल्स्वरप्राप्तौ' इत्यनाश्रित्येच्यते। यदिहाद्युदात्तत्वं न स्यात् क्तिनो नित्त्वं किमर्थम्, अत आह — **क्तिन इति**। [6]निष्ठायां सेटोऽकारवचनेनानेकाचः क्तिन् नास्तीति भावः। **एतदिति**। [7]ञ्निदाद्युदात्तत्वफलम्। वल्मात्रप्रत्यये इडस्तीत्यस्य [8]'इट ईटि' इति वचनं ज्ञापकमित्यत्राह — **इट इति**। तुल्यजातीयविषयत्वस्य मुख्यत्वादिति भावः। **स्वस्येति**। सूत्रेऽनुवर्तमानस्य [9]वार्तिकेऽपि संबन्धयितुं शक्यत्वात् [10]तदनुवृत्त्यनाश्रयमेव प्रयोजनकीर्तनम्। वार्तिककारमते एतत्सूत्राभावात् कथं तत्र फलकीर्तनम्, तत्राह — **सूत्रेति**। **प्रपञ्चार्थ इति**। तत्रानेकपक्षसंभवेऽपीदन्तद्विवचनपक्षस्यादुष्टत्वं द्योतयितुमित्यर्थः। **अर्थवतेति**। यद्यपि व्यपदेशिवद्भावानपेक्षया सूत्रफलमुच्यते, तथापि तदपेक्षायामपीदं फलं भवतीति भावः। अनर्थकस्याप्यवस्थाभेदेन [11]कल्पितेनैतदप्यन्यथासिद्धं फलम्। [12]'येन विधिः' इत्यनेन गतार्थतां निरस्यति — **अत्रेति**। **इत्यमिति**। [13]'एतिस्तु' इति क्यप्॥

---

[1] परिभाषा १२.
[2] परिभाषा १२०.
[3] सर्वस्मिन्नेतद्व्यवहारस्य मुख्यत्वात् — क.
[4] समानप्रवृत्तिकयोरेव — क.
[5] परिभाषा ८१.
[6] गुरोश्च हल इति सूत्रे 'निष्ठायां सेटः' इति वार्तिकेनेत्यर्थः।
[7] निदाद्युदात्तत्व — क.
[8] पा. सू. ८. २. २८.
[9] 'वार्तिकेऽपि' इत्यतः प्राक् 'वा' इत्यधिकम्— क.
[10] तदनुवृत्त्याश्रयमेव — क.
[11] कल्पितेन नैतदपि — क.
[12] पा. सू. १. १. ७२.
[13] पा. सू. ३. १. १०९.

तरप्तमपौ घः . १. १. २२.

[१, २५४–२५६]

(**लघुविवरणम्**) तद्धिततमपा साहचर्यात् तरबपि तद्धित एव ग्रहीष्यत इत्यत आह — **साहचर्यमिति** । 'अनर्थकः प्रतिषेधोऽप्रतिषेधः' इति भाष्यदर्शनान्मध्यमपदलोपी समास इति शङ्कां निवर्तयति — **न प्रतिषेध इतीति** । प्रयोजनमस्येत्यत्रार्थे [1]'प्रयोजनम्' इति ठञ्, तत्र भव इति वास्मिन्नर्थेऽध्यात्मादित्वाट्ठञ् । 'समानाधिकरणेषु' इत्युच्यमानेऽसंभवित्वं व्यावर्तयति — [2]**आतिशायनिक इति** । महिष्या रूपं महिषीरूपम्, तद्वदित्युच्यमाने रूपशब्देन सामानाधिकरण्याभावात् ह्रस्वस्य प्राप्तिरेव नास्तीत्यत आह — **इवशब्द इति** । ननु महिषीशब्द उपचारात् तदाकृतौ [3]वर्तत इति वक्तव्यं सामानाधिकरण्याय, तथाप्याकृतिशब्दस्य[4] सामान्यवचनत्वाभावे [5]'उपमानानि सामान्यवचनैः' इति समासायोगादलक्षणकोऽयं समास इत्यत आह — **तत्रेति** ॥

[१, २५४–२५६]

(**विवरणम्**) **स्वार्थेऽपीति** । आतिशायिकप्रकरणे घसंज्ञामकृत्वात्र संज्ञाकरणमनातिशायिकस्यापि यथा स्यादिति । स चार्थविशेषानिर्देशात् [6]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति न्यायात् स्वार्थिकः । तस्य च संज्ञायां प्रयोजनम् 'उच्चैस्तराम्' इत्यत्र [7]'किमेत्तिङव्यय' इत्यनेनाम् सिध्यतीति भावः । ननु तमप्साहचर्यात् तद्धित एव [8]'तरब् ग्रहीष्यते, तथा च नास्ति धातुप्रत्ययसमुदायात्मके तरे घसंज्ञाप्रसक्तिरित्यत आह — **साहचर्यमिति** । 'अनर्थकः' इति [9]'भाष्यदर्शनान्मध्यमपदलोपी तत्पुरुष इति भ्रमः स्यात्, तं व्युदस्यति — **नेति** । **वस्त्वर्थं** तात्पर्यार्थमित्यर्थः । **[काल्पनिकमिति ।]** [10]'ऋदोरप्' इति सूत्रपर्यालोचनेनावगतमानुमानिकमुच्यते । **समानाधिकरणः** प्रकृत्यभिहितस्यैव द्योतक इति प्रकृत्या समानविषय इत्यर्थः । **ननु तीर्णरिति** । ऋकारात् परस्य क्तिनो निष्ठावद्भावान्नत्वम्, [11]'ऋत इद्धातोः' इतीत्वस्य [12]'हलि च' इति दीर्घः । **सामान्येनेति** । अनिर्धारितेन कर्मविशेषेणेत्यर्थः । तथा च पुंस्त्वोपपत्तिः । 'महिषी रूपमिव' इत्यत्र महिषीति भिन्नपदं चेद्रूपशब्देनाकृत्यभिधानात् कस्याकृतिरिव महिषीति साकाङ्क्षं वचनं स्यात्, समासे तु महिषीरूपशब्दयोर्वैयधिकरण्यमिति नास्ति ह्रस्वप्राप्तिरित्यत आह — **इवेति** । यद्यप्यत्रापि कस्याकृतिरित्याकाङ्क्षा, तथाप्युपमेयस्य प्राधान्यात् सापेक्षस्यापि लभ्यते समासः । [13]यथाश्रुते त्वाकृतेरुपमानत्वेन गुणस्य सापेक्षत्वे न लभ्यते समास इति विशेषः । नन्वाकृतिशब्दो नोपमानोप-

---

[1] पा. सू. ५. १. १०९.
[2] आतिशायिक इति — ड, ढ, ण, त.
[3] 'वर्तते' इति नास्ति — ड, ढ.
[4] आकृतिशब्दशब्देन रूपशब्दो विवक्षितः ।
[5] पा. सू. २. १. ५५.
[6] परिभाषा १२२.
[7] पा. सू. ५. ४. ११.
[8] 'तरप्' इति नास्ति — ट.
[9] भाष्ये दर्शनात् — अ.
[10] पा. सू. ३. ३. ५७.
[11] पा. सू. ७. १. १००.
[12] पा. सू. ८. २. ७७.
[13] 'यथाश्रुते' इत्यादि 'न लभ्यते समासः' इत्यन्तं नास्ति — ट.

मेयसाधारणधर्ममभिधायोपमेये वर्तते श्यामादिवदिति सामान्यवचनत्वाभावान्न [1]'उपमानानि सामान्यवचनैः' इति समासः संभवतीत्यत आह — **तत्रेति**। **ह्रस्वत्वमिति**। महिषीशब्दस्योपमेयवृत्त्या सामानाधिकरण्यादिति भावः॥

[१, २५४–२५६]

(**उद्द्योतनम्**) [2]**तादौ इति**। तथा च लाघवमिति भावः। **प्रकरणेति**। आतिशायनिकप्रकरणत्यागेनेत्यर्थः। **स्वार्थेऽपीति**। अत्र [3]संज्ञाकरणमनातिशायनिकस्यापि यथा स्यादित्येवमर्थम्। स चार्थविशेषानिर्देशात् [4]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति स्वार्थिकः। अत्र [5]'द्विवचनविभज्योपपदे तरबीयसुनौ' इति योगापेक्षं ज्ञापकमिति [6]स्वार्थे ईयसुनप्यस्ति। तथा च 'महीयांसम्, महान्तम्' 'गरीयांसम्, गुरुम्' इत्यादि संगच्छत इत्याहुः। स्वार्थिकस्य सद्भावे ज्ञापनमात्रं तत्संज्ञाप्रयोजनम्, न त्वन्यत्। [7]केचित्तु 'उच्चैस्तराम्' इत्यत्राम्सिद्धिः प्रयोजनमित्याहुः। तच्चिन्त्यम्, तत्रातिशायनिकस्यैव तरपः [8]'किमेत्तिङव्यय' इत्याम्संभवात्। पित्त्वं संपादयति — **तरतेरिति**। [9]संज्ञाप्राप्तिकाले तरब्रूपत्वाभावात् कथं प्राप्तिः, तत्राह — **सर्वत्रेति**। **सर्वत्र ब्राह्मणितरेत्यादावपि**। ननु तमप्साहचर्यात् तरबपि तद्धित एव गृह्यत इति 'नदीतरः' इत्यत्र धातुप्रत्ययसमुदाये नातिप्रसङ्गः, अत आह — **साहचर्यमिति**। साहचर्यं न सर्वत्र व्यवस्थाहेतुरितीहापि [10]नाश्रीयत इति नकारावृत्त्या योज्यम्। वस्तुत इह शास्त्रे सर्वत्र [11]नाश्रीयत इत्यन्वयः। तदेवोपपादयति — [12]**तथा हीति**। **द्विरिति**। कृत्वोऽर्थानामेषां विसर्जनीयस्य षो वा स्यात् कुप्वोः परयोः। द्विष्करोति, द्विः करोति, इत्यादि। **चतुश्शब्देति**। अन्यथा 'चतुष्कपालम्' इत्यत्रापि विकल्पः स्यात्। **अन्यथा** साहचर्यस्य नियामकत्वे। भाष्ये **नदीतर इति**। घसंज्ञायां [13]'घरूप' इति ह्रस्वः स्यादित्यर्थः। 'अनर्थकः' इति भाष्ये दर्शनान्मध्यमपदलोपी तत्पुरुष इति भ्रमं निरस्यति— **नेति**। प्रतिषेधार्थोऽकारः पृथक्पदमित्यर्थः। **वस्त्वर्थं** तात्पर्यार्थम्। 'तरब्ग्रहणं ह्यौपदेशिकम्' इत्यत्र कर्मणि ल्युडन्तस्य ग्रहणशब्दस्य तरब्विशेषणत्वमङ्गीकृत्य तस्यौपदेशिकत्वं द्वेधाह — **उपदेश इति**। **उपदेशः** विधिः, स्वरूपज्ञानं वा। [14]'द्विवचन' इत्यादि[15]सूत्रस्यैतत् प्रयोजनम्, न तरपः, 'न चैष उपदेशे तरप्शब्दः' इति भाष्यासामञ्जस्यं च, अत आह — [16]**तत्र वेति**। अत्रोपदेशशब्दः [17]करणे घञन्तः सूत्रपरः। पूर्वत्र [18]'प्रयोजनम्' इति ठञ्। परत्राध्यात्मादेराकृतिगणत्वा-

---

[1] पा. सू. २. १. ५५.
[2] तादीति — अ, म, आ, उ.
[3] संज्ञाकरणेनातिशायनिकस्यापि — ऊ.
[4] परिभाषा १२२.
[5] पा. सू. ५. ३. ५७.
[6] स्वार्थेऽपीयसुनस्ति — म, इ, उ, ऊ, ऋ
[7] विवरणोक्तिमनूद्य दूषयति — केचित्त्वित्यादिना।
[8] पा. सू. ५. ४. ११.
[9] 'संज्ञाप्राप्तिकाले' इत्यादि 'सर्वत्रेति' इत्यन्तं नास्ति — म, इ, उ, ऊ.
[10] नाश्रित इति — आ.
[11] नाश्रित इत्यन्वयः — आ.
[12] तथा चेति — अ, आ, इ, ऊ, ऋ.
[13] पा. सू. ६. ३. ४३.
[14] पा. सू. ५.३. ५७.
[15] सूत्रस्थतरपः प्रयोजनम्। सूत्रस्यैवैतत् प्रयोजनम् — अ, आ, इ, ऊ, ऋ.
[16] तत्र चेति — अ, म, आ, ऋ.
[17] करणघञन्तः — ऋ.
[18] पा. सू. ५. १. १०९.

ट्ठञ्। नदीतरं निराह — **अनुबन्धेति**। **काल्पनिकमिति**। [1]'ऋदोरप्' इति सूत्र[2]पर्यालोचनावगतमानुमानिकमित्यर्थः। घस्यार्थान्तरयुक्तस्य कथं प्रकृतिसामानाधिकरण्यम्, अत आह — **स्वार्थिकत्वादिति**। प्रकृत्यभिहितस्यैव द्योतकत्वात् प्रकृतिसमानविषयत्वरूपसामानाधिकरण्यमस्तीत्यर्थः। **ननु तीर्णिरिति**। [3]'स्त्रियां क्तिन्' [4]'ऋत इद्धातोः' रपरत्वम्, [5]'हलि च' इति दीर्घः, [6]'ऋकारल्वादिभ्यः क्तिन् निष्ठावत्' इति तस्य नः, [7]'रषाभ्याम्' इति णः। **सामान्येनेति**। अनिर्धारितेन कर्मविशेषेणेत्यर्थः। तथा च पुंस्त्वोपपत्तिरित्यर्थः। घादेः स्त्रीलिङ्गत्वमुपपादयति— **स्वार्थिक इति**। ननु 'महिषी' इति भिन्नपदं चेदाकृतिवचनरूपशब्दस्य कस्याकृतिरिति साकाङ्क्षता स्यात्, षष्ठीसमासे तु रूपशब्दस्य वैयधिकरण्यमिति नास्ति ह्रस्वप्राप्तिः, अत आह — **इवेति**। यद्यप्यत्रापि कस्याकृतिरित्याकाङ्क्षा, तथाप्युपमेयस्य प्राधान्यात् सापेक्षस्यापि समासोपपत्तिः। यथाश्रुते रूपस्योपमानत्वेन गुणत्वान्न स्यात् समास इति विशेषः। नन्वाकृतिशब्दस्य श्यामादिवदुपमानोपमेयसाधारणधर्मवचनत्वाभावात् "उपमानानि सामान्यवचनैः' इत्यनेन न समासः, अत आह— **तत्रेति**। **ह्रस्वत्वमिति**। महिषीशब्दस्योपमेयवृत्त्या सामानाधिकरण्यमस्तीति भावः। [8]'तत्र घादिसूत्रे रूपग्रहणं प्रत्ययस्वतन्त्रशब्दसाधारणमित्येतद्भाष्यादवगम्यते। एवं कल्पग्रहणमपि। घमात्रमेव प्रत्ययपरमिति ज्ञेयम्॥

[१, २५४–२५६]

(**रत्नप्रकाशः**) आतिशायनिकप्रकरण एव 'तादौ घः' 'पितौ घः' इति वा वक्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणं ज्ञापयति — धर्मपरस्तद्धितः केवलप्रकृत्यर्थेऽपि भवति, इति। तेन [10]'अल्पाच्तरम्' [11]'अल्पीयान् प्रयोगविषयः' [12]'एकैकशो दत्वा' इत्यादिः प्रयोग उपपन्नः। **नदीतर इति**। तरतेः ऋदोरपि सति रूपम्। सर्वत्रानुबन्धानां लुप्तानामेवानुवाद्यविशेषकत्वात् तरशब्दस्यापि तरब्रूपतास्तीति घसंज्ञायां सत्यां [13]'घरूप' इत्यादिना नदीशब्दस्य ह्रस्वः स्यादिति भावः। **अनर्थकः प्रतिषेध इति**। तथा च प्रतिषेधो न वक्तव्य इति भावः। एतेन 'न प्रतिषेध इति प्रतिषेधनक्रिया नञा निषिध्यते। भाष्यकारस्तु वस्त्वर्थं व्याचष्टे — **अनर्थकः प्रतिषेध इति**।' इति निरस्तम्। नञस्तत्र 'वक्तव्यः' इति वचनक्रियानिषेधपरताया एवोचितत्वेनासमर्थसमासतादोषपरिहाराय भाष्यकृत्कृतव्याख्यानस्यैवौचित्यात्। **औपदेशिकस्येति**। उपदेशे भवस्येत्यर्थः। तथा च प्रतिपदोक्तत्वात् प्रत्ययस्यैव तरपो ग्रहणम्, न त्वबन्तस्य लाक्षणिकस्येति भावः। एवं सहचरितपरिभाषया [14]'प्रत्ययग्रहणे नाप्रत्ययस्य' इति परिभाषया वा अबन्तस्य वारणं बोध्यम्। एतेनात्रत्यौपदेशिकप्रयोगशब्दौ दृष्ट्वा तन्मूलकतया [15]'औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्' इति

---

[1] पा. सू. ३. ३. ५७.
[2] पर्यालोचनेनावगतम् — म, आ, इ, ऊ, ऋ; पर्यालोचनेनानुगतम् — उ.
[3] पा. सू. ३. ३. ९४.
[4] पा. सू. ७. १. १००.
[5] पा. सू. ८. २. ७७.
[6] का. वा. ८. २. ४४-१.
[7] पा. सू. ८. ४. १.
[8] पा. सू. २. १. ५५.
[9] अत्र — अ, आ, इ, ऊ, ऋ.
[10] पा. सू. २. २. ३४.
[11] महाभाष्यम् ऋलृक्सूत्रे।
[12] महाभाष्यम् अइउण् सूत्रे।
[13] पा. सू. ६. ३. ४३.
[14] परिभाषा १११.
[15] परिभाषा १३०.

परिभाषां पठित्वा तया अबन्तस्य तरशब्दस्य घसंज्ञां वारयन्तः प्रत्युक्ताः। तादृशपरिभाषाया असाधारणोदाहरणालाभात्। एतेन 'सहचरितासहचरितपरिभाषाया अनित्यत्वात् तयात्र निर्णयो न भवति' इत्यपि प्रत्युक्तम्। अनित्यतायां सत्यामप्यौत्सर्गिकप्रवृत्तिमादायेष्टसाधने बाधकाभावात्। अन्यथा तत्परिभाषाया आनर्थक्यं स्यात्। प्रौढ्या तस्य तरशब्दस्य घसंज्ञामभ्युपेत्यापि समाधातुं शक्यत इत्याह — **अथवेति**। **समानाधिकरणेष्विति**। [1]आतिशायनिकयोस्तरप्तमपोरतिशयविशिष्टप्रकृत्यर्थपरत्वात् सामानाधिकरण्यमस्तीति भावः। **सैव नदीति**। स एव नदीशब्दस्तत्संबन्धिलक्षक इति भावः। **स एव तर इति**। भावाबन्त एव तरशब्द इत्यर्थः। एतेन 'ननु तीर्णिरिति भवितव्यमित्याशङ्क्य, एवं तर्हि तीर्यत इति सामान्येन पदं संस्क्रियते, पश्चान्नद्या विशेष्यत इति न दोषः' इति निरस्तम्। [2]'इको गुणवृद्धी' इति सूत्रगतेन 'संबध्यत इति संबन्धम्, कर्मणि घञ्, नपुंसकस्याभिधेयत्वान्नपुंसकनिर्देशः' इति ग्रन्थेन विरोधात्। [3]'घञबन्तः पुंसि' इति लिङ्गानुशासनानुसारेण तत्र तरशब्दस्य पुँल्लिङ्गतौचित्येऽपि तरशब्दस्य पूर्वनिपातापत्तेश्च। न च तस्य राजदन्तादित्वं कल्पनीयम्, मदुक्तप्रकारेण भाष्यस्योपपन्नत्वेन तत्कल्पनायां मानाभावात्। **स्त्रीलिङ्गेष्विति**। [4]'स्त्रियाः पुंवत्' इति सूत्रात् 'समानाधिकरणे' इत्यनेन सह 'स्त्रियाम्' इत्यस्यानुवर्तनादिति भावः। घरूपकल्पानां तत्र प्रकृत्यर्थस्य स्त्रीत्वात् तद्वर्तित्वेन स्त्रीलिङ्गत्वं न तु लोकप्रसिद्धं शास्त्रप्रसिद्धं वा। **महिषीरूपमिवेति**। महिष्यात्मकं रूपमाकृतिः, तदिव किंचिद्वर्तत इत्यर्थः। तत्र रूपशब्दार्थः प्रधानमिति कृत्वा रूपशब्दः स्वार्थपर एव, न तु पूर्वपदार्थपरः। अतो घरूपकल्पानामिव रूपशब्दस्य स्त्रीलिङ्गत्वं न भवति। एतेन 'इवशब्दो भिन्नक्रमः। तेनायमर्थः — महिषीवेयमाकृतिरिति। तत्र सुप् सुपेति समासे कृते ह्रस्वत्वं स्यात्' इति निरस्तम्। 'महिषीरूपमिव' इति समासात् परस्येवशब्दस्य प्रयोगसमवायिनो भिन्नक्रमतामाश्रित्य प्रयोगासमवायिविग्रहवाक्यगतमहिषीशब्दात् परत्वस्याश्रयितुमनुचितत्वात्। विशेषणसमासस्य संभवेन सुप् सुपेति समासस्वीकारे मानाभावात्। [5]'सह सुपा' इति सूत्रस्य केवलाधिकारसूत्रताया भाष्यस्वरससिद्धत्वाच्च। अत्रेदमवधेयम् — पूर्वोत्तरसाहचर्येण [6]प्रत्ययग्रहणपरिभाषया च प्रशंसार्थकरूपप्प्रत्यय एव रूपशब्देन गृह्यत इति 'महिषीरूपम्' इत्यादौ नातिप्रसङ्ग इति व्यर्थैव 'स्त्रियाम्' इत्यस्यानुवृत्तिः। चेलडादयोऽपि वृत्तिविषये [7]कुत्सनवाचकाः सन्तस्तत्र स्त्रीलिङ्गा एवेति व्यभिचाराभावात् तदर्थापि न तदनुवृत्तिः। तथा च 'अवश्यं चैतदेवं विज्ञेयम्' इति भाष्यं त्वत्र तत्र च सहचरितप्रत्ययपरिभाषे अनाश्रित्यापि तत्र 'स्त्रियाम्' इत्यनुवर्त्य समाधातुं शक्यत इत्येतदभिप्रायकं बोध्यम्॥

[१, २५४–२५६]

(**नारायणीयम्**) '**वक्तव्य इति**। एवं हि लाघवं भवति। [8]**स्वार्थिकोऽपीति**। प्रकरणोत्कर्षा-

---

[1] आतिशायिकयोः — ब.

[2] पा. सू. १. १. ३.

[3] लिङ्गानुशासनसूत्रम् ३६. 'पुंसि' इति त्वधिकारलब्धार्थानुवादः।

[4] पा. सू. ६. ३. ३४.

[5] पा. सू. २. १. ४.

[6] 'प्रत्ययग्रहणे नाप्रत्ययस्य' इति परिभाषा विवक्षिता।

[7] कुत्सनावाचकाः — ब.

[8] प्रदीपे 'इति वा कर्तव्ये' इत्यत्र 'इति वा वक्तव्ये' इति निर्णयसागरमुद्रिते पाठः।

[9] प्रदीपे 'स्वार्थेऽपि' इत्यत्र 'स्वार्थिकोऽपि' इति पाठोऽभिमतः।

दनातिशायिकस्तरबस्तीति ज्ञाप्यते। न चान्योऽर्थ आदिश्यत इति स्वार्थिकतत्सिद्धिः। तरतीति तर इत्यजन्तत्वे [1]संज्ञाप्राप्तेराह — **तरतेरिति**। संज्ञाप्रवृत्तिकाले तरब्रूपत्वाभावात् कथं प्राप्तिः, तत्राह — **सर्वत्र चेति**। तमपा साहचर्यादातिशायिकतरब्ग्रहणमिति कुतोऽत्र प्राप्तिः, तत्राह — **साहचर्यं चेति**। भाष्यालोचनेन नञ उत्तरार्थसंसर्ग इति न भ्रमणीयमित्याह — **नेति**। **वस्त्वर्थम्** अर्थसिद्धार्थम्। प्रतिषेधे हि निषिध्यमाने तत्फलाभावोऽर्थसिद्धः, सफलस्य तु निषेद्धुमशक्यत्वात्। प्रस्तुतसंगतं तद्धितार्थं दर्शयति — **उपदेश इति**। उपदिश्यत इत्युपदेशः, स प्रयोजनं ज्ञाप्यतया तरब्ग्रहणस्य तत् तथा। [2]**उपदेशे वेति**। उपदिश्यतेऽनेनेत्युपदेशः तरबादिविधिवाक्यम्, तत्र भवं तरब्ग्रहणम्, गृह्यत इति ग्रहणम्, उपदेशवाक्यगतस्तरब् गृह्यत इत्यर्थः। अनुबन्धस्योपलक्षणत्वं निरस्यति — **अनुबन्धेति**। संज्ञाप्रवृत्तावुपलक्षणभावेऽपि[3] रूपनिर्ग्रहे [4]विशेषणभाव एव। प्रकृति-प्रत्यययोरुपदेशसद्भावादाह — **काल्पनिकमिति**। संज्ञाविधावुपात्तस्योपदेशोऽपेक्षितः, तस्य चेहानुमानिकत्वमित्यर्थः। द्वितीयान्तादतिशय्यमानादातिशायिके प्रत्ययविधौ मूलोदाहरणेऽपि सामानाधिकरण्याभावः, तत्राह —**आतिशायनिकश्चेति**। आतिशायनिकस्य प्रकृत्यर्थविशेषणत्वपक्षे सामानाधिकरण्यम्। तदा ह्येवं विगृह्य प्रवृत्तिः — अतिशयितः शुक्लः शुक्लतर इति। तरतिकर्मत्वं नद्याश्चेत् [5]'अजब्भ्यां स्त्रीखलनाः' इत्यपं बाधित्वा स्त्रीप्रत्ययः स्यादिति शङ्कते — **नन्विति**। **सामान्येनेति**। नद्यनपेक्षयेत्यर्थः। न तु सामान्यस्य कर्मत्वम्, नपुंसकापत्तेः। तस्मात् प्रवाहादिरूपो विशेषः कर्म, तस्मिंस्त्वनपेक्षितनदीरूपे प्रत्ययः, नदीकूलाद्यनुगतरूपत्वात् सामान्योक्तिश्च युज्यते। तस्मिन् मूलोदाहरणे कथम्, अत आह — **स्वार्थिकश्चेति**। प्रसिद्धस्योपमानत्वादाह— **इवशब्द इति**। रूपशब्दस्य [6]शुक्लादिवाचकत्वं व्यवच्छिनत्ति — **आकृतिरिति**। उत्तरपदे परतो ह्रस्वत्वविधानादाह — **तत्रेति**॥

बहुगणवतुडति संख्या १. १. २३.

[१, २५७–२५८]

(**लघुविवरणम्**) ननु संख्याया बह्वादिकाया अन्तरेणापि संख्याग्रहणं संख्याप्रदेशेषु संप्रत्ययो भविष्यतीत्यत आह — **संख्याया इति**॥

[१, २५७–२५८]

(**विवरणम्**) यथा वृद्धचादीनां [7]संज्ञात्वेन संप्रत्ययः 'संज्ञासंप्रत्ययार्थः' इत्यनेन विवक्षितः, नैवमिहैकादिकायाः संख्यात्वेन संप्रत्ययो विवक्षितः। किं तु स्वरूपेण संप्रत्यय इति व्याचष्टे — **एकादिकाया इति**। भाष्ये संख्याशब्देन संप्रत्ययः संख्यासंप्रत्ययः, स एकादिकाया अपि यथा स्यादिति योजना। **पशुरिति**। "हरतेर्दृतिनाथयोः पशौ' इत्यत्र। कृत्रिमाकृत्रिमयोः कृत्रिमे

---

[1] संज्ञाया अप्राप्तेरित्यर्थः।
[2] प्रदीपे 'तत्र वा भवम्' इत्यत्र 'उपदेशे वा भवम्' इति पाठोऽभिमतः।
[3] उपलक्षणाभावेऽपि — क.
[4] विशेषणाभाव एव — क.
[5] का. वा. ३. ३. १२६–१.
[6] शुद्धादि — क.
[7] संज्ञात्वेन प्रत्ययः — च, छ.
[8] पा. सू. ३. २. २५.

संप्रत्ययो लोकेऽपि कुत इत्यत आह — **तथा हीति**। ननु 'ऊपौर्णमासी' इत्युक्ते पुँल्लिङ्गेभ्यः खलप्वादिभ्योऽपि टच् समासान्तः स्यादित्यत आह — **ऊकारेति**। यः शब्दसंज्ञात्वेन शास्त्रे दृष्टस्तत्र [1]'अशब्दसंज्ञा' इति स्वरूपग्रहणनिषेधः, न तु [2]यत्र शब्दसंज्ञा विवक्षिता तत्रेति मन्वानस्य 'तद्विशेषेभ्यः' इति चोद्यम्। [3]तद्विशेषान् दर्शयति — **गङ्गेति**। **नित्यार्थ इति**। [4]'नदीपौर्णमासी' इत्यत्र 'अन्यतरस्याम्' इत्यनुवर्तत इति भावः। **अन्यथेति**। कृत्रिमा हि नदीसंज्ञा एकार्थवाचिनी कृता, सा तथैव प्रदेशे संज्ञायामभिप्रेतायां निर्देष्टुमुचितेति भावः। यदि विपाट्शब्दो ज्ञापकस्तर्हि [5]'अशब्दसंज्ञा' [6]इत्यत्र शब्दशब्दस्योपलक्षणत्वे प्रयोजनाभावाद्विशेषणत्वमेवेति मन्यमानस्य भाष्ये चोद्यम् — **स्वरूपेति**। स्वरूपस्यैकत्वात् तस्मिन् विवक्षिते निर्देष्टव्यमेकवचनं स्यादित्युत्तरेऽभिप्रायः। 'न्यायोऽयम्' इत्युक्तत्वात् 'एवं न चेदम्' इत्ययुक्तमित्यत आह — **अनाश्रितमिति**। **स्वरूपेति**। यद्यपि [7]बह्वादिपरो बह्वादिसामानाधिकरण्यात्, तथापि ततः प्राक् स्वरूपपदार्थक इति भावः। **उत्तरत्रेति**। [8]न स संख्याशब्देन कर्तुं शक्यत इति शेषः॥

[१, २५७–२५८]

(**उद्द्योतनम्**) यथा [9]'संज्ञासंप्रत्ययार्थः' इत्यत्र वृद्ध्यादीनां संज्ञात्वेन संप्रत्ययस्तथेहाप्येकादीनां संख्यात्वेन संप्रत्यय [10]इत्यर्थभ्रमं वारयति — **संख्याया इति**। स्वरूपसंप्रत्ययोऽत्र विवक्षित इत्यर्थः। भाष्ये **संख्यासंप्रत्ययः** संख्याशब्देनैकादीनां संप्रत्यय इत्यर्थः। संज्ञां विनापि लौककग्रहणे दृष्टान्तमाह — **यथेति**। [11]'हरतेर्दृतिनाथयोः पशौ' [12]'तस्यापत्यम्' [13]'सास्य देवता'। न्यायस्य [14]लोकसिद्धत्वमुपपादयति — **तथा हीति**। **सर्वेति**। वृद्धिसूत्रे प्रदीपव्याख्यानावसरे प्रतिपादितमेतत्। **संज्ञिनः** ईदूदन्तस्त्रीलिङ्गशब्दमात्रस्य। **स्वरूपस्य** नदीशब्दस्य। तत्र हेतुः — **अशब्देति**। **एवमपीति**। लाघवान्नियमापेक्षया विधेर्ज्यायस्त्वाच्चेत्यर्थः। ननु [15]'ऊपौर्णमासी' इत्युक्ते पुँल्लिङ्गेभ्योऽपि खलप्वादिभ्यष्टच् स्यात्, अत आह — **ऊकारेति**। साहचर्यं क्वचिल्लक्ष्यानुसारान्नियामकमङ्गीक्रियत एवेति भावः। शास्त्रे यः [16]शब्दः संज्ञात्वेन दृष्टस्तत्र [17]'अशब्दसंज्ञा' इति स्वरूपग्रहणनिषेधः, न तु [18]'यत्र शब्दसंज्ञा विवक्षिता तत्रेति मन्वानस्य 'तद्विशेषेभ्यः' इति भाष्ये चोद्यम्। तद्विशेषं दर्शयति — **गङ्गेति**। **नित्यार्थः** विपाट्शब्दपाठः। [19]'नदीपौर्णमासी' इत्यत्र 'अन्यतरस्याम्' इत्यनुवर्तत इति भावः। **अन्यथा** कृत्रिमग्रहणे। एकवचनान्तनदीशब्दस्यैव संज्ञात्वात् प्रदेशेषु संज्ञाभिप्राये तस्यैव निर्देश उचित इति भावः। यदि विपाट्शब्दो ज्ञापकस्तर्हि [20]'अशब्द-

---

[1] पा. सू. १. १. ६८.
[2] यत्र संज्ञा — च, छ, ट.
[3] तद्विशेषं दर्शयति — च, ट.
[4] पा. सू. ५. ४. ११०.
[5] पा. सू. १. १. ६८.
[6] इत्यत्र शब्दस्योप — च, छ, ट.
[7] 'बह्वादिपरः' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — ञ.
[8] न च संख्याशब्देन — च, छ, ञ, ट.
[9] का. वा. १. १. १–१.
[10] इत्येतद्भ्रमं — ऋ.
[11] पा. सू. ३. २. २५.
[12] पा. सू. ४. १. ९२.
[13] पा. सू. ४. २. २४.
[14] लोकप्रसिद्धिमुप — अ, आ, इ, ऊ, ऋ.
[15] ऊत्पौर्णमासी — म, उ.
[16] शब्दसंज्ञात्वेन — अ.
[17] पा. सू. १. १. ६८.
[18] यत्र संज्ञा — अ, आ, इ.
[19] पा. सू. ५. ४. ११०.
[20] पा. सू. १. १. ६८.

संज्ञा' इत्यत्र शब्दस्योपलक्षणत्वे प्रयोजनाभावाद् विशेषणत्वमेवेति मन्यमानस्य चोद्यम् — भाष्ये **स्वरूपेति**। स्वरूपस्यैकत्वात् तस्मिन् विवक्षिते एकवचनेनैव निर्देशः [1]स्यादित्युत्तरेऽभिप्रायः। न्यायस्य स्वेन कृतत्वाभावादाह — [2]**अनाश्रितमिति**। ननु सौत्र[3]संख्यैवोत्तरसूत्रेऽनुवर्तताम्, अत आह — **अयमिति**। **स्वरूपेति**। यद्यपि बह्वादिपरस्तत्सामानाधिकरण्यात्, तथापि ततः प्राक् स्वरूपपदार्थक इति भावः। **उत्तरत्रेति**। स्वरूपपरसंख्याशब्देन स कर्तुं [4]न शक्य इत्यर्थः॥

[१, २५७–२५८]

(**रत्नप्रकाशः**) **संख्याग्रहणं कर्तव्यमिति**। 'बहुगणवतुडतिसंख्याः संख्या' इति सूत्रं कर्तुमुचितमिति भावः। तथा वचने सति तस्योचितमर्थमाह — **बहुगणवतुडतय इति**। **संख्या चेति**। संख्याशब्दवाच्यैकत्वादिवाचकैकादिशब्दश्चेत्यर्थः। **संख्यासंप्रत्ययार्थमिति**। संख्यायाः संप्रत्यय इति षष्ठीतत्पुरुषः। तद्वाचष्टे — **एकादिकाया इति**। एकादिशब्दरूपायाः संख्याया इत्यर्थः। संख्यापदलक्ष्यैकादिशब्दस्येति यावत्। **संख्येत्येष इति**। संख्याशब्देन जायमानः संप्रत्यय एवंरूप एव जायत इति वस्तुस्थितिप्रदर्शनपरमेतत्, न तु संख्येति संप्रत्ययः संख्यासंप्रत्यय इति कर्मधारयप्रदर्शनपरम्। **एकादिका संख्येति**। एकत्वादिका संख्येत्यर्थः। **संख्येति प्रतीतेति**। संख्यात्वेन प्रसिद्धेत्यर्थः। **तेनेति**। प्रसिद्धत्वेन हेतुनेत्यर्थः। **अस्याः** एकादिशब्दरूपायाः। **संप्रत्ययो भविष्यतीति**। अर्थे कार्यासंभवात् तत्र शब्दे कार्यसंप्रत्ययो भविष्यतीति भावः। एतेन 'यथा पशुः, अपत्यं, देवता, इति लौकिकोऽर्थो गृह्यते तथैकादिकापि संख्या ग्रहीष्यत इत्यर्थः' इति निरस्तम्। 'ननु च' इत्यादिभाष्यस्य वाच्यार्थस्य वा भावार्थस्य वा तथात्वासंभवात्। एकादिशब्दानां संख्यापदवाच्यताया अप्रसिद्धया दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याच्च। **एवमपीति**। एकत्वादिसंख्यायाः संख्यात्वेन प्रसिद्धया कथंचिदेकादिशब्दानां ग्रहणसंभवेऽपीत्यर्थः। **अक्रियमाणे [हि] संख्याग्रहण इति**। प्रकृतसूत्रे संज्ञिसमर्पकतयेति शेषः। **कृत्रिमे कार्यसंप्रत्ययो भवतीति**। सर्वार्थाभिधानसमर्थस्य शब्दस्य विशिष्टेऽर्थे व्यवहाराय नियतत्वादिति भावः। **अत्रापि प्रसज्येतेति**। नदीशब्दस्य [5]'यू स्त्र्याख्यौ नदी' इत्यर्थविशेषे नियतत्वादीदूदन्तनित्यस्त्रीलिङ्गस्यैव तेन बोधः स्यात्, न तु लोकप्रसिद्धाया नद्या इति भावः। **पौर्णमास्याग्रहायणीग्रहणसामर्थ्यादिति**। न चेकारान्तांशे तद्ग्रहणं नियमार्थं स्यादिति तस्य [न] सामर्थ्यमिति वाच्यम्, अणन्तप्रकृतिकङन्तांशे बह्वज्ङन्तांशे वा, ईदन्तनद्यंशे वा तन्नियामकमित्यत्र विनिगमनाविरहात्। यद्युच्येत 'व्यापकत्वादेकाज्द्विर्वचनन्यायेनेदन्तनद्यंशे तन्नियामकं भविष्यति' इति। तदपि न, ततोऽपि व्यापकत्वेन नदीसंज्ञकांशे नियामकत्वमभ्युपेत्य नदीशब्दस्य शब्दशास्त्रकृतसंज्ञात्वविवटनद्वारा स्वरूपपरतायाः संपादयितुमुचितत्वात्। विधिनियमसंभवे विधेरेव ज्यायस्त्वाच्च। एतेन तत्र पौर्णमास्याग्रहायणीग्रहणस्य नियमार्थतासंभवमभ्युपेत्य तथात्वे 'ऊपौर्णमास्याग्रहायणीभ्यः' इति वक्तव्यं स्यात्। ऊकारग्रहणेन च नदीसंज्ञकमेवोकारान्तं गृह्यते, पौर्णमास्याग्रहायणीशब्दसाहचर्यात्, इत्यापादयन् निरस्तः। साहचर्यस्यानित्यताज्ञापनार्थं तथा पाठ आश्रित इति वक्तुं शक्यत्वेन पाठान्तरापादनायोगात्। न च [6]'द्विस्त्रिश्चतुः' इति सूत्रे कृत्वोऽर्थग्रहणेन तदनित्यत्वं ज्ञापितमिति वाच्यम्, एकमेकेनैव ज्ञाप-

---

[1] स्यादित्यभिप्रायः — उ.
[2] नाश्रितमिति — अ, म, उ, ऋ.
[3] संख्यैवोत्तरत्रानुवर्तताम् — अ.
[4] न शक्यत इत्यर्थः — म, उ, ऊ, ऋ.
[5] पा. सू. १. ४. ३.
[6] पा. सू. ८. ३. ४३.

नीयमित्यत्र मानाभावात्। अन्यथा [1]'ओषधेश्च विभक्तावप्रथमायाम्' [2]'अकर्तरि च कारके संज्ञायाम्' इति कारकविभक्तिग्रहणयोरुभयोर्नञिवयुक्तन्यायानित्यताज्ञापकता न स्यात्। नदीशब्दस्य शब्दशास्त्रकृतसंज्ञात्वमस्त्येव, अर्थभेदेऽपि शब्दभेदाभावादिति मन्यमान आह — **तद्विशेषेभ्य इति**। तद्विशेषवाचकेभ्य इत्यर्थः। अव्ययीभावस्थेभ्य इति शेषः। एतेन '**तद्विशेषेभ्य इति**। गङ्गादिभ्यः' इति निरस्तम्। भाष्यकृतैव 'गङ्गा, यमुना' इति तद्विशेषवाचकानां निर्दर्शितत्वेन पुनस्तन्निर्दर्शनानौचित्यात्। **प्राप्नोतीति**। 'टच्' इति शेषः। तद्विशेषवाचकाः क इत्यपेक्षायामाह — **गङ्गायमुनेतीति**। इतिशब्दः प्रकारे। तेन नर्मदातुङ्गभद्राकृष्णा[3]वेणीप्रभृतयोऽपि निर्दर्शिता भवन्ति। ननु भवतु गङ्गाद्यन्तादव्ययीभावाट्टच्, टजभावेऽपि तस्याव्ययीभावस्य [4]'समासस्य' इत्यन्तोदात्तत्वेन रूपस्वरयोरविशेषादिति चेन्न[5], वेणीकावेरीगोदावरीप्रभृत्यन्ताव्ययीभावाट्टचि रूपभेदस्य, 'परिगङ्गम्, उपगङ्गम्' इत्यादौ गङ्गाशब्दादिरूपे वर्ज्यमानवाचिन्युत्तरपदे टजभावे [6]'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' इत्यनेन पूर्वपदप्रकृतिस्वरस्य प्राप्तत्वेन, टचि सति तस्य चित्त्वसामर्थ्यलभ्यान्तोदात्तत्वस्य प्राप्तत्वेन स्वरभेदस्य च सत्त्वात्। 'अर्थभेदेन शब्दभेदः' इति मतान्तरात्, पूर्वमतेऽप्यर्थविशेषविशिष्टस्य भेदाच्च स्वरूपपरत्वे सिद्धेऽपि ज्ञापकेनापि तत् साधयितुं शक्यत इत्याह — **यदयमित्यादि**। विपाट्शब्दो नदीविशेषवाचक इति तस्यापि नदीग्रहणेन ग्रहणे सति टचः सिद्धत्वात् तस्य शरदादिपाठो व्यर्थः सन् नदीशब्दस्य तद्विशेषपरत्वाभावं ज्ञापयतीति भावः। वस्तुतस्तु पौर्णमास्याग्रहायणीग्रहणसामर्थ्येन [7]'यू स्त्र्याख्यौ' इति विहितसंज्ञा सा नेति ज्ञापिते [8]'स्वं रूपं शब्दस्य' इति विहितसंज्ञैव सेति कृत्रिमाकृत्रिमन्यायाविरोधेन ग्रहीतुमुचितमिति तद्विशेषपरतैव तत्र न संभवतीति तदाशयः। एवमेव हि शरदादिषु विपाट्शब्दपाठ उपपन्नो भवति। तद्विशेषपरत्वसंभवे हि तत्र विपाट्शब्दपाठो नित्यार्थः स्यादित्युक्तज्ञापकं तावन्न युज्येत। एतदभिप्रायेणैव वक्ष्यति स्वरूपविधिस्तर्हि प्राप्नोतीत्याशङ्क्य 'बहुवचननिर्देशादेव न भविष्यति' इति। अन्यथा स्वरूपग्रहणस्याप्रसक्तत्वेन बहुवचननिर्देशेन तद्वारणमयुक्तं स्यात्। एतेन 'व्यवस्थितविभाषया विपाट्शब्दस्य नित्यष्टज् भविष्यतीति नित्यार्थस्तत्र पाठो न भवतीति ज्ञापनार्थ एव तत्र विपाट्शब्दस्य पाठः' इति निरस्तम्। व्यवस्थितविभाषाया लक्ष्यदर्शिभिरेव ज्ञातुं शक्यत्वेनास्मदादिभिर्वचनेनैव तस्या ज्ञेयत्वेन तामवलम्ब्य ज्ञापनोपपादनायोगात्। **बहुवचननिर्देशादिति**। अन्यथा लाघवात् 'नद्या च' इत्येवोक्तं स्यादिति भावः। तदेवं कृत्रिमाकृत्रिमपरिभाषायां प्रसक्तान् दोषान् निराकृत्याश्रयणीयैव सेत्युपसंहरति — **एवमिति**। एवं च सतीत्यर्थः। **न चेदमकृतमिति**। कृधातुरत्राश्रयार्थकः, धातूनामनेकार्थताया व्यवस्थापितत्वात्। नञ्द्वयेनावधारणं गम्यते। तथा चाश्रितमेवेदं लोकसिद्धन्यायमूलकं वचनमित्यर्थः। **न च कश्चिद् दोषो भवतीति**। अर्थप्रकरणादिसापेक्षस्यैव तस्य निर्णायकत्वाश्रयणादिति भावः। स्फुटीकरिष्यति चेदं भगवान् स्वयमेव। 'संख्यासंज्ञायां संख्याग्रहणं संख्यासंप्रत्ययार्थम्' इत्येतावन्तं वार्तिकांशं व्याख्यायावशिष्टं तदंशं व्याचष्टे — **उत्तरार्थं चेति**। संज्ञास्वरूपपरतया निर्दिष्टस्य संख्याशब्दस्योत्तरत्रानुवृत्तावपि संज्ञिसमर्पकत्वं न युज्यते। अतस्तत्र संज्ञिविशेषसमर्पकतालाभायापि भविष्यत्यत्र संज्ञिसमर्पकतया कृतं संख्या--

---

[1] पा. सू. ६. ३. १३२.
[2] पा. सू. ३. ३. १९.
[3] 'वेणी' इति कस्याश्चिन्नद्या नाम। इदम् 'आप्टे' कोशे स्पष्टम्।
[4] पा. सू. ६. १. २२३.
[5] 'इति चेन्न' इत्यस्यानन्तरं 'परिगङ्गम्' इत्यादि 'टजभावे' इत्यन्तं, तदनन्तरं 'वेणी' इत्यादि 'रूपभेदस्य' इत्यन्तं चोपलभ्यते — ब.
[6] पा. सू. ६. २. ३३.
[7] पा. सू. १. ४. ३.
[8] पा. सू. १. १. ६८.

ग्रहणमिति मन्यते। एतेन 'अयं हि सूत्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः। उत्तरत्र संज्ञिनिर्देशेन प्रयोजनम्' इति निरस्तम्। तस्य 'इदं वै संज्ञार्थम्, उत्तरत्र संज्ञिविशेषणेनार्थः' इत्युत्तरार्थतानिराकरणभाष्यफक्किकार्थमात्रानुवादकत्वेन प्रकृतवार्तिकांशव्याख्यानतानौचित्यात्। 'स्वायत्ते शब्दप्रयोगे नावाचकं प्रयोक्तव्यम्' इति न्यायात्॥

[१, २५७–२५८]

(**नारायणीयम्**) 'एकादिकायाः संख्यायाः संख्याप्रदेशेषु [1]'संख्येत्येष संप्रत्ययो यथा स्यात्' इति भाष्यम्। तत्र किं पदव्याख्यानं किं वार्थलभ्यवर्णनमित्यपेक्षायामाह — **संख्याया इति**। 'संख्याप्रदेशेषु' इति च संप्रत्ययविशेषणं चार्थलभ्यवर्णनम्। संख्याया लोकप्रसिद्धायाः संप्रत्ययार्थमित्येतावानक्षरार्थ इत्यर्थः। नन्वेकादेर्लोके संख्याव्यवहारेऽपि शास्त्रे कथं तद्ग्रहणमित्यत्राह — **यथेति**। **न्याय इति**। 'यथा लोके' इत्युक्तत्वाद् यद्यपि वचनत्वशङ्कानवकाशः, तथापि लोके वा कृत्रिमप्रतिपत्तौ को हेतुरित्यपेक्षायां हेतुं वक्तुं सहेतुकत्वं प्रतिजानीते। सहेतुका कृत्रिमप्रतिपत्तिरित्यर्थः। को हेतुः, तमाह — [2]**तथा होति**। अत्रापि कृत्रिमग्रहणं प्रसज्येतेत्युक्तम्, तत्किं कृत्रिममित्यपेक्षायामाह — **यू इति**। ननु [3]'स्वं रूपम्' इति वचनात् स्वरूपमपि कृत्रिममिति कथं तद्ग्रहणस्यानिष्टत्वमित्यत्राह — **न त्विति**। कृत्रिमग्रहणेऽप्येतयोर्ग्रहणमुपपन्नमिति शङ्कते — **नियमार्थमिति**। **एवमपीति**। एवं ह्यक्षरलाघवं प्रतिपत्तिलाघवं च। ननूग्रहणेऽतिप्रसङ्ग इति तत्परिहाराय नदीग्रहणमित्यत्राह — **ऊकारेति**। कृत्रिमनद्यर्थस्य प्रस्तुतत्वात् [न] न्याय्यो नद्यर्थमात्रस्य परामर्शः सर्वनाम्नेत्याह — **गङ्गादिभ्य इति**। अव्ययीभावगतेभ्य इति शेषः। भाष्ये च 'गङ्गा, यमुना' इति विषयप्रदर्शनम्, न तूदाहरणम्। प्रासङ्गिकं च चोद्यमिति भावः। कृत्रिमग्रहणेऽपि नदीव्यक्तीनां बहुत्वाद् बहुवचनोपपत्तिरित्यत आह — **अन्यथेति**। स्त्याख्यत्वेन वैकशब्दस्वरूपलक्षणनिमित्तरूषिततया [4]'वैकीकृत्य संज्ञिनामेकवचनान्तत्वेन व्यपदेशोपपत्तौ बहुवचननिर्देशस्तदग्रहणज्ञापक इत्यर्थः। न्यायस्य करणाभावादाह — [5]**अनाश्रितमिति**। यथास्थितानुवृत्त्या सिद्धेरतिरिक्तकरणस्य कथमेतत् फलमित्यत्राह — **अयमिति**॥

[१, २५९–२६२]

(**लघुविवरणम्**) भाष्ये 'साधीयः' इति क्रियाविशेषणम्, सम्यगित्यर्थः। **संख्याशब्दो हीति**। एकार्थप्रतिपादन[6]'शक्तियुक्तः शब्दश्च संकेत्यत इति दर्शने नियमरूपत्वाभावात् [7]'संज्ञाकरणस्येति भावः। **न च क्रियाया इति**। [8]'असद्भूतत्वादिति भावः। दृष्टान्ते कर्मप्रदेशादौ विषयभेदेनोभयगतिः, सामर्थ्यं [9]'वास्ति कारणम्। संख्याप्रदेशे तूभयगतेर्न विषयभेदो नापि सामर्थ्यमित्यपरि-

---

[1] संख्यासंप्रत्ययः — क.
[2] तथापीति — क.
[3] पा. सू. १. १. ६८.
[4] चैकीकृत्य — क.
[5] आश्रितमिति — क.
[6] शक्तियुक्तशब्दः, शक्तिश्च संकेत इति दर्शने — ण.
[7] संज्ञाप्रकरणस्येति — ड, ट.
[8] असत्त्वादिति — ण.
[9] चास्ति — ढ.

तोषाद् भाष्ये 'अथवा नेदम्' इति पक्षान्तरपरिग्रहः [1]प्रथमपक्षे तिष्ठति। **नैष दोष इति**। [2]'नागृहीतविशेषणा विशेष्ये बुद्धिः' इति न्यायात् तिग्रहणपूर्वकत्वात् संख्याप्रतीतेस्तिप्रतीतिसमयेऽन्यप्रतीत्यनपेक्षणात् तिस्त्ररूपाश्रया परिभाषा प्रथमसंनिहितत्वात् प्रबलेति भावः। **इहान्वर्थसंज्ञेति**। 'संख्या' इति योगविभागः क्रियते। संज्ञाप्रस्तावाच्च संख्यासंज्ञा विधीयमानान्वर्थत्वात् स्वानुरूपं संज्ञिनमाक्षिपति। तथा च पूर्वमेकादीनां संख्यासंज्ञां विधाय 'संख्या' इत्यस्मिन् योगे 'बहुगणवतुडति' इत्यनुवर्त्य वाक्यभेदेन पुनः संख्यासंज्ञा तेषां विधीयमाना नियमार्थेति भावः॥

[१, २५९–२६२]

(**विवरणम्**) अर्थशब्दोक्तसामान्यं प्रतीहार्थो यस्येत्यस्य [3]विशेषत्वादित्यर्थः। लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यये न कृत्रिमत्वं कारणम्, किं त्वन्यदेवेति भाष्ये 'अर्थात्' इत्यनेनोक्तम्। अर्थप्रकरणयोरन्वयेन हेतुत्वमभिधाय व्यतिरेकेणापि तद्वक्तुम् 'आतश्च' इत्युक्तम्। तस्यार्थमाह — **इतश्चेति**। उभयस्मिन् गतिरुभयगतिरित्यभिप्रेत्याह — **किमिति**। **संदेहेति**। [4]सोमादिशब्दान्तरेऽन्यत्र [5]यौगिकेऽन्यत्र रूढेरपि दर्शनादिति भावः। भाष्ये **साधीय इति**। क्रियाविशेषणम्, सम्यगित्यर्थः। ननु संज्ञाकरणस्य नियमार्थत्वाद्यौगिकार्थप्रतीतिः [6]श्रोतुर्भ्रम इत्यत आह — **लोके चेति**। **प्रकृताः** बुद्धौ संनिहिता इत्यर्थः। ननु [7]दृष्टान्ते सामर्थ्यात् कृत्रिमस्य ग्रहणं विषयभेदेन च [8]कथितम्, इह तदभावे कृत्रिममेव न गृह्येतेत्यत आह — **संख्याशब्दो हीति**। कृत्रिमः शब्दार्थसंबन्ध इति दर्शने [9]विधेयसंभवान्न नियमार्थतेति भावः। [**कर्मणीति**।] कर्मणि या संख्या तस्यामित्यर्थः। अद्रव्यभूतत्वात् क्रियाया द्रव्यधर्माभ्यां लिङ्गसंख्याभ्यामयोग इत्यत आह — **न चेति**। **कारकस्येति**। शक्तिमतो द्रव्यस्येत्यर्थः। **धातोः साक्षादिति**। [10]आत्मनेपदेनाक्षिप्तस्य धातोर्निरपेक्षस्य क्रियायां वृत्तिर्न द्रव्य इति भावः। **धातुसंज्ञेति**। [11]'सनाद्यन्ता धातवः' इत्यनेन। यतः **साधने** कारके तव्यदादयोऽतः कारकापेक्षितक्रियावाचिन उत्पद्यन्त इति योजना। प्रकृतिप्रत्ययसमुदायात्मका द्वन्द्वावयवाः। न च सकलानां द्वन्द्वावयवानां शक्तिमात्राभिधायित्वं संभवतीत्यतोऽधिकरणं द्रव्यं गृह्यत इत्याह — **द्वन्द्वेति**। ननु संज्ञाकरणं विध्यर्थं सदधिकव्याप्त्यर्थमिति स्वसिद्धान्तविरुद्धमित्यतो भाष्ये तद्वदतिदेशपक्ष उक्तः। सम्यक् ख्यायतेऽनयेति संख्या[12]। नियतविषयत्वं च परिच्छेदस्य सम्यक्त्वम्। अतश्चानियतविषयपरिच्छेदहेतुबहुत्वादेरसंख्यात्वाद् भाष्यकारः 'असंख्यां संख्येत्याह' इत्यवोचत्। ननु [13]'अतिशदन्तायाः' इति निषेधाल्लिङ्गात् कन्विधौ कृत्रिमा न गृह्येतेत्यत आह — **गुर्विति**। एकत्वादिवाचिसंज्ञाकरणादित्यर्थः। प्राप्तिपूर्वकत्वात्

---

[1] कृत्रिमाकृत्रिमन्याये तिष्ठति सतीत्यर्थः स्यादिति भाति।

[2] लौ. न्या. तृतीयभागे पुटम् ७७.

[3] विशेषितत्वादित्यर्थः — अ.

[4] समासादि — अ.

[5] 'यौगिकेऽन्यत्र' इति नास्ति — ट.

[6] श्रोतुः कथमित्यत आह — अ.

[7] दृष्टान्तेषु — च, छ, ट.

[8] कथमिह — अ.

[9] विधेयसंबन्धाभावान्न — अ.

[10] आत्मनेपदाक्षिप्तस्य — अ.

[11] पा. सू. ३. १. ३२.

[12] 'संख्या' इत्यस्यानन्तरं 'नियतविषयत्वात्' इत्यस्ति, अनन्तरं 'नन्वतिशदन्ताया इति निषेधात्' इत्येवास्ति — अ.

[13] पा. सू. ५. १. २२.

प्रतिषेधस्य प्राप्तिमाह — **डत्यन्तेति**। [1]'अतिशदन्तायाः' इति पर्युदासत्वात् संख्याया विशेषणम्। विशेषणबुद्धिपूर्विका [2]च [3]विशिष्टे बुद्धिः। आकाङ्क्षानिबन्धनश्चान्वयः। आकाङ्क्षा चातिशदन्ताया इत्यत्र बहुव्रीहिगर्भतत्पुरुषत्वात्। अतश्च विशेषणत्वादन्वयहेत्वाकाङ्क्षायुक्तत्वाच्च पूर्वम् [4]'अतिशदन्तायाः' इत्यस्यार्थोऽवगन्तव्यः। तत्र च विशेषणत्वात् पूर्वं तिशतौ निरूपणीयौ। तथा चार्थवदनर्थकयोः संभवादर्थवत्परिभाषयार्थवत एव तिशब्दस्य ग्रहणमिति परिहरति — **नेति**। [5]एकस्मिन् योगेऽन्वर्थत्वेऽपि [6]संज्ञाया नैकादीनां संज्ञित्वं लभ्यत इति चोदयति — [7]**नन्विति**। योगविभागमभिप्रेत्य परिहरति — **नेति**। [8]**पश्चाद्बहुगणवतुडतीति**। संख्येति द्वितीययोगेऽनुवर्तमानं वाक्यभेदेन संबध्यत इति भावः। भूर्यादीत्यादिशब्दः प्रकारे, अनियतसंख्यावाचित्वं च प्रकारः। **अत एव** नियमार्थत्वादेवेत्यर्थः। **संख्यावाचिनोरेव** ग्रहणे सतीति शेषः॥

[१, २५९–२६२]

(**उद्द्योतनम्**) अर्थ इति सामान्योक्तिः, इहार्थो यस्येति विशेष इत्यर्थः। भाष्ये लोके कृत्रिमग्रहणेऽर्थप्रकरणे हेतुः, न तु कृत्रिमत्वमित्यन्वयेनोक्त्वा व्यतिरेकेण वक्तुम् 'आतश्च' इत्युक्तम्। तस्यार्थमाह — **इतश्चेति**। [9]विशेषणानामपौनरुक्त्यमाह — **ऊहितुमिति**। **अचिरेति**। चिरोषितत्वे प्रकरणज्ञानं भवेत्। उभयत्र **गतिः** ज्ञानमित्यभिप्रेत्याह — **किमिति**। **संदेहेति**। एकस्मिन्नपि सोमादिशब्दे रूढि[10]योगयोर्दर्शनादिति भावः। भाष्ये **साधीय इति**। क्रियाविशेषणम्, सम्यगित्यर्थः। विपरीतनिश्चये हेतुमाह — **यो ममेति**। ननु संज्ञाकरणस्य नियमार्थत्वाद्यौगिकार्थप्रतीतिः श्रोतुर्भ्रम एव, अत आह — **लोके चेति**। **तुल्यजातीयेति**। पञ्चनख[11]भक्ष्यनियमे मांसान्तरमेव निवर्त्यते न त्वोदनभक्षणम्, [12]तयेहापीत्यर्थः। **प्रकृताः** बुद्धिस्थाः। ननु दृष्टान्ते सामर्थ्यादिना [13]कृत्रिमग्रहणं विषयभेदेन च, तदभावेऽकृत्रिममेवेह कथं न गृह्येत, अत आह — **संख्याशब्दो हीति**। यद्यपि शक्त्यवच्छेदेन संज्ञिनि विनियोग उक्तः संज्ञाशब्देषु, तथापि शब्दार्थसंबन्धस्य कृत्रिमत्वदर्शने विधेयसंभवान्न नियमार्थतेति भावः। भाष्योदाहरणेषु व्यवस्थितार्थग्रहणे [14]हेतूनाह — **ङ्याप्प्रातिपदिकादित्यादिना**। कर्मणि या संख्या तस्याम्। आख्याताभिहितक्रियाया असत्त्वभूतत्वात् संख्या [15]न संभवतीत्याह — **न चेति**। **कारकस्य** शक्तिमतो द्रव्यस्य। **धातोः** आत्मनेपदाक्षिप्तस्य धातोः पदान्तरनिरपेक्षस्य क्रियायां [16]वृत्तिरित्यर्थः। कारकग्रहणे प्रागुक्त

---

[1] पा. सू. ५. १. २२.
[2] चकारो नास्ति — अ.
[3] विशिष्टबुद्धिः — ट.
[4] पा. सू. ५. १. २२.
[5] 'एकस्मिन् योगे' इत्यादि 'परिहरति' इत्यन्तं नास्ति — च.
[6] संज्ञया नैकत्वादीनां — अ.
[7] 'नन्विति' इत्यादि 'नेति' इत्यन्तं नास्ति — छ.
[8] पश्चादिति। बहुगण — च, छ, ज, ट.
[9] विशेषणानामपुनरुक्तिमाह — म, आ, इ, उ, ऊ, ऋ.
[10] योगदर्शनादिति — अ.
[11] भक्ष्यादिनियमे — अ आ, ऋ; भक्षणनियमे— इ, ऊ.
[12] तद्वदिहापीत्यर्थः — अ.
[13] अकृत्रिमग्रहणम् — आ, ऋ.
[14] हेतुमाह — अ.
[15] न भवतीत्याह — ऊ.
[16] वृत्तेरित्यर्थः — अ, आ, इ, ऋ.

एव [1]हेतुरितीतरत्र हेतुमाह — **तव्यादीति**। **धातुसंज्ञा** [2]'सनाद्यन्ता धातवः' इत्यनेन। यतः **साधने** कारके तव्यादयो विधीयन्तेऽतः कारकापेक्षितक्रियावाचिन उत्पद्यन्त इत्यन्वयः। **द्वन्द्वेति**। प्रथमान्तानां द्वन्द्वः, तत्र न कारकप्रसक्तिः। सप्तम्यन्तानां द्वन्द्वेऽपि प्रकृतिप्रत्ययसमुदायस्य [3]शक्तिमात्राभिधायित्वं न संभवतीत्यधिकरणं द्रव्यं गृह्यत इत्यर्थः। ननु संज्ञाकरणं विध्यर्थं सदधिकव्याप्त्यर्थमित्येतत् [4]"सिद्धे शब्दार्थसंबन्धे' इति सिद्धान्तविरुद्धम्, अतो भाष्ये **अथवेति**। प्राधान्यात् कार्यातिदेश इत्याह — **संख्येति**। अतिदेशत्वे हेतुः — [5]**यदीति**। यद्यपि [6]'बहुषु बहुवचनम्' इति बहुशब्दः संख्यावाची, तथापि सम्यक् ख्यायते परिच्छिद्यतेऽनयेति संख्या। परिच्छेदस्य नियतविषयत्वं च सम्यक्त्वम्। तथा चानियतविषयपरिच्छेदहेतुबहुत्वादेरसंख्यात्वमभिप्रेत्य भाष्ये 'असंख्याम्' इत्युक्तम्। ननु [7]कन्विधावेवेदं ज्ञापकं स्यात्, अत आह — **गुर्विति**। एकत्वादिवाचिशब्दसंज्ञाकरणादित्यर्थः। ज्ञापकत्वमाक्षिपति — **नन्विति**। प्राप्तिपूर्वकत्वात् प्रतिषेधस्य प्राप्तिमाह — **डत्यन्तेति**। कन्विधौ कृत्रिमसंख्याया एव "संख्यायाः' इत्यनेन ग्रहणात् षष्ठ्यादेरग्रहणान्नोभयसंभव इत्यर्थः। **नैष दोष इति**। [9]'अतिशदन्तायाः' इति पर्युदासः संख्याविशेषणम्, विशेषणबुद्धिपूर्वकत्वाद्विशिष्टबुद्धेः संख्यान्वयात् पूर्वमेव [10]'अतिशदन्तायाः' इत्यस्यार्थो ज्ञेयः। तत्रापि विशेषणत्वात् तिशतौ निरूपणीयौ। तदानीं कृत्रिमग्रहणप्रसङ्गाभावादुभयसंभवेन परिभाषा प्रवर्तत एवेत्यर्थः। अन्वर्थत्वेऽप्येकादीनां संज्ञित्वं न लभ्यत इति शङ्कते — **नन्विति**। **तदर्थानुगतानां** संख्याशब्दावयवार्थयुक्तानाम्। **सर्वादीनामेव** न तु कृत्स्नादीनाम्। [11]अन्वर्थत्वस्य प्रयोजनमाह — **तेनेति**। योगविभागमभिप्रेत्य परिहरति — **नैष इति**। [12]अर्थक्रमेण 'संख्या' इति पूर्वो योगः। तत्रावयवार्थयोग्या एकादयः संज्ञिन आक्षिप्यन्त इति तेषां संख्येति संज्ञा विधीयते। द्वितीयो योगः पूर्वेणैव संज्ञासिद्धेर्नियमार्थ इत्याह — **पश्चादिति**। 'भूर्यादि' इत्यादिशब्दः प्रकारे। अनियतसंख्यावाचित्वं चात्र प्रकारः। अनियतसंख्यावाचिनां चेत् संख्यासंज्ञा बह्वादिचतुष्टयस्यैवेत्यर्थः। **अत एव** पूर्वसूत्रप्राप्तनियमादेव। नन्वतिदेशपक्षे संघवैपुल्यवाचिनोरपि[13] संख्याप्रदेशेषु ग्रहणं स्यात्, अत आह — **तद्वदिति**। अतिदेशपक्षेऽपि[14] संख्याशब्दस्य लौकिकार्थत्वादेकादिवत् तयोरपि संख्यावाचिनोरतिदेशं विनापि ग्रहणं सिध्यति, तथापि भूर्यादिनिवृत्तये नियतानियतसंख्यावाचित्वेन भेदं कल्पयित्वातिदेशः क्रियमाणो [15]नियमार्थः संपद्यत इति समुदायार्थः। **परस्परेति**। शब्दस्वरूपे साहचर्याभावादर्थद्वारकं तद् ग्राह्यम्। तच्च संख्यायामेव, नार्थान्तर इत्यर्थः॥

[१, २५९–२६२]

(**रत्नप्रकाशः**) इदानीं तद्वार्तिकं निराकरोति — **इहार्थेन तावदिति**। **इह अर्थः** प्रयोजनं

---

[1] हेतुरिति तत्र — उ.
[2] पा. सू. ३. १. ३२.
[3] न शक्तिमात्राभिधायित्वं संभवतीति—ऊ, ऋ.
[4] का. वा. १.
[5] यदिति — म, इ, उ, ऊ.
[6] पा. सू. १. ४. २१.
[7] 'कन्विधौ' इत्यादि 'डत्यन्तेति' इत्यन्तं नास्ति – ऋ; कन्विधान एवेदम् — म, उ.
[8] पा. सू. ५. १. २२.
[9] पा. सू. ५. १. २२.
[10] पा. सू. ५. १. २२.
[11] अन्वर्थस्य — अ, आ, उ, ऋ.
[12] आर्थक्रमेण — म, उ.
[13] अपिशब्दो नास्ति — ऋ.
[14] अपिशब्दो नास्ति — अ.
[15] नियतार्थः — अ, म, उ; अनियतार्थः – ऋ.

वार्तिककाराभिमतं यस्य तेन संख्याग्रहणेन सोऽर्थो [1]न साध्य इत्यर्थः। अर्थप्रकरणादिवशेनैव कृत्रिमाकृत्रिमन्यायस्य प्रवर्तनीयत्वेनात्र कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणमित्याश्रीयमाणे न काप्यनुपपत्तिरिति भावः। एतेन 'इहार्थो यस्येति सामान्यविशेषभावान्न पौनरुक्त्यम्' इति निरस्तम्। उभयत्रार्थशब्दस्य सामान्यरूपेणैव तेन निदर्शनीयत्वेन पौनरुक्त्यापरिहारात्। **अर्थात्प्रकरणाद्वेति**। सामर्थ्यात् प्रस्तावाद्वेत्यर्थः। तत्राद्याद्यथा-गोपालकमानय, अध्यापयिष्यामीति लोके कृत्रिमस्य ग्रहणं भवति, यष्टिहस्तस्याध्येतृत्वासंभवात्। द्वितीयाद्यथा--भोजनप्रकरणे 'सैन्धवमानय' इत्युक्ते लवणस्य ग्रहणम्, गमनप्रकरणे त्वश्वस्य। तदभिप्रायेणैव सामान्यमुखेन तद्व्याचष्टे — **अर्थो वेति**। [2]**तत्र लोके, अस्य** संप्रत्ययस्य एवंसंज्ञकेनेदं कर्तव्यमित्याद्याकारस्य, **अर्थः** सामर्थ्यं वा **प्रकरणं** प्रस्तावो वा हेतुर्भवतीत्यर्थः। **आतश्चेति**। अतश्च वक्ष्यमाणाद्धेतोरित्यर्थः। **ग्राम्यमिति**। ऊहापोहासमर्थमित्यर्थः। नागरिकस्य प्रवीणस्योहापोहसमर्थत्वेन स्वबुद्धिबलेनानुभवमुल्लङ्घयापि वक्तुं सामर्थ्यमस्तीति ग्रामीणानुभवानुरोधेनैव लोकव्यवहारो दृष्टान्तत्वेन शास्त्रे ग्राह्य इति भावः। ग्रामीणोऽपि प्रकरणवशेनार्थविशेषमप्यवसातुं शक्नोतीति तदनुभवानुरोधेनापि शब्दसामर्थ्यनिर्णयो न भवतीत्याशयेनाह — **पांसुलपादमिति**। पांसवोऽनयोः सन्ति पांसुलौ, [3]'सिध्मादिभ्यश्च' इति लच्, तौ पादौ यस्य स इत्यर्थः। तथा च पादप्रक्षालनेऽप्यवकाशो न जात इति तस्याप्रकरणज्ञता सूचिता। तत्सूचितमेवार्थं स्पष्टप्रतिपत्त्यर्थमाह — **अप्रकरणज्ञमिति**। **उभयगतिरिति**। गोपालसंज्ञको वा कश्चिदानेयः, उत यो गाः पालयति स इति संदेह इत्यर्थः। एतेन 'किं संज्ञेयं यस्य कस्यचिन्निर्दिष्टा स्यादुत यष्टिहस्तोऽस्य विवक्षित इति संदेहवान् भवतीत्यर्थः' इति निरस्तम्। तस्य भाष्यस्य तदर्थकत्वाभावात्, शब्दयोर्वार्थयोर्वा तत्र संशयविषयतौचित्येनैकस्यां कोटौ शब्दस्यान्यस्यामर्थस्य निवेशयितुमनौचित्याच्च। सोऽपि संदेहः कस्यचिदेव भवति, अन्यः सर्वोऽपि सम्यग् यष्टिहस्तमेव गोपालकत्वेन ज्ञास्यतीत्याशयेनाह — **साधीय इति**। सम्यगित्यर्थः। क्रियाविशेषणमेतत्। **गमिष्यति** ज्ञास्यति, सर्वे हि गत्यर्था ज्ञानार्थाः। एवं च कृत्रिमाकृत्रिमपरिभाषा अप्रयोजिकैव भवतीत्युपपादितं भवति। ननु मास्तु कृत्रिमाकृत्रिमपरिभाषा, प्रकरणादेवात्र शास्त्रे संख्याशब्देन कृत्रिमे कार्यसंप्रत्ययो भविष्यतीति मत्वाह — **यथैव तर्हीति**। तथापि यथैवेत्यादिरर्थः। **बह्वादीनामियं संज्ञा कृतेति**। कृत्रिमसंज्ञासंज्ञिसंबन्धज्ञानमेव सामर्थ्यज्ञानमिति सामर्थ्यात् कृत्रिमस्यैव ग्रहणं [4]स्यादिति मन्यते। [5]'यक्षानुरूपबलिन्यायेन भवतु तदेव सामर्थ्यमित्यभ्युपगम्याह— **न यथा लोक इति**। तादृगाकारमुल्लङ्घयापि [6]व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेनार्थविशेषपरत्वाश्रयणादिति भावः। एतेन 'संख्याशब्दो हि बह्वादिप्रतिपादनाय संज्ञात्वेन विनियुक्तः, न त्वेकादिसंख्यानिरासाय। अधिकार्थप्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य' इति निरस्तम्। अनेकशक्तेः शब्दस्य। **उभयगतिरिहेति**। संख्याप्रदेशे संख्याशब्देनैकादीनां बह्वादीनां चोभयेषां **गतिः** ज्ञानं भविष्यतीत्यर्थः। वर्तमानसामीप्ये भविष्यति लट्। आग्रहेणैवमुक्तमिति मतिर्माभूदित्याशयेनाह — **अन्यत्रापीति**। **उभयगतिरिति**। क्वचित् किंचिदाश्रीयत इति भावः। एवमुत्तरत्रोभयशब्दार्थो ज्ञेयः। यत्तूक्तम् 'ङ्याप्प्रातिपदिकादनभिहिते कर्मणि संख्यायां द्वितीया विधीयते। न च क्रियायाः संख्या संभवतीति सामर्थ्यात् कारकग्रहणम्' इति। तन्न, क्रियाया अपि संख्या-

---

[1] नासाध्य इत्यर्थः — ब.

[2] अर्थो वेत्यादिवाक्यद्वयस्यार्थ उच्यते — तत्रेत्यादिना।

[3] पा. सू. ५. २. ९७.

[4] 'स्यादिति वा मन्यते' इत्युचितं भाति।

[5] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[6] परिभाषा १.

संभवेन ब्राह्मणादिभ्यः कर्मणि ष्यञ इव द्वितीयाया अपि प्रवृत्तिसंभवात्। यदप्युक्तम् [१]'कर्तरि कर्मव्यतिहारे' इत्यत्र धातोः साक्षात् क्रियायां वृत्त्या क्रियाया एव ग्रहणम्' इति। तदपि न, नियम्यमानात्मनेपदस्य कृत्रिमकर्मनिष्ठत्वेन तस्यैव ग्रहणमिति वैपरीत्यस्यापि संभवात्, तत्सूत्र-भाष्यविरोधाच्च। इदानीं कृत्रिमाकृत्रिमन्यायमाश्रित्यापि समाधातुं शक्यत इत्याशयेनाह — **अथवेति**। **तद्वदतिदेशोऽयमिति**। तच्छब्देन संख्याशब्दलक्ष्यैकादयः शब्दाः परामृश्यन्ते। तेनै-कादयो यथा व्यपदिश्यन्ते तथा बह्वादयोऽपि व्यपदेश्या इति व्यपदेशातिदेशोऽयमित्यर्थः सिद्धः। [२]'सामान्यातिदेशे विशेषानतिदेशः' इत्येकादिसर्वसाधारणस्य 'संख्या' इत्यस्यैव व्यपदेशस्यातिदेशः, न तु द्व्येकादिविशेषगतसर्वनामत्वादेः। तेन गणादिभ्यो ङेप्रभृतेः स्मायादयो न। एतेन 'संख्या-कार्यातिदेशोऽयमित्यर्थः' इति निरस्तम्। 'व्यपदिश्यते' इति शब्दाध्याहारेण व्यपदेशातिदेशस्यै-वौचित्येन क्लिष्टकल्पनया कार्यातिदेशपरताभ्युपगमायोगात्। सत्येव कार्यविशेषसमर्पके कार्याति-देशस्य स्वीकर्तुमुचितत्वाच्च। न हि कश्चित् कार्यविशेषस्तेनातिदेशेन गम्यते, येन तदतिदेशो युज्येत। यदप्युक्तम् 'यदि हि संज्ञा स्यात् टिघुभादिसंज्ञावदेकाक्षरा संज्ञा क्रियेत। तस्मा-ल्लौकिकार्थाभिधायी संख्याशब्द उपादीयमानोऽतिदेशार्थत्वमस्य बोधयति' इति। तदपि न, [३]'वृद्धि-रादैच्' [४]'अदेङ् गुणः' [५]'हलोऽनन्तराः संयोगः' इत्यादौ लौकिकार्थाभिधायिनां वृद्ध्यादिशब्दानामुपा-दानेऽप्यतिदेशादर्शनात्। लौकिकार्थाभिधायिसंख्याशब्दोपादानफलस्यान्वर्थसंज्ञाविज्ञानस्य भगवतैव वक्ष्यमाणत्वात्। व्याख्यानत एवैतादृशस्थलेऽतिदेशपक्षस्याश्रयितुं युक्तत्वाच्च। वतिमन्तरेणाति-देशपरत्वेन व्याख्यानं युक्तिमन्नेत्यस्वरसात् संज्ञापक्षं कृत्रिमाकृत्रिमपरिभाषां चाश्रित्यैव ज्ञापकेन संख्याप्रदेशे एकादेरपि ग्रहणं भवतीति साधयितुमाह — **अथवेति**। एतेन 'गुरुसंज्ञाकरणादेकादयः संख्याशब्देन न त्यज्यन्त इति लिङ्गेनाप्यनुमीयत इत्यर्थः' इति निरस्तम्। गुरुसंज्ञाकरणेनाप्येका-देर्ग्रहणस्य 'अथवा महतीयम्' इत्यादिना भाष्यकृतैव वक्ष्यमाणत्वेनात्र तस्य कथनानौचित्यात्। ज्ञापकस्य गुरुसंज्ञासहायानपेक्षणाच्च। **भवत्येकादिकाया इति**। अपीति शेषः। **अर्थवतस्ति-शब्दस्येति**। संज्ञाकरणबलेन बह्वादीनां ग्रहणेऽपि तदविरोधेनार्थवत्तिशब्दान्तस्य पर्युदासबलेनैका-दीनामपि ग्रहणमिति विज्ञास्यत इति भावः। एतेन 'ननूभयसंभवेऽर्थवत्परिभाषोपतिष्ठते। डत्यन्ता च कृत्रिमास्ति। डतेश्च तिशब्दोऽनर्थक एवेति तस्यैव निषेधः स्यादित्यज्ञापकस्त्यन्तायाः प्रति-षेधः' इति निरस्तम्। कृत्रिमाकृत्रिमपरिभाषायाः सामर्थ्यप्रकरणसापेक्षत्वेन सामर्थ्यप्रकरणयोश्च संख्यापदघटितवाक्यार्थपर्यालोचनाधीनत्वेन तत्पर्यालोचनावसरे च तिशब्दयोरुभयोरपि ग्रहणस्य संभवे-नार्थवत्परिभाषाप्रवृत्त्युपपत्त्या त्यन्तपर्युदासस्याप्येकादीनामपि ग्रहणं संख्याप्रदेशेषु भवतीति सामान्या-पेक्षज्ञापकतासंभवात्। एतेन "नैष दोषः, [६]'अतिशदन्तायाः' इत्युच्चारणकाल एवार्थवतस्तिशब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्वमेव" इत्यपि निरस्तम्। उच्चारणकाल एवार्थवतस्तिशब्दस्य ग्रहणेऽ-प्युभयसंभवप्रयुक्तार्थवत्परिभाषाप्रवृत्तेरनुपपादनात्। उच्चारणकाल एवार्थवतो ग्रहणे मानानुप-न्यासाच्च। कृत्रिमाकृत्रिमपरिभाषायां सत्यामेव ज्ञापकाश्रयणं विनापि महत्याः संज्ञायाः करणादे-वैकादीनामपि ग्रहणमिति निर्णेतुं शक्यत इत्याशयेनाह — **अथवेति**। ननु महत्याः संज्ञायाः करणात् तदनुगुणानामेवोपात्तानां ग्रहणं भवतु, संघवैपुल्यवाचिनिरासश्च। यथा संज्ञोपसर्जननिषेधाय सर्व-नामानीति महत्या संज्ञया सर्वादीनामेव तदनुगुणानां ग्रहणमिति चेन्न, संख्यायतेऽनयेति व्युत्पत्त्यै-

---

[१] पा. सू. १. ३. १४.
[२] परिभाषा ११०.
[३] पा. सू. १. १. १.
[४] पा. सू. १. १. २.
[५] पा. सू. १. १. ७.
[६] पा. सू. ५.१. २२.

कत्वादिसंख्यायां प्रसिद्धस्य लक्षणयैकादिशब्देष्वपि प्रयुज्यमानस्य संख्याशब्दस्य संज्ञात्वेनाश्रयणेन कृत्रिम-न्यायाविषयताया एव संख्याशब्दस्याश्रयणात्। परस्परसाहचर्येण संख्यावाचिनामेव बह्वादीनां ग्रहणमिति निर्णयसंभवेनासंख्यावाचिनिवृत्त्यर्थमन्वर्थसंज्ञाश्रयणानर्थक्यात्। विनिगमनाविरहेण व्याख्यानतो विशेषप्रतिपत्त्या च संघवैपुल्यवाचकभूर्यादिवारणवदेकादीनां संग्रहस्य चोचितत्वात्। व्याख्यानतोऽनुकरणाद्वा[1] कृत्स्नजगदादिशब्दानां तत्र सर्वनामतायां वारणीयत्वाच्च। एतेन "इहान्वर्थ-संज्ञाकरणेन तावदनुरूपः संज्ञी सर्वं आक्षिप्यते। [2]तत्रैकादीनां तावद् ग्रहणं भवति। पश्चात् 'बहु-गणवतुडति' इति भूर्यादिनिवृत्त्यर्थं नियमार्थं व्याख्यायते। अत एव संघवैपुल्यवृत्त्योर्बहुगणशब्दयोः संज्ञा न भवति" इति निरस्तम्। वाक्यभेदेऽभ्युपगतेऽपि पश्चात् प्रवर्तमाननियमस्यैकादिवार-कत्वं न भवति, भूर्यादिवारकत्वमेव भवतीत्यस्यापि व्याख्यानबलेनैव साधनीयत्वेन वाक्यभेदाना-श्रयणेनैव व्याख्याने एकादिसंग्रहोऽपि भवतीति वक्तुमुचितत्वात्। वाक्यभेदस्यापि व्याख्यानमूलक-त्वाच्च। **एकादिकया चापीति**। एकशब्दोऽत्र भावप्रधानः। एकत्वादिकया गुणविशेषरूपया विशिष्टा अप्यर्थाः सम्यक् [3]**ख्यायन्ते** प्रकथ्यन्ते, यथा बह्वादिवाच्यबहुत्वेन विशिष्टा इति भावः॥

[१, २५९–२६२]

(**नारायणीयम्**) इहेत्यसमस्तं चेत् 'अर्थेन' इत्यस्यानन्वयः स्यात्, अतः समस्तमित्याह — **सामान्येति**। असमस्तमर्थपदं फलसामान्यं वदति। समस्तं त्वधिकरणधर्मावच्छिन्नम्। तदय-मर्थः — 'संख्याग्रहणेन नार्थः' इत्युच्यमानेऽधिकरणविशेषे [4]फलनिषेधप्रतिपत्तिर्न स्यात्। 'इहार्थेन संख्याग्रहणेन न' इत्युच्यमाने नञोऽन्यपदार्थान्तर्गतार्थशब्दसंबन्धो न स्यादिति[5]। 'इह संख्याग्रहणेन नार्थः' इति तूच्यमाने सर्वमसमञ्जसम्। भाष्ये तु पूर्ववादिना 'इहार्थं संख्याग्रहणम्' इत्युक्तं शब्दतो-ऽनूद्य निरस्तम्। अन्ये तु 'संख्याग्रहणेन' इत्यनेन गतार्थत्वात् 'अर्थेन' इति पुनरुक्तमिति शङ्का सामान्यविशेषभावेन तयोर्निरस्यत इत्याहुः। आङर्थाभावादाह — **इतश्चेति**। अभिधेयादिवचनत्वं व्यावर्तयति — **सामर्थ्यमिति**। अर्थप्रकरणाभ्यां सामान्यशब्दादपि विशेषावगतिमुदाहरति — **यथेति**। प्रधानस्याङ्गाकाङ्क्षस्य वचनं प्रकरणमिति लक्षणलक्षितं प्रकरणमिह न विवक्ष्यते। अपि तु प्रस्तावमात्रमित्याह — **प्रस्ताव इति**। ग्रामभवतयोहनासामर्थ्यं लक्ष्यत इत्याह — [**ऊहितुमिति**। पांसुलपादतयाचिरोषितत्वं लक्ष्यत इत्याह] — **अचिरेति**। **अत इति**। उक्त-हेतुद्वयात्। ऊहसमर्थोऽचिरोषितोऽपि प्रस्तावं जानीयात्। चिरोषितस्तु मन्दोऽपि। प्रस्तावान-भिज्ञस्य प्रसिद्धगतेर्न्याय्यत्वात् कथमुभयगतिरित्याशङ्क्य संभावितत्वात् संज्ञिनोऽपीत्याह — **किमिति**। गतिशब्देन निर्णयो नोच्यते, युगपदुभयविवक्षायां प्रमाणाभावात्। अपि तु संदेह इत्याह — **संदेहवानिति**। संज्ञिनोऽपि संभाविततया विवक्षोपपत्तेर्यष्टिहस्तविवक्षानिर्णये किमस्य प्रमाणमित्य-त्राह — **य इति**। तदेवं 'कृत्रिमाकृत्रिमयोः' इति न्यायाभाव इत्युक्तं भवति। ननु कथमभावः, सनिदानत्वादित्याशङ्क्य निदानं निरस्यति — **लोके चेति**। संज्ञिसत्त्वज्ञानमात्रं न तत्प्रतिपत्तौ हेतुः, किं तु प्रकरणादिकमित्यत आह — **बह्वादय इति**। शास्त्रीयकार्यलाभार्थत्वाद् बह्वादीनां

---

[1] गणे सर्वादीनामेवानुकरणादित्याशयः स्यादिति भाति।

[2] प्रदीपे 'तेनैकादीनाम्' इत्यत्र 'तत्रैकादीनाम्' इति रत्नप्रकाशकृत्पाठ इति भाति।

[3] 'संख्यायते' इति भाष्य उपलभ्यते। 'संख्या-यन्ते' इति पाठोऽभिमतः स्यादिति भाति।

[4] फलनिषेधे प्रतिपत्तिः — क.

[5] अत्र 'इति'शब्दोऽधिको भाति।

संज्ञाकरणस्य प्रदेशेषु संज्ञिप्रत्यभिज्ञानं भवतीत्यर्थः। इदमेव हि प्रकरणम् — यदुत किंचित् तत्र विधातुं कस्यचित् समुद्देशः। इह च बह्वादयः संज्ञितया समुद्दिश्यन्ते प्रादेशिककार्यलाभाय। 'न यथा लोके' इति भाष्ये भवतु लोके प्रकरणादिवशान्निर्णयः, 'लक्ष्यमूले त्वस्मिन् शास्त्रे यथालक्ष्यं व्यवस्थेत्युक्तम्। लक्ष्यातिरिक्तव्यवस्थानिमित्तं च टीकायां दर्शयिष्यते। संख्याप्रदेशेषु च लक्ष्यदर्शनाद् वक्ष्यमाणज्ञापकाद्वोभयगतिरभिप्रेता। एतच्च सर्वमुभयार्थत्वे कर्मादिशब्दानां संख्याशब्दस्य चोपपद्यते। तदेव तु नास्ति, शक्तिनियमात् संज्ञाकरणेनेत्यत्राह — **संख्याशब्द इति**। उपलक्षणमेतत् कर्मादिशब्दस्यापि। तुल्यजातीयस्य [२]संज्ञयन्तरस्य निवृत्तिः, एकादौ तु संख्यायतेऽनयेति संख्याशब्दो यौगिकः। यद्वा, एकशब्दस्यैका शक्तिरिति मतेन नियमनं [३]संज्ञाकरणेनाप्रसिद्धशक्त्याविर्भावनमिति नेतरन्निरस्तं तेनेत्यर्थः। **ङ्याबिति**। ङ्याप्प्रातिपदिकं च न साध्यभूतक्रियायां वर्तते। अथ 'कर्मणि' इति प्रत्ययार्थनिर्देशः। ततश्च ङ्याद्यर्थसंबन्धिन्यां क्रियायां द्वितीयाविधिः, तदाप्याह — **अनभिहित इति**। एतद्विशेषणसंभवव्यभिचारौ कारके स्पष्टाविति तद्ग्रहणमित्यर्थः। क्रियायामपि संभवत एतद्विशेषणसंभवव्यभिचारौ कथंचित्काविति शङ्कमानं प्रत्याह — **संख्यायामिति**। कर्मगतायामिति शेषः। संख्यापेक्षा वा कर्मणीति सप्तमी। **धातोरिति**। आत्मनेपदेनाक्षिप्तस्य धातोः। व्यतिहारविशिष्टकर्मवृत्तित्वं विशेषणमित्यर्थः। **साक्षादिति**। 'पचति, पच्यते' इत्यादौ धातुः साक्षात् क्रियाभिधायकः। प्रकृतिप्रत्यययोः संभूयार्थाभिधानात्तु साधनमपि स्पृशति। **धातुसंज्ञेति**। [४]'सनाद्यन्ताः' इत्यनेन। ननु क्रियावाचित्वविशेषणं तव्यदादिप्रकृतौ नास्तीत्याशङ्क्याह — **साधन इति**। साधनं हि क्रियाया भवति। ततश्च प्रत्ययस्य साधनवाचकत्वे प्रकृतेः क्रियावाचित्वमर्थलभ्यमित्यर्थः। **शक्तीति**। प्रसक्तस्य प्रतिषेधः। न च शक्तिवाचित्वं प्रसक्तम्, किं तु द्रव्यवाचित्वमिति तद्ग्रहणं तत्र। नन्वतिदेशे वत्यर्थकल्पनागौरवात् संज्ञा स्यादित्याशङ्क्याह — **संख्येति**। संज्ञा हि कार्यार्था। ततश्च यदर्था संज्ञा तस्यैवेह लाभाय वत्यर्थकल्पनागौरवमप्युचितमिति भावः। ननु संज्ञाप्रायपाठात् संज्ञैवोचिता। अत एवेह प्रकरणेऽतिदेशलाभाय यत्नः क्रियते [५]'स्थानिवत्' इतीति शङ्कमानं प्रत्यस्तीहापि यत्न इत्याह — **यदि[६] त्विति**। ननु गुरुनिर्देशात् संज्ञात्वाभावनिश्चयेऽप्यतिदेशनिश्चयः कुत इत्यत्राह — **तस्मादिति**। असति संज्ञात्वे लौकिकार्थबोधिनोऽस्य बह्वादिसामानाधिकरण्यान्यथानुपपत्त्यातिदेशत्वनिश्चय इत्यर्थः। ननु कन्विधिविषयमेव ज्ञापकमिति प्रदेशान्तरे लौकिकसंख्याग्रहणं न स्यादिति मन्वानं प्रत्याह — **गुरुसंज्ञेति**। एकाक्षरां संज्ञां विधाय तदनुवादेन कन्नादिविधौ लौकिकसंख्याप्रतिपत्तिर्न स्यादिति तत्प्रतीत्यर्थमेव गुरुसंज्ञाविधानमिति भावः। ज्ञापकं त्वस्मिन्नर्थेऽनुग्राहकतयोपन्यस्तमित्याह — **लिङ्गेनापीति**। [भाष्ये] [७]**डतिरस्तीति**। डतिरेवास्तीत्यर्थः। **उच्चारणकाल एवेति**। रूपग्रहणं[८] ज्ञापकादर्थवत्स्वरूपं प्रतीतम्। तत्र किं प्रतीतानुसारेण ज्ञापकत्वम्, उत कृत्रिमन्यायात् प्रतीतपरित्याग इति [९]विशये इष्टत्वात् कल्पनालाघवाच्च ज्ञापकताकल्पनमुचितमित्यर्थः। **नन्विति**। कृत्स्नादीनां संज्ञानिमित्तान्वितानामपि न संज्ञा, किं तु निमित्तानन्वितानामुपात्तानां संज्ञाव्यवच्छेद इत्यर्थः। नन्विहोपात्तव्यवच्छेद्यविरहादनुपात्तप्रतिपत्तिरेव निमित्ता-

---

[१] बहुव्रीहिर्बोध्यः।
[२] संज्ञयन्तरनिवृत्तिः — क.
[३] संज्ञाकरणेन प्रसिद्धशक्त्या विभावनमिति –क.
[४] पा. सू. ३. १. ३२.
[५] पा. सू. १. १. ५६.
[६] प्रदीपे 'यदि हि संज्ञा स्यात्' इत्यत्र 'यदि तु संज्ञा स्यात्' इति पाठोऽभिमतः।
[७] भाष्ये 'ननुचेयमस्ति डतिः' इत्यस्य 'डतिरस्ति' इत्यन्वयरूपेण प्रतीकग्रहणं बोध्यम्।
[८] ज्ञापकादर्थवत्त्वरूपं — क.
[९] विषये — क.

श्रयणफलमित्यत्राह — **तेनेति**। **इहेति**। 'संख्या' इति विभक्तव्यम्। तत्र च संज्ञानिमित्तान्वितानां संज्ञित्वम्। **अत एवेति**। नियमार्थत्वादेव। न च विधिज्यायस्त्वम्, निमित्तवत्याः संज्ञायाः संज्ञयतिवृत्तौ प्रसङ्गाभावात्। उभयसंभवविषयत्वाच्च विधिज्यायस्त्वन्यायस्य। तदेवं निमित्ताश्रयणादुपात्तेऽतिप्रसङ्गनिरासोऽनुपात्तसंग्रहश्च। [1]'सर्वादीनि' इत्यत्रानुपात्तसंग्रहे सर्वादीनां पृथक्संज्ञाविधानं विफलं भवेत्। इह तु बह्वादिसंज्ञाविधानं नियमार्थमित्युक्तम्। तुल्यजातीयविषयत्वाच्च नियमस्य बह्वादिवदनियतबहुत्ववाचिनो भूर्यादयो व्यवच्छिद्यन्ते, नाबहुत्ववाचिनावेकद्विशब्दौ। नापि नियतबहुत्ववाचिनः पञ्चन्नादयः। अत्र च बहुगणयोरेवोपादानं नियमार्थम्, इतरयोस्तु निमित्तविरहेऽप्युपादानसामर्थ्याद्विधिरेवेत्याहुः। ननु संज्ञापक्षेऽन्वर्थतया संघादिवृत्तावप्राप्तिः, पुनर्विधेश्च नियमार्थतया भूर्यादिनिवृत्तिश्च सिध्यति। तद्वदतिदेशत्वेऽतस्मिंस्तत्कार्यार्थत्वात् तयोः संघादिवचनयोरेव संख्याकार्यातिदेशः स्यात्। विधिलाभे च नियमाभावाद् भूर्यादीनां प्रदेशेषु पञ्चन्नादीनामिव कार्यप्रसङ्गः, तत्राह — **तद्वदिति**। **परस्परेति**। तुल्यजातीययोर्ग्रहणसंभवे न विजातीयग्रहणमित्यर्थः। यत्रैकतरस्येत्थंभावनिर्णयस्तत्र साहचर्यादपरस्य दृष्टव्यभिचारस्यापि तथाभूतस्य ग्रहणम्। यत्र तूभयोरपि तत्त्वव्यभिचारस्तत्र [2]यादृशयोर्ग्रहणे साजात्यं तयोः स्यात् तादृशयोर्ग्रहणम्। ननु संख्यावाचिनोस्तत्कार्यातिदेशो व्यर्थ इत्यत्राह — **भूर्यादीति**॥

[१, २६२–२६५]

(**विवरणम्**) भाष्ये [3]**संज्ञार्थं** संज्ञा [4]समुदायशक्त्यवगमः, तदर्थमिति। ननु संज्ञिनी संख्या, सा [5]'ष्णान्ता' इत्यनेन विशेष्यते, तत्किमुच्यते 'संज्ञिविशेषणेन' इति, अत आह — **ष्णान्तेति**। संज्ञी विशेष्यते व्यावृत्ततया प्रतिपाद्यते येन [6]'ष्णान्ता' इत्येतत्सहकृतेन संख्याग्रहणेन तत् संज्ञिविशेषणम्, तेनेति भाष्यार्थः। ननु शब्दभेदेऽर्थभेदस्यौत्सर्गिकत्वात् 'न चान्यार्थम्' इत्युक्तिरयुक्तेत्यत आह — **एकेति**। प्रकृतमनुवर्तनादन्यन्न खलु भवतीति [7]भाष्ययोजना। सर्पणमुभयोस्तुल्यमिति न गोधाया अहित्वं प्रसक्तं [8]निषिध्यते, सर्पणस्याहिशब्दप्रवृत्तिनिमित्तत्वाभावात्, किं तु देशान्तरगमनं नान्यत्वापादकमित्युच्यत इत्याह — **यथेति**। ननु [9]पूर्वमर्थान्तराभिप्रायेण प्रयुक्तस्य तत्त्यागेनार्थान्तरोपादाने शब्दार्थसंबन्धानित्यत्वं स्यादित्यत आह — **स्वरितेति**। पूर्वस्मादुत्तरस्य परिहारस्य भेदमाह — **तत्रेति**। संख्यावाचित्वाभावमुपपादयति — **अर्धशब्दश्चेति**। समासस्य [10]संख्याकार्यत्वं दर्शयितुं [11]'दिक्संख्ये' इत्यनुवर्तमान इत्युक्तम्। ननु समासकनोरेव सिद्धये संख्यासंज्ञा विधीयमाना कथं द्विगुनिमित्तलुके स्यादित्यत आह — **समासेति**। **अध्यर्धो द्वाविति**। अध्यारूढमर्धं यस्येति बहुव्रीहौ प्राथम्यादेकत्वस्य प्रतीतौ तस्यार्धस्य च समुदायस्यान्यपदार्थत्वादिति भावः। द्वितीयं नियमं दर्शयति — **तस्य चेति**। **परेष्वर्थेषु** [12]'तमधीष्टो भृतः' इत्यादिषु। **यदयमिति**। न चैवं वैपुल्यसंघवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं स्यादिति वाच्यम्, अनियतसंख्या[13]वाचिना-

---

[1] पा. सू. १. १. २७.
[2] यादृशयोर्ग्रहणसाजात्यं — क.
[3] 'संज्ञार्थम्' इति नास्ति — ज; संज्ञानं — च, छ, ट.
[4] संज्ञिशक्त्यवगमः — ज.
[5] पा. सू. १. १. २४.
[6] पा. सू. १. १. २४.
[7] भाष्ये योजना — च, ट.
[8] प्रतिषिध्यते — ट.
[9] 'पूर्वम्' इति नास्ति — च, छ, ट.
[10] संख्याकार्यं — ट.
[11] पा. सू. २. १. ५०.
[12] पा सू. ५. १. ८०.
[13] वाचिनां मध्ये तेषां — च, छ, ट.

मप्येतेषां संख्याकार्यं भवतीति ज्ञापकत्वसंभवे कथमपि संख्यावाचित्वरहितानां [1]तद् भवतीति ज्ञापनायोगादिति भावः ॥

[१, २६२–२६५]

(**उद्द्योतनम्**) भाष्ये **संज्ञार्थं** बह्वादिषु समुदायशक्त्यवगमार्थम्। [2]'विशेषणेन' इत्यस्य तात्पर्यमाह — **ष्णान्तेति**। 'उपयोगः' इत्यर्थशब्दार्थकथनम्। भाष्ये 'संज्ञिविशेषणेनार्थः' इत्यपि पाठः। तत्र [3]'ष्णान्ता' इत्यनेन [4]संज्ञी विशेष्यते। किं संज्ञिविशेषणेन, अत आह — **ष्णान्तेति**। संज्ञी विशेष्यते व्यावृत्ततया प्रतिपाद्यते येनानुवृत्तेन संख्याग्रहणेन तेनेति भाष्यार्थः। प्रदीपे तु [5]वस्त्वर्थ उक्तः। शब्दभेदेऽर्थभेदस्यौत्सर्गिकत्वात् 'न चान्यार्थम्' इत्ययुक्तम्, अत आह — **एकेति**। गोधायां [6]सर्पणस्यावर्ण्यात् [7]प्रसक्तमहित्वं सर्पणस्याहिशब्दप्रवृत्तिनिमित्तत्वाभावेन निषिध्यत इति भाष्यार्थभ्रमं वारयति — **यथेति**। देशान्तरगमनं [8]नान्यत्वापादकमित्युक्तं भाष्य इत्यर्थः। **रूपान्तरं** भेदम्। नन्वर्थान्तराभिप्रायेण प्रयुक्तस्य तत्त्यागेनार्थान्तराङ्गीकारे शब्दार्थसंबन्धस्यानित्यत्वं स्यात्, अत आह — **स्वरितत्वादिति**। **वाक्यार्थानुग्राहि** वाक्यार्थान्वययोग्यम्। **सादृश्यादिति**। एतेन नानार्थस्थले सर्वत्रार्थभेदे शब्दभेदः सूचितः। भाष्ये **सापेक्ष इति**। बहुव्रीहेरन्यपदार्थसापेक्षत्वादित्यर्थः। संख्याग्रहणे नियामकमाह — **स्त्रीलिङ्गेनेति**। पूर्वस्मादस्य भेदमाह — **स्वरितत्वेनेति**। लौकिकाधिकार [9]आश्रीयत इति भावः। ननु भाष्ये संख्याग्रहणस्याकर्तव्यत्वाभिधानात् तत्समुच्चयार्थश्चकारोऽयुक्तः[10], अत आह — **वार्तिक इति**। अध्यर्धशब्दस्य संख्यावाचित्वाभावान्नियमार्थं ग्रहणं न संभवति, अत आह — **विध्यर्थं चेति**। तत्र हेतुः — **अध्यधति**। **त्रिभागेति**। वैधर्म्यदृष्टान्तः। साधर्म्यदृष्टान्त एव वा, बहुव्रीहिणा भागत्रययुक्तद्रव्यस्यैकस्यैव प्रतीतेः। संख्या[11]वाचित्वाभावमेवोपपादयति — **अर्धशब्दश्चेति**। **समास इति**। अर्धमधिकं यस्मिन्नित्यध्यर्धमिति बहुव्रीहिः। समासस्य संख्याकार्यत्वं वक्तुं 'दिक्संख्ये इत्यनुवर्तमाने' इत्युक्तम्। **ठञो वेति**। [12]अञभावपक्षे [13]'प्राग्वतेष्ठञ्' इत्यधिकृतष्ठञ्। एकस्मिन् प्रयोगे प्रत्ययद्वयाभावादन्यतरस्य लुगित्यर्थः। **कन्निति**। क्रीताद्यर्थः। ननु समासकनोः [14]सिद्ध्यर्थं विधीयमाना संख्यासंज्ञा कथं द्विगुनिमित्तलुगर्था स्यात्, अत आह — **समासेति**। **अध्यर्ध**[15]शब्दस्य संख्या[16]वाचित्वमतमाह — **अन्य इति**। तदुपपादयति — **तथा हीति**। **अध्यर्धो द्वाविति**। अर्धमधिकं यस्मि-

---

[1] संख्याकार्यमित्यर्थः।
[2] अत्रोद्द्योतने 'संज्ञाविशेषणेनार्थः' इति 'संज्ञिविशेषणेनार्थः' इति भाष्यस्थाने पाठोऽभिप्रेतः।
[3] पा. सू. १. १. २४.
[4] संज्ञा — म, आ, इ, उ, ऊ, ऋ.
[5] तात्पर्यार्थ उक्तः — अ; वस्त्वर्थस्तात्पर्यार्थ उक्तः — ऋ.
[6] 'सर्पण' इति नास्ति — म, आ, इ, उ, ऊ, ऋ.
[7] प्रसक्तमहित्वं निषिध्यत इति भाष्यार्थभ्रमं सर्पणस्याहिशब्दप्रवृत्तिनिमित्तत्वाभावेन वारयतीत्यन्वयो बोध्यः।
[8] नान्यत्वसाधकमित्युक्तं — म, उ.
[9] आश्रित इति — आ.
[10] न युक्तः — म, उ.
[11] वाचित्वमेवोपपादयति — म, उ.
[12] अणभावपक्षे — अ, आ; अञोऽभावपक्षे — उ, ऋ.
[13] पा. सू. ५. १. १८.
[14] विध्यर्थ — अ.
[15] शब्दस्य कथं संख्या — ऋ.
[16] वाचित्वमत आह — अ, म.

न्निति बहुव्रीहौ प्राथम्यादेकत्वस्य प्रतीतौ तस्यार्धस्य च समुदायोऽन्यपदार्थ इति भावः। वस्तुत एकादिशब्दवदध्यर्धशब्दोऽप्यनपेक्षितावयवार्थः सार्धवाचक इति ज्ञेयम्। **वाक्यभेदेनेति**। 'अध्यर्धग्रहणं च' इत्येकं वाक्यं [1]सार्धादिव्यावृत्तये नियमार्थम्। 'समासकन्विध्यर्थम्' [2]इति द्वितीयं वाक्यं नियमान्तरार्थमित्यर्थः। तदेवाह — **तस्य चेति**। अधिकशब्दस्य संख्यावाचित्वे वचनवैयर्थ्यम्, अत आह — **अधिकयेति**। यद्यप्येकया षष्टया क्रीत एकषाष्टिक इत्यत्रैव संख्याविशेषणत्वं नासंख्यात्वप्रयोजकम्, तथाप्येकादिशब्दवदधिकशब्दस्य संख्यावाचित्वं नास्तीत्यत्र तात्पर्यम्। **ततः** लुगभावात् जिदादौ परे वृद्धिविधानात्। अत एव शङ्कते — **नन्विति**। **परेषु** [3]'तमधीष्टो भृतो भूतो भावी' इत्यादिषु। [4]'अध्यर्ध' इत्यार्हीयप्रत्ययस्यैव लुग्विधानादधीष्टाद्यर्थस्य लुगभावात् 'उत्तरपदवृद्ध्यर्थम्' इति तदर्थं स्यादित्यर्थः। **यः प्रत्यय इति**। द्वौ संवत्सरावधीष्टो द्विसांवत्सरिकः, [5]'प्राग्वतेष्ठञ्'। ननु बह्वादीनामप्येकादिवत् संख्यावाचकत्वात् किं ज्ञापकाश्रयेण, अत आह — **नियतेति**। संख्याशब्देन नियतसंख्यावाचिन एव प्रसिद्धिवशात् प्रदेशेषु ग्रहणं स्यादिति भावः। **योगानिति**। 'योगापेक्षम्' इति योगग्रहणसामर्थ्यात् सूत्रप्रत्याख्यानोपयोगाच्च बहुवचनान्तेन विग्रहः, अनेकयोगसापेक्षं ज्ञापकमिति भाष्यार्थः। **यदयमिति**। न चैवं वैपुल्यसंघवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं स्यादिति वाच्यम्, अनियमेनापि संख्यावाचिनां कार्यं भवतीति ज्ञापकत्व[6]संभवे संख्यावाचित्वरहितानामपि तत्कार्यज्ञापनायोगादिति भावः। यद्यपि [7]'वतोरिड्वा' इति भाष्योक्तमस्ति, तथापि तस्यैवागमविधायकतया 'नित्यतया च [8]'वतोरिथुक्' इत्युक्तम्॥

[१, २६२–२६५]

(रत्नप्रकाशः) **इदमिति**। संख्याग्रहणमित्यर्थः। **संज्ञार्थमिति**। अत्रेति शेषः। **उत्तरत्रेति**। अनुवृत्तस्यास्येति शेषः। **संज्ञिविशेषणेनेति**। संज्ञिसमर्पणेनेत्यर्थः। **न चान्यार्थमिति**। अर्थभेदेन शब्दभेदाभावेऽपि यदर्थप्रतिपादनाय यः प्रकृतः स उत्तरत्रापि तदर्थप्रतिपादक एव भवति, यथा 'देवदत्ताय गौर्देया, यज्ञदत्ताय विष्णुमित्राय च' इत्युक्ते गोशब्दः पशुवाचकः प्रकृत उत्तरत्रापि पशुवाचक एव भवतीति भावः। नन्वर्थभेदेन शब्दभेद आश्रीयते। प्रकृतसदृश एवोत्तरत्राध्याह्रियते। तथा च नोक्तदोष इति चेन्न, यदर्थकः प्रकृतस्तदर्थक एवोत्तरत्रानुवृत्त इत्येवाश्रयितुं युक्तत्वात्। अन्यथा पशुवाचके गोशब्दे प्रकृते उत्तरत्र पृथिवीवाचकः स आश्रीयेतेत्याशयेनाह — **न खल्वपीति**। तत्र लोकदृष्टान्तमाह — **न हि गोधा सर्पन्तीति**। यथा सर्पणमात्रेण गोधायाः सर्पत्वं न भवति तथानुवर्तनेन प्रकृतशब्दस्यान्यार्थकत्वं न भवतीति भावः। **शब्दस्तु खल्विति**। स्वरूपपरतया निर्दिष्टस्य शब्दस्य शब्दान्तरेण येन येन संबन्धो भवति तत्तत्संबन्धिनिर्वाहकार्थपरता तत्र तत्रा-

---

[1] सार्धादेर्व्यावृत्तये — अ; सार्धादिनिवृत्तये –ऋ.
[2] इति भिन्नं वाक्यं — म, आ, इ, उ, ऊ.
[3] पा. सू. ५. १. ८०.
[4] पा. सू. ५. १. २८.
[5] पा. सू. ५. १. १८.
[6] संभवेन संख्या — अ.
[7] पा. सू. ५. १. २३.
[8] अनित्यतया च — म, उ. अत्र 'तस्यैवागमविधायकतया नित्यतया च' इति पाठ एव युक्तो भाति, संख्यात्वेनाभिमतस्यैवेथुगागमविधायकतया वतोरिथुगित्यस्य नित्यतया चेत्यर्थात्। वतोरिड्वेति तु ततः परस्य कन आगमविधायकं वैकल्पिकत्वेनानित्यं चेति।
[9] पा. सू. ५. २. ५३.

श्रीयते शास्त्रे। लोके तु 'देवदत्ताय गौर्देया, यज्ञदत्ताय विष्णुमित्राय च' इत्यादौ विशिष्टार्थपर एव गोशब्दः प्रकृत इति न तस्यान्यार्थपरता, मानाभावादिति वैषम्यमिति भावः। एवं चार्थभेदेन शब्दस्य भेदेऽभेदे च तुल्यतैव भवति। **सापेक्षोऽयं निर्देश इति**। [1]'ष्णान्ता' [2]'ङति च' इतीति शेषः। तथा च संख्येत्यध्याहृत्य षान्ता नान्ता ङत्यन्ता च संख्या षट्संज्ञेति व्याख्यास्यामीति भावः। **अध्यर्धग्रहणं चेति**। प्रथमवार्तिके संख्याग्रहणं कर्तव्यतयोक्तमिति तदपेक्षोऽयं चः। **कर्तव्यमिति**। संख्यासंज्ञायामित्यनुषज्यते। अध्यर्धशब्दस्यैकादिशब्दवत् संख्याशब्दत्वाभावाद्वचनम्। न चाध्यर्धपादोनसपादादयः शब्दाः संख्यावाचकत्वेन क्वचित् प्रसिद्धाः। **अध्यर्धशूर्पमिति**। अध्यर्धेन शूर्पेण क्रीतमिति तद्धितार्थे समासे ततः [3]'शूर्पादन्यतरस्याम्' इत्यञ औत्सर्गिकस्य ठञो वा [4]'अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्' इति लुक्। **अध्यर्धकमिति**। अध्यर्धेन क्रीतमित्यर्थः। [5]'संख्याया अतिशदन्तायाः कन्'। **द्विगोरित्येवेति**। समाससंज्ञाया अव्ययीभावादिसंज्ञोपजीवित्वेन तत्पुरुषसंज्ञायां द्विगुसंज्ञायां च कर्तव्यायामध्यर्धशब्दः संख्यासंज्ञको भवतीति भावः। अत एवोत्तरवार्तिके 'अलुकि' इति सार्थकं भवति। एतेन "'समासविध्यर्थम्' इति च संबन्धसामान्ये षष्ठी। तेन समासे विधीयमाने समासनिमित्ते चान्यस्मिन् कार्ये विधीयमान इत्यर्थः। तेन द्विगुनिमित्तो लुगपि लभ्यते" इति निरस्तम्। द्विगुसंज्ञानिमित्तस्य लुकः समाससंख्यासंज्ञानिमित्तत्वाभावात्। यदप्युक्तम् 'अन्ये त्वाहुः — अध्यर्धशब्दः संख्यावाच्येव। तथाहि गण्यते, एकः, अध्यर्धः, द्वौ, अर्धतृतीयः, इतीति। तन्मते नियमार्थमध्यर्धशब्दस्यैव संख्यात्वेन ग्रहणं यथा स्यात्, सार्धादीनां मा भूदिति। वाक्यभेदेन च द्वितीयो नियमः। तस्य च समासकन्विध्यर्थं संख्यात्वं, न कार्यान्तरार्थमित्यर्थः' इति। तदपि न, अङ्कानां नवकस्यैव प्रसिद्धत्वेन पादार्धत्रिपादीपादोनादिवदध्यर्धार्धतृतीयादीनां संख्याशब्दत्वाभावस्यैव वक्तुं युक्तत्वात्। अत एव वाक्यभेदाश्रयणेन नियमद्वयं नाङ्गीकर्तव्यम्, विधिपरत्वेनैकवाक्यताया एवौचित्यात्। **अर्धपञ्चमशूर्पमिति**। अर्धं पञ्चमं येषां तैः शूर्पैः क्रीतम्। अन्यत् प्राग्वत्। **अधिकषाष्टिक इति**। अधिकया षष्ट्या क्रीत इत्यर्थः, [6]'प्राग्वतेष्ठञ्'। [7]'संख्यायाः संवत्सरसंख्यस्य च' इत्युत्तरपदवृद्धिः। 'अलुकि' इत्युक्तेर्लुग्विषयकद्विगुसंज्ञायां न संख्यासंज्ञा। 'उत्तरपदवृद्धौ' इति त्वार्हीयात् परेष्वर्थेषु चरितार्थमिति न तेन 'अलुकि' इत्यस्यानर्थक्यम्। एतेन 'अलुकीति वचनाल्लुकि कर्तव्ये संख्यासंज्ञा न' इति निरस्तम्। द्विगुसंज्ञामात्रस्य तत्रापेक्षितत्वेन लुकि संख्यासंज्ञानिषेधेऽपि लुकोऽनिवारणात्। यद्यप्यधिकषष्टिशब्देनैकषष्ट्यादिप्रतीतिर्जायते, तथाप्यार्थिकीत्यधिकशब्दस्य नैकादिपर्यायता, पादार्धाद्याधिक्येऽप्यधिकशब्दप्रवृत्तेः। प्रौढ्या सूत्रं प्रत्याचष्टे — **बह्वादीनामग्रहणमिति**। **योगापेक्षमिति**। त्रित्वादिसंख्यासाधारणसंख्यावाचकनित्यबहुवचनान्तापेक्षं ज्ञापकम्, त एव प्रकृतयोगे निर्दिष्टाः। भूरिशब्दस्तु न बहुवचनान्त इति भावः। वस्तुतस्त्विदं प्रत्याख्यानमयुक्तम्, पूगसंघशब्दयोर्डटितिथुग्विधानेन कतिपयशब्दस्य थुग्विधानेन च तेषामपि संख्यासंज्ञाप्रसङ्गात्। एतेन "अस्य योगस्य प्रत्याख्यानादेतद्योगापेक्षमिति न बोद्धव्यम्, किं तु योगानपेक्षत इति योगापेक्षम्। यदयं "बहुपूगगणसंघस्य तिथुक्' [9]'वतोरिथुक्' [10]'षट्कतिकतिपयचतुरां थुक्' इति डटि परत आगमं शास्ति,

---

[1] पा. सू. १. १. २४.
[2] पा. सू. १. १. २५.
[3] पा. सू. ५. १. २६.
[4] पा. सू. ५. १. २८.
[5] पा. सू. ५.१. २२.
[6] पा. सू. ५. १. १८.
[7] पा. सू. ७. ३. १५.
[8] पा. सू. ५. २. ५२.
[9] पा. सू. ५. २. ५३.
[10] पा. सू. ५. २. ५१.

तज्ज्ञापयति — भवति संख्याकार्यमिति' [इति] निरस्तम्। प्रकृतसूत्रापेक्षयैव सम्यङ्ः मया व्याख्यातत्वात्। किं च योगान्तरापेक्षया व्याख्याने तत्र तिथुगादेरेव बह्वादिसंख्यात्वज्ञापकत्वेन 'नेत्याह। योगापेक्षं ज्ञापकम्' इति भाष्यस्य 'वतोरिड्विधानं वतोरेव ज्ञापकं न, किं तु बह्वादीनां सर्वेषाम्' इत्येतदभिप्रायकस्यायुक्तत्वापत्तेश्च॥

[१, २६२–२६५]

(**नारायणीयम्**) ननु 'ष्णान्ता' इत्यनेन संख्याया विशेष्यत्वात् संज्ञित्वमस्य, न तु तद्विशेषणत्वमित्यत्राह — **ष्णान्तेति**। असति संख्याग्रहणे ष्णान्तमात्रं संज्ञि स्यात्। सति तु तस्मिन् विशिष्टसंज्ञि[1]निर्देशनं संख्याग्रहणफलम्। [2]प्रस्तुतस्योपात्तार्थपरित्यागेनार्थान्तरस्वीकारो न युक्त इत्युक्तम्। अस्तु तथा, शब्दान्तरस्य त्वर्थान्तरं भविष्यतीत्यत्राह — **एकेति**। शब्दान्तरत्वे प्रमाणाभाव इति भावः। अनुक्तोपालम्भनिवारणाय व्यावर्त्यशङ्कां दर्शयन् शब्दान्तरत्वे वाक्यभेदं प्रमाणयति — **भवत्विति**। देशभेदस्य रूपान्यत्वकरत्वाशङ्कायां सर्पणक्रियायां व्यभिचारोक्तिर्न शोभत इत्याशङ्क्य सर्पणेन तत्फलविवक्षां दर्शयन् अहित्वं रूपान्तरोपलक्षणमित्याह — **यथेति**। **गमनं** प्राप्तिः। शब्दस्य नानार्थत्वानुपपत्त्याशङ्कायामेकाधिकरणकजलगतानेकोपकारकीर्तनं व्यर्थमित्यत्राह — **पदार्थानामिति**। यथा जलस्य पिपासोपशमनशक्तिरदृष्टजननशक्तिः सस्यसंजीवनशक्तिश्च, तथा शब्दस्याप्यनेकार्थाभिधानशक्तिरित्यर्थः। [3]'यदपि' इति शब्दैक्यनिराकरणमुपक्रम्य द्रव्येषु देशभेदेऽप्यैक्यमङ्गीकृत्य शब्दस्य स्वसंबन्धिविशेषकत्वमुक्तम्। तदयुक्तम्, भेदतत्प्रमाणयोरनुपन्यासे ऐक्यनिराकरणासिद्धेः, अत आह — **स्वरितत्वेनेति**। भेदफलस्य भाष्ये भाषणात् सप्रमाणकः सोऽप्याक्षिप्त इत्यर्थः। तदिह संज्ञ्युपस्थानमुत्तरत्रोद्दिश्येहत्यशब्दस्वरितप्रतिज्ञानमेव तदन्यत्वे तस्य प्रमाणम्। न खलु शब्दस्य गमनं संभवति, अतस्तत्तद्वाक्यार्थानुकूलः स्वरितशब्दः। शब्दान्तरानुमानमेवाधिकारपदार्थ इति भावः। यदि तर्हि वाक्यान्तरे शब्दान्तरं कथं पूर्वसूत्रस्थमिह संबध्यत इत्याद्यभियुक्तप्रतिज्ञानम्, कथं चेह भाष्यकारः 'शब्दस्तु येन येन संबध्यते तस्य तस्य विशेषकः' इति प्रत्यभिजानाति, तत्राह — **सादृश्यादिति**। षट्संज्ञायाः स्ववाक्योपात्तष्णान्तसंज्ञिनाकाङ्क्षोपशमात् कथं सापेक्षत्वम्, अत आह — **स्त्रीलिङ्गेनेति**। प्रत्यासत्तेः संज्ञिपदार्थकत्वे हेत्वन्तरोपन्यास इति न भ्रमणीयम्, किं तु 'इदं प्रकृतमुत्तरत्रानुवर्तिष्यते' इति स्वरितत्वनिबन्धनानुवृत्तिर्विवक्षिता। इदानीं त्वनुवृत्तावुपायान्तरमाहेत्याह — **स्वरितत्वेनेति**। संख्याग्रहणस्य प्रत्याख्यातत्वात् समुच्चेतव्यस्याभावाच्चशब्दानुपपत्तिमाशङ्क्याह — **वार्तिक इति**। अध्यर्धशब्दस्य लौकिकसंख्यावाचित्वान्नियमार्थमिदमिति केषांचिन्मतं वक्ष्यति। असंख्यात्वाङ्गीकारेण त्वाह — **विध्यर्थमिति**। ननु [4]भागस्यासंख्यावाचित्वात् समासार्थस्यापि [5]न संख्यात्वम्, इह त्वर्धशब्दस्य संख्यावाचित्वात् तदधिकमपि संख्यात्मकमेव, सजातीयविषयत्वादाधिक्यव्यवहारस्य, अत आह — **अर्धेति**। समासकनोः [6]संख्यानिमित्ततां तल्लक्षणकीर्तनेन दर्शयति — **अध्यर्धेनेत्यादिना**। समासकनोरेव कर्तव्ययोः संख्यात्वाल्लुग्लाभः कथम्, अत आह — **समासेति**। भागादिवैलक्षण्यमाह — **तथा होति**। किमिदं लुक्प्रतिषेधार्थं वचनमुताप्राप्तसंख्याकार्यप्रापणार्थमित्यत्राह — **अधिकयेति**।

---

[1] निर्देशकं — क.
[2] प्रस्तुतस्योपात्तार्थापरित्यागेनार्थान्तर – क.
[3] यद्यपि — क.
[4] भागशब्दस्येत्यर्थः।
[5] न संख्यार्थम् — क.
[6] बहुव्रीहिसमासो ज्ञेयः।

लौकिकसंख्यात्वात् सिद्धौ वर्णनीयायां ज्ञापकात् तद्वर्णनं किमर्थमित्यत्राह — **एकादीति**। अत एव नियमार्थमपि बह्वादिग्रहणं न भवति, भूर्यादीनामप्यनियतसंख्यावाचिनां संख्याकार्यस्याप्राप्तत्वात्। पुरःस्फूर्तिकमर्थमयोग्यतया निरस्यत् विवक्षितमर्थं दर्शयति — **अस्येति**॥

ष्णान्ता षट् १. १. २४.

(१, २६६–२६९)

(**लघुविवरणम्**) ननूपदेशवचने क्रियमाणे पञ्चन्नादीनामुपदेशाभावात् षट्संज्ञा न प्राप्नोतीत्याशङ्क्य नेह स्वरूपप्रतिपत्त्यर्थमुच्चारणमुपदेशो विवक्षितः, किं तु गुणैः प्रतिपादनमित्यभिप्रेत्याह — **प्रकृतीति**। **प्रकृतिप्रत्ययादीति**। प्रकृतेः प्रत्ययादीति षष्ठीसमासः। तेन प्रकृतेः प्रत्ययाद्युपदेशे या षकारान्ता नकारान्ता वा सा षट्संज्ञेत्यर्थः। अन्तरङ्गत्वात् पूर्वमेव प्रवृत्ता षट्संज्ञा आत्वे कृतेऽपि न निवर्त्स्यतीत्यत आह — [1]**कार्यकालत्वादिति**। **तत्र[हि] दीर्घेति**। अयं भावः — यदा कृतात्वस्य षट्संज्ञा नास्ति तदा आत्वपक्षे [2]'झल्युपोत्तमम्' इति षट्स्वरस्य प्राप्त्यभावात् तत्रापि विधीयमानोऽष्टन्स्वरोऽपवादो न भवतीति स एव परत्वात् षट्स्वरेण बाध्यत इति [3]सुपोऽष्टन्स्वरनिवृत्त्यर्थं दीर्घग्रहणं न कर्तव्यम्। कृतात्वस्यापि संज्ञायां दीर्घग्रहणं यथार्थवत् तथा प्रतिपादयति — **ततश्चेति**। ननु 'एकास्ताः' इत्यत्रैकशब्दस्य [4]संख्यावाचित्वे तस्य नियमेनैकवचनान्तत्वाद् बहुवचनमनुपपन्नमित्यत आह — **संख्येति**। ननु [5]'अष्टाभ्यः' इति निर्देशादेव [6]'प्रियाष्टाः' इत्यात्वं भविष्यतीत्यत आह — **यत्राष्टार्थस्येति**। ननु विभक्ति[7]मात्रेऽप्यात्वं विधीयमानं केवलस्याष्टनो भवतु, तदन्तस्य तु कथमित्यत आह — **विभक्तीति**॥

[१, २६६–२६९]

(**विवरणम्**) स्वरूपप्रतिपत्त्यर्थस्योच्चारणस्यान्यत्रोपदेशत्वप्रसिद्धेस्तस्य च पञ्चन्नादिष्वभावादुपदेशवचने क्रियमाणे तेषां न स्यादित्यत आह — **प्रकृतीति**। प्रकृतिप्रत्ययविभागेन प्रतिपादनं नाम यद् गुणैः प्रापणं स उपदेश इत्यर्थः। प्रकृतेः प्रत्ययाद्युपदेश इति षष्ठीतत्पुरुषः, तेन प्रकृतेः प्रत्ययाद्युपदेशे या षकारान्ता नकारान्ता वा संख्या सा षट्संज्ञेत्यर्थः। नुम्नुटोरर्थः प्रयोजनं यस्येति बहुव्रीहिमभिप्रेत्याह — **तत्रेति**। अन्तरङ्गत्वात् पूर्वप्रवृत्ता षट्संज्ञा आत्वे कृतेऽपि न निवर्त्स्यतीत्यत आह — **कार्येति**। **यदि चेति**। अयं भावः — यदा [8]'कृतात्वस्य षट्संज्ञा न भवति [9]'तदा आत्वपक्षे [10]'झल्युपोत्तमम्' इति षट्स्वरप्राप्त्यभावात् [11]'कृतात्वस्य विधीयमनोऽष्टस्वरोऽपवादः षट्स्वरस्य न भवतीति स एव षट्स्वरेण परत्वाद् बाध्यत इति 'अष्टसु' [12]इत्यत्राष्टनः

---

[1] कार्यकाल इति — ड, ढ, ण.
[2] पा. सू. ६. १. १८०.
[3] सुप्यष्टनः स्वर — ड.
[4] संख्यावाचित्वेनास्य — ड.
[5] पा. सू. ७. १. २१.
[6] प्रियाष्टान इत्यत्रात्वं — ण.
[7] मात्रे विधीयमानं — ण.
[8] 'कृतात्वस्य' इति नास्ति — अ.
[9] तदा त्वेतत्पक्षे — अ.
[10] पा. सू. ६. १. १८०.
[11] अकृतात्वस्यापि विधीयमानः — छ; कृतात्वस्यापि विधीयमानः — अ.
[12] 'इत्यत्र' इत्यस्यानन्तरम् 'अपि'शब्दोऽधिकः — च, छ.

[१, २६६–२६९]

[1]स्वरनिवृत्तये दीर्घग्रहणं न कर्तव्यमिति। कृतात्वस्यापि[2] षट्संज्ञायां दीर्घग्रहणस्यार्थवत्तां दर्शयति— **ततश्चेति**। नन्वेकशब्दस्य संख्यावाचित्वे तस्य नियमेनैकवचनान्तत्वात् 'एकाः' इति बहुवचनानुपपत्तिरित्यत आह — **संख्येति**। **षट्स्वर इति**। [3]'षट्त्रिचतुर्भ्यो हलादिः' इत्यनेन। **कृतात्वेति**। ततश्च कृतात्वस्यासत्यामपि षट्संज्ञायामतिदेशान्नुड् भविष्यतीत्यर्थः। अतिप्रसङ्गमतिदेशस्य वारयति — **औश्त्वेति**। **ततश्चेति**। हलादिविभक्ति[4]निमित्तत्वादात्वस्येति भावः। अजाद्योर्जश्शसोस्तर्ह्यात्वं न स्यादित्यत आह — **जश्शसोरिति**। ननु प्रियाष्टान इत्यनुपपन्नम्, [5]'अष्टाभ्यः' इति जश्शसोरात्वस्योक्तत्वादित्यत आह — **यत्रेति**। ननु [6]विभक्तिमात्रे आत्वं केवलस्याष्टनो विधीयमानं कथं तदन्तस्य स्यादित्यत आह — **विभक्तीति**। औश्वदात्वमप्युपसर्जनत्वादष्टार्थस्य[7] न प्राप्नोतीति न वाच्यमित्याह — **बहुवचनेति**। व्याख्यानान्तरमाह — **नैवेति**॥

(**उद्द्योतनम्**) स्वरूप[8]प्रतिपत्त्यर्थमुच्चारणमुपदेशोऽन्यत्र प्रसिद्धः। तस्य च पञ्चन्नादिष्वभावात् तद्वचने क्रियमाणे तेषां संज्ञा न स्यात्, अत आह — **प्रकृतीति**। आदिना आगमादिग्रहः। प्रतिपादनरूपं यद् गुणैः प्रापणं स उपदेश इत्यर्थः। प्रकृत्यादिविभागेन प्रतिपादनं प्रत्ययागमयोरपीति 'शतानि' [9]इत्यस्याव्यावृत्तिमाशङ्क्य प्रकृतेरेव लाभार्थं गुणैः प्रापणमित्युक्तम्। तदेव स्पष्टयति — **तेनेति**। प्रकृतेः प्रत्ययाद्युपदेशकाले या प्रकृतिः षान्ता नान्ता सोक्तसंज्ञेत्यर्थः। नुटीव नुम्यपि संज्ञाप्राप्तेः प्रयोजनत्वशङ्कां वारयति — **प्रयोजनेति**। **नुम्नुटोः** नुमि [10]नुटि च **अर्थः** प्रयोजनं यस्येति बहुव्रीहिः। नन्वन्तरङ्गत्वात् पूर्वं प्रवृत्ता षट्संज्ञा आत्वे कृतेऽपि न निवर्तिष्यते, अत आह — **कार्येति**। यदा कार्यं तदा संज्ञा प्रवर्तत [11]इत्यात्वात् पूर्वं कार्याभावान्न संज्ञा प्रवर्तत इत्यर्थः। कृतात्वस्य षट्संज्ञायां प्रयोजनमाह — [12]**अष्टन इति**। दीर्घान्तादष्टनः [13]परा असर्वनामस्थानविभक्तिरुदात्ता। **झल्युपोत्तमम्** [14]झलादिविभक्त्यन्तानां षट्त्रिचतुरामुपोत्तममुदात्तं स्यात्। पञ्चभिः, तिसृभिः, चतसृभिः। **यदि चेति**। दीर्घान्तस्य षट्संज्ञाया अभावे 'अष्टनः' इत्येतावन्मात्रोक्तावपि 'अष्टसु' इत्यत्र परत्वात् झल्युपोत्तमस्वर एव स्यात्, अयं तु षट्संज्ञारहिते [15]दीर्घन्ते सावकाश इति नोपोत्तमस्वरस्य बाधक इति दीर्घग्रहणं व्यर्थं स्यादित्यर्थः। आकारान्तस्य

---

[1] स्वराप्रवृत्तये — छ.
[2] अपिशब्दो नास्ति — अ.
[3] पा. सू. ६. १. १७९.
[4] निमित्तत्वात् तस्येति — च, छ.
[5] पा. सू. ७. १. २१.
[6] 'विभक्तिमात्रे' इत्यस्यानन्तरम् 'अपि'शब्दोऽधिकः — ट.
[7] अष्टार्थस्योपसर्जनत्वादात्वमपि न प्राप्नोतीत्यन्वयः।
[8] प्रतीत्यर्थं — म, इ, उ, ऊ, ॠ.
[9] इत्यस्याद्यावृत्तिमाशङ्क्य — अ; इत्यस्याप्यावृत्तिमाशङ्क्य — म; इत्यव्यावृत्तिमाशङ्क्य — आ; इत्यत्राप्रवृत्तिमाशङ्क्य — ॠ.
[10] नुटि वार्थः — अ, आ, ॠ.
[11] इतिशब्दो नास्ति — म, आ, इ, उ, ऊ, ॠ.
[12] 'अष्टन इति' इत्येवायं प्रतीकः 'अ, म, आ, इ, उ, ऊ, ॠ' कोशेषु समुपलभ्यते। प्रदीपे तु तादृशपदं नोपलभ्यते। प्रदीपे 'अष्टनो दीर्घादिति। तत्र हि' इतीदम् 'अष्टनो दीर्घादित्यत्र हि' इत्येवमन्नंभट्टपाठे स्यादिति भाति।
[13] 'परा' इति नास्ति — म, आ, इ, उ, ऊ, ॠ.
[14] 'झलादि' इत्यादि 'झल्युपोत्तमस्वर एव स्यात्' इत्यन्तं नास्ति — ऊ.
[15] 'दीर्घान्ते' इति नास्ति — उ.

षट्संज्ञायामनवकाशोऽयं विभक्तिस्वर उपोत्तमस्वरस्य बाधको भवतीति 'अष्टसु' इत्यत्रोपोत्तमस्वरसिद्ध्यर्थं 'दीर्घात्' इति वक्तव्यमित्याह — **ततश्चेति**। **षट्स्वरः** उपोत्तमस्वरः। **अनेन** विभक्त्युदात्तत्वेन। भाष्ये **संनिपातेति**। [1]शिसंनिपातनिमित्तो नुम् शिलोपनिमित्तषट्संज्ञां न प्रवर्तयतीत्यर्थः। भाष्ये **नुडर्थमिति**। संज्ञाप्रयोजनकथनम्। नन्वेकशब्दस्य संख्यावाचित्वे बहुवचनं कथम्, अत आह — **संख्येति**। संज्ञायामनिष्टमाह — **षट्स्वर इति**। [2]'षट्त्रिचतुर्भ्यो हलादिः' इति [3]विभक्त्याद्युदात्तत्वम्। [4]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वमेवेष्यते। आकारप्रक्षेपस्य 'द्वाभ्याम्' इत्यत्रातिप्रसञ्जकत्वात् तदपहाय [5]दीर्घान्तस्य षट्संज्ञाया [6]अभावेऽप्यतिदेशेन कार्यसिद्धिमाह — भाष्ये **एवं तर्हीति**। भाष्ये **तद् भवतीति**। ततश्च 'अष्टानाम्' इति नुट्सिद्धिरित्यर्थः। नन्वतिदेशेन जश्शसोर्लुगपि स्यात्, अत आह — **कृतात्वेति**। विभक्तौ परत आत्वविधानात् स्थान्यभावे आदेशानुपपत्तेश्चेत्यर्थः। **न विधीयते** नातिदिश्यते। नन्वामि कथं [7]दीर्घः हल्परत्वाभावात्, अत आह — **ततश्चेति**। 'हलि' इत्युक्त्या तदनन्तरमेव निमित्तसद्भावादित्यर्थः। तर्हि [8]'जश्शसोर्हलादित्वाभावादात्वं न स्यात्, अत आह — **जश्शसोरिति**। **अष्टभ्य इति**। 'अष्टन औश्' इत्येवं ब्रूयादित्यर्थः। **औजसोरिति**। एतेन भाष्ये 'प्रियाष्टौ, [9]'प्रियाष्टौ'

---

[1] शिसंनिधाननिमित्तः — म, आ,इ, उ, ऊ, ऋ.

[2] पा. सू. ६. १. १७९.

[3] 'विभक्त्युदात्तत्वम्' इति युक्तं भाति।

[4] पा. सू. ३. १. ४.

[5] आकारान्तस्येत्यर्थः।

[6] अभावेऽप्यतिदेशे कार्यं — अ.

[7] आत्वमित्यर्थः।

[8] जश्शसोर्हलादिपरत्वाभावात् — इ, ऊ.

[9] अन्नंभट्टेन भाष्ये जस्यपि 'प्रियाष्टौ' इत्येव पाठः स्वीकृत इति भाति। अत एवोत्तरत्र "नन्वेवमपि द्विवचने वृद्धचा 'प्रियाष्टौ' इति सिद्धावपि जस्यात्वसत्त्वेऽप्यौश्त्वं न सिध्यति, तद्विधौ बहुवचनेनाष्टार्थप्राधान्य एव तद्भावात्। तथा च जसि 'प्रियाष्टाः' इति स्यात्, न तु 'प्रियाष्टौ' इति चेत्" इति पूर्वपक्षः क्रियमाणः संगच्छते। काशिकायाम् 'अष्टन आ विभक्तौ' इति सूत्रे तदन्तविधिश्चात्रेष्यत इत्युक्त्वा 'प्रिया अष्टौ येषां ते प्रियाष्टानः, प्रियाष्टौ' इत्युदाहृतम्। तदन्तविधिना प्रियाष्टन्शब्दे आत्वे सति तस्य वैकल्पिकत्वेन तदभावपक्षे प्रियाष्टान इति, आत्वपक्षे 'प्रियाष्टौ' इति च रूपमित्याशयः। तदेवान्नंभट्टेनानुसृतम्। मतान्तरमपि वक्ष्यते 'प्रियाष्टा इत्येव पाठ इत्यप्याहुः' इति। एवं चात्रत्यकाशिकानुरोधेनान्नंभट्टमते प्रियाष्टन्शब्दे जस्यात्वाभावपक्षे 'प्रियाष्टानः' इति, आत्वपक्षे औश्त्वस्याप्यङ्गीकारेण 'प्रियाष्टौ' इति च रूपद्वयमिति ज्ञायते। पक्षान्तरे (हरदत्तमते) तु 'अष्टन आ विभक्तौ' इत्येकवचननिर्देशेन (बहुवचननिर्देशाभावेन) अर्थप्राधान्यविवक्षाभावाद् गौणेऽपि प्रियाष्टन्शब्दे आत्वं प्रवर्तते, औश्त्वं तु न भवति, तद्विधौ बहुवचननिर्देशेनार्थप्राधान्य एव प्रवृत्तेः। अत एव तत्पक्षे 'प्रियाष्टाः'इति जसि रूपमिति प्रतीयते। शब्दकौस्तुभे तु ष्णान्तेति सूत्रे 'अष्टन आ विभक्तौ' इति सूत्रीयकाशिकानुवादोऽन्यथा दृश्यते। तथाहि — अत एवाष्टन आ विभक्ताविति सूत्रे 'तदन्तविधिश्चात्रेष्यते। प्रिया अष्टौ अस्य प्रियाष्टाविति यथा स्यात्' इति काशिकाग्रन्थोऽपि संगच्छते, हलादावात्वस्य निर्बाधत्वात्, इति। अत्र सुप्रत्यये हलादित्वादात्वे रुत्वविसर्गयोः कृतयोः 'प्रियाष्टाः' इत्येव रूपं भवति। कौमुद्यां च तथैवोदाहृतम्। अतोऽत्र 'प्रियाष्टा इत्यपि यथा स्यात्' इति भाव्यम्। आस्माकीनकोशालयस्थे (५ अङ्कते) शब्दकौस्तुभतालपत्रकोशे 'प्रियाष्टा इत्यपि यथा स्यात्' इत्येव पाठ उपलभ्यते। दृश्यमानकाशिकाग्रन्थे चौखाम्बामुद्रिते (१९५२)

इति पूर्वं द्विवचनान्तम्, उत्तरं बहुवचनान्तमित्युक्तम्। ननु 'प्रियाष्टानः' इत्ययुक्तम्, [1]'अष्टाभ्य औश्' इति जश्शसोरौश्विधानात्, अत आह — **यत्रेति**। **तत्रेति**। बहुवचननिर्देशादित्यर्थः। **तत्रैव** अष्टार्थस्य प्राधान्यस्थल एव। **औश्त्वेन** [2]'अष्टाभ्यः' इति विधीयमानेन। यत्रौश् [3]तत्रात्वमित्यनुमीयमानमष्टार्थप्राधान्य एव प्रवर्तते, न तु प्रियाष्टान इत्यत्रेत्यर्थः। **अत्र** प्रियाष्टान इत्यत्र। **ज्ञापकात्** [4]'अष्टाभ्यः' इति कृतात्वनिर्देशाज्ज्ञापकात्। हलीत्यनुक्तौ तु 'प्रियाष्टौ, [5]'प्रियाष्टौ' इत्यत्राप्यात्वं सिध्यतीत्याह — **विभक्तीति**। 'हलि' इत्यनुक्ताविति्यर्थः। [6]नन्वष्टन उच्यमानमात्वं प्रियाष्टनः कथं स्यात्, अत आह — **अष्टन इति**। नन्वौश्त्ववदात्वमप्यष्टार्थस्य प्राधान्य एव स्यात्, अत आह — **बहुवचनेति**। आत्वविधावित्यादिः। **अत्रापि** प्रियाष्टावित्यत्रापि। हलीत्युक्तौ ज्ञापकादात्वं वाच्यम्। तच्चाष्टार्थस्य प्राधान्य एव। तद्विहाय विभक्तिमात्रे तदुक्तावुपसर्जनत्वेऽप्यष्टार्थस्यात्वं सिध्यतीति समुदायार्थः। [7]नन्वेवं द्विवचने वृद्ध्या 'प्रियाष्टौ' इति सिद्धावपि जस्यात्वसत्त्वेऽप्यौश्त्वं न सिध्यति, तद्विधौ बहुवचनेनाष्टार्थप्राधान्य एव तद्भावात्। तथा च जसि 'प्रियाष्टाः' इति स्यात्, न तु 'प्रियाष्टौ' इति चेत्, अत्राहुः — औश्त्वानपेक्षमात्रं चेद्यत्रात्वं तत्र सर्वत्रौश्त्वेन भाव्यम्, बहुवचनं तु निर्देशमात्रार्थं, न नियामकमिति। भाष्ये 'प्रियाष्टाः'इत्येव पाठ [8]इत्यप्याहुः। **विशिष्टः प्रयोगः** 'अचकमत' इत्यत्र [9]णिङभावपक्षे [10]'कमेश्चलेश्चङ वक्तव्यः' इतिवत्। **प्रयोगनिषेधः** [11]'वचन्ति' इत्यादिवत्। एवं 'प्रियाष्टानौ, प्रियाष्टानः' इत्येव प्रयोक्तव्यमित्युक्तम्। 'प्रियाष्टौ, प्रियाष्टाः' [12]इत्यत्राव्याप्तिशङ्का न कार्येत्येवंपरतया व्याख्यानान्तरमाह — **नैव वेति**। यथाशब्दो नञर्थलक्षकः, यथा अलक्षणमिति निषेधार्थकारस्यासमस्तस्य प्रक्षेपो वाङ्गीकार्य इत्याहुः॥

[१, २६६–२६९]

(**रत्नप्रकाशः**) **उपदेश इति**। प्रातिपदिकसंज्ञाविधानकाल इत्यर्थः। एतेन 'प्रकृतिप्रत्ययविभागेन प्रतिपादनं गुणैः प्रापणमुपदेशः। तेन प्रकृतिप्रत्ययाद्युपदेशे या षकारनकारान्ता संख्या सा षट्संज्ञेत्यर्थः' इति निरस्तम्। 'शतानि, सहस्राणि' इत्यत्रापि प्रकृतिप्रत्ययादिविभागेन प्रतिपादन एव संख्यावचनस्य नकारान्तत्वेनातिप्रसङ्गस्यानिवारणात्। अज्ञातज्ञापनस्यैवोपदेश इति गम्यमानत्वेन तथैव व्याख्यातुमुचितत्वाच्च। **शताद्यष्टनोरिति**। शतादावष्टनि चेत्यर्थः। **नुम्नुडर्थमिति**। 'शताद्यष्टनोः' इत्येतत्सापेक्षत्वेऽपि नुम्नुडित्यस्य छान्दसोऽर्थशब्देन समासः। तत्र नुम्शब्दो [13]नुम्निमित्तकातिप्रसङ्गवारणस्य लक्षकः। नुट्शब्दस्तु नुडुपयोगिनोऽव्याप्तिवारणस्य। एतेन 'अर्थशब्दः प्रयोजनवाची। तत्र नुमि शतानीत्यादौ षट्संज्ञानिवृत्तिः प्रयोजनम्। नुटि तु

वाराणसीजयभारतमुद्रालय (१९६७) कृतमुद्रणे च बहुवचनान्तमेवोदाहरणं दृश्यते पूर्वोक्तरीत्या॥ प्रियाष्टा इति — म.

[1] पा. सू. ७. १. २१.

[2] पा. सू. ७. १. २१.

[3] तत्रात्वमित्यनुमानम् — ऋ.

[4] पा. सू. ७. १. २१.

[5] प्रियाष्टा इत्यत्रापि — अ, म, आ, ऋ.

[6] 'ननु' इति नास्ति — म, उ.

[7] नन्वेवमपि द्विवचने — अ, आ.

[8] इत्याहुः — म, उ.

[9] णिङभावे — म, आ, इ, उ, ऊ, ऋ.

[10] का. वा. ३. १. ४८ — १.

[11] वचन्त्यादिवत् — म, उ, ऋ.

[12] इत्यत्रातिव्याप्ति — अ, इ, ऊ.

[13] नुमनिमित्तकातिप्रसङ्ग — ब.

विधीयमाने षट्संज्ञाप्रवृत्तिः प्रयोजनम्' इति निरस्तम्। अर्थशब्दस्य प्रयोजनवाचिताया बालकेनापि ज्ञातत्वेनाव्याख्येयत्वात्। नुम्नुटोः प्रयोजनत्वाभावेन वार्तिककाराभिमततत्सामानाधिकरण्यानुपपादनात्। एकसमासरूपतया निर्दिष्टयोस्तयोः परस्परान्वयपरित्यागेनान्यथान्वयप्रदर्शनानौचित्याच्च। **आत्वे कृत इति**। 'अन्तरङ्गानपि विधीन् तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते' इति षट्संज्ञां बाधित्वेति शेषः। एतेन 'परत्वान्नित्यत्वाच्चात्वे कृते नुटोऽप्राप्तिः। कार्यकालत्वात् संज्ञायाः प्रवृत्तेर्नास्त्यन्तरङ्गत्वम्' इति निरस्तम्। 'आत्वे कृते षट्संज्ञा न प्राप्नोति' इति भाष्याननुगुणत्वात्। षट्संज्ञां विना नुटः प्रसक्तेरेवाभावेन नुटं बाधित्वा प्रवृत्तौ परत्वनित्यत्वयोर्हेतुत्वासंगतेः। कार्यकालपक्षाश्रयणमात्रेण षट्संज्ञाया अन्तरङ्गत्वनिराकरणासंभवेन तद्भाष्योपपादनासंभवात्। यथोद्देशपक्ष एव सम्यक् तद्भाष्यस्योपपन्नत्वाच्च। **उक्तं वेति**। सूत्रकारवार्तिककाराभ्यामिति शेषः। परिभाषा हि सूत्रतदवयवैर्ज्ञापिता इति सूत्रकृतैवोक्ता भवन्ति। 'अष्टनो दीर्घ' इत्यादि तु वार्तिककृतो वचनम्। **संनिपातलक्षण इति**। सर्वनामस्थानसंनिपातनिमित्तो नुम् तत्संनिपातविघातकषट्संज्ञाया निमित्तं न भवतीति भावः। षट्संज्ञायां हि सत्यां [1]'षड्भ्यो लुक्' इति लुकि तत्संनिपातो नश्यति। **अष्टनो दीर्घग्रहणमिति**। इदं वार्तिकम् [2]'अष्टनो दीर्घात्' इति सूत्रगतम्। तत्र हि दीर्घग्रहणम् 'अष्टभिः, अष्टभ्यः, अष्टसु' इत्यत्र [3]सुप आद्युदात्तनिवृत्त्यर्थं कृतम्। तत्र यद्यात्वस्य वैकल्पिकत्वं कृतात्वस्य च षट्संज्ञा न स्यात् तदा 'अष्टभिः' इत्यादिरूपमेव नास्तीति किं तेन। सतोस्तु तयोः [4]'षट्त्रिचतुर्भ्यो हलादिः' इति प्राप्त[5]विभक्त्याद्युदात्तत्वापवादे [6]'झल्युपोत्तमम्' इति विभक्त्यन्तोपोत्तमोदात्तत्वे प्राप्ते तदपवादोऽयम् [7]'अष्टनो दीर्घात्' इति शसादि-[8]'विभक्त्याद्युदात्तत्वं भवति। तथा च 'अष्टभिः' इत्यत्रातिप्रसङ्गवारणेनार्थवद्दीर्घग्रहणमिति तयोर्ज्ञापकं भवतीति भावः। ननु [9]'अष्टनो दीर्घात्' इत्यस्य शसि सावकाशत्वात् कथमुपोत्तमोदात्तापवादतेति चेन्न, तत्रैकादेशस्वरेणैवेष्टसिद्धेः। एतेन यथाश्रुतवार्तिकाक्षरानुसारेण 'तद्दीर्घग्रहणं कृतात्वस्य षट्संज्ञां ज्ञापयति' इति वदन् निरस्तः। आत्वविकल्पज्ञापनद्वारैव षट्संज्ञायास्तत्र ज्ञापनीयत्वेनात्वविकल्पज्ञापनानुक्त्या न्यूनतादोषात्। तदेवं सूत्रवार्तिककाराभिमतं युक्तियुक्तमतिव्याप्त्यव्याप्तिपरिहारमुक्त्वाव्याप्तिपरिहारमात्रमुपायान्तरैरपि कर्तुं शक्यत इत्याह — **अथवेति**। **एकास्ता इति**। व्यत्ययेन बहुवचनमिति मन्यते। **तद्योऽन्यार्थ इति**। तथा च व्यत्ययाश्रयणं विनैव बहुवचनमुपपन्नम्। संख्यावाचित्वाभावाच्च षट्संज्ञा न भविष्यतीति भावः। **द्वाभ्यामिष्टय इति**। अत्र षट्स्वरः स्यादिति भावः। एवमस्मिन् पक्षे दूषिते पक्षान्तरमाह — **एवं तर्हीति**। **षड्भ्यश्च यदुक्तमिति**। षड्भ्यो हि जश्शसोर्लुगामो नुट् चोक्तः। तत्र नुड्विधाने सावकाशमिदमौश्विधानेन निरवकाशेन बाध्यत इति जश्शसोर्न लुगिति भावः। औशश्च लुङ् न भवति, तद्विधानवैयर्थ्यापत्तेः। **उभयोः शेष इति**। अष्टनो रायश्च विभक्तौ यदात्वं तद्धलादावेवेति व्याख्यास्यते। तथा च 'अष्टानाम्' इत्यत्र नुटि सत्येवात्वमितीष्टसिद्धिरिति भावः। **प्रियाष्टौ प्रियाष्टा इति**। अजादौ कुत्राप्यात्वं न स्यादित्याशयः, न तु गौणतायामेव तन्न स्यादिति। तथा च 'अष्टानौ, अष्टनौ' इत्येव जश्शसोरौशि कृते रूपं स्यादित्यपि दोष उन्नेयः।

---

[1] पा. सू. ७. १. २२.
[2] पा. सू. ६. १. १७२.
[3] 'सुप उदात्तनिवृत्त्यर्थम्' इति युक्तं भाति, उद्द्योतदर्शनात्।
[4] पा. सू. ६. १. १७९.
[5] 'विभक्त्युदात्तत्वापवादे' इति युक्तं भाति।
[6] पा. सू. ६. १.१८०.
[7] पा. सू. ६. १. १७२.
[8] 'विभक्त्युदात्तत्वम्' इति युक्तं भाति।
[9] पा. सू. ६. १. १७२.

एतेन "जश्शसोस्तु [1]'अष्टाभ्यः' इति कृतात्वनिर्देशाज्ज्ञापकादात्वं भवति। कृतात्वस्य हि निर्देशस्य प्रयोजनं यत्रात्वं तत्रौश्त्वं यथा स्यादिति। यदि ह्येतत् कृतात्वस्य निर्देशस्य प्रयोजनं न स्यात् लाघवार्थम् 'अष्टभ्य औश्' इति ब्रूयात्" इति निरस्तम्। [2]'प्रकृतिवदनुकरणम्' इति न्यायेन [3]'अष्टन आ विभक्तौ' इति सूत्रेण [4]'अष्टाभ्य औश्' इति कृतात्वनिर्देशस्योपपन्नत्वेनानुकार्ये जश्शसोर्विषये आत्वज्ञापनासंभवात्। न च 'अष्टभ्यः' इति वक्तव्ये 'अष्टाभ्यः' इति गुरुनिर्देशोऽनुपपद्यमानस्तज्ज्ञापयिष्यतीति वाच्यम्, पर्यायशब्देषु लाघवगौरवानादरात्। अन्यथा 'औङि लोके' इत्यादौ वक्तव्ये [5]'प्रथमायाश्च द्विवचने भाषायाम्' इत्यादिगुरुनिर्देशोऽसंगतः स्यात्। नन्वेवं सति [6]'विपराभ्यां जेः' इतिवत् 'क्षेर्दीर्घात्' 'भ्वो वुग् लुङलिटोः' इत्यादौ वक्तव्ये तदपहाय कृतस्य गुरुनिर्देशस्य [7]'प्रकृतिवदनुकरणम्' इति परिभाषाज्ञापकत्वं न स्यादिति चेन्न, "यत्तदेतेभ्यः' इति [8]'कृताकृतत्यदाद्यत्वैकशेषनिर्देशेन [9]'प्रकृतिवदनुकरण च' इति व्यपदेशातिदेशस्य ज्ञापितत्वेन तस्यापि प्रयोगस्य लाघवगौरवानादरेणैवोपपन्नत्वात्। लाघवगौरवानादरेण कृतस्यैव तस्य निर्देशस्य [10]'प्रकृतिवदनुकरणम्' इत्यंशमन्तरेणानुपपद्यमानस्य तज्ज्ञापनसंभवेन गौरवस्य तज्ज्ञापनेऽप्रयोजकत्वाच्च। सिद्धान्ते तु व्याख्यानात् कृतात्वस्यानुकरणम् 'अष्टाभ्यः' इति, न तु कृतात्वकमनुकरणमित्यन्यदेतत्। तस्मादन्यस्मिन् पक्षे स्थितोऽव्याप्तिदोषो महान्। योगविभागपक्षद्वयसाधारणस्तु दोष आत्वविकल्पासिद्धिः, [11]'अष्टनो दीर्घात्' इति सूत्रे दीर्घग्रहणानर्थक्यं च। ननु तस्य दीर्घग्रहणस्यात्वविकल्पज्ञापनेनैव द्वितीयपक्ष इव तृतीयचतुर्थपक्षयोरपि सार्थक्यं भविष्यतीति नायं दोष इति चेन्न, द्वितीयपक्षे आकारान्तसंख्यायाः षट्संज्ञासत्त्वेन [12]'अष्टनः' इत्यस्य [13]'झल्युपोत्तमम्' इत्येतदपवादत्वेन 'अष्टभिः' इत्यादावतिप्रसङ्गवारकत्वसंभवेनात्वविकल्पज्ञापनेन तस्य सार्थक्येऽपि तदुत्तरपक्षयोराकारान्तस्याष्टनः षट्संज्ञाभावेन तत्र चरितार्थस्य [14]'अष्टनः' इति सूत्रस्य परेण [15]'झल्युपोत्तमम्' इत्यनेन बाधसंभवेनात्वविकल्पप्रयुक्तदोषस्य दीर्घग्रहणव्यावर्त्यस्याभावेनात्वविकल्पस्य दीर्घग्रहणज्ञाप्यत्वासंभवात्। **इति च प्राप्नोतीति**। चोऽवधारणार्थः। इष्यते हि रूपान्तरमिति शेषः। **यथालक्षणमिति**। 'हलि' इति विभज्योभयशेषतया न योज्यम्। यथालक्षणं महर्षिभिरप्रयुक्ते शब्दे साधुत्वं ज्ञेयमिति भावः। तथा च 'प्रियाष्टौ, प्रियाष्टाः' इत्यादयः 'प्रियाष्टानौ, प्रियाष्टानः' इत्यादयश्च साधव इति सिद्धम्। जश्शसोर्विषये 'अष्टौ, अष्ट' इति च सिध्यति। अप्रयुक्ते किम्, [16]'होतृपोतृनेष्टोद्गातारः' इत्यादिभाष्यकारादिप्रयुक्ते तु लक्षणमतिक्रम्यापि साधुत्वं [17]यथाभ्युपगम्यते। एतेन 'यस्य विशिष्टः प्रयोगो न स्मर्यते, नापि प्रयोगनिषेधस्मृतिः, तद्यथालक्षणमनुगन्तव्यम्। तदत्र माभूदात्वमित्यर्थः। नैव वा लक्षणमप्रयुक्ते प्रवर्तते, प्रयुक्तानामेव लक्षणेनान्वाख्यानात्' इति निरस्तम्। "यद्येवं 'प्रियाष्टौ,

---

[1] पा. सू. ७. १. २१.
[2] परिभाषा ३६.
[3] पा. सू. ७. २. ८४.
[4] पा. सू. ७. १. २१.
[5] पा. सू. ७. २. ८८.
[6] पा. सू. १. ३. १९.
[7] परिभाषा ३६.
[8] पा. सू. ५. २. ३९.
[9] कृताकृतौ त्यदाद्यत्वैकशेषौ यत्र तस्य निर्देशेनेति विग्रहः। एतच्छब्दे त्यदाद्यत्वकरणं, 'त्यदादीनां मिथः सहोक्तौ' इत्येकशेषस्याकरणं चेति भावः।
[10] परिभाषा ३६.
[11] पा. सू. ६. १. १७२.
[12] पा. सू. ६. १. १७२.
[13] पा. सू. ६. १. १८०.
[14] पा. सू. ६. १. १७२.
[15] पा. सू. ६. १. १८०.
[16] महाभाष्यम् २. १. १.
[17] 'यथा' इत्यनावश्यकं भाति।

प्रियाष्टाः' इति न सिध्यति" इति लक्ष्यदर्शिभिरेवापादितत्वेन तयोः प्रयुक्तत्वनिश्चयेन जश्शसोर्विषये प्राधान्येऽप्यष्टन आत्वाप्राप्त्या तदनुसारेणैव 'यथालक्षणम्' इति भाष्यस्य व्याख्यातुमुचितत्वात्। सर्वत्र 'यथालक्षणमप्रयुक्ते' इति भाष्यस्य [1]'सदोषकल्पनापेक्षया निर्दोषसूत्रार्थानसार्येव लक्ष्यमभ्युपगन्तव्यमित्येवंपरतयैव व्याख्येयत्वाच्च ॥

[१, २६६–२६९]

(**नारायणीयम्**) इहाविज्ञातशब्दस्वरूपज्ञापनं द्वेधा उपदेशेन वोद्देशेन वा। तत्रोपदेशो नाम विज्ञाप्यस्वरूपस्य साक्षादुच्चारणम्। उद्देशस्त्वनुमापनम्। तथा [2]'अणिञोः' इत्यत्र भाष्यम् — [3]"उपदेशे यदेजन्तं तस्य चेदात्वमिष्यते। उद्देशो रूढिशब्दानां तेन गोर्न भविष्यति ॥" इति। तत्र यथा गवादिशब्दस्य साक्षादनुच्चारणादुपदेश एजन्तत्वाभावादात्वाभावः, एवं पञ्चन्नादीनामपि साक्षादुच्चारणाभावादुपदेशे नान्तत्वं कथमित्यत आह — **प्रतिपादनमिति**। प्रतिपादनमात्रमुपदेशो न तूच्चारणमित्यर्थः। तर्ह्युद्देशसाधनमिदमुपदेशलक्षणमित्यत आह — **प्रकृतीति**। विज्ञाप्यस्वरूपस्य साक्षादुच्चारणं [4]तदवयवप्रकृत्याद्युच्चारणेन वा तदनुमापनं चोपदेश इत्यर्थः। [5]तर्ह्युभयविधप्रतिपादनभिन्नं किं प्रतिपादनम्, यस्योद्देशत्वं स्यात्, अत आह — **गुणैरिति**। समुदायस्यावयवानामनुच्चारणेऽपि तद्गुणमात्रनिर्देशेन विशिष्टधर्मिज्ञापनम् **उद्देशः**। यथा लोके व्यूढोरस्कत्वतुङ्गनासिकत्वादिगुणमात्रनिर्देशेन देवदत्तादिज्ञापनम्। शास्त्रे च [6]'आङोऽनुनासिकः' इत्यादिगुणनिर्देशेनाकारादिस्वरूपविशेषावसायः। अस्मिंश्चोपदेशलक्षणे गवादेर्धात्वनुवृत्त्या[7] आत्वाभावः। अस्त्वित्थमुपदेशलक्षणम्, प्रस्तुते तु किमायातम्, अत आह — **तेनेति**। [8]**प्रकृतिप्रत्ययोपदेश इति**। प्रकृतिप्रत्ययोपदेशेन समुदाये ज्ञाप्यमान इत्यर्थः। [9]'पञ्चिक्त' आदिसूत्रेण शतप्रातिपदिकस्वरूपज्ञापनवेलायां तु न तस्य नान्तत्वम्। अष्टन्शब्दस्य तु प्रातिपदिकस्वरूपज्ञापनकाले नान्तत्वादात्वानन्तरमपि संज्ञा भवति। शतादौ नुमर्थमष्टन्शब्दे नुडर्थमुपदेशग्रहणमित्युच्यते। तदयुक्तम्, शतादीनां नुम इहत्योपदेशग्रहणसाध्यत्वाभावादित्याशङ्क्य नुम्नुटावर्थः प्रयोजनमस्येति नेत्थं समासः, किं तु नुम्नुटोरर्थः प्रयोजनमस्येति। तथा चायमर्थ इत्याह — **तत्रेति**। आत्वात् पूर्वं नुड् भवत्वित्यत आह — [10]**अत्रेति**। नन्विहानुद्दिश्य कार्यविशेषं प्रागेव प्रवृत्ता संज्ञा। सा च कृतेऽप्यात्वे न निवर्तिष्यत इत्यत आह — **कार्येति**। दीर्घग्रहणव्यावर्त्यं तत्रत्यं दर्शयन् तस्य कृतात्वसंज्ञाभावेऽन्यथासिद्धिं पक्षान्तरे चानन्यथासिद्धिं ज्ञापकतोपपत्तये दर्शयति — **तत्रेत्यादिना**। यदा कृतात्वे नास्ति संज्ञा तदा [11]'अष्टनः' इति विभक्तिस्वरस्य दीर्घान्तोऽवकाशः, तत्र षट्स्वराप्तेः। षट्स्वरस्याप्यन्ये [12]षट्संज्ञाः। 'अष्टसु' इत्यत्रोभयप्रसङ्गे परत्वात् षट्स्वरो भविष्यतीति किं दीर्घग्रहणेन। कृतं तु तत् कृतात्वेऽपि संज्ञां ज्ञापयति। सत्यां हि तत्र संज्ञायां न विभक्ति-

---

[1] सदोषत्वकल्पनापेक्षयेत्यर्थः।

[2] पा. सू. ४. १. ७८.

[3] महाभाष्यम् ४. १. ७८.

[4] तदवयवे प्रकृत्यादि — क.

[5] तर्ह्युभयपदप्रतिपादन — क.

[6] पा. सू. ६. १. १२६.

[7] धातुशब्दानुवृत्त्येत्यर्थः।

[8] प्रदीपे 'प्रकृतिप्रत्ययाद्युपदेशे' इत्यत्रादिग्रहणरहितः पाठ इति भाति।

[9] पा. सू. ५. १. ५९.

[10] प्रदीपे 'परत्वान्नित्यत्वाच्च' इत्यत्र 'अत्र परत्वान्नित्यत्वाच्च' इति पाठोऽभिमत इति भाति।

[11] पा. सू. ६. १. १७२.

[12] षट्संज्ञका इत्यर्थः।

स्वरस्य षट्स्वरानवष्टब्धो विषयः संभवतीत्यपवादत्वात् 'अष्टसु' इत्यत्र स एव प्राप्त इति तन्निवारणाय कर्तव्यं दीर्घग्रहणम्। ननु बहुवचनात् संख्यावचनत्वानिश्चयात् कथं चोद्यम्, अत आह — **संख्येति**। तर्ह्यन्यवाचित्वे प्रमाणाभावात् कथमुत्तरमित्याशङ्क्यान्यार्थस्यैव [1]'वाक्यार्थान्वययोग्यत्वं प्रमाणमित्यभिप्रेत्याह — **अन्येति**। संज्ञायां सत्यामनिष्टमाह — **षडिति**। **कृतात्वेति**। यद्यपि नान्तानुकरणे लक्षणादात्वकरणेऽपि निर्देशोपपत्तिः, तथापि तत्र षड्वदतिदेशफलाभावात् कृतात्वानुकरणमेवेति भावः। नुड्वल्लुकोऽप्यतिदेशः कस्मान्नेत्यत आह — **औशिति**। हलि विधानादात्वमेव किं नेत्याशङ्क्याह — **ततश्चेति**। अस्यात्वं न नुटः प्रागित्यभिमतसिद्धिः। जश्शसोरात्वं हल्परत्वाभावान्न स्यादित्यत आह — **जश्शसोरिति**। ननु नान्तानुकरणे [2]लाक्षणिकत्वेनापि निर्देशसंभवात् कथं ज्ञापकमित्यत आह — [3]**कृतात्वेति**। आत्वस्य विकल्पितत्वाल्लाघवात् 'अष्टभ्यः' इति वाच्ये गुरुनिर्देशात् कृतात्वानुकरणावसायः। तदनुकरणस्य चेदमेव फलं यदा आत्वं तदौश्त्वं यथा स्यादिति। आत्वप्राप्तिनिमित्तमेवंशब्दपरामृष्टं दर्शयति — **हलादाविति**। ननु जस्यात्वस्य ज्ञापकादुक्तत्वात् कथं तत्राप्राप्तिचोद्यम्, अत आह — **यत्रेति**। बहुवचननिर्देशादष्टार्थप्रधाने औश्त्वम्। ननु विभक्तिमात्र आत्वविधानेऽप्यष्टार्थसंबन्धिन्यां विभक्तौ विधीयमानस्य तस्य कथमष्टार्थगुणभावे प्राप्तिः, तत्राह — **विभक्तीति**। विभक्तेरङ्गसंबन्धित्वमपेक्षितं नाष्टार्थसंबन्धित्वमिति भावः। ननु श्रुतत्वादष्टसंबन्धित्वं विभक्तेरवसीयते नाङ्गसंबन्धित्वमित्यत्राह — **अष्टन इति**। श्रुतस्याप्यङ्गविशेषणत्वात् प्रधानसंबन्धितावसायो विभक्तेरित्यर्थः। औश्त्वविध्युक्तयत्नाभावमाह — **बह्विति**। तदर्थसत्त्वात् तत्प्रयोगः कुतो नेत्यत्राह — **यस्येति**। वाक्येन वा 'अष्टप्रियौ' इत्यादिना वा तदर्थाभिधानमित्यस्याप्रयोग इत्यर्थः। [4]'तस्याप्रयुक्तस्याननुशासनीयत्वे वाच्ये यथालक्षणोक्तिः कथमित्यत आह — **नापीति**। प्रयुक्ततया वानिश्चितस्य[5] संभावितप्रयोगस्य यथालक्षणमनुशासनमित्यर्थः। 'अप्रयुक्ते' इत्यस्य स्वारस्यहानेरस्मिन् व्याख्याने 'यथालक्षणम्' इत्यस्य किंचित्स्वारस्यहानिमादाय व्याख्यानान्तरमाह — **नवेति**॥

डति च १. १. २५.

[१, २६९]

(**विवरणम्**) 'ष्णान्ता च षट्' इति सूत्रं कर्तव्यम्। तथा च चकारात् संज्ञचन्तरसमुच्चयार्थाद्यत्नात् स्वरितलिङ्गासङ्गादनुवर्तमानं डतिग्रहणमिह संभन्त्स्यत इत्यभिप्रेत्य भाष्यकृता [6]'यदि तावत्' इत्याद्युक्तम्। ननु षट्संज्ञायां डतिग्रहणाकरणे संख्याग्रहणानुवृत्त्या [7]'संख्याप्रश्नविषयो यो डतिरित्येवं विशेषयितुमशक्यत्वात् पातेर्डतेरपि षट्संज्ञा स्यादित्यत आह — [8]**'तत्र चेति**। यादृशस्य संख्यासंज्ञायां ग्रहणं तादृशस्यैवोत्तरत्रानुवृत्तेर्न षट्संज्ञायामप्यतिप्रसङ्ग इति भावः। पूर्ववच्चकाराद्यत्नात् संख्याग्रहणं 'डति च' इत्यत्रानुवर्तमानं संज्ञार्थं विज्ञायते। षट्संज्ञानन्तरं 'डति च' इति

---

[1] वाक्यार्थानन्वय — क.

[2] लक्षणवशसंपन्नत्वेनापीत्यर्थः।

[3] प्रदीपे 'कृतात्वस्य हि निर्देशस्य' इत्यत्र 'कृतात्वनिर्देशस्य हि' इति पाठोऽभिमत इति भाति।

[4] तस्य प्रयुक्तस्याननु — क.

[5] अनिश्चितस्येति छेदः।

[6] यदीत्युक्तम् — ञ.

[7] संख्याविषयः — च, छ.

[8] प्रदीपे 'तत्र वतुसाहचर्यात्' इत्यत्र 'तत्र च वतुसाहचर्यात्' इति पाठो विवरणकृदभिमतः।

करणाच्च षट्संज्ञापि प्रवर्तत इत्यभिप्रेत्य 'अथ' इत्यादि भाष्यम्। तत्रातिप्रसङ्गं वारयति — तत्रेति। संख्यासंज्ञायां यः संज्ञी स एव षट्संज्ञायामपीति नातिप्रसङ्ग इति भावः॥

[१, २६९]

(**उद्द्योतनम्**) स्वरितत्वात् "डति' इत्येवानुवर्तते, न बह्वादय इत्याशयेनाह — भाष्ये **डतीत्यनुवर्तिष्यत इति**। 'ष्णान्ता च षट्' इति सूत्रं कर्तव्यम्। तथा च संज्ञयन्तरसमुच्चयार्थाच्चकारात् स्वरितत्वेन च डतीत्यस्यानुवृत्तिर्भाष्याभिप्रेतेति [२]केचित्। [३]चकारप्रक्षेपं विनापि स्वरितत्वप्रतिज्ञामात्रेणानुवृत्तिसंभवाच्चकारानुपयोग [४]इति चिन्त्यम्। अतिप्रसङ्गं निराह — **तत्रेति**। संख्यासूत्र इत्यर्थः। **तद्धितः** [५]"किमः संख्यापरिमाणे डति च' इति विहितः। यादृशस्य [६]संख्यासंज्ञायां ग्रहणं तादृशस्यैवानुवृत्तिरिति नातिप्रसङ्ग इति भावः। [भाष्ये **डति चेत्यत्रेति**।] स्वरितत्वात् 'डति च' इत्यत्र [७]संख्या संज्ञापरानुवर्तते। तथा च डत्यन्तस्य षट्संज्ञा संख्यासंज्ञा च विधीयते। न च [८]"ष्णान्ता' इत्यत्र संज्ञिपरत्वेनान्वितस्य संख्याशब्दस्य कथमग्रे संज्ञापरत्वमिति वाच्यम्, सर्वत्र शब्दान्तरस्यानुमानाङ्गीकारेण पूर्वत्र संज्ञिपरस्योत्तरत्र संज्ञापरस्य चानुमान[९]संभवादिति भावः। अत्र वतुसाहचर्याभावादतिप्रसङ्गः, अत आह — **तत्रेति**। **तस्याः** संख्यासंज्ञायाः। **गृह्यते** षट्संज्ञायां संख्यासंज्ञायां च। संख्यासंज्ञाविषयस्यैव षट्संज्ञाविषयत्वात्। **औणादिकः** पातेर्डतिः॥

[१, २६९]

(**रत्नप्रकाशः**) **डतीत्यनुवर्तिष्यत इति**। तथा च षान्ता नान्ता डत्यन्ता च संख्या षट्संज्ञेत्यर्थलाभ इति भावः। **संख्यासंज्ञाप्यनुवर्तिष्यत इति**। तथा च डत्यन्तः संख्यासंज्ञः षट्संज्ञकश्चेति व्याख्यास्यत इति भावः। उभयथापि डत्यन्तस्य पतिशब्दस्य [१०]ग्रहणं न भवति। संख्यानबलेन सूत्रप्रत्याख्यानानौचित्यात्॥

[१, २६९]

(**नारायणीयम्**) ननु 'डति च' इत्यारम्भे संख्याग्रहणस्यानुवृत्तेर्यस्य संख्यात्वं तस्य षट्संज्ञेति लभ्यते, संख्यासंज्ञा च तद्धितसाहचर्यात् तद्धितस्यैवेति कृतः षट्संज्ञाभावः। यदा तु [११]'ष्णान्ता' इत्यत्र डतिग्रहणानुवृत्त्या तस्य षट्संज्ञाविधानं तदा डतिमात्रस्य षट्संज्ञा स्यात्, संख्याग्रहणस्य तत्रानुवर्तमानस्य 'ष्णान्ता' इत्यनेन संबन्धात् डतिना संबन्धायोगात्, अत आह — **तत्रेति**। यस्य

---

[१] डतिरेवानुवर्तते — म, उ.
[२] विवरणकारा इत्यर्थः।
[३] तत्खण्डयति — चकारेत्यादिना।
[४] इति तच्चिन्त्यम् — म, उ.
[५] पा. सू. ५. २. ४१.
[६] 'संख्या' इति नास्ति — म, आ, उ.
[७] संख्याशब्द इत्यर्थः।
[८] पा. सू. १. १. २४.
[९] संभवात् प्रसङ्ग इति भावः — अ, आ.
[१०] 'ग्रहणं न भवति' इत्यस्यानन्तरं कियांश्चिद् ग्रन्थस्त्रुटित इति भाति।
[११] पा. सू. १. १. २४.

संख्यासंज्ञायां ग्रहणं तस्यैवानन्तरवाक्ये स्मृतिः, न डतिमात्रस्येत्यर्थः। नन्विह वतुसाहचर्यादि[1]व्यवस्थापकाभावात् डतिमात्रस्य संज्ञाद्वयं स्यात्, अत आह — **तत्र संख्येति** ॥

क्तक्तवतू निष्ठा. १. १. २६.

[१, २७०–२७२]

(**लघुविवरणम्**) सानुबन्धस्य क्तशब्दस्य विधीयमाना निष्ठासंज्ञा औणादिकस्यापि[2] प्राप्नोतीति कथं चोद्यत इत्याशङ्क्य पूर्वपक्षिणोऽभिप्रायमाह — **इहेति**। नियतं संनिधानं येषामिति बहुव्रीहिः। **वीप्सादीति**। पदार्थधर्मो वीप्सादिरिति भावः। **बाहुलकादिति**। [3]'उणादयो बहुलम्' इति बहुलग्रहणादनुबन्धोपलक्षितस्य कार्यं निष्ठासंज्ञा न भवतीत्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते
भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

[१, २७०–२७२]

(**विवरणम्**) ककारोऽनुबन्धत्वान्न विशेषणम् किं तूपलक्षणम्, तशब्दमात्रं चोपलक्ष्यमिति मन्वानः प्रतिषेधं कर्तव्यत्वेन पूर्वपक्षी वदतीत्याह — **इहेति**। नियतं संनिधानं येषामिति बहुव्रीहिः। अर्थानेव दर्शयति — [4]**कारककालादय इति**। न तशब्दमात्रं लक्ष्यम्, किं त्वर्थविशेषाद्यवच्छिन्नमिति भावः। **तन्प्रत्ययान्तः** ककारानुबन्धानुपलक्षितः प्रयुक्त इति मन्यत [5]इत्यनुषङ्गाध्याहाराभ्यां पूरणीयम्। यद्यपि **विपर्यासो** विपर्ययो निश्चयरूपः; तथाप्ययथार्थत्वसामान्यादिह संशयोऽभिप्रेत इत्याह — **संशय इत्यर्थ इति**। **वीप्सेति**। संदेहस्याभिनयादिति भावः। 'प्राकीर्ष्ट' इत्युपलक्षणम्, 'यन्मा प्रकीर्ष्ट' इत्युदाहरणम्। अत्र हि [6]"निपातैर्यद्यदि' इति निषिद्धे निघाते [7]"निष्ठा च द्व्यजनात्' इति नित्यमाद्युदात्तत्वं स्यात्। "आदिः सिचोऽन्यतरस्याम्' इति विकल्पस्त्विष्यत इति भाष्ये द्रष्टव्यम्। **न निष्ठान्तस्येति**। न क्तान्तस्येत्यर्थः। **अञ्जिघृषीति**। यद्यपि संज्ञायामुणादीनां विधानान्न कर्त्राद्यवगतिः, तथापि गुणादर्शनात् क्तोऽयमित्यवगच्छतीति भावः। व्युत्पत्तिपक्षेऽप्याह — **बाहुलकाद्वेति**। [9]"उणादयो बहुलम्' इति बहुलशब्दप्रवृत्तिनिमित्ताद्द्रव्यार्थादानादित्यर्थः ॥

इति भाष्यप्रदीपविवरणे [10]प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

---

[1] व्यवस्थाज्ञापकाभावात् — क.
[2] अपिशब्दो नास्ति — ड, ढ.
[3] पा. सू. ३. ३. १.
[4] कारकादय इति — च, छ, ज, ट.
[5] प्रदीपे 'तन्प्रत्ययान्तः प्रयुक्त इति मन्यते' इत्यत्र 'मन्यते' इति विवरणकृत्पाठे नास्तीति ज्ञायते, अनुषङ्गकथनात्।
[6] पा. सू. ८. १. ३०.
[7] पा. सू. ६. १. २०५.
[8] पा. सू. ६. १. १८३.
[9] पा. सू. ३. ३. १.
[10] 'प्रथमस्य' इत्यादि 'पादे' इत्यन्तं नास्ति — च, छ, ज.

[१, २७०–२७२]

(**उद्द्योतनम्**) ककारस्यानुबन्धतया विशेषणत्वाभावेनोपलक्षणत्वात् तशब्दमात्रमुपलक्ष्यमिति मत्वा 'समानशब्दप्रतिषेधः कर्तव्यः' इत्युच्यत इत्याह — **इहेति** । **अनुबन्धकार्यं** गुणनिषेधादि । नियतं संनिधानं येषामर्थानाम् । तानेव दर्शयति — **कारकेति** । तशब्दमात्रं नोपलक्ष्यम्, किं त्वर्थ-विशेषावच्छिन्नमिति[1] नातिप्रसङ्ग इति भावः । साधुत्व[2]ज्ञानप्रकारमेवाह — **यदेति** । कर्मभूत-कालयोरवगमादित्यर्थः । यद्यपि विपर्यासशब्दो निश्चयरूप[3]विपर्ययवाची, तथाप्ययथार्थत्वाविशेषात् संशयोऽत्राभिप्रेत इत्याह — **संशय इति** । **अनवस्थितत्वं** संदेहात्मकत्वम् । **वीप्सादीति** । आदि-नाभीक्ष्ण्यग्रहः, संदेहाभिनयत्वादिति भावः । [4]'प्राकार्ष्ट' इत्यत्रोपलक्ष्यतावच्छेदकं संभवतीत्याह — **अत्र भूतकाल इति** । 'प्राकार्ष्ट' इति [5]लुङि परस्मैपदमध्यमपुरुषबहुवचनम् । इदमुपलक्षणम्, 'यन्मा प्रकार्ष्ट' इत्युदाहरणम् । अत्र [6]'निपातैर्यद्यदि' इत्यादिना [7]'तिङ्ङतिङः' इति प्राप्तानुदात्त-त्वनिषेधे [8]'निष्ठा च द्व्यजनात्' इति नित्यमाद्युदात्तत्वं स्यात् । [9]'आदिः सिचोऽन्यतरस्याम्' इति विकल्प एवेष्यत इति [10]केचित् । [11]अत्र [12]'निष्ठा च द्व्यजनात्' इत्यत्र [13]'संज्ञायाम्' इत्यनुवृत्तेर्नात्र [14]तेनाद्युदात्तत्वप्राप्तिरिति चिन्त्यम् । सिचोऽदर्शनादानुपूर्व्यभावाच्चाह — **प्रकार इति** । लुङ्त्व-ज्ञापकोपलक्षणमेतदित्यर्थः । ज्ञापकमेवाह — **तत्रेति** । **कर्त्रैकत्वेति** । 'अभित्त' इत्यत्र कर्ता तदेकत्वं च प्रतीयते । निष्ठा चेत् कर्मणि स्यात् । [15]प्रथमैकवचनाभावेनैकत्वप्रतीतिरपि न स्यादित्याख्याता-न्तत्वं तावन्निश्चीयते । आदिशब्दग्राह्यभूतानद्यतनत्वज्ञानाल्लुङ्त्वनिश्चय इत्यर्थः । भिदेर्लुङ्यात्मने-पदे [16]ते परे [17]'झलो झलि' इति सिज्लोपः । **न निष्ठान्तस्य** न[18] क्तान्तस्य । **अञ्जीति** । यद्य-प्युणादीनां संज्ञायां विधानान्न कर्माद्यवगतिः, तथापि गुणाद्यदर्शनात् क्तोऽयमिति निश्चयः स्या-दित्यर्थः । **अव्युत्पन्नत्वादिति** । स्वरार्थं प्रकृतिप्रत्ययविभागः कल्पितः, न तु प्रत्ययस्यार्थोऽस्ति । तथा चार्थवत एव क्तस्य ग्रहणमिति भावः । व्युत्पत्तिपक्षेऽप्याह — **बाहुलकाद्वेति** । [19]'उणादयो बहुलम्' इत्यत्र बहुलशब्दस्यार्थपरत्वात् सर्वप्रत्ययानामर्थवत्त्वे प्रमाणाभावादौणादिकः क्तो नार्थ-वानिति भावः । तस्य संज्ञाङ्गीकारेऽनिष्टमाह — **अन्यथेति** । **निष्ठेति** । [20]निष्ठान्तं द्व्यच्कमा-द्युदात्तं स्यात् संज्ञायाम्, न चेदादिराकारः । [21]उक्तः, [22]गुप्तः ॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

---

[1] इतिशब्दो नास्ति — अ .
[2] ज्ञापनप्रयोजनमेवाह — ऋ .
[3] विपर्यासवाची — अ.
[4] भाष्ये 'प्राकीर्ष्ट ' इत्यत्र 'प्राकार्ष्ट' इत्यन्नं-भट्टपाठः ।
[5] कृञ्धातोरित्यादिः ।
[6] पा. सू. ८. १. ३०.
[7] पा. सू. ८. १. २८.
[8] पा. सू. ६. १. २०५.
[9] पा. सू. ६. १. १८७.
[10] विवरणकारा इत्यर्थः ।
[11] तत्खण्डयति–अत्रेत्यादिना । 'अत्र' इत्यधिकम् ।
[12] पा. सू. ६. १. २०५.
[13] पा. सू. ६. १. २०४.
[14] तेनाद्युदात्तप्राप्तिरिति — म, उ.
[15] तत्प्रथमैक — उ.
[16] 'ते' इति नास्ति — म.
[17] पा. सू. ८. २. २६.
[18] 'न क्तान्तस्य' इति नास्ति — ऋ.
[19] पा. सू. ३. ३. १.
[20] निष्ठान्तं यद् द्व्यच्कं — अ, आ; निष्ठान्त-द्व्यच्कं — म, उ.
[21] 'निष्ठा च' इति सूत्रोदाहरणप्रदर्शनमिदम् ।
[22] 'गुप्तः' इति नास्ति — म, उ.

[१, २७०–२७२]

(**रत्नप्रकाशः**) **समानशब्दप्रतिषेध इति** । अर्थनैरपेक्ष्येणैव व्याकरणेन शब्दाः संस्क्रियन्ते, अर्थनिर्णयस्त्वर्थशास्त्रेणेति[1] मन्यते । **अनर्थकः प्रतिषेध इति** । अर्थविशेषाश्रयेणैवात्र शब्दसंस्कारः क्रियते । व्याकरणेनैव च प्रायेणार्थनिर्णयः । क्वचित् प्रकरणादिकमर्थविशेषनिर्णायकम् । तथा च 'लोतः, गर्तः' इत्यादौ तन्प्रत्यय एव । 'लूनः' इत्यादौ तु क्तप्रत्यय एवेति वैयाकरणैरवधारयितुं शक्यत इति भावः । इतरस्तदाशयानभिज्ञोऽनुबन्धमात्रमेव भेदकमुक्तमिति मन्यमान आह — **अनुबन्धोऽन्यत्वकर इति चेदिति** । **नष्टं तद् गृहमिति** । विद्यमानमपि निश्चयाविषयो भवतीति भावः । **यद्यपि लुप्यत इति** । अनुबन्ध इति शेषः । **यद्यपि नष्टमिति** । काकविशिष्टत्वेन यद्यपि प्रतीतिविषयो न भवतीत्यर्थः । **अन्तत इति** । तथापीत्यर्थः । **तमुद्देशमिति** । उद्देशशब्दः कर्मघञन्तः [2]'घञबन्तः पुंसि' इति नियतपुँल्लिङ्गः । तत्सामानाधिकरण्यात् 'तम्' इति पुँल्लिङ्गनिर्देशः । 'अदो यत्रासौ काकः' इत्येवमुपदिष्टं तद् गृहमित्यर्थः । इतरस्तदाशयमबुद्ध्वा गृहत्वेन तशब्दत्वेन च ज्ञानं भवतीत्युपपादितमिति विपरीतं बुद्ध्वाह — **सिद्धविपर्यासश्चेति** । **विपर्यासः** संदेहः । तेन सह सिद्धशब्दस्य बहुव्रीहिः । तयोर्बहुव्रीह्यवयवयोः सामानाधिकरण्यमात्रं दर्शयति — **सिद्धश्च विपर्यास इति** । बहुव्रीह्यर्थमपि दर्शयति — **संदेहस्तस्य भवतीति** । संदेहस्वरूपमाह — **अयं स तशब्द इति** । तथा च समानशब्दप्रतिषेधः कर्तव्य एवेति मन्यते । दार्ष्टान्तिके उक्तमर्थं दृष्टान्तेऽपि दर्शयति — **तद्यथेति** । **इदं तद् गृहमिति** । संशयोल्लेखोऽनेन क्रियत इति द्विर्वचनविषयत्वाभावेऽपि द्विःप्रयोग उपपन्नो भवति । इदानीं सिद्धान्ती स्वाशयमाविष्करोति — **एवं तर्हीति** । कारकविशेषात् [3]कालविशेषाच्चायमेव क्तप्रत्यय इत्यवधारणं सिद्धमित्यर्थः । कारकशब्दो क्तार्थपरः, तेन भावस्य नपुंसकस्य च संग्रहः । **उपादेयाविति** । अनुबन्धवन्न परित्याज्याविति भावः । निर्णयप्रकारमाह — **भूत इति** । वर्तमानोपलक्षणमिदम् । भूते वर्तमाने कर्मणि कर्तरि भावे च यस्तः स एव 'क्तः' इति निर्णीयत इति भावः । तत्र 'भावे' इति नपुंसकोपलक्षणम् । **प्राकीर्ष्टेति** । भूतेऽयं तशब्द इति संदेहः स्यादेवेति मन्यते । [4]**दृश्यन्ते तत्रापि सिजादय इति** । वैयाकरणैस्ते तत्रापि ज्ञायन्त इति भावः । इतरः पण्डितंमन्य उपहसति — **किमिति** । 'अत्र सिजादयो वर्तन्ते, अत्र न वर्तन्ते' इति वक्तव्यं किमिति भावः । [5]**अत्र सिजादयो नेतीति** । एतस्मात् पूर्वम् 'अत्र सिजादयो वर्तन्ते' इत्यूहनीयम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्र-
सरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

---

[1] अर्थनिर्णायकप्रकरणादिकं विवक्षितं स्यादिति भाति ।

[2] लिङ्गानुशासनसूत्रम् ३६. 'पुंसि' इति त्वधिकारभूतस्य पुमानित्यस्यार्थानुवादः ।

[3] 'कालविशेषात्' इति नास्ति — ब.

[4] भाष्ये 'दृश्यन्तेऽत्रापि' इत्यत्र 'दृश्यन्ते तत्रापि' इति पाठः स्वीकृतः ।

[5] भाष्ये 'यत्र सिजादयो न' इत्यत्र 'अत्र सिजादयो न' इति पाठोऽभिसंहित इति ज्ञायते ।

[१, २७०–२७२]

(**नारायणीयम्**) उपदेशावस्थायां सारूप्याभावात् प्रयोगे सारूप्येऽप्यनुबन्धनिमित्तकार्यादृष्टेः सानुबन्धकताबुद्ध्यभावात् कथं लोतादिषु चोद्यम्, अत आह — **इहेति**। कार्यार्थी संज्ञा प्रयोगे प्रवर्तते। तत्र च सारूप्यम्। न च गुणादिदर्शनादननुबन्धकत्वनिश्चयः, गुणाद्यनुपपत्तेरपि पूर्ववादिना चोद्यमानत्वादित्यर्थः। 'कारककालविशेषात् सिद्धम्' इति वार्तिके निष्ठासंज्ञायां कारकादिविशेषणं देयमिति विभ्रमं निरसितुं सिद्धान्ततात्पर्यमाह — **सिद्धान्तेति**। ननु भवत्वनुबन्धादर्थविशेषलक्षणम्, तस्य त्वर्थविशेषस्य निष्ठासंज्ञागुणनिषेधकार्यानिमित्तत्वात्तल्लक्षणमपि विफलमित्यत आह — **तद्दर्शनादिति**। यद्यपि कार्यविशेषाणां साधुत्वज्ञप्तौ नार्थविशेषः कारणम्, अपि त्वनुबन्धः, तथापि कार्यसाधुत्वज्ञप्तिनिमित्तानुबन्धस्मृत्यङ्गत्वात् कारकादिलक्षणा फलवतीत्यर्थः। उक्तं प्रपञ्चयति — **तत्रेति**। विपर्यासशब्दस्य विपरीतनिश्चये रूढत्वादाह — **संशय इति**। अयथार्थज्ञानमात्रमिहोच्यत इत्यर्थः। संदेहद्योतनस्य [1]पौनरुक्त्यसिद्धत्वाद्वाशब्दो न प्रयुक्त इत्यभिसंधायाह — **बुद्धेरिति**। ननु पुनरुक्तेर्वीप्सादिद्योतकत्वात् कथं संदेहद्योतकत्वम्, अत आह — **न त्विति**। ननु वाक्यद्विर्वचनाभावात् कथं तच्छङ्का। एवं तर्हि वीप्साद्यभावाद् द्विरुक्तिशङ्कानिरासान्नैतदुक्तम्। क्तप्रत्ययस्य [2]'तयोरेव' इति स्मृतेर्भावकर्म[3]बोधकत्वादिहानाद्यर्थधातुपरस्य तस्य कर्तृपरत्वानुपपत्तेः क्तोपलक्ष्यकारकाभावात् कथं क्तत्वाशङ्का, अत आह — **अत्रेति**। काकोपलक्षितवस्तुष्वेकतरदर्शनादपि देवदत्तगृहनिश्चय इतीहाप्यनुबन्धोपलक्षितकालाकलनात् क्तत्वाशङ्केति भावः। 'सिजादि' इत्यादिशब्देन लुङ्विकरणानां क्सादीनामेव ग्रहणं न भवतीत्याह — **सिजिति**। निष्ठासंभावितधर्मश्च सिच्प्रकारः। अयमाशयः — काकोपलक्ष्यवेदिकादेश्चैत्रादिगृहसाधारण्यान्न तन्मात्रं देवदत्तगृहज्ञापकम्, किं तु चैत्रादिवेदिकाव्यावृत्तचित्रादियुक्ततया। ततश्चात्रापि सिजादिरहितभूतकालस्य क्तत्वज्ञापकत्वम्। न तु भूतमात्रस्य, क्तेतरसाधारण्यादिति। भाष्ये **किं वक्तव्यमिति**। सिजादिदर्शने भूतकालदर्शनेऽपि क्तत्वं नेति किं वचनेन प्रतिपाद्यमित्यक्षरार्थः। चोद्यपरिहारयोरभिप्रायस्तु मदुक्तालोचनात् सुगमः। **बाहुलकाद्वेति**। [4]'उणादयो बहुलम्' इति बहुलग्रहणात् क्वचिदन्यदेवेति न्यायान्निष्ठासंज्ञा न भवति। तदुक्तम् [5]'कार्यसशेषविधेश्च तदुक्तम्' इति॥

इति महामहोपाध्यायधर्मराजयज्वशिष्यशास्त्रिनारायणकृतौ
कैयटीयटीकायां प्रथमस्याध्यायस्य प्रथमे पादे
पञ्चममाह्निकम्॥

---

[1] पौनरुक्त्यासिद्धत्वात् — क.
[2] पा. सू. ३. ४. ७०.
[3] बोधकत्वादिहाद्यर्थ — क.
[4] पा. सू. ३. ३. १.
[5] महाभाष्यम् ३. ३. १.

प्रथमाध्यायस्य प्रथमे पादे षष्ठमाह्निकम्

सर्वादीनि सर्वनामानि १. १. २७.

[१, २७३–२७४]

(**लघुविवरणम्**) नियतपुँल्लिङ्गस्यादिशब्दस्य बहुवचनान्तस्य नपुंसकस्य निर्देशो बहुव्रीहिं विना नोपपद्यत इति बहुव्रीहित्वनिश्चय इत्यभिप्रेत्याह — **नन्विति** । **यथेति** । कतस्यान्तः कतन्तः, कतोऽन्तो येषां ते कतन्ता इति बहुव्रीहितत्पुरुषयोरेकशेषः । कण्वादिभ्य इत्यत्र तु कण्वश्चासावादिश्चेति कण्वादिः, कण्व आदिर्येषां ते कण्वादय इति बहुव्रीहितत्पुरुषयोः कृतयोरेकशेष इति बोध्यम् । **प्रयोजनान्तरमिति** । सारूप्यसंपादनादन्यत् । तत्पुरुषस्य [1]'समासस्य' इति पूर्वशास्त्रेण स्वरः, बहुव्रीहेस्तूत्तरशास्त्रेण [2]'बहुव्रीहौ' इत्यनेनेति तस्यैव शेषः । **वक्ष्यमाणेनेति** । तद्गुणसंविज्ञानेन । ननु विग्रहे पृष्टे तत्प्रदर्शनानन्तरं 'तानि' इत्येतन्मुधेत्यत आह — **तानीति** । किमित्यत आह — **यदेति** । तानीत्यनेनैवान्यपदार्थस्य प्राधान्यं प्रदर्शितमिति 'इमानि' इत्येतद्वचर्थमित्यत आह — **सर्वनामद्वयेति** । प्रत्यक्षविषयेणेदंशब्देन गणपठितानां परामर्शात् तत्र च सर्वशब्दस्यान्तर्भावात् तस्यापि सर्वनामसंज्ञेति प्रतिपाद्यत इति भावः । भाष्येऽगृहीताभिप्रायस्य 'यद्येवम्' इति चोद्यमिति द्रष्टव्यम् । चित्रगुरित्यादौ तद्गुणसंविज्ञानं किं न स्यादित्यत आह — **तत्रेति** । अयं भावः — षष्ठ्यर्थो हि विशेषणम् । तस्य स्वस्वामिभावादिरूपत्वे स्वाद्यानयनाभावेऽपि न तस्य प्रच्यतिरस्तीति तद्विशेषितानयनं भवतीत्युपलक्षणस्य [3]क्रियासंबन्धो न भवतीति, संयोगादिरूपत्वे [4]तूपलक्षणस्यानयनाद्यभावे तत्स्वरूपं नष्टं भवतीति संबन्धविशिष्टस्यानयनं कृतं न स्यादिति सामर्थ्यादुपलक्षणस्यापि क्रियान्वय इति । **इहापीति** । सामीप्याद्यर्थे बहुव्रीह्यभावादिति भावः । बहुवचनस्योपपत्तिमाह — **उद्भूतेति** ॥

[१, २७३–२७४]

(**विवरणम्**) नियतपुँल्लिङ्गस्यादिशब्दस्य समासान्तरे नपुंसकबहुवचननिर्देशस्यानुपपत्तेर्बहुव्रीहौ च तस्योपपत्तेर्बहुव्रीहित्वनिश्चयात् संशयानुपपत्तिरिति चोदयति – **नन्विति** । परिहरति — **एवमिति** । बहुव्रीहितत्पुरुषयोर्मध्य एकस्य बहुव्रीहेः शेष इत्यर्थः । अत्र दृष्टान्तमाह — **यथेति** । कतस्यान्तः कतन्तः, शकन्ध्वादित्वात् पररूपम् । कतोऽन्तो येषां ते कतन्ताः, तत एकशेषः । कण्वस्यादिः [5]'कण्वादिः, कण्व आदिर्येषां ते कण्वादयः, ततः पूर्ववदेकशेषः । **न त्विति** । 'सर्वादिश्च' इत्यत्रादिशब्दस्य सारूप्यसंपादनादन्यत् प्रयोजनं नास्तीत्यर्थः । तत्पुरुषस्य पुंस्त्वाद् बहुव्रीहेश्च

---

[1] पा. सू. ६.१. २२३.
[2] पा. सू. ६. २. १.
[3] क्रियासंबन्धो भवतीति — ढ; क्रिया न भवतीति — ण.
[4] तुशब्दो नास्ति — ड, ण.
[5] 'कण्वादिः' इति नास्ति — च, छ, ट.

नपुंसकत्वात् तस्य शेष इत्याह — **तत्रेति** । **स्वरभिन्नानां** स्वरेण विलक्षणानां सरूपाणां मध्ये यस्योत्तरेण सूत्रेण स्वरविधिः स शिष्यत इति वार्तिकार्थः । अत्र च कर्मधारयः समासस्वरेणान्तोदात्तः, बहुव्रीहिरुत्तरेण [1]'बहुव्रीहौ प्रकृत्या' [2]इत्यनेनाद्युदात्तपूर्वपद इति तस्यैव शेष इति भावः । **वक्ष्यमाणेन** तद्गुणसंविज्ञानेनेत्यर्थः । **प्राथमकल्पिकः** प्रथमप्रतीतः, एकशेषनिरपेक्ष इत्यर्थः । ननु विग्रहे पृष्टे तन्मात्रप्रदर्शनमुचितम्, [3]तानीति तु मुधेत्यत आह — **अन्येति** । [4]तानीत्यनुक्तौ दोषमाह — **अन्यथेति** । गम्यतां विशेषणत्वम्, को दोष इत्यत आह — **अत्र चेति** । **यदा त्विति** । पूर्वाचार्यप्रसिद्धसंज्ञाश्रयणेन पूर्वाचार्यप्रसिद्धान्यपदार्थप्राधान्यस्याप्याश्रयणादिति भावः । तानीत्यनेनैवान्यपदार्थप्राधान्यप्रदर्शनात् 'इमानि' इति वृथेत्यत आह — **तानीमानीति** । **सर्वनामेति** । सर्वनामद्वयोपादानेन तद्गुणसंविज्ञानं सूचयतीति योजना । 'इमानि' इत्यनेनेति तात्पर्यम्, तानीत्यस्य प्रयोजनान्तरस्योक्तत्वात् । कथं तद्गुणसंविज्ञानं सूच्यत इमानीत्यनेनेत्यत आह — **प्रत्यक्षेति** । उद्भूतसमुदायिसमुदायस्येदमा परामर्शादिति भावः । गुणाः उपकारकाः । उपकारकत्वं दर्शयति — **उपलक्षणानीति** । क्व तद्गुणसंविज्ञानं क्व वा नेत्यपेक्षायामाह — **तत्रेति** । अयं भावः — मत्वर्थेऽयं[5] बहुव्रीहिः, मत्वर्थश्च संबन्धः, स चान्यपदार्थविशेषणम्, तस्य कार्यान्वय उपलक्षणानन्वयेऽपि[6] संभवति चेदतद्गुणसंविज्ञानः, अन्यथा तद्गुणसंविज्ञानः । संबन्ध्यन्वयमन्तरेणापि संयोगसमवायव्यतिरिक्तस्यान्वयसंभवः । संयोगसमवाययोः संबन्ध्यन्वयमन्तरेणानन्वय इति समुदायार्थः । प्रकृते तु समवायसंबन्धो विशेषणमित्याह — **इहेति** । समुदायः समासार्थश्चेत् प्रत्येकं सर्वनामसंज्ञा न स्यादित्यत आह — **तस्य चेति** । न च गणपाठ एव संज्ञा समुदायस्य [7]भवत्विति वाच्यमित्याह — **कार्येति** । नन्वेवं संबन्धस्य विशेषणत्वाभावात् सर्वशब्दस्य न संबन्ध[8]विशेषणत्वद्वारा सर्वनामसंज्ञा सिध्यतीत्यत आह — **यथेति** । सर्वशब्दः स्वरूपेणोपलक्षणम्, गणपठितत्वाकारेणोप-लक्षित[9] इति रूपद्वयसंभवाद् देवदत्तवत् कार्यान्वय इति भावः ॥

[१, २७३–२७४]

(**उद्द्योतनम्**) प्रश्नानुपपत्तिं शङ्कते — **नन्विति** । नियतपुँल्लिङ्गस्यादिशब्दस्य समासान्तरे नपुंसकत्वासंभवाद् बहुवचनाच्च बहुव्रीहित्वनिश्चयात् प्रश्नानुपपत्तिरित्यर्थः । समाधत्ते — [10]**एवमिति** । **बहुव्रीहीति** । सर्व आदिर्येषामिति बहुव्रीहिः, सर्वश्चासावादिश्चेति तत्पुरुषः । अतद्गुणसंविज्ञानबहुव्रीहौ सर्वशब्दस्य [11]संज्ञाप्राप्तेरित्यर्थः । उक्तसमासद्वयस्यैकशेषे दृष्टान्तः — **यथेति** । लोहितादिर्गर्गाद्यन्तर्गणः । तत्र शकलशब्दः कत[12]कण्वशब्दयोर्मध्ये पठनीयः । [13]'सर्वत्र लोहितादिकतन्तेभ्यः' इत्यत्र [14]कतन्ते समासद्वयम् — कतोऽन्तो येषां ते कतस्यान्तः समीपभूत इति च । तेन

---

[1] पा. सू. ६. २. १.
[2] इत्यनेनान्तोदात्त — ञ.
[3] तानीति किमित्यत आह — च, छ; तानीति किमुक्तमित्यत आह — ट.
[4] तानीत्युक्तौ — च, छ, ञ.
[5] 'अयम्' इति नास्ति — ञ.
[6] अपिशब्दो नास्ति — ञ.
[7] भवतीति — ञ.
[8] विशेषणद्वारा — ञ.
[9] लक्ष्यत इति — ञ.
[10] एवमपीति — उ.
[11] अप्राप्तेरिति छेदः ॥ संज्ञाप्राप्तिरित्यर्थः — ऋ.
[12] कण्वयोर्मध्ये — अ, इ, ऊ.
[13] पा. सू. ४. १. १८.
[14] कतन्तेन समास — अ.

'शाकल्यायनी' [1]इति ष्फः सिद्धः। शकन्ध्वादित्वात् सूत्रे पररूपम्। [2]"कण्वादिभ्यो गोत्रे' इत्यत्रापि पूर्ववत् समासद्वयम्। तेन कण्वस्यादिः शकलशब्द इति शाकल्यस्य छात्राः 'शाकलाः' इति [3]"कण्वादिभ्यः' [4]इत्यण् सिद्धः। तदुक्तम् —

[5]"कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्।' इति।

नन्वेवं 'सर्वसर्वादीनि' इति स्यात्, तत्पुरुषे आदिपदवैयर्थ्यात्, अत आह — **तत्रेति। न त्विति।** एकशेषसंपादकसारूप्यसंपादनव्यतिरिक्तप्रयोजनं नास्तीत्यर्थः। नपुंसकत्वाद् बहुव्रीहेः शेषमाह — **तत्रेति।** वस्तुकथनमेतत्, तत्पुरुषशेषेऽपि प्रकृते विरोधाभावात्। 'विलक्षणस्वराणां सरूपाणां यस्योत्तरसूत्रेण स्वरविधिः स शिष्यते' इति वार्तिकार्थः। तत्पुरुषस्य [6]"समासस्य' इति पूर्वसूत्रेणान्त उदात्तः। बहुव्रीहेस्तु [7]"बहुव्रीहौ' इत्युत्तरसूत्रेण 'पूर्वपदाद्युदात्तत्वमिति भावः। **वक्ष्यमाणेनेति।** तद्गुणसंविज्ञाननेनेत्यर्थः। बहुव्रीहिविग्रहस्य स्पष्टत्वात् प्रश्नायोगमाशङ्क्याह — **एवमपीति। प्राथमकल्पिकः** एकशेषरहितः। **पृच्छति** वक्ष्यमाणन्यायमविद्वानित्यादिः। विग्रहे पृष्टे तन्मात्रं वक्तुमुचितम्, 'तानीमानि' इति व्यर्थम्, अत आह — **अन्येति।** अन्यपदार्थप्राधान्यस्योपयोगमाह — **यथेति।** अन्यपदार्थप्राधान्यद्योतकतच्छब्दप्रयोगादपि तथेत्याह — **अत एवेति।** यतोऽन्यपदार्थप्राधान्य एव बहुव्रीहिः, अत एवेत्यर्थः। इमानीत्यस्य वैयर्थ्यं निराह — **तानीति।** उपादानेन सूचयतीत्यन्वयः। 'तानि' इत्यस्यान्यपदार्थप्राधान्यार्थत्वात् 'इमानि' इत्यस्य सूचकत्वमुपपादयति — **प्रत्यक्षेति।** उद्भूतावयवभेदसमुदायस्येदमा परामर्शादिति भावः। तद्गुणसंविज्ञानमित्यस्यार्थमाह — **तस्येति। उपलक्षणानि** वासःप्रभृतीनि। **कार्ये** आनयनादिकार्ये। [9]'क्व तद्गुणसंविज्ञानं क्व नेति विवक्षायामाह — **तत्रेति।** [10]**स्वविशेष** गोरूपधनविशेष। मत्वर्थे बहुव्रीहिः, तदर्थश्च संबन्धः, सोऽन्यपदार्थविशेषणम्। तस्योप[11]लक्षणस्य कार्यान्वयं विनापि विशेषणत्वसंभवेऽतद्गुणसंविज्ञानम्, अन्यथा तद्गुणसंविज्ञानमिति समुदायार्थः। संयोगसमवायस्थले उप-

---

[1] इतीष्टसिद्धिः — उ.
[2] पा. सू. ४. २. १११.
[3] पा. सू. ४. २. १११.
[4] इत्यण्सिद्धिः — उ, ऊ, ऋ.
[5] श्लो. वा. ४. १. १८.
[6] पा. सू. ६. १. २२३.
[7] पा. सू. ६. २. १.
[8] 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्यनेन पूर्वपदस्य प्रकृतिस्वरो विधीयते। अत्र सर्वशब्दस्य 'स्वाङ्गशिटामदन्तानाम्' इति प्राप्तस्याद्युदात्तत्वस्य बाधनाय उञ्छादिष्वन्तोदात्तत्वेन निपातनमङ्गीक्रियते। अन्यथानुदात्तादित्वाभावेन सर्वस्य विकारः सार्व इत्यत्र 'अनुदात्तादेश्च' इत्यञनापत्तिः। [अत्रोञ्छादिपाठ इति ङ्याप्प्रतिपदिकात्सूत्रीयशेखरे 'सर्वस्य सुपि' इति सूत्रीयसुबोधिन्यां चोपलभ्यते। 'सर्वस्य सुपि' इति सूत्रीयकैयटोद्द्योतयोः 'सर्वनिघृष्व' इत्युणादिपाठेनान्तोदात्तनिपातनमिति दृश्यते।] ततश्च 'सर्व' इति प्रातिपदिकस्यान्तोदात्तत्वेऽपि सुबुत्पत्त्यनन्तरं 'सर्वस्य सुपि' इत्याद्युदात्तत्वमेव भवति। तस्य बहुव्रीहौ सुपो लुक्यपि सौवर्यस्सम्तप्यस्तदन्तसप्तम्य इति सुबन्तपरतया न लुमतेति निषेधाभावात् प्रकृतिस्वरेणाद्युदात्तत्वमेव भवति। अत एव ङ्याप्प्रातिपदिकात्सूत्रीयशेखरे सर्वस्तोम इति बहुव्रीहावाद्युदात्तसिद्धिरित्युक्तम्। अत्रोद्द्योते तु 'अन्तोदात्तपूर्वपदः' इति दृश्यते।
[9] 'क्व' इति नास्ति — म, उ.
[10] स्वविशेषः, गोरूपधनविशेषः — अ, म, उ.
[11] लक्षितस्य कार्यान्वयं — अ; लक्षणकार्यान्वयं — इ, उ, ऊ.

लक्षणस्य कार्यान्वयो नान्यत्रेति स्थिते प्रकृते समवायमाह — **इहेति**। समुदायस्यान्यपदार्थत्वे बहुवचनं कथम्, अत आह — **उद्भूतेति**। तर्हि समुदायस्यैव संज्ञा स्यात्, नावयवानाम्, अत आह — **तस्य चेति**। ननु गणपाठ एव समुदायस्य संज्ञास्तु, अत आह — **कार्येति**। प्रयुक्तशब्दानामन्वाख्यानाय संज्ञा क्रियते, [1]नादृष्टार्थायेति भावः। उपलक्षणस्यापि सर्वशब्दस्य संज्ञान्वये दृष्टान्तमाह — **यथेति**। देवदत्तशालायां ये ब्राह्मणास्त आनीयन्तामित्यर्थः। अत्रापि समुदायस्थानां संज्ञेति सर्वशब्दस्यापि भवतीत्याशयः॥

[१, २७३-२७४]

(**रत्नप्रकाशः**) बहुव्रीहावतद्गुणसंविज्ञानमेव भवतीति मन्यमानोऽस्य सूत्रस्य सर्वशब्देऽव्याप्तिं वक्तुं 'सर्वादीनि' इत्यस्य बहुव्रीहितां बहुव्रीहेश्चान्यपदार्थकतां व्याख्यातृमुखेनैव वाचयितुं पृच्छति— **कोऽयं समास इति। कोऽस्य विग्रह इति**। एतेन "ननु नपुंसकबहुवचननिर्देशादेव बहुव्रीहिनिश्चये समासान्तराशङ्का नैवास्तीति प्रश्नानुपपत्तिः। एवं तर्हि किमयं बहुव्रीहिरेव, आहोस्विद् बहुव्रीहितत्पुरुषयोरेकशेषः। यथा [2]'कतन्तेभ्यः' [3]'कण्वादिभ्यः' इति प्रश्नः। तत्र सारूप्यार्थं सर्वश्चासावादिश्च सर्वादिरित्यादिशब्द उपादीयते, न त्वस्य प्रयोजनान्तरमस्ति। तत्र [4]"नपुंसकमनपुंसकेन' इति वा [5]"स्वरभिन्नानां यस्योत्तरविधिः स शिष्यते' इति वा बहुव्रीहेः शेषः" इति निरस्तम्। प्रष्टुस्तदभिप्रायत्वे 'कोऽयं बहुव्रीहिः' इत्येव प्रश्नस्योचितत्वेन 'कोऽयं समासः, कोऽस्य विग्रहः' इत्येवं शब्दप्रयोगस्यायुक्तत्वात्। तद्गुणसंविज्ञानेनापि यत्र निर्वाहो नास्ति तत्र बहुव्रीहितत्पुरुषयोरेकशेषस्य सिद्धान्तिनास्थितत्वेन[6] तद्दृष्टान्तेनात्र तद्गुणसंविज्ञानपक्षमात्रपरिहार्यदोषे प्रश्नोपपादने प्रष्टुरत्यन्तमौर्ख्यप्रतिपादनात्। तदपेक्षया 'सूत्रेषु छन्दोवत्कार्यदर्शनात् लिङ्गवचनव्यत्ययसंभावनया बहुव्रीहित्वनिर्णयाभावात् पृच्छति—**कोऽयं समास इति**।' इत्येव तदाशयवर्णनस्य सम्यक्त्वाच्च। भाष्यस्वरसेन तदाशयवर्णनं मया पूर्वमेव कृतमित्यन्यदेतत्। एतेन' वक्ष्यमाणन्यायेन विनाप्येकशेषेण सर्वशब्दस्य संज्ञा सिध्यतीति मत्वाह—**बहुव्रीहिरिति**।' इत्यपि निरस्तम्। प्रष्टुरेकशेषाभिप्रायकताया दूषितत्वेन 'विनाप्येकशेषेण' इत्यंशेनासंबद्धेन युक्तत्वात्। अत एव च 'एवमपि संदेहः — किं प्राथमकल्पिको बहुव्रीहिः, अथ बहुव्रीहितत्पुरुषयोरेकशेषे बहुव्रीहिरिति पृच्छति — **कोऽस्येति**।' इत्यपि निरस्तम्। तस्यापि प्रश्नस्य मद्वर्णिताभिप्रायकताया एवोचितत्वात्। तदुक्ताशयापेक्षया 'बहुव्रीहेर्विग्रहान्तरसंभावनया पृच्छति — **कोऽस्य विग्रह इति**।' इत्यस्य सम्यक्त्वाच्च। **येषां तानीमानीति**। अनेन बहुव्रीहेः समस्यमानपदार्थादन्यार्थकत्वं निर्दर्शितं भवति। यद्यपि 'येषां तानि' इत्येतावतैवान्यपदार्थकता बहुव्रीहेरुक्ता भवति, तथाप्येतादृशो बहुव्रीह्यर्थ इति सर्वैर्ज्ञायत इति सूचयितुं तच्छब्दनिर्दिष्टस्य प्रत्यक्षवाचिनेदमा परामर्शः कृतः। एतेन "**तानीमानीति**। अन्यपदार्थस्य प्राधान्यं प्रदर्श्यते। अन्यथा यथा चित्रा गावो यस्येति गवां विशेष्यत्वं तद्वतश्च विशेषणत्वमवगम्यते तथेहापि गम्येत। अत्र चार्थे बहुव्रीहिर्नेष्यते। यदा तु स्वामिनः प्राधान्यं गवां विशेषणभावस्तदा बहुव्रीहिः। अत एव 'यस्य स चित्रगुः' इति स्वामिनः प्राधान्यं प्रदर्श्यते। तानीमानीति सर्वनामद्वयोपादानेन प्रत्यक्षविषयत्वादिदंशब्दस्य गणपठितेषु सर्वशब्दस्यान्तर्भावात् तद्गुण-

---

[1] नादृष्टाधानायेति — म, आ; नादृष्टार्थेति — इ, ऊ.
[2] पा. सू. ४. १. १८.
[3] पा. सू. ४. २. १११.
[4] पा. सू. १. २. ६९.
[5] का. वा. १. २. ६४–२३.
[6] आस्थितत्वेनेति छेदः।

संविज्ञानं सूचयति" इति निरस्तम्। अन्यार्थकतामात्राश्रयेणैव पूर्वपक्षसिद्धान्तयोरुपपन्नत्वेन तथैव भाष्येऽन्यार्थकतामनूद्यैवाव्याप्तेरुपपादितत्वेन चोक्तभाष्यस्यान्यपदार्थप्राधान्यप्रतिपादनपरतया व्याख्यानानौचित्यात्। यत्तदोर्नित्यसंबद्धत्वेन तच्छब्दमन्तरेणापि तदर्थस्य गम्यमानत्वेन 'चित्रा गावो यस्य' इत्युक्तेऽपि तच्छब्दपरामर्शयोग्यस्य यच्छब्दनिर्दिष्टस्य स्वामिन एव प्राधान्यस्य प्रतीयमानत्वेन 'अन्यथा' इत्यादेः 'गम्येत' इत्यन्तस्यायुक्तत्वात्। तथा च तस्मिन्नेवार्थे समासस्य वैयाकरणैरङ्गीकृतत्वेन 'अत्र चार्थे बहुव्रीहिर्नेष्यते' इत्यस्याप्ययुक्तत्वात्। 'चित्रा गावो यस्य' इत्येतावतापुक्तयुक्त्या प्राधान्यस्य गम्यमानत्वेन 'यदा तु' इति तुशब्दव्यावर्त्यालाभेन 'यदा तु' इत्यादि 'बहुव्रीहिः' इत्यन्तस्याप्ययुक्तत्वात्। 'यस्य स चित्रगुः' इत्यादेर्घुणाक्षरन्यायेन[1] सामीचीन्येऽपि 'तानीमानीत्यनेनान्यपदार्थस्य प्राधान्यं प्रदर्श्यते' इति प्राचीनयोक्त्या सह विरोधात्। 'तानीमानि' इत्येतावता सर्वशब्दस्य गणान्तर्भावस्य तद्गुणसंविज्ञानस्य च सूचनाभावेन 'तानि' इत्यादेरप्ययुक्तत्वाच्च। इदानीं प्रष्टा स्वाशयं प्रकटयति — **यद्येवमिति**। **अन्यपदार्थत्वादिति**। समस्यमानपदार्थापेक्षयान्यार्थकत्वादित्यर्थः। समाधत्ते — **नैष दोष इति**। **बहुव्रीहाविति**। श्रुते सतीति शेषः। **तद्गुणसंविज्ञानमपीति**। **सः** समस्यमानपदार्थः **गुणः** अवयवस्तादृशो वा यस्य स तद्गुणः, तादृशस्याप्यन्यार्थस्य संविज्ञानं भवतीत्यर्थः। अपिशब्दादतद्गुणस्यापि संविज्ञानं भवतीति पूर्वपक्ष्यभिमतस्य संग्रहः। एतेन 'तस्यान्यपदार्थस्य गुणा उपलक्षणानि, तेषामपि कार्ये संविज्ञानं **तद्गुणसंविज्ञानम्**। तत्र चित्रगुरानीयतामिति स्वस्वामिभावसंबन्धः षष्ठ्यर्थ इति [2]स्वविशेषोपलक्षितस्य स्वामिन एवानयनम्, न तु गवाम्। दण्डी विषाणी चानीयतामित्यत्र तु संयोगसमवायलक्षणेन संबन्धिनि कार्ये विज्ञायमाने उपलक्षणस्याप्यन्तर्भावो भवति। इहाप्यादिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः समुदायः समासार्थः। तस्य च समुदायस्य युगपल्लक्ष्ये प्रयोगाभावात् तदन्तर्भूतानामेव पृथक् प्रयोगात् कार्यार्थया संज्ञया भवितव्यमिति सर्वशब्दस्यापि सिध्यति। यथा देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते देवदत्तोऽपि यदि ब्राह्मणो भवति स्वशालास्थश्च तदा सोऽप्यानीयत एव' इति निरस्तम्। 'तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति' इति भाष्यानुसारेण तद्गुणशब्दस्य बहुव्रीहित्वे तद्गतगुणशब्दस्यावयवतत्सदृशान्यतरपरत्वे चोक्ते तावतैव समस्यमानपदार्थस्यान्यपदार्थान्तर्गतौ बहुव्रीहिणा ग्रहणं तदनन्तर्गतावग्रहणमिति व्यवस्थाया भाष्यारूढत्वेन सुबोधतया स्वेच्छामात्रेण तदपहाय तस्य षष्ठीतत्पुरुषत्वं तदन्तर्गतगुणशब्दस्योपलक्षणपरतां चाश्रित्य क्लिष्टकल्पनेन 'तत्र' इत्यादिना 'भवति' इत्यन्तेन व्यवस्थाप्रतिपादनानौचित्यात्। 'इहाप्यादिशब्दस्य' इत्यादेः 'आनीयत एव' इत्यन्तस्य [3]मद्वर्णितबहुव्रीहिपक्ष एवोपपन्नत्वाच्च॥

[१, २७३–२७४]

(**नारायणीयम्**) रूपसाधारण्यं संदेहनिमित्तं नास्तीहेति शङ्कते — **नन्विति**। तत्पुरुषे पुंल्लिङ्गमेकवचनं [4]च स्यात्। समाहारद्वन्द्वे नपुंसकैकवचनापत्तिः। इतरेतरयोगेऽपि द्विवचनप्रसङ्गः। अव्ययीभावस्त्वसंभवी। तस्माद् बहुव्रीहित्वनिश्चयः। **यथेति**। कतस्यान्त इति, कतोऽन्तो येषामिति चाश्रीयते। कण्वस्यादिः कण्व आदिर्येषामिति च। **न त्विति**। सर्वशब्दस्यादित्वा-

---

पृष्ठम् २७.

[1] घुणाख्येन कीटविशेषेण कथंचिन्निष्पन्नमक्षरं घुणाक्षरम्। तद्वत् यदकुशलेन दैवान्निष्पद्यते तदनेन विवक्षितम्. लौ. न्या. प्रथमभागे

[2] स्वविशेषणोपलक्षितस्य — ब.

[3] तद्गुणशब्दस्येत्यादिः।

[4] च न स्यात् — क.

व्यभिचारात्। **तत्रेति**। यदि तु तत्पुरुषशेषः स्यात् तदा शिष्यमाणस्य निवर्त्यमानार्थाभिधायित्वेन बहुवचनोपपत्तावपि लिङ्गासिद्धिः। केवलबहुव्रीहौ सर्वशब्दे संज्ञाया यत्नसाध्यत्वात् प्रतिपत्तिलाघवायैकशेषाश्रयणमुचितमिति। केवलबहुव्रीहितया कथं सिद्धान्त इत्याशङ्क्य प्रक्रियागौरवपरिहाराय केवलबहुव्रीह्याश्रयणमित्याह — [1]**वक्ष्यमाणेति**। बहुव्रीहिविग्रहस्य प्रसिद्धत्वात् प्रश्नानर्थक्यमाशङ्क्याह — **एवमिति**। [2]यस्येत्यनेन बहुव्रीह्यर्थेऽन्यपदार्थे प्रदर्शिते शेषवैयर्थ्यम्, तत्राह— **अन्येति**। भवतु विशेषणतावगतिः, अतः किमित्यत आह — **अत्र चेति**। महासंज्ञायाः पूर्वाचार्यकृतायाः परिग्रहात् तदीयोपाधेरन्यपदार्थप्राधान्यस्य बहुव्रीहिसंज्ञानिमित्तत्वादभिधानस्वभावाद्वा न तद्विशेषणभावे बहुव्रीहिरित्यर्थः। **यदा त्विति**। चित्राणां गवामयमित्यस्मिन्नर्थे बहुव्रीहिरित्यर्थः। लौकिकास्तर्हि विग्रहवाक्यं कथं नेदृग्विधमेव कुर्वन्तीत्यत आह — **अत एवेति**। अन्यपदार्थप्रधानतयैव विग्रहः। स चित्राणां गवामयमिति वा चित्रा गावो यस्य स इति वा। लौकिके प्रयोगे लाघवानादराल्लघुना वाक्येन विग्रहे सिद्धे कथमीदृशं वाक्यमित्यपि न चोदनीयम्। अन्ये तु यथा राजपुरुषयोः स्वस्वामिभावप्रतिपादने पुरुषस्य स्वत्वं विशेष्यत्वं च नियतं पुरुषस्य राजेति प्रयोगाभावात्, तथेहापीति 'यस्य सः' इत्येव स्वामिप्राधान्यं प्रदर्शनीयम्, न तु चित्राणां गवामयमि[ती]त्याहुः। तर्हि 'तानि' इत्येव स्वामिप्राधान्यदर्शने सिद्धे 'इमानि' इति व्यर्थम्, अत आह — **तानीति**। **संविज्ञानमिति**। इदं तु यत्र स तद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः। तद्गुणातद्गुणयोर्विशेषं विभजते — **तत्रेति**। संयोगसमवाययोरन्यतरस्य प्रवृत्तिनिमित्तत्वे तद्गुणसंविज्ञानत्वम्। संबन्धान्तरस्य तत्त्वे तद्विपरीतमित्यर्थः। **षष्ठ्यर्थ इति**। प्रवृत्तिनिमित्तमिति शेषः। प्रवृत्तिनिमित्तविशिष्टस्य कार्येऽन्वयः। स्वामिता चानालभ्य स्थिताभिरपि गोभिस्तद्वतोऽस्तीति गोविरहितानयनेऽपि प्रवृत्तिनिमित्तावच्छिन्नस्य कार्यसंबन्धोऽक्षतः। **दण्डीति**। मत्वर्थे बहुव्रीहिविधानान्मत्वर्थीयोपन्यासः। दण्डसंयोगस्य विषाणसमवायस्य च प्रवृत्तिनिमित्तत्वाद् दण्डादिरहितस्य च कार्यसंबन्धे प्रवृत्तिनिमित्तावच्छिन्नस्य कार्यानन्वयापत्तेस्तत्र तद्गुणसंविज्ञानत्वमित्यर्थः। अस्त्वित्थं लोके विभागः, प्रस्तुते तु किं जातमित्यत आह — **इहापीति**। आदिशब्दस्यावयव[3]वचनत्वात् समुदायः समासार्थ इत्यन्वयः। समुदायस्यैकत्वात् 'वनं, यूथम्' इतिवदेकवचनप्रसङ्गमाशङ्क्याह — **उद्भूतेति**। यदि समुदायः समासार्थः कथमवयवानां संज्ञा, तत्राह — **तस्य चेति**। समुदायस्य लौकिके प्रयोगेऽसत्त्वेऽप्याचार्यपाठकृतं सत्त्वमिति तस्यैव कथं न संज्ञेत्यत आह — **कार्यार्थयेति**। **सर्वशब्दस्यापीति**। समुदायान्तर्भावो विश्वादिवत् सर्वशब्दस्याप्यविशिष्ट इत्यर्थः। नन्वन्योपलक्षणत्वं विश्वादिवैलक्षण्यमस्येति शङ्कां परिहरति — **यथेति**। उपलक्षणस्याप्युपलक्ष्याकारसत्त्वे कार्यान्वय इत्यर्थः॥

[१, २७४–२७७]

(**लघुविवरणम्**) सर्वनामशब्दस्य संज्ञाशब्दस्यावयवार्थाभावात् समासाभावे [4]'पूर्वपदात्' इति [5]'णत्वप्राप्त्यभाव' इत्यत आह — **राजपुरुषादिवदिति**। असतो णत्वस्य विधानेऽनित्यत्वं प्राप्नोतीत्यत आह — **प्रयोग इति**। ननु विधानसमये धातोः परत्वेन विधेयः, पश्चात्तु व्यवधानेऽपि[न]

---

[1] प्रदीपे 'वक्ष्यमाणेन न्यायेन' इत्यत्र 'वक्ष्यमाणन्यायेन' इति पाठः स्वीकृत इति भाति।
[2] 'येषाम्' इत्येतद्विवक्षितम्।
[3] वाचित्वादित्यस्यार्थानुवादः।
[4] पा. सू. ८. ४. ३.
[5] णत्वाभावः — ड, ढ.

दोष इति विकरणार्थः कर्त्रादय इति [च] पक्षे समुच्चयः स्यादित्यत आह — **धातुसार्वधातुकयोरिति**। विकरणार्थपक्षस्तु तत्र न स्थित इति भावः। नुमभावे परिहारान्तरमाह — **आदितीति**। नन्वेवं सति श्नमपि शपः स्थाने स्यादित्यत आह — **रुधादिभ्य इति**। [1]'रुधादिभ्यः श्नम्' इति श्नम् रुधादीनामन्त्यादचः परो भवतीत्यन्वयः। मित्करणसामर्थ्यादिति भावः। मित्करणसामर्थ्यात् परोऽपि भवन् शपः परः कस्मान्न भवतीत्यत आह — **रुधादीनामिति**। तर्हि शपो निवृत्तिर्न स्यादित्यत आह — **यथेति**। शप इति षष्ठीप्रकल्पनसामर्थ्यादिति भावः। [2]'पुराणप्रोक्तेषु' इति निपातनात् पुरातनशब्दस्यासाधुत्वं स्यादित्यत आह — **पुराणेति**॥

[१, २७४–२७७]

(**विवरणम्**) ननु सर्वनामशब्दो व्युत्पाद्यते चेद् वक्ष्यमाणसंज्ञोपसर्जनप्रतिषेधानुपपत्तिः, नो चेत् पूर्वोत्तरपदविभागाभावान्न [3]'पूर्वपदात्' इति णत्वप्राप्तिरित्यत आह — **राजेति**। इह सिद्धान्ते सतः, पूर्वपक्षे त्वसत आश्रयणमिति विवेकः। शब्द[4]नित्यत्वविरोधान्नासतो [5]णत्वस्यापादनं युक्तमित्यत आह — **प्रयोगे चेति**। ननु संज्ञा चेत् [6]कृत्रिमत्वात् शब्दार्थ[7]संबन्धस्यानित्यत्वम्, असंज्ञा चेत् न [8]'पूर्वपदात्' इति णत्वप्राप्तिरित्यत आह — **सर्वेति**। सौत्रोऽयं निर्देश इति कस्मात् परिहारो नोक्त इत्यत आह — **लोक इति**। साम्यमेव दर्शयति — **सर्वत्रेति**। **निपातनं चेति**। णत्वतदभावयोरेकत्र विरोधादिति भावः। **निवृत्तावेवेति**। [9]अप्रसक्तिप्रतिपादन एवेत्यर्थः। [10]**निपातनस्य त्विति**। प्रयोगभेदेन तु भावाभावयोर्विरोधः परिहरिष्यत इति भावः। स्थानिनो निवृत्तिर्नाम स्थानिनः साधुत्व[11]बुद्धेर्निवृत्तिः, सा च संहितायां शाकलाभाव इत्यभिप्रेत्याह — **ततश्चेति**। **प्रस्तीर्यन्त इति**। किं तु तत्प्रसङ्गे शराः प्रस्तीर्यन्त इति शेषः। स्थानषष्ठीसामर्थ्याच्चेत् प्राक् प्रसक्तस्यासाधुत्वं ततस्तदभावे स्यात् तस्य साधुत्वमित्यभिप्रेत्य 'इह तर्हि' इति भाष्यम्। तद्विकल्पाभिप्रायमिति व्याचष्टे — **विकल्प इति**। धात्वधिकाराद्विकरणविधौ [12]'परश्च' इत्यस्यानुवर्तमानस्य धातोः परो विकरणः प्रयोक्तव्य इत्यर्थाश्रयणान्न समुच्चय इति भावः। ननु धातोः परो विधातव्य इत्यर्थः संभवति, तथा च श्यनि पूर्वं धातोः परे विहिते पश्चात् शबपि [13]तस्मिन् तस्मादेव धातोः परो विधास्यते, कर्तृवाचिनि सार्वधातुक इति च विषयसप्तमी भविष्यति। तथा च स्यात् समुच्चय इत्यत आह — **धात्विति**। **साहायकस्य** सहायत्वस्य, [14]'योपधाद् गुरूपोत्तमात्' इति वुञ्। ननु शबादेशाश्चेत् श्यन्नादयस्ततः पित्त्वं स्थानिवद्भावात् स्यात्, तथा च करोतीत्यत्र विकरणस्यानुदात्तत्वं स्यात्, प्रत्यय[15]स्वरेण चोदात्तत्वमिष्यत इत्यत आह — **श्यन इति**। [16]नित्करणं

---

[1] पा. सू. ३. १. ७८.
[2] पा. सू. ४. ३. १०५.
[3] पा. सू. ८. ४. ३.
[4] नित्यत्वस्य विरोधात् — अ.
[5] णत्वस्योपादानं — च, छ, ज, ट.
[6] 'कृत्रिमत्वात्' इति नास्ति — च, छ, ट.
[7] संबन्धयोरनित्यत्वं — च, छ, ज, ट.
[8] पा. सू. ८. ४. ३.
[9] अप्रसक्त्यापादन एवेत्यर्थः — ट.
[10] निपातनस्य चेति — ट; उपादानस्य चेति च, छ.
[11] बुद्धिनिवृत्तिः — च, छ.
[12] पा. सू. ३. १. २.
[13] श्यनि पर इत्यर्थः।
[14] पा. सू. ५. १. १३२.
[15] स्वरेणैवोदात्तत्वं — च, छ.
[16] प्रदीपे 'श्यनश्च शित्करणम्' इत्यत्र 'श्यनश्च नित्करणम्' इति पाठोऽभिमतः।

[1]'ञ्नीति' इत्याद्युदात्तत्वाय प्रत्ययाद्युदात्तत्वबाधाय। यदि च स्थानिवद्भावः स्यात् ततः पित्त्वादनुदात्तत्वे लसार्वधातुकस्य [2]'अदुपदेशात्' इत्यनुदात्तत्वे धातोः [उदात्तत्वं सिद्धमेव,] श्यन्विकरणस्यानेकाचोऽभावात्। 'वा वृतु वर्तने' इति च वाशब्दो विकल्पार्थः श्यनः, न धात्वन्तःपाती। न च भ्वादौ पाठाद् दिवादौ च पाठादन्तरेणापि वाशब्दं विकरणद्वयं पर्यायेण [3]श्नोष्यत इति वाच्यम्, भ्वादिगणपाठस्य [4]'वृद्भ्यः स्यसनोः' इत्याद्यन्तर्गणकार्यार्थित्वोपपत्तेः शप्श्रवणोपपादने सामर्थ्याभावाद् विकल्पार्थ एव वाशब्दः। [5]'तस्मादनेकाचो दिवादावभावाद् धातुस्वरेणैव सिद्धत्वादनर्थकं नित्करणं स्थानिवद्भावाभावं ज्ञापयतीत्यर्थः। क्वचित् श्यनः शित्करणमिति पाठः। तत्र तु शित्करणं नियमार्थमित्यपि [6]शक्यं वक्तुम् — शिदेव, न पिदिति। तस्मात् 'नित्करणम्' इत्येव पाठः। **आदिति**। तेन यत्रावर्णान्ताच्छता तत्र शीनद्योर्नुमित्यर्थः। ननु तर्हि [7]'रुधादिभ्यः' इति पञ्चम्या शबिति प्रथमायाः षष्ठीप्रकल्पनात् शपः परः श्नम् स्यादित्यत आह — **रुधादिभ्य इति**। [8]'सार्वधातुके' इति सप्तमी [9]'रुधादिभ्यः' इति पञ्चम्याः षष्ठीप्रकल्पिकेति नागमसंबन्धयोग्यषष्ठ्यभावः शङ्कनीयः। [10]'श्नान्नलोपः' इति च श्नादुत्तरस्याङ्गावयवनकारस्य लोपविधानं रुधादीनामागमित्वे लिङ्गम्। न चैवं शपः श्रवणं [11]शङ्कनीयमित्याह — **यथा चेति**। शप इति षष्ठीप्रकल्पनेन तत्प्रसङ्गे श्नमो विधानादिति भावः। **एकेति**। अज्ञातादेरेकेन द्योतितत्वान्न द्वयोः समुच्चयसंभव इति भावः। भाष्ये **एतन्न सिध्यतीति**। संततं सततमित्युभयमित्यर्थः। **न त्विति**। 'सततम्' इति न निपातनेन साध्यत इत्यर्थः। ननु तर्हि पुराशब्दात् [12]'सायंचिरम्' इत्यनेन ट्युटयुलोरन्यतरस्मिन् तुटि च पुरातनशब्दे प्राप्ते [13]'पुराणप्रोक्तेषु' इति निपातनात् पुरातनशब्दोऽसाधुः स्यादित्यत आह — **पुराणेति**॥

[१, २७४–२७७]

(**उद्द्योतनम्**) ननु सर्वनामशब्दस्य व्युत्पन्नत्वे वक्ष्यमाणसंज्ञाप्रतिषेधानुपपत्तिः, अन्वर्थतयैव तन्निरासात्। अव्युत्पन्नत्वे पूर्वपदाभावाण्णत्वाप्रसङ्गः, अत आह — **राजेति**। [14]'सिद्धान्तेऽन्वर्थत्वाङ्गीकारात् **सन्तं**, पूर्वपक्षे **असन्तम्**। शब्दनित्यत्वविरोधादसतो [15]णत्वस्यापादनमयुक्तम्, अत आह— **प्रयोग इति**। ननु संज्ञा चेत् कृत्रिमत्वाच्छब्दार्थसंबन्धस्यानित्यत्वप्रसङ्गः, असंज्ञा [16]चेन्न णत्वप्रसङ्गः, अत आह — **सर्वेति**। ननु सौत्रोऽयं निर्देश [17]इत्येव परिहारः कुतो नोक्तः, अत आह — **लोक इति**। भाष्ये वक्ष्यमाणशङ्काभिप्रायमाह — **भवत्विति**। प्रतिषेधपर्यनुयोगस्यानुत्तरत्वं परिहरति— **इतर इति**। साम्यमेवाह — **सर्वत्रेति**। [18]**निपातनमपीति**। णत्वतदभावयोरेकत्र विरोधादिति

---

[1] पा. सू. ६. १. १९७.
[2] पा. सू. ६. १. १८६.
[3] आश्रयिष्यत इति — ट.
[4] पा. सू. १. ३. ९२.
[5] तस्मादेकाचो दिवादौ भावात् — च, छ, ट.
[6] शक्यते वक्तुम् — अ.
[7] पा. सू. ३. १. ७८.
[8] 'सार्वधातुके यक्' इत्यतोऽनुवर्तमानेत्यर्थः।
[9] पा. सू. ३. १. ७८.
[10] पा. सू. ६. ४. २३.
[11] शङ्कनीयमित्यत आह — च, छ, ट.
[12] पा. सू. ४. ३. २३.
[13] पा. सू. ४. ३. १०५.
[14] 'सिद्धान्ते' इत्यस्यानन्तरं तुशब्दोऽधिकः — उ.
[15] णत्वस्योपादानम् — अ, म, ऋ.
[16] चेण्णत्वाप्रसङ्गः — अ, आ.
[17] इत्येवं परिहारः — अ.
[18] प्रदीपे 'निपातनं चापि' इत्यत्र 'निपातनमपि' इत्यन्नंभट्टपाठ इति भाति।

भावः। प्रतिषेधवैलक्षण्यमाह — **प्रतिषेधस्य हीति**। **निवृत्तावेव** [1]अप्रसक्तिप्रतिपादन एव। **निपातनस्य त्विति**। प्रयोगभेदेन [2]भावाभावयोरविरोध इति भावः। 'प्रतिपादने' 'निवृत्तौ'इत्युभयत्र 'तात्पर्यम्' इत्यस्यानुषङ्गः। **न त्विति**। निवृत्तिबोधकाभावादित्यर्थः। [3]स्थानिनो निवृत्तिः स्थानिबुद्धेर्निवृत्तिः। सा च शाकलाभावपक्षे क्रियत इत्याह — [4]**ततश्चेति**। **न तत्रेति**। किंतु तत्प्रसङ्गे तानपहाय शरा एव प्रस्तीर्यन्त इत्यर्थः। तर्हि षष्ठ्यभावस्थले उत्सर्गस्यापि साधुत्वं [5]स्यादित्याह — भाष्ये [6]**तर्हीति**। [7]तत्रोभयोर्युगपद्धातुपरत्वासंभवाद्विकल्पोऽभिप्रेत इत्याह — **विकल्प इति**। ननु 'परः' इति पूर्वमध्यनिवृत्त्यर्थम्, 'सार्वधातुके' इति च विषयसप्तमी। तथा च विकरणद्वयसमुच्चये बाधकाभावः, अत आह — **धात्विति**। **साहायकं** सहायत्वम्, [8]"योपधाद् गुरूपोत्तमाद्वुञ्'। विकरणानां निरर्थकत्वात् सहायमात्रत्वम्, तदेकस्यैव लाघवाद्युक्तमिति भावः। ननु श्यन्नादेः शबादेशत्वे स्थानिवद्भावेन पित्त्वं स्यात्, तथा चोप्रत्ययस्यानुदात्तत्वं स्यात्, अत आह — **श्यन इति**। श्यनो नित्त्वं प्रकृत्याद्युदात्तार्थं क्रियते। स्थानिवद्भावेन श्यनः पित्त्वादनुदात्तत्वे ततः परस्य लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरेणैवाद्युदात्तत्वसिद्धेर्दिवादावनेकाचो धातोरभावेनानिष्टाभावान्नित्करणं व्यर्थं सत् स्थानिवद्भावाभावं गमयतीत्यर्थः। क्वचित् 'श्यनः शित्करणम्' इति पाठः। तत्र स्थानिवद्भावेऽपि शिदेव न पिदिति नियमार्थत्वसंभवात् स्थानिवद्भावाभावस्याज्ञापकमिति वक्तुं शक्यत्वात् 'नित्करणम्' इत्येव पाठः सम्यगित्याहुः[9]। ज्ञापनस्य प्रयोजनमाह — **तेनेति**। प्रयोजनान्तरमाह — **कुर्वतीति**। [10]स्थानिवत्त्वाभावेनैवेत्यर्थः। नुमभावे हेत्वन्तरमाह — **आदिति**। [11]तेन यत्रावर्णान्ताच्छता तत्र शीनद्योर्नुमित्यर्थः। सिद्धान्ते [12]'शप्श्यनोः' इत्यत्र 'आत्' इति नानुवर्तनीयम्, अव्यभिचारात्। आदेशपक्षे उप्रत्ययनिवृत्तये [13]'आच्छीनद्योः' इत्यतः 'आत्' इत्यनुवर्तनीयमिति भावः। ननु [14]"रुधादिभ्यः' इति पञ्चम्या शबित्यस्य 'शपः' इति षष्ठीकल्पनात् शपः परः श्नम् स्यात्, अत आह —**रुधादिभ्य इति**। 'सार्वधातुके' इति सप्तमी 'रुधादिभ्यः' इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यतीत्यागमान्वययोग्यषष्ठ्यभावो न शङ्कनीयः। [15]"श्नान्नलोपः' इति श्नादुत्तरस्याङ्गावयवनकारस्य लोपविधानं रुधादीनामागमेऽपि[16]

---

[1] 'अप्रसक्ति' इत्यादि 'अविरोध इति भावः' इत्यन्तं नास्ति — उ.

[2] भावाभावयोरविरोधयोरिति — म, आ.

[3] 'स्थानिनं निवर्तयति' इति भाष्यार्थानुवादोऽयम्, न तु प्रतीकः। उद्द्योतोऽत्र दर्शनार्हः। तेन प्रदीपे तादृशपाठकल्पनमनावश्यकमिति भाति।

[4] 'ततश्चेति' इति नास्ति — म, आ.

[5] स्यात्, अत आह — ऋ.

[6] 'इह तर्हीति' इति युक्तम्।

[7] अत्रोभयोः — उ.

[8] पा. सू. ५. १. १३२. एतत्सूत्रस्थेन 'सहायाद्वा' इति वार्तिकेन वैकल्पिको वुञित्याशयः।

[9] इदं विवरणकृतोक्तम्। एवं प्रदीपे 'श्यनो नित्करणम्' इति विवरणकृदभिमतपाठ एवान्नंभट्टेन स्वीकृतः। नागेशस्तु 'नित्करणम्' इति पाठस्य स्थानिवत्सूत्रस्थकैयटविरुद्धत्वं वदन् तं पाठमनादृत्य 'शित्करणम्' इति पाठमेवाद्रियते। नियमार्थत्वकल्पनापेक्षयातिदेशबाधकल्पनस्यैवौचित्यं च मन्यते।

[10] स्थानिवद्भावेनैवेत्यर्थः — अ; स्थानिवत्त्वाभावेनेत्यर्थः — म, आ; स्थानिवद्भावाभावेनेत्यर्थः — उ.

[11] 'तेन यत्र' इत्यादि 'नुमित्यर्थः' इत्यन्तं नास्ति — म, उ, ऊ.

[12] पा. सू. ७. १. ८१.

[13] पा. सू. ७. १. ८०.

[14] पा. सू. ३. १. ७८.

[15] पा. सू. ६. ४. २३.

[16] अपिशब्दो नास्ति — ऊ.

लिङ्गमित्याहुः[१]। तर्हि शपः श्रवणं न कुतः, अत आह — **यथेति**। शप इति षष्ठीप्रकल्पनेन तत्प्रसङ्गे श्नमो विधानादित्यर्थः। **एकेति**। एकेनैवाज्ञाताद्यर्थस्य द्योतनसंभवादित्यर्थः। भाष्ये **समस्तते** समः परे ततशब्दे। भाष्ये [२]**यथाप्राप्तं चालोपं** भवानिच्छतीत्यनुषङ्गः। **न तु निपातनेनेति**। निपातनस्याबाधकत्वेनेत्यर्थः। तर्हि [३]'सातत्यम्' इतिवत् [४]'सांतत्यम्' इत्यपि स्यात्, अत आह — **सांतत्यमिति**। तर्हि पुराशब्दादव्ययात् [५]'सायंचिरम्' इति ट्युटयुलोरन्यतरस्मिन् 'पुरातनम्' इति भवति। [६]'पुराणप्रोक्तेषु' इति निपातनात् तन्न स्यात्, अत आह — **पुराणेति**॥

[१, २७४–२७७]

(**रत्नप्रकाशः**) **पूर्वपदात् संज्ञायामग इति णत्वं प्राप्नोतीति**। सर्वेषां नामानि सर्वनामानीत्यन्वर्थसंज्ञाश्रयणात् तथेति भावः। एतेन 'राजपुरुषादिवत् संज्ञाशब्दा अपि शास्त्रप्रक्रियायां सन्तमसन्तं वावयवार्थमाश्रित्य व्युत्पाद्यन्त इति णत्वप्रसङ्गः' इति निरस्तम्। टिघुभादीनां संज्ञाशब्दानामवयवार्थाभावेन संज्ञाशब्दमात्रस्यावयवार्थाश्रयेण व्युत्पादनायोगात्। व्युत्पत्तिपक्षाश्रयेण टिघुभादिसाधारण्येन [७]तथोक्तौ प्रकृतोपयोगाभावात्। सर्वनामशब्देऽवयवार्थसत्त्वेनावयवार्थशून्यानामश्वकर्णादिशब्दानामवयवार्थप्रदर्शनवेलायामेव तथा वक्तुमुचितत्वाच्च। यदप्युक्तम् 'प्रयोगे च सणत्वा अणत्वाश्च नित्या एव शब्दाः। तत्र संज्ञायां सणत्वा एव साधवः, असंज्ञायां त्वणत्वा एवेति शास्त्रव्यापाराण्णत्वं प्राप्नोत्येव। सर्वार्थाभिधानयोग्यस्य च शब्दस्य शक्तिनियममात्रं संज्ञाकरणमिति शब्दार्थसंबन्धनित्यत्वस्यापि न विरोधः' इति। तदपि न, तदर्थस्य भाष्यकारेण स्वेन च प्रागेव दर्शितत्वात्, प्रकृतेऽनावश्यकत्वाच्च। **निपातनाण्णत्वाभाव इति**। तथा च लोकेऽपि तस्य साधुतेति भावः। यदि छान्दसो णत्वाभाव इति ब्रूयात् तदा तस्य लोकेऽसाधुतेत्युक्तप्रायं स्यात्। तत्र निपातनं नामालाक्षणिक[८]कार्यतदभावान्यतरविशिष्टोच्चारणात्मकाचार्याचारः। एतेन 'लोकेऽप्ययं णत्वरहित एव प्रयुज्यते। तस्यात्र प्रसङ्गेन साधुत्वं प्रतिपाद्यते' इति निरस्तम्। लक्षणैकचक्षुष्काणामस्मदादीनां लक्षणानुगत्या साधुत्वस्य प्रयुज्यमानतायाश्च ज्ञेयत्वेन 'लोकेऽप्ययं णत्वरहित एव प्रयुज्यते' [इति] लक्षणनैरपेक्ष्येण स्वस्य प्रयोगद्रष्टृत्वख्यापनानौचित्यात्। 'प्रयोगे सणत्वा अणत्वाश्च नित्या एव शब्दाः' इति स्वोक्त्या सह विरोधाच्च। **किमेतन्निपातनं नामेति**। 'ननु च' इत्यादिना वक्ष्यमाण आशयः। निपातनस्यापि विधिप्रतिषेधसाम्यमेवाभ्युपगन्तव्यमित्याशयेन प्रकृते णत्वाभावनिपातनस्य निषेधसाम्यं प्रतिपादयितुं प्रतिबन्दीमाश्रयते — **अथ कः प्रतिषेधो नामेति**। **गम्यत इति**। अत्रानुमानेन, पूर्वत्र तु शब्देन स गम्यत इत्येतावानेव विशेषः। निषेधलाभस्तु तुल्य एवेति भावः। **ननु चेति**। निषेधवाक्यस्य विकल्पवाचकाघटितस्य निरवकाशस्योत्सर्गप्राप्तनिवर्तकत्वं नित्यमेव भवतीति लोके वेदे चावधारितम्। निपातनरूपाचारस्य तु तद्रूपसाधुत्वख्यापनमात्रेणोपपन्नत्वेनोत्सर्गप्राप्तनिवृत्तिकल्पकत्वं न युज्यत इति भावः। निपातनमात्रेणोत्सर्गनिवृत्तिकल्पनायोगेऽपि [९]मद्वचनोपबृंहितेन तेन तत्कल्पनं युज्यत एवेत्याशयेनाह — **किमन्ये-**

---

[१] विवरणकारा इत्यर्थः।
[२] यथावृत्तं — अ, आ, उ, ऋ.
[३] सांतत्यमितिवत् — म, आ, उ.
[४] सातत्यमित्यपि — म, आ.
[५] पा. सू. ४. ३. २३.
[६] पा. सू. ४. ३. १०५.
[७] यथोक्तौ — ब.
[८] कार्यं च तदभावश्च कार्यतदभावौ, अलाक्षणिकौ च तौ कार्यतदभावौ चेति विग्रहः।
[९] 'बाधकान्येव हि निपातनानि' इति वचनेति भावः।

ऽपीति। किमनेनापादितेन निपातनविषयकेण दोषेण। अन्येऽपि ह्येवंजातीयका विधयो वर्तन्ते। तत्र यथा स दोषस्त्वया परिहर्तव्यस्तथात्र मयेति भावः। **वचनाच्च यण् स्यादिति**। तावतैव वचनस्य चारितार्थ्यादिति भावः। **यथाप्राप्तश्चेति**। तन्निवृत्तौ वचनस्य तात्पर्याभावादिति भावः। **षष्ठ्येति**। स्थानार्थिकयेति शेषः। **निवर्तयतीति**। यथा 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इत्यादौ स्थानषष्ठी दर्भादीन् निवर्तयति तथेति भावः। एतेन "ततश्च संहिताविषये स्वाभाविकोऽप्रयोग इक इति षष्ठीनिर्देशेन प्रतिपाद्यते। यथा 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इति, न तत्र दर्भाः प्रस्तीर्यन्ते" इति निरस्तम्। समस्तशास्त्रस्यैव स्वाभाविकप्रयोगविषयत्वेन विशिष्यात्र तत्कथनायोगात्। षष्ठीनिर्दिष्टत्वेनैव [1]'दर्भाणामप्रस्तार्यत्वेन तदप्रस्तारस्य स्वाभाविकत्वे मानाभावेन तस्य स्वोक्तार्थे दृष्टान्तत्वायोगाच्च। **शप् श्यूयेतेति**। श्यन्नादिविधीनां तत्साधुत्वमात्रप्रतिपादन एव तात्पर्यम्, न तु शब्निवृत्तावपीति पक्षे शबपि श्यूयेतेति भावः। समुच्चयस्तु तत्र न संभवति, केन वा धातुपरत्वमानन्तर्येण लब्धव्यं केन वा तद्व्यवधानेनेति विनिगन्तुमशक्यत्वात्। पर्यायेणैवोभाभ्यामानन्तर्यं व्यवधानं च स्वीकर्तव्यमिति तु न युक्तम्, पर्यायेणानन्तर्यस्य मुख्यस्य लाभेनैवोभयोरुपपत्तौ व्यवधानाश्रयेणापि प्रवृत्तौ मानाभावात्। यत्तूक्तम् 'धातुसार्वधातुकयोरर्थाभिधाने साहायकस्यैकेनैव संपादनात् समुच्चयो न भवति' इति। तन्न, प्रकृतविचारस्य लोकवेदसाधारणत्वेन वेदेऽनेकविकरणप्रयोगदर्शनात्, विकरणं विनापि क्वचिद् धातुसार्वधातुकाभ्यामेवार्थाभिधानाच्च। **शबादेशाः श्यन्नादय इति**। श्यन्नादीनां शित्करणात् [2]"शप्श्यनोर्नित्यम्' इति श्यन्ग्रहणाच्च शबादेशानां स्थानिसंज्ञातिदेशाभावे सिद्धे 'करोति' इत्यत्रोप्रत्ययस्यापित्त्वादनुदात्तत्वं 'कुर्वती' [3]इत्यादौ [4]"शप्श्यनोर्नित्यम्' इति नुम् च न भविष्यतीति भावः। ननु श्यन्नादीनां शित्करणं नियमार्थं स्यात् — 'शित्त्वमेवैषां स्थानिवत्त्वेन, न पित्त्वमिति' इति चेन्न, [5]"हलः श्नः शानज्झौ' इति शानचः शित्करणेनानुबन्धप्रयुक्तसंज्ञाया अल्विधौ वर्तमानायाः [6]"अनल्विधौ' इति निषेधोऽपि भवतीति ज्ञापितत्वेन विधिनियमसंभवे विधेरेव ज्यायस्त्वेन नियमपरत्वाश्रयणानौचित्यात्। [7]"शप्श्यनोः' इत्यत्र श्यन्ग्रहणानर्थक्यापत्तेश्च। एतेन 'श्यनो नित्करणं ज्ञापकं स्थानिवद्भावाभावस्य, तेनोप्रत्ययस्यापित्त्वादनुदात्तत्वं न' इति निरस्तम्। 'वावृतु [8]'वर्तने' इति दैवादिकस्यानेकाचो धातोराद्युदात्तत्वसंपादनेन श्यनो नित्करणस्य सावकाशत्वेन तदुक्तज्ञापकत्वासंभवात्। न च [9]"पत ऐश्वर्ये वा' इति पूर्ववाक्यान्तर्गतस्तत्र वाशब्द इति दिवादावनेकाच् धातुर्नास्त्येवेति तदुक्तं ज्ञापकं युक्तमेवेति वाच्यम्, [10]"ततो वावृत्यमाना सा' इति भट्टिकाव्ये वावृतुधातोरनेकाच एव श्यन्प्रकृतित्वेन दर्शितत्वेन तदनुगुणधातुवृत्तेरेवाश्रयितुं युक्तत्वात्। ननु स्थानिवत्संज्ञातिदेशाभावे श्यन्नादीनां प्रत्ययसंज्ञापि न स्यात्, तथा च 'करोति, तुदति' इत्यादा[11]वुशयोरुदात्तत्वं न स्यादिति चेन्न, श्यन्नादीनामादेशानां प्रत्ययाधिकारे विहितत्वेन साक्षादेव प्रत्ययसंज्ञाविधानसंभवात्। न च ['न च] प्रत्ययविधौ' इत्युत्तरभाष्यविरोधः, अनादेशप्रत्ययविधाविति तदर्थत्वात्। एवमेव [12]"उतश्च प्रत्ययाद-

---

[1] दर्भाणामप्रस्तीर्त्यत्वेन — ब.
[2] पा. सू. ७. १. ८१.
[3] 'इत्यादौ' इत्यस्यानन्तरं चशब्दोऽधिकः — ब.
[4] पा. सू. ७. १. ८१.
[5] पा. सू. ३. १. ८३.
[6] पा. सू. १. १. ५६.
[7] पा. सू. ७. १. ८१.
[8] 'वरणे' इति कौमुद्यां माधवीयधातुवृत्तौ च दृश्यते।
[9] 'तप ऐश्वर्ये वा' इत्यस्य पाठान्तरमिदमिति कौमुद्याम्।
[10] भट्टिकाव्ये श्लो. १६६.
[11] उप्रत्ययशप्रत्ययययोरित्यर्थः।
[12] पा. सू. ६. ४. १०६.

दसंयोगपूर्वात्' इत्यत्र प्रत्ययग्रहणस्योपपन्नत्वेन तस्य स्थानिवद्भावेन शबादेशे प्रत्ययसंज्ञाज्ञापकता नाश्रयणीया। ननु श्नमः शब्निवर्तकत्वं कथमिति चेत्, रमागमस्य [1]रोपधनिवर्तकत्ववद् द्रष्टव्यम्। एतेन "[2]'रुधादिभ्यः श्नम्' इत्यत्र रुधादीनां श्रुतत्वात् तेषामेवान्त्यादचः परः श्नम् भवति, न तु शपः परः" इति निरस्तम्। आदेशविधौ शपोऽपि निर्देशस्यावश्यकत्वेन तस्यापि रुधादिवत् श्रुतत्वानपायात्। शपो निवृत्तस्यावधित्वासंभवेनैव श्नमो धात्वचः परतोपपत्तेश्च। **इह तर्हीति**। अत्र पञ्चमीनिर्देशाभावेन 'कः' इत्यनुवृत्तस्य षष्ठीप्रकल्पनाभावेनाकचः कादेशत्वं वक्तुं न शक्यत इति काकचोर्देशभेदेनाविरुद्धत्वात् समुच्चयः स्यादिति भावः। एतेन 'देशभेदाद्विरोधाभावेऽपि काकचोरेकार्थत्वाद्विकल्प एव चोद्यते, न समुच्चयः' इति निरस्तम्। एकार्थताभ्युपगमेन नाप्राप्तिन्यायमुल्लङ्घ्य विकल्पापादनापेक्षया [3]'अव्ययसर्वनाम्नाम्' इति षष्ठीनिर्देशबलेनाकच आगमत्वापादनपुरस्सरसमुच्चयापादनस्यैव सौष्ठवात्। **नाप्राप्ते हि क इति**। रम्श्नमोर्मित्त्वेनागमत्वेऽपि यथादेशत्वप्रत्ययत्वे[4] भवतः, एवमकचोऽप्युक्तप्रकारेणागमत्वेऽपि प्रत्ययसंज्ञाधिकारात् प्रत्ययत्वम्, अत एवाज्ञाताद्यर्थकत्वं च संभवतीति [5]'उक्तार्थानामप्रयोगः' इत्यौत्सर्गिकन्यायेनाकचः कप्रत्ययेन नाप्राप्ते आरब्धत्वाद् व्यर्थीक्रियमाणत्वाच्च तदपवादत्वमेवेति भावः। तदेवं निपातनप्रतिक्षेप्तृमुखेनैवापवादस्योत्सर्गबाधकत्वं वाचयित्वा तत्साम्येन निपातनस्याप्युत्सर्गनिवर्तकत्वमभ्युपेयमित्याशयेनाह — **निपातनमपीति**। **कर्तव्योऽत्र यत्न इति**। [6]'अपरस्पराः क्रियासातत्ये' इति निर्देशो व्याकरणान्तरपठितस्य 'लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि। समो वा हिततत्तयोर्मांसस्य पचि युड्घञोः' इत्यस्यात्र संमतत्वमेव सूचयतीति व्याख्येयमिति भावः। ननु ष्यञि 'सांतत्यम्' इत्यप्यस्मिन् पक्षेऽभ्युपगम्यमिति चेत्, ओम्। यदि केनचित् प्रमाणेन 'सांतत्यम्' इत्यस्यासाधुत्वं बुद्धं तर्हि [7]'अव्यविक'न्यायेन सततशब्दादेव ष्यञ् न तु संततशब्दादिति समाधेयम्। **बाधकान्येवेति**। क्वचिदिति शेषः। तावतापि प्रकृतदोषपरिहारात्। तेन "पुराणप्रोक्तेषु' इत्यत्र तुडभावस्य निपातनेऽप्यौत्सर्गिकस्य तुटो निवृत्तिर्नेति 'पुरातनम्' इत्यपि भवति। तथा [8]"विभाषा फाल्गुनीश्रवणा' इत्यणो लुग्निपातनेनाणो निवृत्त्यभावात् 'श्रावणी' इत्यपि भवति। तदिदं सर्वमालोच्य 'अबाधकान्यपि निपातनानि' इति परिभाषासु पठितं प्राचीनैः। एतेन 'बाधकान्येव निपातनानि' इति भाष्यस्य सार्वत्रिकतामाश्रित्य पुराणशब्दस्य पृषोदरादित्वात् पुरातनशब्दनिवृत्तिर्न भवतीति वदन् निरस्तः। पुराणशब्दस्य पृषोदरादित्वे आश्रीयमाणे पुरातनशब्दस्य पृषदुदरादिवन्निवृत्तिप्रसङ्गस्यैव दृढत्वेन तन्निवृत्त्यभावस्यासिद्धेः॥

[१, २७४–२७७]

(**नारायणीयम्**) नन्ववयवार्थाभावेनावयवकल्पनानुपपत्तेः पूर्वपदसत्त्वं कथं संज्ञास्वित्यत आह—

---

[1] रश्चोपधा चानयोः समाहारो रोपधमिति समाहारद्वन्द्वो बोध्यः।

[2] पा. सू. ३. १. ७८.

[3] पा. सू. ५. ३. ७१.

[4] आदेशत्वप्रत्ययत्वयोः रम्श्नमोर्यथासंख्यमन्वयः।

[5] महाभाष्यम् १. १. ४४.

[6] पा. सू. ६. १. १४४.

[7] द्वयोः शब्दयोः सभानार्थकयोरेकेन विग्रहोऽपरस्मात् प्रत्ययोत्पत्तिर्भविष्यत्वव्यविकन्यायेन। तद्यथा, अवेर्मांसमिति विगृह्यते, अविकशब्दात्प्रत्ययोत्पत्तिर्भवति 'आविकम्' इति। महाभाष्यम् ४. १. ८८.

[8] पा. सू. ४. ३. १०५.

[9] पा. सू. ४. २. २३.

राजेति। राजपुरुषादिशब्दस्यापि परमार्थतोऽखण्डत्वात् साधुत्वानुशासनायैवावयवावयविकल्पनम्। तत् संज्ञास्वपि समानमित्यर्थः। एष तु विशेषः संज्ञास्वित्याह — **सन्तमिति**। अन्वर्थसंज्ञासु सन्, इतरत्रासन्। असंज्ञासु तु सन्नेवावयवार्थ इत्यस्ति विशेषः। अवयवकल्पनं तु व्युत्पत्त्यर्थमविशिष्टमित्यर्थः। ननु लोकसिद्धानुगमनमात्रं शास्त्रेण कार्यम्। [1]सर्वनामशब्दे च न लोकसिद्धं णत्वमिति कथं शास्त्रप्राप्तिः, तत्राह — **प्रयोग इति**। यद्यप्यत्र णत्वाप्रयोगः, तथापि संज्ञान्तरे णत्वप्रयोगात् तस्यानुगमनं [2]'पूर्वपदात्' इति शास्त्रेण क्रियते। तदनुगमनिमित्तं चात्रास्तीत्यणत्वस्याप्यसाधुत्वं प्राप्तमित्यर्थः। किं च गोगाव्यादिवत् सर्वनामसर्वणामयोरपि प्रयोगात् सणत्वस्य शास्त्रानुगत्या साधुत्वं वैपरीत्याच्च वैपरीत्यमणत्वस्य प्राप्तम्। **णत्वं प्राप्नोत्येवेति**। णत्वान्वाख्यानादणत्वस्यासाधुत्वं[3] प्राप्तमित्यर्थः। नन्वेवमप्यलौकिकेऽस्मिन्[4] कथं णत्वप्राप्तिरित्याशङ्क्य वृद्धिसूत्रोक्तं मा विस्मार्षीरित्याह — [5]**सर्वार्थेति**। शक्तिनियमनमात्रं संज्ञाकरणमिति लौकिकत्वाहानिरित्येतदवश्याश्रयणीयमित्याह — **शब्दार्थेति**। यदि ह्यपूर्वविनियोगः स्यात् ततः शब्दार्थसंबन्धनित्यत्वविरोधः। अतस्तत्परिहारायापि शक्तिनियमनस्वीकारो न केवलं लौकिकत्वसिद्धय इत्यर्थः। निपातनेन णत्वाभावोपपादनं व्यर्थम्, सणत्वप्रयोगस्यैव कार्यत्वात्, अत आह — **लोकेऽपीति**। निपातनस्वरूपस्योत्तरेऽनिर्वचनान्न तत्स्वरूपप्रश्नः, [किं तु तद्बाधकत्वप्रकारप्रश्नः।] [6]तद्बाधकत्व आशङ्क्ते प्रतिषेधस्वरूपप्रश्नोऽनुपपन्न इत्याशङ्क्य तत्रापि न तत्स्वरूपप्रश्नः, परं तु बाधकत्वप्रकारप्रश्नः प्रतिबन्द्या निपातनस्यापि बाधकतां प्रतिपादयितुमित्याह — **इतर इति**। साम्ये प्रतिबन्दी, तत्तु कुत इत्यत आह — **सर्वत्रेति**। अप्राप्त्यनुमापकत्वयोग्यताया बाधनिमित्तस्य समानत्वान्नेति वचनावचनवैलक्षण्यवचनं न प्रतिबन्दीत्वविघातकमित्याशङ्क्य तदनुमापकत्वयोग्यतैव नञनुपादानाद् दुर्ज्ञानेति [7]भाष्यभावमाह — **प्रतिषेधस्येति**। ननु प्रतिषेधप्रतिबन्दीनिरासादेव यण्प्रतिबन्द्यपि निरस्ता, अत आह — [8]**इक इति**। नञुपादानवैलक्षण्यस्यासत्त्वात् प्रतिबन्दीत्वमिति भावः। नञनुपादानेऽपि निवृत्तेर्द्योतकान्तरमस्तीति यण्प्रतिबन्द्यपि निरस्ता। तत्र कथ षष्ठ्या निवृत्तिप्रतिपादनम्, इको निवर्तनेन यणागमने शब्दानित्यत्वापातात्, अत आह — **तत-श्चेति**। **निवर्तनं** नाम स्वाभाविकाभावज्ञापनम्, न स्थितनिरास इत्यर्थः। निवृत्तिद्योतकविधुरं प्रतिबन्ध्यन्तरमुत्थापितम्। तत्र किं समुच्चयः शङ्क्यते उत विकल्प इत्यपेक्षायामाह — **विकल्प इति**। विकरणार्थः कर्त्रादिरिति मते [9]एकार्थत्वाद्विकल्पोपपत्तिः। सार्वधातुकार्थः कर्त्रादिरिति मतेऽपि विकल्पप्राप्तिमुपपादयति — **समुच्चयस्त्विति**। धात्वानन्तर्यस्योभयोरपि [10]चोदनाप्राप्तत्वात् तस्य च समुच्चयेऽसंभवाद्विकल्पनमित्यर्थः। ननु व्यवहितेऽपि परशब्दप्रवर्तनात् प्रायोगिकपरत्वस्यासंभवेऽपि विधिकालीनपरत्वस्य संभवाच्च समुच्चयोऽपि संभावितो विकरणसार्वधातुकवदित्यत्राह — **धात्विति**। अभिधैक्याभावेऽपि फलैक्याव्रीहियववद्विकल्प इत्यर्थः। धातुसहायता सार्वधातुकसहायता[च] मतभेदेन। मध्यस्थस्य साधारणतयोभयसहायत्वं वा। आदेशत्वे प्राप्तमनिष्टं निवारयति — **श्यनश्चेति**। नुमभावे हेत्वन्तरमाह — **आदितीति**। अस्मिन् पक्षेऽ-

---

[1] सर्वनामेति शब्द इत्यर्थः।
[2] पा. सू. ८. ४. ३.
[3] अणत्वस्य साधुत्वं — क.
[4] सर्वनामेति संज्ञाशब्द इत्यर्थः।
[5] सर्वत्रेति — क.
[6] तत्साधकत्वे — क.
[7] भाष्ये भावमाह — क.
[8] 'यण इति' इत्युचितं भाति। 'इको यणचीति यणो हि' इति विशिष्टं कैयटग्रन्थतया वाभिमतं स्यात्।
[9] 'एकार्थास्तु विकल्पेरन्' इति मीमांसासूत्रमिहाभिप्रेतम्।
[10] चोदनाप्राप्तित्वात् — क.

निष्टान्तरमपि निह्नुते — **रुधादिभ्य इति** । मित्त्वादागमत्वनिश्चये सत्यागम्यपेक्षायां स्ववाक्यसंनिहितरुधादीनागमितयापेक्षते, न प्रकृतशपमित्यर्थः । यदि तस्यागमत्वं तर्हि शपो निवृत्तिर्न स्यादित्याशङ्क्य तत्प्रसङ्गे तस्य विधानाच्छपं प्रत्यादेशत्वमपीत्याह — **यथेति** । [1]'रोपधयोः' इति षष्ठीनिर्देशसामर्थ्याद्रोपधे निवर्तयति, मित्त्वसामर्थ्याच्चान्त्यादचः परः । तत्प्रसङ्गे विधानमेव हि निवर्तकताप्रयोजकम्, न पुनस्तद्देशत्वमपि । प्रस्तुते च तत्प्रसङ्गे विधानं 'शपः' इति षष्ठीविपरिणामादिति देशान्तरे भवन्नपि श्नम् शपं निवर्तयति । [2]'अव्ययसर्वनाम्नाम्' इति षष्ठीनिर्देशात् 'कस्य' इति षष्ठीप्रकल्पनानुपपत्तेर्निवृत्तिद्योतककल्पनमपि नास्तीत्यकच्प्रतिबन्ध्यभिहिता । तत्रैकेन परदेशस्यावष्टम्भादिति प्रागुक्तविकल्पोपपादकविरहात् समुच्चय एव शङ्कचत इति शङ्कां विकल्पोपपादनेन निरस्यति — **देशेति** । समुच्चये विरोधाभावेऽपीत्यर्थः । सातत्यनिपातनस्याबाधकत्वे यत्नकरणं कीदृशमित्यपेक्षायां निपातनमेव नाश्रयणीयम्, अनुनासिकलोप एव तु यत्नः कार्य इत्याह — **लुम्पेदिति** । गौरवं परिहरति — [3]**अन्यार्थमिति** । कृत्यादिष्ववश्यमादीनां [4]लोपार्थमित्यर्थः । समस्तते लोपस्यार्थत्वाभावादाह — **श्लोक इति** । अस्य वचनस्य श्लोकात्मकत्वात् तत्पूरणाय पदान्तरमवश्यं प्रक्षेप्यमिति [5]निपातनानाश्रयणाय ततशब्दप्रक्षेपणमित्यर्थः । ननु [6]निपातनानाश्रयणे ष्यञन्तेऽपि रूपद्वयापत्तेः ष्यञन्तविषयं निपातनमाश्रयणीयम्, तस्य च तत्र बाधकत्वम्, अन्यत्र च लोपो विकल्पयितव्य इत्यत आह — **सान्तत्यमिति** । निपातनबाधकत्वे प्रसक्तमनिष्टान्तरं निवारयति — **पुराणेति** ॥

[१, २७८–२८१]

(**लघुविवरणम्**) अत्यन्तभेदेनाभूततद्भावविषयश्च्वप्रत्ययोऽनुपपन्न इत्यत आह — **य इति** । ननु [7]'समासकृत्तद्धित' इत्यनेन क्रमेण समासादिसंज्ञानामेकसंज्ञाधिकारे कर्तव्यत्वाभिधानात् परया संज्ञासंज्ञया सर्वनामसंज्ञाया बाधनान्न दोष इत्यत आह — **समासेति** । असर्वलिङ्गो जातिसंज्ञो भवतीत्यर्थः । **बहुव्रीहाविति** । [8]'न बहुव्रीहौ' इत्यनेन । सर्वादीनां केवलानां विधीयमाना सर्वनामसंज्ञा कथं तदन्तस्य प्राप्नोतीत्यत आह — **प्रयोजनमिति** । **नन्विति** । [9]'समासप्रत्ययविधौ प्रतिषेधः' इत्यनेन [10]'येन विधिस्तदन्तस्य' इति तदन्तविधेः प्रतिषेधाद् गृह्यमाणादेव [11]'टिड्ढाणञ्' इत्यादिना स्त्रीप्रत्ययाः प्राप्नुवन्ति, न तु तदन्तात् । [12]'अनुपसर्जनात्' इत्यधिकारे तु तत उत्तरं तदन्तविधेर्ज्ञापनात् तदन्तात् स्त्रीप्रत्ययः सिद्धो भवति । यद्यपि [13]'टिड्ढाणञ्' इत्यादौ तदन्तविधिरस्तीत्येतावन्मात्रम् [14]'अनुपसर्जनात्' इत्यधिकारेण ज्ञाप्यते, तथाप्युपसर्जनात् प्रतिषेधात् प्रधानादेव पर्यवस्यतीति 'प्रधानेन' इत्युक्तम् । प्रधानेन तदन्तविधिः [15]किमर्थं इत्यत आह — **कौम्भकारेय इति** ।

---

[1] पा. सू. ६. ४. ४७.
[2] पा. सू. ५. ३. ७१.
[3] अन्यार्थ इति — क.
[4] लोपार्थ इत्यर्थः — क.
[5] निपातनाश्रयणाय — क.
[6] निपातनाश्रयणे — क.
[7] का. वा. १. ४. १—४१.
[8] पा. सू. १. १. २९.
[9] का. वा. १. १. ७२ — ३.
[10] पा. सू. १. १. ७२.
[11] पा. सू. ४. १. १५.
[12] पा. सू. ४. १. १४.
[13] पा. सू. ४. १. १५.
[14] पा. सू. ४. १. १४ .
[15] किमर्थक इत्यत आह — ण.

अयं भावः — [1]'टिड्ढाणञ्' इत्यत्राणिति प्रत्ययग्रहणात् प्रत्ययग्रहणपरिभाषया तदन्तविधौ कुम्भकारशब्दे कारशब्दस्यैवाणन्तत्वात् तत एव स्त्रीप्रत्यये सति [2]'यस्य' इति [3]लोपे कृते कारीशब्दस्यैव प्रत्ययग्रहणपरिभाषया स्त्रीप्रत्ययान्तत्वात् [4]'स्त्रीभ्यो ढक्' इत्यत्र च स्त्रीप्रत्ययग्रहणादपत्यार्थविवक्षायां कुम्भकारीशब्दे कारीशब्दादेव ढक् स्यात्। ततश्च तस्यैव ढक्यङ्गत्वाद् वृद्धिः स्यात्, न तु कुम्भशब्दस्येति कौम्भकारेय [5]इति न सिध्यति। सति तु प्रधानेन तदन्त[6]विधावणन्तात् कुम्भकारशब्दात् स्त्रीप्रत्यय इति [7]तस्यैव स्त्रीप्रत्ययान्तत्वात् तत एव ढकि सति कुम्भशब्दस्यादिवृद्धौ सिध्यति 'कौम्भकारेयः' इति। ननु [8]'टिड्ढाणञ्' इत्यत्राणिति कर्मण्यणः कृतो ग्रहणात् कृद्ग्रहणपरिभाषया कारकपूर्वस्यापि ग्रहणे कुम्भकारशब्दात् स्त्रीप्रत्यय इति पूर्वोक्तप्रकारेण कौम्भकारेयः सिद्धः प्रधानेन तदन्तविधिज्ञापनमन्तरेणापीत्यत आह — **न चेति**। [9]'तस्यापत्यम्' इत्यादिना विहित इति भावः। कृत एव ग्रहणे कृद्ग्रहणपरिभाषेत्यर्थः। परिहरति — **नैतदिति**। 'अनुपसर्जने' इति सप्तम्यन्तम्,[10] 'न' इति प्रतिषेधात् प्रत्ययग्रहणपरिभाषया तदादिनियमाभावादिति योजना। [11]'स्त्रीभ्यो ढक्' इत्यत्र तदादिनियमाभावात् समुदायाड्ढगित्यर्थः। नन्वकारात्कारावनूद्यानुपसर्जनस्येति नियम्यते। न चोद्देश्यविधेययोः समासनिर्देशो युक्त इत्यत आह — **सुपामिति**। 'अकारान्तात्' इति भाष्यदर्शनादकारेण तदन्तविधिः पञ्चमीसमासश्चेति शङ्का स्यात्। न च तदुभयं युक्तम्, लक्षणाभावादित्यत आह — **अकारेणेति**। भाष्यकारेण वस्त्वर्थं उक्तः। आनन्तर्यविषयषष्ठ्याश्च समास इति भावः। **अनकारान्ताभ्यामिति**। अदादेशे कृते शेषे लोप इति भावः। शङ्कते — **एवमिति**। प्रियद्विरित्यादौ दोषान्तरमाह — **तदोरिति**। **अविशेषितमिति**। अनुपसर्जनस्येत्येवम्। **अपरिहृतमिति**। ततश्चोपसर्जनस्यापि प्राप्नोतीति भावः॥

[१; २७८–२८१]

(**विवरणम्**) गणपठितेभ्यः संज्ञोपसर्जनानां भेदादप्राप्तेः संज्ञाया [12]नार्थः प्रतिषेधेनेति शङ्कां निरसितुं भाष्ये [13]च्विरध्याहृतः, तमुपपादयति — **य इति। न त्विति**। संज्ञा च प्रातिपदिककार्यम्, विभक्तिनिरपेक्षत्वादित्यर्थः। ननु संज्ञायमानः प्रसिद्धाभिधेयगुणयोगेनाप्राप्तो न गौण इति कथं गौणमुख्यन्यायशङ्केत्यत आह — **प्रसिद्धीति**। यद्यपि संज्ञार्थो न [14]प्रसिद्धसर्वशब्दार्थ[15]गुणात् प्राप्तः, तदभावान्न प्रसिद्धो मुख्योऽपि, तथापि गौणमुख्ययोर्मुख्यस्य[16] ग्रहणे यो न्यायो झटिति [17]प्रसिद्धिः, [18]गौणत्यागे च विलम्बितप्रतीतिः, सोऽत्रापि तुल्य [19]इति भावः। **समासेति**। अनेन क्रमेणैताः संज्ञा

---

[1] पा. सू. ४. १. १५.
[2] पा. सू. ६. ४. १४८.
[3] 'लोपे' इत्यस्यानन्तरं चकारोऽधिकः — ण.
[4] पा. सू. ४. १. १२०.
[5] इतिशब्दो नास्ति — ण, त.
[6] विधावणन्तत्वात् — ड, ढ, ण.
[7] कुम्भकारीशब्दस्यैवेत्यर्थः।
[8] पा. सू. ४. १. १५.
[9] पा. सू. ४. १. ९२.
[10] 'सप्तम्यन्तम्' इत्यस्यानन्तरं 'पदम्' इत्यधिकम् — त.
[11] पा. सू. ४. १. १२०.
[12] अनर्थकः प्रतिषेध इति — ञ.
[13] ईकारोऽध्याहृतः — ट.
[14] प्रसिद्धः सर्व — च, छ; प्रसिद्धे सर्व — ट.
[15] गुणादप्राप्तः — ञ.
[16] मुख्यग्रहणे — ञ.
[17] प्रसिद्धः — ट.
[18] गौणत्वाभावेन च — च, छ; गौणन्याये च ञ; गौणत्यागेन च — ट.
[19] इत्यभिप्रायः — ञ.

एकसंज्ञाधिकारे कर्तव्या इति वक्ष्यत आकडारसूत्रे । [1]तदनपेक्ष्यायं संज्ञाप्रतिषेध इत्यर्थः । **बह्वृति** । [2]'न बहुव्रीहौ' इत्यनेन सर्वनामसंज्ञाप्रतिषेधादित्यर्थः । [3]नन्वतिसर्वशब्दो गणे न पठ्यते, विशेष्यासंनिधानाच्च न तदन्तविधिः संज्ञाविधौ, [4]कथमुपसर्जनान्ते प्राप्तिरित्यत आह — **प्रयोजनमिति** । वाक्यभेदेन पाठविशेषणं सदृष्टान्तमाह — **यथेति** । 'किमविशेषेण' इत्यस्य सर्वादिषु मध्ये विशेषानाश्रयणेन पाठात् पर्युदासः, सर्वेषामेवेति यावदित्यर्थश्चेत् 'नेत्याह' इत्युक्त्वा 'विशेषेण च' इति चेनाविशेषेणेत्याकृष्य सर्वेषामेव पाठात् पर्युदास इत्युक्तौ निषिद्धस्यैवाङ्गीकरणं विरुध्यते । विशेषेणेत्यभिधानं च मुधेत्यतोऽन्यथा व्याचष्टे — **किं यदिति** । नान्तर्गणनिबन्धनमित्यर्थः । न हि स्मायादि सर्वेषां [5]सर्वादीनां कार्यम्, उभभवदादावसंभवात् । भाष्ये चाविशेषेणेत्यत्रान्तर्गणो विशेषशब्दार्थः । तथा चान्तर्गणानाश्रयणेन विधीयमानकार्याय किं पाठात् पर्युदास [6]इत्यध्याहृत्य भाष्यं व्याख्येयम् । **न संनिवेशेति** । सर्वादिगणसंनिवेशापेक्षमित्यर्थः । **तदिति** । संज्ञोपसर्जनयोरपीत्यर्थः । **तत्र हीति** । न गणपठितत्वाकारेणेत्यर्थः । 'सर्वाद्यानन्तर्य' इत्यनेन सर्वनामसंज्ञानपेक्षेत्युक्तम् । स्त्रीप्रत्ययप्रकरणपठितमपि तत्रानुपयुज्यमानं [7]कार्यान्तरार्थं विज्ञातव्यमिति दर्शयितुं तत्रानुपयोग उक्तः 'अनुपसर्जनादित्येष योगः प्रत्याख्यायते' इत्यनेन, तदाक्षिपति — **नन्विति** । अयं भावः — असति सूत्रे "समासप्रत्ययविधौ प्रतिषेधः' इत्यनेन [9]'येन विधिस्तदन्तस्य' इति तदन्तविधेः प्रतिषेधाद् गृह्यमाणादेव प्रातिपदिकात् प्रत्ययग्रहणे च[10] प्रत्ययग्रहणपरिभाषया प्रत्ययप्रकृतिसमुदायादेव स्त्रीप्रत्ययाः प्राप्नुवन्ति, न तु तदन्तात् । अनुपसर्जनाधिकारे तु तत उत्तरं तदन्तविधेर्ज्ञापनात् तदन्तात् स्त्रीप्रत्ययाः सिध्यन्तीति । यद्यप्युत्तरत्र तदन्तविधिरस्तीत्येतावन्मात्रमनुपसर्जनाधिकारेण ज्ञाप्यते, [11]तथाप्युपसर्जनात् प्रतिषेधात् तदन्तविधिः प्रधाने फलवानिति 'प्रधानेन' इत्युक्तम् । प्रधानेन तदन्तविधौ प्रयोजनमाह — **कौम्भकारेय इति** । अयमर्थः — अणः स्त्रीप्रत्ययो विधीयमानः प्रत्ययग्रहणपरिभाषया तदन्तविधौ कुम्भकारशब्दे कारशब्दादेव भवति । तत्र ङीपि [12]'यस्य' इति लोपे कुम्भकारीशब्दे कारीशब्द एव प्रत्ययग्रहणपरिभाषया स्त्रीप्रत्ययान्त इति [13]'स्त्रीभ्यो ढक्' इत्यत्र च स्त्रीभ्य इति प्रत्ययग्रहणात् कारीशब्दादेवापत्यार्थविवक्षायां ढक् स्यात् । ततश्च तस्यैव ढक्यङ्गत्वाद् वृद्धिः स्यात्, न [14]कुम्भशब्दस्येति कौम्भकारेयो न सिध्यति । सति तु तदन्तविधौ कुम्भकारशब्दान्ङीपि कुम्भकारीशब्दस्य स्त्रीप्रत्ययान्तत्वात् तत एव ढकि तस्मिन् समुदायस्याङ्गत्वात् कुम्भशब्दे वृद्धिरादेः सिध्यति, इति । ननु [15]'टिड्ढाणञ्' इत्यत्राणिति कर्मण्यणः कृतो ग्रहणात् [16]'कृद्ग्रहणे गतिकारकपूर्वस्यापि' इति कर्मकारककुम्भ[17]पूर्वस्याप्यणन्तस्यग्रहणात् कुम्भकारशब्दान्ङीप्युक्तरीत्या समुदायाड्ढकि सिद्धः कौम्भकारेय इत्यत आह — **न चेति** । [18]'प्रा-

---

[1] तदनपेक्षः संज्ञा — छ, ट.
[2] पा. सू. १. १. २९.
[3] ननु सर्वशब्दो गणे पठ्यते — च, छ, ट.
[4] कथमत उपसर्जनान्ते प्राप्तिः — छ, ट; कथमुपसर्जनानां न प्राप्तिः — ज.
[5] सर्वनामकार्यं — च, छ, ट.
[6] 'इत्यध्याहृत्य' इत्यनन्तरं चकारोऽधिकः — च, छ, ट.
[7] कार्यान्तरार्थमपि ज्ञातव्यमिति — ज.
[8] का. वा. १. १. ७२— ३.
[9] पा. सू. १. १. ७२.
[10] चकारो नास्ति — ज.
[11] तथाप्युपसर्जने — ज.
[12] पा. सू. ६. ४. १४८.
[13] पा. सू. ४. १. १२०.
[14] कुम्भस्येति — च, छ, ज.
[15] पा. सू. ४. १. १५.
[16] परिभाषा २८.
[17] पूर्वस्यापि तदन्तस्य — ज.
[18] पा. सू. ४. १. ८३.

ग्दीव्यतोऽण्' इत्यादिः। कृत एव ग्रहणे कृद्ग्रहणपरिभाषेति भावः। परिहरति — **नेति**। स्त्रीप्रत्ययेऽनुपसर्जने तदादिनियमो नास्तीति कारशब्दादपि ङीपि कुम्भकारीशब्दात् ढक् सिध्यतीत्यर्थः। नन्वकारात्कारावनूद्यानुपसर्जनस्यैवेति नियम्यते, न च समासे एकदेशस्योद्देश्यत्वं विधेयत्वं चैकदेशान्तरस्येति युक्तमित्यत आह — **सुपामिति**। **अकारेणेति**। अश्च अच्च आत्, अस्य आत् [1]आदिति द्वन्द्वेन षष्ठीतत्पुरुष इति। तात्पर्यार्थस्तु भाष्यप्रदीपकाराभ्यामुक्तः। न त्वत्राकारेण तदन्तविधिः, नापि पञ्चमीसमासः, विशेष्यासंनिधानाल्लक्षणाभावाच्च। **विधीयत इति**। विधानोत्तरकालमपि नाकारान्तादत्कारः परः, शेषे लोपस्य टिलोपत्वादित्यपि द्रष्टव्यम्। चोदयति — **एवं त्विति**। प्रियद्विरिति त्विष्यत इति भावः। **अपरिहृतमिति**। एतदपरितोषाद् भाष्ये परिहारान्तरमिति भावः॥

[१, २७८–२८१]

(**उद्द्योतनम्**) गणपठितानां संज्ञा, संज्ञोपसर्जनानां ततो भिन्नत्वात् संज्ञा न प्राप्नोतीति प्रतिषेधानर्थक्यमिति शङ्कानिरासाय भाष्ये च्विरध्याहृतः। तमुपपादयति — **य इति**। **विषयान्तरे** कात्स्न्यार्थे। **इमां** संज्ञोपसर्जनावस्थाम्। ननु गौणमुख्यन्यायेनैव संज्ञानिवृत्तिसंभवात् प्रतिषेधो [2]न वक्तव्यः, अत आह — **पदकार्येष्विति**। संज्ञा च प्रातिपदिककार्यम्, विभक्त्यनपेक्षत्वादिति भावः। [3]**उक्तमिति**। [4]"ओत्' इति सूत्रे। उक्तमितीह नोक्त इत्यन्वयः। ननु संज्ञाशब्दस्य गौणत्वाभावेन न्यायस्यासंभव एवानुक्तिबीजम्, अत आह — **प्रसिद्धीति**। मुख्यस्य ग्रहणे शीघ्रप्रतीतिर्हेतुः, गौणत्यागे विलम्बितप्रतीतिः। न तु गौणत्वं मुख्यत्वं वा [5]न्यायप्रविष्टम्। अत्रापि कात्स्न्यार्थस्य पूर्वं प्रतीतिः संज्ञार्थस्य पश्चादिति स न्यायोऽत्रापि[6] संभवत्येवेत्यर्थः। कृत्रिमत्वात् संज्ञार्थ एव पूर्वं प्रतीयत इति गौणमुख्यन्यायोऽत्र न संभवतीत्याहुः। आकडारसूत्रे वक्ष्यमाणप्रकाराश्रयणे संज्ञाप्रतिषेधो व्यर्थ इत्याह — **समासेति**। अनेन क्रमेणैताः संज्ञा एकसंज्ञाधिकारे कर्तव्या इति वक्ष्यते। **तत्र** तस्मिन्। ननु [7]"अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति प्रादिसमासेऽप्युपसर्जनत्वम्, अतिक्रान्तं सर्वं येनेति बहुव्रीहावपि। तत्र कोऽयं समासः, अत आह — **प्रादीति**। **'बह्विति**। [9]"न बहुव्रीहौ' इत्यनेन। तथा चानेन निषेधवैयर्थ्यमित्यर्थः। ननु विशेष्यासंनिधानेन तदन्तविध्यभावात् कथमतिसर्वशब्दे संज्ञाप्रसक्तिः, अत आह — **प्रयोजनमिति**। वाक्यभेदेन पाठविशेषणत्वं सदृष्टान्तमाह — **यथेति**। तत्र पाठविशेषणप्रयोजनं [10]"चनचिदिवगोत्रादि' इत्यत्र गोत्रादेः कुत्सनाभीक्ष्ण्ययोरेव कार्यं नान्यत्रेति। 'किमविशेषेण' इत्यस्य सर्वादिषु मध्ये विशेषानाश्रयणेन, सर्वेषामेवेति यावदित्यर्थश्चेत् 'नेत्याह, विशेषेण च' इति निषिद्धस्यैव चकारेणानुकर्षणं विरुद्धम्, 'विशेषेण' [11]इत्युक्तेर्वैयर्थ्यं च। अतोऽन्यथा व्याचष्टे — **किमिति**। भाष्ये 'अविशेषेण' इत्यत्रान्तर्गणो विशेषशब्दार्थः। तथा चान्तर्गणानाश्रयेण[12] विधीयमानकार्याय किं पाठात्

---

[1] 'आदिति' इत्यस्यानन्तरं चकारोऽधिकः —च, छ.
[2] न कर्तव्यः — म.
[3] उक्तमेतदिति — अ, ऋ.
[4] पा. सू. १. १. १५.
[5] न्याये प्रविष्टम् — म, आ.
[6] अपिशब्दो नास्ति — इ, ऊ.
[7] महाभाष्यम् २. २. १८.
[8] बहुव्रीहाविति — उ.
[9] पा. सू. १. १. २९.
[10] पा. सू. ८. १. ५७.
[11] इत्युक्ते वैयर्थ्यं च — अ, इ, ऊ.
[12] श्रयणे — म, आ.

पर्युदास इति भाष्यार्थः। **सर्वेषामिति**। सर्वनामशब्दोच्चारणेन यत् कार्यं तदर्थमित्यर्थः, स्मायादीनामप्युभभवदादिष्वभावेन[1] सर्वादीनां सर्वेषामभावात्। 'विशेषेण' इत्येतद्विवृणोति — **यदिति**। [2]**न संनिवेशेति**। सर्वादिगण[3]संनिवेशानपेक्षमित्यर्थः। **अविशेषेणेति**। [4]उपसर्जनेऽपीत्यर्थः। संज्ञायां तु स्वरूपाश्रितमपि कार्यं [5]न भवति, डित्थादिवद्युष्मदस्मदोः कस्यचित् संज्ञात्वे तवममाद्यादेशायोगात्। तत्राप्यादेशोऽङ्गीक्रियत [6]इत्यप्याहुः। **तत्र हीति**। न गणपठितत्वाकारेणेत्यर्थः। भाष्ये **सर्वाद्यानन्तर्यकार्यार्थमिति**। सर्वादिषु यः क्रमः, तदपेक्षया यत्कार्यं तदर्थमित्यर्थः। स्वस्थाने प्रयोजनाभावादन्यत्र प्रयोजनमिति वक्तुं 'प्रत्याख्यायते' इत्युक्तम्। तदाक्षिपति — **नन्विति**। [7]असति सूत्रे "समासप्रत्ययविधौ प्रतिषेधः' इति [8]तदन्तविधिप्रतिषेधात् प्रत्ययग्रहणपरिभाषया प्रकृतिप्रत्ययसमुदायादेव स्त्रीप्रत्ययः, न तु तदन्तात्। अनुपसर्जनाधिकारे तु तदन्तविधिज्ञापनात् तदन्तात् प्रत्ययाः सिध्यन्तीति भावः। यद्यपि तदन्तविधिमात्रं ज्ञाप्यते, तथाप्युपसर्जनप्रतिषेधात् प्रधान एव पर्यवस्यतीति 'प्रधानेन' इत्युक्तम्। प्रधानेन [10]तदन्तविधौ प्रयोजनमाह — **कौम्भकारेय इति**। [11]तत्र तदन्तविध्यभावेऽणो ङीब् विधीयमानोऽणन्तात् कारशब्दादेव स्यात्। तथा च [12]"स्त्रीभ्यो ढक्' इति स्त्रीप्रत्ययान्तेभ्यो विधीयमानो ढक् कारीशब्दादेव स्यात्। तथा च [13]कुम्भशब्दस्यादिवृद्धिर्न स्यात्। तदन्तविधौ तु कारशब्दान्तात् कुम्भकारशब्दादेव ङीबिति ढगपि तस्मादेवेति 'कौम्भकारेयः' इति सिध्यतीति भावः। ननु [14]"टिड्ढाणञ्' इत्यत्र कर्मण्यणः कृतो ग्रहणात् [15]"कृद्ग्रहणे गतिकारकपूर्वस्यापि' इति परिभाषया कुम्भकारशब्दादेव ङीप् स्यादिति कौम्भकारेयः सिध्यतीत्यत आह — **न चेति**। **तद्धित इति**। [16]"प्राग्दीव्यतोऽण्' इत्यादिः। कृन्मात्र[17]ग्रहण एव कृद्ग्रहणपरिभाषेति भावः। परिहरति — **नेति**। [18]"अनुपसर्जने स्त्रीप्रत्यये तदादिनियमो नास्तीति कारशब्दादपि ङीपि कुम्भकारीशब्दाड्ढग् भवतीत्यर्थः। [19]"प्रथमभक्षवत् समासेऽकारात्कारानुवादेनानुपभावादन्यत्र प्रयोजनमिति वक्तुं 'प्रत्याख्यायते' इत्युक्तम्। तदाक्षिपति — **नन्विति**। [7]असति सूत्रे "समासप्रत्ययविधौ प्रतिषेधः' इति [8]तदन्तविधिप्रतिषेधात् प्रत्ययग्रहणपरिभाषया प्रकृतिप्रत्ययसमुदायादेव स्त्रीप्रत्ययः, न तु तदन्तात्। अनुपसर्जनाधिकारे तु तदन्तविधिज्ञापनात् तदन्तात् प्रत्ययाः सिध्यन्तीति भावः। यद्यपि तदन्तविधिमात्रं ज्ञाप्यते, तथाप्युपसर्जनप्रतिषेधात् प्रधान एव पर्यवस्यतीति 'प्रधानेन' इत्युक्तम्। प्रधानेन [10]तदन्तविधौ प्रयोजनमाह — **कौम्भकारेय इति**। [11]तत्र तदन्तविध्यभावेऽणो ङीब् विधीयमानोऽणन्तात् कारशब्दादेव स्यात्। तथा च [12]"स्त्रीभ्यो ढक्' इति स्त्रीप्रत्ययान्तेभ्यो विधीयमानो ढक् कारीशब्दादेव स्यात्। तथा च [13]कुम्भशब्दस्यादिवृद्धिर्न स्यात्। तदन्तविधौ तु कारशब्दान्तात् कुम्भकारशब्दादेव ङीबिति ढगपि तस्मादेवेति 'कौम्भकारेयः' इति सिध्यतीति भावः। ननु [14]"टिड्ढाणञ्' इत्यत्र कर्मण्यणः कृतो ग्रहणात् [15]"कृद्ग्रहणे गतिकारकपूर्वस्यापि' इति परिभाषया कुम्भकारशब्दादेव ङीप् स्यादिति कौम्भकारेयः सिध्यतीत्यत आह — **न चेति**। **तद्धित इति**। [16]"प्राग्दीव्यतोऽण्' इत्यादिः। कृन्मात्र[17]ग्रहण एव कृद्ग्रहणपरिभाषेति भावः। परिहरति — **नेति**। [18]"अनुपसर्जने स्त्रीप्रत्यये तदादिनियमो नास्तीति कारशब्दादपि ङीपि कुम्भकारीशब्दाड्ढग् भवतीत्यर्थः। [19]"प्रथमभक्षवत् समासेऽकारात्कारानुवादेनानुप-

---

[1] उभादिष्वभावेन — म, उ; उभयादिष्वभावेन — अ, आ, ऋ.
[2] 'न' इति नास्ति — अ, म.
[3] संनिवेशापेक्षमित्यर्थः — अ.
[4] अन्नंभट्टेन 'अविशेषेण' इत्यस्य 'उपसर्जनेऽपि' इत्यर्थं कृत्वा संज्ञायां युष्मदस्मत्स्वरूपाश्रितास्तवममाद्यादेशा नाङ्गीक्रियन्ते। विवरणकृता तु 'संज्ञोपसर्जनयोरपि' इत्यर्थमाश्रित्य संज्ञायामप्यादेशा अङ्गीकृताः। नागेशस्तदेवानुसरति ॥ उपसर्जनेरपीत्यर्थः — अ, आ, ऋ.
[5] न संभवति — ऊ.
[6] इत्याहुः — अ, आ; इत्याह — म, उ.
[7] येन विधिरिति सूत्रे — म, उ.
[8] का. वा. १. १. ७२ – ३.
[9] तदन्तविधेः प्रतिषेधात् — अ.
[10] तदन्तविधिप्रयोजनमाह — अ.
[11] अत्र — अ, म.
[12] पा. सू. ४. १. १२०.
[13] कुम्भकारीशब्दस्यादि — ऋ.
[14] पा. सू. ४. १. १५.
[15] परिभाषा २८.
[16] पा. सू. ४. १. ८३.
[17] ग्रहणे च कृद्ग्रहण — म.
[18] अनुपसर्जनस्त्रीप्रत्यये — अ.
[19] मीमांसातृतीयाध्यायपञ्चमपादे दशमे 'वषट्काराच्च भक्षयेत्' इत्यधिकरणे चिन्तितम् —'वषट्कर्तुः प्रथमभक्षः' इत्यत्र वषट्कर्तुः (होतुः) भक्षणस्य 'चमसिनो भक्षयन्ति' इति समाख्यया प्राप्तत्वात् तदनुवादेन प्राथम्यविधानमिति यत् तन्न युज्यते, प्रथमभक्ष इत्यस्य समस्तपदत्वेन 'यो भक्षः स प्रथमः' इत्येवं विच्छिद्यान्वेतुमयोग्यत्वात् प्राथम्यविशिष्टभक्षणमेव विधीयते। तत्र वषट्कारः कारणम्, इति। तदिहानुसंधेयम्।

सर्जनस्यैवेति नियमविधिर्न संभवतीत्यत आह — **सुपामिति**। [1]'त्यदादीनामः' [2]'अद्ड् डतरादिभ्यः' इति द्वयमनुपसर्जनस्यैवेति नियम्यत इत्यर्थः। भाष्ये **अतियुष्मदिति**। [3]'पञ्चम्या अत्' इत्यत् उपसर्जनान्न स्यादित्यर्थः। **अकारेणेति**। अश्च अच्चेति समाहारद्वन्द्वः, पश्चात् 'अस्य आत्' इति षष्ठीसमासः। भाष्यप्रदीपाभ्यां तात्पर्यार्थ उक्तः, विशेष्यासंनिधानेन तदन्तविधेरभावात्, पञ्चमी-समासे [4]लक्षणाभावादित्याहुः[5]। **विधीयत इति**। विधानोत्तरकालमपि नाकारात् परोऽत्कारः, शेषे लोपस्य टिलोपत्वादित्याहुः[6]। अतिप्रसङ्गं शङ्कते — **एवमिति**। प्रियद्विरितीष्यते, प्रियद्व इति स्यादिति भावः। **परिभाषा** 'अनुपसर्जनात्' इति परिभाषा। अतिप्रसङ्गान्तरमाह — **तदो-रिति**। **अविशेषितम्**। अकारात्परत्वेन, असंभवादिति भावः। परिहरति — **अत्रेति**। **साह-चर्यादिति**। त्यदादीनां द्विशब्दपर्यन्तानामकारविधानादित्यर्थः। द्वितीयदोषं निराह — **सत्व-विधाविति**। **तथाविधानाम्** अत्वविधौ गृहीतानामनुपसर्जनानामेव। अपरिहार्यं दोषान्तरमाह — **अतिसर्वायेति**। अकारात्कारयोरेव 'अनुपसर्जनस्यैव'[7] इति नियमः, न स्मायादेरिति भावः। **अपरि-हृतमेवेति**। एतदपरितोषादेव 'अथवा' इति भाष्यमिति भावः॥

[१, २७८–२८१]

(**रत्नप्रकाशः**) **संज्ञोपसर्जनीभूतानामिति**। अर्थभेदेऽपि शब्दाभेद एवेति मतस्यैव प्राबल्यमिति सूचयितुं च्विप्रत्ययनिर्देशः। सर्वादीनि यानि सर्वेषां नामानि सन्ति संज्ञारूपतामुपसर्जनरूपतां च यदा लभन्ते तदा तानि सर्वादीनि न भवन्तीति बुद्धिः कर्तव्येत्यर्थः। तद्बुद्धौ हि सत्यां सर्व-नामसंज्ञायाः सर्वादिव्यपदेशस्य चाभावेन तत्प्रयुक्तं कार्यं संज्ञोपसर्जनसंबन्धि न भवतीति भावः। गौणमुख्यन्यायस्तु पदकार्ये तद्धितादौ पदकार्यसमाश्रितषत्वादौ च प्रवर्तते, न तु प्रातिपदिकाश्रित-विभक्तौ विभक्तिकार्ये वेत्युपसर्जनप्रतिषेधः। यद्यपि "समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः संख्यासंज्ञा षट्संज्ञैकद्रव्योपनिवेशिनी संज्ञा' इत्यनेनाकडारादिसूत्रगतवचनेनैकद्रव्योपनिवेशिनी संज्ञा सर्वनामसंज्ञां न लभत इति ज्ञातुं शक्यते, तथापि तस्यास्त्यदादित्वं डतरादित्वं च दूरीकर्तुं न शक्यत इति संज्ञाप्रतिषेधः। एतेन 'तद्वचनमनपेक्ष्यात्र संज्ञाग्रहणं कृतम्' इति [9]निरस्तम्। वस्तु-तस्तु 'प्रसिद्धाप्रसिद्धयोः प्रसिद्धस्यैव ग्रहणम्' इति न्यायेन संज्ञाशब्दवारणं जायत इति संज्ञाप्रति-षेधो व्यर्थ एव। [10]'पूर्वपरावर' इति सूत्रे तु प्रसिद्धस्यैव कस्यचित् संज्ञाशब्दत्वमस्तीति संज्ञा-प्रतिषेधः सार्थको भवति। **अतिसर्वायेति**। बहुव्रीहिप्रादिसमाससाधारणमिदम्। [11]'न बहुव्रीहौ' इति [12]सूत्रस्यालौकिकवाक्यस्थानुपसर्जनसर्वादिपरत्वात्। एतेन 'प्रादिसमासोऽयम्, बहुव्रीहौ संज्ञा-प्रतिषेधात्' इति [13]निरस्तम्। यदप्युक्तम् " [14]'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति तदन्तविधिः परमसर्वस्मा [15]इत्याद्यर्थं आश्रितः" इति। तदपि न, सर्वनामसंज्ञायां तदन्तविध्यभावेऽपि [16]'पदा-

---

[1] पा. सू. ७. २. १०२.
[2] पा. सू. ७. १. २५.
[3] पा. सू. ७. १. ३१.
[4] लक्षणाभावादित्याह — म.
[5] विवरणकारा इत्यर्थः।
[6] विवरणकारा इत्यर्थः।
[7] एवकारो नास्ति — अ.
[8] का. वा. १. ४. १ — ४१ — ४४.
[9] छायायामिदं खण्डितम्।
[10] पा. सू. १. १. ३४.
[11] पा. सू. १. १. २९.
[12] सूत्रस्य लौकिक — ब.
[13] इदमपि छायायां दूषितम्।
[14] का. वा. १. १. ७२–८.
[15] इत्याद्यर्थमाश्रितः — ब.
[16] का. वा. १. १. ७२–२१.

ङ्गाधिकारे च' इत्यनेन सिद्धतदन्तविधिमाश्रित्य तत्र स्मायादिकरणसंभवात्। **स कथं [1]कर्तव्य इति**। **सः** संज्ञोपसर्जनप्रतिषेधः **कथं कर्तव्यः** किं संज्ञोपसर्जनानि सर्वनामानि न भवन्ति, इति, किं वा संज्ञोपसर्जनानि सर्वादीनि न भवन्ति, इति प्रश्नः। द्वितीयकोट्यभिप्रायेणोत्तरमाह — **पाठात् पर्युदास इति**। पठ्यन्ते शब्दा अत्रेति पाठो गणः, तस्मात् **पर्युदासः** व्यावृत्तिरित्यर्थः। एतेन "यथा [2]'तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः' इत्यत्र कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादिपाठविशेषणं तथेह सर्वादिसंनिवेशो विशेष्यते — असंज्ञोपसर्जनानि सर्वादीनि गणसंनिविष्टानि, नान्यानीत्यर्थः" इति निरस्तम्। 'पाठात् पर्युदासः' इति पदद्वयस्य वा तदादिपदचतुष्टयस्य वा तदर्थकत्वाभावात्। तद्वाच्यार्थस्य तद्भावार्थस्य च प्राकट्येन भाष्यकृतैव निदर्शितत्वात्। 'संज्ञोपसर्जनीभूतानि' इति च्विप्रत्ययान्तनिर्देशेनार्थभेदेऽपि शब्दाभेद एवेति मतप्राबल्यस्य भाष्यकृतैव दर्शितत्वेन सर्वादीनां संज्ञोपसर्जनभिन्नत्वासंभवाच्च। **किमविशेषेणेति**। किं या सर्वेषां सर्वनामसंज्ञा तदुद्देशेनैव पाठात् पर्युदासः कर्तव्यः। ओमिति चेत् तर्हि तत्संज्ञाप्रतिषेध एव कर्तुमुचित इति भावः। **विशेषेण चेति**। चादविशेषेण। तेन त्यदादित्वे डतरादित्वे सर्वनामत्वे चाश्रीयमाणे तेषां ततः पर्युदास इति भावः। [3]'युष्मदस्मद्भ्याम्' इत्यादौ तु स्वरूपेणैव युष्मदस्मदौ गृहीताविति उपसर्जनयोरपि तयोर्ग्रहणं भवति। संज्ञारूपयोस्तु ग्रहणं न भवति, 'प्रसिद्धाप्रसिद्धयोः' इति न्यायात्। **यान्यनुक्रान्तानीति**। सर्वनामसंज्ञां प्रति यान्युद्देश्यतया निर्दिष्टानीत्यर्थः। वार्तिकव्याख्यानगतेनापि सर्वादिशब्देनायमेवार्थो निर्दिष्ट इति ज्ञेयम्। तेन प्रथमचरमतयाल्पार्धकतिपयनेमा अपि संज्ञीभूताः सर्वनामसंज्ञां प्रत्युद्देश्यतया निर्दिष्टा न भवन्तीति सिद्धम्। एवं च वक्ष्यमाणान्वर्थसंज्ञाश्रयसमाधानेन सह समफलतानयोः सिद्धा। **असंज्ञायामिति**। संज्ञात्वाभावे सतीत्यर्थः। अर्थभेदप्रयुक्तशब्दभेदाभावेऽपि यदा सर्वादिर्व्यक्तिविशेषे संकेतितस्तदा संज्ञात्वं लभत इति भावः। **प्रत्याख्यायत इति**। वार्तिककारेणेति शेषः। तथा चात्रत्यतदीयवार्तिकस्य निराकरणाय तत्प्रत्याख्यानाश्रयणेऽपि तत्रत्यं भगवतस्तत्सूत्रस्थापनं न विरुध्यते, तदनुसारेणाप्यत्र पक्षान्तरस्य वक्ष्यमाणत्वात्। **तमेवमभिसंभन्त्स्याम इति**। **तं** योगम् **एवं** वक्ष्यमाणप्रकारेण **अभिसंभन्त्स्यामः** व्याख्यास्याम इत्यर्थः। **अनुपसर्जनेति**। [4]"सुपां सुलुक्' इति छान्दसोऽत्र षष्ठ्या लुगिति भावः। **अकारात्कारावि ति**। भाष्यकारवचनादेवात्र अच्छब्दात्कारप्रत्ययः। अथवा 'इतिकरणः' इत्यादौ करणशब्दस्येवात्र कारशब्दस्य शब्दशब्दपर्यायत्वं बोध्यम्। तेन 'अकाराच्छब्दौ' इत्यर्थलाभः। **अनुपसर्जनस्य द्रष्टव्याविति**। अनुपसर्जनसंबन्धिन्यौ द्रष्टव्यावित्यर्थः। **अतियुष्मदिति**। युष्मानतिक्रान्तेभ्यः, अतिक्रान्ताद्वेत्यर्थः। [5]"पञ्चम्या अत्' इति भ्यसो वा [6]"एकवचनस्य च' इति ङसेर्वा अत्। **प्रश्लिष्टनिर्देशोऽयमिति**। प्रकर्षेण श्लिष्टानामेकादेशात्मतां प्राप्तानामकाराणां निर्देशोऽयमित्यर्थः। **अ अ अदिति**। तत्राद्योऽकारो लुप्तपञ्चम्यन्तः, तेनाकारात्कारस्थानी विशेष्यत इति भावः। **अकारान्तादिति**। यद्यपि 'अकारात्' इत्युक्तेऽपि दोषो नास्ति, तथापि [7]"वर्णग्रहणं च सर्वत्र' इत्युक्तमिति तदन्तविधिराश्रितः। परस्येति शेषो बोध्यः। एवं च त्यदादयोऽदसन्ता अदुपधा इति तेषां विधीयमानमत्वम् [8]"अलोऽन्त्यस्य' इत्यन्त्यस्य भवत् अकारात्परस्यैव भवति। तथा डतरादयोऽदन्ता एवेति तेभ्यः स्वमोर्विधीयमानोऽदादेशोऽकारा-

---

[1] वक्तव्य इति — ब.
[2] पा. सू. ८. १. २७.
[3] पा. सू. ७. १. २७.
[4] पा. सू. ७. १. ३९.
[5] पा. सू. ७. १. ३१.
[6] पा. सू. ७. १. ३२.
[7] का. वा. १. १. ७२–२७.
[8] पा. सू. १. १. ५२.

त्परस्यैव भवतीति तत्रैवायं नियमो भवति। [1]'पञ्चम्या अत्' [2]'एकवचनस्य च' इत्यदादेशस्तु दकारात् परस्य विधीयत इति नियमाविषयः सन्नुपसर्जनेऽपि भवतीति भावः। ननु प्रियौ द्वौ यस्य स प्रियद्विरित्यत्रोपसर्जनस्य द्विशब्दस्य त्यदाद्यत्वं स्यात्, तस्य वकारात् परस्येकारस्य जायमानस्य नियमाविषयत्वादिति चेन्न, 'अकारान्तादकारात्कारौ' इति भाष्यस्य तद्विधायकयोः [3]'त्यदादीनामः' [4]'अद्ड् डतरादिभ्यः पञ्चभ्यः' इति सूत्रयोर्लक्षकत्वेनोपसर्जनद्विशब्दादपि [5]'त्यदादीनामः' इति सूत्रस्य व्यावृत्तेः संभवात्। एतेन " [6]'त्यदादीनामः' इत्यत्र त्यदादिषु परिभाषोपस्थानादनुपसर्जनानां तेषां ग्रहणात् तत्साहचर्याद् द्विशब्दोऽपि तथाविध एव गृह्यत इति द्विशब्दस्योपसर्जनस्यात्वं न" इति निरस्तम्। अकारात्परस्यादेशावकारात्कारावनुपसर्जनसंबन्धिनौ भवत इत्येतदर्थिकाया [7]'अनुपसर्जनात्' इति परिभाषाया अकारपरादेशाकारात्कारोद्देशेनानुपसर्जनसंबन्धित्वबोधिकायाः [8]'त्यदादीनामः' इत्यत्र त्यदादिषूपस्थितौ मानाभावात्। [9]'त्यदादीनामः' इत्यत्र त्यदादीनाम् [10]'अद्ड् डतरादिभ्यः पञ्चभ्यः' इत्यत्र डतरादीनां चोपसर्जनानुपसर्जनसाधारण्येन ग्रहणे सत्येव [11]'अनुपसर्जनात्' इति प्रकृतपरिभाषाया विषयलाभेनानया त्यदादीनामनुपसर्जनता[12]बोधकत्वसंभवात्। त्यदादीनामनुपसर्जनत्वे बोधितेऽपि[13] त्यदादित्वादेव द्विशब्दस्याप्यनुपसर्जनस्यैव ग्रहणं सिद्धमिति पुनस्त्यदादिसाहचर्येण द्विशब्दस्यानुपसर्जनस्य ग्रहणमिति साधनानौचित्याच्च। एतेन 'सत्वविधौ च तथाविधानामेवानुवृत्तिरिति तत्रापि न दोषः' इत्यपि निरस्तम्। [14]'त्यदादीनामः' इत्यत्रोपसर्जनानामनुपसर्जनानां च ग्रहणमित्याश्रित्यैव प्रकृतभाष्यस्य प्रवृत्तत्वेन सत्वविधावप्युभयेषां ग्रहणस्य दुर्निवारत्वात्॥

[१, २७८–२८१]

(**नारायणीयम्**) एकस्य शब्दस्यानेकशक्तित्वमते च्विप्रत्ययोपपत्तिं दर्शयति — [**य इति।**] अर्थभेदेन शब्दभेदेऽपि वा सादृश्यनिबन्धनतत्त्वाध्यवसायेन च्वेरुपपादनम्। गुणादागतत्वाभावात् कथं गौणमुख्यन्यायशङ्केत्यत आह — [15]**प्रसिद्धीति**। आकडारसूत्रे बाध्यबाधकभावव्यवस्थासिद्धये संज्ञानां क्रमनियमं वक्ष्यति। जात्याद्यपूर्वसंज्ञा च करिष्यते। तत्र या परानवकाशा चेति परया संज्ञासंज्ञया सर्वनामसंज्ञा बाधनीयेति संज्ञाप्रतिषेधनवचनमनर्थकमित्यत आह — **समासेति**। अतिक्रान्तः सर्वमिति समासे [16]'एकविभक्ति' इत्युपसर्जनत्वम्, अतिक्रान्तं सर्वं येनेति समासेऽप्यस्त्येवोपसर्जनत्वमित्यविशेषादुभयं न विवक्षितमित्याह[17] — **प्रादीति**। नन्विह सर्वशब्दे संज्ञायामपि दोषाभावः, तदन्तस्य त्वप्राप्तिः, विशेष्यासंनिधानेन तदन्तविध्यभावात्, [18]'ग्रहणवता' इति प्रतिषेधाच्चेत्यत आह — **प्रयोजनमिति**। वाचनिकस्तदन्तविधिरित्यर्थः। वचनं वा किमर्थमित्यत आह–

---

[1] पा. सू. ७. १. ३१.
[2] पा. सू. ७. १. ३२.
[3] पा. सू. ७. २. १०२.
[4] पा. सू. ७. १. २५.
[5] पा. सू. ७. २. १०२.
[6] पा. सू. ७. २. १०२.
[7] पा. सू. ४. १. १४.
[8] पा. सू. ७. २. १०२.
[9] पा. सू. ७. २. १०२.
[10] पा. सू. ७. १. २५.
[11] पा. सू. ४. १. १४.
[12] बोधकत्वासंभवात् — ब.
[13] अपिशब्दोऽधिको भाति।
[14] पा. सू. ७. २. १०२.
[15] प्रसिद्धेति — क.
[16] पा. सू. १. २. ४४.
[17] अविशेषहेतुकमुभयविवक्षणं नेत्याशयः।
[18] परिभाषा ३१.

[भाष्ये] **पाठादिति**। फलस्य हेतुत्वविवक्षया पञ्चमी, पाठाय पाठार्थं पाठविशेषणतया पर्युदास इत्यर्थः। तत्र कथं पाठविशेषणत्वम्, अतो वाक्यभेदमभिप्रेत्याह — [1]**असंज्ञेति**। अस्मिन् वाक्ये सर्वादित्वं विधेयस्वरूपं विवृणोति — **गणेति**। किमविशेषेणेति प्रश्ने किं सर्वेषां सर्वादीनामयं निषेध उक्त [2]इति भासते। तामिमां भ्रान्तिं निरसितुमाह — [**किं यदिति**।] यथा कुत्सनाभीक्ष्णययोर्गोत्रादिपाठविशेषणत्वे गोत्रादिव्यपदेशप्रयुक्तमेतद्विशेषणावच्छिन्नानामिति लभ्यते, तथा च [3]'चनचिदिवगोत्रादि' इत्ययमपि विधिरतद्विशेषणानां न भवति, तथेहापि सर्वादिव्यपदेशप्रयुक्तं कार्यमेतद्विशेषणानामित्युक्तावन्तर्गणकार्ये विशेषणमेतन्न लभ्यत इति प्रश्न इत्यर्थः। सर्वादिव्यपदेशप्रयुक्तं च कार्यं सर्वनामसंज्ञेति सर्वनामकार्ये विशेषणलाभ इत्याह — **सर्वनामेति**। पाठविशेषणत्वे पाठाश्रयकार्यमात्रे विशेषणलाभ उचितः, न तु सर्वादिव्यपदेशप्रयुक्तकार्ये। एवं हि वाक्यार्थविज्ञाने तथा स्यात् — असंज्ञोपसर्जनानि सर्वादिव्यपदेशभाञ्जीति। तच्च न, एवं तु विज्ञायते — उक्तविशेषणानि गणसंनिविष्टानीति, यथा विवृतं टीकायाम्। यदि सर्वादिव्यपदेशप्रयुक्तकार्यार्थत्वमेव विशेषणस्य स्यात्, पाठविशेषणमपार्थकं स्यात्। गोत्रादीनां तु गोत्रादिव्यपदेशप्रयुक्तकार्यातिरिक्तकार्यस्य पाठाश्रयस्याभावाद् गोत्रादिव्यपदेशप्रयुक्तकार्य एव [4]कार्ये विशेषणलाभः। न च तत्र पाठविशेषणवैयर्थ्यमित्यभिसंधायोत्तरमुक्तम्। तत्र चशब्दप्रयोजनमाह — **चशब्दादिति**। [5]असंनिहिते चशब्देऽविशेषकार्यार्थत्वं निषिध्य विशेषकार्यार्थत्वमेव पाठविशेषणस्य स्थापितमिति मतिः स्यात्। विशेषणस्यातिप्रसङ्गं 'गण' इत्यारभ्य 'औणादिकयोः' इत्यन्तेन परिहरति। **नन्विति**। अनुपसर्जनग्रहणं 'बहुकुरुचरा' इत्यत्र ङीब्निवृत्त्यर्थम्। यदि चात्र प्रकरणे निषेधनियमादिविषयेऽपि न स्यात् तदन्तविधिस्तदा टित्प्रातिपदिकाद्विधीयमानस्य [6]ङीपः प्रातिपदिकेन तदन्तविधिप्रतिषेधान्नास्ति 'बहुकुरुचरा' इत्यत्र प्राप्तिरिति तदन्तविधिस्तेनानुमीयते। उपसर्जने चैतन्निषेधप्रवर्तनात् प्रधानेन तदन्तविधिः पर्यवसन्नः। ज्ञापकफलं कौम्भकारेय इति। असति ज्ञापने प्रत्ययग्रहणपरिभाषया कारशब्दान्ङीबिति तयैव परिभाषया ढगपि कारीशब्दात् स्यादिति रूपासिद्धिः। ननु कृद्ग्रहणे गतिकारकपूर्वस्यापि [ग्रहणेन] कुम्भकारशब्दान्ङीब् भविष्यतीति किं ज्ञापनेन, अत आह — **न चेति**। एतद्विषयप्रपञ्चश्चानुपसर्जनसूत्रपुंयोगसूत्रटीकयोरवगन्तव्यः। उद्देश्यविधेययोः समासानुपपत्तेराह — **सुपामिति**। लुप्तपञ्चमीकतामभिप्रेत्याह — **अकारेणेति**। विधिकालीनमेतद्विशेषणम्, न प्रयोगकालीनमित्याह — **पञ्चम्या इति**। अपरितोषात् परिहारान्तरमित्यभिप्रेत्याह — **अतिसर्वायेति**॥

[१, २८१–२८५]

(**लघुविवरणम्**) कार्थद्वारेण संबन्धिनीत्यत आह — **तदिति**। **कन इति**। [7]'संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इति विहितस्य। **कनीति**। तस्मिन् कृते तत्सहितस्यैव संख्यावाचित्वं, न केवलस्य नान्तस्येति भावः। **शकटेति**। न [8]'स्वाङ्गवचन इति शेषः। किं तत् प्रकृतमित्यत आह — **अङ्गेति**। प्रकृतस्याङ्गस्य विभक्तिरिति षष्ठीसमासः। **यथेति**। व्यक्तिसर्वगता जाति-

---

[1] संज्ञेति — क.
[2] 'इति' इत्यस्यानन्तरं 'पदानामिति' इत्यधिकं दृश्यते — क.
[3] पा. सू. ८. १. ५७.
[4] कर्तव्य इत्यर्थः।
[5] संनिहितचशब्दे — क.
[6] 'प्राप्तिरिति' इत्यनेनास्यान्वयः।
[7] पा. सू. ५. १. ५८.
[8] स्वाङ्गवाचीति — ड, त.

रिति पक्षे प्रसिद्धप्रवृत्तिनिमित्तोपादानेनानेकस्यार्थस्य वाचकाः सर्वादयः। संज्ञोपसर्जने च नैवमिति भाष्यस्याभिप्रायः। **तत्रेदमिति**। अन्विताभिधानपक्ष इति भावः। **सहविवक्षाया इति**। 'सर्वादीनि' इत्यस्य संज्ञापक्षे उद्देश्यत्वात् 'सर्वनामानि' इत्यस्य पाठविशेषणत्वे 'सर्वादीनि' इत्यस्य [1]प्रतिनिर्देश्यत्वात् उद्देश्यप्रतिनिर्देश्ययोर्युगपदेकक्रियागुणाभ्यामन्वयाभावात् सा [2]न भवतीति भावः। **तन्त्रेति**। अर्थद्वयविवक्षयैकस्य प्रयोग इह तन्त्रम्। **अतिसर्वायेत्यत्रेति**। पूर्वशेषः। वाक्ये तु नैवमित्याह — **वाक्ये त्विति**॥

[१, २८१–२८५]

(**विवरणम्**) कार्थद्वारेण संबन्धिनी विभक्तिरित्यत आह — **तदर्थेति**। 'गृह्यमाणविभक्तेः' इति च[3] संबन्धसामान्ये षष्ठी। तेन विभक्तौ विधीयमानं त्यदाद्यत्वाद्यपि गृह्यते। [4]'षड्भ्यः' इति तादर्थ्ये चतुर्थी, व्यत्ययेन वा षष्ठ्यर्थे पञ्चमीति मन्वानश्चोदयति — **यद्येवमिति**। **कन इति**। [5]'संख्यायाः संज्ञासंघसूत्र' इत्यनेन संज्ञायां विहितस्येति शेषः। **कनीति**। कनि कृते कन्नन्त एव संख्यावाची, न कनः प्रकृतिः। कन्नन्तश्च संख्यावाच्यपि नान्तत्वाभावान्न षट्संज्ञक इति ततः परस्य जसो लुगभाव इत्यर्थः। **युष्मदिति**। [6]'युष्मदस्मद्भ्याम्' इति [7]स्वार्थे पञ्चमीति भावः। [8]'युष्मदस्मदोरनादेशे' इत्यत्रापि नैवं संबन्धः — युष्मदस्मदोर्या विभक्तिरिति। ततश्च गृह्यमाणेन विभक्तेरविशेषितत्वादुपसर्जनत्वेऽपि तयोरात्वादि भवतीति द्रष्टव्यम्। **शकटेति**। शकटावयवश्च न स्वाङ्गमिति भावः। **प्रकृतशब्देन** 'अङ्गस्य' इत्येतदेव विवक्षितम्, नानुवर्तमानमात्रमित्याह — **अङ्गेति**। 'एतच्चापि' इति वक्तव्ये [9]परोक्षवाचितच्छब्दनिर्देशाद् व्यवहितस्य परामर्श[10]इत्याह — **गृह्यमाणेति**। चशब्दात् संनिहितस्यापीत्याह — **सप्तमीति**। संनिधानाद् डतराद्यर्थगतसंख्याद्यभिधानायेति लभ्यत इत्यभिप्रेत्याह — **अर्थद्वारकमिति**। **स्वविषयेति**। लोकनिरूढनिमित्तेन योऽभिधेयः स स्वविषयः। **स्वविषयापेक्षमिति**। स्वव्यक्त्यपेक्षमित्यर्थः। एवं व्याख्याने निमित्तमाह — **न त्विति**। भाष्ये 'संज्ञोपसर्जने च' इत्यस्यायमर्थः — संज्ञा तावत् सर्वेषां न नाम, एकद्रव्यनिष्ठत्वात्। उपसर्जनमपि पदान्तरार्थवृत्तित्वान्न [11]स्वरसतः सर्वेषां नामेति। ओदनशब्दस्य सर्वनामत्वमुपपादयति — **सामानाधिकरण्यादिति**। गुणद्रव्यादिसमुदायात्मके वस्तुनि प्रतिनियता ये भागाः तदभिनिवेशित्वात् तद्वाचकत्वाच्छब्दानामित्यर्थः। [12]पदैः पदार्था अभिधीयन्ते, ते चाकाङ्क्षादिमन्तः [13]संसृष्टरूपमर्थं प्रतिपादयन्ति, पदानि तं लक्षयन्तीत्यभिहितान्वय-[14]वादेनाशङ्क्य। योग्येतरान्विते पदानां शक्तेः स्वार्थवत् पदान्तरार्थोऽपि स्ववाच्य इत्यन्विताभिधानमाश्रित्य परिहरति — **तत्रेति**। **अवग्रहः** क्रोडीकारः। **विशेषं न प्रतिपद्यते** निश्चिततयेति शेषः। **रूपसादृश्यात्** ओदनव्यतिरिक्तस्याप्यन्वय[15]योग्यविशेषत्वस्य तुल्यत्वादित्यर्थः। **तत्प्रतिपत्त्यर्थं**

---

[1] प्रतिनिर्देशत्वात् — ड, ढ, ण.
[2] न संभवतीति — ण.
[3] चशब्दो नास्ति — अ.
[4] पा. सू. ७. १. २२.
[5] पा. सू. ५. १. ५८.
[6] पा. सू. ७. १. २७.
[7] पञ्चम्यर्थे एव, न तु पूर्ववद् व्यत्ययेन षष्ठ्यर्थे इत्यर्थः।
[8] पा. सू. ७. २. ८६.
[9] परोक्षत्ववाचि — अ.
[10] इत्यत आह — अ.
[11] स्वतः — अ.
[12] पदैरर्थाः — अ.
[13] संसृष्टमर्थं — अ.
[14] वादिनः शङ्का — अ.
[15] योग्याविशेषत्वस्य — च, छ.

निर्धारितविशेषप्रतिपत्त्यर्थमित्यर्थः । यथा वैश्वदेवी[1]शब्देनैवाभिहितो विशेष इदन्तयामिक्षापदेन समर्प्यते । यथाहुः — [2]आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः । आमिक्षापदसांनिध्यात् तस्यैव विषयार्पणम्, इति, तद्वदिहापीति भावः । **सहेति** । [3]तुल्यकक्ष्यत्वे सहविवक्षैकया क्रियया गुणेन वा परस्परसापेक्षस्यानेकस्य [4]तुल्यवद् युगपत्संबन्धनेच्छात्मिका । न चेह तथा, सर्वादीनि सर्वनामानीति शब्दयोः प्रत्येकमुद्देश्यप्रतिनिर्देश्यसमर्पकत्वादुद्देश्यप्रतिनिर्देश्ययोश्चातुल्य[5]कक्ष्यत्वादित्यर्थः । **तन्त्रेति** । अर्थद्वयविवक्षया एकस्य सकृत् प्रयोग इह **तन्त्रम्** । **प्रत्याख्यातं** लौकिकप्रयोगाङ्गत्वेन निराकृतमित्यर्थः । **[स्वरूपेति ।]** स्वरूपेणैव भेदो[6] व्यावृत्तिः, तेनोपकारीत्यर्थः । **अतिसर्वायेत्यत्रेति** । पूर्वशेषः । **सर्वनामत्वेन** सर्वेषां नामत्वेन ॥

[१, २८१–२८५]

(**उद्द्योतनम्**) [7]अर्थद्वारा गृह्यमाणविभक्त्योः संबन्धमादाय षष्ठीसमास इत्याह — **गृह्यमाणानामिति** । 'विभक्तेः' इति संबन्धसामान्ये षष्ठी, तेन विभक्तौ परतोऽत्वमपि गृह्यते । [8]'स्वव्याख्याने शङ्कानुपपत्तेराह — **गृह्यमाणादिति** । 'षड्भ्यः' इति व्यत्ययेन षष्ठीस्थाने पञ्चमीति मन्वानश्चोदयति — **यदीति** । [9]पञ्चमीति समाधानाभिप्रायः । **कन इति** । [10]'संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इत्यनेन संज्ञायां विहितस्य स्वार्थिकत्वमित्यर्थः । **अङ्गेनेति** । अर्थद्वाराङ्गसंबन्धी यो ङस् युष्मदस्मद्भ्यां परस्तस्य अश् विधीयत इत्युपसर्जनाभ्यामपि भवतीत्यर्थः । [11]'युष्मदस्मदोरनादेशे' इत्यादावपि युष्मदस्मदोर्या विभक्तिरिति न विशेष्यते, किं त्वङ्गेनैव । तथा च गृह्यमाणेन विभक्तेरविशेषितत्वादुपसर्जनत्वेऽपि [12]तयोरात्वादि भवतीति ज्ञेयम् । ननु 'प्रियसक्थ्ना' इत्ययुक्तम्, समासान्तेन षचा भाव्यम्, अत आह — **शकटेति** । शकटावयवस्य स्वाङ्गत्वाभावान्न समासान्तप्रसङ्ग इत्यर्थः । **प्रकृत**शब्देनाङ्गं विवक्षितमित्याह — [13]**अङ्गार्थेति** । 'तच्चापि' इत्यत्र परोक्षवाचिना तच्छब्देन व्यवहितनिर्देशः । चकारेण संनिहितस्येत्याह — **गृह्यमाणेति** । संनिधानाद् [14]'डतरादयर्थगत[15]संख्याद्यभिधानाय यो विहित इति लभ्यत इत्यभिप्रेत्याह — **अर्थद्वारकमिति** । अशादीनामुपसर्जनेऽपि प्राप्तिमुक्तामेव विशदयति — [16]**युष्मदिति** । प्रकरणग्रहणमात्व[17]यत्वादिसंग्रहार्थम् । ननु 'अतिसः' इत्यत्र 'अतिसर्वाय' इतिवत् प्राधान्याभावादत्वं न प्राप्नोति, अत आह— **शोभन इति** । अतिशब्दः पूजार्थो नातिक्रान्तार्थः । तथा च [18]"प्रादयो गताद्यर्थे प्रथमया' इति समास इत्यर्थः । नञ्समासेऽप्युत्तरपदार्थप्राधान्यादत्वादिकं भवतीत्याह — **नञ्समासेऽपीति** ।

---

[1] शब्देनाभिहितः — ट.
[2] तन्त्रवार्तिकम् (आनन्दाश्रममुद्रितम्) पृष्ठम् ५३४.
[3] तुल्यकक्षत्वे — ज.
[4] 'तुल्यवत्' इति नास्ति — ज.
[5] कक्षत्वादित्यर्थः –ज.
[6] प्रदीपे 'स्वरूपमात्रोपकारी' इत्यत्र 'स्वरूपभेदोपकारी' इति विवरणकृत्पाठ इति भाति ।
[7] अर्थद्वारेण गृह्यमाण — म.
[8] स्वव्याख्याते — ऊ, ॠ.
[9] स्वार्थ एवेत्यादिः ।
[10] पा. सू. ५.१. ५८.
[11] पा. सू. ७. २. ८६.
[12] तयोरत्वादि — म.
[13] अङ्गार्थेनेति — अ, आ, उ, ॠ.
[14] कतराद्यर्थ — ॠ.
[15] संख्याभिधानाय — अ.
[16] युष्मदस्मदिति — इ, ऊ.
[17] यत्वसंग्रहार्थम् — म.
[18] महाभाष्ये पठितं सौनागवार्तिकम् २. २. १८.

अषडिति। अत्र [1]'षड्भ्यो लुक्'। कार्यानुरोधेन क्वचिदङ्गेनार्थद्वारा विभक्तिर्विशेष्यते, क्वचिद् गृह्यमाणेनेति समुदायतात्पर्यम्। **स्वविषयेति**। [2]लोकव्यवहारे प्रसिद्धं यत् प्रवृत्तिनिमित्तं कात्स्न्यादिकं स स्वविषयः, तत्प्रवृत्तिनिमित्तयुक्तसर्ववाचकत्वमित्यर्थः। **यथेति**। 'व्यक्तिसर्वगता जातिः' इत्यत्र स्वाश्रयत्वयोग्य[3]सर्वव्यक्तिगतत्वं न त्वयोग्यव्यक्तिगतत्वं यथा [4]तथात्रापि प्रवृत्तिनिमित्तापेक्षं सर्वनामत्वमित्यर्थः। एवं व्याख्याने हेतुमाह — **न त्विति**। भाष्ये **संज्ञोपसर्जने चेति**। संज्ञा तावदेक[5]द्रव्यमात्रवाचिनीति [6]सर्वेषां नाम न भवति। उपसर्जनमपि पदान्तरार्थ[7]वृत्तित्वान्न स्वप्रवृत्ति[8]निमित्ताश्रय[9]सर्वनामेत्यर्थः। पाठानपेक्षणे सर्वादिशब्दसमानाधिकृतौदनादिशब्दानामपि सर्वनामकार्यं स्यादित्याह — भाष्ये **एतेषामिति**। सर्वादीनामित्यर्थः। भाष्ये **यो यः शब्दः** ओदनादिशब्दः। तदुपपादयति — **ततश्चेति**। पाठानाश्रयणादित्यर्थः। ओदनशब्दस्य सर्वनामत्वे हेतुमाह — **सामानाधिकरण्यादिति**। **नन्विति**। प्रवृत्तिनिमित्तैक्ये शब्दानामर्थैक्यम्, तद्भेदे तद्भेद इति प्रवृत्तिनिमित्तभेदान्नैकार्थ्यमित्यर्थः। जातिगुणद्रव्यात्मके वस्तुनि प्रतिनियता ये भागा जात्यादयः, तदभिनिवेशित्वात् [10]तद्वाचकत्वादिति योजना। परिहरति — [11]**अत्रेति**। जातिः पदार्थः, व्यक्तिः पदार्थ इति दर्शनद्वयादिदमन्यद्दर्शनं जातिविशिष्टा व्यक्तिरिति। अत एवाशङ्कायां 'सर्वत्वमोदनशब्देन' इत्युक्तम्। **ओदनार्थः** द्रव्यरूपः। **अवग्रहः** क्रोडीकारः, एवमग्रेऽपि। **विशेषम्** ओदनत्वम्। **रूपेति**। [12]द्रव्यस्वरूपस्य सर्वव्यक्तिसाधारण्यादित्यर्थः। **तत्प्रतिपत्त्यर्थं** विशेषद्वयप्रतिपत्त्यर्थम्। द्वयोरेकव्यक्तिवाचकत्वेन समानार्थत्वादतिप्रसङ्ग इत्याह — **तत्रेति**। [13]'अभिहितान्वयमतेन शङ्का, अन्विताभिधान[14]मतेन परिहारः' इति केचित्। तच्चिन्त्यम्, [15]अन्वितत्वरूपेणौदनत्वादेः सर्वशब्दवाच्यत्वेऽपि स्वरूपविशेषेणावाच्यतया एकार्थत्वासंभवात्, कथंचिदेकार्थवृत्तित्वं व्यक्तिमादायापि संभवतीत्यन्विताभिधानपर्यन्तानुपयोगात्। [16]प्रकृते एकशेषमाक्षिपति — **सहेति**। एकेन गुणेन क्रियया वानेकस्य युगपत् तुल्यवत्संबन्धे या सहविवक्षा सा प्रकृते नास्ति। एकैकस्योद्देश्यविधेयरूपभिन्नार्थ[17]परत्वेनैकरूप्यासंभवादित्यर्थः। भाष्यमुपलक्षणतया व्याचष्टे — **एकशेषेति**। अर्थद्वयविवक्षयैकस्य सकृदुच्चारणं **तन्त्रम्**। यथाश्रुतमपि [18]सम्यगित्याह — **अथवेति**। **प्रत्याख्यातं** लौकिकप्रयोगोपयोगो नास्तीत्यर्थः। [19]शास्त्रीयव्यवहारसंपादकत्वात् सहविवक्षा नापेक्षितेत्याह — **संज्ञापरीति**। प्रक्रियासंपादकत्व[20]मात्रे संज्ञादिर्दृष्टान्तः। **स्वरूपेति**। शब्दस्वरूप[21]मात्रेणेतरविलक्षणव्यक्तिप्रतीत्युपयोगीत्यर्थः। **अतिसर्वायेत्यत्रेति**। [22]पूर्वान्वयि। समास एवोप-

---

[1] पा. सू. ७. १. २२.
[2] लोकव्यवहारप्रसिद्धं — ऋ.
[3] सर्वगतत्वं — अ, आ, ऋ.
[4] तथा तत्रापि — उ.
[5] द्रव्यवाचिनीति — म, आ.
[6] न सर्वेषां नाम। — ऊ, ऋ.
[7] वृत्तित्वान्नान्यप्रवृत्ति — अ; वृत्तित्वान्नास्य प्रवृति — आ, ऋ.
[8] निमित्तत्वाश्रय — अ; निमित्ताश्रये — म, आ, इ, उ.
[9] सर्वनामतेत्यर्थः — अ, आ.
[10] तद्वाच्यत्वादिति — अ.
[11] तत्रेति — म, आ.
[12] द्रव्यरूपस्य — अ.
[13] विवरणोक्तिमनूद्य दूषयति — अभिहितेत्यादिना।
[14] वादेन — अ.
[15] अन्यतरत्वरूपेण — उ.
[16] प्रकृत्येकशेषम् — अ.
[17] परत्वेनैकरूपत्वासंभवादित्यर्थः — उ.
[18] न सम्यगित्याह — म.
[19] शास्त्रव्यवहार — म, आ.
[20] मात्रेण संज्ञादिः — अ.
[21] मात्रेण तदुपलक्षण — उ.
[22] पूर्वान्वयः — इ, ऊ.

सर्जनस्य विशेषेऽवस्थानम्, न वाक्य इति [1]तत्र सर्वनामसंज्ञा भवत्येवेत्याह — **वाक्ये त्विति**। **विशेषे** अतिक्रान्ताद्यर्थविशेषे। ईयसुनमुपपादयति — **शब्देति**। इतरशब्दान्नाम लघ्विति विभज्योपपदे ईयसुनित्यर्थः। **विशिष्टो धर्मः** धर्मविशेषः। तदनुमानमेवाह — **नूनमिति**। **सर्वनामत्वेन** सर्वेषां नामत्वेन ॥

[१, २८१–२८५]

(**रत्नप्रकाशः**) स्यादेतत् — सर्वनामसंज्ञां प्रति ये उद्दिष्टास्तेषां संज्ञात्वे वारितेऽपि संज्ञीभूतानां त्यदादीनामत्वं तादृशडतरादिभ्यः परयोरद्डादेशश्च न वारित एव। कथंचित् सर्वनामसंज्ञानैरपेक्ष्येण तेन गणशोधः क्रियते चेदपि [2]'अनुपसर्जनात्' इति सूत्रं 'बहुकुरुचरा, बहुसौपर्णेया' इत्यादौ ङीबादेरतिप्रसङ्ग[3]वारणार्थत्वेन तदन्तविधिज्ञापकमावश्यकमेवेति तत्प्रत्याख्यानमयुक्तम्। तेन कथंचिदकारात्कारयोरुपसर्जनसंबन्धे वारितेऽपि [4]'तदोः सः सौ' इति सत्वस्य [5]'किमः कः' इति कादेशस्य सर्वनामसंज्ञाप्रयुक्तस्मायादीनां च तत्संबन्धो न वारित एवेत्यस्वरसादाह — **अथवेति। यदुच्यत इति**। अत्वसत्वकादेशा अद्ड्स्मायादयश्चोच्यन्ते। **गृह्यमाणविभक्तेरिति**। गृह्यमाणा ये त्यदादयः सर्वादयश्च तेभ्यो विहिता या विभक्तिस्तस्याः संबन्धि तद् भवतीत्यर्थः। **लुङ् न प्राप्नोतीति**। तत्र जश्शसोः षट्संज्ञकादविहितत्वादिति भावः। **षट्प्रधान एष समास इति**। गृह्यमाणार्थगतसंख्याभिधायिनी विभक्तिः, तत्संबन्धि तद् भवतीति व्याख्यास्यामीति भावः। अनङादेरप्यङ्गाधिकारोक्तत्वाविशेषेण गृह्यमाणविभक्तेः संबन्ध एव स्यात्, न त्वङ्गविभक्तिसंबन्ध इति 'अङ्गाधिकारे' इत्यादिवचनमयुक्तमेवेत्याशयेनाह — **इह तर्हीति**। **प्रियसक्थ्नेति**। अत्र सक्थिशब्दः शकटावयववचन इति [6]'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्' इति षच् न। **प्रकृतविभक्ताविति**। अङ्गसंबन्धिन्यां विभक्ताविति्यर्थः। **तच्चापीति**। 'अङ्गाधिकारे यदुच्यते' इत्यादिसामान्यरूपं 'सप्तमीनिर्दिष्टे यत्' इत्यादिविशेषरूपं च वचनं कर्तव्यम्। तथा च वचनद्वयाश्रयेण संज्ञोपसर्जनप्रतिषेधवचननिराकरणमयुक्तमिति भावः। **न वक्तव्यमिति**। सर्वत्रैकरूप्येण विशेषणविशेष्यभावासंभवाद् यथायथं विशेषणविशेष्यभाववैलक्षण्यस्यावश्याश्रयणीयत्वादपूर्ववचनमन्तरेणैवेष्टसिद्धिरिति भावः। **पञ्चम्याङ्गं विशेषयितुमिति**। 'अशक्यम्' इति व्यवहितेनान्वयः। तथा चोत्तरार्थमनुवर्तमानेनाङ्गग्रहणेन संभवमात्रेण डतरादयो वा विशेषणीयाः स्वमौ वेति भावः। **अङ्गेन विभक्ति विशेषयिष्याम इति**। संभवमात्रेणेति शेषः। **अस्थ्यादिभिरनङमिति**। विशेषयिष्याम इत्यनुषज्यते। अस्थ्यादीनामनङ् भवतीत्युक्ते ह्यस्थ्यादिसंबन्ध्यनङ् भवतीति प्रतीतिर्भवति। एवं च वाक्यव्युत्पत्त्यर्थेऽस्थ्यादीनां प्रसङ्गे सत्यनङ् भवतीति वचनेऽस्थ्यादीनामनङ्विशेषणत्वाभावेऽपि न दोषः। **अतिस इति**। अतिशयितः स इति प्रादिसमासः। **अत्वं न प्राप्नोतीति**। त्यदादिभ्यो विहिता या विभक्तिस्तस्यां परत इत्याश्रयणादिति मन्यते। **त्यदादिप्रधान एष इति**। त्यदाद्यर्थगतसंख्याभिधायिन्यां विभक्तौ परतोऽकारो भवतीति व्याख्यानात् तत्राप्यत्वं भविष्यतीति भावः। स्यादेतत् — विभक्तिविपरिणामस्य लोकप्रसिद्धत्वेन पञ्चम्याङ्गं तावद्विशेषयितुं शक्यते 'डतराद्यन्तादङ्गात्' इति। 'डतरादिभ्यो यो विहितः' इत्याश्रयणे 'परमकतरत्' इत्यादावद्ड्

---

[1] तत्र तत्र सर्वनाम — अ, म, उ, ऋ.
[2] पा. सू. ४. १. १४.
[3] वारणार्थकत्वेन — ब.
[4] पा. सू. ७. २. १०६.
[5] पा. सू. ७. २. १०३.
[6] पा. सू. ५. ४. ११३.

न स्यात्। यत्तूक्तम् 'अर्थद्वारकं विधानमाश्रयितव्यम्, तेन तत्रापि भवति' इति। तन्न, अर्थद्वारकविधानाश्रयणेऽपि तस्य दोषस्य तथात्वात्। डतरादिभ्यो विहितत्वप्रयुक्तस्य दोषस्य ततो विहितत्वविशेषणपरित्यागमन्तरेणापरिहारात्। यदि विहितविशेषणपरित्यागेन डतराद्यर्थगतसंख्याभिधायिनोः स्वमोरद्डादेश इति व्याख्यायते तर्हि डतरादिभ्य इति पञ्चम्या अनुपपत्तिः, 'कतरद् ब्राह्मणकुलम्' इत्यादौ ब्राह्मणकुलादिशब्दात् [1]परयोरपि स्वमोरद्डादेशश्च स्यात्, तयोरपि कतराद्यर्थगतसंख्याभिधायित्वाविशेषात्। डतरादिभ्यः परयोर्डतराद्यर्थगतसंख्याभिधायिनोः स्वमोरद्ड् इति व्याख्याने तु 'डतरादीनाम्' इति पदान्तराध्याहार एव दोषः। एतद् दूषणजातं त्यदाद्यत्वविधावपि तुल्यम्। संज्ञायां त्वकारात्कारौ न वारितावेवेत्यस्वरसादाह — **अथवेति**। **सर्वेषां यानि नामानीति**। जगतीतले यावन्ति वस्तूनि वर्तन्ते तेषां सर्वेषां यानि नामानि वाचकानीत्यर्थः। तत्र सर्वविश्वसमसिमोभोभयडतरडतमान्यान्यतरशब्दा यौगपद्येन पर्यायेण च सर्वानभिदधति। अन्ये तु पर्यायेणैव। एतेन 'स्वविषयापेक्षया सर्वनामत्वं बोद्धव्यम्। यथा गोत्वादेः स्वविषयापेक्षं सर्वगतत्वम्। न त्वेतानि सर्वादीनि परस्परपर्यायतां यान्ति, भिन्नार्थत्वात्' इति निरस्तम्। संज्ञोपसर्जनानामपि स्वविषयापेक्षया सर्वनामत्वेन तेषां सर्वादित्वावारणात्। **तानि सर्वादीनीति**। तान्येव सर्वादीनीति पाठो विशेषित इति भावः। **विशेषेऽवतिष्ठेते इति**। संज्ञा तावद्विशेषेऽवतिष्ठत इति युक्तमेव सर्वेषां मते। उपसर्जनं विशेषेऽवतिष्ठत इति तु 'जहत्स्वार्था वा अजहत्स्वार्था वा वृत्तिः' इति वैयाकरणमत एव युक्तम्। 'जहत्स्वार्था वृत्तिः' इति मतेऽवयवानामानर्थक्यमित्यत्रानर्थक्यशब्दोऽतदर्थकत्वपरो ज्ञेयः। समुदायानतिरिक्तवाद्यवैयाकरणमते ह्यवयवा एवार्थवन्तः,समुदायस्यान्यस्याभावात्। समुदायशक्तिवादिनां वैयाकरणानां मते उपसर्जनस्य सर्वार्थतानपाय एव। **तन्न सिध्यतीति**। प्रकृतसूत्रस्य संज्ञाविधित्वाभावादिति भावः। **सकलं कृत्स्नं जगदिति**। उपलक्षणमिदं वस्तुपदार्थवाच्यादेः। **स स विषय इति**। स स इति वीप्सया सर्व इत्यर्थलाभात् सर्वो विषय इत्यर्थः। एवं 'तस्मिंस्तस्मिन्' इति सर्वस्मिन्नित्यर्थे बोध्यम्। ननु स्पष्टप्रतिपत्तये 'सर्वो विषयः, सर्वस्मिन् विषये' इत्येव कुतो नोक्तमिति चेन्न, यौगपद्यपर्यायाभिधानस्थापनाय तथैव वक्तुमुचितत्वात्। एतेन 'ततश्च सर्वस्मिन्नोदन इत्योदनशब्दस्यापि सर्वनामकार्यं प्राप्नोति, सामानाधिकरण्यादनयोः' इति निरस्तम्। 'सकलं कृत्स्नं जगत् इत्यत्रापि प्राप्नोति' इति विशिष्यैवातिप्रसङ्गस्य भगवता निदर्शितत्वेन तदुल्लङ्घ्य सर्वशब्दसामानाधिकरण्याश्रयेण शब्दमात्रेऽतिप्रसङ्गापादनानौचित्यात्। कदाचित् सर्वशब्दसामानाधिकरण्यं दृष्टमित्येतावन्मात्रेण सर्वार्थत्वासंभवाच्च। अन्यथा 'नीलो घटः' 'पाचको देवदत्तः' इत्यादौ नीलपाचकादीनां गुणक्रियार्थानां द्रव्यवाचकसामानाधिकरण्याद् द्रव्यार्थकता स्यात्। तथा देवदत्तादेर्द्रव्यवाचकस्य गुणक्रियावाचकसामानाधिकरण्येन गुणक्रियार्थता स्यात्। यदप्युक्तम् 'ननु प्रतिनियतवस्तुभागाभिनिवेशित्वाच्छब्दानां सर्वत्वमोदनशब्देन नाभिहितम्, ओदनत्वमपि सर्वशब्देनेति कुतोऽयं प्रसङ्गः। अत्रेदं दर्शनम् — सर्वशब्दोऽप्योदनार्थावग्रहेण प्रवृत्तः, ओदनशब्दोऽपि सर्वार्थावग्रहेण प्रवृत्तः। प्रतिपत्ता तु केवलात् सर्वशब्दाद्विशेषं न प्रतिपद्यते, रूपसादृश्यात्, नाप्योदनशब्दादिति तत्प्रतिपत्त्यर्थमुभयोरुपादानम्। तत्रैकस्य सर्वनामकार्यं भवति नापरस्येति प्रमाणाभावादतिप्रसङ्ग उद्भावितः' इति। तत्रेदं वक्तव्यम् — 'घटादन्यः पटः' 'प्रयागात् पूर्वा काशी' इत्यादावेकवाक्यगतानामन्यपूर्वादीनां पटकाश्यादीनां च शब्दानां प्रतिस्वं नियतवस्तुभागरूपशक्यतावच्छेदकविशेषाभिनिवेशेऽप्यन्यपूर्वादीनां सर्वार्थत्वसंभवेन 'ननु' इत्यादिशङ्का तावदयुक्ता। ओदनादीनां सर्ववस्तुवाचकत्वाभावेन सर्वार्थता न युज्यत इति शङ्कायाः 'एकेन शब्देनाभिमतविशिष्टार्थप्रतीतिर्न जायत इति शक्यतावच्छेदक-

---

[1] परयोरपि जश्शसोरद्डादेशश्च — ब.

भेदेऽपि विशेष्यमात्रैक्याश्रयेणोभौ शब्दौ प्रयुज्येते, अतो विनिगमनाविरहेणोभयोः सर्वनामकार्य-प्रसङ्ग आपादितः' इति समाधानमप्ययुक्तम्, तावतौदनादेः सर्ववाचकतारूपसर्वार्थकतानुपपादनात्। यद्युच्येत 'सर्वशब्दस्यार्थ एवार्थो येषां ते सर्वार्थाः। तदभिप्रायेणैव शङ्कासमाधाने' इति। तदपि न, 'सर्वेषां यानि नामानि तानि सर्वादीनि' इति भाष्यस्वरसभङ्गात्। तद्धि भाष्यं सर्वेषां पदार्थानां यानि नामानि तानि सर्वादीनीत्येवंपरम्। अन्यथा सर्वशब्दार्थताशून्यस्य वस्तुनोऽप्रसिद्धत्वेन तेन पाठविशेषणायोगात्। यद्यपि गणपाठसामर्थ्यात् सकलकृत्स्नादिष्वतिप्रसङ्गो नेति वक्तुं शक्यते, तथाप्युपायान्तरपरतयाह — **एवं तर्हीति**। **एकशेषनिर्देशोऽयमिति**। सहविवक्षायामेवैकशेषस्य विधानात् प्रकृते तदसंभवादेकशेषसदृशस्य निर्देश उच्चारणमिदं 'सर्वादीनि' इति 'सर्वनामानि' इति चेत्यर्थः। तेनानेकव्यक्तिप्रतिपत्तितात्पर्यकत्वेनैकव्यक्त्युच्चारणात्मकशब्दतन्त्रस्यावृत्तेर्वाश्रयणादुभय-लाभ इति भावः। यत्तु 'अथवा आकृत्यभिधानपक्षे एकस्यैव प्रयोगे सिद्धे प्रत्याख्यातमेकशेष-शास्त्रं संज्ञापरिभाषावच्छास्त्रप्रक्रियासंपादनार्थं भवतीति सहविवक्षामन्तरेणापि भवत्येकशेषः' इति। तन्न, शब्दतन्त्रावृत्तिभ्यामेव सहविवक्षाविरहस्थले निर्वाहेण सूत्रस्य तादृशस्थले एकशेषार्थत्वेन स्था-पने मानप्रयोजनयोरभावात्। अन्वर्थसंज्ञाकरणसामर्थ्यादेव तदनुगुणानां गणे संनिवेशो ज्ञातुं शक्यत इति तन्त्रावृत्त्याश्रयणमपि नापेक्ष्यत इत्याशयेनाह — **अथवेति**। **यतो न लघीय इति**। अत्र स्वार्थे ईयसुन्। तदेव सूचयति — **लघ्वर्थं हि संज्ञाकरणमिति**। संज्ञाकरणाभावे गुरुशब्देन निर्देशः कर्तव्य इतीदं शास्त्रमध्येतृदुःखजनकं स्यादित्यनादरणीयं स्यादिति भावः। एतेन 'शब्दव्यवहारो लघुः, ततोऽपि लघीयो नाम' इति निरस्तम्। शब्दव्यवहारोपयोगित्वेनैव संज्ञानां कृतत्वेन तद्-व्यवहारापेक्षया संज्ञाया लघीयस्त्वोक्तेरयुक्तत्वात्। 'लघ्वर्थं हि संज्ञाकरणम्' इति भाष्याननु-गुणत्वाच्च। **विशेषेऽवतिष्ठेते इति**। उपसर्जनस्य विशेषेऽवस्थानं समासे शक्तिमङ्गीकुर्वद्भि-र्वैयाकरणैः स्वीकर्तुमयुक्तमिति 'संज्ञोपसर्जनप्रतिषेधः' इति वार्तिकाश्रयणमेव युक्तमिति सुधियो विदां-कुर्वन्तु। भाष्यकारैरध्येतृबुद्धिवृद्धयेऽनेके समाधानप्रकाराः प्रदर्शिताश्चेदपि तत्र कस्यापि प्रकारस्य वार्तिकसमकक्षत्वाभावेन सर्वे उपेक्षणीया एव। तदुक्तं वाल्मीकिना योगवासिष्ठे [1]'युक्तियुक्तमुपा-देयं वचनं बालकादपि। अन्यत् तृणमिव त्याज्यमप्युक्तं पद्मयोनिना।' इति। तत्र वचनशब्दो युक्तिमूलकवचनपरः। अन्यथा [2]'अहरहः सन्ध्यामुपासीत' [3]'प्राङ्मुखोऽन्नानि भुञ्जीत' इत्यादि-वाक्यानां युक्तियुक्तत्वाभावेनाप्रामाण्यप्रसङ्गात्। वार्तिकेनापि संज्ञाप्रतिषेधोऽनर्थकः, प्रसिद्धा-प्रसिद्धपरिभाषया गतार्थत्वादित्यन्यदेतत्॥

[१, २८१–२८५]

(**नारायणीयम्**) विभक्तेर्गृह्यमाणसंबन्धित्वं तत्परत्वेन ततो विहितत्वेन वा। आद्ये 'अति-सर्वाय' इत्यत्रापि प्रसङ्गः। अन्त्ये तु 'परमसर्वस्मै' इत्यादौ न स्यात्, अत आह — **गृह्यमाणा-नामिति**। **यद्येवमिति**। षडर्थसंबन्धित्वं विभक्तेरिति लुकः प्रसङ्गः। ततः परस्य ततो विहितस्य वा लुग्विधाने नास्त्यनिष्टम्। [4]अकारान्तस्याषट्संज्ञकत्वात्। [5]नन्वार्थसंबन्धाश्रयणेऽपि न दोषः, प्रत्ययान्तार्थसंबन्धित्वाद्विभक्तेः षडर्थसंबन्धित्वाभावात्, अत आह — **स्वार्थिकत्वादिति**। [6]'संख्यायाः

---

[1] योगवासिष्ठे मुमुक्षुव्यवहारप्रकरणे सर्ग. १८ श्लो. ३.

[2] भस्मजाबालोपनिषत् २. ३.

[3] आपस्तम्बधर्मसूत्रम् १. ३१. १.

[4] आकारान्तस्याषट् — क.

[5] नन्वर्थेऽर्थसंबन्धाश्रयणेऽपि — क.

[6] पा. सू. ५. १. ५८.

संज्ञासंघ' इत्यत्र संज्ञायां स्वार्थे प्रत्ययोपसंख्यानात् स्वार्थिकत्वम्। **नायमिति**। षट्त्वविशिष्टार्थ-संबन्धित्वं निमित्तमिति भावः। षट्त्ववैशिष्ट्याभावे हेतुमाह — **नान्तत्वाभावादिति**। संख्याया इति शेषः। संज्ञाविधौ नलोपस्यासिद्धत्वात् कथं नान्तत्वाभावः, तत्राह — **शब्दान्तरत्वादिति**। शब्दान्तरस्य पञ्चकशब्दस्य संख्यात्वमत्रेति भावः। सप्तमीनिर्देशेऽङ्गसंबन्धिविभक्तिग्रहणस्य वक्ष्यमाणत्वादन्यत्र सर्वत्र गृह्यमाणविभक्तिग्रहणमिति मतिः स्यात्। तदर्थमाह — **युष्मदिति**। परमप्रकृतं [1]**प्रकृत**शब्दार्थः, न त्ववान्तरप्रकृतमित्याह — **अङ्गेति**। एकवचनात् सप्तमीनिर्दिष्ट-स्यैवानन्तरस्य परामर्श इति शङ्कां वारयति — **गृह्यमाणेति**। भाष्योक्तविशेषणविशेष्यभावकाम-चारविषयस्योपलक्षणत्वादन्यत्रापीत्थमभिमतसिद्धिरित्याह — **युष्मदिति**। त्यदादिप्राधान्यमुपपादयति — **शोभन इति**। **नञिति**। तत्राप्युत्तरपदार्थप्राधान्यस्य द्वितीये स्थापयिष्यमाणत्वात्। 'अति-सर्वाय' इत्यादावविशेषकार्यस्यात्राप्यपरिहारात् परिहारान्तरोपन्यासो भाष्ये। सर्वार्थनामत्वं सर्वेषां सर्वादीनां संज्ञोपसर्जनव्यतिरिक्तानामुक्तम्। तदयुक्तम्, पर्यायत्वापत्तेः। यथा वृक्षार्थनाम्नां तरुवनस्पत्यादीनाम्, अत आह — **स्वविषयेति**। सर्वार्थनामत्वं सर्वार्थवाचकत्वं। एवं च कश्चि-च्छब्दः किंचिन्निमित्तकतया सर्वार्थवाचकोऽन्यश्च निमित्तान्तरेण। [2]न त्वेषामेकं निमित्तमिति नास्ति पर्यायतापत्तिः। स्वस्य विषयो निमित्तं, [3]तदपेक्षं तदुपाधिकमित्यर्थः। सर्वत्वप्रकारेण सर्वार्थबोधकत्वं सर्वविश्ववदितरेषां नास्ति यद्यपि, अथापि स्वनिमित्तरूषिततया सर्वार्थबोधकत्व-मस्तीत्यर्थः। **यथेति**। ब्रह्मवत् पूर्णत्वाभावेऽपि गोत्वादेरौपाधिकसर्वार्थगतत्वव्यवहारवत् सर्वत्व-प्रकारक[4]ज्ञानाजनकानामौपाधिकसर्वनामत्वव्यवहारः। स्वस्य विषयः सामान्यादित्रितयव्यतिरिक्त-पदार्थः, एतत्पदार्थवृत्तित्वमेतेषामेतत्पर्यायाणां वा। आद्ये इष्टापादनम्। अन्त्ये समनन्तरवाक्योक्त-दूषणानतिरेक इत्याशङ्क्यातिव्याप्तिविषयमादर्शयति — **ततश्चेति**। सर्वपदार्थे ओदनपदवृत्तिं प्रकटयति — **सामानाधिकरण्यादिति**। एकार्थवृत्तित्वं हि तदितिभावः। [5]सर्वपदार्थे ओदनपद-वृत्तिर्नेति शङ्कते — **नन्विति**। कुत इत्यत आह — **प्रतीति**। यद्येकपदार्थत्वं [6]तदैकपदप्रयोगादेव तत्प्रतीतेरितरप्रयोगो न स्यात्। तस्माद् भिन्नवस्त्वभिनिवेशित्वमित्यर्थः। **प्रतिनियतत्वं** पदान्तरे-णानुपादीयमानत्वम्। कोऽसौ वस्तुभेदः, तमाह — **सर्वत्वमिति**। सामानाधिकरण्यं तु पर्यवसान-भूम्येकत्वात्। [7]**अत्रेदमिति**। वाक्यं ह्येकैकेनैव विशिष्टं प्रतिपादयिष्यति। पदमपि च तत्रानु-कूलम्। अन्यथा प्रकरणादिसत्त्वेऽन्यतरेण तदधिगतिरित्यर्थः। न चैवं पदान्तरवैयर्थ्यमित्याह — **प्रतिपत्तेति**। **रूपेति**। 'सर्वो घटः' इत्यादिवाक्यस्थसर्वपदसाम्यात्। नन्वेवमपि घटाद्यनभि-धायकस्यौदनपदस्य सर्वार्थवाचिता नेति कथं प्रसङ्ग इति चेत् सर्वपदस्यापि तर्हि सर्वार्थवाचित्वमिह नास्ति, ओदनार्थावग्रहेण प्रवृत्तेः। अथ यथासंभवं सर्वार्थत्वमिति तस्य सर्वनामकार्यं तदौदन-शब्दस्यापि प्रसङ्ग इत्याह — **तत्रेति**। **सहेति**। एकस्य सर्वादि[8]पदस्योद्देश्यगमकत्वादपरस्य च विधेयवाचित्वात् तयोः सहविवक्षाभावः। एवं सर्वनामपदेऽपि। स्वरूपमुपकारि निमित्तमस्येति **स्वरूपोपकारी**। **अतिक्रान्तार्थवृत्तीति**। ततश्च विशेषोऽस्य वाच्यः, न त्वसंकुचितः संकुचितो वा सर्वार्थः। वृत्तिवाक्ययोर्विशेषणत्वसाम्याद्वाक्येऽपि [9]सर्वार्थहानिमाशङ्क्यमानं प्रत्याह — **वाक्ये त्विति**।

---

[1] परमशब्दार्थः — क.

[2] न त्वेषामेकनिमित्तमिति — क.

[3] प्रदीपे 'स्वविषयापेक्षया' इत्यत्र 'स्वविषया-पेक्षम्' इति पाठोऽभिसंहित इति भाति।

[4] ज्ञानजनकानाम् — क.

[5] ओदनपदार्थे — क.

[6] तदा पदैकप्रयोगादेव — क.

[7] प्रदीपे 'तत्रेदं दर्शनम्' इत्यत्र 'अत्रेदं दर्शनम्' इति पाठः — म.

[8] पदस्योद्देश्यागमकत्वात् — क.

[9] भावप्रधानो मन्तव्यः, सर्वार्थत्वहानिमित्यर्थः।

स्वार्थमात्रमिति । अजहत्स्वार्थपक्षेऽपि स्वार्थप्रतिपादनमस्तीति मात्रपदम् । यतो लघुतरं नास्ति सा संज्ञा कार्येत्युक्ते संज्ञा सर्वस्माल्लघीयसीति गम्यते । तत्र सजातीयगुणापेक्षत्वात् प्रकर्षस्य तद्गुणयोगिनं प्रतियोगिनं निर्दिशति — **शब्देति** । महासंज्ञाकरणादन्वर्थत्वमुक्तम् । तदयुक्तम्, अर्थगतनिमित्तानपेक्षत्वं संज्ञात्वम्, तदपेक्षत्वमन्वर्थत्वमित्यनयोर्विरोधात्[1], अत आह — **तत्रेति** । न संज्ञाया निमित्तस्वीकारः, येन विरोधः स्यात् । किं तु गुरुसंज्ञान्यथानुपपत्त्या संज्ञिनां विशिष्टधर्मानुमानमित्यर्थः । यद्येवं संज्ञाप्रयुक्तकार्य [2]एव विशेषलाभः स्यात्, न त्वन्तर्गणकार्य इत्याशङ्क्य न विशिष्टानां संज्ञाभाक्त्वानुमानम्, किं तु तेषामेव पाठानुमानम्, पाठस्य संज्ञार्थत्वादित्यभिप्रेत्याह —**सर्वादीनामिति** ॥

[१, २८६–२८९]

(**लघुविवरणम्**) 'द्विवचनटाब्विषयत्वात्' इति [3]सिद्धवद्धेत्वभिधानमयुक्तमित्यत आह — **तत्रोभादिति** । [4]"उभादुदात्तः' इत्यत्रास्वरितत्वात् 'वा' इत्येतन्नानुवर्तत इति न तन्निवृत्त्यर्थं नित्यग्रहणमिति भावः । **वृत्तिविषय इति** । वृत्तिसामान्यमपेक्ष्योभयशब्दो 'नित्यम्' इत्यनेन योगविभागेन नियम्यत इति भावः । **स्वरे चेति** । के सति प्रत्ययस्वरेण यदुदात्तत्वं तदेवाकच्यपि, [5]"चितः सप्रकृतेः' इति वचनादिति भावः । **तत्र केति** । नित्यग्रहणात् कन्यप्युभयशब्द एव प्राप्त इति भावः । ननु यत्र द्विवचनं तत्र टाप एकादेशस्यान्तवद्भावाद् द्विवचनपरत्वेऽप्येकवचनबहुवचनयोष्टाब्विषयत्वं मा भूदिति द्विवचनपरता वक्तव्येत्यस्य कः परिहार उक्त इत्यत आह — **स्वार्थिकत्वादिति** । द्वित्वसंख्येयवाचित्वादुभयशब्दस्यैकवचनबहुवचनयोष्टाब्विषयत्वप्राप्तिरेव नास्तीति भावः । 'केऽपि तुल्यम्' इत्यस्यातिप्रसञ्जकत्वं परिहरति — **उभयत इति** । **भावतायनिरिति** । [6]सर्वादिगणे पाठे त्यदादित्वात् वृद्धसंज्ञायां [7]"उदीचां वृद्धादगोत्रात्' इति फिञ् । **भवद्रचङिङिति** । [8]"विष्वग्देवयोः' इत्यत्र चकारात् सर्वनामग्रहणानुवर्तनात् सति सर्वनामत्वेऽद्र्यादेशः । भवन्मय इत्यत्र [9]"नित्यं वृद्ध' इति मयट् । **पूर्वनिपात इति** । [10]"बहुव्रीहौ सर्वनामसंख्ययोः' इत्यनेन । [11]"भवत-ष्ठक्छसौ' इत्यत्र शत्रन्तस्य निवृत्तये वृद्धग्रहणमनुवर्तनीयमित्यभिप्रेत्य प्रयोजनान्तरमाह — **भवत इति** । एकसंज्ञाधिकारे गुणवचनसंज्ञानन्तरं सर्वनामसंज्ञा कर्तव्येति प्रतिपादनात् प्रयोजनान्तरमाह — **गुणवचनेति** ॥

[१, २८६–२८९]

(**विवरणम्**) 'द्विवचनटाब्विषयत्वात्' इति सिद्धवद्धेत्वभिधानमयुक्तमित्यत आह — **तत्रेति** । 'वा' इत्यस्यास्वरितत्वादेवोत्तरत्राननुवृत्तिरिति न तन्निवृत्त्यर्थं नित्यग्रहणमुपयुज्यत इति भावः । तद्धितवृत्तौ वृत्तिलक्षणसामान्यमपेक्ष्योभयशब्दो 'नित्यम्' इति वाक्यभेदेन नियम्यत इत्यर्थः । 'क

---

[1] विरोधः — क.
[2] एवं विशेष — क.
[3] सिद्धत्वाभिधानम् — ड, ढ.
[4] पा. सू. ५. २. ४४.
[5] का. वा. ६. १. १६३–१.
[6] सति सर्वादि — त.
[7] पा. सू. ४. १. १५७.
[8] पा. सू. ६. ३. ९२.
[9] पा. सू. ४. ३. १४४.
[10] का. वा. २. २. ३५–१.
[11] पा. सू. ४. २. ११५.

इदानीमस्यान्यत्र' इति भाष्यस्यायमर्थः — **अस्य** उभयशब्दस्य प्रसङ्गे **अन्यत्र** समुदाये [1]'वर्गद्वयवति वर्गिणि वाचको भवतीति। **स्वरे चेति**। कप्रत्यये यः स्वरः स एवाकच्यपि, [2]'चितः सप्रकृतेः' इति वचनादिति भावः। **लुप्तत्वादिति**। तद्धितान्तत्वेन प्रातिपदिकत्वात् [3]'सुपो धातुप्रातिपदिकयोः' इत्यनेन। **अपरस्य** तद्धितान्तादुत्पन्नस्येत्यर्थः। **तत्रेति**। नित्यग्रहणात् केऽप्युभयशब्दप्रसङ्गादिति भावः। ननु यत्र द्विवचनं तत्र टाप एकादेशस्यान्तवद्भावाद् द्विवचनपरत्वेऽप्याप्यप्येकवचनबहुवचनविषयत्वाभावाय द्विवचनपरता वक्तव्येत्युक्तस्य कः समाधिरित्यत आह— **स्वार्थिकत्वादिति**। द्वित्वसंख्यासंख्येयवाचित्वादुभयशब्दस्य टाप्येकवचनबहुवचनयोः प्राप्तिरेव नास्तीति भावः। ननु कप्रत्यये तेनैव द्विवचनस्य व्यवधिरुक्त इत्यत आह — **द्विवचनेति**। वृत्तिविषय उभयशब्दो नियम्यत इत्युक्तम्। परार्थाभिधानं [4]च वृत्तिः, स्वार्थिकेषु च न परार्थाभिधानं प्रकृतेरिति भावः। नन्वेवम् 'उभकौ' इतिवत् 'उभतः' इत्याद्यपि प्रसज्येतेत्यत आह — **उभयत इति**। **भावतायनिरिति**। [5]'सति भवच्छब्दस्य सर्वादिषु पाठे त्यदादित्वात् [6]'त्यदादीनि च' इति वृद्धसंज्ञायाम् [7]'उदीचां वृद्धात्' इति फिञ्। भवन्तमञ्चतीति [8]'ऋत्विक्' इत्यादिना क्विन्। भवच्छब्दस्य सर्वनामसंज्ञायां च [9]'विष्वग्देवयोश्च' इति चकारेण सर्वनाम्नोऽनुकर्षणाट्टेरद्र्यादेशः। पूर्ववद् वृद्धसंज्ञायां विकारावयवयोः [10]'नित्यं वृद्धशरादिभ्यः' इति मयटि 'भवन्मयः' इति [11]सिद्धं भवति। 'भवन्मित्रः' इत्यत्र सर्वनामसंज्ञायां च [12]'बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्' इति भवच्छब्दस्य पूर्वनिपातः। [13]'भवतष्ठक्छसौ' इत्यत्र शत्रन्तनिवृत्तये वृद्धग्रहणमनुवर्त्यमित्यभिप्रेत्य प्रयोजनान्तरमाह — **भवत इति**। एकसंज्ञाधिकारे 'गुणवचनसंज्ञातः परा सर्वनामसंज्ञा कर्तव्या' इति वचनात् प्रयोजनान्तरमाह — **गुणवचनेति** ॥

[१, २८६–२८९]

(**उद्द्योतनम्**) द्विवचनटाब्विषयत्वं साधयति — **तत्रेति**। [14]'द्वित्रिभ्यां तयस्यायज्वा' इति [15]'वाकारस्यास्वरितत्वेनाननुवृत्त्यैव नित्यत्व[16]सिद्धिरिति भावः। **वृत्तीति**। वृत्तिसामान्ये 'नित्यम्' इति वाक्यभेदेन नियम्यत इत्यर्थः। भाष्ये **क इदानीमिति**। एकवचनबहुवचनयोरित्यर्थः। [17]**उभाबाह्वि**ति। निपातनादेवेच्प्रत्ययस्यापि लुक्। आदिना [18]'उभादन्ति' इत्यादिग्रहः। **स्वरे चेति**। अकचश्चित्त्वेनान्तोदात्तत्वे प्रकृत्यकारस्य [19]पररूपे सति [20]ककाराकारस्यैवोदात्तत्वादित्यर्थः। यद्यपि

---

[1] वर्गद्वयवर्गिणि — ट.
[2] का. वा. ६. १. १६३ — १.
[3] पा. सू. २. ४. ७१.
[4] चकारो नास्ति — अ.
[5] अत्र भवच्छब्दस्य — ट.
[6] पा. सू. १. १. ७४.
[7] पा. सू. ४. १. १५७.
[8] पा. सू. ३. २. ५९.
[9] पा. सू. ६. ३. ९२.
[10] पा. सू. ४. ३. १४४.
[11] 'सिद्धम्' इति नास्ति — च, छ, ट.
[12] का.वा. २. २. ३५–१.
[13] पा. सू. ४. २. ११५.
[14] पा. सू. ५. २. ४३.
[15] वाशब्दस्यास्वरितत्वेनाननु — उ.
[16] सिद्धेरिति भावः — उ, ऊ, ऋ.
[17] उभाबाह्वीति — म, आ, उ.
[18] उभादण्डीत्यादि — म, आ, इ, ऋ.
[19] अत्राकचष्टेःप्राक् प्रवृत्तौ उभ् अक् अ = 'उभक' इत्यत्राकचः परत्र विद्यमानस्य प्रकृत्यकारस्य 'चितः सप्रकृतेः' इति वचनेनोदात्तत्वं भवतीति तात्पर्यम्। न त्वत्र पररूपं भवति। 'परत्वे सति' इति पाठ उचितो भाति।
[20] ककारस्यैवोदात्तत्वात् — अ, इ, ऊ.

सर्वत्र पदान्तेऽवग्रहं पदकारा न कुर्वन्ति, तथाप्यभ्युपेत्याह — **अवग्रहे चेति**। **न हीति**। तथा च [1]केऽवग्रहाभावेऽपि नानुपपत्तिरिति भावः। **अनुवर्त्याः** पदकारैर्नमि [2]लक्षणमनुवर्त्यमिति शेषः। [3]'सर्वनाम्नस्तृतीया च' [4]इत्येतदकच्पक्ष इव कपक्षेऽपि भवतीत्याह — **उभकाभ्यामिति**। [5]**सिद्धे** कान्तस्यापीत्यादिः। **निमित्तेति**। असर्वनाम्नोऽपीदं विधानमित्याशयः। अत एव [6]'हेतौ' इति सूत्रे प्रदीपः — असर्वनाम्नोऽपि विधानार्थमत्र सूत्रे इदं पठितम्, न तु [7]'सर्वनाम्नस्तृतीया च' इत्यत्र, इति। ननु कव्यवधानेऽप्युभशब्दस्य द्विवचनपरता न हीयत इति 'वक्तव्या' इत्ययुक्तम्, अत आह — **द्विवचन इति**। **पूर्वस्येति**। सुबन्तात् कादिविधानादित्यर्थः। **नन्विति**। द्विवचनपरत्वाभावेऽप्याब्विषयत्वं संभवतीत्यर्थः। ननु टापि द्विवचनपरत्वसंभवेऽप्येकवचनबहुवचनयोर्निवृत्त्यर्थं द्विवचनपरत्वं वक्तव्यमित्युक्तम्, तत्र कः समाधिः, अत आह —**स्वार्थिकत्वादिति**। स्त्रियां यत् प्रातिपदिकं वर्तते तस्माट्टाबादिविधानादुभशब्दस्य द्वित्वसंख्याविशिष्टवाचित्वाट्टाप्यपि द्विवचन[8]विषयत्वमवचनसिद्धमित्यर्थः। ननु के सति तेनैव विभक्तेर्व्यवधानमित्युक्तम्, अत आह — **द्विवचनेति**। द्वयर्थाभिधाने विवक्षिते उभशब्दः प्रयोज्य इत्यर्थः। यद्वा कप्रत्ययः स्वार्थिकत्वाद् द्वयर्थाभिधानसमर्थः, तस्मिन् परतो द्विवचनपरत्वं संभवतीत्यर्थः। वृत्तावुभयशब्दो नियम्यते, वृत्तिश्च परार्थाभिधानम्, [9]स्वार्थिकेषु [10]प्रकृतेर्न परार्थाभिधानमिति भावः। ननु 'उभकौ' इतिवत् 'उभतः' इत्याद्यपि स्यात्, अत आह — **उभयत इति। सामर्थ्यं नास्तीति**। तत्र प्रकृत्यैव संख्याविशेषप्रतिपत्तिः[11], तसिलादेर्विभक्त्यर्थद्योतकत्वमात्रमित्यर्थः। **अभेदविषये** अद्वित्वाभिधायिप्रत्ययविषये। **केचित्** [12]'निमित्त' इत्यादिवार्तिकं सर्वनामविषयकमिति मन्यमानाः। **अन्य इति**। उक्तोऽत्राभिप्रायः। भाष्ये **स च भवांश्चेति**। [13]'त्यदादिषु यत् परं तच्छिष्यते' इत्यस्योदाहरणम्। [14]'त्यदादीनि सर्वैर्नित्यम्' इत्यस्य 'देवदत्तश्च भवांश्च भवन्तौ' इत्युदाहार्यम्। प्रदीपे 'त्यदादित्वात्' इत्युभय[15]साधारणो हेतुः। **अनपेक्ष्येति**। तत्त्वसर्वनामार्थमिति भावः। स्वयं प्रयोजनान्याह — **इदं त्विति**। **भावतायनिरिति**। भवच्छब्दस्य [16]सर्वादिपाठे सति [17]'त्यदादीनि च' इति वृद्धसंज्ञायाम् [18]'उदीचां वृद्धादगोत्रात्' इति फिञ्। **भवद्रचञ्ङिति**। [19]'विष्वग्देवयोश्च' इत्यत्र चकारेण सर्वनाम्न आकर्षणाट्टेरद्र्यादेशः। **भवन्मय इति**। पूर्ववद्वृद्धसंज्ञायां [20]'नित्यं वृद्ध' इति मयट्। **पूर्वेति**। [21]'बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्' इत्यनेन। **भवत इति**। भावत्कः, भवदीयः। अत्र [22]शत्रन्तनिवृत्त्यर्थं वृद्धादित्यनुवर्तत इति भावः। एकसंज्ञाधिकारे 'गुणवचनसंज्ञातः परा सर्वनामसंज्ञा कर्तव्या' इति वचनाश्रयेण प्रयोजनान्तरमाह — **गुणवचनेति**॥

---

[1] 'के' इति नास्ति — इ.
[2] लक्षणमनुवर्तनीयमिति — ऋ.
[3] पा. सू. २. ३. २७.
[4] इत्येतदकचीव केऽपि — ऊ.
[5] सिद्धेः — ऋ.
[6] पा. सू. २. ३. २३.
[7] पा. सू. २. ३. २७.
[8] विषयत्वमेव च सिद्धमित्यर्थः — ऋ.
[9] 'स्वार्थिकेषु प्रकृतेर्न परार्थाभिधानम्' इति नास्ति — उ.
[10] 'प्रकृतेः' इति नास्ति — म.
[11] प्रतीतिः — उ, ऊ.
[12] का. वा. २. ३. २३ — १.
[13] १. २. ७२. सूत्रस्थस्य 'परस्य शेषं वक्ष्यामि' इति वचनस्यार्थानुवादोऽयम्।
[14] पा. सू. १. २. ७२.
[15] साधारणोऽत्र हेतुः — अ; साधारणहेतुः —म.
[16] सर्वादिषु पाठे — अ.
[17] पा. सू. १. १.७४.
[18] पा. सू. ४. १. १५७.
[19] पा. सू. ६. ३. ९२.
[20] पा. सू. ४. ३. १४४.
[21] का. वा. २. २. ३५–१.
[22] शतृनिवृत्त्यर्थं — अ.

[१, २८६–२८९]

(**रत्नप्रकाशः**) **सर्वनामत्व इति**। सर्वनामसंज्ञायामित्यर्थः। **कोऽर्थ इति**। किं प्रयोजनमिति प्रश्नः। **अकजर्थ इति**। अकच् प्रयोजनमित्युत्तरम्। **सर्वनामकार्याणीति**। प्रयोजनत्वेनोक्तानीति शेषः। **द्विवचनटाब्विषयत्वादिति**। 'उभौ घटौ, उभे फले' इत्यादौ द्विवचनविषयत्वम्, 'उभे स्त्रियौ' इत्यत्र टाब्विषयत्वम्। अत्र द्विवचनटाब्विषयत्वोक्त्येदमुक्तं भवति — उभयत्र द्विवचनलुङ्निमित्तसमासघटकत्वं प्रत्ययान्तरपूर्वत्वेन प्रकृतित्वं [1]चोभस्य न भवतीति। तेनाकचं प्रति पूर्वत्वेनाप्रकृतित्वादकच्विषयत्वं संभवति, नान्यसर्वनामकार्यविषयत्वमिति। एतेन 'टाब्विषयत्वमपि न द्विवचनादन्यत्र बोद्धव्यम्' इति निरस्तम्। अन्यत्रोभशब्दस्यैवाभावेन तस्य टाब्विषयत्वनिराकरणानर्थक्यात्। **उभयशब्दोऽस्यान्यत्रेति**। द्विवचनटाब्विषयत्वाभावे उभशब्दप्रसङ्गेऽयच्प्रत्ययान्त उभयशब्दो भवतीत्यर्थः। तथा च [2]"उभादुदात्तो नित्यम्' इत्यत्र 'नित्यम्' इति विभज्य वृत्तिविषये उभशब्दान्नित्यमयज् भवतीति व्याख्यानात् तत्सिद्धिरिति भावः। द्विदण्ड्यादौ 'उभाञ्जलि, उभयाञ्जलि' इत्यादिपाठादुभशब्दस्यापि प्रयोगः साधुः। **कश्चेदानीमिति**। रूपेस्वरे च विशेषादर्शनात् प्रश्नः। [3]"निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति वार्तिकेन [4]"हेतौ' इति सूत्रगतेन सर्वनामसंज्ञानिरपेक्षेण सर्वविभक्तिविधायकेन [5]"षष्ठी हेतुप्रयोगे' [6]"सर्वनाम्नस्तृतीया च' इति सूत्रद्वयस्य व्यर्थीकरणात् सर्वनामताप्रयुक्तषष्ठीतृतीयाकृतं वैषम्यमपि नास्ति। **द्विवचनपरोऽयमिति**। [7]"अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति न्यायेन विभक्त्येकादेशात् प्रागेव तद्धित इत्युत्सर्गात् तदेकादेशात् प्रागकचि सति द्विवचनपरत्वमस्ति, द्विवचनस्य लुग् न जात इति द्विवचनविषयतास्तीति वा तस्यार्थः। तेन विभक्त्येकादेशोत्तरम् [8]"उभयत आश्रयणे नान्तादिवत्' इति द्विवचनपरत्वाभावेऽपि न क्षतिः। **नायं द्विवचनपरः स्यादिति**। तस्मादुत्पन्नस्य द्विवचनस्य के सति [9]"सुपो धातुप्रातिपदिकयोः' इति लुप्तत्वान्न द्विवचनविषयता तस्य स्यादिति भावः। **वक्तव्येति**। के सत्यपि द्विवचनविषयतास्तीति वक्तव्यं स्यादिति भावः। 'द्विवचनटाब्विषयः' इत्युक्तं पृथक् टाब्विषयत्वं विस्मृत्य संनिहितद्विवचनपरत्वमात्रमाश्रित्य शङ्कते — **यथैवेति**। एतेन 'एवं तर्हि टाब्विषयत्वमेकवचन[10]बहुवचनयोर्मा भूदित्येवमर्थमाप्यपि द्विवचनपरता वक्तव्या स्यादित्येतदभिप्रायकमिदम्' इत्युक्तिः प्रत्युक्ता। उभशब्दप्रकृतिकाट्टाबन्तादेकवचनबहुवचनयोरसंभवात्। **एकादेशे कृत इति**। टाबुभाकारयोरिति शेषः। **द्विवचनपरोऽयमिति**। द्विवचनेन सहैकादेशात् पूर्वमिति शेषः। तदुत्तरमेकादेशे कृतेऽपि प्रागुक्तरीत्या द्विवचनविषयतास्तीति ज्ञेयम्। एतेन 'स्वार्थिकत्वाट्टाप उभार्थस्याहानादाप्यपि सिद्धा द्विवचनपरतेत्यर्थः' इति निरस्तम्। टापा सहैकादेशे सत्यन्तवद्भावेन द्विवचनपरतां भाष्यकृदुक्तामुपेक्ष्यैकादेशमन्तरेणानुपपद्यमानस्य प्रकारान्तरकथनस्यायोगात्। टाबेकादेशोत्तरमन्तवद्भावे टाबन्तस्योभशब्दग्रहणेन ग्रहणाद् द्विवचनपरत्वमिति स्पष्टमुक्तमप्यबुद्ध्वा कुतर्कवासनावासितान्तःकरणतया टापः स्वार्थिकत्वेन [11]तदन्तं तत्प्रकृतिग्रहणेन गृहीतमित्युक्तमिति बुद्ध्वा तद्वत् स्वार्थिकप्रत्ययान्तस्यापि तत्प्रकृतिग्रहणेन ग्रहणं भविष्यतीति मन्य-

---

[1] चोभयस्य — ब.
[2] पा. सू. ५. २. ४४.
[3] का. वा. २. ३. २३–१.
[4] पा. सू. २. ३. २३.
[5] पा. सू. २. ३. २६.
[6] पा. सू. २. ३. २७.
[7] परिभाषा ५२.
[8] महाभाष्यम् १. १. ५८.
[9] पा. सू. २. ४. ७१.
[10] द्विवचनयोः — ब.
[11] तदन्ततत्प्रकृति — ब.

मान आह — **अवचनादिति**। **केऽपीति**। सतीति शेषः। **तुल्यमिति**। अन्तरेण वचनमुभशब्दस्य द्विवचनपरत्वमिति समानमिति भावः। **स्वार्थिकानामपीति**। स्वार्थिकान्तानामपीत्यर्थः। एतेन 'द्विवचनविषयत्वादित्यत्र द्विवचनशब्देन प्रत्ययो न गृह्यते, किं तर्हि, द्वयर्थाभिधानसमर्थ इत्यर्थः। उभयत उभयत्रेति च त्रतसोरव्ययत्वाद् द्वित्वाभिधानसामर्थ्यं नास्तीत्यभेदविषये उभयशब्द एव प्रयुज्यते, न तूभशब्दः। एवं प्रत्याख्यातोऽकजर्थ उभशब्दस्य पाठः' इति निरस्तम्। तदुक्तार्थस्यैकेनाप्यंशेन प्रकृतभाष्यासंस्पर्शात्। भाष्ये 'के' इत्यनेन निर्दिष्टस्यापि प्रत्ययत्वेन 'द्विवचनशब्देन प्रत्ययो न गृह्यते' इत्यस्य प्रकृतानुपयोगित्वेनासंबद्धप्रलापत्वात्। त्रतसन्तस्याव्ययत्वेऽपि त्रतसोरनव्ययत्वात्। तयोरव्ययत्वेन स तुष्यति चेदपि कप्रत्ययवत् तयोरपि स्वार्थिकत्वाविशेषेण द्वित्वविशिष्टार्थाभिधानसामर्थ्यानपायात्। शङ्कायां अतितुच्छत्वेन समाधानाकरणेऽपि तावताकजर्थोभशब्दपाठस्याप्रत्याख्यानाच्च। ननु सप्तमीपञ्चम्यन्तात् त्रतसिलोर्विधानात् सप्तमीपञ्चम्यन्तार्थः सर्वोऽपि त्रतसिभ्यामुच्यते न तूभशब्दार्थमात्रमिति कप्रत्ययात् तयोर्विशेष इति चेन्न, उभशब्दावाच्याज्ञाताद्यर्थस्यापि केनोच्यमानत्वेन तस्यापि तदर्थमात्रपरत्वाभावात्। प्रथमान्तादेव कप्रत्यय इत्यत्र मानाभावेन सप्तम्याद्यन्तस्य विधीयमानस्य तस्य सप्तम्याद्यन्तार्थबोधकताया अपि संभवाच्च। इदानीं 'केऽपि तुल्यम्' इति मन्दबुद्ध्याशङ्कायाः समाधानं बालकेनापि ज्ञातुं शक्यत इति तदुपेक्ष्य 'उभयोऽन्यत्र' इति [1]वार्तिकानन्तरवार्तिकमवतारयति — **अथ भवत इति**। **सर्वनामत्व इति**। सर्वनामसंज्ञोपयोगिगणपाठस्येत्यर्थः। **अकच्छेषात्वानीति**। अकजात्वे सर्वनामसंज्ञाप्रयुक्ते, एकशेषस्तु त्यदादित्वप्रयुक्तः। **तृतीयादयोऽपीति**। आदिशब्देन षष्ठ्यद्रिपूर्वनिपातठक्छस्मयट्फिञो गृह्यन्ते, गुणवचनसंज्ञाबाधश्च। **सर्वनाम्नस्तृतीया चेति**। तथा च तृतीयाषष्ठ्योः सूत्रकृन्मते प्रयोजनत्वं न तु वार्तिककृन्मत इति सूचितम्। **भवतो हेतोरिति**। तथा भवद्रयङ्, भवन्मित्रः, भावत्कः, भवदीयः, भवन्मयः, भावतायनिः। गुणवचनसंज्ञाभावे तु 'भावत्यम्' इति रूपाभावसिद्धिः॥

[१, २८६–२८९]

(**नारायणीयम्**) 'द्विवचनटाब्विषयत्वात्' इत्यत्र किं विशिष्टविषयत्वं विवक्षितम्, उत प्रत्येकविषयत्वम्। नाद्यः, उभावित्यादेरसाधुत्वापत्तेः। नान्त्यः, टापा विना द्विवचनप्रयोगवद् द्विवचनेन विना टाप्प्रयोगापत्तेरित्याशङ्क्य द्विवचनविषयत्वमेव साधुत्वप्रयोजकम्, टाब्ग्रहणं तु प्रत्ययान्तरानुत्पत्तिवत् टापोऽप्यनुत्पत्तिशङ्कानिवारणार्थमित्यभिसंधायाह — **टाबिति**। इदं च द्विवचनविषयत्वप्राप्तम्, [2]उभशब्दस्य द्वित्वविषयत्वाद्वचनान्तरप्राप्त्यभावात्। ननु द्वित्वविषयत्वाद्वचनान्तराप्तावपि द्विवचनलुकि साधुत्वनिवारणाय वचनमिदमित्याशङ्क्य तस्याप्यन्यतः सिद्धिमाह — **तत्रेति**। [3]वाग्रहणाननुवृत्त्या अयचि नित्ये सिद्धे नित्यग्रहणमयजन्तस्य वृत्तिविषये नित्यं प्रयोगो यथा स्यात्, अयच्प्रकृतेः प्रयोगो मा भूदित्येवमर्थमित्यर्थः। उभशब्दस्य वृत्तावप्रयोगे तत्रापि क्वचित् प्रयोगस्य का गतिः, अत आह — **द्वीति**। विशेषाभावं विशदयति — **रूप इति**। सप्रकृतिचिदन्तोदात्तत्वस्य प्रत्ययस्वरस्य च नास्ति विशेषः। संभावितफलान्तरमन्यथा साधयति — **उभकाभ्यामिति**। ननु द्विवचनविषयतासाधुत्वप्रतिपादनस्य कप्रत्यये सत्यपि न विरोधः। तस्य स्वार्थिकत्वाहानेर्वच-

---

[1] एतेन मध्ये विद्यमानं वचनद्वयं भाष्यकारीयमिति सूच्यते।

[2] उभयशब्दस्य — क.

[3] वाग्रहणानुवृत्त्या — क.

नान्तरप्राप्त्यभावः, अत आह — **द्विवचन इति**। द्विवचनविषयतया साधुत्ववचनस्यास्य द्विवचनानन्तर्ये तात्पर्यम्। अन्यथा 'उभपुत्रः' इत्यादेः कव्यतिरिक्तकल्पबादेरपि स्वार्थिकस्य साधुत्वापातात्। नित्यग्रहणान्यथासिद्धतयास्य वचनत्वाभावेऽपि नित्यग्रहणादेव वृत्त्यन्तरवत् कप्रत्ययोऽपि न स्यात्। सति तु गणेऽस्य पाठे तस्य प्रयोजनान्तराभावेनाकचो नित्यग्रहणादनिवारणम्। के सति द्विवचनपरत्वाभावाद् द्विवचनपरत्वं वक्तव्यमित्युक्तम्। तत्रातत्परस्य तत्परत्वं [1]वचनादपि न शक्यते प्रतिपादयितुमित्यतो द्विवचनपरत्वशब्देन लुप्तव्यवहितद्विवचनसाधुत्वं लक्ष्यत इत्याह — **पूर्वस्येत्यादिना**। प्रतिबन्द्या समाधाने 'वक्तव्या' इत्युक्तवान्। तत्र टाप्प्रतिबन्द्यां वचनस्य सत्त्वाद्वक्तव्यतोक्तिरयुक्तेति शङ्कते — **नन्विति**। द्विवचनव्यवधानेऽपि साधुत्वार्थं टाब्ग्रहणमित्यत्र प्रमाणाभावात् स्वातन्त्र्येण द्विवचनवट्टापोऽपि साधुत्वनिमित्तत्वं स्यादिति भावः। भाष्ये **नायमिति**। नायं द्विवचन एव साधुः स्यात्, अतो द्विवचनपरस्यैव साधुत्वं वाच्यमित्यर्थः। टाब्ग्रहणादेकवचनादावपि साधुत्वप्राप्तौ तन्निवृत्त्यर्थं वचन आशङ्क्तेऽन्तादिवद्भावाद् द्विवचनाव्यवधानप्रतिपादनमसंगतमित्यत आह — **स्वार्थिकत्वादिति**। एकवचनाद्यप्रसङ्गान्न तत्र साधुत्वप्राप्तिः, येन तन्निवारणाय वचनं कार्यमित्यर्थः। तस्मान्न टाब्ग्रहणं स्वतन्त्रतया साधुत्वनिमित्तत्वं टापः स्यादित्येवमर्थम्। नापि द्विवचनव्यवधाने साधुत्वार्थम्, व्यवधानाभावस्य भाष्येऽभिधानात्। किं तु प्रत्ययान्तरवत् तदनुत्पत्तिशङ्कापरिहारार्थमित्युपक्रम एवाभिहितमस्माभिः। स्वार्थिकतया द्वित्वाप्रच्यावकत्वं टाप्कयोः तुल्यत्वम्, न त्वव्यवधायकता। के सत्यादिवद्भावेन द्विवचनान्तर्भावाभावात्। प्रकृत्यनागमत्वेन तद्भक्तत्वाभावाच्च। भाष्ये च [2]प्रकृत्यविशेषोक्तिस्तदर्थाभिञ्जकतया। तच्च द्विवचनस्य व्यवधानात् कथं द्विवचनपरत्वप्रयुक्तसाधुत्वं के सति स्यादित्यत आह — **द्विवचनेति**। समासादिवृत्तौ तु स्वार्थतिरोभावादुभशब्दस्य[3] न विविक्तद्वित्वाभिधानसामर्थ्यमिति न तत्र साधुत्वप्राप्तिः। एवं स्वार्थिकान्यतद्धिते। स्वार्थिकेष्वव्ययेषु ग्रन्थस्थः परिहारः। कल्पबादिस्वार्थिको यदि नेष्टस्तदानभिधानं शरणम्। टाब्ग्रहणं तु विस्पष्टार्थम्, द्वित्वाहानेः साधुत्वसिद्धेः। नित्यग्रहणाद्वृत्तिनिवारणमपि द्वित्वानभिव्यक्तिविषयमेवेति सर्वं समञ्जसम्। **एवमिति**। क्लेशेनेति भावः। स्मायादिप्रयोजनसत्त्वादस्य फलप्रश्नः कथमित्यत आह — **अनकारेति**। शेषस्य सर्वनामकार्यत्वाभावादाह — [4]**सतीति**। आदिपदग्राह्यमाह — **इदं त्विति**। त्यदादित्वाद् वृद्धत्वात् [5]'उदीचां वृद्धात्' इति फिञ्। सर्वनाम्नोऽद्र्यादेशः। वृद्धलक्षणो मयट्। [6]'बहुव्रीहौ सर्वनामसंख्ययोः' इति पूर्वनिपातः। [7]'वृद्धाच्च' इत्यतो वृद्धाधिकारे ठक्छसौ। [8]'अर्थवत् प्रातिपदिकम्' [9]'गुणवचनं च' इत्यर्थवत्त्वमात्रप्रयुक्तगुणवचनत्वस्य विशेषविहितसर्वनामसंज्ञया बाध इत्युदाहरणव्याख्यानम्॥

विभाषा दिक्समासे बहुव्रीहौ. १. १. २८.

[१, २८९–२९१]

(**लघुविवरणम्**) **एकस्मिन्निति**। यदि पूर्वं विकल्पः पश्चात् प्रतिषेधस्तदा प्रतिषेधेन पाक्षि-

---

[1] वचनादपि शक्यते — क.
[2] प्रवृत्त्यविशेषोक्तिः — क.
[3] उभयशब्दस्य — क.
[4] प्रदीपे 'पाठे सति' इत्यत्र 'सति पाठे' इति पाठोऽभिमत इति भाति।
[5] पा. सू. ४. १. १५७.
[6] का. वा. २. २. ३५–१.
[7] पा. सू. ४. २. ११४.
[8] का. वा. १. ४. १–३९.
[9] का. वा. १. ४. १–४०.

क्यपि प्राप्तिर्निवर्त्येतेति विकल्पस्यानर्थक्यम्, पूर्वं प्रतिषेधे सति पश्चाद् विकल्पप्रवृत्तौ विधिप्रतिषेधयोर्विकल्पेनैव सिद्धत्वात् प्रतिषेधस्यानर्थक्यमित्येवमेकस्मिन् विषये प्रतिषेधविकल्पयोरसंभव [1]इति भावः। **विषयेति**। प्रयोगवशेनेत्यर्थः। **वचनमन्तरेणेति**। [2]मन्दमध्यमानामिति भावः। भाष्ये **दिगुपदिष्टे** बहुव्रीहाविति शेषः। [3]भाष्ये 'दक्षिणदक्षिणस्यै' इत्यत्र [4]"आबाधे च' इति द्विर्वचनं बहुव्रीहिवद्भावश्च। **द्वन्द्व इति**। सर्वाद्यन्तानां सर्वनामसंज्ञा विहितेति तेषामेव प्रतिषेध इत्यर्थः। येन नाप्राप्तिन्यायेनायं विकल्पो [5]"न बहुव्रीहौ' इत्यस्यापवादः, न [6]"द्वन्द्वे च' इत्यस्येत्युक्तं भाष्ये, तदयुक्तम्, द्वन्द्वेऽनेन विकल्पप्राप्तावपि [7]"न बहुव्रीहौ' इत्यस्य प्राप्त्यभावेन येन नाप्राप्तिन्यायेन तदपवादत्वायोगादित्यतो व्याचष्टे — **अयम[त्रा]र्थ इति**। भाष्ययोजना तु बहुव्रीहौ यत्र यत्रानेन विकल्पस्तत्र तत्र "न बहुव्रीहौ' इति प्रतिषेधः प्राप्त एवेति 'न चाप्राप्ते न बहुव्रीहावित्येतस्मिन् प्रतिषेधे इयं विभाषारभ्यते' इत्युक्तम्। **द्वन्द्वे चेत्येतस्मिन् पुनः प्राप्ते चेति**। जसोऽन्यत्र [9]"विभाषा जसि' इत्यपवादाभावात्। **अप्राप्ते चेति**। जसि [10]"विभाषा जसि' इत्यपवादस्य भावात्। अस्त्वेवम्, किमत इत्यत उक्तम् — **येन नाप्राप्ते तस्य बाधनं भवतीति**। अनुवाददोषाभावादिति भावः। **वसन**शब्दो गृहवाचीति भाष्ये [11]"विरूपाणामपि समानार्थकानाम्' इत्येकशेषो न कृतः। अन्तरशब्दस्य सर्वनामत्वेऽपि परनिपातो राजदन्तादित्वात्॥

[१, २८९–२९१]

(**विवरणम्**) **एकस्मिन्निति**। यदि पूर्वं विकल्पः पश्चात् प्रतिषेधस्ततः प्रतिषेधेन पाक्षिक्यपि प्राप्तिर्निवर्त्येतेति विकल्पस्यानर्थक्यम्, पूर्वं प्रतिषेधे पश्चाच्च[12] विकल्पप्रवृत्तौ भावाभावयोर्विकल्पेनैव सिद्धत्वात् प्रतिषेधानर्थक्यमित्युभयोरेकविषययोर्विकल्पप्रतिषेधयोरसंभव इति भावः। **विषयभेद इति**। प्रयोगवशेनेत्यर्थः। **वचनमन्तरेणेति**। मन्दमध्यमधियामित्यर्थः। भाष्ये **दिगुपदिष्टे** बहुव्रीहाविति शेषः। भाष्ये **दक्षिणदक्षिणस्यै देहीति**। [13]"आबाधे च' इति द्विर्वचनं बहुव्रीहिवद्भावश्च। **द्वन्द्व इति**। प्रतिषेधस्य द्वन्द्वोऽधिकरणम्, न तु [14]"द्वन्द्वे यानि सर्वादीनीति संबन्ध इति भावः। ननु यथा बहुव्रीहौ [15]"द्वन्द्वे च' इत्यप्राप्तावपीयं विभाषा प्रवर्तते एवं द्वन्द्वे [16]"न बहुव्रीहौ' इत्यप्राप्तेऽपि प्रवर्तत एवेयं विभाषेति [17]कथमुच्यते 'न चाप्राप्ते न बहुव्रीहावित्येतस्मिन् इयं विभाषारभ्यते' इति, अत आह — **अयमत्रार्थ इति**। भाष्ये च 'न चाप्राप्ते' इत्यस्यानन्तरं 'बहुव्रीहौ' इत्यध्याहारः। 'द्वन्द्वे चेत्येतस्मिन् पुनः' इत्यस्यानन्तरं च 'द्वन्द्वे' इत्यध्याहारः। तथा च

---

[1] 'इति भावः' इति नास्ति — ड, ढ.
[2] मन्दबुद्धीनामिति — ड, ढ.
[3] ड, ढ, ण, त, कोशेषु 'भाष्ये दक्षिण' इत्यादि 'बहुव्रीहिवद्भावश्च' इत्यन्तं 'द्वन्द्व इति' इत्यादि 'प्रतिषेध इत्यर्थः' इत्यस्यानन्तरं दृश्यते। अथाप्यौचित्यानुरोधेन पूर्वं निवेशितम्।
[4] पा. सू. ८. १. १०.
[5] पा. सू. १. १. २९.
[6] पा. सू. १. १. ३१.
[7] पा. सू. १. १. २९.
[8] पा. सू. १. १. २९.
[9] पा. सू. १. १. ३२.
[10] पा. सू. १. १. ३२.
[11] का. वा. १. २. ६४—२२.
[12] चकारो नास्ति — अ, ट.
[13] पा. सू. ८. १. १०.
[14] द्वन्द्व इमानि सर्वादीनीति — अ.
[15] पा. सू. १. १. ३१.
[16] पा. सू. १. १. २९.
[17] किमुच्यते — च, छ, ट.

बहुव्रीहौ सर्वत्र [1]'न बहुव्रीहौ' इति प्राप्ते विभाषेयमारभ्यते। [द्वन्द्वे] [2]'द्वन्द्वे च' इत्येतस्मिन् प्राप्ते च जसोऽन्यत्र, अप्राप्ते च जसि, [3]'विभाषा जसि' इति विकल्पारम्भादिति भाष्यार्थः। **सर्वः स्वविषयः** सर्वो दिग्बहुव्रीहिरित्यर्थः। **द्वन्द्वे चेत्यनेन तु न व्याप्तः** सर्वो दिग्द्वन्द्व इति शेषः। स्तामेवं व्याप्त्यव्याप्ती, किमत इत्यत आह — **यदि चेति**। भाष्ये **वसन**शब्दो गृहवाचीति [4]'विरूपाणामपि समानार्थकानाम्' इत्येकशेषो न कृतः। अन्तरशब्दस्य सर्वनामत्वेऽपि परनिपातो राजदन्तादित्वात् ॥

[१, २८९–२९१]

(**उद्द्योतनम्**) **एकस्मिन्निति**। नित्यप्रतिषेधविकल्पयोरेकविषयत्वं न संभवति, प्रतिषेधपूर्वत्वे विकल्पपूर्वत्वे वा पूर्वस्य व्यर्थत्वात्। **विषयभेद इति**। प्रयोगवशेनेत्यर्थः। **अभिमत इति**। 'दिक्समासे विकल्पः, अन्यत्र प्रतिषेधः' इत्येवंरूपः। मन्दमध्यमधियां [5]'वचनमन्तरेण नाभिमतव्यवस्थासिद्धिरित्यर्थः। भाष्ये **दिगुपदिष्ट इति**। बहुव्रीहाविति शेषः। [6]अतिदिष्टसमासस्यापि [7]समासत्वमस्ति, अत आह — **मुख्य इति**। भाष्ये **दक्षिणदक्षिणस्या इति**। [8]'दक्षिणाशब्दस्य [9]'आबाधे च' इति द्विरुक्तिर्बहुव्रीहिवद्भावश्च। [10]'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पूर्वस्य [11]'स्त्रीप्रत्ययलोपः। 'दक्षिणोत्तर' इत्यत्र पुंवद्भावं साधयति — **द्वन्द्वे चेत्यनेनेति**। द्वन्द्वस्यैव निषेधविषयत्वं न तदवयवानाम्, लक्षणाप्रसङ्गादिति भावः। ननु यथा बहुव्रीहौ [12]'द्वन्द्वे च' इत्यप्रवृत्तावपीयं विभाषा प्रवर्तते तथा द्वन्द्वे [13]'न बहुव्रीहौ' इत्यस्याप्रवृत्तावपीति [14]'नाप्राप्ते न बहुव्रीहौ' इत्याद्ययुक्तम्, अत आह — [15]**अत्रायमर्थ इति**। भाष्ये 'नाप्राप्ते' [16]'इत्यस्यानन्तरं 'बहुव्रीहौ' इत्यध्याहारः, 'द्वन्द्वे च' इत्यनन्तरं 'द्वन्द्वे' इत्यध्याहारः। तथा च [17]'न बहुव्रीहौ' इति निषेधो बहुव्रीहौ सर्वत्र व्याप्तः [18]'द्वन्द्वे च' इति तु न सर्वद्वन्द्वे, जस्यभावादिति भाष्यार्थः। **सर्वः स्वविषयः** विभाषाविषयः सर्वो दिग्बहुव्रीहिः। **न व्याप्तः** सर्वो दिग्द्वन्द्वः। एवमक्षराञ्जस्यमुक्त्वा तात्पर्यमाह — **यदि चेति**। भाष्ये **उन्मुग्धः** भ्रान्तः। दिग्बहुव्रीहेर्दिक्समासत्वं प्रतिपदोक्तमिति दर्शयति — **दिक्समास इति**। भाष्ये **समास इति वर्तत इति**। एतत्सूत्रस्थसमासग्रहणं [19]'न बहुव्रीहौ' [20]इत्य-

---

[1] पा. सू. १. १. २९.
[2] पा. सू. १. १. ३१. द्वन्द्वे चेत्यस्मिन् — च, छ.
[3] पा. सू. १. १. ३२.
[4] का. वा. १. २. ६४—२२. 'एकार्थानामपि विरूपाणाम्' इत्यस्यार्थानुवादोऽयम्।
[5] 'वचनमन्तरेण' इति नास्ति — म.
[6] अतिदिष्टबहुव्रीहेरपीत्यर्थः। व्याप्यबहुव्रीहित्वातिदेशे व्यापकस्य समासत्वस्याप्यतिदेश इति भावः।
[7] समासत्वमस्तु — अ, म, ऋ.
[8] दक्षिणशब्दस्य — अ, उ.
[9] पा. सू. ८. १. १०.
[10] महाभाष्यम् २. २. २८.
[11] स्त्रीप्रत्ययस्य लोपः — म, उ.
[12] पा. सू. १. १. ३१.
[13] पा. सू. १. १. २९.
[14] भाष्ये 'न चाप्राप्ते' इत्यस्य चकारत्यागेनानुवादः, एवमुपर्यपि।
[15] प्रदीपे 'अयमत्रार्थः' इत्यत्र 'अत्रायमर्थः' इत्यन्नंभट्टपाठः।
[16] इत्यस्यादौ बहुव्रीहावित्यध्याहार उचित इत्युद्द्योतच्छायादर्शनेनावगम्यते। एवं द्वन्द्वे चेत्यनन्तरमित्यत्रापि।
[17] पा. सू. १. १. २९.
[18] पा. सू. १. १. ३१.
[19] पा.सू. १. १. २९.
[20] इत्यत्रानुवर्तत इत्यर्थः — इ, ऊ.

त्रानुवर्तनीयमित्यर्थः। भाष्ये **इदं तर्हीति**। [1]'न बहुव्रीहौ' इत्यत्र बहुव्रीहावित्यनुवर्तनस्येत्यर्थः। भाष्ये **अवयवभूतस्य** द्वन्द्वावयवभूतस्य। तथा च वस्त्रान्तरवसनान्तरा इत्यत्र [2]'विभाषा जसि' इति विकल्पो न प्रवर्तत इत्यर्थः। ननूपसर्जनप्रतिषेधेनैव [3]तत्सिद्धम्, अत आह — **उपसर्जनेति**। **वसन**शब्दो गृहवाची, तेन [4]'विरूपाणामपि समानार्थानाम्' इत्येकशेषो न भवति। राजदन्तादित्वाच्चान्तरशब्दस्य सर्वनाम्नः परनिपातः॥

[१, २८९–२९१]

(**रत्नप्रकाशः**) **दिग्ग्रहणं किमर्थमिति**। यत्तूक्तम् 'एकस्मिन् विकल्पप्रतिषेधयोरसंभवात् सामर्थ्याद्विषयभेद आश्रयितव्य इति प्रश्नः' इति, तन्न, तेन प्रष्टुरज्ञानातिशयस्यैव वर्णितत्वेन तदपेक्षयौत्सर्गिकप्रयोजनजिज्ञासाया एव प्रश्नहेतुतौचित्यात्। **समासग्रहणं किमर्थमिति**। 'दिग्बहुव्रीहौ' इतीयताप्युक्तव्यवस्थासंभवादिति भावः। **समास एवेति**। यत्तूक्तम् 'मुख्य इत्यर्थः। अन्यस्तु तत्कार्यलाभात् तद्व्यपदेशं लभत इत्यमुख्यः' इति, तन्न, अतिदेशस्यापि वचनत्वेनोभयत्र संज्ञाया वाचनिकत्वाविशेषेण गौणमुख्यत्वकल्पनायां बीजप्रयोजनयोरभावात्। वस्तुतस्तु बहुव्रीहिसंज्ञामात्रातिदेशेनेष्टासिद्धेर्यावत्यो बहुव्रीहौ संज्ञास्तासां सर्वासामतिदेशे समाससंज्ञाया अप्यतिदेशेन समासग्रहणेन तद्धारणासंभवेन प्रकृतभाष्यस्य स्पष्टप्रतिपत्तये समासग्रहणमित्येवंपरताया एवौचित्याच्च। **तत्र यथा स्यादिति**। सर्वादेस्तदन्तस्य च सर्वनामसंज्ञाविकल्प इति शेषः। **दक्षिणदक्षिणस्या इति**। [5]'आबाधे च' इति द्विर्वचनबहुव्रीहिवद्भावौ। **दक्षिणोत्तरपूर्वाणामिति**। पक्षे दक्षिणोत्तरपूर्वासामित्यपि स्यादिति भावः। यत्तूक्तम् " [6]'द्वन्द्वे च' इत्यनेन सर्वाद्यन्तस्य द्वन्द्वस्य सर्वनामसंज्ञानिषेधः, नावयवानामिति [7]'सर्वनाम्नो वृत्तिमात्रे' इति पुंवद्भावः" इति, तन्न, "प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इत्यस्य वचनस्य विधि[8]निषेधसाधारण्येन [9]'द्वन्द्वे च' इत्यनेनापि सर्वादेस्तदन्तस्य च संज्ञानिषेधौचित्यात्। 'वृत्तिमात्रे' इति मात्रग्रहणसामर्थ्येन तत्र भूतपूर्वगतिलभ्यसर्वनामताश्रयेणैव पुंवद्भावसिद्धेश्च। **येन नाप्राप्त इति**। य आरभ्यते तेनेति शेषः। **प्राप्ते चाप्राप्ते चेति**। [11]'विभाषा जसि' इति विकल्पविधानादिति मन्यते। वस्तुतस्तु [12]'विभाषा जसि' इति वचनस्य वैकल्पिकत्वेऽपि [13]'द्वन्द्वे च' इत्यस्य नित्यतयैव प्रवृत्तत्वेन तस्याप्ययमपवादः संपद्यत एवेत्याशयेनाह — **अथवेति**। एतेन " [14]'द्वन्द्वे च' इत्यनेन तु स्वविषयो न व्याप्तः, [15]'विभाषा जसि' इति विकल्पविधानात्। यदि चानेन द्वन्द्वे विभाषा स्याज्जस्यनुवाददोषः प्रसज्येत। बहुव्रीहौ त्वनुवाददोषमलभमाना कृतार्था सती परत्वादियं विभाषा [16]'द्वन्द्वे च' इत्यनेन बाध्यते"इति निरस्तम्। यणादेशस्य शाकलह्रस्वपक्षेऽप्रसक्तत्वेन सवर्णदीर्घस्य तदपवादत्वाभावप्रसङ्गेनासंबद्ध-

---

[1] पा. सू. १. १. २९.
[2] पा. सू. १. १. ३२.
[3] एतत् सिद्धम् — इ, ऊ.
[4] का. वा. १. २. ६४–२२.
[5] पा. सू. ८. १. १०.
[6] पा. सू. १. १. ३१.
[7] महाभाष्यम् २. २. २८.
[8] का. वा. १. १. ७२–८.
[9] निषेधस्य साधारण्येन — ब.
[10] पा. सू. १.१. ३१.
[11] पा. सू. १. १. ३२.
[12] पा. सू. १. १. ३२.
[13] पा. सू. १. १. ३१.
[14] पा. सू. १. १. ३१.
[15] पा. सू. १. १. ३२.
[16] पा. सू. १. १. ३१.

प्रलापत्वात्। अवश्याश्रयणीयया लक्षणप्रतिपदोक्तपरिभाषयैव सिद्धे बहुव्रीहिग्रहणं व्यर्थमेवेत्याशयेनाह — **अथवेदमिति** । **प्रतिपदोक्तस्यैवेतीति** । [1]'दिङ्नामानि' इत्यत्र साक्षाद्दिक्शब्दस्य निर्दिष्टत्वात् तेन विहितः समासः प्रतिपदोक्त इति भावः। तदेवं 'बहुव्रीहौ' इत्यस्यानर्थक्ये पुरस्तादपवादलक्षणपरिभाषयोरनित्यत्वेनार्थवत्त्वे वा सिद्धेऽपि प्रौढिमाश्रित्याह — **उत्तरार्थमिति। तत्रैव यथा स्यादिति।** [2]'एकं बहुव्रीहिवत्' इत्यत्र व्यपदेशातिदेशे दोषस्य प्रागेवोक्तत्वेन कार्यातिदेशस्यैवाश्रयितुमुचितत्वेन द्विरुक्तस्यैकशब्दस्य बहुव्रीहि[3]संज्ञाभावादुत्तरसूत्रस्य भगवता प्रत्याख्यास्यमानत्वाच्च प्रौढिरियमिति स्पष्टमेव सुधियाम्। ननु कार्यातिदेशपक्षेऽपि तत्र सर्वनामताविकल्पः स्यादिति चेन्न, सामान्यातिदेशे विशेषानतिदेशात्। **अवयवभूतस्यापि बहुव्रीहेरिति**। द्वितीयबहुव्रीहिग्रहणसामर्थ्यात् प्रधानाप्रधानन्यायाप्रवृत्तौ बहुव्रीहिमात्रे सर्वादेस्तदन्तस्य च संज्ञानिषेधो यथा स्यादिति भावः। वस्तुतस्तु प्रधानाप्रधानन्यायाविषयत्वादुपसर्जनत्वेन सर्वादित्वाभावाच्च सिद्धाविदमपि प्रौढिवादमात्रमिति स्पष्टमेव सर्वस्य। एतेन "उपसर्जनप्रतिषेधो वार्तिककारस्य, न सूत्रकारस्य, [4]"न बहुव्रीहौ' इत्यारम्भात्" इति वदन् निरस्तः। सूत्रकारस्यापि मते [5]"न बहुव्रीहौ' इत्यस्यान्यथैव व्याख्यास्यमानत्वेनोपसर्जननिषेधस्यान्वर्थसंज्ञाबललभ्यत्वेन भगवतोक्तस्य तेनापि स्वीकृतत्वात् ॥

[१, २८९–२९१]

(**नारायणीयम्**) नन्वसति दिग्ग्रहणे बहुव्रीहिमात्रे विकल्पः स्यात्, अत आह — **एकस्मिन्निति**। यदि बहुव्रीहिमात्रे विकल्पो भवेन्निषेधो निर्विषयः स्यादिति [6]किंचिदेव विषयमसाववगाहते। तद्विशेषस्तु व्याख्यानादवगन्तव्य इति भावः। प्रष्ट्रभिप्रायवेदिनैवोत्तरं निवेदितम्। तत्र विषयविशेषस्यापि व्याख्यानलभ्यत्वात् तल्लाभार्थत्वं दिग्ग्रहणस्य कुत इत्यत आह — **वचनमिति**। न्यायादिमूलं व्याख्यानम्, न चेह कश्चिन्न्यायोऽभिमतविषयव्यवस्थापक इति भावः। 'समास एव' इत्युक्त्यातिदेशिकबहुव्रीहेः समासव्यपदेशो नास्तीति भाति। तदयुक्तम्, तत्र समासत्वनिबन्धनप्रातिपदिकत्वनिबन्धनलुक्कार्यदर्शनात्, अत आह — **मुख्य इति**। दिग्वाचिनां स्त्रीलिङ्गत्वात् 'उत्तरापूर्वाणाम्' इति भाव्यमित्यत आह — **सर्वनाम्न इति**। निषेधविषये कथं सर्वनामत्वम्, अत आह— **द्वन्द्वे चेति**। हरदत्तमिश्रैस्त्वन्यथात्र परिहार उक्तः। 'वृत्तिमात्रे' इति मात्रग्रहणं क्वचित् सर्वनामत्वेन दृष्टानां संप्रत्यसर्वनामत्वेऽपि पुंवद्भावार्थमिति। ननु येन नाप्राप्तिन्यायस्यायमविषयः। तथाहि — बाधकविषये सर्वत्र यत् प्राप्नोति तद्बाधनेन कृतार्थं बाधकं क्वचित् प्राप्तं न बाधते। तस्य तु परत्वादि प्राबल्यहेतुः। [यत्र] विधिद्वयप्राप्तिर्व्याप्यव्यापकभावेन तत्र व्यापक[त्व]साधनमावश्यकम्। तेनैव बाध्यत इति तन्न्यायतत्त्वम्। इह तु निषेधद्वयस्यापि [7]विकल्पबाध्यस्य विविक्तविषयत्वान्नैतन्न्यायः संभवति, अत आह — **अयमिति**। नात्र नाप्राप्तिन्याय उच्यते, किं तु न्यायान्तरमित्यर्थः। न्यायान्तरपरतयैव नाप्राप्तिन्यायप्रतिपादकानि पदान्यपि योजयति—**नेति**। **स्वविषय इति**। निषेधविषयः, न त्वपवादविषयः; तथात्वे नाप्राप्तिन्याय एव भवेत्, न न्याया-

---

[1] पा. सू. २. २. २६.
[2] पा. सू. ८. १. ९.
[3] संज्ञाभावादित्यत्राभावादिति छेदः।
[4] पा. सू. १. १. २९.
[5] पा. सू. १. १. २९.
[6] 'किंचित्' इति क्रियाविशेषणं बोध्यम्।
[7] विकल्पबाध्यत्वेनाभिमतस्येत्यर्थः ॥ विकल्पबाधस्य — क.

न्तरम्। 'न चाप्राप्ते' इति ग्रन्थं व्याख्याय 'द्वन्द्वे च' इति ग्रन्थं व्याचष्टे — **द्वन्द्वे चेति**। भवतां विषयव्याप्त्यव्याप्ती, निषेधाबाधकत्व एतावता किमित्यत उक्तम् — भाष्ये **येनेति**। तत्रेतरबाधने निमित्तमाह — **यदि चेति**। [1]यथा विषयविशेषेऽनुवादप्रसङ्गात् [2]'प्लुतश्च विषये स्मृतः' इत्युच्यते तद्वदिदमपीति भावः। अस्त्वस्य विकल्पस्य द्वन्द्वनिषेधाबाधकत्वम्, तेन त्वेतद्बाधा कथमित्यत आह — **परत्वादिति**। प्रतिपदपाठाभावात् प्रतिपदोक्तत्वं समासस्य कथमित्याशङ्क्य समाससंज्ञायां प्रतिपदोक्तस्वरूपं दर्शयति — **दिक्समास इति**। 'वस्त्रान्तरवसनान्तराः' इत्यत्र समुदायस्य द्वन्द्वत्वात् तदाश्रयनिषेधे सति जसि विभाषा स्यादिति तन्निवृत्त्यर्थं बहुव्रीहिग्रहणमित्युक्तम्। तत्रान्तरशब्दस्योपसर्जनत्वात् सर्वादिसूत्रेण संज्ञाप्राप्त्यभावान्न बहुव्रीह्याश्रयो नापि द्वन्द्वाश्रयः प्राप्तो निषेध इति बहुव्रीहिनिषेधो द्वन्द्वाश्रयनिषेधबाधनेन यथा स्यादिति कथमिदमुच्यत इत्यत आह — **उपसर्जनेति**॥

न बहुव्रीहौ. १. १. २९.

[१, २९१–२९४]

(**लघुविवरणम्**) **नियमः कथमिति**। उभयोः पूर्वनिपातविधानादिति भावः। भाष्ये 'परत्वात्' इति शब्दपरविप्रतिषेधोऽभि[3]मतः। **सामान्येनेति**। न लुग्विषयमेवेत्यर्थः। ज्ञापकत्वं च [4]'त्वमावेकवचने' इत्येव सिद्धे पुनरारम्भात्। न च तवममाद्यादेश[5]बाधनार्थः पुनरारम्भ इति युक्तम्, तथा सति तदनुवृत्त्यैव तवाद्यादेशविषये विधीयमानौ त्वमौ मपर्यन्तस्यैव भविष्यत इति [6]तदनुवृत्तिरनर्थिकैव स्यात्। पश्यति त्वाचार्यः — समासाश्रयो विधिस्तावद् भवतीति। तथा च 'त्वत्कृतम्' इत्यादौ लुकि कृते [7]'प्रत्ययोत्तरपदयोश्च' इति विधीयमानौ [8]'त्वमावेकवचने' इत्यनेनाप्राप्तावसत्यां मपर्यन्तग्रहणानुवृत्तौ सर्वादेशौ स्याताामिति मपर्यन्तग्रहणमनुवर्तनीयमिति ज्ञापकत्वं मपर्यन्तग्रहणानुवृत्तिसहितस्यैतस्य योगस्येति भावः। गोमत्प्रिय इत्यत्र लुका हल्ङ्यादिलोपो बाध्यते। अन्यथा प्रत्ययलक्षणेन नुम्दीर्घौ स्याताम्। विधेः प्रतिषेधेन समानकालत्वे हेतुमाह — **कार्येति**। ननु मुख्ये संभवति गौणस्य [9]ग्रहणं न न्याय्यमित्यत आह — **सूत्रेति**। मुख्ये त्वचनस्य वैयर्थ्यमिति भावः। एवं सत्यतिप्रसङ्गं परिहरति — **अप्रयोगेति**। 'शिट्' इति सर्वनाम॥

[१, २९१–२९४]

(**विवरणम्**) **नियम इति**। संख्याया अपि [10]'बहुव्रीहौ सर्वनामसंख्ययोः' इत्यनेन पूर्वनिपातविधानादिति भावः। **उच्यत इति**। संख्यायाः [11]'सप्तमीविशेषणे' इत्यनेनैव पूर्वनिपातस्य सिद्धत्वात् सर्वनाम्नः पूर्वनिपातमप्राप्तं विधातुं वचनम्। विषयविशेषप्रदर्शनाय च संख्याग्रहण-

---

[1] तथा — क.
[2] श्लो. वा. ६. १. ८७.
[3] हितः — ड, ढ, त.
[4] पा. सू. ७. २. ९७.
[5] बाधनार्थं — ड, ढ.
[6] मपर्यन्तानुवृत्तिरित्यर्थः।
[7] पा. सू. ७. २. ९८.
[8] पा. सू. ७. २. ९७.
[9] ग्रहणमन्याय्यम् — ण.
[10] का. वा. २. २. ३५–१.
[11] पा. सू. २. २. ३५.

मिति भावः। 'सर्वनाम्न एव' [1]इत्येवकारेण न वार्तिकस्य नियमार्थतोच्यते, पूर्वनिपातस्याप्राप्तत्वात्। किं तु सर्वनाम्नः पूर्वनिपातविधौ विरोधात् तदन्यस्य यः [2]पूर्वनिपाताभावः सोऽर्थसिद्धोऽनूद्यत इति द्रष्टव्यम्। **नैष इति**। संनिपातादिपदाध्याहारप्रसङ्गादिति भावः। भाष्ये **परत्वादिति**। शब्दपरविप्रतिषेधोऽभिप्रेतः। बहुव्रीहौ यानि सर्वादीनीति संबन्धमभिप्रेत्य 'न खल्वप्यवश्यम्' इति भाष्यम्। बहिरङ्गत्वोपपादनाय 'पदान्तरसंनिधाने' इत्याद्युक्तम्। 'वर्तिपदार्थविशेषण' इति बहुव्रीहिः। **सामान्येनेति**। लुकि कार्यविशेषे यत् कार्यसामान्यं तेनेत्यर्थः। ज्ञापकत्वं च [3]'त्वमावेकवचने' इत्येव सिद्धे [4]'प्रत्ययोत्तरपदयोश्च' इत्यारम्भात्। न च तवममाद्यादेश[5]बाधनार्थः पुनरारम्भ इति युक्तम्, तथा सति तवममाद्यनुवृत्त्यैव तवाद्यादेशविषये विधीयमानौ त्वमौ मपर्यन्तस्यैव भविष्यत इति मपर्यन्तानुवृत्तिरनर्थिकैव स्यात्। पश्यति त्वाचार्यः — बहिरङ्गोऽपि [6]प्रत्ययाश्रयो विधिस्तावद् भवतीति। तथा च त्वया कृतं त्वत्कृतं मया कृतं मत्कृतमित्यादौ लुकि कृते एकार्थयोरपि युष्मदस्मदोरनङ्गत्वात् [7]'त्वमावेकवचने' इत्यनेनाप्राप्तौ त्वमौ [8]'प्रत्ययोत्तरपदयोश्च' इत्यनेन विधीयमानौ मपर्यन्तग्रहणानुवृत्त्यभावे सर्वादेशौ स्यातामिति मपर्यन्तग्रहणमनुवर्तनीयमिति ज्ञापकत्वं 'तवममाद्यनुवृत्तिसहितमपर्यन्तानुवृत्तियुक्तस्य [10]'प्रत्ययोत्तरपदयोश्च' इत्यस्येति द्रष्टव्यम्। गोमत्प्रिय इत्यत्र लुका हल्ङ्यादिलोपो बाध्यते। अन्यथा प्रत्ययलक्षणेन नुम्दीर्घौ स्यातामिति भावः। **अत्र हीति**। बहुव्रीहेर्विभक्त्युत्पत्तौ सर्वनामकार्यस्मायादिप्राप्तेरिति भावः। ननु 'न बहुव्रीहौ' इत्यनेन समासात् प्रागज्ञाताद्यर्थविवक्षानिबन्धनाकजर्था सर्वनामसंज्ञा प्राप्ता कथं निवार्येत्याशङ्क्यानिवर्तनाय समासात् प्रागेव 'न बहुव्रीहौ' इति प्रतिषेध इति [11]प्रतिपादयितुम् 'अयं खल्वपि' इति भाष्यमित्याह — **सूत्रेति**। भाष्ये **ऐकपद्यम्** एकार्थीभावः, **एकविभक्तित्वम्** एककारकशक्तियोगः, **ऐकस्वर्यम्** एकोदात्तयोगः। **ताच्छब्द्यं** यो लभत इत्यध्याहारः, स्वार्थे वा ष्यञ्। ननु वाक्ये सर्वनामसंज्ञानिषेधश्चेत् 'अहकं पिता [12]यस्य' इति प्रयोगो न स्यात्, अकजभावात्, [13]के च सुपरत्वाभावात् त्वाहौ न स्यातामित्यत आह — **अप्रयोगेति**। **पृथगेव** समासं विनैवेत्यर्थः। [14]कर्तव्यौ चेदकच्स्वरौ सूत्रस्य तर्हि को विषय इति न वाच्यमित्याह — **सूत्रेति**। मुनित्रयमध्ये उत्तरोत्तरस्येत्यर्थः। **प्रामाण्यं** यथार्थानुभवाश्रयत्वात्। 'शिट्' इति सर्वनाम, आद्युदात्तत्वे च पूर्वपदप्रकृतिस्वरेण [15]तदेव श्रूयत इति भावः॥

[१, २९१–२९४]

(**उद्द्योतनम्**) प्रियशब्दस्य पूर्वनिपातं संभावयति — **प्रियशब्दस्येति**। **मन्यत इति**। वचनेन सर्वनाम्नो विशेष्यस्यापि पूर्वनिपातावश्यकत्वादिति भावः। द्विशब्दस्य विशेषणत्वमाह — **संख्याया**

---

[1] इत्येवकारेण वार्तिकस्य न नियमार्थता —अ.
[2] पूर्वनिपातस्याभावः — अ.
[3] पा. सू. ७. २. ९७.
[4] पा. सू. ७. २. ९८.
[5] बाधनार्थं — छ.
[6] नुमाश्रयो विधिः — अ.
[7] पा. सू. ७. २. ९७.
[8] पा. सू. ७. २. ९८.
[9] तवममादेशसहित — अ.
[10] पा. सू. ७. २. ९८.
[11] 'प्रतिपादयितुम्' इत्यस्यानन्तरम् 'इदम्' इत्यधिकम् — अ.
[12] अस्येति — अ.
[13] केऽपि विभक्तिपरत्वाभावात् — अ.
[14] भवतश्चेत् — अ.
[15] तदेव रूपमिति — अ.

इति। द्व्यादीनां [1]संख्येयवाचकत्वादिति भावः। **नियम इति**। संख्याया अपि पूर्वनिपातविधानादिति भावः। **उच्यत इति**। [2]'सप्तमीविशेषणे' इत्यनेनैव संख्यायाः पूर्वनिपाते सिद्धे [3]'सर्वनामसंख्ययोः' इत्येतत् सर्वनाम्न एव पूर्वनिपातविधानार्थम्, संख्याग्रहणं [4]विषयनिर्देशार्थमिति भावः। 'एवमर्थम्' इत्येतदेवाह — **सर्वनामेति**। सर्वनाम्न एवेत्येवकारेण वार्तिकस्य नियमपरत्वं नोच्यते, सर्वनाम्नः पूर्वनिपातस्याप्राप्ततया नियमपरत्वासंभवात्। किं त्वर्थसिद्ध इतरस्य पूर्वनिपाताभावोऽनूद्यत इति ज्ञेयम्। **नैष इति**। उत्तरवार्तिकविरोधात्, संनिपात इत्यध्याहारप्रसङ्गाच्चेति भावः। भाष्ये **परत्वादिति**। [5]'सर्वनामसंख्ययोः' इति वार्तिके परपाठाच्छब्दपरविप्रतिषेधादिति भावः। भाष्ये **न खल्विति**। बहुव्रीहौ यानि सर्वादीनि तेषां न सर्वनामसंज्ञेति सूत्रार्थ इति भावः। अकचि निषेधाप्रवृत्तिमुपपादयति — **अन्तरङ्गत्वादिति**। [6]संज्ञायाः पदान्तरनिरपेक्षतयान्तरङ्गत्वात् तन्मात्रापेक्षाकचोऽप्यन्तरङ्गत्वमित्यर्थः[7]। निषेधस्य बहिरङ्गत्वमाह — **पश्चादिति**। **बहिरङ्गेणेति**। तथाच तदपेक्षो निषेधोऽपि बहिरङ्ग इत्यर्थः। **भाष्ये गोमत्प्रिय इति**। अत्र विभक्त्याश्रयो नुम् बहिरङ्गेणापि सुपो लुका बाध्यते। [8]'त्वमावेकवचने' इत्येव सिद्धे [9]'प्रत्ययोत्तरपदयोश्च' इत्यनेन लुको बहिरङ्गस्यापि पूर्वं प्रवृत्तिर्ज्ञाप्यते। लुका हल्ङ्यादिलोपोऽपि बाध्यते। अन्यथा प्रत्ययलक्षणेन नुम् स्यात्। ननु लुक एव बाधकत्वं तत्र ज्ञाप्यते, न त्वन्यस्य, अत आह — **सामान्येनेति**। तदेवाह — **बहिरङ्गोऽपीति**। 'त्वत्कपितृकः' इत्यत्रायं निषेधो न प्रवर्तते, 'प्रियसर्वाय' इत्यत्र तु प्रवर्तत इत्यत्र हेतुमाह — **अत्र हीति**। बहुव्रीहेर्विभक्त्युत्पत्तौ सर्वनामकार्यस्मायादिप्राप्तेरित्यर्थः। [10]अकच् त्वन्तरङ्गत्वात् पूर्वमेव स्यादिति भावः। भाष्ये **उपसर्जनप्रतिषेधेनापीति**। तथा चाकञ्जिरासायैवेदं सूत्रमित्यर्थः। ननु 'न बहुव्रीहौ' इत्यनेन समासात् प्रागकजर्थं प्राप्ता सर्वनामसंज्ञा कथं निवार्येत्याशङ्कानिरासाय 'अयं खल्वपि' इत्यादिभाष्यमित्याह — **सूत्रेति**। भाष्ये **ऐकपद्यम्** एकार्थीभावः। **ऐकस्वर्यम्** एकोदात्तयोगः। **एकविभक्तिकत्वम्** एककारकशक्तियोगः। ननु वाक्ये संज्ञानिषेधश्चेत् 'अहकं पिता [11]अस्य' इत्यकच्प्रयोगो न स्यात्; [12]के तु [13]सुपरत्वाभावात् त्वाहौ न स्याताम्, अत आह — **अप्रयोगेति**। समासार्थप्रतिपादकविग्रहवाक्य इत्यर्थः। [14]**तादर्थ्यं** [15]बहुव्रीह्यर्थत्वम्। **सूत्रेति**। 'अतिसर्वाय' इत्याद्यर्थमुपसर्जनप्रतिषेधावश्यकत्वे [16]तत एव 'प्रियविश्वाय' [17]इत्याद्येऽपि सिद्धे 'त्वत्कपितृकः' इत्यत्राकञ्निवृत्त्यर्थमेवैतदिति[18] पर्यवसितम्। तत्राकञङ्गीकारे सूत्रं व्यर्थमित्यर्थः। ननु सूत्रानुरोधात् क एव भवतु, अत आह — **यथोत्तरमिति**। फिट्सूत्रे **शिट्** सर्वनाम। बहुव्रीहावपि प्रकृतिस्वरेणाद्युदात्तत्वमेव भवतीति भावः। ननु 'आढ्यपूर्वः' इत्यत्रापि पूर्वशब्दो व्यवस्थावाच्येव समस्यते,

---

[1] संख्यावाचकत्वादिति — म.
[2] पा. सू. २. २. ३५.
[3] का. वा. २. २.३५–१.
[4] 'विषय' इति नास्ति – अ.
[5] का. वा. २. २. ३५–१.
[6] संज्ञायां — अ.
[7] अन्तरङ्गत्वादित्यर्थः — अ.
[8] पा. सू. ७. २. ९७.
[9] पा. सू. ७. २. ९८.
[10] अकच्चान्तरङ्गत्वात् —अ, म, उ, ऋ.
[11] यस्य — म.
[12] किं तु — अ.
[13] सुप्परत्वाभावात् — अ, म.
[14] तादर्थ्यत्व — ऊ.
[15] बहुव्रीह्यर्थः — म, आ; बहुव्रीह्यर्थत्व — ऊ.
[16] अत एव — अ, आ, ऋ.
[17] इत्याद्यपि सिद्धम् — म.
[18] निवृत्त्यर्थमेतदिति — अ, आ, इ' ऊ, ऋ.

अत आह — **प्राधान्येनेति**। [1]अत्राप्राधान्यमाह — **अत्रेति**। 'आढ्यपूर्वाय' इत्यत्र समासविशेष-लक्षणं न किंचित्, अत आह — **मयूरेति** ॥

[१, २९१–२९४]

(**रत्नप्रकाशः**) **प्रतिषेधेनेति**। निवृत्त्येति भावः। कुत इत्यत आह — **वक्ष्यति चेति**। **सर्वनाम्न एवेति**। पूर्वनिपातविधायकवचने तथा दर्शनादिति मन्यते। एतेन 'विशेषणत्वात् संख्यायाः पूर्वनिपाते प्राप्ते एवमर्थमुपसंख्यानं स्यात् — सर्वनामसंख्ययोः संनिपाते सर्वनाम्न एव पूर्वनिपातः स्यादिति' [इति] निरस्तम्। तेन वचनेन 'विश्वप्रियायेति भवितव्यम्' इति तेनैव शङ्कित्रोक्तत्वेन तस्यात्र तादृशाशयकल्पनानौचित्यात्। **वक्ष्यत्येतदिति**। तथा च [2]'सर्वनाम-संख्ययोः' इति सर्वनामपूर्वनिपातनिर्देशस्यानयोरन्यापेक्षया पूर्वनिपातबोधनेनोपक्षीणस्य विशेषवचनेन न्यायमूलकेन बाधात् संख्याया एव पूर्वनिपात इति भावः। एतेन 'नैष वाक्यार्थो यस्त्वया कल्पित इत्यर्थः' इति वदन् निरस्तः। तादृशवाक्यार्थस्य तेनैवोत्प्रेक्षितत्वेन तेन सहास्याप्यसंबद्धप्रलाप-त्वात्। **व्यञ्जनान्तेष्विति**। अनकारान्तेष्वित्यस्योपलक्षणमेतत्। तेन 'द्वकिपुत्रः' इत्यस्य व्या-वृत्त्या 'द्विकपुत्रः' इत्येव यथा स्यादित्यपि प्रयोजनं ज्ञेयम्। **बहिरङ्गेणेति**। अनेकपदात्मकबहु-व्रीह्याश्रयत्वादिति भावः। **अन्तरङ्ग इति**। सर्वनामसंज्ञप्रकृतिकैकपदाश्रयत्वादिति भावः। **विधि-रिति**। अकजित्यर्थः। **बहिरङ्गो विधिरिति**। 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति परिभाषागतं लुक्पदं परित्यज्य तत्र विधिपदघटितैव परिभाषा तत्परिभाषाज्ञापकेन सामान्या-पेक्षेण ज्ञापनीयेति भावः। तं भावमबुद्ध्वा परिभाषान्तरमेवेदं पठितमिति मन्यमान आह — **क्रियते तत्र यत्न इति**। **प्रत्ययोत्तरपदयोश्चेति**। तेन ह्येकार्थवाचिनोर्युष्मदस्मदोर्मपर्यन्तस्य प्रत्यये उत्तरपदे च परतस्त्वमौ विधीयेते। तत्र यदीयम् [3]'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते' इति परिभाषा तु न स्यात् तर्हि कुत्राप्युत्तरपदे परतो युष्मदस्मदोरेकार्थवाचकयोरवयवो मपर्यन्तो न लभ्यत इति तत्र तस्य तद्विधानमनर्थकं स्यादिति तां परिभाषां तद् ज्ञापयतीति भावः। तस्य विशेषापेक्षज्ञापकतामाश्रित्यापि प्रकृते समाधातुं शक्यत इत्याशयेनाह — **ननु चेहापीति**। **न बहुव्रीहाविति**। तथा च वचनसामर्थ्याद् बहिरङ्गोऽपि निषेधोऽन्तरङ्गस्याकचो बाधको भविष्य-तीति भावः। अन्यो वचनसामर्थ्यं विघटयति — **अस्त्यन्यदिति**। **उपसर्जनप्रतिषेधेनापीति**। तथा च वचनसामर्थ्यादन्तरङ्गमकचं बहिरङ्गो निषेधो बाधत इति युक्तमेवेति भावः। इदानीं निषेधाकचोस्तुल्यकालत्वेन वचनसामर्थ्याश्रयणमन्तरेणैव निषेधो भविष्यतीत्याशयेन बहुव्रीहिशब्दे लक्षणामङ्गीकृत्य सूत्रं व्याख्यातुमाह — **अयं खल्विति**। [**ऐकपद्यमिति**।] समासस्य प्रातिपदिकत्वेन ततः सुबुत्पत्तेरिति भावः। **ऐकस्वर्यमिति**। [4]'अनुदात्तं पदमेकवर्जम्' इति वच-नात्। [5]'उदात्तः **स्वरः** अच् यस्मिन् स एकस्वरः, तस्य भाव ऐकस्वर्यम्। गुणवचनत्वात् ष्यञ्। [6]**एकविभक्तित्वं चेति**। [7]'सुपो धातुप्रातिपदिकयोः' इति समासावयवसुपो लुप्तत्वादिति भावः। **तादर्थ्यादिति**। तस्मा इदं तदर्थं, तस्य भावादित्यर्थः। **ताच्छब्द्यमिति**। तस्य शब्द एव शब्द

---

[1] अत्र प्राधान्यमाह — अ; अप्राधान्यमाह — म, इ, उ, ऊ.
[2] का. वा. २. २. ३५–१.
[3] परिभाषा ५२.
[4] पा. सू. ६. १. १५८.
[5] 'एक उदात्तः' इत्युचितं भाति।
[6] भाष्ये 'एकविभक्तिकत्वं च' इत्यत्र 'एक-विभक्तित्वं च' इति निर्णयसागरमुद्रिते पाठः।
[7] पा. सू. २. ४. ७१.

उपस्थापको यस्य स तच्छब्दः, तस्य भाव इत्यर्थः। किं तत इत्यत आह — **तद्यदिति**। **तत्** तस्मात् कारणात् **[यत्]** यस्मिन्नित्यर्थः। **ताच्छब्द्यमिति**। भवतीति शेषः। **तस्येदं ग्रहणमिति**। तथाच बहुव्रीह्यर्थालौकिकविग्रहवाक्ये सर्वादीनि सर्वनामानि न स्युरित्यर्थलाभात् 'त्वकत्पितृकः' इत्यादिव्यावृत्तिः सिद्धेति भावः। इदानीं 'त्वकत्पितृकः' इत्यादेरेव साधुत्वं न तु 'त्वत्कपितृकः' इत्यादेरित्याश्रित्य प्रकृतसूत्रं प्रत्याचष्टे — **गोनर्दीय इति**। गावो नर्दन्त्यस्मिन्निति गोनर्दो देशविशेषः, तत्र भवो गोनर्दीयः, गहादेराकृतिगणत्वाच्छः। भाष्यकृत इदं योगरूढं नाम। **अकच्स्वरावितिः**। [1]'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच्। स्वरस्तु [2]'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तत्वम्। तत्र शिट् सर्वादेः संज्ञा प्राचाम्। **प्रत्यङ्गमिति**। यथार्थवीप्सायामव्ययीभावः। अङ्गशब्दोऽत्र विषयपरः। प्रतिविषयम्, सर्वस्मिन् स्वविषय इति यावत्। **मुक्तसंशयाविति**। मुक्तः संशयो याभ्यां तौ, संशयाविषयावित्यर्थः। तथा च निःसंशयं यथा भवति तथाकच्स्वरौ स्वविषये सर्वत्र कर्तव्यौ, न तु तन्निमित्तसर्वनामसंज्ञाविघातकोपसर्जनतासंपादकबहुव्रीह्यादिसंज्ञया बाधनीयौ, ज्ञापकसिद्धस्य [3]'अन्तरङ्गानपि विधीन्' इत्यस्यासार्वत्रिकत्वादिति भावः। **इत्येव भवितव्यमिति**। तथा च सूत्रं न कर्तव्यमिति भावः। **भूतपूर्वस्येति**। एतदवयवत्वेन दृष्टः पूर्वशब्दः सर्वनामसंज्ञको न भवतीति वक्तव्यमिति भावः। **आढ्यपूर्वायेति**। भूतशब्दस्य शाकपार्थिवादित्वेन लोपे सति पूर्वशब्दोऽत्र प्रधानभूत एवेति केनापि निषेधो न भवतीति तदर्थं वचनमिदं कर्तव्यमिति मन्यते। **न चात्र व्यवस्था गम्यत इति**। पूर्वशब्दस्य भूतपूर्वार्थकत्वादिति भावः। एतेन 'प्राधान्येनेति भावः। अत्र हि पूर्वत्वमाढ्यविशेषणम्, यथा अतिसर्वायेति सर्वार्थोऽतिक्रान्तविशेषणम्' इति निरस्तम्। तथात्वे उपसर्जनत्वादेव सर्वनामताया अप्रसक्तौ 'प्रतिषेधे भूतपूर्वस्योपसंख्यानम्' इति वचनस्यासंबद्धप्रलापत्वापत्तेः। एतेन 'आढ्यपूर्व इति समासो मयूरव्यंसकादित्वात्' इत्यपि प्रत्युक्तम्। 'भूतपूर्व' इति समासस्य मयूरव्यंसकादित्वेऽप्याढ्यपूर्वशब्दस्य विशेषणसमासताया एव न्याय्यत्वात्॥

[१, २९१–२९४]

(**नारायणीयम्**) सौत्रप्राप्तिमात्राभिज्ञस्येदमुदाहरणमित्याह — **प्रियशब्दस्येति**। यद्यपि [4]"वा प्रियस्य' इति वचनादौपसंख्यानिकप्राप्त्यभिज्ञस्याप्युदाहरणोपपत्तिः, तथापि सौत्रप्राप्तिनिरासानन्तरमेव तद्वचनस्मरणमित्येवमुक्तम्। 'मन्यते' इत्यत्रोदाहरणनिराकरणवादिनः कर्तृत्वमित्यप्याहुः। **विशेषणत्वमिति**। यद्यप्यौपसंख्यानिकपूर्वनिपाते विशेषणत्वानपेक्षा, तदपेक्षायामुपसंख्यानवैयर्थ्यात्, तथापि सूत्रतः सिद्धे पूर्वनिपाते वचनमिदं सर्वनामोपनिपाते संख्यायाः पूर्वनिपातार्थमित्यभिसंधिरस्येति द्योतयितुं विशेषणत्वकीर्तनम्। **नियम इति**। असंख्योपनिपाते सर्वनाम्नो विशेषणत्वात् पूर्व[5]निपातसिद्धौ सर्वनाम्नः पूर्वनिपातवचनं संख्योपनिपाते पूर्वनिपातार्थमिति कल्पनायामपि न नियमसंभवः, वैपरीत्यकल्पनाया अपि संभवादित्यर्थः। **उच्यत इति**। उभयोरप्यन्यत्रानुक्तसिद्धः पूर्वनिपात इति वचनमिदं परस्परोपनिपाते पूर्वनिपातार्थम्। तत्र सर्वनामसंनिधौ संख्यापूर्वनिपातार्थत्वं

---

[1] पा. सू. ५. ३. ७१.
[2] फिट्सूत्रम् २९.
[3] परिभाषा ५२.
[4] का. वा. २. २. ३५–२.
[5] 'निपातसिद्धौ' इत्यस्यानन्तरं 'यद्यपि' इति वर्ततेऽधिकम् — क.

कल्प्यताम्, उत वैपरीत्यमिति [1]विशये प्राथमिककल्पनायां वचनवैयर्थ्यं [2]विशेषणत्वात् सिद्धेरिति वैपरीत्यकल्पनमेवोचितमित्यर्थः। **नैष इति**। अनयोरन्यत्र पूर्वनिपातसिद्धौ त्वदुक्तकल्पनावकाशः। सैव तु नास्ति, 'द्विशुक्लः, सर्वशुक्लः' इत्यादौ पूर्वनिमित्तव्यवस्थासिद्धेः[3]। तस्मादुभयोरन्यत्र कृतार्थयोः शब्दपरविप्रतिषेध इत्यर्थः। अन्तरङ्गबहिरङ्गभावं विशदयति — **अन्तरङ्गत्वादिति**। अन्तरङ्गानपि बहिरङ्गो विधिर्बाधत इत्युक्तम्। न तर्हीदानीमन्तरङ्गप्राबल्यं क्वापीत्यत आह — **समासाश्रय इति**। किमत्र प्रमाणम्, अत आह — **प्रत्ययेति**। लुग्विषयत्वं ज्ञापकस्येत्यत आह — **सामान्येनेति**। यत्नसाम्यमित्युक्तम्, तन्निरस्यति — **लुग्विषयमिति**। सामान्यतो ज्ञापनमन्तरेणापि वक्ष्यमाणप्रकार उद्दिष्टसिद्धेस्तदाश्रयणं व्यर्थमिति भावः। अत्राप्यन्तरङ्गबाधनमावश्यकमित्यत्र हेतुमाह — **अत्र हीति**। **सूत्रेति**। पूर्वं तु प्रतिषेधवचनान्यथानुपपत्त्या वाक्यावस्थायां प्राप्ताऽपि संज्ञा न प्रवर्तत इति काल्पनिकस्तदवस्थायां निषेधः। अत्र तु श्रौत इति भावः। अतिप्रसङ्गं परिहरति — **अप्रयोगेति**। विशेषलाभः कथमित्यत्राह — **तस्येति**। तदर्थे हि लक्षणया बहुव्रीहिः[4]पदप्रवृत्तिः। तादर्थ्यं चैकार्थीभावयुक्तस्य वाक्यस्य। तच्च न लोकप्रयोगार्हम्, एकार्थीभावे [5]समासंज्ञत्वात्। तदुच्यते — [6]न हि संज्ञाया भावाभावाविष्येते, इति। व्यपेक्षायुक्तं तु वाक्यं समासासमानार्थत्वान्न तदर्थम्। **सूत्रेति**। एतत्प्रयोजनाभावेऽपि प्रयोजनान्तरोद्देशेन सूत्रकरणं नाभिप्रेतम्, प्रयोजनान्तरस्यान्यथासिद्धत्वकीर्तनादिति भावः। ननु सूत्रारम्भादकजाद्यभावः सूत्रकृदभिप्रेतो लक्ष्यते, भाष्यवचनाच्च तद्भावः, किमत्र प्रामाणिकमित्यत आह — **यथेति**। संप्रति सर्वनामनिषेधाप्राप्तौ भूतपूर्वत्वं निमित्तमिति न भ्रमणीयमित्याह — **अबहुव्रीह्यर्थमिति**। अवध्याकाङ्क्षणात् कथं व्यवस्थाभावः, तत्राह — **प्राधान्येनेति**। उत्तरपदार्थप्रधानत्वात् तत्पुरुषस्य कथमप्राधान्यम्, अत आह — **अत्रेति**। तत्पुरुषस्योत्तरपदार्थप्रधानताव्यभिचारस्थलमाह — **यथेति**। [7]अस्तूपसर्जनत्वं, ततः [8]किमित्याशङ्क्याहः संज्ञास्मिन्न प्रवर्तत इत्याह — **इतीति**। यदि पूर्वार्थो विशेषणं कथमस्य परनिपातः, तत्राह — **मयूरेति**॥

तृतीयासमासे. १. १. ३०.

[१, २९४]

(**लघुविवरणम्**) **लौकिकस्येति**। अप्रयोगसमवायिनि [9]प्रतिषेधस्य न प्रयोजनमिति लौकिकस्य ग्रहणमिति भावः॥

---

[1] विषये — क.

[2] विशेषणत्वात् सिद्धेर्वचनवैयर्थ्यमितीत्यन्वयः।

[3] 'असिद्धेः' इति छेदः। शुक्लशब्दस्यापि विशेषणत्वेन पूर्वनिपातप्राप्तेरिति भावः। तस्माद् द्विसर्वयोः पूर्वनिपातनियमसिद्धचर्थं सर्वनामसंख्ययोरिति वचनस्यावश्यकत्वमित्याशयः।

[4] पदनिवृत्तिः — क.

[5] समासस्यान्यत्वात् — क.

[6] महाभाष्यम् २. १. १.

[7] यत्तूपसर्जनत्वम् — क.

[8] किमित्याशङ्क्यान्यसंज्ञा — क.

[9] प्रतिषेधस्याप्रयोजनमिति — ड.

[१, २९४]

(**विवरणम्**) **प्रयोगार्हस्येति**। [1]अप्रयोगार्हे न [2]निषेधस्य मुख्याति[3]लङ्घनेनासाधारणं प्रयोजनमित्यर्थः। **वाक्यभेदेनेति**। 'तृतीया' इति लुप्तषष्ठीकं पृथक् पदम्। तथा चानुवर्तमानसमासग्रहणेन सहैकवाक्यं सत् मुख्यतृतीयासमासे [4]संज्ञां निषेधति, द्वितीयेन तु समासग्रहणेन वाक्ये निषेध इति भावः। सादृश्यं चार्थतः प्रयोगार्हत्वेन च॥

[१, २९४]

(**उद्द्योतनम्**) [5]ननु पूर्वत्रेवात्राप्यप्रयोगार्हस्य संज्ञानिषेधे मासेन पूर्वायेति न सिध्यति, अत आह — **अत्रेति**। **प्रयोगार्हस्येति**। अप्रयोगार्हे निषेधप्रयोजनं किमपि नास्ति, पूर्वत्र त्वकजभावः प्रयोजनमिति भावः। **वाक्यभेदेनेति**। 'तृतीया' इति लुप्तषष्ठीकं पृथक् पदम्। तदनुवर्तमानसमासग्रहणेनैकवाक्यं सत् समासे संज्ञां निषेधति, [6]द्वितीयेन वाक्ये तन्निषेध इति भावः। ननु 'पूर्वस्मै' इत्यत्रापि निषेधः स्यात्, असमासत्वात्, अत आह — [7]**सदृशेति**। सादृश्यं चार्थः [8]पर्युदासस्य। **पूर्वेति**। अन्यत्र संज्ञा[9]प्रसक्त्यभावादिति भावः॥

[१, २९४]

(**रत्नप्रकाशः**) **समास इति वर्तमान इति**। [10]'दिक्समासे' इत्यत्रैकदेशे स्वरितत्वप्रतिज्ञानात् समास इत्यनुवर्तत इति भावः। **समासग्रहणं किमर्थमिति**। 'तृतीयायाः' इत्येव सूत्रे सति तृतीयासंबन्धिनि समास इति लभ्यत इति भावः। **तस्येदं ग्रहणमिति**। 'समासे' इत्यनुवर्तमानेन प्राथमकल्पिकपरेणायमर्थो न लभ्यत इति भावः। नन्वनुवृत्तस्य समासशब्दस्य समासार्थपदलक्षकत्वाश्रयणे न काप्यनुपपत्तिः। किं च 'मासपूर्वाय' इत्यत्र प्राथमकल्पिके समासे निषेधो न स्यादित्यस्वरसादाह — **अथवेति**। एतेन पूर्वस्मिन् कल्पे 'वाक्यभेदेन च मुख्ये समासे निषेधः' इति निरस्तम्। तत्रैव वाक्यभेदे आश्रिते 'अथवा' इति पक्षान्तरपरस्योत्तरभाष्यस्यासंगतत्वापत्तेः। तत्स्वरसेन हि पूर्वस्मिन् कल्पे मुख्ये समासे निषेधो न साधित इति गम्यते। **तृतीयेति**। लुप्तषष्ठीकमिदमिति भावः। **असमास इति**। समासभिन्ने प्रक्रियावाक्य इत्यर्थः। एतेन 'सादृश्यमर्थतः प्रयोगार्हत्वेन वा' इति विवरणं प्रत्युक्तम्, प्रक्रियावाक्य एव शास्त्रस्य प्रवर्तनीयत्वेन तस्यासाधोर्विशिष्टार्थपरतायाः प्रयोगार्हतायाश्चाभावात्। प्रक्रियावाक्यातिरिक्तसमासेतरस्य प्रसक्त्यभावेन सादृश्यावच्छेदकविचारपर्यन्तानुधावनस्यानर्थक्याच्च॥

---

[1] अप्रयोगार्हं न — अ.
[2] निषेधाल्लिङ्घान्मुख्याति — ट.
[3] लङ्घनेन साधारणं — अ.
[4] संज्ञानिषेध इति — च, छ.
[5] 'ननु' इति नास्ति — म, उ.
[6] द्वितीयवाक्ये — अ; द्वितीयेन वाक्येन — ऋ.
[7] प्रदीपे 'समाससदृशस्य वाक्यस्य' इत्यत्र 'समाससदृशवाक्यस्य' इत्यन्नंभट्टपाठ इति भाति।
[8] 'पर्युदासस्य' इति नास्ति — म, इ, उ, ऊ.
[9] प्रसक्त्यभावादित्यर्थः — अ.
[10] पा. सू. १. १. २८.

[१, २९४]

(**नारायणीयम्**) समासग्रहणं [1]समासार्थवाक्ये प्रतिषेधार्थमित्युक्तम्। तत्र तादर्थ्यं प्रक्रियावाक्यस्यैवेति प्रागुक्तत्वादिहापि तथात्वभ्रमं वारयति — **अत्रेति**। प्रक्रियावाक्ये निषेधफलाभावात् सादृश्यपरिकल्पिततादर्थ्येऽस्मिन् निषेधप्रवृत्तिरिति भावः। तर्हि मुख्यसमासे निषेधः कथम्, अत आह — **वाक्येति**। तृतीयेत्येकं वाक्यम्। समासानुवृत्त्या मुख्ये तस्मिन्निषेधः। 'समासे' इति द्वितीयम्। अत्र तृतीयेत्यनुवृत्त्या तृतीयासमासार्थवाक्ये निषेधः। ननु वाक्यभेदस्य प्राग्प्याश्रयणात् कः पक्षभेदः, अत आह — **पर्युदासेति**। पूर्वं हि पुनर्वचनान्यथानुपपत्त्या वाक्यपरिग्रहः। [2]अत्र तु....॥

विभाषा जसि. १. १. ३२.

[१, २९५]

(**लघुविवरणम्**) **कार्येति**। जस्ग्रहणं प्रदेशविशेषोपलक्षणार्थम् — यत्र जस्ग्रहणं तत्रेदमुपतिष्ठत इत्यर्थः॥

[१, २९५]

(**विवरणम्**) **जस इति**। [3]जसीति जसि प्रति विभाषेति सूत्रयोजना। **इकारेणेति**। इकारस्य सर्वनामकार्यस्याभावादीकारो गृह्यत इत्यर्थः। **अन्ये त्विति**। 'जसि' इति सूत्रोपस्थानप्रदेशो [4]दर्श्यते। यत्र सर्वनामकार्यविधौ जस उच्चारणं तत्र द्वन्द्वे विभाषेति सर्वनामसंज्ञाविकल्पायोपतिष्ठत [5]इत्यर्थः॥

[१, २९५]

(**उद्द्योतनम्**) ननु 'वर्णाश्रमेतरे' इत्यत्राकजपि स्यात्, सर्वनामसंज्ञासद्भावात्, अत आह — भाष्ये **जसः कार्यं प्रतीति**। तत्र लक्षणाप्रसङ्गं निराह — **जस इति**। जसः सर्वनामकार्यं शीभावः, स च सूत्रोपात्त एवेति न लक्षणाप्रसङ्गः, नाप्यकचि विकल्प इति भावः। नन्विकारग्रहणेऽपि ईकारो न गृहीतः, अत आह — **इकारेणेति**। इकारस्य सर्वनामकार्यत्वाभावादीकारो गृह्यत इति भावः। सूत्रे द्वितीयाया लुक्, [6]जसि प्रति विभाषेत्यर्थः। उक्तरीत्या ईकारलाभः क्लिष्टः, अत आह — **अन्ये त्विति**। 'जसि' इति [7]सप्तम्यन्तमेतत् सूत्रोपस्थानप्रदेशप्रदर्शनार्थम्। यत्र [8]सर्वनामकार्यविधौ जस उच्चारणं तत्र 'द्वन्द्वे विभाषा' इत्येतदुपतिष्ठते संज्ञाविकल्पायेति भावः।

---

[1] समर्थवाक्ये — क.
[2] 'अत्र तु' इत्यस्यानन्तरं ग्रन्थस्त्रुटितः — क. 'अत्र तु शब्दत एव वाक्यलाभ इति भेद इति भावः' इति भाव्यमिति भाति।
[3] 'जसीति' इति नास्ति। जसं प्रति — अ.
[4] गृह्यते — च, छ; दृश्यते — ञ.
[5] इति भावः — ट.
[6] जसं प्रति — अ, म, उ.
[7] सप्तम्यन्तमेव सूत्रोपस्थान — अ, इ, उ, ऊ, ॠ.
[8] सर्वनामविधौ — अ.

[१, २९५]

(**रत्नप्रकाशः**) **जसः कार्यं प्रति विभाषेति**। यथा भवति तथा व्याख्येयमिति शेषः। तद्व्याख्यानं तु जस्शब्दस्तदादेशलक्षकः, तथा च जसादेशे कर्तव्ये द्वन्द्वे सर्वादीनि तदन्तानि च सर्वनामानि वा स्युरिति। एतेन 'जस इ जसीति निर्देशादिकारेण ईकारस्य ग्रहणादित्याहुः' इति निरस्तम्। प्रतिशब्दप्रयोगाभावेन 'जसि' इत्यस्य सौत्रस्य द्वितीयान्तताया असंभवात्। प्रतिशब्दाध्याहारे तस्यैव दोषत्वात्। विभक्त्यन्तरस्य लुप्तस्य तेनादर्शितत्वाच्च। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगाच्च। यदप्युक्तम् "अन्ये तु कार्यकालत्वात् संज्ञायाः [1]'जसः शी' इत्यत्रैवास्योपस्थानं मन्यन्ते" इति। तत्तु तेनैव 'मन्यन्ते' इति वदता असमीचीनमिति सूचितम्। तत्रैवास्योपस्थानमन्यत्र नेत्यत्र मानाभावादिति तस्याशयः॥

[१, २९५]

(**नारायणीयम्**) अयं विशेषः कथं लब्ध इत्यत आह — **जस इति**। लुप्तसप्तमीकमिति भावः। न त्वित्वे कार्ये विभाषया भाव्यमित्यत आह — **इकारेणेति**। **अन्ये त्विति**। जस्ग्रहणं प्रदेशविशेषोपलक्षणम् — यत्र जस्ग्रहणं तत्रेदं विकल्पविधानमिति॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्. १. १. ३४.

[१, २९५–२९७]

(**लघुविवरणम्**) 'अवरादीनाम्' इत्यनुपपन्नम्, यतः पुनः सूत्रपाठे ग्रहणाभावे जसि विभाषा न स्यादित्यत आह — **किमर्थमिति**। ननु 'पूर्वादीनि नव' इत्युक्ते समासविधौ निर्दिष्टानां पूर्वादीनां वीरान्तानां जसि विभाषा विज्ञायेत, अत आह — **प्राप्तेति**। न च समासविधौ निर्दिष्टानां सर्वेषां सर्वनामसंज्ञा प्राप्तेति भावः। [2]प्राप्तविभाषैव कथं लभ्येत्यत आह — **तेषामिति**। सर्वादिग्रहणानुवृत्त्या पूर्वादयो विशेष्यन्त इत्यभिप्रायः। नन्वेवमपि व्यवस्थादेरन्यत्र जसि विभाषा स्यादित्यत आह — **गण एवेति**। नियतसंनिवेशविशिष्टगणग्रहायोपादीयमानव्यवस्थावाच्यादिशब्द एव तत्र प्रमाणमित्यत आह — **आदिशब्द इति**। ननु प्रकारार्थत्वे वृत्तिकाराणां गणपाठोऽनुपपन्न इत्यत आह — [3]**प्रकारार्थप्रदर्शनायेति**। ननु [4]निदर्शनार्थो गणपाठ इति कथमवगम्यतामित्यत आह — **तत्र वेद इति**। [5]लक्षणया प्रयोगे प्रयोजनमाह — **तेनेति**। सर्वादीनां पूर्वकालपठितत्वं वक्तुं लक्षणया प्रयोग इति भावः। **तत्र पुनरिति**। कार्यार्थत्वात् संज्ञायाः [6]संज्ञावियोगाभावप्रतिपादनद्वारा तत्कार्याविवियोगः प्रतिपाद्यत इति निषेधो बाध्यत इति भावः। **यथेति**। [7]'लक्षणेत्थंभूत'

---

[1] पा. सू. ७. १. १७.

[2] प्राप्तविभाषा कथं लभ्यत इत्यत आह — — ड, ढ.

[3] 'प्रकारार्थताप्रदर्शनाय' इत्यत्र प्रदीपे 'प्रकारार्थप्रदर्शनाय' इति निर्णयसागरमुद्रिते पाठः।

[4] प्रदर्शनार्थः — ड, ढ.

[5] लक्षणाप्रयोगे — ण.

[6] संज्ञादियोगाभाव — ण.

[7] पा. सू. १. ४. ९०.

इति सिद्धे [1]'अनुर्लक्षणे' इति पुनः कर्मप्रवचनीयसंज्ञाविधानेनेत्यर्थः। **वाक्यभेदेनेति**। पुनः सूत्रपाठे ग्रहणात् [2]'विभाषा जसि' इत्यधिकाराच्चेति भावः। न केवलं पाठविशेषणे प्रमाणाभावः, किं तु नित्यसंज्ञाविधानार्थ एवेत्यत्र प्रमाणमस्तीत्याह — **प्राप्तेति**। ननु 'पूर्वादीनि नव' इत्युक्त्वा 'व्यवस्थायाम्' इत्याद्यर्थनिर्देश एव क्रियतामित्यत आह — **प्रतिपदेति** ॥

[१, २९५–२९७]

(**विवरणम्**) ननु गणे यद्यपि पठिताः, तथापि जसि विभाषार्थं पुनः सूत्रपाठे ग्रहणं तेषां स्यादित्यत आह — **किमर्थमिति**। ननु गणस्थानां यद्यपि 'पूर्वादीनि नव' इत्युक्ते सिध्यति ग्रहणम्, तथापि प्राप्तविभाषायामनुवाददोषप्रसङ्गादर्थान्तरे तेषां जसि विभाषा स्यादित्यत आह — **गण इति**। **पूर्वमिति**। पूर्वं हि[3] गणपाठे 'पूर्वादीनि नव' इति च वक्तुं शक्यते, नान्यथेति भावः। ननु 'सर्वादीनि' इत्यादिशब्दात् पूर्वं गणपाठ इति निश्चीयत इत्यत आह — **आदिशब्द इति**। ननु प्रदर्शनार्थत्वे गणपाठस्यादि[4]शब्दस्य प्रकारार्थता स्यात्, प्रदर्शनार्थत्वमेव कुत इत्यत आह — **तत्र वेद इति**। **पूर्वकालेति**। ततश्च **तानि** सर्वनामसंज्ञायां [5]संज्ञित्वेनोपात्तानि **पूर्वादीनि** पूर्वकालपठितगणनिविष्टसर्वादीनीति भाष्यार्थः। **प्रकारेति**। बह्वर्थवाचित्वेन [6]सर्वशब्दसादृश्ये विवक्षित इति शेषः। [7]**तत्र पुनरिति**। कार्यार्थत्वात् संज्ञायाः संज्ञावियोगाभावप्रतिपादनद्वारा संज्ञाकार्यावियोगः प्रतिपाद्यत इति द्व्यादिपर्युदासो बाध्यत इत्यर्थः। **यथेति**। [8]'लक्षणेत्थंभूत' इति सिद्धे कर्मप्रवचनीयत्वे [9]'अनुर्लक्षणे' इति पुनर्विधानेन परत्वाद्धेतुतृतीया प्राप्ता [10]'कर्मप्रवचनीय' इति द्वितीयया बाध्यत इत्यर्थः। नन्वेवं जसि विकल्पो न स्यादित्यत आह — **वाक्येति**। [11]विहिता संज्ञा पुनस्तस्यैव[12] विधीयत इति प्रतिपादनार्थाद् गणपठितानां तथैव निर्देशात् [13]'विभाषा जसि' इत्यधिकाराच्चेति भावः। न केवलमर्थनिर्देशस्य पाठविशेषणत्वे प्रमाणाभावः, किं तु संज्ञाविधानार्थत्वे प्रमाणमस्तीत्याह — **प्राप्तेति**। नन्वर्थान्तरे संज्ञाविकल्पाभावायार्थमात्रनिर्देशः क्रियताम्, किं प्रतिपदपाठेनेत्यत आह — **प्रतिपदेति** ॥

[१, २९५–२९७]

(**उद्द्योतनम्**) ननु गणपठितानामपि जसि विभाषार्थं पुनः सूत्रे पाठः स्यात्, अत आह — **किमर्थमिति**। [14]**अर्थविशेषः** [15]व्यवस्थारूपेत्यादिः। नन्वेवमर्थान्तरेऽपि विभाषा स्यात्, अत आह— **प्राप्तेति**। तामेवोपपादयति — **तेषामेवेति**। ननु 'पूर्वादीनि नव' इत्युक्ते व्यवस्थाग्रहणाभावाद् गणेऽप्यर्थविशेषो [16]न लभ्यते, अत आह — **गण एवेति**। 'व्यवस्थायाम्' इत्येतद् गण एव पूर्वा-

---

[1] पा. सू. १. ४. ८४.
[2] पा. सू. १. १. ३२.
[3] हिशब्दो नास्ति — छ.
[4] शब्दप्रकारार्थता — अ.
[5] संज्ञित्वेनोक्तानि — च, छ, अ.
[6] पूर्वशब्द — छ.
[7] ततः पुनरिति — छ.
[8] पा. सू. १. ४. ९०.
[9] पा. सू. १. ४. ८४.
[10] पा. सू. २. ३. ८.
[11] विहितसंज्ञा — च, छ.
[12] तथैव — च, छ.
[13] पा. सू. १. १. ३२.
[14] अर्थविशेष — अ, आ, ऋ.
[15] व्यवस्थाख्येत्यादिः — म.
[16] न लभ्येत — अ.

दीनि विशिनष्टि, एवमुत्तरसूत्रद्वयेऽपीति भावः। [1]सूत्रस्थेनार्थेन पाठविशेषणे विस्मरणशीलं प्रत्युक्तमेव दृष्टान्तमाह — **यथेति**। [2]'अवरादीनाम्' इत्युक्त्या पूर्वपरयोरपि ग्रहणम्। तेन 'पूर्वादीनि नव' इति स्वोक्तस्य न विरोध इत्याह — **प्रकारार्थ इति**। ननु पूर्वाद्यनुक्तौ व्यवस्थाज्ञातिधन[3]-बहिर्योगोपसंव्यानरूपार्थस्य नवस्वन्वयः स्यादिति चेन्न, योग्यता[4]वशाद्व्यवस्थापितान्वयोपपत्तेरिति भावः। शङ्कातात्पर्यमाह — **पूर्वमिति**। पूर्वं गणपाठे 'पूर्वादीनि नव' इति वक्तुं शक्यते, नान्यथेति भावः। ननु [5]'सर्वादीनि' इत्यादिशब्दात् पूर्वं गणपाठ इति निश्चीयते, अत आह — **आदिशब्द इति**। ननु [6]गणपाठस्य पूर्वभावित्वाभावे वृत्तौ तत्पाठोऽनर्थकः स्यात्, अत आह — [7]**प्रकारार्थेति**। सूत्रकृदपठितस्यापि वृत्तिकारैः पाठे दृष्टान्तः — [8]**यदुक्तमिति**। नन्वादिशब्दस्य [9]निदर्शनार्थत्वे प्रकारार्थता स्यात्, तदेव कुतः, अत आह — **तत्र वेद इति**। 'तानि' इत्येतन्नोक्तशङ्कास्कन्दकम्। 'सर्वादीनि' इति वक्तव्ये 'पूर्वादीनि' [10]इत्यप्ययुक्तम्, अत आह — **पूर्वकालेति**। तथा च सर्वादीनां पूर्वपाठात् पूर्वादीनि तन्निविष्टान्येवेति भाष्यार्थः। **प्रकारेति**। कृत्स्नार्थत्वव्यतिरिक्तप्रकाराभावादिति भावः। 'इमान्यपि' इति शङ्कातात्पर्यमाह — **हेत्विति**। भाष्ये **इमान्यपि पूर्वादीनि** पूर्वपठितानि। नन्वादिशब्दस्य प्रकारवाचित्वेऽपि तत्र नवग्रहणं [11]संगच्छत इति न तस्य पश्चाद्भावद्योतकत्वम्, अत आह — [12]**तत्रेति**। **प्रतिनियतेति**। पूर्वादीनां सप्तानां व्यवस्था विशेषणम्, स्वस्याज्ञात्यादि, अन्तरस्य बहिर्योगादीत्यर्थः। **पाठेति**। [13]उक्तोऽत्राभिप्रायः। यद्वा गण एवार्थनिर्देशः कर्तव्यो [14]नात्रेत्यर्थः। नन्वत्र [15]पूर्वादिपाठे द्व्यादिपर्युदासः कथं बाध्यते, पर्युदासो वा कथं प्राप्तः, अत आह — **त्यदादीनीति**। प्राप्तिमुपपाद्य निरासप्रकारमाह — **तत्रेति**। **पुनरिति**। पूर्वादीनि सर्वनामसंज्ञानीति पुनः संज्ञात्र विधीयते। कार्यार्थत्वात् संज्ञायास्तसिलादिकमेव पुनःसंज्ञाविधानस्य कार्यमिति द्व्यादिपर्युदासो बाध्यत इत्यर्थः। **तसिलादिरिति**। तदर्थत्वात् पुनःसंज्ञाया इति भावः। पुनःसंज्ञाविधानेन वचनान्तरप्राप्तकार्यबाधने दृष्टान्तमाह — **यथेति**। [16]'लक्षणेत्थंभूत' इत्येव सिद्धे कर्मप्रवचनीयत्वे [17]'अनुर्लक्षणे' इति पुनर्विधानेन परत्वाद्धेतुतृतीया प्राप्ता कर्मप्रवचनीयद्वितीयया बाध्यते। 'शाकल्यस्य संहितामनु प्रावर्षत्' इत्यत्र संहिताया वृष्टिहेतुत्वमेवानुना द्योत्यत इति तृतीयाप्राप्तिरिति। नन्वेवं जसि विकल्पो न स्यात्, अत आह — **वाक्येति**। [18]'विभाषा जसि' इत्यनुवर्त्य पूर्वादीनां जसि विकल्पो विधीयत इत्यर्थः। नित्यविधेः सूत्रान्तरानुवृत्त्या [19]स्थलविशेषविकल्पे दृष्टान्तमाह — **यथेति**। **इत्यत्र** सूत्रद्वयेऽपीत्यर्थः। भाष्ये 'पूर्वत्र, उत्तरत्र' इति ज्ञापकद्वयाद् द्व्यादिपर्युदासो न भवतीत्यर्थः। वार्तिककाराभिप्रायं दूषयति —

---

[1] सूत्रे स्वेनार्थेन — आ, ऋ.
[2] अपरादीनाम् — अ, इ, उ, ऊ.
[3] 'अज्ञातिधन' इति छेदः।
[4] वशाद्व्यवस्थितान्वयोपपत्तेरिति — इ, ऊ.
[5] पा. सू. १. १. २७.
[6] गणस्य पूर्वं — म, उ.
[7] प्रदीपे 'प्रकारार्थताप्रदर्शनाय' इत्यत्र 'प्रकारार्थंप्रदर्शनाय' इति निर्णयसागरमुद्रिते पाठः। स स्वीकृतोऽत्र।
[8] यथोक्तमिति — अ; तदुक्तमिति — म.
[9] प्रदर्शनार्थत्वे — अ, आ, इ, उ, ऊ, ऋ.
[10] इत्ययुक्तम् —म, आ, इ.
[11] संभवतीति — म, आ.
[12] अत्रेति — अ, इ, उ, ऊ, ऋ.
[13] उक्तोऽभिप्रायः — म, उ.
[14] नान्यत्रेत्यर्थः — अ, म.
[15] सर्वादिपाठे — म, उ.
[16] पा. सू. १. ४. ९०.
[17] पा. सू. १. ४.८४.
[18] पा. सू. १. १. ३२.
[19] स्थलविशेषे विकल्पे — अ, इ, ऊ.

[1]**यदि तर्हीति**। ननु नित्यसंज्ञाया एवात्र विकल्प इत्यत्राप्यर्थ[2]विशेषलाभः, अत आह — **पाठविशेषण इति**। यद्वा 'नित्यसंज्ञायामेव चरितार्थत्वाद्विभाषाविधाने पाठविशेषणत्वे प्रमाणाभावात्' इत्येकग्रन्थतया योज्यम्। अस्तु प्रमाणाभावः, [3]किमतः, अत आह — [4]**अप्राप्तेति**। ननु प्राप्तविभाषेयम्, अतो नार्थान्तरे भविष्यति, अत आह — **प्राप्तेति**। [5]विध्यंशेऽपूर्वार्थत्वसंभवे[6]ऽनुवादत्वायोगादप्राप्तविभाषैव युक्ता। अत एव प्राप्ताप्राप्तविभाषापि न भवतीति भावः। इष्टापत्तिशङ्कां वारयति — **प्राप्तेति**। नन्वर्थान्तरे संज्ञाविकल्पबाधायार्थनिर्देशमात्रं क्रियताम्, किं प्रतिपदपाठेन, अत आह — **प्रतिपदेति**। योग्यतया [7]तदनुगमस्तु क्लिष्ट इति भावः। **भाष्यकारेणेति**। 'पूर्वादीनि नव व्यवस्थाज्ञातिधनान्यबहिर्योगोपसंव्यानेषु' इत्युक्तेऽर्थस्य व्यवस्थयान्वयासंभवाद् यथान्यासमेव सूत्रमिति समर्थितमित्यर्थ[8]ः॥

[१, २९५–२९७]

(**रत्नप्रकाशः**) **अवरादीनां चेति**। अवरकालपठितत्वात् पूर्वादय एवात्रावरादिशब्देनोच्यन्ते। **सूत्रपाठे** अष्टाध्याय्याम्। **गण इति**। सर्वादिगण इत्यर्थः। **पठ्यन्त इति**। तथाच [9]"जसः शी' इत्यत्र [10]"पूर्वादिभ्यो नवभ्यो वा' इत्यनुवर्त्य वाक्यभेदेन व्याख्यानादेव सिद्धेऽत्रैतदादित्रिसूत्री न कर्तव्येति भावः। एतेन "अत्र 'पूर्वादीनि नव' इत्येव सूत्रं पठितव्यम्। प्राप्तविभाषा चेयम्, तेषामेवात्र प्रत्यभिज्ञानात्" इति निरस्तम्। तादृशमपि सूत्रं विनैव निर्वाहस्योक्तत्वात्। यदप्युक्तम् 'अवरादीनामित्यत्र प्रकारार्थ आदिशब्दः, तेन पूर्वपरावपि गृह्येते' इति। तन्न, एतदवरादिशब्दार्थानुवादकस्य 'इमान्यवरादीनि' इत्यस्य व्याख्यानेन स्वकृतेन विरोधात्। **स इति**। यः पूर्वादीनां सर्वादिगणे, स इत्यर्थः। **अयमिति**। अष्टाध्याय्यां कृतः पाठः। **तानि हि पूर्वादीनीति**। यानि सर्वादिगणे पठितानि पूर्वादीनि **तानि, पूर्वादीनि** पूर्वकालपठितानीति भावः। **इमान्यवरादीनीति**। यानि पूर्वादीन्यत्राष्टाध्याय्यां पठितानि तानि **इमानि, अवरादीनि** अवरकालपठितानीति भावः। **इमान्यपि पूर्वादीनीति**। अपिशब्दोऽवधारणार्थः। इमान्येव **पूर्वादीनि** पूर्वकालपठितानि कुतो न भवन्तीति भावः। **नवग्रहणं करोतीति**। यद्यष्टाध्यायीपाठोत्तरं गणपाठः स्यात् तर्हि [11]"पूर्वादिभ्यो नवभ्यो वा' इत्यत्र पूर्वादिशब्देनात्र निर्दिष्टा एव पूर्वादयो नव गृह्यन्त इति **नवग्रहणं** व्यर्थं स्यात्। तत्पाठवैपरीत्ये तु त्यदादिवारणेन सार्थकमिति तथैव पाठं ज्ञापयतीति भावः। **नवैव हि पूर्वादीनीति**। अष्टाध्याय्यां पठितानीति शेषः। गणपाठस्वरूपमजानन् कश्चिदाह — **इदं तर्हीति**। स एव पाठक्रममज्ञात्वा आह — **इदं तर्हीति। पर्युदासो मा भूदिति**। पुनः संज्ञाकरणसामर्थ्यात् पर्युदासो न भविष्यतीति मन्यते। [12]यक्षानुरूपबलिन्यायेनोत्तरमाह — **आचार्येति**। **निपातनमिति**। निर्देशमित्यर्थः। [13]"जसः शी' इत्यत्र [14]"पूर्वादिभ्यो

---

[1] प्रदीपे 'यदि पूर्वादीनि' इत्यत्र 'यदि तर्हि पूर्वादीनि' इति मद्रपुरीमुद्रिते पाठः।
[2] विशेषालाभः— अ.
[3] 'किमतः' इति नास्ति — म, आ.
[4] अप्राप्त इति — अ, म, आ, इ, उ, ऊ, ऋ.
[5] 'विध्यंशे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.
[6] अनुवादकत्वायोगात् — अ, इ, ऊ.
[7] तदवगमस्तु — म, आ, इ, उ, ऊ, ऋ.
[8] 'इत्यर्थः' इति नास्ति — अ, आ.
[9] पा. सू. ७. १. १७.
[10] पा. सू. ७. १. १६.
[11] पा. सू. ७. १. १६.
[12] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[13] पा. सू. ७. १. १७.
[14] पा. सू. ७. १. १६.

नवभ्यो वा' इत्यनुवर्तनादेव सिद्धमिति वार्तिककाराशयमजानन्नाह — **इदं तर्हीति**। भाष्यकारैस्तु तत्प्रयोजनखण्डनं न कृतम्, बुद्धिमद्भिः स्वत एव ज्ञातुं शक्यत्वात्। यत्तूक्तम् 'यद्यत्र पूर्वादीनि नवेत्युच्यते तदा गणपाठेऽर्थनिर्देशस्य नित्यसंज्ञाविधान एवोपयुक्तत्वात् पाठविशेषणे प्रमाणाभावाद-प्राप्तविभाषेयमर्थान्तरे पूर्वादीनां जसि विज्ञायेत, प्राप्तविभाषायामुक्तानुवाददोषात्, अप्राप्त-विभाषायामपूर्वविधानात्' इति। तदपि फल्गु, गणपाठेऽर्थनिर्देशस्य नित्यसंज्ञाविधान एवोपक्षीण-तायां मानाभावात्। गणपाठे कृतस्यार्थनिर्देशस्य पाठविशेषणतायां एव न्याय्यत्वात्। प्राप्त-विभाषाया अपि बहुत्राश्रीयमाणत्वेनोक्तानुवादस्य दोषत्वे मानाभावाच्च। एतेन 'प्रतिपदपाठमन्तरे-णासंकरेणार्थनिर्देशोऽशक्यः कर्तुमिति भाष्यकारेण प्रतिपदपाठः समर्थितः' इत्यपि निरस्तम्। गणे कृतस्यार्थनिर्देशस्य पाठविशेषणत्वेनैव सर्वनिर्वाहात्। भाष्यकारस्यैतदाशयकत्वे मानाभावाच्च ॥

[१, २९५—२९७]

(**नारायणीयम्**) अत्र वार्तिककारेण त्रिसूत्रीयं न कर्तव्येत्युक्तम्, भाष्यकारेण तु जसि विभाषार्थं कर्तव्येत्युच्यत इति भाति। अत्र किं वार्तिककारस्य जसि विभाषार्थत्वज्ञानाभावः, उतान्यथासिद्धत्वज्ञानम्। नाद्यः, तत्रभवतो वार्तिककारस्य तदर्थत्वज्ञानाभावकल्पनानौचित्यात्। नान्त्यः, अन्यथासिद्धयभावादित्याशङ्क्य न त्रिसूत्र्यकरणं वार्तिकार्थः, किं तु प्रतिपदपाठाभावमात्र-मित्याह — **किमर्थमित्यादिना**। ननु प्रतिपदपाठाभावेऽर्थविशेषस्य निर्देष्टुमशक्यत्वाद् व्यवस्था-दिभ्योऽन्यत्र विधिरेष स्यादित्यत आह — **प्राप्तेति**। तत्र हेतुः — **तेषामेवेति**। विशिष्टाना-मित्यर्थः। ननु विशिष्टानां पाठे तत्प्रत्यभिज्ञा, सैव कुतः, तत्राह — **यावतेति**। व्यवस्थादिभ्यो-ऽन्यत्र नित्यसंज्ञानिवृत्तये गणेऽर्थविशेषणमित्यर्थः। ननु विशिष्टप्रत्यभिज्ञाने प्राप्तविभाषयानुवादा-पत्तेः[1] स्वरूपमात्रप्रत्यभिज्ञानं स्यात्, अत आह — **गण इति**। अवरादिपाठानर्थक्यमिति भाति। तदयुक्तम्, सति तस्मिन्नादिशब्दस्य व्यवस्थावाचितया गणपूर्वत्वस्यापि निश्चेतुं शक्यत्वात्। अतो गणपाठसंदेहादेव प्रश्न इत्याह — **पूर्वमिति**। [2]'सर्वादीनि' इत्यादिशब्दानुपपत्त्या गणास्तित्वनिश्चय इत्यत आह — **आदीति**। ननु पाठः प्रत्यक्ष इत्यत आह — **प्रकारेति**। ननु कृतादिभिरपठितैरपि समासस्य दर्शनादादिशब्दस्य प्रकारार्थत्वम्, पाठस्य च वृत्तिकारकृतत्वमिति तत्र कल्पनम्, इह त्व-पठितस्य संज्ञादर्शनात्[3] कथमादिशब्दः प्रकारे, कथं च गणपाठोऽनार्षः, तत्राह — **तत्रेति**। पूर्व-कालीनगणास्तित्वे प्रमाणे पृष्टे तदवचनेनान्यदेवोच्यते। न च तदुच्यमानमुपपन्नमपीत्याशङ्क्या-मनुपपत्त्यैव तर्हि लक्षणास्वीकारात् [4]सिषाधयिषितप्रत्यभिज्ञापरमेतद्वाक्यम्, हेतुस्तु हिशब्दद्योत्योऽव-गन्तव्यः। अतो न किंचिदसंगतमित्याह — **पूर्वेति**। द्योत्यहेतुं प्रकाशयति — **तेनेति**। 'इमान्यपि' इति ग्रन्थस्य छलोक्तित्वेऽविदिताभिप्रायोक्तित्वे वाभिप्रायप्रकाशनं पूर्ववादिनः स्यात्। अतो विदिताभिप्रायस्य तत्त्वोक्तिरेषेत्याह — **हेत्विति**। अत्रापि पूर्वादीनीत्यस्य पूर्वकालपठिता-नीत्यर्थः। अपिशब्दः संदेहद्योतकः। ततश्च टीकोक्तविनिगमनाविरहो भाष्याक्षरारूढ एव। यद्य-प्यादिशब्दस्य व्यवस्थावाचित्वमस्मिन्नर्थे हेतुरित्युक्तम्, अथापि तन्निश्चयाभावात् 'हेत्वभिधानमन्तरेण' इत्युक्तम्। न च कृत्स्नादिषु सर्वनामकार्यादर्शनाद् व्यवस्थावाचित्वनिश्चयः, सर्वनामकार्ययोगि-त्वस्यैव प्रकारतया कृत्स्नादिषु प्रकारार्थत्वेऽप्यादिशब्दस्य संज्ञाभावोपपत्तेः। ज्ञापकं विशदयति—

---

[1] अनुवादत्वापत्तेरित्यर्थः। भावप्रधानो निर्देशः।
[2] पा. सू. १. १. २७.
[3] अदर्शनादिति छेदः।
[4] सिसाधयिषित — क.

तत्रेति। स्वरूपमात्रप्रत्यभिज्ञानवादिनार्थनिर्देशः कर्तव्य इत्युक्तम्। तर्ह्यर्थनिर्देशोऽस्तु, प्रतिपदपाठो मास्तिवत्यत आह — **प्रतिनियतेति**। ननु गणे भवत्वर्थनिर्देशः, इह तु स्वरूपप्रत्यभिज्ञानं स्यात्, अत आह — **पाठेति**। 'द्व्यादि' इति [1]केवलबहुव्रीहित्वात् कथं पूर्वादीनां निषेधप्राप्तिः, अत आह — **त्यदादीनीति**। यदि पूर्वादीनां त्यदादित्वं कथं द्व्यादिपर्युदासः प्राप्नुवन् शक्यते निवारयितुम्, अत आह — **तत्रेति**। [2]यद्यप्येतत् प्रतिपदपाठप्रयोजनं नास्ति, पुनर्विधानादेव तसिलादिसिद्धेः, तथापि ज्ञापनेनास्य पक्षस्य निरासान्नैतदुक्तम्। **यथेति**। [3]'लक्षणेत्थंभूताख्यान' इति सिद्धे कर्मप्रवचनीयत्वे पुनर्विधानमिदम्। नन्विदं विधानं द्व्यादिपर्युदासनिवृत्त्यर्थं चेत् जसि विभाषा केन स्यात्, अत आह — **वाक्येति**। नन्वेकवाक्यतयान्वयसंभवे किं वाक्यभेदे प्रमाणमित्याशङ्क्य लक्ष्यमेव प्रमाणमिति मत्वाह — **यथेति**। ननु जसि विभाषार्थं सूत्रमस्तु। न तत्र विवादः प्रवृत्तः, प्रतिपदपाठे विवादात्। अतस्तत्फलकीर्तनमन्तरेण[न] तत्समर्थनम्, अत आह — **यदीति**॥

स्वमज्ञातिधनाख्यायाम्. १.१. ३५.

[१, २९७–२९८]

(**लघुविवरणम्**) **आमिनजिति**। [4]'स्वामिन्नैश्वर्ये' इति निपातनादित्यर्थः॥

[१, २९७–२९८]

(**विवरणम्**) **आत्मेति**। मत्वर्थीयादन्यत्रेति शेषः। **आमिनजिति**। [5]'स्वामिन्नैश्वर्ये' इति निपातनादिति भावः। आत्मीयत्वमभिधेयम्, तस्य गवादिनिष्ठताप्रतीतिर्लक्षणिकीति प्रश्नाभिप्रायमाह — **स्व इति**। प्रतिषेध इति सप्तम्यन्तम्। प्रवृत्तिनिमित्तमात्मीयत्वम्, अभिधेयं [6]गवादीत्युत्तराभिप्रायमाह — **असतीति**। **न त्विति**। [7]शब्दस्वरूपं निमित्तीकृत्य ज्ञातिधनयोर्वर्तमानस्तयोराख्येति भावः॥

[१, २९७–२९८]

(**उद्द्योतनम्**) स्वशब्दस्यार्थज्ञानं विना विधिनिषेधाज्ञानादर्थभेदानाह — **आत्मेति**। आत्मत्वमात्मीयत्वं ज्ञातित्वं धनत्वं च प्रवृत्तिनिमित्तचतुष्टयमित्यर्थः। [8]**आमिनज्विषय इति**। [9]'स्वामिन्नैश्वर्ये' इति निपातनात् तत्रैवैश्वर्यवाची, नान्यत्रेत्यर्थः। अत्र 'स्वे पुत्राः, स्वाः पुत्राः' 'स्वे गावः,

---

[1] यदि तु द्वेरादयो द्व्यादयः, द्विरादिर्येषां ते द्व्यादयः, द्व्यादयश्च द्व्यादयश्चेति विग्रहे बहुव्रीहितत्पुरुषयोर्मध्ये स्वरभिन्नानां यस्योत्तरविधिः स शिष्यते' इत्यनेन वचनेन बहुव्रीहेरेकशेषः स्वीक्रियते तदा कामं पूर्वादीनामपि द्व्यादिपर्युदासः स्यादित्याशयः।

[2] यद्यप्येवं प्रतिपद — क.

[3] पा. सू. १. ४. ९०.

[4] पा. सू. ५. २. १२६.

[5] पा. सू. ५. २. १२६.

[6] गवादीनामुत्तराभिधानाभिप्रायमाह — ञ.

[7] शब्दस्य रूपं — ञ.

[8] आमिन्विषय इति — इ, ऊ, ॠ.

[9] पा. सू. ५. २. १२६.

स्वा गावः' इति ज्ञातिधनयोरपि विकल्पसिद्ध्यर्थमाख्याग्रहणमिति [1]प्रतिपादयितुम् 'आख्या' इत्यादि-भाष्यम्। [2]तत्र प्रश्नतात्पर्यमाह — **स्वे पुत्रा इति**। **आत्मीयत्वमेवेति**। तावन्मात्रं विशेषणत्वेनान्वेतीत्यर्थः। **प्रतिषेधः** 'अज्ञातिधन' इति प्रतिषेधः। भाष्ये **इह मा भूत्** प्रतिषेध इत्यध्याहृतशेषस्यानुषङ्गः। प्रश्नाभिप्रायमन्यथयति — **असतीति**। ज्ञातिधन[3]वृत्तित्वे हेतुः — [4]**पुत्रादीति**। **आत्मीयस्य** आत्मीयत्वस्य। **ज्ञातिधनयोः** ज्ञातित्वधनत्वयोः। **विधिः** प्रतिषेध[5]प्रतियोगी, विकल्प इति यावत्॥

[१, २९७–२९८]

(**रत्नप्रकाशः**) **आख्याग्रहणं किमर्थमिति**। गणपाठसाधारणोऽयं प्रश्नः। 'स्वमज्ञातिधनयोः' इत्युक्तेऽपि ज्ञातिधनयोरवर्तमानस्यात्मात्मीयवाचिन एव ग्रहणं भविष्यतीति मन्यते। **ज्ञातिधन-पर्यायवाचीति**। पर्यायेण वक्ति तच्छीलः पर्यायवाची। ज्ञातिधनाभ्यां सह पर्यायवाचीत्यर्थः। मयूरव्यंसकादित्वात् समासः, ज्ञातिधनयोः पर्यायवाचीति षष्ठीतत्पुरुषो वा। **तस्य यथा स्यादिति**। तस्यैव प्रतिषेधो यथा स्यादित्यर्थः। **इह मा भूदिति**। [6]आत्मीयत्वं प्रवृत्तिनिमित्तमुपादाय ज्ञातिधनयोर्वर्तमानस्य स्वशब्दस्य प्रतिषेधो मा भूदित्येवमर्थमित्यर्थः। आख्याग्रहणबलेन तु ज्ञातित्वं धनत्वं वा प्रवृत्तिनिमित्तमुपादाय यदा स्वशब्दः प्रवर्तते तदैव तस्य प्रतिषेधो भवतीति भावः॥

[१, २९७–२९८]

(**नारायणीयम्**) **आमिनजिति**। ज्ञानादिवैभवेऽपि स्वामिपदप्रयोगान्न तत्र धनवाचित्वम्। **न स्वशब्द इति**। [7]एकदेशस्थस्यार्थद्वयाभावात्। **अत्रापीति**। निमित्तविशेषस्वरूपेणार्थद्वयसत्त्वस्याविरोधात्॥

अन्तरं बहिर्योगोपसंव्यानयोः १. १.३६.

[१, २९८-२९९]

(**लघुविवरणम्**) ननु [8]सूत्रेण जसि विभाषाविधानात् सप्तम्यां प्राप्तिर्नास्तीत्यत आह — **गणेति**। जसि नायं निषेधः, सत्यामपि संज्ञायां दोषाभावादित्यत आह — **इह त्विति**॥

[१, २९८–२९९]

(**विवरणम्**) **उपसंव्यानशब्द इति**। कर्मणि विवक्षिते द्वितीयव्याख्यानेन, करणे आद्यव्या-

---

[1] साधयितुम् — अ.
[2] अत्र — म.
[3] वृत्तित्वहेतुः — ऋ.
[4] प्रदीपे 'पुत्रादिभिः सामानाधिकरण्यात्' इत्यत्र 'पुत्रादिसामानाधिकरण्यात्' इति समस्ततयान्नंभट्टपाठ इति भाति।
[5] प्रतियोगिविकल्प इति — म, आ, इ, ऊ.
[6] आत्मीयत्वप्रवृत्ति — ब.
[7] एकदेशस्यार्थ — क.
[8] पूर्वसूत्रेण — ङ, ढ.

ख्यानेनेति विवेकः। ननु शाटकयुगेऽप्यल्पपरिमाणमन्तरीयं महापरिमाणमुत्तरीयमिति ज्ञायत एवेत्यत आह — **समानेति**। [1]अपरिहितशाटकयुगस्य बहिर्योगाभावात् तदर्थमुपसंव्यानग्रहणं स्यादित्यत उक्तम् — **यथेति**। आदिशब्दार्थमनपेक्ष्य भाष्यकारीयं वार्तिककारोक्तप्रयोजननिराकरणमित्यभिप्रेत्याह — **अन्ये त्विति**। **तृतीयचतुर्थयोरिति**। शरीरसंयुक्तयोरित्यर्थः। ननु जसि विधीयमानस्य विकल्पस्य का प्राप्तिः सप्तम्यामित्यत आह — **गणेति**॥

[१, २९८–२९९]

(**उद्द्योतनम्**) वार्तिकोपयोगितया बहिर्योगशब्दार्थमाह — **बहिरिति**। **उभयथापि स्मर्यते** इष्यते। **उपसंव्यानशब्दोऽपीति**। [2]वस्त्रद्वयं परिधीयते। तत्र कर्मव्युत्पत्तौ द्वितीयव्याख्यानुसारेण [3]बाह्येन योगाद् बहिर्योगोऽन्तरस्थस्य। करणव्युत्पत्तावाद्यव्याख्यानुसारेणानावृतदेशसंयोगाद् द्वितीयस्य बहिर्योग इति विवेकः। एतदभिप्रेत्याह — **सर्वथेति**। नन्वल्प[4]परिमाणमन्तरीयं [5]महापरिमाणमुत्तरीयमिति ज्ञातुं शक्यम्, अत आह — **समानेति**। **अपरिहित इति**। परिधाने विभागो ज्ञातुं शक्यते। तत्रापि [6]संज्ञाविकल्पसिद्धये उपसंव्यानग्रहणमित्यर्थः। नन्वपरिहितशाटकद्वयस्य बहिर्योगाभावात् तदर्थमुपसंव्यानग्रहणं स्यात्, अत आह — **यथेति**। वार्तिकोक्तप्रयोजननिरासो भाष्यकृत आदिशब्दमनपेक्ष्येत्याह — **अन्ये त्विति**। [7]त्रये तृतीयस्य, चतुष्टये चतुर्थस्य, शरीरसंयुक्तस्य॥ वस्त्रद्वयमेव[8] स्त्रीणां परिधानम्। तत्र 'बहिर्योगे' इत्येव सिद्धम्। यत्र क्वाचित्कं त्रयं चतुष्टयं तत्र तृतीयचतुर्थयोः 'अन्तराः शाटकाः इत्येव भवितव्यम्, न तु विकल्पः। वार्तिके [9]आदिपदमादेयार्थकमिति भगवदाशय इत्यपरे॥

ननु जसि विधीयमानविकल्पस्य [10]सप्तम्यामप्रवृत्तेः 'अपुरि' इति व्यर्थम्, अत आह — **गणेति**। तथा च पुरव्यतिरिक्तवाचकस्यैवान्तरशब्दस्य गणे पाठात् तस्य पुरवाचित्वे सर्वनामसंज्ञा क्वापि नास्तीत्यर्थः। नन्वन्तरशब्दस्य गणे पाठादन्तराशब्दस्य न संज्ञाप्रसङ्ग इति निषेधो व्यर्थः, अत आह — **लिङ्गविशिष्टेति**। [11]'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषयेत्यर्थः। इह 'अपुरि' इत्यस्यानुपयोगमाह — **इह त्विति**। ननु बहिर्योगग्रहणेनैव [12]पुरव्यावृत्तिः किं न स्यात्, अत आह — **पूरिति**। **अस्ति पुर इति**। प्राकारान्तरे प्राकारेण बाह्येन, प्राकाराद्बहिश्चेदनावृतदेशेनेत्युभयथा बहिर्योग इत्यर्थः॥

---

[1] निहितशाटक — ट.
[2] 'वस्त्रद्वयम्' इत्यतः प्राक् 'यत्र' इत्यधिकम् —म.
[3] 'बाह्येन' इत्यादि 'आद्यव्याख्यानुसारेण' इत्यन्तं नास्ति — उ.
[4] प्रमाणम् — अ.
[5] महाप्रमाणम् — अ.
[6] 'संज्ञा' इति नास्ति — अ, म, आ, उ, ऋ.
[7] त्रितये — अ.
[8] एवकारो नास्ति — अ.
[9] अङ्गसंज्ञासूत्रे 'प्रत्ययग्रहणं पदादावप्रसङ्गार्थम्' इति वार्तिके आदिग्रहणस्य प्रयोजनाभावादाद्यवयववाचित्वासंभवं मनसि निधायान्नंभट्टेन 'आदीयत इत्यादिः, पदं चासावादिश्च' इति विग्रहं कृत्वा 'पदे स्वीक्रियमाणे इत्यर्थः। पदे पर इति यावत्' इति व्याख्यायते। तद्वदत्रापि 'आदीयते' इत्यादेयार्थकत्वं स्वीकृत्य 'स्वीकृतशाटकयुगार्थम्' इत्यर्थपर्यवसानं कर्तव्यम्, न त्वाद्यवयववाचित्वमित्याशय इति भाति॥ आदिपदमादेयार्थमिति — अ; आदिपदमाधेयार्थमिति — म, आ; आदिपदमाधेयार्थकमिति — उ.
[10] सप्तम्यामप्राप्तेः — ऊ.
[11] परिभाषा ७२.
[12] पुरोऽपि व्यावृत्तिः — इ, ऊ.

[१, २९८–२९९]

(**रत्नप्रकाशः**) बहिरित्यनावृत उच्यते, तेन योगो यस्य तद् बहिर्योगम्। **उपसंव्यानम्** अधोंऽशुकम्। तयोर्वर्तमानमन्तरमिति शब्दस्वरूपमित्यन्वयः। **बहिर्योग इत्येव सिद्धमिति**। [1]उत्तरीयेणानावृतत्वाद् बहिष्पदवाच्येनान्तरीयस्य योगसत्त्वादेव तत्र प्रवर्तमानस्यान्तरशब्दस्यात्र ग्रहणं भविष्यतीति भावः। **शाटकयुगाद्यर्थमिति**। [न]व्यादीनि समानपरिमाणान्यपरिहितानि यत्र सन्ति तत्रापि 'इदमन्तरम्' इति व्यवहारदर्शनादुपसंव्यानत्वं प्रवृत्तिनिमित्तीकृत्य प्रवर्तमानस्याप्यन्तरशब्दस्य ग्रहणं यथा स्यादित्येवमर्थमिति भावः। तमाशयमजानन् बहिर्योगाभावात् तत्रान्तरशब्दप्रयोगो न स्यादित्युक्तमिति मत्वा बुद्धिपरिकल्पितबहिर्योगाश्रयेण तत्रापि निर्वाहो भविष्यतीत्याह— **अत्रापीति**। अस्य समाधानमाख्याग्रहणप्रयोजनकथनेनैवोक्तमित्युपेक्षितं भगवता। [2]**अपुरीति चेति**। चस्त्वर्थे, समुच्चयाभावात्। तदपि वचनं गणसूत्रशेषो द्रष्टव्यः, पुर्यर्थेऽन्तरशब्दादापा भवितव्यमिति ततः परस्य जसः शीभावाप्रसङ्गात्। **अन्तरायां पुरीति**। अनावृतदेशयुक्तायां पुरीत्यर्थः। **वाप्रकरण इति**। [3]'विभाषा जसि' इत्यारभ्यैतावत्पर्यन्तं वाप्रकरणम्, तत्रेत्यर्थः॥

[१, २९८–२९९]

(**नारायणीयम्**) **सर्वथेति**। उपसंवीतिकरणस्यानावृतदेशसंबन्धात्, उपसंवीयमानस्य तु बाह्यसंबन्धात्। शाटकयुगेऽपि बहिर्योगस्य बाह्ययोगस्य[च] सत्त्वात् तादर्थ्यं कथमुपसंव्यानग्रहणस्येत्यत आह — **अपरिहित इति**। प्रमाणवशान्निश्चयमाशङ्क्याह — **समानेति**। ननु विवेकिनोऽन्तरीयत्वादियोग्यताज्ञानेऽप्यप्रावरणदशायां बहिर्योगत्वं कथमित्यत आह — **यथेति**। **बहिर्योगाभावादिति**। उपसंवीतत्वं तु तस्याप्यस्ति। अन्तरशब्दपाठे कथमन्तरा[4]शब्दे प्राप्तिः, अत आह — **लिङ्गेति**। पुरः कथं बहिर्योगः, तत्राह — **पूरिति**। [5]बाह्येन प्राकारादिनानावृतदेशेन च यथायोगं द्विविधः पुरोऽप्यस्ति योगः॥

स्वरादिनिपातमव्ययम्. १. १. ३७.

[१, २९९–३००]

(**लघुविवरणम्**) [6]भाष्ये **गरीयसा न्यासेनेति**। अस्यायमर्थोऽपि विवक्षितः। निपातसंज्ञाया अभावादित्यर्थः। दोषान्तरमाह — **अव्ययसंज्ञायामेवेति**॥

---

[1] अनावृतत्वाद्बहिष्पदवाच्येनोत्तरीयेणान्तरीयस्य योगसत्त्वादित्यन्वयः।

[2] 'अपुरीति वक्तव्यम्' इति वार्तिके 'अपुरीति च वक्तव्यम्' इति चशब्दघटितवार्तिकपाठो रत्नप्रकाशकृदभिमतः। अयं पाठान्तरत्वेन निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

[3] पा. सू. १. १. ३२.

[4] शब्दप्राप्तिः — क.

[5] बाह्यस्येतीह प्राकारादिना — क.

[6] 'भाष्ये' इत्यादि 'अभावादित्यर्थः' इत्यन्तं नास्ति — ण.

[१, २९९–३००]

(**विवरणम्**) **असत्त्ववचनत्वात्** अद्रव्यवचनत्वात्। **अनेकेति**। शक्तियोगित्वं च द्रव्यस्यैवेति भावः। भाष्ये **असत्त्ववचनानां च** अव्ययसंज्ञेष्यत इति शेषः। ननु सत्त्ववाचित्वमपि स्वरादीनामित्युक्तत्वात् 'निपातसंज्ञैव' इत्ययुक्तमित्यत आह — **प्रागिति**। **किमोऽदिति**। सर्वेषामप्यव्ययसंज्ञासंज्ञिनां तद्धितादीनां [1]स्वरादिषु पाठस्य वक्ष्यमाणत्वादित्यर्थः। ननु पूर्वपदप्रकृतिस्वरः समासे, स च निपातेषु गतिसंज्ञाभावे प्रादीनामेव, तथा च नञ्कुप्रादीनामिति परिगणनं करिष्यत इत्यत आह — **अव्ययेति**॥

[१, २९९–३००]

(**उद्द्योतनम्**) **साधनप्रधानं** कारकशक्तिप्रधानम्। क्रियाशक्त्योरद्रव्यत्वमित्यर्थः। **असत्त्ववचनत्वात्** अद्रव्यवचनत्वात्। **अनेकेति**। शक्तियोगित्वं द्रव्यस्यैवेति भावः। भाष्ये **असत्त्ववचनानां च**[2] अव्ययसंज्ञेष्यत इति शेषः। ननु स्वरादीनां सत्त्ववाचित्वमपीत्युक्तत्वात् 'न निपातसंज्ञैव' इत्ययुक्तम्, अत आह — **प्रागिति**। स्वरादिष्वेकाचामभावान्न प्रगृह्यसंज्ञाप्रसङ्गः, अत आह — **किमोऽदिति**। सर्वेषामव्यय[3]संज्ञासंज्ञिनां [4]तद्धितादीनां स्वरादिषु पाठस्य वक्ष्यमाणत्वादित्यर्थः। भाष्ये **नञ्कुनिपातानामिति**। [5]"तत्पुरुषे तुल्यार्थ" इत्यत्राव्ययग्रहणे इदं परिगणनं क्रियते। तत्र निपातसंज्ञाया अभावे चादीनां पृथक् [6]प्रत्येकग्रहणप्रसङ्गाद् गौरवं स्यादित्यर्थः। ननु पूर्वपदप्रकृतिस्वरः समासे, स च निपातेषु गतिसंज्ञकानां प्रादीनामेव, तथा च [7]"नञ्कुगतीनाम्' इति परिगणनं करिष्यते, अत आह — **अव्ययेति**। तथा च 'तस्मात्' इति भाष्ये उपसंहारो युक्त इत्यर्थः॥

[१, २९९–३००]

(**रत्नप्रकाशः**) चादिष्वेव स्वरादीन् पठित्वा 'निपातोऽव्ययम्' इत्येव कर्तुमुचितम्, लाघवादिति मन्यमानः पृच्छति — **किमर्थमिति**। **सत्त्ववचनानामिति**। स्वर्, स्वस्ति, निकषा, समया, आरात्, साचि, सामि, दुष्ठु, सुष्ठु, अर्वाक्, पृथक्, मनाक्, ईषत्, संवत्, साक्षात्प्रभृतीनामित्यर्थः। एतद्वाच्यं हीदंशब्देन पराम्रष्टुं शक्यते। उक्तं हि हरिणा —

"वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः"॥ इति।

एतेन 'स्वस्ति वाचयति स्वः पश्येति क्रियासंबन्धेऽनेकशक्तिदर्शनात् सत्त्ववाचित्वनिर्णयः' इति निरस्तम्। क्रियायां कारकत्वेनान्वयमात्रेण सत्त्वत्वकल्पनायोगात्। अन्यथा चादिगणे पठितानां [8]तेमेप्रभृतीनां 'ते कृतम्, मे कृतम्' इत्यादौ करणत्वादिनान्वितार्थानां सत्त्ववचनतापत्त्या निपातत्वं

---

[1] स्वरादिपाठस्य — अ.
[2] चशब्दो नास्ति — उ.
[3] 'संज्ञा' इति नास्ति — अ, इ, ऋ.
[4] तद्धितानां — म, आ.
[5] पा. सू. ६. २. २.
[6] प्रत्येकं ग्रहण — अ.
[7] नञ्कुगतीनामपि परिगणनं — म, आ.
[8] वाक्यपदीयम्. ३. ४.३.
[9] विभक्तिप्रतिरूपकत्वेन चादिगणपठितत्वं बोध्यम्।

न स्यात्। **असत्त्ववचनानां चेति**। पुनर्सनुतर्प्रभृतीनाम्। **न निपातसंज्ञैवेति**। [1]"प्राग्रीश्वरान्निपाताः' 'स्वरादीनि' [2]"चादयोऽसत्त्वे' इत्येवं सूत्रन्यासः कुतो न कृत इति भावः। **स्वरादीनामप्येकाचामिति**। स्वरादिष्वेकाचो न सन्तीत्योदन्तपरतया कथंचिदिदं नेयम्। तत्र हि 'मिथो' इत्योदन्तो वर्तते। एतेन "[3]'किमोऽत्' इत्यत् [4]"दक्षिणादाच्' इत्याच् केन्प्रभृतयस्तु कृत एकाचः सन्तीति भावः" इति निरस्तम्। कृत्तद्धितान्तानामेवाव्ययसंज्ञाया इष्टत्वेन कृतां तद्धितानां च स्वरादित्वेऽपि निपातसंज्ञापादनस्यायोगात्। अत एव "अव्ययसंज्ञायामेव सत्याम् 'अव्ययमेकाजनाङ्' इति सूत्रं कर्तव्यम्। ततश्चात्प्रभृतीनामपि प्रगृह्यसंज्ञाप्रसङ्गः" इत्यपि निरस्तम्। यदप्युक्तम् 'अथ चादय एकाजनाङिति क्रियते तदा चादीनामसत्त्ववचनत्वं विशेषणमलभ्यम्' इति। तदपि न, [5]"प्राग्रीश्वरान्निपाताः' इत्यनेनैव निपातसंज्ञां विधाय [6]"चादयोऽसत्त्वे' [7]"प्रादयः' इत्यनेनाद्रव्यार्था एव चादयः प्रादयश्च ज्ञेया इति व्याख्येयत्वेनाव्ययसंज्ञायामपि तथैव व्याख्याने चादीनामसत्त्वविशेषणतायाः सुलभत्वात्। **परिगणनं कर्तव्यं स्यादिति**। अनास्थयैतदुक्तम्, 'नञ्कुस्वरादीनाम्' इत्युक्तेऽपि तत्र निर्वाहात्। तस्मात् प्रगृह्यसंज्ञायामस्मदुक्त एव दोषोऽस्मिन् पक्षेऽपि ज्ञेयः। यदि "ओत्' इत्यत्र 'अस्वरादिः' इत्युच्यते तर्ह्यव्ययसंज्ञया निर्वाहो भवत्येव। अस्मिन् पक्षे 'चादिराद्युदात्तः' इति कर्तव्यम्। [8]"स्वादिष्वसर्वनामस्थाने' इत्यत्रादिशब्देन कप्रत्ययपर्यन्तग्रहणवत् तत्रादिशब्देन [9]"अधिरीश्वरे' इत्यधिशब्दपर्यन्तग्रहणसंभवात्॥

[१, २९९–३००]

(**नारायणीयम्**) स्वरादीनां चादिषु पाठे सत्त्ववचनानां कथमव्ययसंज्ञेत्याशङ्क्य न सत्त्ववचनाः सन्ति स्वरादय इत्याह — [10]**स्वरादिष्विति**। सत्त्ववचनानामव्ययत्वसिद्ध्यर्थं [11]चादिष्वपाठ इत्युक्तम्। तत्रोक्तयुक्त्या सत्त्ववचनाभावमाशङ्क्याह — **स्वस्तीति**। शक्तिसंबन्धात् सत्त्ववचनतानुमानात् स्वरादिद्वैविध्यं प्रायिकमिति भावः। **अनेकेति**। 'दोषाभूतमहः' इति कर्तृत्वमपि दृश्यत इत्यनेकग्रहणम्। ननु [12]'यन्न व्येति तदव्ययम्' इति शक्त्यादिराहित्यमव्ययलक्षणम्, तत्कथमव्ययस्य प्रायिकी[शक्तिः]। केवलनिपातसंज्ञाश्रयणे स्वरादयश्चादिषु किं पाठ्या उत पृथक्पाठेन पृथगेव संज्ञाविधिः। नाद्यः, उक्तदोषात्। अन्त्ये तु यथान्यासात् किं लाघवमित्यपेक्षायामस्त्यव्ययसंज्ञाकरणं[13] लाघवमित्यभिसंधायाह — **प्रागिति**। स्वरादिग्रहणं पञ्चसूत्र्युपलक्षणम्। एकाच्स्वरादयः क इत्यपेक्षायामाह — **किम इति**। 'प्राग्रीश्वरादव्ययम्' इत्युक्त्वा स्वराद्यव्ययीभावान्तमनुक्रमणीयम्, ततः 'चादयोऽसत्त्वे' इत्यादीनि पाठ्यानीत्याशङ्क्य तस्याशक्यत्वमुक्तम्। अशक्यत्वे स्वयं हेतुमाह – **अव्ययेति**। परिगणनं तु चादिग्रहणेनापि कर्तुं शक्यम्। चादिग्रहणेन चादय [14]उपनिष-

---

[1] पा. सू. १. ४. ५६.
[2] पा. सू. १. ४. ५७.
[3] पा. सू. ५. ३. १२.
[4] पा. सू. ५. ३. ३६.
[5] पा. सू. १. ४. ५६.
[6] पा. सू. १. ४. ५७.
[7] पा. सू. १. ४. ५८.
[8] पा. सू. १. १. १५.
[9] पा. सू. १. ४. १७.
[10] पा. सू. १. ४. ९७.
[11] स्वरादीति — क.
[12] चादिषु पाठः — क.
[13] तद्धितश्चासर्वविभक्तिरिति सूत्रे महाभाष्ये उदाहरिष्यमाणाथर्वणिकी श्रुतिः।
[14] अकरणमिति छेदः।
[15] 'जीविकोपनिषदावौपम्ये' इत्येतदन्ता इत्यर्थः।

त्पर्यन्ता गृह्यन्त इति व्याख्यास्यते। **अलभ्यमिति**। असत्त्वग्रहणस्य चादिपाठविशेषणत्वे लभ्यमेतदित्याहुः। प्रतिपत्तिगौरवप्रसङ्गात्तु नैतट्टीकाकृताश्रितम्॥

तद्धितश्चासर्वविभक्तिः १. १. ३८.

[१, ३००–३०३]

(**लघुविवरणम्**) नास्ति [१]विभक्तिर्निमित्तमस्येति [२]विज्ञायमाने [३]'समर्थानाम्' इत्यधिकारात् सामर्थ्यं च विभक्त्यन्तस्येति नानाजोरपि विभक्तिनिमित्तत्वादयुक्तिरित्यत आह — **अश्रूयमाणेति**। ननु विभक्त्युत्पत्तेः प्राक् सर्वस्यापि [४]प्रातिपदिकस्याविभक्तिकत्वादव्ययसंज्ञा प्राप्नोतीत्यत आह — **प्रयोग इति**। **न चेति**। श्रूयमाणविभक्तिकत्वात्यन्ताभावो विवक्षित इति भावः। वाशब्दस्यार्थ एवार्थो यस्येति बहुव्रीहिः॥

[१, ३००–३०३]

(**विवरणम्**) **केवलस्येति**। तथा च तद्धितान्ताद्विहितः सुबव्ययान्न विहित इति लुङ् न स्यात्। न चाव्ययात् परस्य स शक्यो विज्ञातुम्, अत्युच्चैसावित्यत्रापि प्रसङ्गादिति भावः। ननु न सर्वा विभक्तिरस्मादित्युक्तौ विना नानेत्यादावपि सिद्धा सूत्रेणैव संज्ञेत्यत आह — **तत्रेति**। **विना [५]नानेत्यस्येति**। [६]'अव्ययादाप्सुपः' इति लिङ्गाच्चाव्ययेभ्यः सर्वा विभक्तयः [७]कारकाद्यर्थाभावेऽप्युत्पद्यन्त इति भावः। ननु [८]नानाजोरविद्यमानविभक्ती विनञौ न निमित्तम्, [९]'समर्थानाम्' इत्यधिकारात् सुबन्तत्वे च सामर्थ्यादित्यत आह — **अश्रूयमाणेति**। अर्थ[१०]विशेषानपेक्षत्वम् **उत्सर्गत्वम्**। ननु तथापि सर्वविभक्त्येकवचनमात्रोत्पत्तावपि सर्वप्रकारविभक्तिकत्वेनासर्वविभक्तित्वाभावान्न स्यादव्ययसंज्ञेत्यत आह — **क्रमव्यतिक्रम इति**। **असर्वा विभक्तिरिति**। प्रथमैकवचनमात्रमित्यर्थः। **अविशेषेणेति**। [११]'द्व्येकयोर्द्विवचनैकवचने' इत्यादिनैकवाक्यत्वमनपेक्ष्येत्यर्थः। **उत्पन्नानां नियमः** तुल्यजातीयापेक्ष इति शेषः। **विशेषस्येति**। [१२]'विनञ्भ्याम्' इत्यादौ [१३]नियतविभक्तेरित्यर्थः। ननु 'त्रलादीनां च' इत्युक्त्वा प्राक्तनस्य तसिल उदाहृतिरयुक्तेत्यत आह — **आदिशब्दस्येति**। नन्वितराभ्योऽपि दृश्यन्ते चेत् कथं तसिलादिषु सर्वविभक्तित्वासर्वविभक्तित्वविवेक इत्यत आह — **भवदादीति**। ननु विनेत्यादावपि [१४]पदत्वाय [१५]विभक्त्युत्पत्तेरविभक्तिकत्वाभावान्न स्यादव्ययसंज्ञेत्यत आह — **प्रयोग इति**। प्रयोगे श्रूयमाणविभक्तित्वात्यन्ताभावो विवक्षित इत्यभिप्रेत्याह — **न**

---

[१] विभक्तिनिमित्तम् — ड, ढ, ण.
[२] अस्य 'अयुक्तिः' इत्यनेनान्वयः।
[३] पा. सू. ४. १. ८२.
[४] प्रातिपदिकस्याविभक्तित्वात् — ड, ढ.
[५] नानेत्यत्रेति — अ, ट.
[६] पा. सू. २. ४. ८२.
[७] एकाद्यर्थाभावेऽपि — अ.
[८] नानाजोरपि विद्यमान — च, छ, ट.
[९] पा. सू. ४. १. ८२.
[१०] विशेषानपेक्षितत्वम् — छ; विशेषानपेक्षितत्वात् — च.
[११] पा. सू. १. ४. २२.
[१२] पा. सू. ५. २. २७.
[१३] नियमविभक्तेः — च; अनियतविभक्तेः — अ.
[१४] पदान्तत्वाय — च, छ.
[१५] विभक्त्युत्पत्तितोऽविभक्तिकत्वाभावात् — अ.

चेति। नाविभक्तित्वं स्वाभाविकम्, [1]'अव्ययादाप्सुपः' इत्यस्य वैयर्थ्यप्रसङ्गादित्यभिप्रेत्याह — **अव्ययत्वादिति**। **वाशब्दः** वार्तिककृता प्रयुक्त इति शेषः। भाष्यकारस्तु 'यदि पुनरविभक्तिः' इत्यस्यानन्तरमेतदपि पक्षान्तरमुपन्यस्य क्रमेण पक्षद्वयं दूषणीयमिति प्रदर्शनाय 'अथवा अलिङ्गम्' इत्याद्यवोचत्। वार्तिकमवतार्य चाशङ्कोत्तरत्वेन तद्व्याख्यातुम् 'अथवा' इत्यनेन 'अविभक्तिरव्ययम्' इत्यत्रोक्तेतरेतराश्रयं व्यावर्त्य 'अलिङ्गम्' इत्यादिना शङ्कां प्रदर्श्य 'एवमपि' इत्यादिना वार्तिकं व्याख्यदिति द्रष्टव्यम्। व्यावर्तनप्रकारमितरेतराश्रयस्याह — **अलिङ्गसंख्यत्वस्येति**। **शास्त्रादेवेति**। [2]'सदृशं त्रिषु लिङ्गेषु' इत्यादिकादित्यर्थः। भाष्यव्याख्या — ननु प्रातिपदिकत्वे समानेकेषांचिच्च[3] स्वरादीनां द्रव्यवाचित्वे कथं वृक्षाद्यभिधेयस्य लिङ्गसंख्यादियोगो न स्वराद्यर्थस्येत्यत आह — **तद्यथेति**। **वाशब्दार्थ इति**। अर्थादित्यर्थः। ननु [4]'प्रत्नपूर्व' इत्ययं थाल् न परिगणितमध्यवर्तीत्यव्याप्तिरित्यत आह — **य एवेति**। [5]**आम्** [6]'किमेत्' इत्यनेन। [7]'अमु च च्छन्दसि' इत्यनेनाम्। ननु तसिः शस्प्रभृतिष्विति मुधा तस्य पृथगुपादानमित्यत आह— **तसिरिति**। यथायं शस्प्रभृतिषु, एवं तदनन्तर्भूतोऽप्यस्तीति प्रतिपादनाय [8]'प्रतियोगे पञ्चम्यास्तसिः' उदाहृतः। न च थालिव य एव शस्प्रभृतिषु स एव [9]'तेनैकदिक्, तसिश्च' इति शक्यते वक्तुम्, स्वार्थिकत्वास्वार्थिकत्वाभ्यां भेदादिति भावः। 'कृत्वसुच्' इति वक्तव्ये कृत्वोऽर्थग्रहणस्य प्रयोजनमाह — **कृत्वोऽर्थ इति**। **सुच्** [10]'द्वित्रिचतुर्भ्यः' इत्यनेन विहितः। [11]'विभाषा बहोर्धाविप्रकृष्टकाले' इत्यनेन विहितो धाप्रत्ययः। भाष्ये वतिर्यद्यप्यविशेषेणोक्तः, तथापि [12]'उपसर्गाच्छन्दसि' इति विहितवर्जमभिप्रेतः। तस्य कारकशक्तिमदभिधायित्वेन [13]द्रव्यधर्मलिङ्गसंख्यायोगित्वात् तदर्थस्य 'सदृशं त्रिषु' इत्यादिवक्ष्यमाणावयवार्थानुगत्यभावादिति द्रष्टव्यम्॥

[१, ३००–३०३]

(**उद्द्योतनम्**) वार्तिकावतारोपयोगितया सूत्रार्थमाह — **इहेति**। [14]**केवलेति**। तथा च तद्धितान्ताद्विहितः सुबव्ययान्न विहित इति लुङ् न स्यादिति भावः। **वृत्तिकारेण** वार्तिकात् पूर्ववृत्तिकारेण। **न दोषः** विनानानेत्यादौ [15]नाव्याप्तिः। **असर्वा विभक्तिराश्रिता** न सर्वा विभक्तिराश्रिता, किं त्वेकैवेति यावत्। तादृशमुदाहरति — **यथेति**। अस्मिन् सूत्रार्थे स्वयमतिव्याप्तिमप्याह — **अतिव्याप्तिश्चेति**। यथाश्रुतेऽतिप्रसङ्गं वक्ष्यन् व्याचष्टे — **अश्रूयमाणेति**। [16]'अव्ययादाप्सुपः' इति [17]लुग्विधानादश्रूयमाणविभक्तिकमव्ययम्। अव्ययग्रहणे व्युत्पत्तिकथनमेतत्। 'उप-

---

[1] पा. सू. २. ४. ८२.
[2] अस्मिन्नेव सूत्रे भाष्य उपरि वक्ष्यत इदं वचनम्। प्रणवोपनिषत् १५.
[3] चकारो नास्ति — अ.
[4] पा. सू. ५. ३. १११.
[5] प्रदीपे 'अम् आम्' इत्यत्र 'आम् अम्' इति पाठक्रमः चौखाम्बामुद्रिते मद्रपुरीमुद्रिते च।
[6] पा. सू. ५. ४. ११.
[7] पा. सू. ५. ४. १२.
[8] पा. सू. ५. ४. ४४.
[9] पा. सू. ४. ३.११२, ११३.
[10] पा. सू. ५. ४. १८.
[11] पा. सू. ५. ४. २०.
[12] पा. सू. ५. १. ११८.
[13] विविधलिङ्ग — च, छ.
[14] प्रदीपे 'केवलस्य प्रत्ययस्य ग्रहणम्' इत्यत्र 'केवलप्रत्ययस्य ग्रहणम्' इति समस्ततयान्नंभट्टपाठ इति भाति।
[15] नानुपपत्तिः — म, उ.
[16] पा. सू. २. ४. ८२.
[17] लुग्विधानादविभक्तिकम् — अ.

कुम्भाद् गतः, इतः' इत्यादौ विभक्तेरपि श्रवणादेतत्सूत्रविषयाव्यय एवायं नियमो विवक्षितः। **तन्निमित्तस्य** अव्ययत्वनिमित्तस्य। **यस्य** नानाजादेः। **इष्यते** अव्ययत्वम्। यथाश्रुतं निरस्यति — **न त्विति**। [1]'वेः शालच्छङ्कटचौ' इत्यत्रापि विभक्त्यनपेक्षणात्। **एकवचनमिति**। [2]स्वादिविधेः [3]'द्व्येकयोः' इत्यादेश्चैकवाक्यत्वेऽव्ययस्यैकत्वाद्यभावेनाविभक्तिकत्वनिरासायैकवचनमेकत्वनिरपेक्षमेव सामान्येन [4]विधीयते, [5]द्वित्वबहुत्वयोर्द्विवचनबहुवचने। तथा च संख्यानिरपेक्षमेकवचनमव्ययादपि स्यादित्यर्थः। नन्वनियमात् सर्वैकवचनविभक्तिप्रसक्तौ[6] सर्वविभक्तित्वमेव स्यात्, अत आह — **क्रमेति**। तथा च सुप्रत्यय एक एव भवतीत्यर्थः। **अविशेषेणेति**। वाक्यभेदेन स्वादीनां सामान्येन विधाने पश्चात् [7]'द्व्येकयोः' इत्यादिना नियमः क्रियते — द्वित्वे 'द्विवचनमेवेत्यादिः। तेनाव्ययादपि सर्वविभक्त्युत्पत्तिरित्यर्थः। **सर्वा इति**। यद्यपि पदत्वार्थं प्रथमैकवचनमात्रमुत्पद्यते प्राथम्यात्, न त्वन्यानि, अनुपयोगात्, समुच्चयस्य सर्वेषां [8]प्रातिपदिकपरत्वासंभवेन चायोगात्, तथाप्येकत्वाद्यनपेक्षणात् संभावनामात्रेण ग्रन्थगमनिकामात्रमेतदिति [10]ज्ञेयम्। **विशेषस्य** विभक्तिविशेषस्य। 'त्रलादीनाम्' [11]इत्युक्त्वा ततः पूर्वस्य तसिल उदाहरणमयुक्तम्, अत आह — **आदिशब्दस्येति**। ननु [12]भवदादियोग एव [13]'इतराभ्यः' इति प्रवृत्तेरन्यत्राव्याप्तिशङ्का नास्ति, अत आह — **भवदादीति**। दृशिग्रहणाद् भवद्दीर्घायुर्देवानांप्रियायुष्मद्योग एवेष्यते। ननु [14]पदत्वायाव्ययादपि विभक्तेरावश्यकत्वादविभक्तिरित्ययुक्तम्, अत आह — **प्रयोग इति**। यस्य क्वापि प्रयोगे विभक्तिर्न श्रूयते तत्त्वं विवक्षितमित्यभिप्रेत्याह — **न चेति**। [15]इतरेतराश्रयत्वं स्फुटयति — **अव्ययत्वादिति**। वार्तिकस्थवाशब्दस्य पूर्ववार्तिकाविरुद्धमर्थमाह — **अविभक्तिरिति**। **दूषितत्वात्** वार्तिककृतेतरेतराश्रयत्वेनेत्यर्थः[16]। स्वव्याख्यानानुसारेण भाष्यं संगमयितुमाह — **अलिङ्गेति**। भाष्ये 'अथवा' इत्येतन्न वार्तिकस्थवाकारव्याख्यानार्थम्। किं तूक्तेतरेतराश्रयव्यावृत्त्यर्थम्। तस्याभिप्रायो 'लौकिकत्वात्' इत्यनेनोक्तः। निरासाभिप्रायमाह — **अर्थमपीति**। **कश्चित्** मध्यमोऽधमश्च। तं प्रतीतरेतराश्रयत्वमपरिहार्यमित्यर्थः। [17]'लिङ्गमशिष्यम्' इति न्यायेनालिङ्गासंख्यत्वयोरपि लोकसिद्धत्वान्मन्दमध्यमयोरपि लिङ्गवदलिङ्गज्ञानमपि लोकादेव भविष्यतीति नेतरेतराश्रयत्वमिति 'नेदं वाचनिकम्' इति भाष्यार्थः। प्रातिपदिकत्वाविशेषेऽपि कस्यचिल्लिङ्गसंख्यायोगः कस्यचिन्नेत्येतदुपपादयति — भाष्ये **तद्यथेति**। 'सिद्धं तु' इत्यस्य 'पाठाद्वा' इति व्याख्यानायोगं परिहरति — **वार्तिककारस्येति**। ननु [18]'प्रत्नपूर्व' इति थाल् न परिगणितान्तःपातीति [19]'प्रत्नथा' इत्यव्ययत्वं न स्यात्, अत आह — **य एवेति**। प्रत्नादिसूत्रे इवार्थः पूर्वत्र प्रकारार्थ इत्यर्थभेदेऽपि प्रत्यय एक

---

[1] पा. सू. ५. २. २८.
[2] 'स्वादिविधेः' इत्यादि 'एकत्वनिरपेक्षमेव' इत्यन्तं नास्ति — ऋ.
[3] पा. सू. १. ४. २२.
[4] 'विधीयते' इत्यादि 'स्वादीनां सामान्येन' इत्यन्तं नास्ति — उ.
[5] द्वित्वादिवचनाद् द्विबह्वोर्द्विवचनबहुवचने — अ, म, ऋ.
[6] प्रसक्त्या — म, आ.
[7] पा. सू. १. ४. २२.
[8] द्विवचनमित्यादिः — म.
[9] प्रातिपदिकात्परत्वासंभवेनेत्यर्थः।
[10] विज्ञेयम् — अ, म.
[11] इत्युक्त्या — उ.
[12] भवदादिप्रयोग एव — ऊ.
[13] पा. सू. ५. ३. १०.
[14] पदत्वादव्ययादपि — उ, ऋ.
[15] इतरेतराश्रयं स्फुटयति — अ.
[16] इतरेतराश्रयेणेत्यर्थः — आ, इ, उ, ऊ, ऋ.
[17] महाभाष्यम् २. १. ३६.
[18] पा. सू. ५. ३. १११.
[19] 'प्रत्नथेति' इति नास्ति — म, आ, इ, उ, ऊ, ऋ.

एव, प्रत्यभिज्ञानादिति भावः । मान्तमाह — [1]**आमिति**। [2]"किमेत्तिङव्यय' इत्याम्, [3]"अमु च च्छन्दसि' इत्यम्। ननु शस्प्रभृतिष्वेव तसिरिति पुनस्तसिग्रहणं व्यर्थम्, अत आह — **तसिरिति**। यथायं शस्प्रभृतिषु तथा तदनन्तर्भूतोऽप्यस्तीति प्रतिपादनाय प्रतियोगे तसिरुदाहृतः। [4]यद्यपि प्रत्नादिथाल्वत् दिक्तसिरपि शस्प्रभृतिस्थ एवेति वक्तुं शक्यम्। न च स्वार्थिकत्वास्वार्थिकत्वाभ्यां भेदः, [5]थाल्यप्यर्थभेदस्य तुल्यत्वात्। तथाप्यर्थभेदेन भेदमङ्गीकृत्य स्थितस्य गतिरुक्तेति ज्ञेयम्। 'कृत्वसुच्' इति वक्तव्ये 'कृत्वोऽर्थः' इत्यस्य प्रयोजनमाह — **कृत्वोऽर्थ इति**। [6]"संख्यायाः' इति कृत्वसुच्। [7]"द्वित्रिचतुर्भ्यः सुच्' इति सुच्। [8]"विभाषा बहोर्धा' इति धा। भाष्ये [9]"उपसर्गाच्छन्दसि धात्वर्थे' इति विहितवतिव्यतिरिक्तवतिरेव ग्राह्यः, तस्य कारकशक्तिमद्द्रव्याभिधायित्वेनाव्ययत्वाभावादित्याहुः[10] ॥

[१, ३००–३०३]

(**रत्नप्रकाशः**) इह संज्ञाविधावपि प्रत्ययग्रहणे तदन्तस्य ग्रहणं भवति, असर्वविभक्तिरिति विशेषणसामर्थ्यात्, ज्ञापकसिद्धस्यासार्वत्रिकत्वाच्च। एतेन [11]"'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वाचनिकस्तदन्तविधिरस्तीति तदन्तस्याव्ययसंज्ञा विज्ञायते" इति निरस्तम्। प्रयोजनवार्तिकानां [12]"तस्य च' इति शेषे उपयुक्तानां स्वतो विधायकत्वासंभवात्। तेषां विधायकत्वेऽपि डतरडतमतयानां ग्रहणे तेनैव तदन्तविधौ सति परमकतरादेः सर्वनामसंज्ञाया अप्रसङ्गाच्च। [13]"स्वौजसमौट्' इति सूत्रेण विहितानां सर्वासामेव विभक्तीनां [14]"अव्ययादाप्सुपः' इति लुग् जायते। विभक्त्यन्ताच्च न कापि विभक्तिर्जायत इति सर्वा विभक्तयो यस्मात् सर्वविभक्तिः, तदन्योऽसर्वविभक्तिरित्यर्थो ग्रहीतुं न शक्यते। किं तु सर्वा विभक्तयो यस्य तद्धितस्योत्पत्तौ निमित्तं स सर्वविभक्तिः, तद्भिन्नोऽसर्वविभक्तिरिति। तथा चाव्याप्तिर्भवतीत्याह — **असर्वविभक्ताविति**। एतेन "तत्र वृत्तिकारेण व्याख्यातम् — असर्वा विभक्तिर्यस्य सोऽसर्वविभक्तिरिति। तत्र यदायमर्थः — यस्य तद्धितान्तस्यासर्वा विभक्तिः कार्या, यस्मान्न सर्वा विभक्तिरुत्पद्यत इत्यर्थः, तदा न दोषः। यदा तु यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनासर्वा विभक्तिराश्रिता सोऽसर्वविभक्तिः। यथा [15]"सर्वैकान्यकियत्तदः' इति दाप्रत्ययस्य सप्तम्येवोत्पत्तिनिमित्तमिति। अस्मिंस्तु सूत्रार्थे विना नानेत्यव्ययसंज्ञा न सिध्यति। न हि [16]"विनञ्भ्याम्' इत्यत्र प्रतिनियता काचिद्विभक्तिराश्रितेत्याह — **असर्वविभक्ताविति**।" इति निरस्तम्। आधुनिकवृत्तिकारप्रदर्शितविग्रहवाक्यस्य भाष्यकृन्निदर्शित-

---

[1] प्रदीपे 'अम्, आम्' इत्यत्र 'आम्, अम्' इति पाठः चौखाम्बामुद्रिते मद्रपुरीमुद्रिते च दृश्यते। अयं पाठक्रमोऽन्नंभट्टेनाश्रितः। एवमेव विवरणशब्दकौस्तुभयोश्च। कौमुद्यामुद्द्योते च 'अम्, आम्' इति क्रमो दृश्यते।
[2] पा. सू. ५. ४. ११.
[3] पा. सू. ५. ४. १२.
[4] ननु प्रत्नादि — उ.
[5] थालोऽप्यर्थ — अ, आ, ऋ.
[6] पा. सू. ५. ४. १७.
[7] पा. सू. ५. ४. १८.
[8] पा. सू. ५. ४. २०.
[9] पा. सू. ५. १. ११८.
[10] विवरणकारा इत्यर्थः।
[11] का. वा. १. १. ७२–८.
[12] का. वा. १. १. ७२–१५.
[13] पा. सू. ४. १. २.
[14] पा. सू. २. ४. ८२.
[15] पा. सू. ५. ३. १५.
[16] पा. सू. ५. २. २७.

सिद्धान्तानुसारिताया एवौचित्येन तदवष्टम्भेन पूर्वपक्षवार्तिकावतरणानौचित्यात् । तदुपष्टम्भेन तदवतरणे 'सर्वविभक्तिर्ह्यविशेषात्' इति पूर्ववार्तिकशेषस्य 'त्रलादीनां चोपसंख्यानम्' इति द्वितीयवार्तिकस्य चासंगतत्वापत्तेश्च। असर्वा विभक्तयो यस्य [1]'निमित्तं तस्मिन्निति, विभक्तिविशेषो निमित्तं यस्य स विभक्तिनिमित्तः, तदन्यस्येत्यर्थः। एतेन 'अश्रूयमाणविभक्तिकमव्ययमविभक्तीत्युच्यते। तन्निमित्तस्य यस्येष्यते, न च प्राप्नोति, तस्योपसंख्यानं कर्तव्यम्, न तु सामान्येनाविभक्तिनिमित्तस्य संज्ञा विधेया, विशालविशङ्कटादीनामपि प्रसङ्गात्' इति निरस्तम्। अविभक्तिनिमित्तशब्दस्योत्तरग्रन्थाननुगुणतादृशक्लिष्टकल्पनाया अयोगात्। महत्याव्ययसंज्ञया वारणीयाया वार्तिककारानुद्भाविताया अतिव्याप्तेरुद्भावनानौचित्याच्च। **किं पुनः कारणं न सिध्यतीति**। विभक्तिनिमित्तेतरस्य सर्वविभक्तिनिमित्तेतरत्वावश्यंभावादिति मन्यते। एतेन 'एकवचनमुत्सर्ग इति वचनात् क्रमव्यतिक्रमे कारणाभावाद् विना नानेत्यत्राप्यसर्वा विभक्तिरुत्पत्तौ निमित्तमिति प्रश्नः' इति निरस्तम्। प्रौढिमाश्रित्य 'एकवचनमुत्सर्गः करिष्यते' इति भाष्यकारैरुत्प्रेक्ष्यमाणस्यापूर्ववचनत्वाभावस्य वक्ष्यमाणत्वात्। क्रमातिक्रमे विनिगमनाविरहस्यैव कारणत्वाच्च। **सर्वविभक्तिरिति**। सुबन्तादेव तद्धितोत्पत्तिर्न तु प्रातिपदिकादिति सिद्धान्तादव्ययस्य सर्वविभक्त्यन्तत्वाद् विशिष्य कस्याश्चिद्विभक्तेर्निमित्ततयानुपादानात् सर्वविभक्त्यन्तयोर्विनञोर्नानाञ्प्रकृतित्वेन नानाञोः सर्वविभक्तित्वमिति। एतेन 'अविशेषेणोत्पद्यन्ते, उत्पन्नानां नियमः क्रियत इत्यव्ययात् सर्वा विभक्तय उत्पद्यन्त इत्यर्थः' इति निरस्तम्। स्वकृतवार्तिकावतारिकया विरोधात्। तत्र हि वचनत्रयसाकल्यपरः सर्वशब्दः। प्रकृते तु सप्तविभक्तिसाकल्यपर इति विरोधः स्फुटः। **त्रलादीनां चेति**। आदिशब्दस्य प्रकारवाचित्वात् तसिलपि गृह्यते। **विशेष एते विधीयन्त इति**। तथा च सर्वविभक्तिभिन्नत्वं त्रलादीनामस्त्येवेति न दोष इति भावः। **इतराभ्योऽपीति**। तथा च सर्वविभक्तिनिमित्तत्वात् तत्र दोष इति भावः। इदानीं भाष्यकारः सकलाव्ययानुगतं लक्षणमाह — **यदि पुनरिति**। **अविभक्तिः शब्द इति**। न विद्यते विभक्तिर्यस्मात् स इत्यर्थः। न च दधीत्यादावतिप्रसङ्ग इति वाच्यम्, तस्यैव दधिनी इत्यादौ विद्यमानविभक्तित्वात्। तदिदं लक्षणमितरेतराश्रयग्रस्तमिति दूषयति — **अविभक्ताविति**। [2]लक्षणान्तरे आह — **अलिङ्गमसंख्यमिति वेति**। [3]अस्मात् 'तर्हि' इति पूर्वं बोध्यम्। एकलक्षणत्वेऽन्यतरविशेषणानर्थक्याल्लक्षणद्वयमिदं[4] बोध्यमिति सूचयितुं व्यस्तनिर्देशः। एतेन "'अविभक्तिरव्ययम्' इत्यस्य लक्षणस्य दूषितत्वादत्रापि तदेव दूषणमिति प्रदर्शनार्थो वाशब्दः" इति निरस्तम्। स्वोक्ते लक्षणे केनचिद् दूषिते तदपेक्षया समीचीनस्य तद्दूषणासंस्पृष्टस्यैव वक्तव्यत्वेन तत्र संभवतोऽपि तद्दूषणस्य स्वेनानुद्भाव्यत्वेन चासंबद्धप्रलापत्वात्। वाशब्दस्य लक्षणान्तरपरत्वसूचकतया भाष्यकृता व्याख्यातत्वेन तस्यार्थान्तरपरत्वकल्पनानौचित्याच्च। यदप्युक्तम् 'अलिङ्गासंख्यत्वस्य लौकिकत्वान्नेतरेतराश्रयत्वमिति पूर्वः पक्षः' इति। तदपि तुच्छम्, तथा भाष्यकृतैव वक्ष्यमाणत्वेन निर्दुष्टत्वेन च पूर्वपक्षत्वायोगात्। अलिङ्गत्वमसंख्यत्वं च वाचनिकमेवेति मन्यमानः शङ्कते — **एवमपीति**। परिहरति — **नेदं वाचनिकमिति**। तदेवमलिङ्गासंख्यत्वरूपे लक्षणे निर्दुष्टे इति मत्वा तथा सूत्रकारमते मयोद्भावितदोषस्योद्धारो न कृत एवेत्याशयेन पृच्छति वार्तिककारः — **तत्तर्हीति**। तस्यापि दोषस्योद्धारः कर्तुं शक्यत इत्याशयेनोत्तरमाह — **न वक्तव्यमिति**। **सिद्धं तु पाठादिति**। स्वरादावेव 'तसिलादयः' इत्यादिपाठः करिष्यते। 'तद्धितश्च' इत्यादिसूत्रपाठस्तु तत्प्रपञ्चार्थं

---

[1] निमित्तस्येति — ब.
[2] द्वितीयाद्विवचनमिदम्।
[3] अस्मात्पूर्वं तर्हीति बोध्यमित्यन्वयः।
[4] एकलक्षणमेवेति छायायां प्रतिपादितम्।

एवेति नाव्याप्त्यतिव्याप्तिदोष इति भावः। एतेन 'वार्तिककारस्येतरेतराश्रयदोषः स्थित एवेति तुशब्दो विशेषप्रदर्शनार्थः। भाष्यकारेण त्वितरेतराश्रयदोषः परिहृत इति वाशब्दार्थस्तुशब्दो व्याख्यातः' इति निरस्तम्। 'सिद्धं तु' इति ग्रन्थस्य प्रकृतसूत्रे वार्तिककारापादिताव्याप्तिपरिहार-रूपत्वेनात्रत्यतुशब्दस्याव्याप्त्यभावसूचकताया एव वक्तुमुचितत्वेन संनिहित'अलिङ्गमसंख्यम्' इति वचनापेक्षव्याख्यानानौचित्यात्। [अत एव] वचनं 'न वक्तव्यम्' इत्युक्तम्। किंच तदपेक्षया व्याख्यानेऽपि 'वार्तिककारस्येतरेतराश्रयदोषः स्थित एव' इति न युक्तम्, तदापादितेतरेतराश्रयस्य भगवता निरस्तत्वेन तस्य स्थितत्वाभावात्। तथा च तदपेक्षया विशेषप्रदर्शकस्तुशब्द इत्यप्य-संगतमिति स्पष्टमेव। **तसिलादय इति**। 'तसिल् त्रल्' इत्यादिरूपेण ते सर्वे पठनीयाः। तेन तत्रत्यथाल्निर्देशेन [1]'प्रत्नपूर्वविश्वेमात् थाल् छन्दसि' इति विहितस्यापि थालः संग्रहो भवतीति भावः। **[मान्तः** आम्] अम् च। [2]**कृत्वोऽर्थः** कृत्वसुच् सुच् धाश्च। **तसिः** [3]'प्रतियोगे पञ्च-म्यास्तसिः [4]'तेनैकदिक्' [5]'तसिश्च'॥

[१, ३००–३०३]

(**नारायणीयम्**) **ग्रहणमिति**। प्राप्तमिति शेषः। **वाचनिक इति**। [6]प्रयोजनाभावादपि केवलस्य तदन्तसंज्ञामाहुः। वचनारम्भस्य पाक्षिकं फलं दर्शयति — **तत्रेति**। [7]**यस्य तद्धितस्येति**। तद्धितान्तस्येत्यर्थः। न हि तद्धितकार्यत्वं विभक्तेः, प्रातिपदिकात् तद्विधानात्। **तद्धितस्येति**। अत्र तद्धितशब्देन तन्मात्रमुच्यते, न तदन्तम्, तन्मात्रस्योत्पत्तिसंभवात् तदन्तस्य तदसंभवात्। **स इति**। पश्चात्तु तद्धितेन तदन्तविधिर्द्रष्टव्यः। **इञ इति**। उपलक्षणमेतत्, "दिगादिभ्यो यत्' इत्यादेरपि सप्तम्यादिप्रतिनियतविभक्तिनिमित्तत्वात्। अनुत्पन्नविभक्तित्वमविभक्तित्वं न भवति, सुबन्तात् तद्धितविधिस्वीकारादित्याह[8] — **अश्रूयमाणेति**। अतिप्रसङ्गं परिहरति — **तदिति**। नानाञोरुत्पत्तौ विभक्तिविशेषस्य [10]निमित्तत्वेनानाश्रयणात् सर्वविभक्तित्वात् संज्ञासिद्धेः[11] प्रश्नः कथ-मित्यत आह — **एकेति**। यद्यपि विभक्तिविशेषस्य निमित्तत्वेन शब्दानाश्रयणम्, तथापि विनञोः सर्वविभक्त्यभावात् तन्निमित्तकतया तयोरसर्व[विभक्ति]निमित्तत्वमर्थप्राप्तमित्यर्थः। उत्सर्गत्व-मेकानपेक्षया विहितत्वम्। एतच्चास्मिन् सूत्रे प्रपञ्चयिष्यते। नन्वेकवचनोत्सर्गत्वेऽपि सकलैक-वचनोत्पत्तौ न स्यादसर्वविभक्तित्वमित्यत आह — **क्रमेति**। प्रथमैकवचनस्योत्पत्तिरित्यर्थः। स्वादिविधिवाक्येन संख्याकर्मादिविधायकवाक्यस्यैकवाक्यत्वात् संख्यादिविहीनादव्ययात् स्वादि-प्राप्त्यभावात् प्रागुक्तन्यायादेकवचनमात्रस्यैव प्राप्तिरिति कथं सर्वविभक्तित्वम्, अत आह — **अविशेषेणेति**। एकवाक्यतया विशिष्टविधावितरेतराश्रयत्वम् — उत्पन्नानामेकवचनादिसंज्ञा, संज्ञा-पूर्वकतया चोत्पत्तिरिति। अतोऽविशेषविहितानामर्थनियमः। प्रत्ययनियमेऽपि वा तुल्यजातीय-

---

[1] पा. सू. ५. ३. १११.

[2] 'तसिवती, कृत्वोऽर्थः' इति भाष्ये 'कृत्वोऽर्थः, तसिवती' इति पूनामुद्रिते पाठः। स स्वीकृतो रत्नप्रकाशकृता।

[3] पा. सू. ५. ४. ४४.

[4] पा. सू. ४. ३. ११२.

[5] पा. सू. ४. ३. ११३.

[6] केवलस्य प्रयोजनाभावादपीत्यन्वयः।

[7] प्रदीपे 'यस्य तद्धितान्तस्यासर्वा विभक्तिः' इत्यत्र 'यस्य तद्धितस्यासर्वा विभक्तिः' इति पाठः — नि, चौ, म.

[8] पा. सू. ४. ३. ५४.

[9] इत्याशयेनाहेत्यर्थः।

[10] निमित्तत्वेनाश्रयणात् — क.

[11] असिद्धेरिति छेदः।

नियमनादेकत्वादिभिः परस्परस्य व्यवच्छेदादव्ययेभ्यः सर्वविभक्तिरस्तीति नास्ति नानाओरर्थप्राप्तमसर्वविभक्तित्वमित्यर्थः। अव्ययात् सर्वविभक्तिसत्त्वेऽपि विभक्तिविशेषस्यापि विद्यमानत्वात् कथं विशेषाभावोक्तिः, तत्राह — **विशेषस्येति**। यद्वा, तद्धितः सर्वविभक्तिः प्रकृतौ विशेषाभावादित्युक्तौ हेतोरपक्षधर्मत्वमित्यत आह — **विशेषस्येति**। [1]विशेषानाश्रयेण चोदितत्वादिति हेत्वर्थ इत्यर्थः। तदुक्तं भाष्ये — अविशेषेण विहितत्वादिति। ननु भवद्दीर्घायुरायुष्मत्प्रयोगे [2]'इतराभ्योऽपि दृश्यन्ते' इति सार्वविभक्तिकतसिलादिविधानमिति तदप्रयोगे 'तत्र' इत्यादावप्राप्तिचोदनमशोभनमित्यत आह — **भवदादीति**। अनुत्पन्नविभक्तित्वं चेदसंभवः, अश्रूयमाणविभक्तित्वं चेदतिप्रसङ्ग इत्याशङ्क्य द्वितीयाङ्गीकारेणातिप्रसङ्गं परिहरति — **प्रयोग इति**। प्रयोगग्रहणात् प्रायोगिकमविभक्तिकत्वं ग्राह्यम्, न प्रक्रियाकालीनमिति दर्शितम्। तेन प्रक्रियाकाले प्रातिपदिकावस्थायामव्ययसंज्ञाभावः। **श्रवणादिति**। यस्मिन् विभक्तिश्रवणात्यन्ताभावस्तस्याव्ययत्वम्। अव्ययत्वज्ञप्तेरविभक्तित्वज्ञप्त्यधीनत्वेऽप्यविभक्तित्वज्ञप्तेस्तत्संज्ञाज्ञप्त्यधीनत्वाभावात् कथमितरेतराश्रयत्वमित्याशङ्क्योत्पत्तावितरेतराश्रयत्वमाह — **अव्ययत्वादिति**। तदुक्तं भाष्येऽपि [3]'भाव्यम्, भाव्यते' इति। ननु प्राचीनलक्षणस्य दूषितत्वाल्लक्षणविकल्पार्थो वाशब्दो नोपपद्यत इति शङ्कते— **अविभक्तिरिति**। दूषितत्वादित्यस्यानन्तरं न तद्विकल्पाभिप्रायेण वाशब्दो युक्त इति शेषः। परिहरति — **अत्रापीति**। दूषणसाम्यप्रदर्शनाय वाशब्द इत्यर्थः। [4]नन्वपृथगुक्तिदूषणं लक्षणदूषणं वाशब्देन विवक्षितं चेल्लक्षणान्तरोत्थाने किं निमित्तमित्यत आह — **अलिङ्गेति**। [5]**पूर्वः पक्ष इति**। वार्तिककारस्य हि वाशब्देन दूषणसाम्यं विवक्षितमिति। भाष्यकारस्य त्वेष एव सिद्धान्तः। विभक्तिलुगादिवदर्थस्य शास्त्रीयत्वाभावात् कथमस्मिन् लक्षण इतरेतराश्रयप्रसङ्गः। [6]अर्थस्य शास्त्रीयत्वं च [7]'अनादेशनात्' इत्यादिना समर्थसूत्रे समर्थयिष्यते, अत आह — **अर्थमपीति। क्वचिदिति**। यत्रादेशनमस्ति तत्र। न हि क्वचित् तदनादेशनादादेशनस्थलेऽपि[8] शास्त्रीयत्वत्याग इति लक्षणशरणो मन्यते। तदाह — **कश्चिदिति**। न चेहाव्ययस्यालिङ्गत्वाद्यनुशासनमेव नास्ति, तत्कुत्रेतरेतराश्रयत्वमिति वाच्यम्, [9]तदनुशासनीयमित्यभिप्रेतत्वात्। प्रत्नादिथालः परिगणितेष्वनन्तर्भावात् कथमव्ययत्वम्, अत आह — **य एवेति**। रूपसादृश्यनिबन्धनतत्त्वारोपणम्॥

[१, ३०३–३०६]

(**लघुविवरणम्**) भाष्ये 'अतिबहु' इत्यत्र बहुशब्दो वैपुल्यवाची। **कथमेकवचनं . . . स्यादिति**। प्रथमाया अनियतत्वादव्ययेभ्यः प्रथमैकवचनं भविष्यतीति [10]चेत् [11]'अभिहिते प्रथमा' इति सापि नियतेति भावः। बहुवचनान्यथानुपपत्त्या प्रकारकात्स्न्यं प्रतीयेतेत्यभिप्रेत्याह — **एवमिति**। किमिति तर्हि बहुवचनान्तेन विग्रह इत्यत आह — **यदा त्विति**॥

---

[1] विशेषानाश्रयणे चोदितत्वात् — क.
[2] महाभाष्यम् ५. ३. १४.
[3] भवितव्यमित्यस्यार्थानुवादः।
[4] ननु पृथगुक्तिदूषणं — क.
[5] प्रदीपे 'पूर्वपक्षः' इत्यत्र 'पूर्वः पक्षः' इति व्यस्ततया पाठोऽभिमत इति भाति।
[6] अर्थस्य शास्त्रीयत्वं च — क.
[7] महाभाष्यम् २. १. १.
[8] आदेशस्थलेऽपि — क.
[9] तदनुशासनमित्यभि — क.
[10] चेन्न, अभिहिते — ण.
[11] महाभाष्यम् २.३. ४६.

[१, ३०३–३०६]

(**विवरणम्**) [**शब्देति**।] शब्दस्यार्थस्य संबन्धस्य चावगमादित्यर्थः। एकादिसंख्यावाचिन्यो विभक्तयः, संख्याश्च न विज्ञाता अवैयाकरणैरिति [1]तेऽर्थापरिज्ञानाद् वाचिका विभक्तीर्न प्रयुञ्जत इत्यत उक्तम् — भाष्ये **अभिज्ञाश्चेति**। **नापि साधनप्रधानं** किं तु द्रव्यप्रधानमिति शेषः। द्रव्यप्रधानत्वमुपपादयति — **तथा चेति**। **सत्ववचनानां** द्रव्यवचनानामित्यर्थः। **क्रियाक्षेपात्** स्थित्यादिक्रियाक्षेपादित्यर्थः। प्रत्ययाभिधेयद्रव्योपसर्जनः [2]प्रकृत्यभिधेयस्तृतीयार्थ इत्यर्थः। **न्यासान्तरेति**। 'अविभक्तिरव्ययम्' इत्यादिन्यासान्तराश्रयणेनेत्यर्थः। भाष्ये **अतिबह्विति**। बहुशब्दो वैपुल्यवाची। यद्यपि न्यासान्तरेऽपि बह्वेव, तथापि दोषाभावाल्लाघवं प्रत्यनादरेण 'एकस्मिन्नेकवचनम्' इति क्रियेतापि। 'असर्वविभक्तिः' इत्युक्तौ तु न केवलं [3]गौरवम्, प्रत्युत लक्षणाप्राप्तविभक्तेर्ज्ञापकादुत्पत्त्याश्रयणात् तुल्यजातीयापेक्षनियमाश्रयणाद्व्ययेभ्यः सर्वविभक्त्युत्पत्तेः 'तद्धितश्चासर्वविभक्तिः' इति लक्षणस्यासंभवदोषोऽप्यस्तीति प्रतिपादनात् 'अद्यत्वेऽतिबहु' इत्युक्तम्। **कथम् ....अव्ययेभ्य इति**। न चानियतं प्रथमैकवचनं भविष्यतीति वाच्यम्, तस्यापि [4]"अभिहिते प्रथमा' इति नियतत्वादिति। **एतदर्थमेवेति**। कर्माद्यभावेऽप्येकवचनार्थमित्यर्थः। **द्वित्वबहुत्वयोस्त्विति**। यद्यप्यनिर्दिष्टार्थत्वात् स्वार्थे विधीयमानस्य न द्वित्वबहुत्वयोः प्राप्तिः, तथापि पञ्चकप्रातिपदिकार्थपक्षे एकत्व इव द्वित्वबहुत्वयोः प्राप्तस्य द्विवचनबहुवचनाभ्यां बाध इति द्रष्टव्यम्। **तन्मतमिति**। दाक्षिरित्यादावतिव्याप्तेः [5]"इतराभ्योऽपि दृश्यन्ते' इत्यव्याप्तेश्चेति भावः। **सर्वा विभक्तयः** सर्वप्रकारा इत्यर्थः। बहुवचनान्तेन विग्रहे बहुवचनेनैव विभक्तिभेदप्रतीतेर्भेदाधिष्ठान[6]प्रकारसंभवात् सर्वशब्दस्य प्रकार[7]कात्स्न्यं[पर]तापि संभाव्यते। एकवचनान्तेन तु विग्रहे विभक्ति[8]भेदस्याप्रतीतेस्तदधिष्ठानप्रकार[9]कात्स्न्यस्यासंभवादवयवकात्स्न्यवचन एव सर्वशब्द इति सकलविभक्त्येकवचनोत्पत्तावपि विभक्तिसर्वावयवानुत्पत्त्या सर्वविभक्तित्वाभावात् तद्धितान्तस्य 'विना' इत्यादौ सिद्धाव्ययसंज्ञा। 'दाक्षिः' इत्यादौ च तद्धितान्ताद् विभक्तिसकलावयवोत्पत्तेरसर्वविभक्तित्वाभावान्नास्त्यव्ययसंज्ञेति नाव्याप्त्यतिव्याप्ती इति भावः। अयं [10]च प्रकारकात्स्न्यवचने दोषो न नियत इत्याह — **यदा त्विति**। किमिति तर्हि बहुवचनान्तविग्रहपरित्यागो भाष्यकारस्येत्यत आह — **यदा तु खल इति**। नन्वव्ययात् सर्वविभक्त्यनुत्पत्तावव्ययत्वाविशेषादव्ययीभावादपि न सर्वा विभक्तिरुत्पद्येत। तथा च [11]"तृतीयासप्तम्योर्बहुलम्' [12]इति कथमम्भाव[13]विकल्पवचनमित्यत आह — **अव्ययीभावादपीति**॥

[१, ३०३–३०६]

(**उद्द्योतनम्**) 'अथवा' इत्यस्य तात्पर्यमाह — **वृद्धेति**। शब्दस्यार्थस्य संबन्धस्य चावगमा-

---

[1] 'ते' इति नास्ति — ट.
[2] प्रकृत्यभिधेयतृतीयार्थः — च, छ, ट.
[3] गौरवमेव प्रत्युत — च, छ, ट.
[4] महाभाष्यम् २. ३. ४६.
[5] पा. सू. ५. ३. १४.
[6] 'प्रकार' इति नास्ति — च, छ.
[7] कात्स्न्यमपि — च, छ, ट.
[8] भेदस्य प्रतीतेः — ञ.
[9] कात्स्न्यसंभवात् — ञ.
[10] चकारो नास्ति — ञ.
[11] पा. सू. २. ४. ८५.
[12] इति व्यर्थमम्भाव — ञ.
[13] विकल्पनमित्यत आह — ट.

दित्यर्थः। नन्वेकादिसंख्यापरिज्ञानात्[1] तद्वाचिविभक्तिमवैयाकरणा न प्रयुञ्जते, अत आह —भाष्ये **अभिज्ञाश्चेति**। **तत्रैव** अलिङ्गासंख्यत्व एव। [2]उपपत्तित्वमेव व्यनक्ति — **अव्ययानामिति**। विभक्त्यर्थक्रिययोरद्रव्यत्वेन लिङ्गसंख्यायोगासंभवादित्यर्थः। द्वैविध्यनियमो नास्तीति मतान्तरमाह — **अन्ये त्विति**। **नापि साधनप्रधानं** किं तु द्रव्यप्रधानमिति शेषः। द्रव्यप्राधान्यं सूत्रकृतोऽपि संमतमित्याह — **तथा चेति**। [3]त्रैविध्यं भाष्यकारस्यापि संमतमित्याह — **पूर्वं चेति**। **क्रियाक्षेपादिति**। [4]'अस्तिर्भवन्तीपरः' इति न्यायेनास्त्यादिक्रियाक्षेपात्, योग्यक्रियान्तराक्षेपाद्वेत्यर्थः। शब्दभेदे स्वाभाव्यात् [5]तत्तत्प्रधानत्वेनालिङ्गासंख्यत्वं व्यवस्थापितम्। एकार्थे विहितप्रत्यययोरपि स्वाभाव्यादेव लिङ्गसंख्यायोगायोगौ क्वचिदङ्गीकार्यावित्याह — **शब्दशक्तीति**। तदेवाह — **तत्रेति**। **पैलुमूलमिति**। पीलुमूलेन समानदिग् वस्त्वभिधीयते। प्रत्ययाभिधेयं द्रव्यमुपसर्जनं यस्य प्रकृत्यभिधेयतृतीयार्थस्य स इति विग्रहः। अद्यत्व[इत्य]स्यार्थमाह — **सूत्रेति**। इदानीं [6]सूत्रादेवासर्वविभक्तित्वमानेतुमिदं भाष्यमित्यभिप्रेत्याह — **पूर्वमिति**। [7]**न्यासान्तर** "अविभक्तिरव्ययम्' इत्यादिन्यासान्तर[8]। **प्रत्याख्यातम्** इदानीं समर्थ्यत इति शेषः। भाष्ये **अतिबहु** अत्यधिकम्। आधिक्यमेव प्रतिपादयति — [10]**एकस्मिन्निति**। [11]'एकस्मिन्' इति त्यागेऽप्यव्ययेभ्योऽप्राप्तिं शङ्कते — **नन्विति**। यद्यपि प्रथमैकवचनमनियतत्वात् स्यादेव, तथापि भाष्ये सर्वैकवचनानामव्ययेभ्य उत्पत्त्यङ्गीकारात् तत्रेयमाशङ्का। [12]'प्रथमाप्यभिहिते कारके नियता' इति तु न सम्यक्। अकारकेऽपि प्रातिपदिकार्थमात्रे तत्संभवात्। **एतदर्थमेव** कर्माद्यभावेऽप्येकवचनार्थमेव। **द्वित्वबहुत्वयोस्त्विति**। यद्यप्यनिर्दिष्टार्थत्वेन स्वार्थिकत्वान्न द्वित्वबहुत्वयोः प्राप्तिः, तथापि [13]पञ्चकप्रातिपदिकार्थपक्षे संख्यात्रयेऽपि प्राप्तिः संभवतीत्यभिप्रायः। **दूषितमिति**। [14]'इतराभ्योऽपि दृश्यन्ते' इत्यव्याप्तेः 'दाक्षिः' इत्यादावतिव्याप्तेश्चेति भावः। **वृत्तिकारान्तरेति**। यस्य तद्धितस्यासर्वविभक्तिः कार्या, यस्मान्न सर्वा विभक्तिरुत्पद्यत इत्युक्तेत्यर्थः। **प्रकारकात्स्न्येंऽपीति**। प्रथमात्वद्वितीयात्वादिरूपप्रकारकात्स्न्यं इत्यर्थः। **सर्वा विभक्तयः** सर्वप्रकाराः। **द्रव्येति**। प्रकाराश्रयैकवचनद्विवचनबहुवचनकात्स्न्यंवृत्तिरित्यर्थः। क्वचिदनेकविधानि धान्यानि पृथग्राशयस्तिष्ठन्ति, तत्र 'सर्वाणि धान्यान्यानीयन्ताम्' इत्युक्ते सर्वराशीनामेकैकमुष्टिमात्रानयनेऽपि वचनार्थोऽनुष्ठितः। 'सर्वं धान्यमानीयताम्' इत्युक्ते निरवशेषमानीयत इति बहुवचने प्रकारकात्स्न्यमपि संभवति, एकवचनेऽवयवकात्स्न्यमेवेति लोकव्युत्पत्तिसिद्धोऽयमर्थ इति भावः। एवं च 'दाक्षिः' इत्यादौ नातिव्याप्तिः, वचनत्रयस्यापि [15]तत उत्पत्तेः। विनादौ च नाव्याप्तिः, वचनत्रयस्यापि ततोऽनुत्पत्तेरिति न पूर्वोक्तदोषः। बहुवचनान्तेन विग्रहेऽपि न दोष इत्याह — **यदेति**। भाष्यं संगमयति — **यदा त्विति**। अर्थविशेषानपेक्षतया युगपत्सर्वोत्पत्तिसंभावनामात्रेण तदुक्तम्। वस्तुतः सर्वेषां युगपत् प्रातिपदिकपरत्वासंभवात् प्रथमैकवचनपक्ष एव सम्यगिति भावः। नन्वव्ययात् सर्वविभक्त्यनुत्पत्तावव्ययी-

---

[1] अपरिज्ञानादिति छेदो बोध्यः।
[2] उपपत्तिमेव — उ.
[3] द्वैविध्यं — ऊ.
[4] महाभाष्यम् २. ३. १.
[5] तत्प्रधानत्वेनालिङ्गासंख्यत्वं — ॠ.
[6] सूत्रादेव सर्वविभक्तित्वमित्यानेतुं — म; सूत्रादेवाविभक्तित्वमानेतुं — इ, ऊ, ॠ.
[7] न्यासान्तरम् — अ, म, इ, उ.
[8] असर्वविभक्तिरव्ययमिति — अ; असर्वविभक्तावित्यादि — म.
[9] न्यासान्तरम् — अ, म, इ, उ.
[10] एकस्मिन्नित्यादि — म.
[11] 'एकस्मिन्निति त्यागेऽपि' इति नास्ति — म.
[12] विवरणोक्तिं खण्डयति — प्रथमेति।
[13] पञ्चकं प्रातिपदिकार्थं इति पक्षे — अ.
[14] पा. सू. ५. ३. १४.
[15] तत्रोत्पत्तेः — ॠ.

भावेऽपि तथा स्यात्। तथा च [1]'तृतीयासप्तम्योः' इत्ययुक्तम्, अत आह — **अव्ययीभावादिति**। न च प्राथम्यन्यायपक्षे [2]तदसंगतिः शङ्कनीया, अस्मादेव ज्ञापकात् तृतीयासप्तमीपञ्चम्येकवचनोत्पत्तावपि विभक्त्यन्तरस्यानुत्पत्त्या बहुवचनपक्षस्याप्यदुष्टत्वात्॥

[१, ३०३–३०६]

(**रत्नप्रकाशः**) इदानीं प्रागुक्त [3]'अविभक्तिः शब्दोऽव्ययम्' इति लक्षणमितरेतराश्रयदोषपरिहारेण व्यवस्थापयितुमाह — **अथवेति**। वृद्धव्यवहारादेवाविभक्तित्वं ज्ञातुं शक्यत इति नेतरेतराश्रय इति भावः। एतेन 'वृद्धव्यवहारादेव शब्दार्थसंबन्धावगमादेकत्वादिव्यवहारवदलिङ्गासंख्यत्वमव्ययार्थस्य प्रसिद्धमित्यर्थः' इति निरस्तम्। 'अलिङ्गासंख्यम्' इत्यत्रैवं वक्तुमुचितत्वेन प्रकृते तदनौचित्यात्। 'न चैतयोर्लिङ्गसंख्याभ्यां योगोऽस्ति' इति भाष्यं तु 'अलिङ्गासंख्यम्' इति लक्षणमपि प्रसङ्गादुपपादितमित्येतदभिप्रायकमिति तदनुरोधेनाप्यनुपपन्नत्वाच्च। एकत्वादीनामर्थानामनभिज्ञा इति कृत्वा तेऽविभक्तिकान् शब्दान् प्रयुञ्जत इत्यत्राह — **अभिज्ञाश्चेति**। तदभिज्ञत्वमेवोपपादयति — **आतश्चेति**। **अन्येनेति**। येन द्वौ त्रीन् वा क्रीणन्ति ततोऽन्येनेत्यर्थः। एवं द्वितीयतृतीयान्यशब्दयोरर्थ ऊह्यः। **वस्नेन** मूल्येन। **तदेतदेवं संदृश्यतामिति**। यस्मादविभक्तिप्रयोगे एकत्वाद्यनभिज्ञत्वं हेतुर्न भवति तस्मात्, **एतत्** अविभक्तिकप्रयोगोपपादनम्, **एवं** वक्ष्यमाणप्रकारेण, **संदृश्यतां** ज्ञायतामित्यर्थः। **अर्थरूपमेवेति**। अर्थस्वभाव एवेत्यर्थः। **अत्र** तदर्थवाचकादव्ययात् परभागे। **न भवतीति**। न प्रयुज्यत इत्यर्थः। अव्ययेष्वलिङ्गासंख्यलक्षणसाधारण्येन युक्त्यापि लिङ्गसंख्याभावप्रतिपादनद्वारा अविभक्तित्वं प्रतिपादयितुं शक्यत इत्याह — [4]**तच्चापीति**। **तदेतत्** अव्ययमपि **एवं** वक्ष्यमाणप्रकारेण, अनुगम्यमानं दृश्यतामित्यर्थः। **विभक्त्यर्थप्रधानमिति**। सुप्तिङन्तार्थप्रधानमित्यर्थः। यथा दण्डः, दण्डं, दण्डेन, अस्ति, भवति, इत्यादिशब्दरूपं तद्वदिति भावः। **क्रियाप्रधानमिति**। यथा भूपचप्रभृतयः, तद्वदिति भावः। एतेन '**उच्चैर्नीचैरिति**। सप्तम्यर्थे वर्तत इति साधनप्रधानता। **हिरुक् पृथगिति**। क्रियाविशेषणत्वादेषां क्रियाप्राधान्यम्' इति निरस्तम्। 'उच्चैः पुरुषः, नीचैः पुरुषः' इत्यादावुच्चैःप्रभृतेः सप्तम्यर्थत्वाभावात्। 'उच्चैःपुरुषस्य स्वम्' इत्यादौ तस्य साधनप्राधान्यस्याप्यभावात्। क्रियाविशेषणानां क्रियाप्राधान्ये साधनप्रधानानामपि क्रियाविशेषणत्वसत्त्वेन साधनप्रधानकीर्तनायोगापत्तेः। 'हिरुक् वर्जने' 'पृथक् [5]विजिरर्थे' इति विवरणविरोधापत्तेश्च। **न चैतयोरिति**। न हि विभक्त्यन्तार्थक्रिययोरित्यर्थः। तथा च यथा तद्वाचकेभ्यः सुबन्ततिङन्तधातुभ्यो विभक्तिः सुब्रूपा न भवति तथाव्ययादपि न भवतीत्यलिङ्गासंख्यलक्षणे[6] अविभक्तिलक्षणं च निर्दुष्टान्येवेति भावः। इदानीं तद्धितग्रहणत्यागे प्रकृतसूत्रमपि सकलाव्ययसाधारणलक्षणं संपद्यत इति प्रतिपाद्य तत्राति-व्याप्तिदोषदर्शनपूर्वकं यथाश्रुतं सूत्रपाठं समर्थयिष्यन्नाह — **अथाप्यसर्वविभक्तिरिति**। **अद्यत्वे** इदानीमित्यर्थः, असर्वविभक्तिरिति न्यासकाल इति यावत्। स हि न्यास इदानीमेव प्रदर्शितः। **एकस्मिन्नेकवचनमिति**। [7]'द्व्येकयोर्द्विवचन' इत्यादिद्विसूत्र्यर्थप्रदर्शनपरमेतत्। **एकवचनमुत्सर्गः करिष्यत इति**। 'द्विबह्वोर्द्विवचनबहुवचने' इत्येकमेव सूत्रं कृत्वा तस्य द्विबह्वोरेव द्विवचनबहुवचने

---

[1] पा. सू. २. ४. ८४.
[2] एतदसंगतिः — उ, ऊ, ऋ.
[3] अविभक्तिशब्दः — ब.
[4] तत्रापीति — ब.
[5] विजिरर्थः पृथग्भावः।
[6] प्रथमाद्विवचनान्तमिदम्।
[7] पा. सू. १. ४. २२.

द्विबह्वोर्द्विवचनबहुवचने एवेति द्विविधनियमपरताश्रीयते। तेनैकत्वे विवक्षिते घटादिशब्देभ्योऽसंख्येभ्योऽव्ययेभ्यश्चैकवचनमेव भविष्यति। सर्वशब्दश्च वचनत्रयसाकल्यपर एव, न तु सप्तविभक्तिसाकल्यपर इति न कुत्राप्यस्य लक्षणस्याव्याप्तिरिति भावः। एतेन "एकस्मिन्नित्यपनीय 'एकवचनम्' इति सूत्रं कर्तव्यम्। ततः 'द्विबह्वोर्द्विवचनबहुवचने' इत्येवं कर्तव्यम्। तेन द्वित्वबहुत्वयोर्द्विवचनबहुवचने भविष्यतः। एकवचनं त्वेकस्मिन्नपि भविष्यति, अलिङ्गासंख्येभ्योऽव्ययेभ्यश्च" इति निरस्तम्। 'एकस्मिन्' इति पदस्य तत्राभावेन तदपनयनोक्तेरयुक्तत्वात्। [1]"स्वौजसमौट्' इत्यादिसूत्रेणैकवचनादीनां त्रयाणां विहितत्वेन पुनरेकवचनविधिवैयर्थ्याच्च। यदप्युक्तम् "ननु [2]"कर्मणि द्वितीया' इत्यादिना कर्मादिषु द्वितीयादीनां नियतत्वात् कथमव्ययेभ्य एकवचनं स्यात्। नैष दोषः। एतदर्थमेव 'एकवचनम्' इत्येतत् क्रियतेऽप्राप्तप्रापणार्थम्। तेन कर्माद्यभावेऽपि भवति" इति। तदपि न, [3]"कर्मणि द्वितीया' इत्यादीनां कर्मणि द्वितीयैवेत्यादिरूपनियमार्थतयाव्ययेभ्यो वचनत्रयात्मिकानां सर्वविभक्तीनां सिद्धत्वात्। न च प्रातिपदिकार्थे प्रथमैवेति नियमादव्ययेभ्यः प्रथमैव स्यान्न तु द्वितीयादिरिति वाच्यम्, तत्र मात्रग्रहणस्य प्रत्येकमभिसंबन्धेन 'प्रातिपदिकार्थमात्रे' इत्यनेन मात्रग्रहणव्यावर्त्यलिङ्गसंख्याद्यन्वययोग्य एव प्रथमाया व्यवस्थापितत्वेनाव्ययेभ्यः सर्वासां विभक्तीनां निरातङ्कत्वात्। एतदभिप्रायेणैव 'सर्वविभक्तिर्ह्यविशेषात्' इति वार्तिकावयवस्य प्रवृत्तत्वात्। वस्तुतस्तु 'पचतोरूपम्' 'पचन्तिरूपम्' इत्याद्यनुरोधेन प्रातिपदिकार्थ इत्यत्र मात्रशब्दमसंयोज्य 'प्रातिपदिकार्थे प्रथमैव' इति व्याख्येयमित्यन्यदेतत्। यदप्युक्तम् 'न सर्वा विभक्तय उत्पत्तौ निमित्तमस्येति येन वृत्तिकारेण व्याख्यातं तन्मतं दूषितम्' इति। तन्न, 'यदा तु यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनासर्वा विभक्तिराश्रिता सोऽसर्वविभक्तः' इत्येकवचनान्तनञ्तत्पुरुषपूर्वपदबहुव्रीह्यात्मकमसर्वविभक्तिशब्दमवलम्ब्य प्राक् स्वयमुपपादितस्येदानीमन्यथानुवादानौचित्यात्। एतावता भाष्येण तन्मतस्य दूषितत्वाभावात्। मतान्तरपरिग्रहमात्रस्यैवात्र भाष्यकृता कृतत्वेन दूषणसंस्पर्शाभावात्। वार्तिककारेणैव तन्मतस्य दूषितत्वेनेदानीं तद्दूषणस्यासंगतत्वाच्च। यदप्युक्तम् 'इदानीं वृत्तिकारान्तरमतं विशेषप्रदर्शनेन संस्क्रियते — **न चाप्येवमिति।**' इति। तदपि न, 'इदं चाप्यद्यत्वे' इत्यादिनैव तन्मतपरिष्कारस्योपक्रमात्। **न सर्वा असर्वा इति।** सर्वशब्दोऽत्र विभक्तिकात्स्न्र्यपरो न भवति, सर्वासामेव विभक्तीनां प्रत्येकं सर्वविभक्तिभेदसत्त्वेन सर्वा विभक्तयो यस्मात् तस्यैवासर्वविभक्तिशब्देनापि ग्रहणस्य जायमानत्वेन नञ आनर्थक्यापत्तेरिति भावः। **न सर्वा असर्वेति।** वचनसाकल्येऽत्र सर्वशब्द इति सूचनायैकवचनेन विग्रहो दर्शितः। अत्र नञ्तत्पुरुषपूर्वपदबहुव्रीहिरेवाश्रयणीयः, बहुव्रीह्युत्तरपदनञ्तत्पुरुषाश्रयणे सुप्तिङन्तस्य सर्वस्याप्यव्ययत्वप्रसङ्गात्। **त्रिकमिति।** [4]"स्वौजस्' - [5]"तिप्तस्झि' इत्यादिवचनत्रयात्मकमित्यर्थः॥

[१, ३०३–३०६]

(**नारायणीयम्**) लक्ष्यानुसारिशास्त्रप्रवृत्तिरिति 'तच्चापि' इत्यतः प्राक्तनभाष्यभावमाह — **वृद्धेति।** भाष्याक्षरार्थस्तु — लुक्शास्त्रकृतमविभक्तित्वं न भवति, येनेतरेताश्रयदोषः स्यादित्याह— **यद्यपीति।** ननु [6]"सविभक्तिकत्वाविभक्तिकत्वव्यवस्थायाः शास्त्रायत्तत्वाभावश्चेत् किमायात-

---

[1] पा. सू. ४.१. २.
[2] पा. सू. २. ३. २.
[3] पा. सू. २.३. २.
[4] पा. सू. ४. १. २.
[5] पा. सू. ३. ४. ७८.
[6] सर्वविभक्तिकत्वाविभक्तिकत्व — क.

मित्याकाङ्क्षायामर्थायत्तत्वमित्याह — **तदेतदिति** । **एवंजातीयकमिति** । संख्यासाधनरहितम् । संख्यादिसत्त्वासत्त्वनिमित्ते चेत् सविभक्तित्वाविभक्तित्वे अनव्ययार्थे तत्सत्त्वमव्ययार्थे च तदसत्त्वं कुतः परिज्ञाय विभक्तिप्रयोगाप्रयोगौ लौकिकानामित्यत आह — **अभिज्ञाश्चेति** । चशब्दसूचितं परिज्ञानहेतुं टीकाकृदाह — **वृद्धेति** । पूर्वपूर्ववृद्धव्यवहाराद्विभक्त्यभावविशिष्टाल्लिङ्गाद्यभावावगत्योत्तरोत्तरव्यवहार इत्यर्थः । [1]शास्त्रमन्तरेण वृद्धव्यवहाराधीनासंख्यत्वादिज्ञानपुरस्सरतयाविभक्तिकशब्दव्यवहार इत्ययमर्थो भाष्याभिप्रेतश्चेत् क्रयणादिव्यवहारस्यैकत्वादिज्ञानपूर्वत्वकीर्तनं किमर्थमित्याशङ्क्य दृष्टान्ततया तत्कीर्तनमित्याह — **एकत्वेति** । **एकत्वादिव्यवहारः** एकत्वादिज्ञानमूलकक्रयणादिव्यवहारः, यथा प्रत्यक्षावगतसंख्यानुगुणमूल्योपादानं तथा वृद्ध[2]व्यवहारावगतपदार्थसंख्यानु[3]गुणाविभक्त्युपादानमित्यर्थः । **प्रसिद्धमिति** । प्रसिद्धशब्देन तन्मूलकाविभक्तिकव्यवहार उच्यते । इतरथा दृष्टान्तासांगत्यादित्याहुः । व्यवहाराभिज्ञानमपि तत्संगतिमाहुः । न च दृष्टान्तदार्ष्टान्तिकयोरभेदः, प्रत्यक्षमूलस्य क्रयणादिव्यवहारहेतोः संख्याज्ञानस्य दृष्टान्तत्वाद्वृद्धव्यवहारमूलस्य शब्दव्यवहारहेतोः संख्यादिज्ञानस्य दार्ष्टान्तिकत्वात् । अशास्त्रीयज्ञानाद्व्यवहार इत्यत्र तयोः समवेतता चेत्यलमतिक्षोदेन । [4]अविभक्तिहेत्वन्तरोपन्यासो न भवति, किं त्वविभक्तित्व[5]साधनासंख्यत्वादौ हेतुरयमित्याह — **अत्रैवेति** । **तदेतत्** एवंजातीयकत्वमविभक्तित्वप्रयोजकत्वम्, **एवं** वक्ष्यमाणप्रकारेण **अनुगम्यमानम्** उपपाद्यमानं, **दृश्यताम्** अवधार्यतामित्यक्षरार्थः । चापी तु वाक्यालङ्कारार्थौ । किमत्र द्वैविध्यनियमो विवक्षितः, उत नेत्यपेक्षायामाह — **अव्ययानामिति** । नियमविवक्षायां हेतुमाह — **अलिङ्गेति** । यदि [6]सादृश्यमपि स्यात्, लिङ्गादियोगस्तस्य स्यात् । अतो लिङ्गाद्ययोगनैयत्याय द्वैविध्यमेवेत्यर्थः । लिङ्गाद्ययोगे नैयत्याभावस्येष्टत्वान्नियमाविवक्षेति रहस्यज्ञानां कथमव्ययत्वमिति चेत्, लिङ्गाद्यभावस्याव्ययलक्षणत्वाभावाददोषः । नन्वव्यय[7]लक्षणाभावेऽप्यव्यये लिङ्गाद्यप्रसिद्धिविरुद्धो लिङ्गाद्यङ्गीकारः, तत्राह — **तस्मादिति** । अत्र च तद्धितान्तस्यैवाविभक्तित्वप्रयोजकतया संख्याद्यभाव उपपद्यते । दृष्टान्ततयान्येष्वप्यव्ययेषु 'क्रिया' इति तत्कीर्तनम् । भाष्ये [8]'साधनपदेन शक्तिर्विवक्षिता, न शक्तिमदित्याह — **सप्तमीति** । धातोरेव क्रियावृत्तित्वादव्ययस्य कथं क्रियाप्राधान्यम्, अत आह — **क्रियेति** । यदि तर्हि क्रियाविशेषणता क्रियासंनिधौ[9] त्वप्रयोगः, तत्राह — **क्रियेति** । साधनप्रधानत्वादिकमपि तद्धितस्य न शास्त्रायत्तम्, येन परस्पराश्रयं स्यात् । किं तु स्वाभाविकमित्याह — **शब्देति** । यदि स्वाभाविकं न स्यात्, एकार्थविहिततद्धितयोर्वैधर्म्यं [10]न स्यादित्यर्थः । अद्यत्वेशब्दो निपातोऽस्मिन् काल इत्यत्रार्थे वर्तत इत्युक्तं पस्पशायाम्, [11]सूत्रकाले । इदं तत्त्वमुपपादयति — **सूत्रेति** । यद्यपि सूत्रारम्भकालीनत्वमेकग्रहणव्यतिरेक[12]प्रयोजकं न भवति, अथापि न तदतिरेकप्रयोजकतयैतद्विशेषणम् । किं त्वस्मिन्नपि कालेऽतिरिक्त[13]परित्यागाददोष इति वाक्यार्थो भाष्ये । तत्राधिक्यप्रयुक्तं सौत्रगौरवमुक्तम्, तदन्तरेणाप्यभिमतसिद्धेरिति । तत्राभिमतसिद्धिं तदन्तरेण प्रकटीकरोति — **एकस्मिन्निति** । ननु स्वादिविधिवाक्येन सर्ववचनसिद्धौ पुनर्विधानं

---

[1] शास्त्रान्तरेण — क.
[2] व्यवहारागत — क.
[3] गुणविभक्ति — क.
[4] अविभक्तित्वे हेत्वन्तरेत्यर्थः ।
[5] साधनासंख्यात्वादौ — क.
[6] 'सदृशं त्रिषु लिङ्गेषु' इत्ययमर्थो विवक्षित इति भाति ।
[7] लक्षणत्वाभावेऽपीत्यर्थः ।
[8] साधनार्थकविभक्त्यर्थपदेनेत्यर्थः
[9] असंनिधाविति छेदः ।
[10] नास्तीत्यर्थः —क.
[11] तत्र काले — क.
[12] प्रयोजनं — क.
[13] परित्यागाद्दोष इति — क.

संख्याविशेषलाभार्थमिति द्विवचनबहुवचनविधावपि द्वित्वबहुत्वविशेषणं किमर्थमित्यत आह — **तेनेति**। पुनर्विधानस्य संख्याविशेषलाभार्थत्वेऽपि कस्मिन् कस्य विशेषस्य लाभ इति निश्चयो[न] स्यादित्यर्थः। यदि तर्हि विशेषलाभनिश्चयार्थं द्वित्वादिविषयनिर्देशस्तर्ह्येकवचनेऽपि तन्निश्चयार्थं विषयो निर्देष्टव्यः, तत्राह — **एकवचनं त्विति**। पञ्चकस्य प्रातिपदिकार्थत्वादस्त्यनुक्ततयापि संख्याया लाभः। तद्विशेषलाभस्तु परिशेषादिति भावः। अव्ययेभ्यस्तर्हि [१]सुबनुत्पत्तेः कथं पदत्वनिबन्धनकार्यमित्यत आह — **अलिङ्गेति**। एकवचनविधावेकत्वस्यानिमित्तत्वात्। सत्यपि तस्मिन् तदभावेऽप्येकवचनभावो न विरुद्धः, [२]एकत्वस्यानिमित्तत्वेऽपि निमित्तान्तरसत्त्वात्। [३]तदभावात् कथमव्ययाद्विभक्तिरिति शङ्कते — **नन्विति**। ननु प्रातिपदिकार्थनिमित्ता प्रथमा भविष्यति। अत्राहुः— [४]'अभिहिते प्रथमा' [५]'तिङसमानाधिकरणे प्रथमा' इत्यादिन्यासे तस्या अप्यप्राप्तिरिति। अन्ये तु [६]'तृतीयासप्तम्योर्बहुलम्' इत्याद्युपपत्तये सकलैकवचनं साध्यमित्याहुः। **अप्राप्तेति**। पञ्चकस्य प्रातिपदिकार्थत्वात् परिशेषाच्च 'एकवचनम्' इत्यकरणेऽप्येकत्वयुक्ते स्वादिवचनसिद्धिरिति तत्करणं संख्यासाधनहीनार्थेऽपि यथा स्यादित्येवमर्थम्। नन्वेकत्वनिमित्तानुपादाने द्विबह्वोरेकवचनं स्यादित्यत्राह — **द्वित्वेति**। ननु भाष्ये निषेध्यविग्रहः प्रागप्रस्तुतः, प्रस्तुतस्तु षष्ठ्यर्थविग्रहो निषेद्धव्यो न निषिद्ध इत्याशङ्क्य दूषणकीर्तनादेव षष्ठ्यर्थ[७]विग्रहनिषेध इति तदनिषेधेन, पञ्चम्यर्थविग्रहेऽपि बहुवचनान्तविग्रहनिषेधेन विशेषः प्रदर्श्यत इत्याह — **नेति**। प्रागुक्तम् — असर्वा विभक्तिर्यस्य सोऽसर्वविभक्तिरिति वृत्तिकारैर्व्याख्यातम्। तत्र नानार्थसंभवाद्विचारप्रवृत्तिः, इति। इदानीं तु वृत्तिकाराणां मतभेद उच्यत इति विरोधः। अत्राहुः — प्रागुक्तविग्रहः सर्ववृत्तावुपक्रमे, पश्चात्तु तदर्थप्रकटनं मतभेदेनेति। एवं विग्रहे को दोषः, तत्राह — [८]**एवं हीति**। यथा 'सर्वाण्यन्नानि भक्षयति' इत्युक्तौ सर्वप्रकारमन्नं भक्षयतीति गम्यते, न तथा 'सर्वमन्नं भक्षयति' इत्यत्र, अवयवकात्स्न्यादिस्तत्रावगमात्, तथात्रापीत्यर्थः। अपिशब्देन बहुवचनान्तविग्रहे प्रकारकात्स्न्यनियमाभावेऽपि संभवमात्रमित्युक्तम्। एकवचनान्तविग्रहे त्वसंभवस्तस्येति भावः। विभक्तौ च प्रकारो द्वितीयादिभेदः। तत्र यथा 'एष खलः सर्वनागरीगः' इति [९]भूतादिभिन्ननारीषु कतिपयनारीषु गमनेऽपि सर्वगतत्वं तथा द्वितीयादिभेदभिन्नविभक्तिष्वेकदेशोत्पत्तावपि सर्वविभक्तित्वम्। ननु दृष्टान्त एकैकपिण्डेऽपि नारीत्वम्, इह तु त्रिकस्यैव विभक्तित्वमित्येकवचनमात्रोत्पत्तौ विभक्तेरेवानुत्पत्तेः कुतः सर्वविभक्तित्वम्। नैष दोषः, विभक्तिशब्दस्य तदवयवे रूढत्वात्। यथा च सर्वप्रकारमपूपं भक्षितवानिति व्यपदेशस्तदेकदेशभक्षणेऽपि। तत् कस्य हेतोः, अपूपशब्दस्य तदवयवे निरूढत्वात्, तथात्रापि स्यादेव सर्वविभक्तित्वम्। एकवचनान्तविग्रहे किंकात्स्न्यं विवक्षितमित्यत आह — **द्रव्येति**। द्रव्यशब्देनैकवचनादेरभिधानम्। अवयवकात्स्न्यवृत्तिः सर्वशब्द इति विवक्षितम्। [१०]द्रव्यकात्स्न्यविवक्षायां तु प्रतिविभक्तिद्रव्यैकवचनोत्पत्तावपि सर्वविभक्तित्वापातः। यथास्यां सेनायां सर्वायुधेषु वह्निरिति प्रत्यायुधमेकदेशवह्न्युद्भवेऽपि व्यपदेशस्तथेति। न च प्रतिवचनं विभक्तित्वमिति पक्षाश्रयेण द्रव्यकात्स्न्यविवक्षायामप्यदोषः, 'त्रिकं पुनः' इति भाष्यसत्त्वात्। अन्ये तु टीकानुसारेण 'त्रिकं पुनः' इति भाष्यमिह प्रक्षिप्तमित्याहुः। प्रतिवचनं

---

[६] पा. सू. २. ४. ८४.

[१] सुबुत्पत्तेः — क.

[२] एकत्वस्य प्रकृते निमित्तत्वाभावेऽपीत्यर्थः।

[३] एकवचननिमित्ताभावादित्यर्थः।

[४] महाभाष्यम् २. ३. ४६.

[५] महाभाष्यम् २. ३. ४६.

[७] विग्रहे निषेध इति — क.

[८] प्रदीपे 'एवं विग्रहे' इत्यत्र 'एवं हि विग्रहे' इति पाठोऽभिमत इति भाति।

[९] आदिशब्देन भविष्यद्ग्रहणम्।

[१०] समुदायरूपेत्यादिः।

विभक्तित्वपक्षे प्रकारकात्स्न्र्ये सर्वविभक्तित्वापादनमपि सुगममिति। हरदत्तमिश्रैस्तु त्रिकविभक्तित्वाश्रयेणावयवकात्स्न्र्यवृत्तिरित्युक्तम्। **यदेति**। यदैकवचनशब्देन स्वादिप्रत्ययस्य क्रमेण बुद्धौ संनिधानं तदा 'प्रथमातिक्रमे' इति न्यायः। धान्यभक्षणाय खले कपोतानां युगपदुपस्थानं तत् खलेकपोतिकान्यायः। **तावतेति**। खलेकपोतिकान्यायादिति भावः॥

[१, ३०६–३०८]

(**लघुविवरणम्**) कृत्तद्धितानां ग्रहणाभावे दोषमाह भाष्यकारः — **तेषामिति**। यस्मात् कृत्तद्धितानां ग्रहणाभावे दोषस्तस्मादिति योजना। **यथेति**। तत्र कर्मशक्तिप्राधान्यम्। **वचनादिति**। [1]'अव्ययीभावश्च' इति। **यथेति**। कर्मप्रोक्तवन्तः कर्मप्रवचनीया इत्यन्वर्थत्वेऽपि वचनसामर्थ्यात् प्रवृत्तिनिमित्ताभावेऽपि कर्मप्रवचनीयसंज्ञेत्यर्थः॥

[१, ३०६–३०८]

(**विवरणम्**) भाष्यगतश्लोके **तत्र** अव्ययसंज्ञाविधावित्यर्थः। [2]'अभिनिश्रिता ये' इति यच्छब्दस्य तच्छब्दं विना साकाङ्क्षत्वादध्याहारेण पूरयति — **तन्निवृत्त्यर्थमिति**। पुनरुक्तिपरिहाराय शङ्कोत्तरत्वेनावतारयति — **नन्विति**। 'गोदौ, वरणाः' इत्यत्र [3]'वरणादिभ्यश्च' इति चातुरर्थिकस्य लुप्। [4]'लुपि युक्तवद्व्यक्तिवचने' इति युक्तवद्भावात् [5]प्रत्ययार्थस्य द्वित्वबहुत्वे। **इत्याह** इति शङ्कायामाहेत्यर्थः। [6]**सूत्रप्रबन्धः** सूत्रप्रवाहः। विशेष्यासंनिधानात् कथं तदन्तविधिरित्यत आह — **प्रयोजनमिति**। ननु [7]'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति कर्मवाचिना अत्यादीनां समास उच्यते, उच्चैःशब्दश्चाधिकरणशक्तिप्रधानो न कर्मवाचीति कथमतेस्तेन समास इत्यत आह — **शक्तीति**। **दोषामन्यमिति**। [8]"आत्ममाने खश्'। अत्र दोषाशब्दो द्वितीयार्थे वर्तते। दोषाभूतमित्यत्र तु प्रथमार्थे। **प्रश्नेऽपीति**। कर्मणोऽधिकरणत्वविवक्षयेत्यर्थः। 'सर्वासु च' इत्यनेन [9]नानाकारकशक्तियोगाभावो विवक्षित इत्यभिप्रेत्य तत्र युक्तिमाह — **तत्रेति**। **यथेति**। यद्यपि क्रियापद-[10]संनिधौ क्रियागतं विशेषं ये प्रोक्तवन्तो द्योतितवन्तस्ते क्रियापदसंनिध्यभावे क्रियाहेतुकसंबन्धविशेषद्योतनाय प्रयुज्यमानाः कर्मप्रवचनीयसंज्ञाः, अन्वर्थसंज्ञाविज्ञानात्। तथापि [11]स्वत्योः क्रियापदसंनिधावेव क्रियागतविशेषस्य द्योतकयोः [12]'सुः पूजायाम्' इत्यादिवचनसामर्थ्यात् कर्मप्रवचनीयसंज्ञा यथा तद्वदित्यर्थः। लिङ्गविशेषसंख्याविशेषानुपादानेऽव्ययानां हेतुमाह — **तत्रेति**। **सत्त्ववाचिनामिति**। स्वरादीनामिति शेषः। भाष्ये 'क्व पुनः' इति सप्तम्या [13]पृष्ट्वोत्तराभिधानसमये 'एतान्'

---

[1] पा. सू. १. १. ४१.
[2] अभिनिश्चिता ये — छ; ञ.
[3] पा. सू. ४. २. ८२.
[4] पा. सू. १. २. ५१.
[5] प्रत्ययस्य द्वित्व — ट.
[6] प्रदीपे 'सूत्रारम्भः' इत्यत्र 'सूत्रप्रबन्धः' इति पाठोऽभिमतः।
[7] महाभाष्यम् २. २. १८.
[8] पा. सू. ३. ३. ८३.
[9] 'नाना' इति नास्ति — ञ.
[10] संनिधाने — ट.
[11] 'स्वत्योः' इति नास्ति — ञ.
[12] पा. सू. १. ४. ९४.
[13] पृष्टोत्तराभिधान — छ, ञ.

इति [1]द्वितीयया निर्देशः कर्मण एवाधिकरणत्वविवक्षया [2]सप्तमीनिर्देश इति सूचनाय। एतेषु यन्न व्येति, किं तु सदृशमेकप्रकारं तदव्ययमिति योजना[3] श्लोकस्य॥

[१, ३०६–३०८]

(**उद्द्योतनम्**) 'असर्वविभक्त्यव्ययम्' इत्येव वक्तव्यम्, यथाश्रुतसूत्रपञ्चकं न कर्तव्यमित्येवंपरतया 'एवं गते' इति श्लोकं व्याचष्टे — **यदेति**। [4]**ज्ञात इति**। गत इत्यस्य व्याख्या। 'मान्तस्य' [5]इत्यनेनैजन्तस्य ग्रहणशङ्कां वारयति — **सूत्रोपलक्षणमिति**। भाष्यगतश्लोके **तत्र** अव्ययसंज्ञाविषय इत्यर्थः। 'सूत्र इत्यर्थः' इति तु चिन्त्यम्, अभेदेनाधारत्वासंभवात्। तथा च **ग्रहणं** [6]श्लोके, उच्चारणम्। [7]'कृन्मेजन्तः' इति सूत्रं न कर्तव्यमिति यावत्। 'कृदर्थाः' इत्यनेन 'योगाः' इत्यस्यानन्वयादुपसंहारत्वेन व्याचष्टे — **योगाश्चेति**। द्वितीयश्लोकं परिहारत्वेनावतारयति — **इदानीमिति**। **अतिव्याप्तीति**। एको 'द्वावित्यादावित्यादिः। 'तदर्थम्' इत्यध्याहारशङ्कां वारयति — **तन्निवृत्त्यर्थमिति**। भाष्ये [8]**अभिनिश्चिताः** आश्रिताः, संख्याविशेषप्रतिपादका इति यावत्। 'तेषाम्' इत्यस्य पूर्वैकवाक्यतानिवृत्तये व्याचष्टे — **असतीति**। भाष्ये 'ये' इत्यनन्तरम् 'अन्यथा' इत्यध्याहारोऽनेन सूचितः। ननु पञ्चसूत्र्या सर्वसंग्रहात् कृत्तद्धितानां पाठवचनमयुक्तम्, अत आह — **नन्विति**। [10]'पौनरुक्त्यपरिहाराय शङ्कोत्तरत्वेन व्याख्यानम्' इति तु न, पूर्वं [11]सूत्राणां कर्तव्यतोक्ता, इदानीं पाठस्येति [12]पौनरुक्त्यशङ्कानवकाशात्। **गोदाविति**। गोदयोरदूरभवः गौदौ, वरणाया अदूरभवो वरणाः, [13]'वरणादिभ्यश्च' इति चातुरर्थिकस्य लुप्। [14]'लुपि युक्तवद्व्यक्तिवचने' इति वचनान्तराभावः। **इत्याह** इत्यत आह। ननु तद्धितवत् कृतामपि पाठसंभवात् चतुस्सूत्री व्यर्था, अत आह — **तस्मादिति**। [15]**प्रबन्धः** समूहः। विशेष्यासंनिधानात् कथं तदन्तविधिः, अत आह — **प्रयोजनमिति**। [16]ननु [17]'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति कर्मार्थेन समासः, [18]उच्चैःशब्दस्त्वधिकरणशक्तिप्रधानो न[19] कर्मवाचीति कथं समासः, अत आह — **शक्तीति**। **दोषामन्यमिति**। [20]'आत्ममाने खश्च'। [21]'खित्यनव्ययस्य' इत्युक्तेर्न ह्रस्वमुमागमौ। दोषाशब्दोऽत्र

---

[1] द्वितीयानिर्देशः — अ.
[2] सप्तम्या निर्देशः — च, छ.
[3] 'योजना' इत्यस्यानन्तरम् 'अत्र' इत्यधिकम् — च, छ.
[4] प्रदीपे 'तदैवं विज्ञाते' इत्यत्र 'तदैवं ज्ञाते' इत्यन्नंभट्टपाठ इति भाति।
[5] इत्यनेनैजन्तस्याग्रहण — म.
[6] श्लोके ग्रहणमुच्चारणमित्यन्वयः।
[7] पा. सू. १. १. ३९.
[8] 'द्वौ' इत्यस्यानन्तरं 'बहवः' इत्यधिकम् —म.
[9] 'अभिनिश्रिताः' इति भाष्यस्थाने 'अभिनिश्चिताः' इति निर्णयसागरचौखाम्बामद्रपुरीमुद्रितेषु पाठः।
[10] विवरणोक्तिं खण्डयति — पौनरुक्त्येति।
[11] सूत्रकर्तव्यतोक्ता — म, आ.
[12] अपौनरुक्त्यात् — उ.
[13] पा. सू. ४. २. ८२.
[14] पा. सू. १. २. ५१.
[15] प्रदीपे 'प्रपञ्चार्थस्तु सूत्रारम्भः' इत्यत्र 'प्रपञ्चार्थस्तु सूत्रप्रबन्धः' इति पाठः 'उ' कोशे वर्तते। सोऽन्नंभट्टस्वीकृतः॥ प्रपञ्चः समूहः — अ, म; प्रपञ्चेति। प्रबन्धः समूहः — उ.
[16] 'ननु' इति नास्ति — म.
[17] महाभाष्यम् २. २. १८.
[18] उच्चैरशब्दश्चाधिकरण — अ, म, ऊ, ॠ.
[19] अकर्मवाचीति — ऊ.
[20] पा. सू. ३. २. ८३.
[21] पा. सू. ६. ३. ६६.

द्वितीयार्थे वर्तते। दोषाभूतमित्यत्र प्रथमार्थे। भाष्ये 'उपसर्जनेन तदन्तविधिर्न' इति 'अत्युच्चैसौ' इत्यत्राव्ययसंज्ञा न भविष्यतीत्यर्थः। गौरवं शङ्कते — भाष्ये **स तर्हीति**। भाष्ये **सर्वनामेति**। संज्ञोपसर्जनप्रतिषेधोऽत्रानुवर्तनीय इत्यर्थः। प्रत्याख्यातस्यात्र नानुवृत्तिः संभवतीति शङ्कते — भाष्ये **स इति**। प्रत्याख्यानमत्रापि समानमित्याह — भाष्ये **यथेति**। ननु 'अर्थान्' इत्यग्रिमभाष्यानुरोधात् 'कान्' इति वक्तव्यम्, न तु 'क्व' इति, अत आह — **श्लोक इति**। कर्मणोऽप्यधिकरणत्वविवक्षया तत्रापि सप्तमीति द्योतयितुं भाष्ये 'अर्थान्' इत्युक्तमिति भावः। सर्वलिङ्गसादृश्ये हेतुमाह — **लिङ्गेति**। अव्यये विभक्तिपरत्वासंभवात् करणव्युत्पत्त्या कारकग्रहणमित्याह — **कारकेष्विति**। **तत्रेति**। युक्तिकथनम्। वचनपरत्वस्याप्यसंभवादाह — **एकत्वेति**। [1]**यथेति**। कर्मप्रवचनीयसंज्ञाप्यन्वर्था। कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः। कर्मशब्देन क्रियोच्यते। अप्रयुज्यमानक्रियानिमित्तसंबन्ध[2]विशेषद्योतका इति यावत्। 'शाकल्यस्य संहितामनु प्रावर्षत्' इत्यत्राप्रयुज्यमान[3]पाठक्रियानिमित्तकस्य वर्षसंहितयोर्हेतुहेतुमद्भावसंबन्धस्यानुना द्योतनात्। तत्र 'सुसिक्तं भवता' इत्यादौ सेकगतपूजाद्योतकस्य सोरन्वर्थसंज्ञाभावेऽपि [4]"सुः पूजायाम्' इति वचनाद् यथा तत्संज्ञा तथात्रापीत्यर्थः। अव्ययानां [5]लिङ्गसंख्यायोगाभावे हेतुमाह — **तत्रेति**। [6]**सत्त्ववचनानामिति**। स्वर् इत्यादीनाम्। [7]एषु यन्न व्येति, किंतु सदृशमेव तदव्ययमिति श्लोकयोजना ॥

[१, ३०६–३०८]

(**रत्नप्रकाशः**) तदेतल्लक्षणं न कुत्राप्यव्ययेऽव्याप्तमित्यन्याव्ययसंज्ञाविधायकानि सूत्राणि न कार्याणीत्याह — **एवं गत इति**। **एवम्** उक्तप्रकारेण **गते** सर्वेषामभिमतानामव्ययत्वे सिद्धे सतीत्यर्थः। **कृत्यपीति**। **कृति** कृदन्ते, अपिशब्दात् स्वरादिनिपाते। **तुल्यमिति**। अव्ययत्वं सिद्धमिति भावः। किं तत इत्यत आह — **मान्तस्येति**। [8]**तत्र** अव्ययसंज्ञाविषये, **मान्तस्य** मान्तग्रहणघटितस्य [9]'कृन्मेजन्तः' इति सूत्रस्य, **ग्रहणम्** उच्चारणं न कर्तव्यमित्यर्थः। **ततः परे चेति**। [10]'कृन्मेजन्तः' इत्यतः परे, **अभिमताः** इष्टाः, **न कार्याः** नोच्चारणीयाः, **त्रयः** क्त्वातोसुन्कसुनः, **कृदर्थाः** कृतः प्रत्यया अर्था अनुकार्या येषां त इत्यर्थः। **ग्रहणेन** सूत्रत्वेन **योगाः** युक्ताः, [11]'क्त्वातोसुन्कसुनः' इति सूत्रं न कर्तव्यमिति यावत्। वक्रोक्तिस्तु छन्दोऽनुसारेण। [12]तत्र चकारोऽनुक्तसमुच्चयार्थः। तेन स्वरादिसूत्रमपि न कर्तव्यमिति सिद्धम्। [13]'अव्ययीभावश्च' इति तु कर्तव्यमेव परिगणनोपयोगितया। इदानीम् 'असर्वविभक्त्यव्ययम्' इति लक्षणमतिव्याप्तिग्रस्तमिति यथाश्रुतसूत्रपाठं समर्थयितुमाह — **कृत्तद्धितानां ग्रहणमिति**। 'तद्धितश्चासर्वविभक्तिः' [14]'कृन्मेजन्तः' [15]'क्त्वातोसुन्कसुनः' इति यथाश्रुतान्येव प्रपञ्चार्थानि सूत्राणि स्थापनीयानि, न तु प्रागुक्तप्रकारेण तत्रत्यस्य

---

[1] 'यथेति' इति नास्ति — अ, आ, ऋ.
[2] 'विशेष' इति नास्ति — म, आ.
[3] गमनक्रिया — अ, आ, ऋ; पाठगमनक्रिया — उ.
[4] पा. सू. १. ४. ९४.
[5] लिङ्गसंख्याभावे — अ.
[6] सत्त्ववाचिनामिति — म; सत्त्ववचनानामपीति — उ.
[7] येषु — अ, आ, ऋ.
[8] अत्र — ब.
[9] पा. सू. १. १. ३९.
[10] पा. सू. १. १. ३९.
[11] पा. सू. १. १. ४०.
[12] 'ततः परे च' इत्यत्रेत्यर्थः।
[13] पा. सू. १. १. ४१.
[14] पा. सू. १. १. ३९.
[15] पा. सू. १. १. ४०.

'असर्वविभक्तिः' इत्यस्याव्ययलक्षणसमर्पकताश्रयणीयेति भावः। तस्य तथात्वाश्रयणं कुतो न युज्यत इत्यत आह — **संख्याविशेषं ह्यभिनिश्चिता य इति**। **हि** यस्मात् **ये** शब्दाः, संख्याविशेषं प्रति नियता एकादयस्तेषामव्ययत्वं प्रतिषेद्धव्यम्। अतस्तदाश्रयणं न युज्यत इति भावः। **तस्मादिति**। यस्मात् 'असर्वविभक्त्यव्ययम्' इति लक्षणं न युज्यते तस्मादित्यर्थः। **स्वरादिग्रहणमिति**। [1]'स्वरादिनिपातमव्ययम्' इति सूत्रमेकमेवाव्ययसंज्ञाविधायकमाश्रित्य स्वरादिष्वेव कृतस्तद्धिताश्च पठनीया इति भावः। अन्यानि तु तत्प्रपञ्चार्थानीत्युक्तमेव। एवं च पचतिरूपम्, पचतोरूपम्, पचन्तिरूपम्, गौदौ, वरणाः, अङ्गाः, इत्यादौ तद्धितान्तत्वेऽसर्वविभक्तित्वे च सत्यपि न दोषः, तेषां स्वरादिपठिततद्धितान्तत्वाभावात्। यत्तूक्तम् 'उभयशब्दस्य द्विवचनानुत्पादादसर्वविभक्तित्वम्' इति। तन्न, वृत्तिमात्रघटकोभयशब्दस्य द्विवचनमात्रोत्पादकत्वेन तयादेशायजन्तोभयशब्दस्य वचनत्रयोत्पादकत्वेन च 'द्विवचनानुत्पादात्' इति हेतोः स्वरूपासिद्धेः। **तदन्तविधिनेति**। [2]'येन विधिः' इत्यादिना। एतेन "[3]'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वचनेनेत्यर्थः" इति निरस्तम्। प्रयोजनवार्तिकेन तन्मूलभूतसूत्रोपेक्षायोगात्। **अत्युच्चैसाविति**। [4]"अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। उच्चैरित्याद्यव्ययार्थस्य कर्मत्वादिसंभवेन तेभ्यो द्वितीयाद्युत्पत्तिर्बोध्या। यत्तु 'शक्तिप्रधानान्यप्यव्ययानि वृत्तिविषये शक्तिमत्प्रधानानि भवन्ति। यथा दोषामन्यमहः, दोषाभूतमहः, इति। तत उच्चैःशब्दस्य प्रक्रियायां द्वितीयान्तस्य समासः' इति। तन्न, इदानीं रात्रिः, इदानीमहः, इतिवत् 'इदानीं दोषा, इदानीं दिवा, उच्चैः पुरुषः' इत्यादौ वृत्तिभिन्नस्थलेऽपि शक्तिमत्प्राधान्यस्य दृष्टत्वेन तेषामव्ययानां शक्तिप्राधान्यनियमे मानाभावात्। यद्युच्येत 'प्रथमान्तमपि कारकविभक्तिरिति तत्रापि तेषां शक्तिप्राधान्यम्' इति तर्हि 'दोषा चरमभागः, दिवा पूर्वभागः, उच्चैः पुरुषस्य स्वम्' इत्यादौ शक्तिप्राधान्याभावो ज्ञेयः। न च तत्र वृत्तित्वमेवेति वाच्यम्, ऐकस्वर्याभावेन तदयोगात्। **क्व पुनर्न व्येतीति**। गत्यर्थकर्मण आधारत्वमपि दृश्यते 'ग्रामे गच्छति' इति 'क्व न व्येति, इति प्रश्नः, 'एतानर्थान् ये **न वियन्ति** न प्रानुवन्ति, तान्यव्ययानि' इत्युत्तरं चोपपन्नम्। एतेन 'श्लोके सप्तमीनिर्देशात् प्रश्नेऽपि सप्तमी निर्दिष्टा' इति निरस्तम्। [5]"सदृशं त्रिषु' इत्यादिश्लोकस्य ऋग्रूपत्वेन तत्र सप्तमी दृष्टेत्येतावन्मात्रेण तदवलम्बनेन लौकिकप्रश्नोपपादनानौचित्यात्। तद्व्यधिकरणोत्तरस्यानुपपादनाच्च। **सत्त्वगुणा इति**। द्रव्यगुणा इत्यर्थः। ब्रह्मणोऽव्ययत्वकथनपरा श्रुतिः स्वरादीनामव्ययत्वकथनपरतयापि योजयितुं शक्यत इत्याशयेनाह — **सदृशं त्रिषु लिङ्गेष्विति**। तत्र सादृश्यमौदासीन्यं बोध्यम्, उदासीनं सद् यन्न व्येतीत्यन्वयात्, न तु सर्वलिङ्गादियोगः, तस्यासंभवात्। न हि ब्रह्मणि स्वरादिषुं वा स संभवति। **विभक्तिष्विति**। विभक्त्यर्थेष्वित्यर्थः। एतेन 'कारकेष्वित्यर्थः' इति निरस्तम्। संकोचे मानाभावात्। **वचनेष्विति**। एकत्वादिष्वित्यर्थः। अव्ययीभावस्य पृथगेवाव्ययसंज्ञाया विधीयमानत्वेन लिङ्गकारकयोगेऽपि न दोषः। एवमेव हि स्वत्यादीनां कर्माप्रोक्तवतां वचनादेव कर्मप्रवचनीयसंज्ञा। **न व्येतीति**। विविधं न गच्छतीत्यर्थः॥

[१, ३०६–३०८]

(नारायणीयम्) 'एवम्' इत्यस्यार्थमाह — **यदेति**। **विज्ञात इति**। गतशब्दार्थकथनम्।

---

[1] पा. सू. १. १. ३७.
[2] पा. सू. १. १. ७२.
[3] का.वा. १. १. ७२—८.
[4] महाभाष्यम् २. २. १८.
[5] प्रणवोपनिषत्.

एतल्लक्षणस्य कृदादिष्विष्टत्वं कथम्, तद्धितग्रहणात्, अत आह — **पञ्चेति** । [1]कृन्मात्रेऽसर्वविभक्तित्वाभावादाह — **यस्येति** । संज्ञा तु कृतो विधेया, विशेषणं न देयमिति भ्रान्तिं वारयति — **सूत्रेति** । मान्तग्रहणस्य सूत्रोपलक्षणत्वात् तच्छब्देन तस्यैव परामर्श इत्याह — **कृदिति** । कृदर्थास्त्रयो योगा न कार्या इति न संभवति, कृत्सूत्रपरयोगत्रयस्याभावात्, एकस्य कृदर्थत्वेनापरस्य कृदर्थत्वाभावाच्च । अतो व्याचष्टे — **कृदिति** । श्लोकपूरणार्थमुक्तस्यार्थमाह — **उच्चारणेनेति** । 'योगाः' इत्येतत् तर्ह्यनन्वितमित्यत आह — **योगाश्चेति** । स्वरादिसूत्रव्यतिरिक्तानामवक्तव्यत्वस्योक्तत्वात् तदवक्तव्यत्वोक्तिर्बहुवचनेन किमर्थेत्यत्राह — **उपेति** । विशेषमभिनिश्रिता ये तेषां कृत्तद्धितानां ग्रहणं कार्यमित्यन्वयभ्रमं व्युदस्यन् व्याचष्टे — **इदानीमिति** । तद्धितग्रहणमात्रादेकादिष्वतिव्याप्तिनिरासात् कृद्ग्रहणकर्तव्यत्वोक्तिः कथमित्याशङ्क्य नातिव्याप्तिनिरासाय तत्कर्तव्यतोक्तिः, किं त्वव्याप्तिनिरासाय । कृद्ग्रहणं चोपलक्षणमित्याह — **तस्मिन्निति** । अतिव्याप्तिपरिहारार्थमित्युक्तमेव सोपस्कारं पदान्वयकीर्तनेन स्पष्टयति — **तदिति** । तद्धितग्रहणे कृते किमर्थं प्रतिषेधवचनम्, अत आह — **असतीति** । तद्धितग्रहणेन [2]प्रतिषेधानारम्भश्चेत् स्वरादिग्रहणकर्तव्यत्वोक्तिरयुक्तेत्यत्राह[3] — **स्वरादीनामिति** । सूत्रस्थतद्धितग्रहणेनातिव्याप्तिनिराससिद्धेर्गणेऽपि कृत्तद्धितग्रहणं किमर्थम्, अत्राह — **नन्विति** । सामान्योक्तिं विशेषे व्यवस्थापयति — **येषामिति** । [4]स्वरादिगण एवाव्ययसंज्ञाभाजः पठनीयाश्चेत् किं सूत्रप्रबन्धेन, तत्राह — **प्रपञ्चेति** । [5]'ग्रहणवता' इति [6]निषेधादाह — **प्रयोजनमिति** । असत्त्वभूतार्थवाचित्वादव्ययस्याद्वितीयान्तत्वात् समासायोगमाशङ्क्याह — **शक्तीति** । विविधगमनं प्रति [7]कर्मत्वं लिङ्गादेः, [8]विषयभावात्त्वधिकरणत्वमपि । तत्र मुख्यं कर्मत्वमविवक्षित्वा काथंचित्कमधिकरणत्वं किमिति विवक्षितमित्याशङ्क्य श्लोकावतरणार्थत्वादस्य प्रश्नस्य तद्वत् सप्तमीनिर्देश इत्याह — **श्लोक इति** । लिङ्गत्रययोगीति भ्रमं वारयति — **लिङ्गेति** । यथास्य दरिद्रस्य सर्वर्तुषु समानो भोग इत्युक्ते न कुत्रापि भोग इति गम्यते तद्वल्लिङ्गाभावो विवक्षित इत्यर्थः। विविधगमनविषयनिषेधपरत्वाद्वाक्यस्य [9]शास्त्रीयविभक्तिर्न गृह्यत इत्याह — **कारकेष्विति** । विभज्यते या [10]प्रातिपदिकार्थादिति विभक्तिशब्देन कारकशक्त्यभिधानम् । प्रातिपदिकार्थातिरिक्तशक्त्यभावो विवक्षित इत्याह — **तत्रेति** । वचनशब्देन पूर्वाचार्यप्रसिद्धया संख्योच्यते, नैकवचनादीत्याह — **एकत्वेति** । इत्थं व्याख्याने तु निमित्तमभिहितम् । उक्तप्रवृत्तिनिमित्तहीनस्य कथमव्ययत्वम्, अत आह — **अव्ययीभावस्येति** । [11]'अव्ययीभावश्च' इति प्रतिपदवचनात् । **यथेति** । कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति सांप्रतिकक्रियाविशेषकत्वाभावो निमित्तम् । वचनात्तु स्वादीनां संप्रति क्रियाविशेषकाणां संज्ञा । अव्यये लिङ्गाद्ययोगे निमित्तमस्ति, उत स्वभावः शरणमित्यपेक्षायामस्ति क्वचिन्निमित्तम्, अन्यत्र तु स्वभावः शरणमित्याह[12] — **तत्रेति** ॥

---

[6] निषेधमाह — क.

[1] कृन्मात्रेऽसर्वविभक्तित्वादाह — क.

[2] प्रतिषेधारम्भश्चेत् — क.

[3] इत्यत्राह — स्यादिति । तदर्थमिति । सूत्रस्थ — क.

[4] स्वरादिग्रहण एवाव्यय — क.

[5] परिभाषा ३१.

[7] कर्तृत्वं — क.

[8] विषयाभावात्तु — क.

[9] शास्त्रविभक्तिः — क.

[10] प्रातिपदिकादिति — क.

[11] पा. सू. १. १. ४१.

[12] इत्यत्राह — क.

कृन्मेजन्तः १. १. ३९.

[१, ३०८–३१०]

(**लघुविवरणम्**) **किमिति** । किं श्रुतत्वात् कृदेव मेजन्तस्य विशेष्यः, किं वा कृता तदन्तविधौ प्राधान्यात् कृदन्तं विशेष्यमिति प्रश्नाभिप्रायः । **लिडन्त्रेति** । अतिङभावित्वेन नात्र [1]'अतिङ' इति कृत्संज्ञाप्रतिषेधः । अकजर्थं तर्ह्यामन्तस्याव्ययसंज्ञैषितव्या, नेत्याह — **अकच् त्विति** । **अपरीति** । अत एवानुप्रयोगः प्रार्थ्यते । तर्ह्यामन्तार्थस्य प्रकर्षः कुत उत्पन्नेन द्योतनीय इत्यत आह— [2]**अनुप्रयोग इति** । **समाप्तार्थत्वं** नाम संख्यादिविशिष्टकर्त्राद्यभिधायित्वम् । कीदृशस्य तुल्यजातीयस्येत्यत आह — **धातोरिति** । मान्तस्यैव ज्ञापकेन निवृत्तिरित्यतः परिहारान्तरमाह — **लाक्षणिकेति** ॥

[१, ३०८–३१०]

(**विवरणम्**) किं कृतो मेजन्तस्य प्रत्ययमात्रस्याव्ययसंज्ञा, उत कृदन्तस्येति न शङ्कार्थः, [3]'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति तदन्तविधेः । किं तु पश्चात् कृता तदन्तविधिः पूर्वं वेति शङ्कार्थ इत्याह — **किमिति** । **लिडिति** । तिङभावित्वाभावादिति भावः । **प्रतामाविति** । तमेः [4]क्विप्, [5]'अनुनासिकस्य क्विझलोः' इति दीर्घः । **श्रुत्या चेति** । तथा चाव्ययत्वाल्लुक् स्यादिति भावः । अकजर्थं तर्ह्यामन्तस्याव्ययसंज्ञैषितव्येत्यत आह — **अकच् त्विति** । [6]**अपरिसमाप्तार्थत्वं** संख्याविशेषावच्छिन्नकर्त्रादिप्रतीत्यजनकत्वम् । अत एवानुप्रयोगः प्रार्थ्यते । [7]आमन्तार्थप्रकर्षादिप्रतीतिस्तर्हि कथमित्यत आह — **अनुप्रयोग इति** । तुल्यजातीयत्वं च धातुत्वेनाह — **धातोरिति** । अत्यन्तसजातीयत्वान्मान्तस्यैव धातोर्ज्ञापकेन[8] निवृत्तिरिति चेत्, तत्राह — **लाक्षणिकत्वाद्वेति** ॥

[१, ३०८–३१०]

(**उद्द्योतनम्**) मेजन्तस्य कृत्प्रत्ययस्य वा संज्ञा कृदन्तस्य वेति न[9] संशयार्थः, [10]'प्रयोजनम्' इत्यादिना तदन्तविध्यङ्गीकारात्, प्रत्ययमात्रात् सुपोऽनुत्पत्त्या [11]'अव्ययात्' इति लुगभावप्रसङ्गाच्च । किं तु पश्चात् कृता तदन्तविधिः पूर्वं वेति संशयार्थ इत्यभिप्रेत्याह — **किमिति** । [12]'प्रयोजनम्' इत्यस्यापुरस्कारेऽप्यन्वर्थसंज्ञासामर्थ्यादत्र तदन्तविधिरित्याह — **अथवेति** । नन्वामः कृतो मान्तत्वमस्ति, अत आह — [13]**लिडन्त्रेति** । आमस्तृतीयधात्वधिकारे विहितत्वाभावान्न कृत्संज्ञेत्याशयः ।

---

[1] पा. सू. ३. १. ९३.
[2] अनुप्रयोगत इति — ड, ढ, त.
[3] का. वा. १. १. ७२–८.
[4] क्विपि — च, छ.
[5] पा. सू. ६. ४. १५.
[6] 'अपरीति ।' इत्यस्यानन्तरम् 'अत एवानुप्रयोगः' इत्येवास्ति — ञ.
[7] तर्ह्यामन्तार्थप्रकर्षः कुत उत्पन्नेन द्योतनीय इत्यत आह — ञ.
[8] 'ज्ञापकेन' इति नास्ति — च, छ.
[9] 'न' इति न दृश्यते — अ, म.
[10] का. वा. १. १. ७२–८.
[11] पा. सू. २. ४. ८२.
[12] का. वा. १. १. ७२–८.
[13] तत्रेति — अ, इ, ऊ.

प्रतामाविति। तमेः क्विप्, [१]'अनुनासिकस्य क्विझलोः' इति दीर्घः। [२]तत्र [३]'अव्ययात्' इति लुक्-प्रसङ्गः। **नन्विति**। [४]'एकवचनमुत्सर्गतः करिष्यते' इति प्राथम्यात् सुरेव, तस्यान्यत एव लोपः सिद्ध इति भावः। द्विवचनादिलोपाय [५]'तत्र लुगेषितव्य इति तत्प्रसक्तिपूर्वकमाह — **यदेति**। 'मा भूत्' इत्ययुक्तम्, अकजर्थं संज्ञाया आवश्यकत्वात्, अत आह — **अकजिति**। **अपरिसमाप्तार्थत्वं** संख्यावच्छिन्नकर्त्राद्यनभिधायित्वम्। **पूर्वोक्तादिति**। असमाप्तार्थत्वात्। 'पूर्वोक्तात्' इत्येतदेवाह — **समाप्तेति**। ज्ञापकत्वमेवाह — **तत्रेति**। [६]'कृञ् च' इति [७]सूत्रेऽनुशब्दान्न पूर्वं प्रयोगः, नापि व्यवधानेनेति वक्ष्यत इत्यर्थः। [८]'प्रशान्शब्दस्यामान्तत्वादप्राप्तसंज्ञाविधानाय तत्पाठ इति न [९]मान्तानामनव्ययत्वज्ञापकः, अत आह — **तस्येति**। प्रकृत्यन्तरत्वे मानाभावादिति भावः। अतिप्रसङ्गं निराह — **तुल्यजातीयस्येति**। धातुत्वेनेत्यादिः। ननु 'प्रशान्' इति नान्तधातोरेव रूपम्, अतो न ज्ञापकत्वम्, अत आह — **शान [१०]तेजन इतीति**। **लावयतेरिति**। ण्यन्तात् क्विपि णिलोपे [११]'क्वौ लुप्तं न स्थानिवत्' इति स्थानिवत्त्वनिषेधात् [१२]'च्छ्वोः शूठ्' इत्यूठि कृते [१३]'एत्येधत्यूठ्सु' इति वृद्धौ लौरिति भवति। तस्य प्रत्ययलक्षणेन कृदन्तत्वादेजन्तत्वाच्चाव्ययसंज्ञा प्राप्ता, [१४]उक्तज्ञापकादेव निरस्तेत्यर्थः। अत्यन्तसजातीयतया मान्तधातोरेव निवृत्तिश्चेदाह — **लाक्षणिकत्वाद्वेति**॥

[१, ३०८–३१०]

(**रत्नप्रकाशः**) **कृद्यो मान्त इति**। तदन्त इति शेषः। **कृदन्तमिति**। ज्ञापकसिद्धस्यासार्वत्रिकत्वात् संज्ञाविधावपि तदन्तविधिः, अन्वर्थसंज्ञाबलाच्च, प्रत्ययान्तस्यैव खलु व्ययसंभवः। **कारयामिति**। लिङत्र कृत्, स मान्तो न भवति। **प्रतामाविति**। क्विपि लुप्ते प्रत्ययलक्षणेन कृदन्तम्, श्रुत्या च मान्तम्। **अव्ययादिति लुगिति**। प्रथमैकवचनमात्रस्य हल्ङ्यादिलोपसंभवेऽपि अम्टादीनां [१५]तन्न संभवतीति भावः। यदि 'प्रातिपदिकार्थे प्रथमैव' इति नियमादव्ययसाधारणात् 'पचन्तिरूपम्' इत्यादाविव प्रथमैकवचनमात्रमव्ययाद् भवतीत्युच्यते तर्हि हल्ङ्यादिलोपेनापि सिद्धम्। एतेन 'यदा तर्ह्यनुप्रयोगवशाद् द्वित्वबहुत्वावगतिस्तदा द्विवचनबहुवचनयोरुत्पत्तिरिति लुगेषितव्यः' इति निरस्तम्। 'पचतोरूपम्, पचन्तिरूपम्' इत्यत्रापि द्विवचनबहुवचनप्रसङ्गात्। यदप्युक्तम् 'अकज् न भवति, अपरिसमाप्तार्थकत्वादज्ञातादिभिर्योगाभावात्' इति। तदपि न, वाक्यस्यैव परिसमाप्तार्थकत्वेनाकज्विधानवैयर्थ्यापत्तेः। यथालक्षणं 'कारयकांचकार' इत्यादिप्रयोगस्यैवाज्ञातादावभ्युपगन्तुमुचितत्वाच्च। यदप्युक्तम् '**इष्यते चेति**। पूर्वोक्ताद्धेतोस्तरबाद्यनत्पादादनुप्रयोग एव तरबाद्युत्पत्तिः, समाप्तार्थस्य प्रकर्षादियोगादित्यर्थः' इति। तदपि न, आमन्तार्थप्रकर्षविवक्षायां

---

[१] पा. सू. ६. ४. १५.
[२] अत्र — इ, उ, ऊ.
[३] पा. सू. २. ४. ८२.
[४] महाभाष्यम्. १. १. ३८. एकवचनमुत्सर्ग इति — उ, ऊ, ऋ.
[५] 'तत्र' इति नास्ति — म, उ, ऊ, ऋ.
[६] पा. सू. ३. १. ४०.
[७] सूत्रेऽनुपसर्गान्न पूर्वं — म.
[८] प्रशान्शब्दस्य नान्तत्वात् — म, उ; प्रशान्शब्दस्य मान्तत्वाभावात् — इ, ऊ.
[९] मान्तानामव्ययत्व — अ, म, आ; मान्तानव्ययत्व — उ.
[१०] तेजन इति — अ, म, उ.
[११] महाभाष्यम्. १. १. ५८.
[१२] पा. सू. ६. ४. १९.
[१३] पा. सू. ६. १. ८९.
[१४] 'उक्त' इति नास्ति — म, आ.
[१५] लोपशब्दार्थादर्शनमित्यर्थः।

तत्रापि तरबादिकं भवति, तस्यापि [1]'आमः' इति लुग् भवतीत्येतदभिप्रायेणैव तद्भाष्यस्य प्रवृत्तत्वात्। अन्यथा 'प्रत्ययमात्रस्य लुक् स्यात्' इति शङ्कायाः, तदुत्तरस्य [2]'इष्यत एव' इत्यादेश्च निर्विषयतापत्तेः। **तत एतदुपपन्नमिति**। आमन्ताव्यवधानेनानुप्रयोगविधानमिति शेषः। **प्रशान्शब्दमिति**। तस्य [3]'मो नो धातोः' इति नत्वस्यासिद्धत्वादव्ययत्वं सिद्धमिति धात्ववयवमकारान्तस्याव्ययत्वं नेति तेन ज्ञाप्यत इति भावः। न च प्रशानिति 'शान तेजने' इत्यस्य रूपमिति न ज्ञापकता तस्येति वाच्यम्, शमेरेव समानार्थकत्वसंभवः, न तु शानेरित्यस्येत्यत्र भगवतस्तात्पर्यात्। 'प्रशान्' इति हि समानार्थकम्। अत एव समानार्थकस्य तस्य लिङ्गाद्ययोगिनः स्वरादित्वादव्ययत्वेऽप्यन्यार्थस्य 'प्रशामौ' इत्यादि प्राचीनानामभिमतं रूपमुपपन्नं भवति। साहचर्यस्यानित्यत्वेन 'अम्, आम्' इति तद्धितमध्ये पठितेनाप्याम्शब्देन [4]'कास्प्रत्ययात्' इत्यादिविहितस्यामो ग्रहणसंभवेन 'कृद्यो मान्तः' इति पक्षेऽपि 'कारयाम्' इत्यादेरव्ययत्वं सिद्धमिति पक्षद्वयसमता बोध्या। एतेन "'शान तेजने' इत्यस्य प्रशानिति रूपं न भवति, तस्य क्विबन्तस्य प्रयोगादर्शनात्। अत एव लावयतेर्लौरिति न भवति" इति निरस्तम्। एतादृशक्लिष्टकल्पनापेक्षया कस्यचिद्वचनस्यैव स्वीकर्तव्यौचित्यात्। शानधातोः क्विबन्तस्य प्रयोगेऽपि भिन्नार्थेन तेनान्यथासिद्ध्यसंभवात्। एजन्तांशे वार्तिककारैरेवातिप्रसङ्गवारणस्य वक्ष्यमाणत्वेनात्र लावयतेर्लौरिति रूपनिषेधस्याप्ययोगाच्च ॥

[१, ३०८–३१०]

(**नारायणीयम्**) कृता तदन्तविधिसत्त्वासत्त्वसंदेहात् प्रश्न इति भाति। तदयुक्तम्, वाचनिकतदन्तविधौ विवादाभावात्। तस्मादनुभूतविशेषणेन कृता किं संज्ञाभाजो विशेषणम्, उत कृता विशेषिते संज्ञिनि मेजन्तविशेषणप्रवृत्तिरिति संदेह इत्याह — **किमिति**। 'कृद्यः' इति भाष्यं तु मेजन्तविशेषणस्य कृत्यन्वयप्रदर्शनपरम्, न तु कृता तदन्तविध्यभाव[5]प्रदर्शनपरमित्यर्थः। [6]**अगमनमिति**। संसर्गवद्विप्रयोगस्य विशेषस्मृतिहेतुत्वात् संभावितनानागमनस्यैव प्रातिपदिकस्य नानागमनाभावो विशेषणमिति सामर्थ्यलभ्यस्तदन्तविधिरित्यर्थः। तदन्तविधिकल्पने निमित्तसमर्थनसंभवे वचनान्निमित्तविधुरस्यापि संज्ञेति कल्पना नेत्यभिप्रायः। पक्षान्तरे वा कथं सिद्धिः, अत आह — **लिङत्रेति**। तिङ्भाविनो लकारस्य कृत्संज्ञाप्रतिषेधेन। लुग्भावी चायम्। कृतोऽदर्शनात् कथं कृदन्तत्वम्, अत आह — **क्विपीति**। **नन्विति**। कर्माद्यभावाद् द्वितीयाद्यभाव इति भावः। **यदेति**। न चानुप्रयोगनिष्ठ[7]तिङ....। अकच्प्रयोजनं कस्मान्नोक्तमित्यत्राह — **अकजिति**। **अपरिसमाप्तेति**। परिपूर्णस्वार्थस्याज्ञातादियोगः। तदुक्तम् "अपेक्षमाणश्च कृत्स्नमात्मानम्' इति। इह च स्वार्थापरिपूर्तिः। आमन्तात् कालविशेषमात्रावगमात् संख्यासाधनोप[8]ग्रहानवगमात्। अत एवानुप्रयोगाकाङ्क्षा। प्रत्ययमात्रलुगिष्टेरभिधानादामन्तात् तरबाद्युत्पत्त्यङ्गी-

---

[1] पा. सू. २. ४. ८१.

[2] एवमेवास्य ग्रन्थस्य छायायामप्यनुवादो दृश्यते। भाष्ये 'इष्यते च' इत्यत्र चकारस्यैवार्थकत्वमभिप्रेत्यैवमनुवादः कृत इति बोध्यम्, पूर्वं चकारघटितस्यैवानुवादात्।

[3] पा. सू. ८. २. ६४.

[4] पा. सू. ३. १. ३५.

[5] प्रदर्शनमित्यर्थः — क.

[6] प्रदीपे 'नानागमनमनानागमनं वा' इत्यत्र 'नानागमनमगमनं वा' इति निर्णयसागरमुद्रिते पाठः।

[7] 'तिङ' इत्यस्यानन्तरं ग्रन्थपात इति भाति — क.

[8] महाभाष्यम् ५. ३. ७३.

[9] उपग्रहशब्देन परस्मैपदात्मनपदे उच्येते। अत्र पुरुष उच्यत इति भाति।

कार इत्याशङ्क्य लुक्छब्देनाभावमात्रविवक्षा, न प्रसक्तादर्शनविवक्षेत्याह — **पूर्वेति** । लिग्रहण-निवृत्त्या प्रत्ययमात्रलुकि न ज्ञापकोपन्यासः, किं तु न्यायसिद्धतरबाद्यनुत्पत्तौ लिङ्गमप्युपन्यस्यत इत्याह — **अत्रैवेति** । अनुशब्दस्य पश्चाद्भावमात्र[1]बोधकत्वात् कथमनुप्रयोगवचनं तरबाद्यभावे ज्ञापकमित्यत्राह — [2]**तत्र हीति** । अनभिव्यक्तपदार्थत्वादनुप्रयोगे सिद्धे[3]ऽनुवचनादव्यवहितपश्चाद्-भावप्रतिपत्तिरिति ज्ञापकमेवेत्यर्थः । नान्तस्याव्ययत्वाप्राप्तौ विध्यर्थः पाठ इति कथं ज्ञापकमित्यत आह — [4]**तस्येति** । प्रत्ययलक्षणाभावज्ञापने आमन्तेऽपि न स्यादित्यत आह — **तुल्येति** । शमेः पाठश्चेत् ज्ञापकः स्यात्, तत्रैव तु न प्रमाणमिति शङ्कां निरस्यति — **शानेति** । तुल्यजातीयतया मान्तस्यैव व्यावृत्तिरिति भ्रमं वारयति — **लावयतेरिति** ॥

[१, ३१०–३१५]

(**लघुविवरणम्**) **अन्तरङ्गत्वादेवेति** । सुब्मात्रापेक्षत्वाल्लुकोऽन्तरङ्गत्वम् । [5]अत्र विषये तद्गताज्लक्षणविशेषापेक्षत्वाद् बहिरङ्गत्वमयादेः । तस्मिन्नाश्रिते प्रतिपदोक्तस्यैव ग्रहणमित्यत्र युक्तिमाह — [6]**लाक्षणिकं हीति** । **तद्विघातस्येति** । हन्तेः कर्मण्यणि रूपम् । व्यापकत्वाद् बहि-रङ्गपरिभाषैवाश्रयितव्येत्याह — **यदपीति** । तुग्विधौ संनिपातपरिभाषाश्रयणे दोषमाह — **यदि त्विति** । **नन्विति** । समासार्थमित्यर्थः । [7]बहुव्रीह्यर्थमन्तग्रहणं किमर्थमित्यत आह — **संख्येति** । **दीर्घत्वस्येति** । ननु तपरकरणाट्टापा सह सवर्णदीर्घो [8]व्यावर्त्यताम्, टापः कथं व्यावृत्तिः, एवं हि न लक्षणद्वयस्य बाधः । किं त्वेकादेशलक्षणस्यैव । तथा च टापा व्यवधानादानन्तर्यविघातः स्यादिति संनिपातपरिभाषया टापो व्यावृत्तिर्वक्तव्येति कथं तत्प्रयोजननिराकरणं तपरकरणेनेति चिन्त्यमेतत् ॥

[१, ३१०–३१५]

(**विवरणम्**) आङ्पूर्वाद्धाञ्ञ [9]'उपसर्गे घोः किः' [10]'आतो लोप इटि च'। चिकीर्षशब्दात् [11]'सनाशंसभिक्ष उः'। आभ्यां चतुर्थ्येकवचने पञ्चम्येकवचने च [12]'घेर्ङिति' इति गुणे कृते सुबन-पेक्षत्वेनान्तरङ्गत्वादव्ययसंज्ञायामत्र सुब्गताजपेक्षादयादेः सुब्मात्रापेक्षो लुगन्तरङ्गत्वात् [13]स्यादित्यत आह — **गुणे कृत इत्यादिना**। अपेक्षिते तस्मिन् नातिप्रसङ्ग इत्याह — **लाक्षणिकमिति**। **तमिति**। अनेन 'तद्विघातस्य' इति कर्मण्यणित्युक्तं भवति। **पूर्वेति**। [14]'अलुगुत्तरपदे' इत्यधिकारात् [15]पूर्वपदस्याक्षेपादिति भावः। यत्समवेतोऽवयवी [16]स तस्यावयवः। न चावयवावयवे स्वयं समवेतः,

---

[1] बोधितत्वात् — क.
[2] तत्रैवेति — क.
[3] अनुशब्दवचनादित्यर्थः।
[4] तस्य हीति — क.
[5] अन्तविषये — ढ.
[6] लाक्षणिकं त्विति — ड, ढ, ण.
[7] बहुव्रीह्यर्थं किमर्थमन्तग्रहणमित्यत आह—ड, ढ.
[8] व्यावर्तताम् — त.
[9] पा. सू. ३. ३. ९२.
[10] पा. सू. ६. ४. ६४.
[11] पा. सू. ३. २. १६८.
[12] पा. सू. ७. ३. १११.
[13] स्यादित्याह — च, छ.
[14] पा. सू. ६. ३. १.
[15] पूर्वपदस्यापेक्षणादिति — ञ.
[16] सोऽस्यावयवः — ञ.

अन्यथा घटस्य परमाणुष्वपि[1] समवेतत्वे प्रत्यक्षाप्रत्यक्षसमवेतत्वेन वायुवनस्पतिसंयोगवदप्रत्यक्षत्वं स्यादित्यभिप्रेत्याह — **अवयवेति**। व्यापकत्वादसिद्धपरिभाषैवाश्रयणीयेत्याह — **यदपीति**। तुग्विधौ संनिपातपरिभाषाश्रयणे दोषमाह — **यदि त्विति**। भिसि [2]'स्वादिषु' इति पदत्वान्नलोपः सुबपेक्षत्वेन तन्निरपेक्षतुगपेक्षया बहिरङ्ग इत्यसिद्धपरिभाषापि संभवतीत्यभिप्रेत्याह — **असिद्धमिति**। **ने कर्तव्य इति**। अन्यथा [3]'मुभावस्यासिद्धत्वान्नाभाव एव तावन्न स्यादिति भावः। **दीर्घप्रसङ्ग इति**। शास्त्रासिद्धत्वाश्रयणादिति भावः। नन्वेवमपि टाया आदेशं नाभावं प्रत्येव मुभावस्य सिद्धत्वाद् दीर्घः स्यादेवेत्यत आह — **अनेकेति**। अनेकविभक्तिकपूर्वपद इत्यर्थः। संबन्धसामान्यविषयषष्ठीसमास इति तात्पर्यम्। **एज्विषय इति**। [4]'दीङां ल्यपि च' इति चकारेणेत्यर्थः। **नन्विति**। समासार्थमित्यर्थः। **तत्रावयवस्येति**। उपलक्षणमेतत्। अन्तरङ्गत्वात् समासात् प्रागेव प्राप्नोति ङीबित्यपि द्रष्टव्यम्। ननु [5]'न षट्स्वस्रादिभ्यः' इति [6]निषेधान्ङीबभावः कस्मान्नोक्त इत्यत आह — **ज्ञापकादिति**। **विभक्तीति**। सर्वनामस्थाने विधानान्नुमागमो विभक्तिसंनिपातनिमित्तः। **अन्तग्रहणमिति**। तत्सामर्थ्यादिति मन्यते। सामर्थ्यमसिद्धमिति परिहरति — **संख्येति**। ननु द्वन्द्वमात्रं निर्दिश्यताम्, किं बहुव्रीहिणेत्यतः 'संख्या' इत्युक्तम्। **विभक्तीति**। सप्तम्येकवचनादेशौत्वसंनियोगेन विधीयमानं घेरत्वं ङिघ्यङ्गसंनिपातकृतमिति भावः। ननु टापा सहैकादेशस्यान्तवद्भावान्न टाब् व्यवधायक इत्यत आह — **शास्त्रीये चेति**। ननु भवतु टाप्, वृद्धचेकादेशे शकटाविति भविष्यतीत्यत आह — **टापि चेति**। परत्वाद् वार्णादाङ्गस्य बलीयस्त्वाच्च वृद्धेः पूर्वमाम् स्यादिति भावः। न च सवर्णग्रहणादसति तपरकरणे स्यादाकार इति [7]वाच्यमित्याह — **इदुतोरिति**। अन्तरतमपरिभाषयेति भावः। **लक्षणान्तरेणेति**। टापि हि सवर्णदीर्घः स्यादित्यर्थः। शक्यते त्वत्र वक्तुम् — भवतु टाप्, सवर्णदीर्घस्तु तपरकरणान्मा भूत्, एवं हि लक्षणद्वयं बाधितं न भविष्यतीति। **उषविदेति विकल्प इति**। तत्र न द्विर्वचनात् [8]प्राग् गुरुमत्त्वमिति भावः। **नित्ययोग इति**। लिड्विधानकाले गुरुमत इत्यर्थः। तेन [9]नुम्वतो नुम्विधावुपदेशिवद्भावान्नुम्वतश्चेजादेराम् सिध्यति॥

[१, ३१०–३१५]

(**उद्द्योतनम्**) भाष्ये 'इकारोकारप्रकृतिः' इति बहुव्रीहिः। आङ्पूर्वाद्धाञ्ञ [10]'उपसर्गे घोः किः' [11]'आतो लोप इटि च' आधिः। चिकीर्षशब्दात् [12]'सनाशंसभिक्ष उः' चिकीर्षुः। आभ्यां चतुर्थ्येकवचने [13]पञ्चम्येकवचने च गुणे [14]कृतेऽतिव्याप्तिर्भाष्य उक्ता। सा न युक्ता, अयादौ [15]कृतेऽनतिव्याप्तेः, अत आह — **गुणे कृत इति**। सुबनपेक्षत्वेन संज्ञाया अन्तरङ्गत्वम्। 'अयादयः'

---

[1] अपिशब्दो नास्ति — छ.
[2] पा. सू. १. ४. १७.
[3] मुभावस्य सिद्धत्वात् — च, छ.
[4] पा. सू. ६. १. ५०.
[5] पा. सू. ४. १. १०.
[6] निषेधादीत्वाभावः — ञ.
[7] वाच्यमित्यत आह — च, छ.
[8] प्राग् गुरुत्वमिति — च, छ.
[9] तुग्वतः — च, छ; नुग्वतः — ञ.
[10] पा.सू. ३. ३. ९२.
[11] पा. सू. ६. ४. ९४.
[12] पा. सू. ३. २. १६८.
[13] 'पञ्चम्येकवचने' इति नास्ति — ऊ.
[14] 'कृते' इति नास्ति — अ, म.
[15] कृते नातिव्याप्तेः — उ, ऊ.

इत्यादिना पञ्चम्येकवचने [1]पूर्वरूपस्यावश्च संग्रहः। ननु संज्ञा[2]सत्त्वेऽपि लुकः पूर्वमयादिः स्यात्, अत आह — **अन्तरङ्गत्वादेवेति**। अजादिसुबपेक्षायादेः [3]सुब्मात्रापेक्षो लुगन्तरङ्ग इत्यर्थः। ननु 'लौ': इत्यत्रैव लक्षण[4]प्रतिपदोक्तपरिभाषयैव नात्रातिव्याप्तिः, अत आह — **परिभाषान्तरेति**। आश्रिते तस्मिन् नातिव्याप्तिरित्याह — **लाक्षणिकं हीति**। **संश्लेषः** आनन्तर्यम्। 'ग्रामणिकुलम्' इत्यत्र ह्रस्वत्वं तुग्विधेरनिमित्तमिति [5]वार्तिकार्थः। तदुपपादयति—**इक इति**। **पूर्वेति**। [6]'अलुगुत्तरपदे' [7]इत्युत्तरशब्दस्य संबन्धिशब्दत्वात् पूर्वपदापेक्षेति भावः। ननु ह्रस्वान्तस्य पूर्वपदस्य तुग् विधीयते। तथा च पूर्वपदावयवस्तुग् न पदद्वयानन्तर्यविधातकः, अत आह — **यदेति**। तथापि ह्रस्वावयवस्यापि पूर्वपदावयवत्वान्न व्यवधायकत्वम्, अत आह — **अवयवेति**। पूर्वपदस्यावयवो ह्रस्वस्तस्यावयवस्तुक्, [8]'स पदस्यावयवो न भवति, तन्त्ववयवानां पटावयवत्वाभावात्। साक्षात् कार्यद्रव्यसमवायिन एवावयवत्वादिति भावः। [9]'अवयविनोऽवयवावयवसमवेतत्वे[10] [11]घटस्य परमाणुसमवेतत्वप्रसक्तौ वायु[12]घटसंयोगवत् प्रत्यक्षाप्रत्यक्ष[13]समवेतत्वेनाप्रत्यक्षत्वप्रसङ्गादिति भावः' इति केचित्। तच्चिन्त्यम्, जातिवत् प्रत्यक्षाश्रये[14]प्रत्यक्षत्वोपपत्तेः। अप्रत्यक्षमात्रसमवेतत्र्यणुकस्य प्रत्यक्षत्वेन द्रव्ये तादृशनियमाभावाच्च। **न त्विति**। तुकः पूर्वपदावयवत्वेऽवयवावयवस्य समुदायावयवत्वे [15]वा व्यवधायकत्वाभावेन परिभाषया तन्निवृत्त्यसंभवादिति भावः। बहिरङ्गपरिभाषैव व्यापकत्वादाश्रयणीयेत्याह — **यदपीति**। 'ग्रामणिकुलम्' [16]इत्यत्रासमासे नपुंसक[17]ह्रस्वत्वे कृते संनिपातपरिभाषया तुङ्निवृत्तिर्न संभवतीति भावः। **तुक् त्विति**। विशेष्यासंनिधानेन तत्र तदन्तविधौ मानाभावादिति भावः। तुकि संनिपातपरिभाषाङ्गीकारे दोषमप्याह — **यदि त्विति**। ननु बहिरङ्गपरिभाषयाप्यत्र तुङ् न स्यात्, अत आह — **ह्रस्वेति**। **साम्यादिति**। उत्तरपदे ह्रस्वः, छे तुगिति साम्यम्। अत्र यदि नपुंसकह्रस्वत्वं तदा पिति कृति तुग्वत् छे [18]तुगपि [19]न प्राप्नोतीति चिन्त्यम्। न केवलं सूत्रात्, न्यायादपीत्याह — **असिद्धमिति**। सुब्निमित्त[20]पदत्वापेक्षो नलोपस्तन्निरपेक्षतुगपेक्षया[21] बहिरङ्ग इत्यर्थः। भाष्ये **न धातुलोप इति**। न च संनिपातपरिभाषयैतत्सिद्धेस्तत् सूत्रं व्यर्थमित्युक्तम्, अत्र तेनैतत्सिद्धिरुच्यत इति [22]विरोध इति वाच्यम्, एतत्परिभाषाया अवश्यकर्तव्यतया तत्सूत्रं न कर्तव्यमेव। अत्राभ्युपेत्यवादेन प्रयोजननिरासादविरोधः। ननु उकारस्य दीर्घाप्रसङ्गान्नानिष्टमित्याशङ्क्य अकार-

---

[1] पूर्वरूपस्य संग्रहः — म, उ; पूर्वरूपस्यावश्यसंग्रहः — अ, आ, ऋ.
[2] सत्त्वे सिलुपः — म; सत्त्वे लुकः — उ.
[3] सुमात्रापेक्षः — अ, आ.
[4] प्रतिपदपरिभाषयैव — उ, ऊ.
[5] वाक्यार्थः — म.
[6] पा. सू. ६. ३. १.
[7] इत्युत्तरपदस्य — उ.
[8] 'सः' इति नास्ति — म, आ, इ, उ, ऊ.
[9] विवरणकारोक्तिमनूद्य खण्डयति — अवयविन इत्यादिना।
[10] अवयवावयवे समवायित्वे — उ.
[11] पटस्य — अ, आ, इ, ऊ, ऋ.
[12] पटसंयोगवत् — ऋ.
[13] समवेतत्वे प्रत्यक्षप्रसङ्गादिति — अ.
[14] प्रत्यक्षोपपत्तेः — म, आ, उ.
[15] 'वा' इति नास्ति — अ.
[16] इत्यत्र समासे — अ, म, आ, उ, ऋ.
[17] ह्रस्वत्वेन संनिपात — अ.
[18] तुगिति — अ.
[19] नेति चिन्त्यम् — उ.
[20] पदान्तापेक्षः — अ.
[21] 'तुगपेक्षया' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — उ.
[22] 'विरोध इति' इति नास्ति — अ.

[1]दीर्घेणानिष्टमित्युपपादयितुं सूत्रार्थमाह — **न मु न इत्यस्येति। ने कर्तव्य इति।** न तु ने परत इत्यर्थः, मुभावात् पूर्वं [2]घिसंज्ञाया अभावेन नाभावस्यैवाभावादित्यर्थः। **असिद्धत्वादिति।** शास्त्रासिद्धत्वादित्यर्थः। **दीर्घ इति।** अन्तरतमत्वादित्यादिः। ननु टादेशो नाभाव एव, तत्र [3]दीर्घो न परिहृतः, अत आह — **अनेकेति।** अनेकविभक्तिकपूर्वपद इत्यर्थः। संबन्धसामान्ये षष्ठीसमास इति तात्पर्यम्। आश्रितत्वमेवाह — **टाया इति।** तथाच टायां परतो दीर्घादेशं प्रति [4]मुभावस्य सिद्धत्वादकारान्तत्वाभावान्न दीर्घप्रसङ्ग इति भावः। नन्वात्वस्याकित्त्वनिमित्तकत्वाभावान्न परिभाषोपस्थानम्, अत आह — **एज्विषय इति।** [5]'मीनाति' इति सूत्रस्थचकारेणेत्यर्थः। ननु कित्त्वाभावेऽपीत्वं स्यात्, अत आह — **कित्त्वेति।** भाष्ये **तिसृचतसृत्वमिति।** विभक्तिपरत्वमाश्रित्य तद्विधीयते। ङीपि सति प्रकृतेस्तत्परत्वव्याघात इत्यर्थः। **समस्तार्थं** समासार्थम्। **तत्रावयवस्येति।** उपलक्षणमेतत्। अन्तरङ्गत्वात् [6]समासात् प्रागेव ङीप् [7]स्यादित्याहुः[8]। [9]'न षट्स्वस्रादिभ्यः' इति निषेधात् ङीबभावः कस्मान्नोक्तः, अत आह — **ज्ञापकादेवेति। विभक्तीति।** सर्वनामस्थानस्य विभक्तित्वादित्यर्थः। **अन्तग्रहणमिति।** तत्सामर्थ्यादिति भावः। सामर्थ्यमसिद्धमित्याह — **संख्येति।** 'राजन्, रत्नमुट्' इत्यादिव्यावृत्तये संख्येति वक्तव्यम्। ततो बहुव्रीहिरेवायमित्यर्थः। **विभक्तीति।** ङेरौत्वसंनियोगशिष्टं घेरत्वं ङिघ्यङ्गसंनिपातकृतमिति भावः। ननु टापा सहैकादेशेऽन्तवद्भावान्न व्यवधायकत्वम्, अत आह — **शास्त्रीये चेति।** ननु टाप्यपि [10]वृद्धया 'शकटौ' इति सिद्धे किं टाब्निषेधेन, अत आह — **टापीति।** परत्वाद्वार्णादाङ्गस्य बलीयस्त्वाच्च वृद्धेः प्रागाम् स्यादिति भावः। इदं प्रयोजनं दूषयति — **अच्चेति।** दीर्घनिवृत्त्यर्थं तपरकरणं न भवतीत्याह — **इदुतोरिति।** आन्तरतम्यादित्यर्थः। अकारस्य दीर्घग्राहकत्वाभावादपि न [11]दीर्घप्रसङ्ग इत्याह — **भाव्यमानत्वाद्वेति।** [12]**लक्षणान्तरेणेति।** टापि सति सवर्णदीर्घस्येत्यर्थः। [13]अत्र टापि सति सवर्णदीर्घमात्रं तपरत्वेन वार्यते, न तु [14]टाबपि। अतष्टाब्निवृत्तिः परिभाषासाध्यैवेत्याहुः। परिभाषाप्रवृत्तिमाह — **आमि सतीति। विकल्प इति।** तत्र गुणाभावेन द्विर्वचनात् प्राग् [15]गुरुमत्त्वाभावाद्विकल्पः[16] सावकाश इत्यर्थः। **नित्य इति।** [17]'इजादेः' इत्यनेन। **एतत्** उवोषेत्येतत्। इयेष, उवोषेति [18]रूपद्वयसाधारणं हेत्वन्तरमाह — **गुरुमत इति।** [19]अत्र गुणात् पूर्वं न गुरुमत्त्वमिति नित्ययोगाभावः। अत्र लिङ्विधानकाले योगो नित्ययोगः। तेन [20]'इन्दांचकार' [21]इत्यादौ नुमनन्तरं गुरुमत्त्वेऽप्याम् सिध्यतीत्याहुः। **शक्योऽत्रेति।** उदाहरणद्वयेऽपीत्यर्थः॥

---

[1] दीर्घेणानिष्टरूपमुपपादयितुं — म, उ, ऋ.
[2] घिसंज्ञाभावेन — इ.
[3] दीर्घोऽपरिहृतः — म, इ, उ, ऊ, ऋ.
[4] मुभावस्यासिद्धत्वात् — म.
[5] पा. सू. ६. १. ५०.
[6] 'समासात्' इति नास्ति — इ, ऊ.
[7] स्यादेवेत्याहुः — म, आ.
[8] विवरणोक्तमिदम्।
[9] पा. सू. ४. १. १०.
[10] वृद्धौ — अ.
[11] दीर्घ इत्याह — उ.
[12] लक्षणान्तरेति — अ, आ, इ, उ, ऊ, ऋ.
[13] विवरणोक्तं कैयटदूषणमाह — अत्रेत्यादिना।
[14] टाबिति — उ.
[15] गुरुत्वाभावात् — उ.
[16] विकल्पस्यावकाश इत्यर्थः — अ.
[17] पा. सू. ३. १. ३६.
[18] 'रूप' इति नास्ति — अ, आ, इ, ऊ, ऋ.
[19] तत्र — म, आ.
[20] इन्धांचकार — म, इ, उ.
[21] इत्यादेः — उ.

[१, ३१०–३१५]

(रत्नप्रकाशः) **अनिकारोकारेति** । एच एवैतद्विशेषणम्, मकारांशेऽव्यभिचारात् । **आधय इति** । [1]'घेर्ङिति' इति गुणे सत्यन्तरङ्गत्वेनाव्ययसंज्ञायां ङेप्रभृतेर्लुक् स्यादिति भावः । **कुम्भकारेभ्य इति** । कृद्ग्रहणपरिभाषया कुम्भकारेशब्दस्याव्ययत्वमिति भावः । यद्यपि प्रकृते लाक्षणिकत्वादेवैचस्तदन्तस्याव्ययसंज्ञा न प्राप्नोति, अन्तरङ्गाव्ययसंज्ञां प्रति बहिरङ्गस्य गुणादेरसिद्धत्वाच्च । सत्यां च तस्यां न दोषः, अत्युच्चैसावित्यादावतिप्रसङ्गवारणायाव्ययाद्विहितस्यैव सुपो लुग्विधानात् । सुब्विध्युत्तरं ह्यत्राव्ययसंज्ञा भवति । तथापि प्रकारान्तरेणाव्ययसंज्ञा वारयितुं शक्यत इत्याशयेन समाधत्ते — **न वा संनिपातलक्षण इति** । **संनिपातः** संबन्ध आनन्तर्यलक्षणः, स निमित्तं यस्य स विधिस्तस्य संनिपातस्य विघातको यस्तस्य निमित्तं न भवतीत्यर्थः । **ग्रामणिकुलमिति** । उत्तरपदानन्तर्यनिमित्तः पूर्वपदह्रस्वस्तद्विघातकस्य तुको निमित्तं न भवतीति भावः । एतेन 'यदा ह्रस्वमात्रस्य तुगागमो न तदन्तस्य, अवयवावयवश्च समुदायावयवो न भवति तदैतत् प्रयोजनं न त्वन्यथा' इति निरस्तम् । अवयवावयवस्य समुदायावयवत्वाभावे मानाभावात् । तुकः समुदायावयवत्वेऽपि ह्रस्वनिमित्तानन्तर्यविघातकत्वानपायाच्च । न हि [2]'अर्थवत आगमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्येतावन्मात्रेण तुगागमात् पूर्वं तुको निमित्तं यः संनिपातः स तुकि सति नष्टो नेति वक्तुं शक्यते । **बहिरङ्गमिति** । पूर्वोत्तरपदाश्रयत्वादिति भावः । यदपि [3]'ह्रस्वो नपुंसके' इति ह्रस्वत्वं तदप्यर्थाश्रयत्वाद् बहिरङ्गम् । **अन्तरङ्ग इति** । ह्रस्वस्य पिति कृति विधानादिति भावः । 'ग्रामणि च्छत्रम्' इत्यादौ छकाराश्रितस्तुक् पदद्वयाश्रित एवेति ह्रस्वसमकक्षः सन् प्रवर्तत एव । **वृत्रहभिरिति** । भिसानन्तर्यप्रयुक्तनान्तपदसंज्ञाश्रयो नलोपः, नलोपानुनिष्पादी ह्रस्वस्तदानन्तर्यविघातकतुको निमित्तं न भवतीति भावः। ननु लोपेनैव भिसानन्तर्यं नान्तस्य पदस्य विहतमिति चेन्न, नलोपविधिना संस्कृतस्य 'वृत्रह' इत्यनेनादन्तेन तदानन्तर्यस्य लब्धत्वेन तेन तस्य [4]विहतत्वाभावात् । एतत्परिभाषाया वक्ष्यमाणासाधारणोदाहरणाना[5]मप्येवंजातीयकत्वेनैतादृशार्थपरताया भाष्यकृतोऽपि संमतत्वाच्च । **असिद्धो नलोप इति** । [6]'नलोपः सुप्स्वर' इति, [7]'असिद्धं बहिरङ्गम्' इति वा । **उदुपधत्वमिति** । नलोपानुनिष्पादित्वादुदुपधत्वं कित्संनिपातलक्षणमिति भावः । **न धातुलोप इति** । यद्यपि प्रत्याख्यातमिदं तत्र भाष्यकृता, तथापि तद्भाष्यस्यान्याभिप्रायकता तत्रैव मयोक्तेति न तेनास्य विरोधः । **अमुनेति** । घिसंज्ञकानन्तर्यनिमित्तो नाभावस्तदानन्तर्यं स्वयमेव लब्धा तद्विघातकदीर्घस्य निमित्तं नेति भावः । दीर्घोत्तरं मुत्वे हि 'अमूना' इति स्यात् । **वक्ष्यत्येतदिति** । [8]"न मु ने' इति सूत्रे वार्तिककार इति शेषः । **न मु टादेश इति** । टायाष्टायां चादेशष्टादेश इत्याश्रयणाद् दीर्घो न भविष्यतीति भावः । वस्तुतस्तु **ने** नाभावे परे, **मु** मुभावो नासिद्ध इति व्याख्यानस्य तत्र भाष्यकृता दर्शितस्याश्रयणे न काप्यनुपपत्तिः । 'नाभावे कर्त्तव्ये' इति व्याख्यानमाश्रित्यैव [9]"न मु टादेशे' इति वार्तिकस्य प्रवृत्तत्वात् । **आत्वं कित्त्वस्येति** । आत्वानुनिष्पादि दारूपं कित्त्वहेतुघुसंज्ञाया अनिमित्तमित्यर्थः ।

---

[1] पा. सू. ७. ३. १११.
[2] का. वा. १.१.२०–५.
[3] पा. सू. १. २. ४७.
[4] विहितत्वाभावात् — ब.
[5] मप्येकजातीयकत्वेन — ब .
[6] पा. सू. ८. २. २.
[7] परिभाषा ५०.
[8] पा. सू. ८. २. ३.
[9] का. वा. ८. २. ३–१.

घुसंज्ञायां हि सत्यां [1]'स्थाघ्वोरिच्च' इति कित्त्वे सिचोऽकित्त्वनाशादकिदानन्तर्यमपि नश्यति, विशेषणनाशे विशिष्टस्य नाशात्। एतेन 'आत्वं कित्त्वस्य' इति यथाश्रुतभाष्यानुसारेण 'आत्वं कित्त्वस्यानिमित्तम्' इति व्याख्याय 'कित्त्वसंनियुक्तमित्वं कित्त्वाभावे न भवति' इति वदन् निरस्तः। 'ह्रस्वत्वं तुग्विधेः' 'नलोपः' 'नाभावो यञि' 'तिसृचतसृत्वं ङीब्विधेः' इत्याद्युक्तवक्ष्यमाणयुक्तिसहभाष्यानुसारेण कित्त्वग्रहणस्य तत्कारणघुसंज्ञोपलक्षणत्वेनोपपादयितुं युक्तत्वात्। **उक्तमेतदिति**। प्रौढिमात्रमिदम्, प्रातिस्विकवचनमुपेक्ष्यानेकप्रयोजनपरिभाषयैव 'उपादास्त' इत्यत्र घुसंज्ञाया वारयितुमुचितत्वात्। तथैव तत्र तां वारयित्वा तद्घातिकस्य निराकृतत्वाच्च। **तिस्रस्तिष्ठन्तीति**। विभक्त्यानन्तर्यनिमित्तौ तिसृचतसृभावौ लब्धतदानन्तर्यौ तद्विघातकङीपो निमित्ते न भवत इति भावः। **यदयमिति**। कृत्वाचिन्तया परिभाषासाधारणो[2]दाहरणत्वमात्रमनेन वार्यम्। अन्यार्थप्रारब्धायां तु परिभाषायां तयैव [3]'न तिसृचतसृ' इति वचनस्योपपन्नत्वेन ज्ञापकताया असंभवात्। एतेन 'ननु समस्तार्थमेतत् स्यात् — प्रियतिसृणां ब्राह्मणानामिति। अत्र ह्यङ्गं पुंसि वर्तत इति नास्ति ङीपः प्राप्तिरिति केचित्। तदयुक्तम्, न हि ङीब्विधानेऽङ्गाधिकारोऽस्ति। तत्रावयवस्य स्त्रीत्ववृत्तित्वात् ङीपः प्राप्तिः केन वार्यत इति ज्ञापकमेव। ज्ञापकादेव च सिद्धत्वात् स्वस्रादिष्वनयोः पाठो न कर्तव्यो भवति' इति निरस्तम्। [4]'ईदूतौ च सप्तम्यर्थे' इति सूत्रगतं 'समुदायार्थोऽभिधीयते' इति भाष्यं [5]'सर्वादीनि सर्वनामानि' इति सूत्रगतं 'संज्ञोपसर्जने च विशेषेऽवतिष्ठेते' इति भाष्यं च यथाश्रुतमनुसरता तत्रत्यस्वोक्तिं तद्भाष्यं च विस्मृत्य तद्भाष्यानुसारिकृतदूषणस्य निराकरणासंभवात्। संनिपातपरिभाषायाः स्थापितत्वेन तयोपपन्नस्य [6]'न तिसृ' इति निषेधस्य ज्ञापकत्वमाश्रित्य स्वस्रादिपाठवारणानौचित्याच्च। **इमानि तर्हि प्रयोजनानीति**। असाधारणानीति शेषः। **शतानीति**। विभक्तिसंनिपातनिमित्तो नुम् स्वान्तेन लब्धस्य तत्संनिपातस्य विघातिका या षट्संज्ञा तस्या निमित्तं न भवतीति भावः। एतेन 'विभक्तिसंनिपातनिमित्तो नुमागमः षट्संज्ञाहेतुकस्य विभक्तिलुको न निमित्तम्' इति निरस्तम्। अत्र यथाश्रुतभाष्यस्योपपन्नत्वेन तदपहाय विभक्तिलुङनिमित्ततानिषेधपरतया व्याख्यानानौचित्यात्। नुमः साक्षाद्विभक्तिलुकं प्रति निमित्तताया अप्राप्तत्वेन तन्निषेधासंभवात्। परम्परासंबन्धेन निमित्तताया भगवता कुत्राप्यवारितत्वाच्च। यदप्युक्तम् [7]"'ष्णान्ता षट्' इत्यन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थमित्यत्र न भविष्यतीति चेत् संख्यासंप्रत्ययार्थं बहुव्रीह्यर्थं तत् स्यादित्यदोषः" इति। तदपि न, अन्तग्रहणेनौपदेशिकप्रतिपत्तिर्भवतीत्यत्र मानाभावात्। यस्य कस्यचिदनर्थकस्य यत्किंचिज्ज्ञापकत्वे एकेनैवानर्थकेन सर्वाभीष्टज्ञापनसंभवेन भाष्यकृत्प्रभृतिभिर्महता यत्नेन पार्थक्येन क्रियमाणज्ञापकोपपादनक्लेशस्य व्यर्थतापत्तेः। 'ष्णः षट्' इत्युक्तेऽपि [8]"येन विधिः' इत्यनेन तदन्तविधिलाभेन पूर्वसूत्रानुवृत्तसंख्याग्रहणेन चेष्टसिद्धौ स्पष्टार्थताया एवान्तग्रहणस्य वक्तुमुचितत्वाच्च। ननु षट्संज्ञां प्रति नलोपस्यासिद्धत्वादपि सिद्धेः कथमस्य संनिपातपरिभाषासाधारणो[9]दाहरणतेति चेन्न, षान्तस्य नान्तस्य च संख्यासंज्ञाया अविहितत्वेन संख्याशब्दस्य संख्यावाचकलक्षकत्वाश्रयणे बहिर्भूतार्थापेक्षायां तस्या एव बहिरङ्गत्वात्। **शकटाविति**। विभक्तिसंनिपातनिमित्तमत्वं स्वान्तेन

---

[1] पा. सू. १. २. १७.
[2] असाधारणेति छेदो बोध्यः।
[3] पा. सू. ६. ४. ४.
[4] पा. सू. १. १. १९.
[5] पा. सू. १. १. २७.
[6] पा. सू. ६. ४. ४.
[7] पा. सू. १. १. २४.
[8] पा. सू. १. १. ७२.
[9] असाधारणेति छेदः।

[1]लब्धस्य [तदानन्तर्यस्य विघातकं टापं प्रति न निमित्तमित्यर्थः। ननु टापि सवर्णदीर्घे सति न] तदानन्तर्यविघातकत्वमिति चेन्न, टाबुत्पत्तिसमकाले तदानन्तर्यस्य नाशो जायत इति सर्वानुभवसिद्धत्वेन तावतैवावलम्बनेन तत्र प्रकृतपरिभाषाप्रवृत्तिसंभवात्। एतेन 'शास्त्रीये च कार्येऽन्तादिवद्भावो नानन्तर्ये लौकिके' इति निरस्तम्। शास्त्रीये कार्ये कर्तव्येऽन्तादिवद्भाव इत्यत्र मानाभावात्। शास्त्रीयटाब्व्यवस्थापनार्थमेव शङ्कितानन्तर्यस्याश्रितत्वेन तत्रान्तादिवद्भावस्योचितत्वाच्च। यदप्युक्तम् "[2]'अच्च घेः' इति तपरकरणेनात्र शक्यते टाब् निवर्तयितुम्। इदुतोर्हि स्थाने मात्रिक एवाकारो भविष्यति, भाव्यमानत्वाद्वा सवर्णस्याकारो ग्राहको न भविष्यतीति लक्षणान्तरेणापि प्राप्तस्य दीर्घत्वस्य [3]निवारणार्थं तपरकरणं [4]संपद्यते" इति। तदप्ययुक्तम्, तपरकरणस्य तत्कालावधारणार्थतामात्रस्य शास्त्रीयत्वेन तदसंभवे उच्चारणार्थताया एव वक्तुं युक्तत्वात्। तथैव बहुषु स्थलेषु स्वीकृतत्वात्। ननु स्थानिवत्सूत्रे भाष्यकारैरुक्तम् [5]'करोतौ तपरनिर्देशात् सिद्धम्' इति, तदनुसारिणा तेनात्रैवमुक्तमिति चेन्न, तद्भाष्यस्यापूर्ववचनत्वयुक्तिमूलकत्वयोरुभयोरप्यसंभवेन 'बहिरङ्गस्योत्वस्यासिद्धत्वात् सिद्धम्' इत्येतत्सूचकप्रौढिमात्रपरतायाः एवौचित्यात्। किं च तुष्यतु वा स लक्षणान्तरप्राप्तदीर्घव्यावर्तकेन तपरकरणेन, तथापि टापि सति सवर्णदीर्घमात्रं तेन वारणीयम्, न तु टाबपीत्यनिष्टप्रसङ्गो दुर्वार एव। **इयेषेति**। आर्धधातुकानन्तर्यनिमित्तो लघूपधगुणः स्वविशिष्टलब्धस्य तस्यानन्तर्यस्य विघातकामो निमित्तं नेति भावः। **उवोषेति**। [6]'उषविद' इत्यामभावपक्षेऽत्र [7]'इजादेः' इत्याम् प्रकृतपरिभाषया वार्यत इति भावः। एतेन "उषविद' इति विकल्पः 'ओषांचक्रतुः, ऊषतुः' इत्यादौ सावकाश इति 'उवोष' इति नित्य आम् प्रसज्येत" इति निरस्तम्। ऊषतुरित्यत्रापि [8]'इजादेः' इत्यामः प्रसक्तत्वेन तत्र [9]'उषविद' इत्यामश्चारितार्थ्यकथनस्यायुक्तत्वात्। नन्वेवं सति [10]'उषविद' इत्याम् येन नाप्राप्तिन्यायेन [11]'इजादेः' इत्यामोऽपवाद एव संपन्न इति 'उवोष' इत्युदाहरणं प्रकृतपरिभाषाया न युज्यत इति चेन्न, गुणादेः पूर्वम् [12]'उषविद' इत्यामि 'ओषांचकार' इत्यादिरूपस्य गुणाद्युत्तरम् [13]'इजादेः' इत्यामि 'उवोषांचकार, ऊषांचक्रतुः' इत्यादिरूपस्य जायमानत्वेन [14]'असति संभवे बाधनं भवति, अस्ति संभवो यदुभयं स्यात्' इति युक्तिमूलकवचनेनोभयप्रवृत्तिसंभवेन निर्युक्तिकयौगपद्यविषयकतक्रकौण्डिन्यन्यायदृष्टान्तेनायुगपत्प्रसक्तयोस्तयोरपवाद्यापवादकभावायोगात्। युगपदप्रवृत्तत्वादेवं च तयोः [15]'सत्यपि संभवे बाधनम्' इति परिभाषाविषयत्वाभावः। एतेन 'प्रतिपदविधेश्च बलवत्त्वात् परत्वाच्चात्रापि विकल्पेनैव भाव्यमित्यनुदाहरणमेतत्' इति निरस्तम्। प्रतिपदोक्तस्य बलवत्त्वे मानाभावात्। वैकल्पिकपरप्रवृत्त्यभावपक्षे गुणादिप्रवृत्त्युत्तरं नित्यपूर्वप्रवृत्तेरापाद्यमानत्वेन तयोर्यौगपद्याभावेन 'पर-

---

[1] 'लब्धस्य' इत्यस्यानन्तरं 'तदानन्तर्यविघातकत्वमिति चेन्न' इत्येव 'ब' मातृकायां दृश्यते। मध्ये ग्रन्थस्त्यक्त इति भाति। तस्यार्थौचित्यमनुसृत्य कुण्डले निवेशनं कृतम्।

[2] पा. सू. ७. ३. ११९.

[3] प्रदीपे 'निराकरणार्थम्' इत्यत्र 'निवारणार्थम्' इति पाठः स्वीकृतः।

[4] संपाद्यत इति — ब.

[5] महाभाष्यम् १. १. ५६.

[6] पा. सू. ३. १. ३८.

[7] पा. सू. ३. १. ३६.

[8] पा. सू. ३. १. ३८.

[9] पा. सू. ३. १. ३६.

[10] पा. सू. ३. १. ३८.

[11] पा. सू. ३. १. ३८.

[12] पा. सू. ३. १. ३६.

[13] पा. सू. ३. १. ३८.

[14] पा. सू. ३. १. ३६.

[15] महाभाष्यम्. ६. १. २.

[16] महाभाष्यम्. १. १. ४७.

त्वात्' इति हेतोरकिंचित्करत्वाच्च । यदप्युक्तम् [१]'गुरुमत इति नित्ययोगे मतुप आश्रयणादपि शक्योऽत्रामभावः प्रतिपादयितुम्' इति । तदपि न, ऋच्छेर्गुरुमत्त्वस्य तुगागमोत्तरभावित्वेन [२]'अनृच्छः' इति पर्युदासविरोधेन तत्र नित्ययोगे मतुप आश्रयणायोगात् ॥

[१, ३१०–३१५]

(**नारायणीयम्**) नन्वयादिषु कृतेष्वल्विधौ स्थानिवत्त्वनिषेधात् संज्ञा न भविष्यतीत्यत्राह — **गुण इति**। ननु भवतु यथोद्देशेऽन्तरङ्गत्वं संज्ञायाः, कार्यकाले तु कथमन्तरङ्गत्वमित्यतः कार्यस्यैवान्तरङ्गत्वमाह — **अन्तरङ्गत्वादेवेति** । उभयोरपि प्रकृतिप्रत्ययापेक्षत्वे एजादिविशेषापेक्षत्वेनायादेर्बहिरङ्गत्वमिति भावः । **परिभाषान्तरेति** । परिभाषान्तरविषयत्वेऽस्य कीर्तिते तत्प्रयोजनजिज्ञासायां तत्कीर्तनमुपपद्यते, नान्यथेति भावः । ननूभयोरपि [३]वचनत्वादिच्छातः किंचिदुक्तमित्युच्यताम्, अत आह — **लाक्षणिकं होति**। संनिपातशब्दस्य रोगविशेषे रूढत्वादाह — **संश्लेष इति**। लक्षणशब्दस्य बह्वर्थत्वादाह — **तन्निमित्त इति**। घञ् भावार्थो न भवति, किं तु कर्मोपपदाद् धातोः कर्त्रर्थ इत्याह — **तमिति**। भावार्थपरिग्रहे तु [४]यद्विधिना संनिपातविहननं तत्रैव परिभाषाव्यापारः स्यात् । यथा 'ग्रामणिकुलम्' इत्यत्र पूर्वोत्तरसंनिपातविहननम् । [५]यद्विधिप्रवृत्तिमात्रान्न संनिपातविघातः, यथा — इहाव्ययसंज्ञया सुप्संनिपातावि[६]घातः, तत्र न स्यात् । कर्त्रर्थपरिग्रहे त्वत्रापि व्यापारः सिध्यति, अव्ययसंज्ञाया लुग्द्वारेण संनिपात[७]विघातत्वात् । 'ग्रामणिकुलम्' इत्यसमासश्चेत् नपुंसकह्रस्वत्वमिति वाच्यम् । तस्य तु नास्ति संनिपातनिमित्तत्वमिति समासमभिप्रेत्याह — **इक इति**। कथं तुकानन्तर्यविघातः पूर्वपदभक्तत्वात्तस्य, अत आह — [८]**यदा त्विति**। असमासे नपुंसकह्रस्वत्वे इत्थमेव परिहारो वाच्यः । अतो व्यापकोऽयं परिहार इत्याह — **यदपीति**। न केवलं तुग्विधौ फलाभावः, प्रत्युतानिष्टमापद्येत तदाश्रयण इत्याह — **यदि त्विति** । अनाश्रयणे तु निमित्तं ह्रस्वान्तभक्तत्वमवयवावयवस्य समुदायभक्तत्वं वा । ननु ने परतो यत्प्राप्तं तस्मिन् सिद्धत्वमुच्यते, ततश्च न दीर्घप्राप्तिरित्यत आह — **नेति**। **अकारान्तत्वादिति**। ननु मुत्वे प्रवृत्ते नाभावः, तस्मिन् यञि दीर्घप्राप्तौ मुभावस्यासिद्धत्वं चेत् कथमकारान्तत्वम् । न हि निवृत्तोऽकारः पुनरुन्मज्जति । शास्त्रासिद्धत्वे स्थानिसत्त्वमिति चेन्न, यत्रासिद्धशास्त्रनिबन्धनकार्याप्रवृत्तिस्तत्रैव स्थानिसत्त्वम्। इह तु नाभावनिमित्तत्वेन मुभावः प्रवृत्त इत्युक्तम् । न तर्हीदानीमसिद्धकार्यप्रवृत्त्युत्तरकालं क्वचिदपि स्थानिनिमित्तकार्यं तस्यासिद्धत्वेन भवतीति चेत्, भवति शास्त्रासिद्धत्वात् स्थानि[९]बुद्ध्यादेशे, न पुनः स्थानिनि। यथोक्तं 'प्रगृह्यसंज्ञायां [१०]त्रिमात्रबुद्धावसत्यां द्विमात्रविषया बुद्धिः' इति। अत्राहुः — शास्त्रासिद्धत्वे तत्कार्यस्यैव यत्राप्रवृत्तिस्तत्र स्थानिनि कार्यम्। यत्र तूपजीव्यतयान्तरङ्गत्वाद्वा कार्यप्रवृत्तिस्तत्र तच्छास्त्रस्य कार्यान्तरे कर्तव्येऽसिद्धत्वं चेत् तत्र लक्ष्यानुसारिणि शास्त्रेऽस्मिन् क्वचिदित्थं कल्प्यते — प्रवृत्तमपि कार्यमप्रवृत्तसमं कृत्वा स्थानिनि कार्यप्रवर्तनमिति। यथा 'औजढत्' इत्यत्र ढत्वादिष्वन्तरङ्गत्वात् कृतेष्वपि चङः-

---

[१] पा. सू. ३. १. ३६.
[२] पा. सू. ३. १. ३६.
[३] वचनादिच्छातः — क.
[४] यद्विना — क.
[५] तद्विधि — क.
[६] ततो न स्यात् — क.
[७] अत्र कर्तरि घञ् बोध्यः।
[८] यदा चेति — क.
[९] बुद्ध्या, आदेशे, इति छेदः।
[१०] ईदूदेदिति सूत्रे प्रदीपे इदमुक्तम्। अत्रार्थानुवादः।

निमित्तद्विर्वचनकाले तेषामसिद्धत्वात् [1]ह्तशब्दस्य द्विरुक्तिः। क्वचित्तु कृतकार्यानिरासेन स्थानिबुद्धया आदेशे तन्निमित्तकार्याणीति। प्रस्तुते तु कल्पनाद्वयस्याप्यविशेषः। तथाप्येषापि कल्पनास्तीति दर्शयितुं स्थानिनि कार्यप्रवृत्तिरुक्तेति। यदि तर्हि स्थानिनि कार्यं तदा मुत्वेन समीकरणाददोष इत्यत आह — **तस्मिन्निति**। अकित्परत्वस्य दीङात्वेऽनाश्रयणात् कथं तस्य कित्त्वानिमित्तत्वम, अत आह — [**एज्विषय इति**। ननु कित्त्वाभावेऽपीत्त्वं स्यात्, अत आह] — **कित्त्वेति**। **संख्यासंप्रत्ययार्थमिति**। इतरथा हि प्रस्तुतस्य स्वरूपपदार्थकत्वादिह संज्ञिसमर्पकतानुपपत्तेरनाकाङ्क्षापि स्यात्। [2]ङावत्वाविधानात् कथं संनिपातनिमित्तत्वमित्याशङ्क्याह — **विभक्तीति**। अन्तवद्भावात् कथमानन्तर्यविघातभयेन टाब् न स्यात्, अत आह — — **शास्त्रीय इति**। नन्वस्तु टाप्, वृद्धया सिध्यत्यभिमतं रूपम्, अत आह — **टापीति**। स्थानिवद्भावादाम्प्रसङ्ग इत्यर्थः। **दीर्घत्वस्येति**। टापि हि सत्येकादेशः स्यादिति दीर्घाभावाय टाबभावः कल्प्यते। नन्वेवमुभयबाधकल्पनापत्तेरेकादेश एव बाध्यताम्, टाप् तु भवेदिति चेन्न, टाप एव बाधनाङ्गीकारात्। तस्मिन् बाधित एकादेशस्याप्राप्तिरिति कुतस्तद्बाधः। विनिगमनं तर्हि किमिति चेत्, अनन्यार्थपरत्वं स्वविरोधिनमुच्छिनत्ति [3]तन्निमित्तमिति [4]विशये लोके बलवतां विरोधिमूलनिर्बहणे व्यापारदर्शनादत्रापि तथात्वमिति। आमि सति संनिपातविघातं दर्शयति — **आमीति**। [5]यद्यप्यामागममात्रेण[6] संनिपातविघातः, तथापि तत्त्वं कीर्तितम् — **प्रतिपदेति**। विशेषविधित्वं बाधहेतुः, न तु निरवकाशत्वमिति भावः। नाप्राप्त्यभावात् कथमपवादत्वमित्यत आह — **परत्वादिति**। विशिष्यानुदाहरणत्वमुक्त्वा सामान्येन तदाह — **गुरुमत इति**॥

[१, ३१५–३१७]

(**लघुविवरणम्**) नन्वङ्गसंज्ञाया अनिमित्तत्वे 'प्रत्ययो वर्णविचालस्यानिमित्तम्' इति कथमुक्तमित्यत आह — **तत्र वर्णेति**। **आत्रेयादीति**। [7]'इतश्चानिञः' इति ढग् वर्णाश्रयो [8]'यस्य' इति लोपस्याङ्गसंज्ञाद्वारा निमित्तं न स्यादित्यर्थः। **पूर्वमुदात्तमिति**। [9]'ह्रस्वनुड्भ्यां मतुप्' इत्यत्र [10]'अन्तोदात्तात्' इत्यधिकारादिति भावः। **अदृष्ट्वेति**। विशेषणत्वेनेति शेषः। दीर्घोऽपि पृथग् लोपस्य निमित्तमिति भावः। भाष्ये 'दीर्घादित्युच्यते' इत्यस्याभिप्रायः — पृथङ्निमित्तत्वे दीर्घस्य 'हल्ङ्याब्दीर्घेभ्यः' इति[11] समासेनैव निर्देशं कुर्यात्। पृथङ्निर्देशात्तु[12] संभवव्यभिचाराभ्यां ङ्यापोर्दीर्घो विशेषणमिति। लक्षणभेदात् संबुद्धिलोपः कथं नित्य इत्यत आह — [13]**कार्यं तावदिति**॥

[१, ३१५–३१७]

(**विवरणम्**) नन्ववर्णाश्रयः प्रत्ययो नोभयाधिष्ठानसंबन्धलक्षणसंनिपाताश्रय इत्यत आह —

---

[1] हतशब्दस्य — क.
[2] ङावत्वविधानात् — क.
[3] तन्निमित्तं वेत्यर्थः।
[4] विषये — क.
[5] यद्यप्यागमनमात्रेण — क.
[6] मात्रशब्दः कात्स्न्र्यपरः।
[7] पा. सू. ४. १. १२२.
[8] पा. सू. ६. ४. १४८.
[9] पा. सू. ६. १. १७६.
[10] पा. सू. ६. १. १६९.
[11] 'इति' इत्यस्यानन्तरं 'लाघवाय' इत्यधिकम् — त.
[12] तुशब्दो नास्ति — ण.
[13] कार्यमिति — ण.

प्रयोग इति। **अन्वाख्यानं** साधुत्वेनेत्यर्थः। **प्रत्ययस्येति**। साधुत्वावच्छिन्नस्येत्यर्थः। **अविद्यमान एवेति**। मन्दमध्यमा हि तथा प्रतियन्तीति भावः। यद्यङ्गसंज्ञा न निमित्तं कथं तर्हि वार्तिककृता 'प्रत्ययः' इत्युक्तमित्यत आह — **तत्रेति**। [1]**तेनेति**। [2]"इतश्चानिञः' इति ढग् नावर्णाश्रयः, किं त्विकाराश्रय इति भावः। **आत्वं** [3]"क्रीङ्जीनां णौ' इत्यनेन। **आकार इति**। श्रुतत्वात् तस्यैव पुगिति भावः। ण्याकारसंनिपातनिमित्तः पुक् ण्याकारसंनिपातविघातकस्य [4]"णौ चङि' इति ह्रस्वस्यानिमित्तं स्यादिति 'पुक्' इति वार्तिकस्यार्थः। [5]"वस्वेकाजाद्घसाम्' [6]इत्याकारलक्षण इट् [7]"आतो लोप इटि च' इत्यस्यानिमित्तं स्यादिति 'इड्विधिः' इत्यस्यार्थः। **पूर्वमिति**। [8]"अन्तोदात्तादुत्तरपदात्' इत्यतः 'अन्तोदात्तात्' इति [9]"ह्रस्वनुड्भ्याम्' इत्यत्रानुवर्तत इति भावः। **अदृष्ट्वेति**। ङ्याब्विशेषणत्वेनेति शेषः। [10]"ङ्यन्तादित्येवम्' इति भाष्यं नोदाहृतसर्वविषयमित्याह — **ब्रह्मबन्धिवति**। 'दीर्घादित्युच्यते' इति भाष्यस्यायमर्थः — न दीर्घः पृथग्लोपस्य निमित्तम्, तथा सति पृथग्विभक्त्यनुच्चारणाय 'हल्ङ्याब्दीर्घात्' इत्येवोच्येत। संभवव्यभिचाराभ्यां च विशेषणान्वय इति त्रिषु समासनिर्दिष्टेष्वपि ङ्यापोरेव दीर्घादिति विशेषणं, न हल इति। **ह्रस्वत्वम्** [11]"अम्बार्थं' इत्यनेन। **संबुद्धिलोपः** [12]"हल्ङ्याब्भ्यः' इत्यनेन च[13]। [14]"एङ्ह्रस्वात्' इत्यत्र ह्रस्वग्रहणस्य निरवकाशत्वान्न[15] संनिपात[16]परिभाषा बाधिष्यत इति वाच्यमित्याह — **संबुद्धिलोपस्येति**॥

[१, ३१५–३१७]

(**उद्द्योतनम्**) प्रत्ययस्य संनिपातलक्षणत्वं संभावयति — **प्रयोग इति**। **अन्वाख्यानं** साधुत्वान्वाख्यानम्। **अनेन** [17]"अत इञ्' इत्यनेन। न त्वपूर्वं उत्पाद्यते, येन संनिपातलक्षणत्वं न स्यादिति भावः। **प्रत्ययस्य** [18]साधुत्वावच्छिन्नप्रत्ययस्य। 'न प्रत्ययः' इति भाष्यतात्पर्यमाह — **कल्पितेति**। **अविद्यमान एवेति**। मन्दमध्यमास्तथा प्रतियन्ति। [19]परीक्षकाणामप्याहार्यारोपरूपा तथा प्रतीतिरस्तीति भावः। 'प्रत्ययोऽङ्गसंज्ञाद्वारेणानिमित्तम्' इति वार्तिकार्थमभिप्रेत्य 'अङ्गसंज्ञा तर्हि' इति [20]भाष्यम्। तदुपपादयति — **सत्यामिति**। अकारनिमित्तकप्रत्ययाश्रयाङ्गसंज्ञा नाकारलोपनिमित्तम्, तथा सति प्रत्ययाकारयोः संनिपातविधातः स्यादित्यर्थः। अस्मिन्नर्थे वार्तिकं संगमयति — **तत्रेति**। **केचिदिति**। 'तस्य दोषो वर्णाश्रयः' इत्यत्राकारप्रश्लेषं विना पदच्छेदेने-

---

[1] प्रदीपे 'तेषामात्रेयाद्यपि' इत्यत्र 'तेनात्रेयाद्यपि' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. ४. १. १२२.
[3] पा. सू. ६. १. ४८.
[4] पा. सू. ७. ४. १.
[5] पा. सू. ७. २. ६७.
[6] इत्याकारान्तलक्षणः — च, छ.
[7] पा. सू. ६. ४. ६४.
[8] पा. सू. ६. १. १६९.
[9] पा. सू. ६. १. १७६.
[10] ङ्यन्तादित्येवेति भाष्यम् — ञ.
[11] पा. सू. ७. ३. १०७.
[12] पा. सू. ६. १. ६८.
[13] अत्र चकारोऽधिको भाति।
[14] पा. सू. ६. १. ६९.
[15] 'न' इति नास्ति — च, ञ.
[16] परिभाषा नापि बाध्यत इति — ञ.
[17] पा. सू. ४. १. ९५.
[18] साधुत्वावच्छिन्नस्य — अ, आ, इ, ऊ, ॠ.
[19] परीक्षकाणामप्यध्यारोपरूपा — म.
[20] भाष्यमुपपादयति — ॠ.

त्यर्थः। [1]**तेनेति**। [2]'इतश्चानिञः' इति ढग् नावर्णाश्रयः, किं त्विकाराश्रय इति भावः। **अन्ये** भाष्यानुसारिणः। न्यायसाम्यादेवात्रेयादेरपि सिद्धेरत्रैव तदुदाहरणत्वमित्यत्र नाग्रहः कार्य इति भावः। **वृद्धाविति**। एचः संपादनार्थमित्यर्थः। आत्वं [3]'क्रीङ्जीनां णौ' इति विहितम्। ननु पुकः प्रकृत्यवयवत्वान्न व्यवधायकत्वम्, अत आह — **अङ्गस्येति**। भाष्ये **पुग् ह्रस्वत्वस्येति**। ण्याकारसंनिपातनिमित्तः पुक् [4]तद्विघातकस्य [5]'णौ चङ्युपधायाः' इति ह्रस्वत्वस्यानिमित्तं स्यादिति वार्तिकार्थः। भाष्ये **पपिवानिति**। 'पा पाने' लिट्, द्वित्वम्, अभ्यासस्य ह्रस्वः, लिटः [6]'क्वसुश्च' इति क्वसुरादेशः, तस्येट्, [7]'आतो लोप इटि च' इत्यालोपः, [8]'उगिदचाम्' इति नुम्, [9]'सान्तमहतः' इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ। [10]'वस्वेकाजाद्घसाम्' इत्याकारसंनिपातेन विधीयमान इट् आकारलोपस्य निमित्तं न भवतीत्यर्थः। भाष्ये मतुब्विभक्त्योरुदात्तत्वमिति विग्रहः। **पूर्वमिति**। [11]'ह्रस्वनुड्भ्यां मतुप्'। ह्रस्वान्तादन्तोदात्तान्नुटश्च मतुबुदात्तः। अग्निवायुशब्दौ [12]'फिषः' इति [13]प्रत्ययस्वरेण वान्तोदात्तौ। **निघातम्** [14]'अनुदात्तं पदमेकवर्जम्' इति निघातम्। **अन्तोदात्तादिति**। अनित्यसमासे यदुत्तरपदमेकाजन्तोदात्तं तस्मात् परा तृतीयादिविभक्तिरन्यतरस्यामुदात्ता [15]भवतीति सूत्रार्थः। ननु 'ङ्यन्तात्' इत्ययुक्तम्, तत्र दीर्घादिति सत्त्वेन ह्रस्वादप्राप्तेः, अत आह — **हल्ङ्यादिसूत्र इति**। ननु ह्रस्वे कृते कथं ङ्यन्तत्वम्, अत आह — **तत्रेति**। 'ङ्यन्तादित्येवं भविष्यति' इति भाष्यं ब्रह्मबन्धुव्यतिरिक्तविषयमित्याह — **ब्रह्मेति**। भाष्ये **दीर्घादित्युच्यत इति**। दीर्घो न पृथग्लोपस्य निमित्तम्, तथा सति लाघवाय 'हल्ङ्याब्दीर्घात्' इत्येव क्रियेत। किं तु विशेषणम्। तच्च ङ्यापोः, न हल इत्यभिप्रायः। भाष्ये **ह्रस्वत्वम्** [16]'अम्बार्थं' इत्यनेन। **संबुद्धिलोपः** [17]'हल्ङ्याब्भ्यः' इत्यनेन। ननु कृते ह्रस्वत्वे [18]'एङ्ह्रस्वात्' इत्यनेन, अकृते [19]'हल्ङ्याब्भ्यः' इत्यनेनेति [20]लक्षणभेदात् कथं नित्यत्वम्, अत आह — **कार्यमिति**। ननु [21]'एङ्ह्रस्वात्' इत्यत्र ह्रस्वग्रहणस्य निरवकाशत्वात् संनिपातपरिभाषा बाधिष्यते, अत आह — **संबुद्धीति**॥

[१, ३१५–३१७]

(**रत्नप्रकाशः**) **तस्यैतस्य लक्षणस्येति**। संनिपातपरिभाषाया इत्यर्थः। **दोष इति**। अति-

---

[1] प्रदीपे 'तेषामात्रेयाद्यपि' इत्यत्र 'तेनात्रेयाद्यपि' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. ४. १. १२२.
[3] पा. सू. ६. १. ४८.
[4] तद्विघातस्य — म, आ, इ, उ.
[5] पा. सू. ७. ४. १.
[6] पा. सू. ३. २. १०७.
[7] पा. सू. ६. ४. ६४.
[8] पा. सू. ७. १. ७०.
[9] पा. सू. ६. ४. १०.
[10] पा. सू. ७. २. ६७.
[11] पा. सू. ६. १. १७६.
[12] फिट्सूत्रम् १.
[13] अग्निशब्दे 'अङ्गेर्नलोपश्च' इत्युणादिसूत्रेण 'अगि गतौ' इति धातोर्निप्रत्ययो नुम्नकारलोपश्च बोध्यः। वायुशब्दे वाधातोः 'कृवापा' इत्याद्युणादिसूत्रेणोण् प्रत्ययः, आतो युगिति युगागमश्च बोध्यः।
[14] पा. सू. ६. १. १५८.
[15] 'भवति' इति नास्ति — म, उ, ऊ, ॠ.
[16] पा. सू. ७. ३. १०७.
[17] पा. सू. ६. १. ६८.
[18] पा. सू. ६. १. ६९.
[19] पा. सू. ६. १. ६८.
[20] लक्षणभेदसंभवात् — अ.
[21] पा. सू. ६. १. ६९.

व्याप्तिलक्षण इति शेषः। **वर्णविचालस्य** वर्णादेशस्य। **दाक्षिरिति**। [1]'अत इञ्' इति विधिस्तयोरानन्तर्यफलक इति फलस्यापि निमित्तत्वात् तदानन्तर्यविघातकलोपस्य निमित्तं न स्यादिति मन्यते। एतेन 'प्रयोगे व्यवस्थितस्यैवेकारस्यान्वाख्यानमनेन क्रियत इति संनिपातलक्षणत्वं प्रत्ययस्य संभाव्यते' इति निरस्तम्। प्रयोगे व्यवस्थितस्यान्वाख्यानेऽपि तावता तस्येञ आनन्तर्यनिमित्तकत्वाप्रतिपादनात्। **न प्रत्ययः संनिपातलक्षण इति**। लक्षणशब्दः कारणपर एव, न तु फलपरोऽपीति भावः। 'वर्णाश्रयः प्र त्ययः' इत्यादेः 'रामाय' इत्यादिरुदाहरणं बोध्यम्। यादेशो हि प्रत्ययोऽपि भवति, वर्णाश्रयश्च। एतेन 'कल्पितप्रकृतिप्रत्ययविभागेनान्वाख्यानात् प्रकृतेरविद्यमान एव प्रत्यय उत्पाद्यत इत्याशयः' इति निरस्तम्। पक्षान्तरस्यासंभावनीयत्वेन तत्परिहारक्लेशस्य व्यर्थत्वात्। फलरूपानन्तर्यनिमित्तकताया अनिवारणेन तत्प्रयुक्तातिप्रसङ्गस्य स्थितत्वाच्च। **अङ्गसंज्ञा तर्हीति**। प्रत्यये परतः पूर्वस्य तद्विधानात् सा प्रत्ययतत्पूर्वशब्दस्वरूपानन्तर्यनिमित्ता पूर्वशब्दस्वरूपनाशद्वारा तदानन्तर्यविघातकवर्णलोपस्य निमित्तं न स्यादिति भावः। एतेन 'सत्यामङ्गसंज्ञायामकारलोप इति स्यादानन्तर्यविघातः। तत्र **वर्णविचालस्यानिमित्तं स्यादिति** अङ्गसंज्ञाद्वारेणेत्यर्थः।' इति निरस्तम्। वर्णाश्रयस्य विधेः संनिपातलक्षणत्वं नास्तीत्येव दूषितत्वेन पुनस्तस्याङ्गसंज्ञाद्वारा वर्णविचालनिमित्तत्वाभावकथनस्यायुक्तत्वात्। **क्षपयतीति**। णिजानन्तर्यनिमित्तमात्वं स्वान्तेन लब्धतदानन्तर्यविघातकस्य पुको निमित्तं न स्यादिति भावः। एतेन 'णिचि वृद्धौ कृतायामात्वं पुको न निमित्तं स्यात्। अङ्गस्य य आकारस्तस्य पुगित्यवयवभक्तं पुकं मत्वा दोषोपन्यासः' इति निरस्तम्। 'वृद्धौ कृतायामात्वम्' इत्युक्तेर्व्यर्थत्वात्। 'एज्विषय आत्वम्' इति पक्षस्यापि विद्यमानत्वेन तदुभयसाधारण्येन 'णिजानन्तर्यलक्षणमात्वम्' इत्येव तत्र वक्तुं युक्तत्वात्। अङ्गस्य पुगागमे दोषस्योपपादितत्वात्। अन्यथा अवयवावयवस्य समुदायावयवत्वेनाकारस्य पुगिति पक्षेऽपि दोषानुपपत्तिप्रसङ्गाच्च। **पपिवानिति**। [2]'वस्वेकाजाद्घसाम्' इतीट आदन्ताङ्गानन्तर्यनिमित्तः स्वविशिष्टेन लब्धस्य तस्य विघातकातोलोपस्य निमित्तं न स्यादिति भावः। **अग्निमानिति**। [3]'ह्रस्वनुड्भ्यां मतुप्' इति ह्रस्वान्तान्तोदात्तानन्तर्य[4]लक्षणमुदात्तत्वं तदानन्तर्यविघातकस्य शेषनिघातस्य निमित्तं न स्यादिति भावः। **परमवाचेति**। [5]'अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे' इत्यन्तोदात्तोत्तरपदानन्तर्यलक्षणं तृतीयादिविभक्त्युदात्तत्वं तदानन्तर्यविघातकशेषनिघातनिमित्तं न स्यादिति भावः। **मा भूदेवमिति**। मन्दबुद्ध्याशङ्क्येयम्, हल्ङ्यादिसूत्रे दीर्घग्रहणस्य प्रत्यक्षस्य स्थितत्वात्। ईदात्प्रश्लेषेण तत्प्रत्याख्यानेऽपि प्रकृतेऽल्विधित्वेन स्थानिवद्भावाप्रवृत्त्या ईकाराभावात्। ब्रह्मबन्धुशब्दस्य हल्ङ्याबन्तत्वाभावाच्च। **नित्यः संबुद्धिलोप इति**। नित्यत्वानित्यत्वे कार्यगते एव परिभाषाप्रवर्तके इति ह्रस्वोत्तरं हल्ङ्यादिसूत्राप्रवृत्तावपि [6]'एङ्ह्रस्वात्' इति सूत्रेण लोपः प्राप्नोत्येवेति तस्य नित्यतेति भावः॥

[१, ३१५–३१७]

(**नारायणीयम्**) ननु संबन्धिद्वयाधीनः संश्लेष इत्यसति[7] नास्ति, तत्कथमिञुत्पत्तौ संश्लेषस्य निमित्तत्वमित्याशङ्क्याह — **प्रयोग इति**। नात्र वाक्ये इञुत्पद्यते, तस्य नित्यत्वात्। किं तु

---

[1] पा. सू. ४. १. ९५.
[2] पा. सू. ७. २. ६७.
[3] पा. सू. ६. १. १७६.
[4] लक्षणमनुदात्तत्वं — ब.
[5] पा. सू. ६. १. १६९.
[6] पा. सू. ६. १. ६९.
[7] 'संबन्धिद्वये' इति शेषः।

साधुत्वमात्रमन्वाख्यायते — अकारान्तात् पर इञ् साधुर्भवतीति। तस्मिंश्चान्वाख्याने संनिपातस्य निमित्तत्वमित्यर्थः। उक्तेन प्रकारेण संनिपाताश्रयत्वोपपत्तेः 'न प्रत्ययः' इति भाष्यं कथमित्यत्राह — **कल्पितेति**। [1]लोके सिद्धत्वाङ्गीकारे संनिपातनिमित्तत्वं [न] कस्य चिदपीति, कल्पनायां चात इञो भावनान्न संनिपातनिमित्तत्वमित्यर्थः। ननु प्रकृतिप्रत्ययपौर्वापर्यमाश्रित्याङ्गसंज्ञा, तच्च लोपेऽपि न विहन्यत इति कथम् 'अङ्गसंज्ञा' इति भाष्यम्, अत आह — **सत्यामिति**। पौर्वापर्यमात्रसत्त्वेऽप्यङ्गसंज्ञानिमित्तस्य पौर्वापर्यस्य विघात इति भावः। अदन्तप्रकृतिसंनिपातो ह्यङ्गसंज्ञानिमित्तम्। तच्च लोपाद्विहन्यते। वार्तिकं तर्हि किं त्याज्यम्, अत आह — **तत्रेति**। **पूर्वमिति**। [2]'ह्रस्वनुड्भ्यां मतुप्' इत्यन्तोदात्ताधिकारात्। दीर्घविशेषणस्याकर्तव्यतां मन्वानस्य न चोद्यमेतत्, तदकरणे 'निष्कौशाम्बिः, अतिखट्वः' इत्यादावतिव्याप्तेः। किं तु तत्प्रच्छादनेन वादिव्यामोहनायोपन्यास इत्याह — **ह्रलिति**। सकलेष्टसिद्ध्यभावादपि परव्यामोहनायैवास्य प्रवृत्तिरित्याह — **ब्रह्मेति**। ह्रस्वे सति दीर्घविशेषणात् हल्ङ्यादिलोपाप्राप्तेः कथं नित्यत्वम्, अत आह — **कार्यमिति**। संबुद्धिलोपस्य निरवकाशत्वात् संनिपातपरिभाषाबाधमाशङ्क्याह — **संबुद्धीति**॥

[१, ३१७–३१८]

(**लघुविवरणम्**) **दूढ्य इति**। ध्यायतेर्विचि षष्ठ्येकवचने [3]'आतो धातोः' इति लोपे [4]'दुरो दाशनाशदभध्येषु' इत्युत्तरपदादेः ष्टुत्वे पूर्वपदान्तस्य चोत्वे दूढ्य [5]'इति'। **नियम इति**। इट् तु क्रादिनियमादेव सिद्ध इति भावः। **मित्त्वमिति**। [6]'मितां ह्रस्वः' इत्यत्र [7]'ऊदुपधाया गोहः' इत्यत उपधाग्रहणमनुवर्तत इत्यर्थः। **गुणादिति**। एङोऽपि गुणत्वात्। ननु ह्रस्वग्रहणं दर्वीत्यत्र "जसादिषु [8]छन्दसि वावचनम्' इति गुणाभावे लोपार्थं स्यादिति कथं ह्रस्वग्रहणात् संनिपातपरिभाषाबाध इत्यत आह — **दर्वीत्यत्रेति**। **लुगिति**। [9]'सुपां सुलुक्' इत्यनेन॥

[१, ३१७–३१८]

(**विवरणम्**) ननु परिगणितदोषाणामुक्तप्रयोजनेभ्यो बहुत्वमेव न, कुत एव तदतिशय इत्यत आह — **दुष्टत्वेति**। पाठसामर्थ्याद्धि स्वविषयापेक्षया सर्वेषां नामानीत्याश्रितम्, [11]'नासंकुचत्सर्वनामत्वस्यासंभवात्। केषांचित् सति संभवे तदेवाश्रयणीयमित्यभिप्रेत्याह — **सर्वादिष्विति**। **दूढ्य इति**। ध्यायतेर्विचि षष्ठ्येकवचने [12]'आतो धातोः' इति लोपे [13]'दुरो दाशनाशदभध्येषु' इत्युत्वे उत्तरपदादेः ष्टुत्वे च दूढ्य इति रूपम्। 'तस्मात्' इत्यादेरभिप्रायमाह — **तत्रेति**। 'न हि दोषाणाम्' इति भाष्यस्यायमर्थः — येषु हि लक्षणमस्ति तेषां बहुत्वे साकल्येनोदाहृत्यसंभवादुपलक्षणत्वेन किंचिदेवोदाह्रियते। तदभावात्तु दोषाणां नोपलक्षणत्वेनोदाहरणत्वमिति[14] शक्यते

---

[1] लोकसिद्धत्वाङ्गीकारे — क.
[2] पा. सू. ६. १. १७६.
[3] पा. सू. ६. ४. १४०.
[4] का. वा. ६. ३. १०९–५.
[5] 'इति' इत्यस्यानन्तरं 'रूपम्' इत्यधिकम् — त.
[6] पा. सू. ६. ४. ९२.
[7] पा. सू. ६. ४. ८९.
[8] का. वा. ७. ३. १०९–१.
[9] छन्दोवावचनं — ण, त.
[10] पा. सू. ७. १. ३९.
[11] न संकुचत् — छ, ज, ट.
[12] पा. सू. ६. ४. १४०.
[13] का. वा. ६. ३. १०९–५.
[14] उदाहरणमिति — च, छ.

वक्तुमिति । **तत्रेति** । यादृशप्रकृतिप्रत्ययसंनिपातनिमित्ताङ्गसंज्ञा तादृशसंनिपातविघातं विना [1]'यस्य' इति लोपस्य न लभ्यते किंचिदुदाहरणमित्यतो वचनसामर्थ्यादित्यर्थः । अकारसंनिपातनिमित्तो ङेर्यो [2]यजादौ विधीयमानस्य सुपि दीर्घस्य न निमित्तं स्यादिति चोद्यं प्रत्याह — **कष्टायेति** । **लिङ्गात्** निर्देशादित्यर्थः । **न त्वपूर्व इति** । क्रादिनियमादिट् सिद्धः । तथा च [3]नेडाकारसंनिपातनिमित्त इति भावः । **आकारान्तेति** । अङ्गस्याकारस्येति वैयधिकरण्यस्य [4]आकारान्तस्याङ्गस्येति सामानाधिकरण्यसंभवेऽयोगादित्यर्थः । **मित्त्वमिति** । [5]'मितां ह्रस्वः' इत्यत्र [6]'ऊदुपधाया गोहः' इत्यत उपधाग्रहणमनुवर्तत इति भावः । **ह्रस्वभाविनीति** । [7]'अचश्च' इत्यचो ह्रस्वविधानादित्यर्थः । **बाधत इति** । विशेषविषयत्वेन शीघ्रप्रवर्तनादित्यर्थः । **ह्रस्वेति** । इकारोकारार्थेति शेषः । ननु दर्विशब्दात् संबुद्धौ [8]'जसादिषु [9]छन्दसि वावचनम्' इति वचनात् तत्र चादिशब्दस्य प्रकारवाचित्वात् [10]'ह्रस्वस्य गुणः' इति गुणाभावे संबुद्धिलोपार्थं ह्रस्वग्रहणं स्यादिति न संनिपातपरिभाषाबाधने तस्य सामर्थ्यमित्यत आह — **दर्वीति** । **छान्दसः** [11]'सुपां सुलुक्' इत्यनेनेत्यर्थः ॥

[१, ३१७–३१८]

(**उद्द्योतनम्**) ननूक्तदोषाणामुक्तप्रयोजनेभ्यो [12]बहुत्वमेव नेति कथं प्रकर्षप्रत्ययः, अत आह — **दुष्टत्वेति** । ननु सर्वनामत्वात् 'समाः' इत्ययुक्तम्, अत आह — **सर्वादिष्विति** । अन्वर्थसंज्ञाविज्ञानादिति भावः । समशब्दस्य सर्वशब्दपर्यायतास्तीत्याह — **अस्तीति** । **सर्वस्येति** । अत्र तैत्तिरीयशाखावाक्ये 'मा, नः, इति पदद्वयम्,[13] **समस्य** अस्मदादिसदृशस्य' इति च [14]भाष्ये व्याख्यातम् । तथा च शाखान्तरीयवाक्यमुदाहृतमिति मन्तव्यम् । 'दूढ्यः' इत्यस्यार्थः — **दुर्धिय इति** । ध्यायतेर्विचि षष्ठ्येकवचने [15]'आतो धातोः' इति लोपे [16]'दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेष्टुत्वं च' भाष्ये '**समस्य** अस्माभिः समानस्य **दूढ्यः** दुर्धियः **परिद्वेषसः** सर्वतो द्वेषं कुर्वतः शत्रोः, **अंहतिः** अस्मासु कृतो द्रोहः, **नः** अस्मान् **आ** समन्तात् मा वधीत् । कां केव, **नावर्मूर्मिर्न** यथा नद्यां गच्छन्तीं नावर्मूर्मिर्न नाशयति तद्वद्वैरिकृतो द्रोहोऽस्मान् मा विनाशयतु' इति व्याख्याय 'सर्वशब्दपर्यायो वायं समशब्दः, सर्वस्य वैरिणो द्रोहो मा विनाशयतु' इति पक्षान्तरं च प्रदर्श्यते । भट्टभास्करीये तु '**समस्य** सर्वस्यापि' इति प्रथमं व्याख्याय 'कश्चिदाह — **समस्य** समानस्य' इति पक्षान्तरं च प्रदर्शितम् ।

---

[1] पा. सू. ६. ४. १४८.
[2] यजादौ सुपीत्यन्वयः ।
[3] नेडाकारान्तसंनिपात — च, छ, ज, ट.
[4] आकारान्ताङ्गस्येति — च, छ.
[5] पा. सू. ६. ४. ९२.
[6] पा. सू. ६. ४. ८९.
[7] पा. सू. १. २. २८.
[8] का. वा. ७. ३. १०९–१.
[9] छन्दसो वावचनम् — छ; छन्दोवावचनम् — च, ज, ट.
[10] पा. सू. ७. ३. १०८.
[11] पा. सू. ७. १. ३९.
[12] बहुत्वमेवेति कथं — अ, आ, इ, उ, ऊ, ऋ.
[13] एतेनात्र कैयटे 'मानः' इत्येकमेव पदमित्यन्नंभट्टाभिप्रायो भाति । उद्द्योते तु पदद्वयमेवाभिसंधाय विवृतम् ।
[14] तैत्तिरीयसंहितायां २. ६. ११. अनुवाके सायण-
[15] पा. सू. ६. ४. १४०.
[16] का. वा. ६. ३. १०९–५. अत्र 'दभध्येषु' इत्यन्तं वार्तिकम् । 'षष उत्वम्' इति वार्तिकात् 'उत्वम्' इति उत्तरपदादेः ष्टुत्वं च' इति चानुवृत्तम् ।

[1]इत्युत्वे ष्टुत्वे च दूढ्य इति रूपम्। वृत्तौ तु "दुष्टं ध्यायतीति दूढ्यः, दुश्शब्दोपपदाद् ध्यायतेः [2]"आतश्चोपसर्गे' इति कप्रत्ययः" इति प्रथमान्तत्वमुक्तं पृषोदरादिसूत्रे। 'तस्मात्' इति भाष्याभिप्रायमाह — **तत्रेति**। भाष्ये **न हि दोषाणामिति**। येषां लक्षणमस्ति तेषां बहुत्वेन साकल्येनोदाहरणासंभवात् किंचिदेव प्रदर्शनार्थमुदाह्रियते। दोषाणां तु लक्षणाभावात् परिगणितव्यतिरिक्तसद्भावे मानाभावादेतावन्त एवेत्यर्थः। क्रमेण प्रतिविधानप्रकारमाह — **तत्रेति**। **सामर्थ्यादिति**। वचनसामर्थ्यादित्यर्थः। यादृशप्रकृतिप्रत्ययसंनिपातनिमित्ताङ्गसंज्ञा तादृशसंनिपात[3]विधातं विना [4]"यस्य' इति लोपस्योदाहरणासंभवादिति भावः। भाष्यानुक्तमपि 'अकारसंनिपातनिमित्तं यत्वं तद्विघातकात्वस्य[5] निमित्तं न स्यात्' इति दोषान्तरं परिहरति — **कष्टायेति**। **नेति**। [6]आपि परत इत्वनिषेध आबुत्पत्तौ ज्ञापक इत्यर्थः। **नियम इति**। क्रादिनियमादेवेट्सिद्धेरित्यर्थः। तथा च नेट् आकारसंनिपातलक्षण इति भावः। **न त्विति**। परिभाषायां विधिशब्दोऽपूर्वविधिपरः। तथा चात्र सा न प्रवर्तत इति भावः। **आकारान्तेति**। तदन्तग्रहणात् 'अङ्गस्य' इत्यनेन 'आतः' इत्यस्य सामानाधिकरण्येनान्वयसंभवे वैयधिकरण्येनान्वयायोगादित्यर्थः। **अदीदपदिति**। दाञो णौ पुकि चङ्युपधाह्रस्वः, द्वित्वम्, सन्वद्भावादभ्यासस्येत्वम्, [7]"दीर्घो लघोः' इति दीर्घः। **मित्त्वमिति**। "मितां ह्रस्वः' इत्यत्र [8]"ऊदुपधाया गोहः' इत्यत उपधाग्रहणमनुवर्तत इति भावः। **ह्रस्वभाविनीति**। [9]"अचश्च' इत्यच एव ह्रस्वादिविधानादित्यर्थः। ह्रस्वो भावी यस्याः सेति विग्रहः। **बाधत इति**। विशेषविषयत्वादिति भावः। **गुणादिति**। तावतैव 'देवदत्त, अग्ने, वायो' इत्यादौ संबुद्धिलोपसिद्धेरित्यर्थः। **ह्रस्वेति**। इकारोकारार्थेत्यादिः। ननु [10]"दर्विशब्दात् संबुद्धौ[11]"जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः' इति वचनात् तत्र चादिशब्दस्य प्रकारवाचित्वात् 'हे दर्वे, दर्वि' इति रूपद्वयमिष्टम्। तत्र गुणाभावपक्षे संबुद्धिलोपार्थं ह्रस्वग्रहणं स्यादिति संनिपातपरिभाषाबाधने तस्य सामर्थ्यं नास्ति, अत आह — **दर्वीति**। **छान्दसः** [12]"सुपां सुलुक्' इत्यनेन ॥

(१, ३१७–३१८)

(**रत्नप्रकाशः**) **समा इति**। तुल्या इत्यर्थः। सर्वनामसंज्ञा तु तुल्यपर्यायस्य समशब्दस्य न भवति, [13]"यथासंख्यमनुदेशः समानाम्' इति निर्देशाज्ज्ञापकात्। **भूयांस इति**। बहवः, अधिका इति यावत्। अत्राधिक्यकथने न तात्पर्यम्, नापि समत्वकथने। किं तु परिभाषाश्रयणे दोषा अपि बहवो भवन्तीत्यत्र। **साकल्येन परिगणिता इति**। प्रदर्शितसजातीया एव सर्वे दोषा इति भावः। **न हि दोषाणां लक्षणमस्तीति**। येन प्रदर्शितविजातीया अपि दोषाः स्युरिति शेषः।

---

[1] इत्यूत्वे — आ, म, इ, उ, ऊ. रेफस्य उत्वे सवर्णदीर्घो ज्ञेयः।
[2] पा. सू. ३. १. १३६.
[3] विघातकं विना — अ, आ, उ, ऋ.
[4] पा. सू. ६. ४. १४८.
[5] दीर्घस्येत्यर्थः।
[6] आप्परत्वनिर्देश आबुत्पत्तौ — म.
[7] पा. सू. ७. ४. ९४.
[8] पा. सू. ६. ४. ९२.
[9] पा. सू. ६. ४. ८९.
[10] पा. सू. १. २. २८.
[11] दर्वीशब्दात् — म, आ, ऋ.
[12] का. वा. ७. ३. १०९-१.
[13] पा. सू. ७. १. ३९.
[14] पा. सू. १. ३. १०.

प्रतिविधेयमिति। विधानसामर्थ्यादाङ्गो वर्णविचालः कश्चिद् भवति। [1]'कष्टाय' इति ज्ञापकादपि यादेशे परे दीर्घः सिध्यति। [2]'न यासयोः' इति लिङ्गाट्टाब् भविष्यति सर्वनाम्नः। 'पपिवान्' इत्यत्र आतो लोपोऽप्यङ्गसंज्ञानिमित्त इत्यारम्भसामर्थ्यादेव भवति। एतेन "[3]'वस्वेकाच्' इत्ययं नियम इट इत्याकारलोपः" इति निरस्तम्। इट आङ्गत्वेन सर्वथा आकारान्ताङ्गानन्तर्यनिमित्तकत्वस्य वारयितुमशक्यत्वात्। अङ्गसंज्ञाया अनिमित्ततापरिहारं विना तत्सिद्धेरभावेन विधानसामर्थ्यादेव लोपसिद्धेश्च। यदप्युक्तम् 'क्रापयतीति। आकारान्तभक्तः पुग्न व्यवधायकः' इति। तदपि न, अवयवावयवत्वेऽपि समुदायावयवतायाः दुर्वारतायाः उक्तत्वात्। समुदायावयवत्वेऽप्याकारान्ताङ्गानन्तर्यविघातकतायाः पुको दुर्वारत्वाच्च। न हि पुकि कृतेऽङ्गमाकारान्तमेव तिष्ठति। तर्हि तत्र दोषपरिहारः कथमिति चेत्, आरम्भसामर्थ्यादेव पुग् भवतीत्यवेहि। न ह्यङ्गस्वरूपहान्यसंपादकः क्वचित् पुग् भवति। अत एव 'अदीदपत्' इत्यादौ पुकि ह्रस्वः सिध्यति, अङ्गमविकुर्वतो[4] ह्रस्वस्यासंभवात्। एतेन 'मारणादौ ज्ञाधातोर्मित्त्वविधानात् पुकि ह्रस्वत्वं भवति' इति निरस्तम्। संनिपातपरिभाषाया अविषये ह्रस्वस्य प्रवृत्तौ सत्यामेव ज्ञापकोपपादनक्लेशस्य सार्थक्यात्। 'अग्निमान्' इत्यादौ तत्तद्विधिशेषभूत [5]'अनुदात्तं पदमेकवर्जम्' इति वचनबलात् शेषनिघातो भवति। 'नदि, कुमारि, किशोरि' इत्यादौ च [6]'अन्तरङ्गानपि' इति परिभाषया हल्ङ्यादिलोपं बाधित्वा [7]'अम्बार्थ' इति ह्रस्वे कृतेऽपि "एङ्ह्रस्वात्' इत्यत्र 'गुणात् संबुद्धेः' इति वक्तव्ये ह्रस्वग्रहणसामर्थ्यात् संनिपातपरिभाषाबाधः। ह्रस्वविधिसामर्थ्यादपि तत्र संबुद्धिनिमित्तगुणो न भवति। अन्यथा 'अम्बार्थनद्योर्गुणः' इत्येव ब्रूयात्॥

[१, ३१७–३१८]

(**नारायणीयम्**) शङ्कितव्यं दोषद्वयं निरस्यति — **कष्टायेति**। **न त्विति**। संनिपातलक्षणो विधिरित्यत्रापूर्वविधिः परिगृह्यत इत्यर्थः। ह्रस्वग्रहणस्येदं प्रयोजनमित्याशङ्क्याह — **दर्वीति**॥

अव्ययीभावश्च. १. १. ४१.

[१, ३१८–३२०]

(**लघुविवरणम्**) **पराङ्गवद्भाव इति**। ततश्च षाष्ठिकामन्त्रितस्वरः। **अन्ये त्विति**। 'अव्ययीभावः' इत्युक्ते च्विप्रत्यय[8]वशेनानव्ययत्वमपि प्रतीयत इति न सर्वमव्ययकार्यं भवति, किं तु किंचिदिति प्रतीयत इत्यर्थः। **वचनमन्तरेणेति**। **विशेषे** कार्यविशेष इत्यर्थः। उपलक्षणं चैतत्।

---

[1] पा. सू. ३. १. १४.
[2] पा. सू. ७. ३. ४५.
[3] पा. सू. ७. २. ६७.
[4] वेः शब्दकर्मणः, अकर्मकाच्चेति अकर्मकात् शब्दकर्मत्व एव सकर्मकाच्च विपूर्वकात् कृञ आत्मनेपदविधानादत्र परस्मैपदम्।
[5] पा. सू. ६. १. १५८.
[6] अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधत इत्यभिप्रायेणेदम्।
[7] पा. सू. ७. ३. १०७.
[8] पा. सू. ६. १. ६९.
[9] वशेनाव्ययत्वमपि — ण.

पुनर्विधानात् स्वरादिसूत्रेण विहिता भवत्वनित्या, अव्ययीभावस्य पुनर्विधानेनैव नित्याव्ययसंज्ञा स्यादिति नानित्यत्वेन कतिपयकार्यसिद्धिरित्यपि द्रष्टव्यम् ॥

[१, ३१८–३२०]

(**विवरणम्**) वार्तिके **उपचारो** नाम विसर्जनीयस्थाने विधीयमानः सत्वादिः। **तत्रेति**। सूत्रस्यातिप्रसङ्गनिवृत्तये कर्तव्यत्वेन तद्वक्ष्यत इति 'षष्ठ्यामन्त्रित' इत्युक्तम्। न त्वत्र सूत्रेण पराङ्गवद्भावो न प्राप्नोतीति। पराङ्गवद्भावाच्च षाष्ठिकेन [1]'आमन्त्रितस्य च' इत्यनेन 'उपाग्न्यधीयान' इत्यत्र समुदायस्यादिरुदात्तो भवति। **अन्ये त्विति**। [2]च्विप्रत्ययेन ह्यनव्ययत्वमव्ययत्वं च प्रतीयत इति प्रयोगानुसारेण किंचिदव्ययकार्यं भवति किंचिच्च नेति यथेष्टसिद्धिरित्यर्थः। **विशेषे** कार्यविशेष इत्यर्थः। उपलक्षणं चैतत्। पुनर्विधानात् स्वरादिसूत्रेण विहिता भवत्वनित्या। अव्ययीभावस्य तु पुनर्विधानादेव [3]'द्विर्बद्धं सुबद्धं भवति' इति न्यायान्नित्यैव स्यादव्ययसंज्ञेति न कतिपयाव्ययकार्यसिद्धिरित्यपि द्रष्टव्यम् ॥

[१, ३१८–३२०]

(**उद्द्योतनम्**) वार्तिके **उपचारः** विसर्जनीयस्थाने विधीयमानः सकारादिः। निवर्त्यस्य प्रयोजनवाचिनार्थशब्देन सामानाधिकरण्यं न दृष्टम्, अत आह — **यथेति**। भाष्ये **नाव्ययेति**। [4]'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः', एभ्यः स्वाङ्गवाचि मुखं बहुव्रीहावन्तोदात्तं न स्यात्। उच्चैर्मुखः, इत्यादि। [5]अत्र पूर्वपदप्रकृतिस्वर एव। भाष्ये **अत इति**। [6]'अतः कृकमि' इत्यनेन विधीयमानस्य [7]विसर्जनीयस्थानिकसकारस्य [8]'अनव्ययस्य' इति प्रतिषेधः सिद्धो भवतीत्यर्थः। **परिगणनमिति**। वक्ष्यमाणाव्ययकार्याणां [9]पराङ्गवद्भावनिषेधादीनामव्ययीभावेऽनङ्गीकारात् परिगणनदृढीकार इत्यर्थः। 'उपाग्नि' इति सामीप्येऽव्ययीभाव इत्याह — **अग्निसमीप इति**। अव्ययीभावात् सप्तम्या लुगित्यर्थः। सप्तम्यन्तत्वकथनस्य प्रकृतोपयोगमाह — **तत्रेति**। 'उपाग्नि' इत्यस्य सप्तम्यन्तत्वे सतीत्यर्थः। **षष्ठीति**। पराङ्गसूत्रे वार्तिकमिदम्। षष्ठ्यन्तस्यामन्त्रितस्य कारकस्य च पराङ्गवद्भावो नान्यस्येति तदर्थः। तथा चाधिकरणकारकत्वादत्र पराङ्गवद्भावसिद्धिरिति भावः। [10]'सुबामन्त्रिते' इति सूत्रस्यातिप्रसङ्गनिवृत्तये कर्तव्यत्वेन तद्वक्ष्यत इति 'षष्ठ्यामन्त्रित' इत्युक्तम्, न त्वत्र सूत्रेण पराङ्गवद्भावो न प्राप्नोति। पराङ्गवद्भावाच्च षाष्ठिकेन [11]'आमन्त्रितस्य च' इत्यनेन 'उपाग्न्यधीयान' इत्यत्र समुदायस्यादिरुदात्तो भवति। भाष्ये **अनुत्तरपदस्थस्येति वर्तत इति**। उपपयःकार इत्यत्रोत्तरपदस्थत्वाद्विसर्जनीयस्य न सादेश इत्यर्थः। [12]'अग्नेर्ढक्'

---

[1] पा. सू. ६. १. १९८.
[2] च्विप्रत्यये हि — ट.
[3] लौ. न्या. साहस्री पृष्ठम् २०४.
[4] पा. सू. ६. २. १६८.
[5] तत्र — अ.
[6] पा. सू. ८. ३. ४६.
[7] विसर्जनी स्थायस्थने सकारस्य — म; विसर्जनीयस्थाने सकारस्य — आ, उ, ॠ.
[8] पा. सू. ८. ३. ४६.
[9] पराङ्गवद्भावादीनाम् — अ, म, उ, ॠ.
[10] पा. सू. २. १. २. 'सुबामन्त्रिते' इत्यादि 'समुदायस्यादिरुदात्तो भवति' इत्यन्तं नास्ति — म, इ, उ, ऊ.
[11] पा. सू. ६. १. १९८.
[12] पा. सू. ४. २. ३३.

इत्यादेः सत्त्वादाह — **सामान्यलक्षणमिति**। भाष्ये **तत्रैव** [1]'नाव्ययदिक्शब्द' इति सूत्र एव। [2]ननु तत्रावचनेन तादर्थ्यमात्राभावेऽस्य वचनस्य किं तत्र मुख[3]स्वरमिष्टम्, उत निवृत्तिरित्यपेक्षायां मतभेदं दर्शयति — **न चोक्तमिति**। **अन्ये त्विति**। अव्ययीभाव इत्यन्वर्थसंज्ञा, तत्र च्विप्रत्ययेनाव्ययत्वानव्ययत्वयोः प्रतीतेः प्रयोगानुसारेण किंचिदव्ययकार्यं भवति किंचिन्नेतीष्ट[4]सिद्धेरित्यर्थः। **सूत्रेण** 'अव्ययीभावश्च' इत्यनेन। **वचनमन्तरेण** परिगणनमन्तरेण। **विशेषे** कार्यविशेषे। तथा च तन्मतमयुक्तमित्यर्थः। [5]पुनर्विधानात् स्वरादिसूत्रविहितसंज्ञाया अनित्यत्वेऽपि [6]'द्विर्बद्धं सुबद्धं भवति' इति न्यायेनाव्ययीभावस्य नित्यैव संज्ञा स्यादिति नेष्टसिद्धिरित्याहुः॥

। १, ३१८–३२०।

(**रत्नप्रकाशः**) **लुङ्मुखस्वरोपचारा इति**। तत्र मुखस्वरोपचारौ निवर्त्यमानतया प्रयोजनम्। यथा मशकार्थो धूम इत्यत्र मशकाः। **उपाग्निमुख इति**। बहुव्रीहिरयम्। तत्र [7]'मुखं स्वाङ्गम्' इति सूत्रेण स्वाङ्गवाचिमुखपदमन्तोदात्तं स्यादित्यर्थकेनान्तोदात्तत्वे प्राप्ते [8]'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः' इति तस्य निषेधे पूर्वपदप्रकृतिस्वर एव भवतीति भावः। **अपि खल्विति**। एवं खल्वित्यर्थः। परिगणनमनेन दृढीकृतम्। **उपाग्न्यधीयानेति**। अग्निसमीपेऽधीयानेत्यर्थः। तत्र [9]'षष्ठ्यामन्त्रितकारकवचनम्' इति पराङ्गवद्भावः। परिगणितेष्वप्येकमेव प्रयोजनं भवति नान्यदिति तदर्थं परिगणनसापेक्षं सूत्रं न कर्तव्यम्। किं तु 'नाव्ययाव्ययीभावदिक्शब्द' इत्यादिसूत्रन्यास एव कर्तुमुचित इत्याशयेनाह — **यदीति**। **नैतानि सन्तीति**। एतानि त्रीणि प्रयोजनानि [न] भवन्तीत्यर्थः। **न चैकमिति**। सति लघूपायान्तरे गुरूपायस्येति शेषः। **तत्रैवायं ब्रूयादिति**। तत्रैव वक्तुमुचितमिति भावः। एतेन 'तथा सूत्रकारेण नोक्तमिति मुखस्वरेणात्र भवितव्यम्' इति निरस्तम्। यथोत्तरं मुनीनां प्रामाण्यात्। अन्यथा परिगणनमेवानाश्रयणीयं स्यात्। यदप्युक्तम् 'अन्ये वर्णयन्ति — अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानान्मुखस्वरनिवृत्तिर्भविष्यतीति नार्थः सूत्रेणेति' इति। तदपि न, तदेव प्रयोजनं तेन भवति नान्यदित्यत्र विनिगमकाभावात्। [10]'व्याख्यानतः' इति परिभाषाया विनिगमकत्वे [11]'पृषोदरादीनि' [इति] सूत्रमात्रस्यैवाङ्गीकरणीयतापत्तेश्च। तर्हि व्याख्यानपरिभाषा किमर्थेति चेत् क्वचिदगतिकस्थले निर्णयार्थेति गृहाण। यदप्युक्तम् 'केचित्तु स्वरादिपाठादव्ययसंज्ञायां पुनर्विधानमनित्यत्वज्ञापनार्थम्। तेन कतिपयान्येवाव्ययकार्याणि भवन्तीति नार्थः परिगणनेन,' इति। तदपि न, तेन ज्ञापकेनान्यस्य स्वरादेरव्ययसंज्ञाया अनित्यत्वेऽप्यव्ययीभावस्य तदनित्यताया असिद्धेः। तदनित्यतया स तुष्यति चेदपि कस्मिन् कार्येऽव्ययत्वं कस्मिन् तदभाव इति निर्णयासंभवाच्च॥

---

[1] पा. सू. ६. २. १६८.
[2] 'ननु तत्र' इत्यादि 'न चोक्तमिति' इत्यन्तं नास्ति — इ, उ, ऊ.
[3] नपुंसकतयैव 'अ, म, आ, ऋ' कोशेषु स्वरशब्दो दृश्यते। स्वरशब्दस्यार्धर्चादित्वान्नपुंसकत्वं बोध्यम्।
[4] सिद्धिरित्यर्थः — अ, इ, उ, ऋ.
[5] विवरणमतमाह — पुनरित्यादिना।
[6] लौ. न्या. साहस्री पृष्ठम् २०४.
[7] पा. सू. ६. २. १६७.
[8] पा. सू. ६. २. १६८.
[9] का. वा. २. १. २–१.
[10] परिभाषा. १.
[11] पा. सू. ६. ३. १०९.

[१, ३१८–३२०]

(**नारायणीयम्**) मुखस्वरोपचारयोरनव्ययकार्यत्वादव्ययत्वफलतया कीर्तनं कथमित्यत्राह — **मुखेति**। ननु तन्निवृत्तेः फलत्वे तदेव फलतया कथं कीर्त्यमिति शङ्कामस्य व्यवहारस्य लोके निरूढ्या परिहरति — **यथेति**। मशकनिवृत्तिफलको धूमो मशकफल इत्युच्यते। अपिरयं पुनरुक्त इत्यत आह — **एवमिति**। अपिद्वयाभावे त्वपेरेवमित्यर्थं व्याचष्ट इति व्याख्येयम्। तर्हि तदपि वचनं किं कर्तव्यम्, अत आह — **परिगणनमिति**। अव्ययप्रतिषेधाभावेऽपि विधिः कथम्, षष्ठ्या-मन्त्रितकारकान्यतरस्य विधिनिमित्तत्वात्, अत आह — **अग्नीति**। ननु [1]तत्रावचनेन तादर्थ्य-मात्राभावेऽस्य वचनस्य किं तत्र मुखस्वरस्येष्टिः, उत निवृत्तेरन्यथासिद्धिरित्यपेक्षायां मतभेदं दर्श-यति — **न चेति**। **अन्वर्थेति**। अन्वर्थसंज्ञया विशिष्टकार्यविषयमव्ययत्वमनुमेयमिति भावः। **अनित्यत्वेति**। [2]अकृत्स्नकारित्वस्य ज्ञापनायेत्यर्थः। पुनर्वचनाद्धचेतद्विषयं स्वरादिसूत्रं न कृत्स्न-कारीति ज्ञाप्यते। [3]न चास्माद्वचनात् कृत्स्नप्रसङ्गः, ज्ञापनवैफल्यात्। [4]तस्य ज्ञापनमात्रफलं वचन-मिति भावः॥

शि सर्वनामस्थानम्. १. १. ४२.
सुडनपुंसकस्य. १. १. ४३.

[१, ३२०–३२२]

(**लघुविवरणम्**) **अन्यथेति**। 'अनपुंसकस्य' [5]इत्यत्र सुटमनपेक्ष्य नपुंसकस्य येन केनचिल्लक्षणेन प्राप्तायाः सर्वनामस्थानसंज्ञाया निषेध इत्यर्थः॥

[१, ३२०–३२२]

(**विवरणम्**) **प्रसज्येति**। एवं हि नञः प्रतिषेधो मुख्यार्थोऽनुगृहीतो भवतीति भावः। **पर्यु-दासेति**। एवं ह्येकवाक्यता [6]समर्थसमासश्च स्याताम्। यद्यपि पर्युदासेऽभाववाचिना [7]नञा स्वसंबन्ध्यभावयोगी लक्ष्यः, तथाप्येकदोषत्वाद् वाक्यभेदासमर्थसमासलक्षणदोषद्वययुक्तप्रसज्यप्रति-षेधात् पर्युदासो ज्यायानित्यर्थः। पूर्वसूत्रविहित[8]संज्ञां प्रति प्रतिषेधस्याप्राप्तेरिति वार्तिकयोजना। भाष्यकारस्य तु वस्त्वर्थव्याख्या। **अन्यथेति**। सुडित्यनपेक्ष्य नपुंसकसंबन्धिनः सर्वनामस्थानसंज्ञा नेत्येतावन्मात्रोक्ताविति्यर्थः। ननु प्रतिषेधात् प्राग् [9]बाधतामित्यत आह — **अपवादेति**। सूर्यं न पश्यन्ति, पुनर्न गेयाः, [10]श्राद्धे न भुङ्क्ते, इति भाष्योदाहृतोदाहरणानामर्थः॥

---

[1] तत्र वचनेन — क.
[2] कृत्स्नकारित्वस्य — क.
[3] न वास्मद्वचनात् — क.
[4] तत्समापनमात्र — क.
[5] 'इत्यत्र' इत्यस्यानन्तरं 'सुडपेक्षायामनन्तरस्यैव प्रतिषेधप्रसङ्गात्' इत्यधिकम् — ड, ढ, त.
[6] समर्थसमासौ स्याताम् — अ.
[7] 'नञा' इति नास्ति — अ, ट.
[8] संज्ञाप्रतिषेधस्याप्राप्तेरिति — अ.
[9] बाध्यतामित्यत आह — च, छ, ट.
[10] श्राद्धं न भुङ्क्ते — अ, ट.

[१, ३२०–३२२]

(**उद्द्योतनम्**) वार्तिके 'चेत्' इत्यनेन न्यासान्तरे दोषो नास्तीति सूचितम्। तदाह — **अस्मिन्निति**। ननु पर्युदासपक्षे न दोषः, अत आह — **प्रसज्येति**। नञः स्वार्थवृत्तित्व[1]लाभादित्यर्थः। **पर्युदासेति**। यद्यपि पर्युदासेऽभाववाचिनो नञोऽभाववल्लक्षणा, तथापि वाक्यभेदासमर्थसमासरूपदोषयुक्तात् प्रतिषेधाद् दोषद्वयशून्यतया लक्षणामात्राङ्गीकार एव युक्त इत्यर्थः। 'अप्राप्तेर्वा' इति वार्तिकतात्पर्यमाह — **प्रसज्येति**। पूर्वसूत्रविहितसंज्ञायाः प्रतिषेधाप्राप्तेरिति वार्तिकार्थः। **अन्यथेति**। 'सुट्' इत्यनपेक्ष्य नपुंसकसंबन्धिनः सर्वनामस्थानसंज्ञा नेत्येतावन्मात्रोक्ताविति यर्थः। ननु विरोधाभावात् कथं परत्वमात्रेण बाधकत्वम्, अत आह — **प्रतिषेधेति**। प्रतिषेधयुक्तत्वायुक्तत्वाभ्यां द्वयोः स्वरूपेण विरोधोऽस्तीत्यर्थः। ननु प्रतिषेधात् [2]प्राग् बाध्यताम्, अत आह — **अपवादेति**। अस्याः 'सुट्' इत्यनेन विहितसंज्ञाया [3]नपुंसकेऽप्राप्तिरेवेत्यर्थः। 'अथवा' इत्यस्य पक्षान्तरद्योतकत्वं निराह — **इदानीमिति**। असमर्थसमासाङ्गीकारे, इति यावत्। ज्ञापकत्वमेवाह — **तत्रेति**। सूर्यं न पश्यन्ति, पुनर्नं गेयाः, [4]श्राद्धं न भुङ्क्ते, इत्युदाहरणार्थः॥

[१, ३२०–३२२]

(**रत्नप्रकाशः**) वार्तिके सूत्रद्वयनिर्देशात् तदनुरोधेन सूत्रद्वयग्रहणमादौ कृतम्। वस्तुतस्तु 'सुडनपुंसकस्येति चेत्' इत्याद्येव वार्तिकमुचितम्। [5]'प्रतीकमपि सुडनपंसकस्येत्येवोचितम्। **असमर्थसमासश्चायमिति**। स्पष्टप्रतिपत्तये 'सुट् स्त्रीपुंसयोः' इति वक्तव्ये तदपहाय 'अनपुंसकस्य' इति कृतो निर्देशः प्रसज्यप्रतिषेधरूप एव भवितुमर्हति। तथा चातिप्रसङ्ग इति मन्यते। ननु प्रसज्यप्रतिषेधपक्षेऽसमर्थसमासतापत्तेरसमर्थसमासे किं मानमिति चेत् [6]'अकर्तरि च कारके' इति कारकग्रहणम् [7]'ओषधेश्च विभक्तौ' इति विभक्तिग्रहणं चेति गृहाण। ननु तत् नञिवयुक्तन्यायानित्यत्वज्ञापनेन तत्र कारकविभक्तिग्रहणं सार्थकं सदसमर्थसमासं कथं ज्ञापयेदिति चेन्न, असमर्थसमासज्ञापनेन चरितार्थं सत् कथं तदनित्यतां ज्ञापयेदित्यस्यापि सुवचत्वात्। विनिगमनाविरहेणोभयज्ञापकत्वसंभवाच्च। **नाप्रतिषेधादिति**। अर्धमात्रालाघवस्य सत्त्वेन पर्युदास एवोचित इति भावः। ननु ततोऽपि लाघवात् 'सुट्पुंस्त्रियोः' इति कुतो न सूत्रितमिति चेत्, पर्यायशब्दानां लाघवगौरव नास्तीति सूत्रकृतैव ज्ञापितत्वात्। प्रसज्यप्रतिषेधाश्रयेणापि समाधातुं शक्यत इत्याशयेनाह — **अप्राप्तेर्वेति**। **अनन्तरस्य विधिर्वेति**। यत्तु "अन्यथा 'शि सर्वनामस्थानम्' इति निरवकाशं स्यात्। नपुंसकस्यैव हि शिः संभवति" इति। तन्न, शसादेशे शौ तस्य सावकाशत्वात्। **इयं प्राप्तिरिति**। सुडिति शेषः। **बाधत इति**। परत्वादिति शेषः। एकेन 'बोधितार्थस्यान्येन बोधनायोगेनैकार्थफलकयोरपि भवति हि विरोध इति मन्यते। एतदभिप्रायेणैव विश्वपावित्यादौ [9]'दीर्घाज्जसि च' इत्यनेनैव पूर्वसवर्णदीर्घनिषेध[10] इति सांप्रदायिका वदन्ति। एतेन 'प्रतिषेध-

---

[1] लाभादिति भावः — उ, ऊ.
[2] सुड् बाध्यताम् — म, आ, उ.
[3] नपुंसकेऽप्राप्तेरेवेत्यर्थः — अ, उ, ऋ.
[4] श्राद्धशब्दोऽत्र श्राद्धान्नपरो लक्षणयेति बोध्यम्।
[5] प्रतीकोऽपि . . . उचितः, इति युक्तम्।
[6] पा. सू. ३. ३. १९.
[7] पा. सू. ६. ३. १३२.
[8] बोधितार्थस्यानेन — ब.
[9] पा. सू. ६. १. १०५.
[10] अन्यथा नादिचीत्यनेनापि तत्र निषेधप्राप्तेरित्यर्थः।

युक्तायुक्तताभ्यां विरोधः' इति निरस्तम्। प्रतिषेधयोगायोगयोर्विरोधहेतुत्वे मानाभावात्। **नोत्सहत इति**। न शक्नोतीत्यर्थः। **प्रतिषिद्धा सतीति**। प्रवर्तमानस्यैव बाधकतौचित्यादिति भावः। एतेन [1]'नान्तःपादमव्यपरे' इत्यनेन [2]पूर्वरूपमेव निषिध्यते। पूर्वरूपेण त्वयवावित्याश्रयणमयुक्तमिति स्पष्टमेव। निषेधस्यापवादत्वबुद्धिः कस्यचिद् भ्रम एव, तस्यापवादत्वे मानाभावात्। 'असमर्थसमासश्चायं द्रष्टव्यः' इति वदता वार्तिककारेणासमर्थसमासस्य लक्षणान्तरेणाप्राप्तत्वात् सोऽपि वक्तव्य इत्यधिको दोषः सूचितः। तद्वचनमभ्युपगम्य तस्य प्रयोजनानि वक्तुमाह — **यदप्युच्यत इति**। यद्यप्युच्यत इत्यर्थः। **अथवैतर्हीति**। तथापीत्यर्थः। न दोष इति शेषः। [3]एतेन 'वार्तिककारेण सूत्रकारमते वचनान्तरं कर्तव्यं भवतीति दोष आपादिते तद्वचनाङ्गीकारेण सूत्रकृतो दोषः कथं परिहृतः' इति निरस्तम्। पूर्ववाक्ये [4]यद्यप्यर्थकयदपिशब्दस्य सत्त्वेन तदपेक्षिततथाप्यर्थताया एवास्योचितत्वात्। यदप्युक्तम् "स्त्रीपुंसयोरिति वक्तव्येऽनपुंसकस्येति वचनं ज्ञापकं प्रसज्यप्रतिषेधेऽपि नञ्समासो भवति' इति। तदपि न, 'अनपुंसकस्य' इति न्यासेऽर्धमात्रालाघवात्। [5]"पुंस्त्रियोरिति वक्तव्ये' इत्यादि तूचितम्॥

[१, ३२०–३२२]

(**नारायणीयम्**) न्यासानुवादफलमाह — **अस्मिन्निति**। ननु 'अनपुंसक'शब्दे [कथं] सिद्धान्तः, तत्राह — **पर्युदासेति**। लाघवात् पर्युदासः, गौरवान्नेतर इति भावः। यदि तर्हि लाघवात् पर्युदासस्तर्हि निषेधमङ्गीकृत्य व्यवहितविषये तस्याप्राप्तिः 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेन किमिति कीर्तितेत्याशङ्क्याह — **प्रसज्येति**। यद्यसमर्थसमासानां केषांचिज्ज्ञापनाय प्रसज्यप्रतिषेधाश्रयणं तदैष परिहार इत्यर्थः। 'सुडनपुंसकस्य' इत्यस्य वाक्यस्य 'शि सर्वनामस्थानम्' इति वाक्यमनन्तरमित्याशङ्क्य प्रसज्यप्रतिषेधोऽनपुंसकस्येत्येतावत[6] एव वाक्यत्वात्। तस्य सुडिति वाक्यमनन्तरमित्याह — **तत्रेति**। बाध्यसामान्यापेक्षयोभयनिषेधः कस्मान्नेत्यत्राह — **अन्यथेति**। लिङ्गान्तरे सावकाशत्वमाशङ्क्याह — **नपुंसकस्यैवेति**। नाप्राप्त्यभावात् कथं बाधकत्वम्, अत आह — **परत्वादिति**। 'शि सर्वनामस्थानम्' इति प्राप्तेः शसः शाववकाशः। 'सुट्' इति प्राप्तेस्तु शेरन्यत्र। एकविधिविधायकयोः कथं विरोधः, तत्राह — **प्रतिषेधेति**। एतद्विशदयति — **तत्रेति**। एष एवाभिप्रायो 'जसि शिप्रतिषेधः' इति ब्रुवतो वार्तिककारस्य। ननु प्राप्तस्य विधेः प्रतिषेधः, एतत्प्राप्तिश्च पूर्वप्राप्तिबाधनपूर्विकेति कथं प्रतिषिद्धत्वेन बाधासामर्थ्यमुच्यते, अत आह — **अपवादेति**। अप्राप्त्यनुमानं बाध इत्यसकृदुक्तम्। **इदानीमिति**। एवं सतीति [7]पुरा व्याख्यातम्, स एवार्थः शब्दान्तरेणोच्यते। प्रसज्यप्रतिषेधः प्रमाणवांश्चेति प्रमाणमाह — **तत्रेति**॥

---

[1] पा. सू. ६. १. ११५.
[2] पूर्वमेव — ब.
[3] ननु वार्तिककारेण — ब.
[4] एतेन भाष्ये 'यद्यपि वक्तव्यः' इति मध्ये दृश्यमानं वाक्यं रत्नप्रकाशकृन्मते नास्तीति ज्ञायते।
[5] इदं नागेशेन दूषितम्।
[6] इत्येतावतैकवाक्यत्वात् तस्य संज्ञीति वाक्यम् — क.
[7] पुराख्यातम् — क.

न वेति विभाषा १. १. ४४.

[१, ३२२–३२३]

(**लघुविवरणम्**) ननु समुदायाद्विभक्त्युत्पत्तावपि टाब् विभाषाशब्दादेवोत्पन्न इति समुदायस्यानाबन्तत्वात् कथं याडामावित्यत आह — **स्त्रीति**। 'तरप्तमपौ घ इति घुग्रहणेषु' इति [1]'भाष्यमनुपपन्नम्, न ह्यत्र घुग्रहणेन दाप्रभृतीनां संप्रत्ययः, किं तु दाधादिशब्देनैवेत्यत आह — **शब्दस्येति**। भाष्ये 'तरप्तमपौ घः, [इति'] इत्यस्यानन्तरं शब्दसंज्ञायां प्रदेशेष्वित्यध्याहारः। इतिकरणः क्रियत इति पौनरुक्त्यमाशङ्क्याह — **सामान्येति**। भाष्ये स्वस्मात् पदार्थात् प्रच्युतः शब्दपदार्थकः संपद्यत इत्यन्वयः। कोऽसौ स्वपदार्थ इत्यत उक्तम् — **यासाविति**। दार्ष्टान्तिके शब्दपदार्थकत्वं [2]'स्वं रूपम्' इति वचनात् प्राप्तम्॥

[१, ३२२–३२३]

(**विवरणम्**) ननु समासग्रहणमर्थवत्समुदायानां नियमार्थमित्युक्तमिति कथमर्थवत्समुदायस्यासमासस्य प्रातिपदिकसंज्ञा। तदभावे वा[3] कथं 'न वेति विभाषायाम्' इति समुदायाद्विभक्त्युत्पत्तिरित्यत आह — **समुदायस्येति**। ननु समुदायाद्विभक्त्युत्पत्तावपि टाब् विभाषाशब्दादेवोत्पन्न इति [4]'समुदायस्यानाबन्तत्वात् कथं याडामावित्यत आह — [5]**'स्त्रीप्रत्यय इति**। [6]'हल्ङ्याब्भ्यः' इत्यत्र दीर्घग्रहणादिति भावः। यद्यप्यनुकरणशब्दे प्रकृतिप्रत्ययविभागाभावान्नाबन्तत्वम्, तथापि [7]'प्रकृतिवदनुकरणं भवति' इति वचनात् प्रकृत्याबन्तत्वमनुकरणेऽपि भवति। न चैवम्। [8]'अप्रत्ययः' इति निषेधः स्यात् प्रातिपदिकसंज्ञाया इति वाच्यम्, [9]'अप्रत्ययः' इति पर्युदासात् [10]'प्रकृतिवत्' इति वत्करणाच्च स्वाश्रयानिवर्तनादिति द्रष्टव्यम्। **क्रियेति**। क्रियापदेनान्वीयमानस्य न प्रत्यग्रवाचित्वम्, किं तु नामपदेनान्वीयमानस्येत्यभिलषितार्थसिद्धये 'क्रिया' इत्युक्तम्। संभवति च लोकेऽपि पूर्वं प्रसक्तमातुरादिकं प्रति सर्वं निषिध्य कस्यचिद्विकल्पेनाभ्यनुज्ञानमित्यभिप्रेत्य 'विकल्प' इत्युक्तम्। **अन्यथेति**। [11]प्रकरणादिविशेषाच्चार्थविशेषावसाय इति भावः। 'घुग्रहणेषु' इत्याद्ययुक्तम्, न हि तत्र घुग्रहणेन घग्रहणेन च दाधां तरप्तमपोश्च संप्रत्ययः। किं तु दाधादिशब्देनैवेत्यत आह— **शब्दस्येति**। भाष्ये 'इति' इत्यस्यानन्तरं संज्ञाकरणे प्रदेशेष्वित्यध्याहारः। **कर्मणीति**। बहुलवचनादिति भावः। भाष्ये स्वस्मात् पदार्थात् प्रच्युतः शब्दपदार्थकः संपद्यत इत्यन्वयः। कोऽसौ स्वपदार्थ इत्यपेक्षायां 'यासौ' इत्युक्तम्। दार्ष्टान्तिके च **शब्दपदार्थकता** [12]'स्वं रूपम्' इति वचनात् प्राप्ता। 'पदार्थात्' इत्युक्त्वा 'तस्याः' इति विवरणसमयेऽभिधानमसमञ्जसमित्याशङ्क्याह — [13]**संबन्धादिति**॥

---

[1] भाष्यमयुक्तम् — त.
[2] पा. सू. १. १. ६८.
[3] वाशब्दो नास्ति — च, छ.
[4] समुदायस्याबन्तत्वाभावात् — ज.
[5] स्त्रीति — च, छ, ट.
[6] पा. सू. ६. १. ६८.
[7] परिभाषा ३६.
[8] पा. सू. १. २. ४५.
[9] पा. सू. १. २. ४५.
[10] परिभाषा ३६.
[11] प्रकरणाद्विशेषावसाय इति — च, छ.
[12] पा. सू. १. १. ६८.
[13] संबन्धाच्चेति — च, छ, ट.

[१, ३२२–३२३]

(**उद्द्योतनम्**) ननु [1]'अर्थवत्समुदायानां समासग्रहणं नियमार्थम्,' इति वाक्यात् कथं विभक्त्युत्पत्तिः। न च निपातानामानर्थक्यान्नायमर्थवत्समुदाय इति वाच्यम्, द्योत्यार्थेनार्थवत्त्वोपपत्तेः। किं चानर्थक्ये प्रातिपदिकत्वाभावेन सुतरां विभक्त्यनुत्पत्तिः, अत आह — **समुदायस्येति**। वार्तिकस्थसप्तम्यन्तं सूत्रस्यानुकरणम्। [2]अनुकरणमनुकार्येणार्थवदिति समुदायस्य प्रातिपदिकसंज्ञायां विभक्त्युत्पत्तिः। अर्थवत्समुदायत्वाभावाच्च न समासग्रहणेन निवृत्तिरिति भावः। ननु समुदायाद्विभक्त्युत्पत्तावपि विभाषाशब्दादेव टाबुत्पत्तिर्न समुदायादिति याडामौ कथं स्याताम्, अत आह — **स्त्रीप्रत्यय इति**। [3]'हल्ङ्याब्भ्यः' इति दीर्घग्रहणाज्ज्ञापकादिति भावः। अनुकरणस्य प्रकृतिप्रत्ययविभागाभावेऽपि [4]'प्रकृतिवदनुकरणम्' इत्यतिदेशादाबन्तत्वम्। अत एव विभक्त्युत्पत्तिरपीति भावः। विभक्त्युत्पत्तिक्लेशमसहमान आह — **अथवेति**। नवाशब्दार्थमाह — **तत्रेति**। नामपदेनान्वितस्य प्रत्यग्रवाचित्वम्, न क्रियापदान्वितस्येतीष्टसिद्धिद्योतनाय 'क्रियापद' इत्युक्तम्। यथा कस्यचिदातुरस्य [5]पथ्यकथनावसरे पूर्वं [6]सर्वं निषिध्य पश्चाद्विकल्पेन किंचिदभ्यनुज्ञायते तद्वदित्यभिप्रेत्य 'विकल्प' इत्युक्तम्। **अन्यथा** शब्दसंज्ञात्वे। घुघादौ स्वरूपग्रहणमेव किं न स्यादित्याशङ्क्य [7]'अशब्दसंज्ञा' इति प्रतिषेधान्नेत्याह — **शब्दस्येति**। भाष्ये [8]"घ इति' इत्यस्यानन्तरं 'शब्दस्य संज्ञाकरणेन प्रदेशेषु' इत्यध्याहारः। पुंस्त्वसिद्ध्यर्थमाह — **कर्मणीति**। [9]'कृत्यल्युटो बहुलम्' इत्यनेन। विशेषणत्वस्य विवक्षाधीनत्वात् [10]'करण' इत्यस्य परनिपातः। क्रियत इति सामान्यनिर्देशः, [11]करण इति विशेषः। शब्दार्थसंबन्धस्य नित्यत्वात् तस्मात् प्रच्यवासंभवमाशङ्क्य निराह — **यद्यपीति**। **प्रसिद्धीति**। मन्दबुद्धीनामित्यादिः। लोकेऽर्थपरत्वेनैव प्रयोगप्राचुर्यं वा प्रसिद्धिः। **तत्त्वत इति**। गोशब्दो गोस्वरूपयोः सर्वदा वाचक इत्यर्थः। **आदौ** सूत्रप्रणयनकाले। तर्हि इतिशब्दो व्यर्थः, अत आह — **सादृश्यादिति**। स्वरूपपदार्थकार्थपदार्थकयोरर्थभेदेन भिन्नयोरपि प्रचुरप्रयोगादर्थपरोऽयं गोशब्द इति शङ्कानिरासायेतिशब्द इत्यर्थः। **तमर्थं** शब्दस्वरूपार्थम्। भाष्ये स्वस्मात् पदार्थात् प्रच्युतः शब्दपदार्थकः संपद्यत इत्यन्वयः। कोऽसौ स्वपदार्थ [12]इत्याशङ्कायां 'यासौ' इत्युक्तम्। दार्ष्टान्तिके शब्दपदार्थकता [13]'स्वं रूपम्' इति वचनात्। **संबन्ध इति**। यौगिकेभ्यो भावप्रत्ययस्य संबन्धाभिधायित्वादित्यर्थः। 'स्वस्मात् पदार्थात्' इत्युक्त्वा 'तस्याः' इति संबन्धाभिधानमयुक्तम्, अत आह — **संबन्धादिति** ॥

[१, ३२२–३२३]

(**रत्नप्रकाशः**) **न वेति विभाषायामिति**। विभाषाशब्दष्टाबन्तोऽप्यस्ति। तदन्तस्यानुकरण-

---

[1] का. वा. १. २. ४५–६.
[2] 'अनुकरणम्' इति नास्ति — म, आ, उ, ऋ.
[3] पा. सू. ६. १. ६८.
[4] परिभाषा ३६.
[5] तत्त्वकथनावसरे — उ.
[6] 'सर्वम्' इति नास्ति — म, आ.
[7] पा. सू. १. १. ६८.
[8] घग्रहणे चेत्यस्यानन्तरं — म, उ; घ इत्यस्यानन्तरम् — अ, आ, इ, ऋ.
[9] पा. सू. ३. ३. ११३.
[10] करणस्य परनिपातः — अ, आ, इ, ऊ, ऋ.
[11] करणमिति — म, उ.
[12] इत्यपेक्षायां — उ, ऊ, ऋ.
[13] पा. सू. १. १. ६८.

मिदमिति याडामौ ज्ञेयौ। न वेति विभाषेति सूत्र इत्यर्थः। एतेन 'अथवा न वेत्यच्चार्य या विभाषा कृता तस्यामिति व्याख्या' इति निरस्तम्। तथात्वे 'अर्थसंज्ञाकरणम्' इत्यनेन सम्यगन्वयानापत्तेः। **अर्थसंज्ञाकरणमिति**। उचितमिति शेषः। **कर्तव्येति**। [1]'अर्हे कृत्यतृचश्च' इति कृत्यः। **इतिकरण इति**। क्रियते व्यक्तीक्रियते यः स करणः, कर्मणि ल्युट्। इतिः करण इतिकरणः, इतिशब्द इत्यर्थः। **क्रियत इति**। उच्चार्यत इत्यर्थः। एतेन 'क्रियत इति सामान्यविशेषभावेन निर्देशः' इति निरस्तम्। आर्जवेनोपपत्तौ क्लिष्टकल्पनानौचित्यात्। **किं गतमेतदितिनेति**। नवाशब्दस्यार्थनिर्देशपरत्वमितिनावगतं किमित्यर्थः। **शब्दाधिक्यादर्थाधिक्यमिति**। अभिमतार्थबोधकताशून्येऽपि कस्मिंश्चिच्छब्देऽधिके सति तावतैवाभिमतार्थलाभ इति मन्यस इत्युपहासपरम्। **पदार्थादिति**। पदार्थबोधनादित्यर्थः। **प्रच्यावयतीति**। पदार्थविपर्यासंपादनसामर्थ्यं[इतिकरण] संनिधानमात्रेणैव गोशब्दस्यास्तीति जानतस्तत्समभिव्याहृतपदस्य वाच्यार्थो वाक्यार्थघटकतया बुद्ध्यारूढो न जायत इतिकरणादिति स तं ततः प्रच्यावयतीत्युपपन्नम्। एतेन 'यद्यपि नित्ये शब्दार्थसंबन्धे उपात्तस्यार्थस्य त्यागो नास्ति, तथापि प्रसिद्धिवशादेतदभिधीयते — अर्थपदार्थकतायाः प्रच्युत इति। तत्त्वतस्त्वादावेव स्वरूपपदार्थको गोशब्दः प्रयुक्तः। सादृश्यात्तु तमर्थमनभिव्यक्तमितिशब्दो द्योतयतीति पदार्थविपर्यासकृदितिरित्युच्यते' इति निरस्तम्। पदार्थशब्दस्य [2]तद्बोधनलक्षकताश्रयणमात्रेण यथाश्रुतभाष्यस्योपपन्नत्वेन कुकविकृतेरिव व्याख्यानानौचित्यात्। ननु स इतिशब्दसमभिव्याहृतः स्वस्मात् पदार्थात् प्रच्यावितः सन् किं करोतीत्यत आह — **सोऽसाविति। प्रच्युत इति**। प्रच्यावित इत्यर्थः। **अर्थपदार्थकतेति**। बहुव्रीहेरयं भावप्रत्ययः। स च [3]'कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेन' इति संबन्धेऽर्थबोधनरूपे ज्ञेयः। **तस्या इति**। विरम्येति शेषः। **शब्दपदार्थकः संपद्यत इति**। शब्दरूपं पदार्थं बोधयतीति भावः। अत एव दार्ष्टान्तिके 'लौकिकमर्थं संप्रत्याययति' इति स्पष्टमेवोक्तं भगवता। को वा स लौकिकोऽर्थ इत्यपेक्षायां 'नवा' इति शब्दस्यैकत्वानेकत्वसाधारण्येनोत्तरमाह — **नवेति यद् गम्यत इति**। तदेव विव्रियते — **न वेति यत्प्रतीयत इति**। स लौकिकोऽर्थ इति शेषः। **इतीति**। ज्ञेय इति शेषः॥

[१, ३२२–३२३]

(नारायणीयम्) 'न वेति विभाषायाम्' इत्यत्र किं विभाषाशब्दात् सुबुत्पत्तिः, उत समुदायात्। नाद्यः, 'नवेति' इत्यस्यानन्वयापत्तेः। नान्त्यः, सुबन्तसमुदायस्याप्रातिपदिकत्वात्, अत आह — **समुदायस्येति**। अनुकार्यस्य सुबन्तसमुदायत्वेऽप्यनुकरणस्यातादृक्त्वादर्थवत्त्वाच्च विभक्त्युत्पत्तिरित्यर्थः। यद्येवमङ्गस्यानाबन्तत्वाद् याडामौ न स्याताम्, अत आह — **स्त्रीप्रत्यय इति**। नन्वनुकार्यस्य सुबन्तसमुदायत्वेऽनुकरणस्यापि तथात्वम्; प्रकृतिवद्भावादनुकरणस्येति चेत्, मैवम्, अशास्त्रीयप्रकृतेरेव तत्र ग्रहणात्। अत एव [4]'कयाशुभीयम्' इत्यादौ पदसमुदायानुकरणस्य प्रातिपदिकत्वम्, सुब्बुद्ध्यभावेन लुगभावश्च। किं च सुबन्तसमुदायस्यापि तस्य प्रातिपदिकत्वम्। समासग्रहणपर्यायस्य समुदायार्थसंसर्गरूपेणार्थेनार्थवत्त्वम्। न चेह तथेति कुतः प्रातिपदिकत्वनिवारणम्। एवं तु स्त्रीप्रत्ययत्वादेरप्यत्रावगतिरलभ्येति मन्वान आद्यमङ्गीकरोति — **अथवेति**।

---

[1] पा. सू. ३. ३. १६९.

[2] तद्बोधलक्षकता — ब.

[3] इदं हरिटीकावचनमिति भूषणसारे भावप्रत्ययार्थनिर्णये।

[4] मतौ छः सूक्तसाम्नोरिति सूत्रेण छोऽत्र बोध्यः। कया शुभाशब्दोऽस्मिन्नस्तीति विग्रहः। 'कयाशुभीयं शस्यम्' — तै. सं. ७. ५. ५.

अनन्वयशङ्कामपाकरोति — **इत्युच्चार्येति**। वार्तिकस्थशब्दो न सूत्रगतेरनुकरणम्, किं तु स्वतन्त्रः, ततोऽयमर्थो लभ्यत इति भावः। अन्ये तु नवेतीत्यन्तसमुदायानुकरणस्य विभाषाशब्देन समासः, एकार्थीभावमहिम्ना चैतावतोऽर्थस्यावगतिरित्याहुः। नवाशब्दयोर्निपातत्वादवाचकत्वादर्थाभावात् कथमर्थसंज्ञा, अत आह — **तत्रेति**। वाच्याभावेऽपि द्योत्यसत्त्वमित्यर्थः। अर्थद्वयसत्त्वात् कथमर्थस्येति भाष्य एकवचनमित्याशङ्क्य समुदायाभिप्रायेणोपपादयति — **य इति**। शब्दसंज्ञायां दोषमाह — **अन्यथेति**। भाष्ये 'इति घुग्रहणेषु' इत्येकवाक्यत्वे संज्ञावाक्यगतघुग्रहणेन शब्दासंप्रत्यय उक्तः स्यात्। अत 'इति संज्ञायाम्' इत्यध्याहृत्य 'घुग्रहणेषु' इति प्रदेशवाक्याभिधानमित्याह — **शब्दस्येति**। भावे ल्युडन्तस्य नपुंसकत्वादाह — **क्रियत इति**। इतेर्विशेष्यत्वात् करणस्य विशेषणत्वात् तस्यैव पूर्वनिपातः स्यादित्यत आह — **इतिश्चेति**। विवक्षायत्तो विशेषणभाव इति भावः। ननु करण इत्यनेन करोतिकर्मत्वावगतौ क्रियत इति तद्बोधकं पुनरुक्तम्, अत आह — **सामान्येति**। आख्यातवाच्यं सामान्यम्, समासवाच्यो विशेषः। समासो हि न करोतिकर्ममात्राभिधायी, किं तु तद्विशेषस्येतेर्वाचकः। क्रियत इत्येतत्तु करोतिकर्ममात्रवाचकम्। वस्तुतस्तु कृदन्तात् क्रियायोग्यमात्रस्याभिधानम्, आख्यातात्तु कुर्वद्रूपस्येति पौनरुक्त्यपरिहारः। यदि चेतिकरणं क्रियत इति भाष्यपाठस्तदा करोतिक्रियायाः कथं कर्मेत्यत आह — **सामान्येति**। 'गोपोषं पुष्णाति' इत्यत्र गोकर्मपोषणस्य पुष्टिकर्मत्ववत् इतिविशिष्टकरणस्य करोतिकर्मत्वमित्यर्थः। यत्किञ्चिच्छब्दाद्यस्य कस्यचित् प्रतीत्यापत्तेः शब्दाधिक्यादर्थाधिक्यमिति पक्षोऽनुपपन्नः, तत्राह — **उपहासेति**। **आदाविति**। प्रयोगात् प्रागित्यर्थः। इतिप्रयोगस्तर्हि किमर्थस्तत्राह — **सादृश्यादिति**। अर्थपदार्थकसादृश्यात्। **संबन्ध इति**। [1]समासकृत्तद्धितेषु संबन्धाभिधानं भावप्रत्ययेनेति न्यायात्। तर्ह्यर्थप्रच्युतिरनुक्तेत्यत्राह — **संबन्धाच्चेति**॥

[१, ३२४–३२५]

(**लघुविवरणम्**) नन्वितिकरणात् समानस्य शब्दस्याप्राप्ता संज्ञेत्यप्रसक्तप्रतिषेधमाशङ्क्याह — **समान इति**। [2]इह पूर्वं किंचिद्विधाय न वेति विभाषेत्यनभिधानात् 'न वा विधिपूर्वकत्वात्' इति [3]परिहारोऽनुपपन्न इत्यत आह — **प्रदेशेति**। **न वेति**। 'ग्रामो गन्तव्यो न वा' इत्यत्र। [4]**अप्राप्त इति**। अवश्यकर्तव्यत्वेनेति शेषः॥

[१, ३२४–३२५]

(**विवरणम्**) इतिकरणस्यार्थनिर्देशार्थत्वे स्थिते नैव समानानां शब्दानां प्राप्तिरित्यत आह — **समान इति**। **प्रत्यग्रवाचीति**। यद्यपि 'न चेह वयम्' इतिभाष्यपर्यालोचनायां पूर्वपक्षे विभाषाशब्दस्य प्रत्यग्रवाचिनः सर्वादिभिः संबन्धोऽभिमतो लक्ष्यते। तथा च प्रत्यग्रवाचित्वेन समासाभिधानमयुक्तम्, तथापि सर्वाद्यात्मकपूर्वोत्तरपदव्यतिरेकेण समासाभावात् सर्वादीनां प्रत्यग्रवाचित्वमेव समासस्य प्रत्यग्रवाचित्वमिति मन्वान एवमवोचत्। [5]'न बहुव्रीहौ' इति [6]प्रतिषेधे प्राप्ते सूत्र-

---

[1] भर्तृहरिकृतमहाभाष्यटीकास्थमिदमिति वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णय उक्तम्।

[2] इहापूर्वं — त.

[3] परिहारोऽत्रानुपपन्नः — ण.

[4] प्राप्त इति — ड, ढ, ण.

[5] पा. सू. १. १. २९.

[6] निषेधे — ञ.

मिदमिदानीं नित्यसंज्ञार्थं स्यादित्यभिप्रेत्याह — **तदा संज्ञेति**। भाष्ये **संप्रत्ययः स्यात्** संज्ञाया इति शेषः। नन्विह [1]पूर्वं सर्वनामस्थानसंज्ञां विधाय यद्यपि 'न वा' इत्युक्तम्, तथापि संज्ञाविधावस्य योगस्य तात्पर्यम्, न [2]प्रतिषेध इति कथं 'न वा' इति प्रतिषेधवाचिनः संप्रत्ययः। प्रदेशे च न 'न वा' इत्युच्यत इत्यत आह — **प्रदेशेति**। भाष्ये **न वेत्युच्यत इति**। नवाशब्दार्थवाचको विभाषाशब्द उच्यत इत्यर्थः। **न त्विति**। ततश्च प्रदेशवाक्यानुगुण्याय [3]संज्ञासूत्रेऽपि प्रतिषेधवाचिनो ग्रहणं न प्रत्यग्रवाचिन इत्यर्थः। 'समानलिङ्गः' इति [4]भाष्यदर्शनाद् विशब्दो भिन्नवचनस्तद्व्यतिरेकायेत्यभिप्रेत्याह — **भिन्नेति**। **लिङ्गयोग इति**। निपातस्यासत्त्ववचनत्वादित्यर्थः। यथाभाष्यं क्वचिदस्तीति [5]प्रतीयेत, अतो भाष्ये क्वचिदपीति विवक्षितमिति तात्पर्यार्थमाह — **नैवेति**। ननूभयथा संबन्धसंभवश्चेत् कथमन्यतरनिर्णय इत्यत आह — **तत्रेति**। **यदेति**। [6]अकर्तव्यत्वेनावगत इत्यर्थः। **न त्विति**। धात्वर्थनिष्पत्त्यर्थतया कर्त्रादि क्रियाङ्गमित्यर्थः। पूर्वोक्ताक्षेपाय नोत्तरं वार्तिकम्, किं तु पूर्वोक्तमङ्गीकृत्येति दर्शयितुं पूर्वोक्तमर्थं निगमयति — **तदेवमिति**॥

[१, ३२४–३२५]

(**उद्द्योतनम्**) इतिकरणस्यार्थनिर्देशार्थत्वे स्थिते कर्मधारयायोगादाह — **समान इति**। **यो दिक्समास इति**। यद्यपि 'न चेह वयम्' इति भाष्यालोचनया पूर्वपक्षे विभाषाशब्दस्य सर्वादि-[7]शब्दसंबन्ध एव प्रतीयत इति समासान्वयाभिधानमयुक्तम्, तथापि [8]"शालायामचिरनिर्वृत्तायाम्' इत्येतद्भाष्यदर्शनात् प्रत्यग्र[9]वाचित्वेन समासविशेषणत्वमेव। अग्रिमभाष्यमपि समासाभिप्रायमेवेति व्याख्येयमिति भावः। **संज्ञा** सर्वनामसंज्ञा। [10]"न बहुव्रीहौ' इति निषेधं बाधित्वा नित्यसंज्ञा स्यादित्यर्थः। भाष्ये **संप्रत्ययः** संज्ञाया इति शेषः। ननु सर्वनामस्थानसंज्ञाविधानानन्तरत्वेऽप्येतत्सूत्रस्य संज्ञाविधिपरत्वेन पूर्वसंज्ञाप्रतिषेधपरत्वाभावात् कथं प्रतिषेधसंप्रत्ययः, अत आह — **प्रदेशेति**। वार्तिके विधिशब्दः प्रदेशपर इत्यर्थः। **भाष्ये न वेत्युच्यत इति**। तदर्थवाचकविभाषाशब्द [11]उच्चार्यत इत्यर्थः। **न त्विति**। तथा च प्रदेशवाक्यानुगुण्यायेहापि प्रतिषेधवाचिनो ग्रहणम्, न प्रत्यग्रवाचिन इत्यर्थः। यद्यपि प्रदेशवाक्येष्वेव निषेधार्थावगमे संज्ञा व्यर्था, तथाप्युभयत्र विभाषा संज्ञाप्रयोजनं वक्ष्यत इति भावः। [12]'विलिङ्गम्' इति लिङ्गशून्यत्वं नार्थः, 'समानलिङ्गः' इति [13]भाष्यदर्शनात्, अत आह — **भिन्नलिङ्गमिति**। निपातानां लिङ्गाभावादाह — [14]**व्यधिकरणमिति**। व्याख्यानबीजमाह — [15]**विलिङ्गत्वेनेति**। व्याकरणे समानाधिकरणप्रयोगस्य क्वाप्यभावान्निषेधार्थावगतिरेवेत्याह — भाष्ये **एतच्चैवेति**। तद्व्याचष्टे — **नैवेति**। विलिङ्गत्वाभावेऽप्यर्थविशेषनिश्चयः संभवतीत्याह — भाष्ये **अपि चेति**। ननूभयथा [16]संभवे कथमन्यतरनिर्णयः।

---

[1] 'पूर्वम्' इति नास्ति — च, छ.
[2] निषेध इति — च, छ.
[3] संज्ञात्वेऽपि — च, छ.
[4] भाष्ये दर्शनात् — च, छ.
[5] प्रतीयते। ततो भाष्यं — च, छ.
[6] अवश्यकर्तव्यत्वेनावगते —च, छ, ञ, ट.
[7] 'शब्द' इति नास्ति — इ, उ, ऊ, ॠ.
[8] अर्थानुवादोऽयम्।
[9] वाचित्वे समास — इ, उ, ऊ.
[10] पा. सू. १. १. २९.
[11] उच्यत इत्यर्थः — म, आ.
[12] 'विलिङ्गम्' इत्यादि 'विलिङ्गत्वाभावेऽपि' इत्यन्तं नास्ति — उ.
[13] भाष्यादत आह — इ, ऊ.
[14] वैयधिकरण्यमिति — अ, म, आ, ॠ.
[15] नहीति — अ, आ, ॠ; न त्विति — म.
[16] संभवेन कथम् — अ.

अत आह — **तत्रेति**। **अप्राप्ते** कर्तव्यत्वेनावगते। विनिगमकमाह — **क्रियाया इति**। **न त्विति**। क्रियानिर्वृत्त्यर्थतया कारकाणां तदङ्गत्वमित्यर्थः। उक्ताक्षेपाय नोत्तरवार्तिकम्, किं तूक्तमङ्गीकृत्यैवेति [1]दर्शयितुमुक्तमुपसंहरति — **तदेवमिति**॥

[१, ३२४–३२५]

(**रत्नप्रकाशः**) **समानशब्दप्रतिषेध इति**। **समानः** 'नवा' इत्येक एव, **शब्दो** येषां वाचकस्तेषामर्थानां विभाषाशब्दः संज्ञा न भवतीति वक्तव्यमिति भावः। ते क इत्यत आह — **न वा कुण्डिकेति**। कुण्डिकादिशब्दसामानाधिकरण्ये सति कुण्डिकादिपरो नवाशब्दः संपद्यत इत्याशयेन नवाशब्दार्था विजातीया बहवो भवन्तीत्याशयेन 'समानशब्दानाम्' इति बहुवचनान्तेन विग्रहः, 'नवा कुण्डिका' इत्यादि तद्विवरणं च कृतम्। वस्तुतस्तु 'नूतनप्रतिषेधः' इत्येवात्र सारम्। **स्यादिति**। तदेति शेषः। **विभाषा दिक्समासे बहुव्रीहाविति**। 'इत्यस्य सूत्रस्य दिक्समासे बहुव्रीहौ नूतनार्थानि सर्वादीनि तदन्तानि च सर्वनामानि भवन्तीत्यर्थापत्त्या' इति शेषः। समासशक्तिवादिवैयाकरणमतेऽत्र समासस्य नूतनार्थकतासंभवः। 'जहत्स्वार्था वाजहत्स्वार्था वा वृत्तिः' इत्यवैयाकरणमते तु सर्वादी एव नूतनार्थकौ संभवत इति भावः। एतेन 'विभाषाशब्देनाभिनवलक्षणोऽर्थः प्रत्याय्यते। तत्र प्रत्यग्रवाची यो दिक्समास इति संप्रत्ययः स्यात्' इति निरस्तम्। 'न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः' इत्युत्तरभाष्यविरोधात्। **दक्षिणपूर्वस्यां शालायामिति**। इति प्रयुक्त इति शेषः। **अचिरकृतायामिति**। इतीति शेषः। **संप्रत्ययः स्यादिति**। तस्मात् समानशब्दस्य प्रतिषेधः कर्तव्य इति शेषः। समाधत्ते — **न वेति**। **एष दोष इति**। [2]'विभाषा दिक्समासे' इत्यादौ यो दोष आपादितः स इत्यर्थः। **विधिपूर्वकत्वादिति**। [3]'विभाषा दिक्समासे' इत्यादौ विभाषाशब्दनिर्देशस्येति शेषः। दृष्टान्तसाधारण्येन तद्व्याचष्टे — **विधाय किंचिदिति**। एतेन विधिनिषेधयोरेकवाक्यतां वदन्तो मूढा निरस्ताः। **न वेति**। विभाषाशब्दस्योपलक्षणमेतत्। **नेति गम्यत इति**। तथात्रापि विभाषेत्युक्ते निषेध एव गम्यते, न तु नूतनार्थ इति शेषः। दृष्टान्तं विघटयति — **अस्ति कारणमिति**। **विलिङ्गमिति**। भिन्नलिङ्गमित्यर्थः। नूतनवाचिनवाशब्दापेक्षयैवमुक्तम्। एतेन 'भिन्नलिङ्गम्, व्यधिकरणमित्यर्थः। [4]'न हि प्रतिषेधवाचिनो नवाशब्दस्य लिङ्गयोगोऽस्ति' इति निरस्तम्। व्यधिकरणतासाधकहेतुपरविलिङ्गशब्दस्य साध्यलक्षकतया नयनानौचित्यात्। **निर्देशमिति**। **निर्दिश्यते** उच्चार्यत इति कर्मणि घञ्, शब्दमित्यर्थः। **करोतीति**। उच्चारयतीत्यर्थः। नवाशब्देन सहेति शेषः। आक्षेप्त्रा कृतं दृष्टान्तविघटनमभ्युपेत्यापि समाधत्ते — **एतच्चैवेति**। [5]'विभाषा सेना' इति सूत्रे यद्यपि समानलिङ्गो निर्देशः कृतः, तथापि भिन्नविभक्तित्वात् सामानाधिकरण्याभावः। इदानीं विभाषाशब्दस्याव्ययत्वेनालिङ्गत्वात् सर्वत्र सामानाधिकरण्यसंभवमाश्रित्य व्याख्यानपरिभाषया समाधत्ते — [6]**अपि च कामचार इति**॥

---

[1] दर्शयितुमुपसंहरति — अ.

[2] पा. सू. १. १. २८.

[3] पा. सू. १. १. २८.

[4] प्रदीपे 'न तु प्रतिषेधवाचिनः' इत्यत्र 'न हि प्रतिषेधवाचिनः' इति पाठः स्वीकृतः।

[5] पा. सू. २. ४. २५.

[6] 'अपि चात्र कामचारः' इति भाष्ये 'अपि च कामचारः' इति 'उ' कोशे पाठः।

[१, ३२४–३२५]

(**नारायणीयम्**) घुसंज्ञासूत्रे 'समानश्रुतीनाम्' इति व्याख्यानादिहापि तथावगतिः स्यात्, न च समानश्रुतीनामिह प्राप्तिरस्ति, अर्थसंज्ञाकरणात्, अत आह — **समान इति**। वर्तिपदार्थान्यपदार्थयोः संबन्धं दर्शयति — **वाचक इति**। शालाप्रत्यग्रत्वे सर्वनामसंज्ञासंप्रत्ययः स्यादित्युक्तम्, तत् कथं, समासप्रत्यग्रताया दिक्प्रत्यग्रताया वा ग्रहणस्य न्याय्यत्वादित्याशङ्क्याह — **विभाषेति**। अनादेः समासस्य प्रत्यग्रत्वासंभवात् तदर्थविशेषणमेतत्। तत्रापि दिशोऽसंभवात् तदुपाधिकशालाद्यर्थस्य विशेषणमित्यर्थः। नवादिपदप्रयोगे संज्ञापादनमिति न मन्तव्यमित्याह — **संज्ञाकार्येति**। अत्रत्यवाशब्दार्थनिश्चये प्रदेशगतविभाषाशब्दस्य विधिपूर्वकत्वं कथं हेतुः, अत आह — **प्रदेशेति**। कार्यकालत्वं संज्ञाया इति भावः। प्रतिषेधप्रत्यायकत्वे विधिपूर्वत्वं न प्रयोजकम्, किं तु विलिङ्गत्वं प्रयोजकमित्युक्तम्। तत्र विभिन्नलिङ्गयोगित्वस्य नवाशब्देऽसिद्धेरिदमनेन लक्ष्यत इत्याह — **व्यधिकरणमिति**। क्वचित् समानलिङ्गत्वाज्ञानमित्युक्त्या क्वचित् तज्ज्ञानमपीति स्फुरेत्, अत आह — [**नैवेति**] क्वचिदित्यत्रापेरध्याहारः, नैवेत्यन्वयश्च नञ इत्यर्थः। अवधारणासिद्धिमाशङ्क्य परिहरति — **विभाषेति**। एवं वैयधिकरण्यस्य प्रतिषेधप्रत्यायकत्वे प्रयोजकत्वमङ्गीकृत्य व्याकरणे सर्वत्रैव प्रयोजकसत्त्वात् प्रतिषेधप्रतीतिरित्युक्त्वा, वस्तुतस्तु क्रियान्वयित्वं प्रत्यायने प्रयोजकम्, व्याकरणे च सर्वत्र क्रियान्वयित्वमित्युक्तम्। तत्र क्रियान्वयित्वप्रयोजकमाह — **तत्रेति**। भवत्वित्थं लोके, व्याकरणे तु कथम्, अत आह — **क्रियाया इति**। क्रियान्वयित्वप्रयोजकतयैव वार्तिककारेणापि विधिपूर्वकत्वमुक्तमिति हृदि निधायोपसंहरति — **तदेवमिति**॥

[१, ३२५–३२८]

(**लघुविवरणम्**) निपातद्वयार्थस्य संज्ञायां प्रतिषेधस्यैव संज्ञेत्ययुक्तमित्यत आह — **नवाशब्द इति**। ननु प्रतिषेधमात्रस्य संज्ञायां [१]'विभाषा दिक्समासे' इत्यनेन सर्वनामसंज्ञा निषिध्यत इति वक्तव्यम्। तत्र 'दिक्समासे' इति विशेषणमदिक्समासे बहुव्रीहौ संज्ञानिषेधाभावायेति वाच्यम्। तथा च [२]'न बहुव्रीहौ' इत्यनेनादिक्समासे बहुव्रीहौ संज्ञानिषेधकरणमसंबद्धं स्यादित्यत आह — **परिहारान्तरेति**। **एकविषययोरिति**। एकस्मिन् काल इति शेषः। वार्तिके 'प्रतिषेधविषयात्' इत्यत्र कालविशेषविशिष्टादिति शेषः। **अन्यत्रेति**। तस्मिन्नेव विषये कालान्तरविशिष्टे। **पूर्वस्य** प्रतिषेधलक्षणस्य विधेः **उत्तरेण** विकल्पलक्षणविधिना बाधश्चेत् पूर्वस्य विधेरानर्थक्यमित्यत आह — **उभयत्रेति**। **समीकृत इति**। लक्षणान्तरेण प्राप्तस्य निवर्तनेन॥

[१, ३२५–३२८]

(**विवरणम्**) **विध्यनित्यत्वं** विधिप्रच्युत्युप[३]लक्षितं रूपम्, तस्यानुपपत्तिर्नित्यशब्दवादिनामिष्टेवेत्यत आह — **विकल्प इत्यर्थ इति**। विधेरभाव एव स्यान्न भाव इति वदन् उक्तेऽर्थे हेतुमाह — **नवेति**। ननु प्रतिषेधमात्रस्य संज्ञायां [४]'विभाषा दिक्समासे' इत्यनेन सर्वनामसंज्ञा निषिध्यत

---

[१] पा. सू. १. १. २८.
[२] पा. सू. १. १. २९.
[३] लक्षितरूपं — ट.
[४] पा. सू. १. १. २८.

इति वाच्यम्। [1]'तत्र च 'दिक्समासे' इति विशेषणमदिक्समासे बहुव्रीहौ संज्ञानिषेधाभावायेति वक्तव्यम्। तथा च [2]"न बहुव्रीहौ' इत्यनेनादिक्समासे संज्ञा निषिध्यते चेद् विरोधः। दिक्-समासे चेत् पुनरुक्तिरिति [3]'न बहुव्रीहौ' इत्यसंबद्धं स्यादित्यत आह — **परिहारेति**। ननु पूर्वशास्त्रेण किंचित् प्रसज्य तस्य प्रतिषेधे विधेरभाव एव न विकल्प इति किमुच्यते तेनोभयं भविष्यतीत्यत आह — **प्रतिषेधादिति**। प्रतिषेधान्यथानुपपत्तिकल्पितेन शास्त्रेण प्रसज्येति च वार्तिकार्थः। **तत इति**। अन्यथा कल्पितं शास्त्रं निरवकाशं स्यात्। न हि प्रतिषेधार्थमेव तत्, [4]"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायादिति भावः। ननु विप्रतिषेधो विकल्पवादिन इष्ट एव, तत एव हि विकल्प इत्यत आह — **एकेति**। युगपदिति शेषः। सिद्धान्तिनं प्रत्यनैष्ठु-र्याय पूर्वपक्षिण आत्मन्यज्ञानारोपणम् — भाष्ये [5]**अत्र न ज्ञायत इति**। **सामर्थ्यादिति**। आप्तवचन-स्याप्रामाण्यायोगादिति भावः। वार्तिके 'प्रतिषेधविषयात्' इत्यत्र कालविशेषविशिष्टादिति शेषः। **अन्यत्रेति**। तस्मिन्नेव विषये कालान्तरविशिष्ट इत्यर्थः। भाष्ये **पूर्वेण** कल्पितशास्त्रेण, **कृतसामर्थ्यः** [6]कृतसम्यक्प्रयोजनसंबन्धः, [7]विहतशक्तिको वा विधिः, प्रतिषेधविषयव्यतिरिक्तेनेत्यर्थः। तत्र महत्याः संज्ञाया इत्यनेन नाल्पाक्षरा संज्ञा कर्तव्येति [8]विवक्षितम्, किं तु संज्ञैव न कर्तव्येति विवक्षितमित्याह — **यदि हीति**। नापि प्रत्येकं वाक्यपरिसमाप्तिः, तथा सति प्राप्ते नेत्युप-तिष्ठते, अन्यत्र वेत्युपतिष्ठत इति वक्तव्यम्। तथा च लाघवाय [9]प्रतिपत्तिसौकर्याय च तत्र तत्र नेति च वेति च वक्तव्यं स्यात्, न संज्ञेत्यभिप्रेत्याह — **तत्रेति**। संज्ञाकरणस्य प्रयोजनं [10]वक्ष्यत इति हृदयम्। **युगपदिति**। अनवगतसंज्ञिद्वयक्रमोपस्थानस्य चोद्यमेतदित्यभिप्रायः। [11]**भावा-भावाविति**। अनेन विधिप्रतिषेधशब्दौ भावाभावपरौ व्याख्यातौ। पूर्वस्य प्रतिषेधस्य बाधनं नाम न प्रतिषेधप्रवृत्तिप्रतिबन्धः, किं तु तत्फलस्याभावस्य सार्वकालिकत्वनिवृत्तिरित्यभिप्रेत्य संज्ञा-करणस्य प्रयोजनमाह — **उभयत्रेति**। प्राप्तविभाषासु निषेधमुखेनैव प्रवृत्तिः, अप्राप्तविभाषासु विधिमुखेनैव प्रवृत्तिरिति न विरोधः। क्वचिदुभयत्र विभाषासु प्रवृत्तिरुभयथेष्यते। न चैकस्य संभवत्युभयत्र तात्पर्यमित्यतः संज्ञाकरणमिति समुदायस्यार्थः॥

[१, ३२५–३२८]

(**उद्द्योतनम्**) ननु [12]विधेरप्रवृत्तिरूपस्यानित्यत्वस्य प्रतिषेधेऽपि नानुपपत्तिः, अत आह — **विकल्प इति**। ननु वाशब्दस्य विकल्पार्थकत्वात् [13]कथं तस्यानुपपत्तिः, अत आह — [14]**न वेति**। ननु प्रतिषेधसंज्ञापक्षेऽपि [15]'विभाषा दिक्समासे' इति सूत्रं संज्ञाप्रतिषेधार्थं स्यात्, तत्र दिक्समास-ग्रहणमदिक्समासे संज्ञाप्रवृत्त्यर्थमिति वक्तव्यम्। [16]तदा [17]'न बहुव्रीहौ' इत्यनेनादिक्समासे निषेधे

---

[1] ततश्च — ज.
[2] पा. सू. १. १. २९.
[3] पा. सू. १. १. २९.
[4] लौ. न्या. साहस्री पृष्ठम् १२२.
[5] तत्र — च, छ, ज, ट.
[6] कृतप्रयोजनसंबन्धः — ज.
[7] विहित — छ, ज.
[8] विवक्ष्यते — च, छ, ट.
[9] प्रतिपत्तौ सौकर्याय — च, छ, ज.
[10] वक्ष्यत इति न पूर्वनोद्यावकाशः। यदीति। अनवगत — ज.
[11] भावाभावयोरिति — च, छ, ज, ट.
[12] विधेरप्रवृत्तप्रवृत्ति — अ, आ.
[13] कथं स्यादनुपपत्तिः — म.
[14] न चेति — इ.
[15] पा. सू. १. १. २८.
[16] तथा च — अ, इ, उ, ऋ.
[17] पा. सू. १. १.२९.

तद्विरोधः। दिक्समास एव निषेधे पुनरुक्तिः। [1]तथा च सामर्थ्यात् प्रतिषेधसंज्ञापक्षो न युज्यत इति परिहर्तुं शक्यते, अत आह — **परिहारान्तरेति**। ननु पूर्वशास्त्रेण प्रसक्तस्य निषेधेऽभाव एव स्यात्, न विकल्पः, अत आह — **प्रतिषेधादिति**। प्रतिलक्ष्यं लक्षणभेदपक्षे प्रतिषेधान्यथानुपपत्त्या प्रसञ्जकशास्त्रमनुमेयम्। तथा च विकल्प इत्यर्थः। **ततः** [2]कल्पितविधेः। अन्यथा तद्वैयर्थ्यप्रसङ्गादिति भावः। [3]ननु विप्रतिषेधो विकल्पानुकूल एव, अत आह — **एकेति**। युगपदित्यादिः। भाष्ये [4]**अत्रेति**। सिद्धान्तिनं प्रत्यनैष्ठुर्याय पूर्वपक्षिणः स्वात्मन्यज्ञानारोपः। **सामर्थ्यादिति**। [5]कल्पितविधेरप्रामाण्यायोगादिति भावः। वार्तिके **प्रतिषेधविषयात्** कालविशेषविशिष्टात्। **अन्यत्र** तत्रैव विषये कालान्तरविशिष्ट इत्यर्थः। भाष्ये **कृतसामर्थ्य इति**। पूर्वशास्त्रेण यो विधिः स प्रतिषेधविषयादन्यत्र **कृतसामर्थ्यः** [6]चरितार्थविधिशक्तिः, निषेधविषये न प्रवर्तत इत्यर्थः। यद्यपि तस्मिन् विषयेऽनुमितस्य नान्यत्र चरितार्थता, तथापि [7]प्रकल्प्यापवादन्यायेन तत्राप्रवृत्तस्यैव 'विधेरारोपरूपप्रसङ्गान्निषेधोऽभ्युपेयः, अन्यथा सर्वनिषेधेषु विकल्प एव स्यादिति भावः। महत्त्वं न संज्ञाक्षरबाहुल्यम्, किं तु संज्ञिबाहुल्यं विवक्षितमित्याह — **तेनेति**। संज्ञिद्वयमत्र न विवक्षितं चेत् संज्ञैव व्यर्थेत्याह — **यदीति**। भाष्ये संज्ञाया बहुत्वं संज्ञिप्रतिपादनार्थं नवेतिपदद्वययुक्तत्वम्। संज्ञिद्वयस्य प्रयोजनमाह — **तत्रेति**। **समुदायस्य** प्रतिषेधविकल्पसमुदायस्य। प्रत्येकं संज्ञात्वे लाघवात् प्रदेशेष्वेव क्वचित् 'न' क्वचित् 'वा' इति वक्तव्यं स्यात्। संज्ञाकरणसामर्थ्यात् समुदायस्यैवेयं संज्ञेत्यर्थः। ननु संज्ञाकरणसामर्थ्याद्युगपद्वचनं स्यात्, अत आह — **यद्यपीति**। भावाभावावित्यनेन विधिप्रतीषेधशब्दौ भावाभावपरौ व्याख्यातौ। ननु समुदायस्य संज्ञित्वे पूर्वं विकल्पस्यापि प्रवृत्तेः 'प्रतिषेधेन समीकृते' इत्ययुक्तम्, अत आह — **यदि त्विति**। **आनुपूर्वीति**। नवेति क्रमेणैवार्थप्रत्ययौ, न तु व्युत्क्रमेण, मानाभावादिति भावः। संज्ञाकरणस्य प्रयोजनमाह — **उभयत्रेति**। [8]तदेवोपपादयति — **तथा हीति**। संज्ञां विनापि विकल्पार्थकविभाषाशब्दस्य प्रदेशेषु प्रयोगे विधिमुखेन क्वचित्, निषेधमुखेन क्वचित्, व्यवस्थया विकल्पः प्रवर्तते। उभयत्रविभाषासूभयथा प्रवृत्तिरिष्यते, नैकस्य युगपदुभयत्र तात्पर्यमिति संज्ञाकरणमिति समुदायार्थः। प्रत्याख्यान[10]तात्पर्यमप्यत्रैवाह — **यदेति**। वाक्यभेदाङ्गीकारान्नैकस्य तात्पर्यद्वयमिति विरोधलेशोऽपि नास्तीत्यर्थः॥

[१, ३२५–३२८]

(**रत्नप्रकाशः**) 'नवा' इत्येकं निषेधवाचकं निर्दिष्टमिति मन्यमान आह — **विध्यनित्यत्वमिति**। विधिवैकल्पिकत्वमित्यर्थः। **शुशावेति**। [11]"विभाषा श्वेः' इत्यनेन यजादित्वात् प्राप्तस्य संप्रसारणस्य निषेधमात्रे जाते 'शिश्वाय' इत्याद्येकमेव रूपं स्यात्, न तु 'शुशाव' इत्यादिरूपान्तरमिति भावः। समाधत्ते — **सिद्धं त्विति**। **तेनोभयं भविष्यतीति**। अविहितस्य प्रतिषेधासंभवाद् विहितस्य च नित्यं प्रतिषेधासंभवात् प्रतिषेधान्यथानुपपत्तिकल्पितविधिना सह विकल्पः

---

[1] 'तथा च सामर्थ्यात्' इत्यादि 'परिहर्तुं शक्यते' इत्यन्तं नास्ति — म, आ, इ, उ.
[2] विकल्पितविधेः — म.
[3] ननु प्रतिषेधः — म.
[4] तत्रेति — अ, आ, इ, उ, ऋ.
[5] विकल्पितविधेः — अ, म, आ, उ.
[6] चरितार्थशक्तिः — इ.
[7] परिभाषा ६४.
[8] विधेरारोपमात्रप्रसङ्गात् — म, उ.
[9] तदुपपादयति — उ.
[10] तात्पर्यमस्मिन्नेवाह — म, आ, ऋ; तात्पर्यमप्यत एवाह — उ.
[11] पा. सू. ६. १. ३०.

प्रतिषेधस्य भविष्यतीति भावः . तदेतदाक्षिपति — **विप्रतिषिद्धमिति**। विरोध इत्यर्थः। विधि-निषेधयोरेकत्रेति शेषः। समाधत्ते — **न वेति**। 'तेनोभयम्' इत्यस्य व्याख्यानेनैव व्याख्यातमिदम्। प्राप्तविभाषास्थले दोषोद्धारो न जात एवेति वक्तुम् उक्तसमाधानमप्राप्तविकल्पस्थल एवेति समाधात्रैव वाचयितुं पृच्छति — **तदेतदिति**। **क्वेति**। प्राप्तविभाषास्थलेऽप्राप्तविभाषास्थले वेति भावः। उत्तरमाह — **या अप्राप्ते विभाषेति**। तत्रेति शेषः। आक्षेप्ता स्वाशयं प्रकटयति — **या हि प्राप्त इति**। विभाषेत्यनुषज्यते। उत्तरेषां पदानां 'तत्र पूर्वेण विधिः कृतसामर्थ्य इति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात्' इत्यन्वयः। प्राप्ताप्राप्तविभाषासाधारण्येन समाधातुमाह — **एतदपीति**। **उभयोः संज्ञेति**। अन्यथा 'न' इत्येव तत्र तत्र लाघवाद् वक्तव्यं स्यादिति भावः। **नेति च वेति चेति**। निषधविकल्पयोरित्यर्थः। **विकल्पो भविष्यतीति**। विधेरिति शेषः। **नेति च वेति चेति**। निषेधो विकल्पश्चेत्यर्थः। **नेत्यनेनेति**। निषेधसमर्थेनेत्यर्थः। विभाषाशब्देनेति शेषः। **प्रतिषिद्ध इति**। प्रतिषेधे इत्यर्थः। उपस्थित इति शेषः। **वेत्यनेनेति**। विकल्पबोधनसमर्थेनेत्यर्थः। विभाषाशब्देन तस्य निषेधस्येति शेषः। विभाषाशब्दोपस्थापितयोर्निषेधविकल्पयोः परस्परमन्वयो भवतीति यावत्। एवमप्युभयत्र विभाषास्थले इष्टसिद्धिर्न भवतीति शङ्कते — **एवमपीति**। **युगपद्वचनमिति**। एकेन वाक्येन बोधनमित्यर्थः। **नोपपद्यत इति**। उभयत्र विभाषायामिति शेषः। प्राप्ताप्राप्तसाधारण्येन विधिविकल्पे बोधिते पूर्वं नित्यविधिं परो वैकल्पिकविधिर्बाधत इत्युभयत्र विकल्पः सेत्स्यतीत्याशयेन समाधत्ते — **सिद्धं त्विति**। **उत्तरो विधिर्बाधत इति**। सकृद्गतिन्यायाश्रयणात् पराप्रवृत्तिपक्षे पूर्वो न प्रवर्तत इति भावः। एतेन 'उभयत्रविभाषासु प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्तत इत्यर्थः' इति निरस्तम्। एकवाक्यताश्रयेण प्रवृत्तव्याख्येयभाष्यविरोधात्। एकवाक्यतयोपपत्तौ वाक्यभेदाश्रयणे मानाभावाच्च। यदप्युक्तम् 'यदि तु पूर्वं विकल्पः प्रवर्तते पश्चात् प्रतिषेधस्ततो विकल्पप्रवृत्तिरनर्थिकैव स्यात्' इति। तदपि न, प्रथमप्रवृत्तविकल्पेनैवेष्टसिद्धेर्भगवतैवोक्तत्वेन पुनर्निषेधप्रवृत्तौ मानप्रयोजनयोरभावात्। एतेन "आनुपूर्वी च यैव संज्ञाविधावाश्रिता सैव प्रदेशवाक्येष्वाश्रीयते। उभयत्र विभाषार्था चेयं संज्ञा, प्राप्तविभाषायामप्राप्तविभाषायां च संज्ञाकरणस्यानुपयोगात्। तथा हि — प्राप्तविभाषासु पक्षे निवृत्तिः क्रियते, पक्षे तु प्रवृत्तिः स्थितैव। अप्राप्तविभाषासु च पक्षे कार्यस्य प्रवृत्तिः क्रियते, पक्षान्तरे त्वप्रवृत्तिः स्थितैवेति नास्ति तत्र संज्ञाफलम्। [1]"विभाषा श्वेः' इत्यत्र तु यदि विधिमुखेन विभाषाश्रुतिः प्रवर्तते पित्स्वेव संप्रसारणं विभाषा स्यात्, कित्सु यजादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिः, तदापि कित्स्वेव विकल्प इति पित्सु न स्यात्। संज्ञाकरणे तु पूर्वं प्रतिषेधे कित्सु प्रवृत्ते पश्चाद्विधिमुखेन सर्वत्र पक्षे संप्रसारणस्य प्रवर्तनादिष्टं सिध्यति" इत्यपि निरस्तम्। उभयत्र विभाषास्वपि विधिमुखप्रवृत्त्येष्टसिद्धेर्भगवतैव स्पष्टमुक्तत्वात्। यदप्युक्तम् "यदा तु प्रतिलक्ष्यं भेदेन [2]'विभाषा श्वेः' इस्यस्य व्यापारः क्वचिद्विधिमुखेन क्वचित् प्रतिषेधमुखेन, तदा संज्ञाकरणमन्तरेणापि सिध्यतीत्यशिष्योऽयं योग इति वक्ष्यते —अशिष्यो वा विदितत्वादिति" इति। तदपि न, विधिमुखप्रवृत्तिमादायैवास्य भाष्यकृता प्रत्याख्यातत्वात्। द्वेधा प्रवृत्तौ मानप्रयोजनयोरभावाच्च। 'नवा' इत्येकस्यैव शब्दस्यार्थनिर्देशपरत्वमितिशब्दबलाद् गम्यत इत्युक्तं यत् तद् द्वितीयकल्पेऽपि ज्ञेयमित्याशयेनाह — **इतिकरण इति**। **इत्युक्तमिति**। यत् तदनन्तरकल्पेऽपि ज्ञेयमिति शेषः॥

---

[1] पा. सू. ६. १. ३०.

[2] पा. सू. ६. १. ३०

[१, ३२५–३२८]

(**नारायणीयम्**) अनित्यत्वं क्वाचित्कत्वं कादाचित्कत्वं वा। आद्य इष्टापादनम्, क्वाचित्कस्याभावस्येष्टत्वात्। अन्त्यस्य त्वनुपपत्तिः प्रतिषेधसंज्ञायाः कथं साध्यते, विकल्पस्यापि संज्ञया तदुपपत्तेरित्याशङ्क्य प्रतिषेधमात्रसंज्ञाकरणादिति हेत्वर्थं वदन् कादाचित्कत्वमनित्यत्वमित्याह — **विकल्प इति**। ननु यदि प्रतिषेधमात्रस्य संज्ञा स्यात् [1]'न बहुव्रीहौ' इत्यसंबद्धं स्यादित्ययं परिहारः कस्मान्नोक्तः, तत्राह — **परिहारान्तरेति**। [2]'विभाषा दिक्समासे' इति बहुव्रीहिविशेषे संज्ञां निषिध्य बहुव्रीहिसामान्ये निषेधकरणमसंगतम्, अत उभयसंज्ञात्वमिति परिहारे जाग्रति परिहारान्तरमुभयसंज्ञात्वे महासंज्ञाकरणमित्यर्थः। निषेधस्य प्रसङ्गपूर्वकत्वमात्रेण कथं विकल्पसिद्धिरित्याशङ्क्याप्राप्तविभाषासु वाक्यान्तरात् प्रसक्त्यभावान्निषेधानुपपत्त्या न प्रसङ्गोऽनुमेयः, अनुमीयमानस्य च प्रसङ्गस्य निषेधो नित्यं निवारकश्चेत् निषेधकरणात् प्रसङ्गानुमानवैयर्थ्यम्, नित्यनिषेधस्य वचनमन्तरेण सिद्धत्वादिति विकल्पसिद्धिरित्याह — **प्रतिषेधादिति**। लोकवेदयोरिह च व्याकरणे तत्र तत्र विधिनिषेधयोर्दर्शनात् कथं विरोधोद्भावनम्, अत आह — **एकेति**। सति सामान्यविशेषभावेन विषयभेदे विधिनिषेधप्रवृत्तिरविरोधेन, इह त्वत्यन्तमेव विषयैक्यमिति विरोध इत्यर्थः। उभयविधिसामर्थ्यात् तयोर्विषयभेदः कल्प्यत इति भाति, तत्कथमत्यन्त[3]भेदकल्पनमपीत्यत्राह — **सामर्थ्यादिति**। न विषयभेदकल्पनम्, अपि तु कालभेदकल्पनमित्यर्थः। भाष्ये च कालावच्छेदभेदाद्विषयो भिन्नतया कीर्तितः। ननु संज्ञामहत्त्वेनानुगतिः कल्प्यते तत्र तत्र, इह तु संज्ञिद्वित्वं कथं तेन लभ्यम्, अत आह — **तेनेति**। विकल्पार्थवाचिमहासंज्ञाकरणाद्विकल्पस्तावत् संज्ञीति 'न वा' इति निपातसमाहारत्वावसायादुभयसंज्ञित्वमित्यर्थः। न केवलं संज्ञामहत्त्वाद्विकल्पसंज्ञित्वमनुमेयम्, किं तु संज्ञाकरणादेवेत्याह — **यदि हीति**। 'तत्र' इत्यादिभाष्यं व्याचष्टे — **तत्रेति**। 'समुदायस्य' इत्यनेन न प्रत्येकसंज्ञित्वं व्यवच्छिद्यते, तथात्वेऽपि दोषाभावात्। न चैकत्रोभयोरुपस्थित्यर्थं[4] समुदायसंज्ञित्वं, प्रत्येकसंज्ञित्वेऽपि तत्संभवात्। यथा [5]'सिचि वृद्धिः' इत्यत्राकारादीनामुपस्थितिः। तस्मात् प्रतिषेधमात्रस्य विकल्पमात्रस्य चेयं न संज्ञा। अपि तूभयस्येत्येतावदिह विवक्षितम्। यदि समुदायस्य संज्ञित्वं तदा अप्राप्तविभाषायां विकल्पोपस्थितिर्न स्यात्। नच तत्र लौकिको विभाषाशब्दो विकल्पवाचीति वाच्यम्, भाष्यटीकयोः स्वारस्यभङ्गात् 'वेत्यनेन विकल्पो भविष्यति' 'विकल्प एवोपतिष्ठते' [6]इति च ....। किमिह विरुद्धार्थसंज्ञाकरणानुपपत्तिश्चोद्यते, आहोस्वित् प्रदेशेषु तद्विधानानुपपत्तिः, उत लक्ष्ये तत्प्रवृत्त्यनुपपत्तिः। नाद्यः, विरुद्धार्थवाचकानां छायातपप्रभृतीनामुपलम्भात्। अत एव न मध्यमः। नान्त्योऽपि, निषेधे[विकल्प-]प्रवृत्तेः, अत आह — **यद्यपीति**। युगपत् प्रतीतयोः क्रमप्रवृत्तौ कारणाभावात् प्रवृत्त्यनुपपत्तिचोदनमित्यर्थः। विरुद्धार्थस्य युगपत्प्रवृत्त्यनुपपत्तिचोदनायाः 'सिद्धं तु' इत्यत्र कः समाधिरभिधीयते, अत आह — **उभयत्रेति**। क्रमप्रवृत्त्याश्रयणाच्चोद्यानवकाश इत्यर्थः। ननु च युगपत्प्रतीतक्रमप्रवृत्तौ कारणाभावः, युगपत्प्रवृत्त्यनुपपत्तेरेव कारणत्वात्। क्रमप्रवृत्तावपि निषेधस्य लक्ष्येऽनवस्थानं कथमित्यपेक्षायां बाध उक्तः। यदि बाधस्तर्हि तत्प्रवृत्तिरपार्थिकेत्यत्राह — **प्रतिषेधेनेति**। विषय-

---

[1] पा. सू. १. १. २९.
[2] पा. सू. १. १. २८.
[3] भेदे कल्पन — क.
[4] अवस्थित्यर्थम् — क.
[5] पा. सू. ७. २. १.
[6] 'इति च' इत्यस्यानन्तरं किंचिद्ग्रन्थपातः स्यादिति भाति।

समीकरणलक्षणं प्रतिषेधप्रवृत्तिफलमुभयत्रविभाषास्वेव भवतीत्याह — **उभयत्रेति**। क्रमप्रवृत्तावपि वैपरीत्याभावे विनिगमनमाह — **यदि त्विति**। 'उभयत्र' इत्याद्युक्तप्रपञ्चनं स्पष्टम्॥

[१, ३२८–३३०]

(**लघुविवरणम्**) **अन्यत्रेति**। समर्थसूत्रे। **विरोध इति**। विभाषाग्रहणेन संज्ञा न संबध्यत इति तत्रोक्तम्, इह तु [1]'संज्ञाभिसंबध्यते' इत्युच्यत [2]इत्यस्ति विरोधः॥

[१,३२८–३३०]

(**विवरणम्**) यस्य विकल्पोऽभिमतस्तस्य साधुत्वं विकल्पेन स्यात्, शास्त्रस्य साध्वनुशासनार्थत्वेन साधुत्वस्य [3]प्रधानत्वात् प्रधानेन च विभाषाशब्दान्वयस्य न्याय्यत्वादिति वार्तिकस्य 'साध्वनुशासने' इत्यस्यार्थः। समासाधिकारे महाविभाषाधिकारः प्रत्याख्यास्यत इत्यतः प्रदीपकारः [4]"विभाषा श्वेः' इत्युदाहरति — **ततश्चेति**। **सर्वदेति**। सुसदृशत्वादसाधुपरित्यागपुरस्सरं साधूपादानं दुष्करमित्यपि द्रष्टव्यम्। विविच्य ज्ञापनवाचिनं 'साध्वनुशासने' इत्यनुशासनशब्दं प्रयुञ्जानेन शब्दनित्यत्वपक्षे दोषोऽयं न कार्यशब्दपक्ष इति ध्वनितम्। [5]तत्स्पष्टीकर्तुं 'यस्य पुनः' इति भाष्यम्। तस्याभिप्रायमाह — **एवमिति**। प्राधान्यात् साधुत्वं विभाषाग्रहणेन संबन्धनीयमिति यदुक्तं तत्राह — **साधुत्वस्येति**। साधुत्वं शब्दत्वावान्तरजातिरिति केचित्। [6]साक्षादर्थप्रत्यायनाङ्गत्वं नाम शब्दनिष्ठो धर्म इत्यपरे। शब्दनिष्ठमभ्युदयहेतुत्वमित्यन्ये। सर्वथापि तन्न पुरुषतन्त्रमिति विकल्पानर्हमित्यर्थः। **तदङ्गानामिति**। यथा हि [7]"वाजपेयस्य सप्तदशारत्निर्यूपः' इति श्रवणेऽपि वाजपेयस्य सोमयागत्वेन यूपाभावात् तत्रासंबध्यमानं सप्तदशारत्नित्वं तदङ्गे पशुयागे समवैति तद्वदिहापीत्यर्थः। **अन्यत्रेति**। समर्थसूत्रे। **ततश्चेति**। विभाषाग्रहणेन संज्ञा न संबध्यत इति तत्रोक्तम्, इह तु 'संज्ञाभिसंबध्यते' इत्युच्यत इति विरोध इत्यर्थः। **मुख्यार्थाभेदात्** प्रधानार्थाभेदादित्यर्थः। परस्पराकाङ्क्षा व्यपेक्षा वाक्यविषया। पृथगर्थानां [8]पदानां प्रधानार्थाभिधायित्वमेकार्थीभावः। स च वृत्तिविषयः। तथा च भिन्नविषयत्वाद् वृत्तिवाक्ययोर्न वृत्त्या वाक्यस्य बाधः प्रसक्त इति [9]वाक्याभ्यनुज्ञानाय विभाषाग्रहणं नोपपद्यत इति वृत्तावेव संज्ञाविकल्पार्थं विभाषाग्रहणमिति वाच्यम्। न च वृत्तावेव संज्ञाविकल्प इष्यत इति [10]तत्रोक्तमित्यतो न विरोध इत्यर्थः॥

[१, ३२८–३३०]

(**उद्द्योतनम्**) यस्य विकल्पोऽभिमतस्तस्य विकल्पेन साधुत्वं स्यात्। शास्त्रस्य साध्वनु-

---

[1] संज्ञा संबध्यत इति — ड, ढ; संज्ञा हि संबध्यत इति — त.
[2] इति विरोधः — ण.
[3] प्राधान्यात् — च, छ, ट.
[4] पा. सू. ६. १. ३०.
[5] तत्र कार्यपक्षे दोषं परिहर्तुं यस्य — ञ.
[6] अनाद्यनपभ्रष्टत्वं नाम — ञ.
[7] मीमांसासूत्रे ३. १. १८. 'आनर्थक्यात्तदङ्गेषु' इत्यत्रायमर्थो विचारितः।
[8] पदानामन्वयित्वमेकार्थीभावः — ञ.
[9] वाक्याभ्यनुज्ञानात् — ञ.
[10] तत्रोक्तमिति न — ट.

शासनार्थत्वेन साधुत्वस्य प्राधान्यात् तेनैव विभाषा[1]शब्दार्थस्यान्वयः स्यादिति वार्तिकार्थमभिप्रेत्याह — **साधुत्वेति**। समासे महाविभाषाधिकारस्य प्रत्याख्यानादुभयत्रविभाषाया एव संज्ञाप्रयोजनत्वाच्चोदाहरणान्तरमाह — **ततश्चेति**। असाधुत्यागे दृष्टान्तमाह — **भक्ष्येति**। **सर्वदेति**। अतिसादृश्यादसाधुपरित्यागेन साधूपादानमशक्यमित्यपि द्रष्टव्यम्। 'साध्वनुशासने' इति वार्तिके विविच्य ज्ञापनवाचिनानुशासनशब्देन शब्दनित्यत्वपक्षेऽयं दोषः, न कार्यशब्दपक्ष इति सूचितम्। तद्विशदयितुं 'यस्य पुनः' इति भाष्यम्। तस्याशयमाह — [2]**एवं मन्यत इति**। 'प्राधान्यात् साधुत्वमेव विभाषया संबध्यते' इति यदुक्तं तत्राह — **साधुत्वस्येति**। **साधुत्वं** शब्दत्वावान्तरजातिः, साक्षादर्थप्रतीतिसाधनत्वम्, अभ्युदयसाधनशब्दत्वं वा मतभेदेन। तस्य [3]पुंयत्नासाध्यत्वान्न विकल्पार्हतेत्यर्थः। **तदङ्गानां** साधुत्वज्ञानोपयोगिनां संप्रसारणादीनाम्। [4]'आनर्थक्यात्तदङ्गेषु' इति न्यायादिति भावः। 'किं तर्हि, संज्ञाभिसंबध्यते' इति भाष्यस्य भाष्यान्तरविरोधं शङ्कते — **नन्विति**। **अन्यत्र** समर्थसूत्रे। **मुख्यार्थाभेदात्** प्रधानार्थाभेदात्। **व्यपेक्षेति**। परस्पराकाङ्क्षा व्यपेक्षा वाक्य एव। पृथगर्थानां पदानां [5]प्रधानार्थाभिधायित्वमेकार्थीभावः। स च वृत्तावेव। तथा च वृत्तिवाक्ययोर्भिन्नार्थत्वान्न वृत्त्या वाक्यस्य बाधः प्रसक्त इति वाक्याभ्यनुज्ञानाय विभाषाग्रहणमनुपयुक्तमिति वृत्तावेव संज्ञाविकल्पार्थं तद्वाच्यम्। न च वृत्तावेव [6]संज्ञाविकल्प इष्यत इति तत्रोक्तमिति न विरोध [7]इत्यर्थः॥

[१, ३२८–३३०]

(**रत्नप्रकाशः**) इदानीं कुतर्कवासनानष्टविवेकः कश्चिच्छङ्कते — **साध्वनुशासनेऽस्मिन्निति**। **यस्य विभाषा क्रियत इति**। यत्संबन्धितया विकल्पो बोध्यत इत्यर्थः। **समासश्चैव हि विभाषा क्रियत इति**। [8]"विभाषा, अपपरिबहिरञ्चवः पञ्चम्या' इति सूत्रगतेन स्वरितत्वयुक्तेन विभाषाग्रहणेनेति शेषः। **समासस्यैवेति**। एवकारो भिन्नक्रमः, साधुत्वमित्यस्यानन्तरं बोध्यः। [9]'तुष्यतु दुर्जनः' इति न्यायेन तदुक्तमभ्युपगम्य तदभिमतं दूषणं तन्मुखेनैव वाचयितुमाह — **अस्त्विति**। तत् तथैवेति शेषः। वचनस्यानर्थक्यरूपं दूषणं तावदापादयति — **न चैव हीति**। दूषणान्तरमाह — **अपि चेति**। **द्वैधं शब्दानां प्रतिपत्तिरिति**। यस्य विभाषा क्रियते तद्घटितत्वेन तदघटितत्वेन चेति शेषः। तदेवं [10]'सिद्धे शब्दार्थसंबन्धे' इत्यादिवार्तिकेन भासमाने नित्यानां शब्दानां साधुत्वान्वाख्यानमात्रमनेन शास्त्रेण क्रियते, न त्वपूर्वाः शब्दाः क्रियन्त इति वैयाकरणमते दोषो भवतीत्युक्त्वा कार्यशब्दवादिमते स दोषो नेत्याह — **यस्य पुनरिति**। **समासं निर्वर्तयतीति**। तथा च [11]निर्वर्तमाने वैकल्पिके सति पक्षे तदभावविशिष्टं रूपान्तरमपि भवतीति भावः। इतरः स्वमतेऽपि स दोषो नेत्याह — [12]**यस्यापि त्विति**। **न ... साधुत्वमभिसंबध्यत इति**। अपौरु-

---

[1] शब्दार्थान्वयः — म, आ, इ, उ, ऊ, ऋ.
[2] य एवं — अ, आ, ऋ.
[3] प्रयत्नासाध्यत्वात् — उ.
[4] मीमांसासूत्रम्. ३. १. १८.
[5] प्रधानार्थाभिधेयत्वम् — अ, म, उ, ऋ.
[6] संज्ञा विकल्पयिष्यत इति — म.
[7] 'इत्यर्थः' इति नास्ति — अ.
[8] पा. सू. २. १. ११, १२. अयमेको योगो भाष्ये विभक्तः।
[9] लौ. न्या. द्वितीयभागे पृष्ठम् ३५:
[10] का. वा. १.
[11] निवर्तमाने — ब.
[12] 'भाष्ये 'यस्यापि नित्याः' इत्यत्र 'यस्यापि तु नित्याः' इति पाठो रत्नप्रकाशकृदभिमतः।

षेयत्वादिति भावः। **समाससंज्ञाभिसंबध्यत इति**। तस्याः सर्वार्थाभिधानसमर्थाया नियम्यमानत्वादिति शेषः। इदं भाष्यं सूत्रकारमतानुसारीति मतान्तरपरेण समर्थसूत्रगतेन "न च संज्ञाया भावाभावाविष्येते' इति भाष्येणास्य विरोधो न भवति। एतेन 'इह वृत्तिवाक्ययोर्मुख्यार्थभेदादभिन्नार्थत्वमाश्रित्योक्तम्। अन्यत्र तु व्यपेक्षैकार्थीभावभेदाद् भिन्नार्थतामाश्रित्यैकार्थीभाव एव संज्ञाया भावाभावौ नेष्येते इत्युक्तमित्यविरोधः' इति निरस्तम्। भाष्यद्वयस्यापि वृत्तिवाक्ययोः समानार्थकत्वमादायैव प्रवृत्तत्वात्॥

[१, ३२८–३३०]

(**नारायणीयम्**) ननु [२]समाससंप्रसारणादिकं शास्त्रेणानुशिष्यते, न साधुत्वम्। तत्कथं साधुत्वविकल्पापादनम्, अत आह — **साधुत्वेति**। लोकानवगतं शास्त्रेण विज्ञाप्यम्। संप्रसारणादिकं च लोकसिद्धमिति न तच्छास्त्रेणान्वाख्यायते। लोकतोऽनवगतं च साधुत्वं शास्त्रेणानुशिष्यत इति भावः। ननु साधुत्वस्य शास्त्रप्रतिपाद्यत्वे[ऽपि] विभाषाग्रहणं श्रुतसंप्रसारणादिभिः संगंस्यते, तत्राह — **प्राधान्यादिति**। उभयत्रविभाषासु संज्ञाप्रयोजनमित्युक्तत्वात्तामुदाहरति — [**ततश्चेति**।] नवाशब्दसंज्ञायां हि साधुत्वविकल्पाशङ्का न युज्यते। [भाष्ये] **यस्य विभाषेति**। यस्य विभाषाकल्पनमिष्यते तस्य न स्याद्विभाषा। कस्य तर्हि स्यात्, अत आह — **तस्येति**। **तस्य साधुत्वं** विभाष्येतेत्यध्याहारः। कर्मसाधनं वा विभाषाग्रहणमनुषञ्जनीयम्। अक्षरव्याख्यानविकल्पनेन विस्तरो न क्वापि कर्तुमुचितः। क्रियत इत्यस्य चिकीर्ष्यत इत्यर्थः। **समासश्चेति**। समाससंज्ञेत्यर्थः। **समासस्यैवेति**। समाससंज्ञोपलक्षितरूपस्य। सतोऽपि व्यवहारानर्हत्वे दृष्टान्तमाह— **यथेति**। ननु विभाषाग्रहणात् साधुत्वविकल्प इष्टोऽवभासते, तत् कथमनिष्टत्वोक्तिः, अत आह — **सर्वदेति**। कालभेदेन देशभेदेन पुरुषभेदेन वा रूपभेदहीनस्य साधुत्वं विकल्प्यत इति वाच्यम्। तच्चानिष्टम्। विषयव्यवस्था च दुर्ज्ञाना। अतो विभाषाग्रहणानर्थक्यमेव कार्यवादी नित्यवादिनं चोदयतीत्यर्थः। साधुत्वासाधुत्वद्वैविध्योपपत्तेस्तदप्रतिपत्तिः कथमित्याशङ्क्य रूपद्वैविध्यमिष्टं न स्यादिति वार्तिकार्थं सोपपत्तिकमाह — **साधुत्वेति**। कार्यत्वेऽपि [३]शास्त्रानिमित्तत्वे संप्रसारणादेर्विभाषाग्रहणेन संबन्धो न स्यात्। अतः शास्त्र[४]कार्यत्वमिह कार्यपदेन विवक्षितमित्याह — **एवमिति**। यद्यपि [५]कार्यत्वमस्य [६]'सिद्धे शब्दार्थसंबन्धे' इत्यत्र निराकृतम्, तथापि काल्पनिक-[७]व्यवहाराङ्गमस्यान्वाख्यानमिति पक्षे शास्त्रकार्यत्वमन्वाख्येयस्य। यथोक्तम् "दाधा घ्वदाप्' इत्यत्रागमविधिनिर्वाहाय। नित्यस्यान्वाख्येयत्वेऽपि न साधुत्वविकल्प इत्युक्तम्, तत् कथम्, प्रधानान्वयस्य न्याय्यत्वात्, अत आह — **साधुत्वस्येति**। तदेव हि विकल्पाङ्गम्, यत् पुरुषेण कर्तुमकर्तुमन्यथा कर्तुं शक्यम्। न च साधुत्वं शब्दत्वावान्तरजातिरन्यद्वा पुरुषायत्तमिति न तद्विकल्पनमर्हतीत्यर्थः। अपौरुषेयस्याविकल्पने दृष्टान्तः, न तु विकल्प इत्यभिसंधायाह — **पशुत्वेति**। [**अन्यत्रेति**।] समर्थसूत्रसन्सूत्रादौ। [९]**न चेति**। एकार्थीभावे वृत्तिविकल्पस्यानिष्टत्वात्। **मुख्यार्थभेदादिति**। राजविशिष्टपुरुषो वाक्ये वृत्तौ च प्रतिपाद्यः। ततश्चैकस्मिन्नर्थे वृत्तिविधानं

---

[१] महाभाष्यम् २. १. १.
[२] समाससंज्ञाप्रसारणादिकं — क.
[३] शास्त्रनिमितत्वे — क.
[४] कार्यवत्त्वम् — क.
[५] कार्यत्वस्य — क.
[६] का. वा. १.
[७] व्यवहारानङ्गम् — क.
[८] पा. सू. १. १. २०.
[९] न हीति — क.

वाक्यस्य बाधकं प्राप्तमिति तद्विकल्पनमित्यर्थः । **अन्यत्रेति** । वृत्तिवाक्ययोर्विविक्तविषयत्वं, वृत्तेरेकार्थीभावविषयत्वाद् वाक्यस्य व्यपेक्षाविषयत्वात् । ततश्च यस्मिन्नर्थे वृत्तिप्राप्तिस्तत्र न [1]तस्या अपि विकल्प इष्यते । तदुक्तम् [2]'वाग्रहणानर्थक्यं च तत्र नित्यत्वात् सनः' इति । तदेवं सूत्रमताश्रयेणान्यत्रोक्तं [3]चोपपद्यत इति न विरोध इत्यर्थः ॥

[१, ३३०–३३३]

(**लघुविवरणम्**) असत्त्ववचनस्य युगपच्छब्दस्य कथं चार्थे वृत्तिरित्यत आह — **युगपद्भाव इति** । [4]'अन्वाचयेन च' इत्यस्य [5]'ढक् च मण्डूकात्' इत्युदाहरणमयुक्तम्, न ह्यत्र चकारेणाण् [6]अप्राधान्येनोच्यते । किं तु समुच्चित्येत्यत आह — **अन्वाचय इति** । प्रत्ययविधावपि [7]'तस्मादित्युत्तरस्य' इति परिभाषामङ्गीकृत्याह — **निर्दिष्टेति** । **कथं तर्हीति** । सरूपसूत्र एतदुक्तम् । [8]**तव्यदादयस्त्विति** । प्रत्ययत्वं तु संज्ञा, न जातिः । **स्थिरं भवतीति** । ततश्च पाणिन्यादिनिमित्तमस्माकं स्वार्गाद्यवस्थानमिति पाणिन्यादिषु सानुग्रहा भवन्तीति भावः ॥

[१, ३३०–३३३]

(**विवरणम्**) [9]ननु युगपच्छब्द एकस्मिन् काल इत्यत्र वर्तते । अन्वाचयशब्दश्च न सप्तम्यर्थवृत्तिरिति कथं भिन्नविभक्त्यर्थ[10]वृत्त्योश्चार्थयोग इत्यत आह — **युगपद्भाव इति** । अन्वाचयेन चेत्यस्य [11]'ढक् च मण्डूकात्' इत्युदाहरणमयुक्तम्, न ह्यत्राण् चकारेणाप्राधान्येनोच्यते, किं तु [12]समुच्चित्येत्यत आह — **अन्वाचय इति**। **स्वरितत्वेन वेति**। यथा [13]'काश्यादिभ्यष्ठञ्जिठौ' इति वर्तमाने [14]'वाहीकग्रामेभ्यश्च' इत्यत्र । प्रत्ययविधावपि [15]'तस्मादित्युत्तरस्य' इति परिभाषामङ्गीकृत्याह — **निर्दिष्टेति**। **कथं तर्हीति**। सरूपसूत्रादौ । [16]**तव्यदादय इति**। प्रत्ययत्वादयः संज्ञाः, न जातय इति भावः। अर्थोऽपि समुदायस्येति शङ्कमानं प्रत्याह — **तव्यत्तव्यानीयर इत्यस्मादिति** । प्रत्ययादि[17]संज्ञाः प्रति तव्यादीनामुद्देश्यत्वात् तद्गतसाहित्यस्याविवक्षणात् ताः प्रत्येकं प्रवर्तन्ते । कृत्यादिसंज्ञकानां च भावकर्माद्यर्थनिर्देश इति प्रत्येकं [18]तव्यदादयो भावकर्मादि[19]वाचकत्वेनोत्पाद्याः । तत्रैकेनोक्तार्थत्वाद् द्वितीयादेर्न प्रयोग इत्यर्थः । कथं तद्विषयत्वमित्यत आह — **सर्वेति** । उपस्तरणाभिघारणद्विर्हविरवदानपुनरभिघारणानि । अथवोपस्तरणत्रिर्हविरवदानाभिघारणानि पञ्चा-

---

[1] तस्यापि — क.
[2] का. वा. ३. १. ७–९.
[3] चोपपाद्यत इति — क.
[4] अन्वाचयेन वेत्यस्य – ड, ढ, ण, त.
[5] पा. सू. ४. १. ११९.
[6] प्राधान्येनोच्यते — ण, त.
[7] पा. सू. १. १. ६७.
[8] तव्यादयस्त्विति — ड, ढ, ण, त.
[9] 'ननु' इत्यस्यानन्तरं 'सप्तम्यर्थे' इत्यधिकम् – ञ.
[10] वृत्तयोश्चार्थ — ञ, ट.
[11] पा. सू. ४. १. ११९.
[12] समुच्चित इत्यत आह — छ; समुच्चितेत्यत आह — ञ, ट.
[13] पा. सू. ४. २. ११६.
[14] पा. सू. ४. २. ११७.
[15] पा. सू. १. १. ६७.
[16] तव्यादय इति — च, छ, ञ, ट.
[17] संज्ञां प्रति — च, छ.
[18] तव्यादयः — ञ.
[19] वाचकाः, न परस्परसहिताः। तत्रैकेन –ञ.

वदानानि पञ्चावत्तशब्दस्य भाष्योक्तस्यार्थः। **अनादित्वादिति**। गालवव्यतिरिक्तैरपि[1] शिष्टैः प्रयुज्यमानत्वान्न [2]नियमार्थता संभवतीत्यर्थः। **स्थिरं भवतीति**। ततश्च पाणिन्यादिनिमित्तमस्माकं स्वर्गावस्थानमिति पाणिन्यादिषु सानुग्रहा भवन्तीत्यर्थः। **दूषणमिति**। परिहर्तुमशक्यमिति भावः॥

[१, ३३०–३३३]

(**उद्द्योतनम्**) ननु युगपच्छब्द एकस्मिन् काल इत्यर्थे वर्तते। अन्वाचयशब्दश्च [3]न सप्तम्यर्थवृत्तिरिति कथं चार्थयोगः, अत आह — **युगपद्भाव इति**। उभयोरपि प्रथमान्तत्वाद् द्वन्द्वोपपत्तिरित्यर्थः। अन्वाचयशब्दस्याप्रधानार्थकत्वाद् [4]'ढक् च' इत्यत्र समुच्चयस्य विवक्षितत्वात् प्रकृतानुपयोगादाह — **अन्वाचय इति**। **स्वरितत्वेन वेति**। [5]'काश्यादिभ्यष्ठञ्ञिठौ' इति वर्तमाने [6]'वाहीकग्रामेभ्यश्च' इत्यत्र यद्यपि चकारं विना [7]स्वरितत्वेनाप्यन्वयः, तथापि [8]'ढक् च मण्डूकात्' इत्यत्राणः स्वरितत्वाभावेऽप्यन्वयः, अत्र स्वरितत्वेनेति वास्तवकथनमेतत्। यौगपद्यमेवाह — **यस्येति**। **तत्र** व्यवहिते। नन्वत्राप्यारोपादेव [9]प्रयोगोऽस्तु, अत आह — **निर्दिष्टग्रहणमिति**। प्रत्ययविधावपि [10]'तस्मादित्युत्तरस्य' इति परिभाषामङ्गीकृत्येदमुक्तम्। **उक्तम्** सरूपसूत्रादौ। [11]**तव्यादय इति**। प्रत्ययत्वादयः संज्ञाः, न तु जातय इति भावः। **एकस्या इति**। पञ्चमी। अर्थोऽपि समुदायस्यैवास्तु, अत आह — **तव्यदिति**। संज्ञाविधौ तेषामुद्देश्यत्वेन साहित्यस्याविवक्षितत्वात् प्रत्येकमेव कृत्यादिसंज्ञाः। तथा च कृत्यसंज्ञया भावाद्यर्थे विधीयमानानां प्रत्येकमेवार्थवत्त्वमित्यर्थः। पुनः पुनरिति **शीलन**शब्दार्थ उक्तः। तद्विषयत्वे [12]हेतुमाह — **सर्वेति**। भाष्ये **पञ्चावत्तमिति**। उपस्तरणं द्विर्हविरवदानमभिघारणद्वयम्[13], [14]**हविष** एव वा त्रिरवदानमिति [15]पञ्चावदानानि। **अनादित्वादिति**। गालवव्यतिरिक्तैरपि शिष्टैः प्रयोगान्न नियमार्थता संभवतीत्यर्थः। पूजार्थत्वमाह — **केवलमिति**। [16]**प्रामाण्यं** संवादेनेत्यादिः। एवं प्रामाण्येन पूजेत्युक्तम्। अनाद्यर्थप्रतिपादकत्वेन [17]वा पूजा, तदर्थमाचार्यग्रहणमित्याह — **शास्त्रस्य हीति**। भाष्ये **कीर्त्यर्थमिति**। सर्वदेशप्रयुक्तशब्दान्वाख्यानात् सर्वदेशेषु व्याकरणप्रचारो भवतीति कीर्त्तिः कर्तुः स्यादित्यर्थः। कीर्त्तेः प्रयोजनमाह — **कीर्त्ताविति**। **दूषणम्** अपरिहार्यमित्यादिः। तदेवाह — **कार्यपक्ष इति**। नित्यपक्षे नैतद्दूषणमित्याह — [18]**नित्येति**। **विकल्प इति**। व्यवस्थित इत्यर्थः।

---

[1] अपिशब्दो नास्ति — अ.
[2] नियमार्थः। स्थिरं — अ.
[3] 'न' इति नास्ति — म.
[4] पा. सू. ४. १. ११९.
[5] पा. सू. ४. २. ११६.
[6] पा. सू. ४. २. ११७.
[7] स्वरितत्वेनापि नान्वयः — उ; स्वरितत्वेऽपि नान्वयः — ऊ; स्वरितत्वेनान्वयः — म, आ, इ.
[8] पा. सू. ४. १. ११९.
[9] प्रत्ययोऽस्तु — ऋ.
[10] पा. सू. १. १. ६७.
[11] 'तव्यदादयस्तु' इति प्रदीपे 'तव्यादयस्तु' इति 'उ' कोशे पाठः।
[12] हेतुः-सर्वेति — उ.
[13] अभिघारद्वयम् — उ.
[14] हविषो वा — अ, आ.
[15] 'उपस्तरणत्रिरवदानाभिघारणानि' इति छायायाम् पञ्चावदानोपपादनम्।
[16] प्रमाणं — अ, आ, इ, ऊ.
[17] वाशब्दो नास्ति — अ.
[18] प्रदीपे 'नित्यत्वपक्षे तु' इत्यत्र 'नित्यपक्षे तु' इत्यन्नंभट्टपाठ इति भाति।

तमेवाह — **तेनेति**। **क्वचित्** शुशावेत्यादौ। **किंचित्** [1]'विभाषा श्वेः' [2]इत्यादिः। **क्वचित्** शशुवतुरित्यादौ ॥

[१, ३३०–३३३]

(**रत्नप्रकाशः**) इदानीं नित्यशब्दवादी कार्यशब्दवादिमते दूषणमाह — **कार्येष्विति**। **युगपदन्वाचययौगपद्यमिति**। युगपच्छब्दस्य भावप्रधानस्य समुच्चयोपलक्षकान्वाचयशब्देन द्वन्द्वः। तस्य विधेयत्वलक्षकयौगपद्यशब्देन षष्ठीतत्पुरुषः। तदेतद्व्याचष्टे — **कार्येष्विति**। **न चैकस्येति**। [3]एकस्याः प्रकृतेः परत्वेनैकरूपेणानेकस्य प्रत्ययस्य युगपत्संभवो नास्ति हीत्यर्थः। एतेन 'ननु व्यवहितेऽपि परशब्दः प्रवर्तते। सत्यम्, अन्तरालस्थमनपेक्ष्यानन्तर्यमारोप्य तत्र परशब्दप्रयोगः। निर्दिष्टग्रहणं त्वानन्तर्यार्थमिति कुतो व्यवहितस्य प्रयोगः' इति निरस्तम्। [4]'तस्मादित्युत्तरस्य' इति परिभाषायाः प्रत्ययविधावप्रवर्तमानत्वेनानन्तर्यबोधकनिर्दिष्टग्रहणस्य तत्राभावात्। परशब्दप्रयोगे आनन्तर्यारोपानर्थक्याच्च। न हि पर इत्युक्ते आनन्तर्यं नियमेन गम्यते, येनानन्तर्यमारोपणीयं स्यात्। ननु प्रत्ययविधौ [5]'तस्मादित्युत्तरस्य' इति परिभाषा चेन्न प्रवर्तते तर्हि प्रकृतिप्रत्यययोरानन्तर्यनियमः केन सिध्यतीति चेत्, अधात्वादिपरत्वव्यावर्तकधात्वाद्यधिकारबलादिति गृहाण। यदप्युक्तम् 'कथं तर्ह्युक्तम् — [6]एका प्रकृतिर्बहवश्च यज्ञः, इति। तत्र यज्ञाकृतेरेकत्वात् तस्याश्च परत्वादानन्तर्याच्च न दोषः। तव्यादयस्त्वेकाकृतिका न भवन्ति' इति। तदपि न, [7]'एका प्रकृतिः' इत्यादिभाष्यस्यापि 'कार्येषु युगपत्' इत्याद्यत्रत्यभाष्यवत् मन्दबुद्ध्याशङ्कारूपत्वेन तस्य च [8]"ननु च यथैव बहवो यज्ञः, एवं प्रकृतयोऽपि बह्व्यः स्युः' इति भगवतैव निराकृतत्वेन तेन सहात्रत्यसमाधानग्रन्थस्य विरोधापादनस्य, आकृत्यैक्येन समाधानस्य चायोगात्। अन्यथा हकारादौ हल्त्वादिजातिवत् तव्यादावपि प्रत्ययत्वजातेः सद्भावेनैकैकस्माद्धातोस्तव्यादीनां युगपदुत्पत्तिप्रसङ्गः स्यात्। **द्वितीयस्येति**। [9]मध्योदात्तस्य कर्तव्यशब्दस्य। **तृतीयस्येति**। करणीयशब्दस्य। **तत्रैकेनोक्तत्वादिति**। [10]'तयोरेव कृत्यक्तखलर्थाः' इत्यनेन प्रत्येकं कृत्यानां भावकर्मार्थतायां बोधनादिति भावः। एतेन [11]"'तव्यत्तव्यानीयरः' इत्यस्माद्वाक्याद्वाक्यान्तराण्युपप्लवन्ते प्रतिपादकानि — धातोस्तव्यद् भवति भावकर्मणोः' इत्यादीनि। तत्र कर्तव्यशब्देन तस्यार्थस्य प्रतिपादितत्वात् करणीयशब्दो न प्रयुज्यते' इति निरस्तम्। 'धातोस्तव्यद् भवति भावकर्मणोः' इत्यादिवाक्यकल्पनायां मानप्रयोजनयोरभावात्। नित्यवादी कार्यवादिमते दूषणान्तरमाह — **आचार्येति**। **शीलनं** निर्देशः। उक्तेऽर्थे श्रौतं दृष्टान्तमाह — **जमदग्निर्वा इति**। तत्र वैशब्दो हेतौ, यस्माज्जमदग्निरेतत् पञ्चममवदानमवाद्यत् तस्मादित्यादिरर्थः। **पूजार्थमिति**। शास्त्रस्येति शेषः। सकलर्षिसंमतस्यार्थस्य संग्रहादुत्कृष्टमिदं शास्त्रमिति प्रतीयत इति कृत्वा सर्वेषामुपादेयमिदं संपद्यते। तदेव हि शास्त्रस्य पूजा। **कीर्त्यर्थमिति**। नानादेशस्थैर्ज्ञातार्थसंग्रहरूपत्वादस्य शास्त्रस्य कीर्त्ति-

---

[1] पा. सू. ६. १. ३०.
[2] 'इत्यादि' इति युक्तं भाति।
[3] एतस्याः — ब.
[4] पा. सू. १. १. ६७.
[5] पा. सू. १. १. ६७.
[6] महाभाष्यम् १. २. ६४.
[7] महाभाष्यम्. १. २. ६४.
[8] महाभाष्यम्. १. २.६४.
[9] प्रत्ययः, आद्युदात्तश्चेति प्रत्ययाद्युदात्तस्वरेणात्र मध्योदात्तत्वम्।
[10] पा. सू. ३. ४. ७०.
[11] पा. सू. ३. १. ९६.

र्भवति। राजादीनामपि दातृत्वादिना सर्वदेशविदितत्वमेव हि कीर्त्तिर्भवति। एतेन 'कीर्त्तौ सत्यां तेषां स्वर्गाद्यवस्थानं स्थिरं भवति, यथेन्द्रद्युम्नादीनाम्' इति निरस्तम्। पूजावत् कीर्त्तेरपि शास्त्र-संबन्धितयैवोपपादयितुं युक्तत्वात्। प्राचां स्वार्गाद्यवस्थानस्थिरीकरणेच्छायामन्येषां तदनिच्छायां पाणिनेर्वैषम्यनैर्घृण्यादिदोषापाताच्च। पूजा कीर्त्त्यर्थता [च] कार्यवादिमतेऽप्यविशिष्टेत्याह — **ननु चेति**। एतेन 'कार्यपक्षेऽपि पूजा शक्यते व्याख्यातुम् — यस्माद् गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात् त्वमपि प्रयुङ्क्ष्वेति स्तुत्यर्थोऽर्थवादः स्यादित्यर्थः' इति निरस्तम्। नित्यवादिमतवैलक्षण्येन कार्यवादिमते पूजार्थतोपपादने बीजाभावात्। प्रकारान्तरेणापि यथा सम्यक् शास्त्रस्य पूजा भवति तथानुवादनाच्च। न हि 'यस्मात्' इत्यादिना शास्त्रस्य पूजोपपादिता भवति। आचार्यदेशशील-नस्य पूजाकीर्त्त्यर्थत्वे कार्यनित्यवादिनोरुभयोरपि तत्र विकल्पो [1]'न सिध्यतीत्याह तृतीयः — **तत्कीर्तने चेति**। **तयोः** आचार्यदेशयोः, **कीर्तने** निर्देश इत्यर्थः। एतेन 'कार्यवादिमते एवेदं दूषणम्' इति निरस्तम्। मतद्वये तस्य तत्समाधानस्य च वक्ष्यमाणस्य तुल्यत्वात्। फलतस्तन्निर्देशस्य पूजा-कीर्त्त्यर्थत्वेऽपि गालवस्य मते ह्रस्वो भवति, प्राचां मते फिन् भवति, इत्युक्तेऽन्येषां मते तन्न भव-तीति गम्यमानत्वेन तत्रापि विकल्पसिद्धिः सूपपादेति तदुपेक्ष्य सूत्रमेव प्रकृतं प्रत्याचष्टे — **अशिष्यो वेति**। वाशब्दोऽवधारणे, अशिष्य एवेत्यर्थः। एतेन वाशब्दो विकल्पे। तेनाकृतिपक्षे उभयत्र-विभाषार्थं सूत्रं कर्तव्यम्। व्यक्तिपक्षे तु लक्ष्यभेदेन लक्षणभेदात् क्वचित् किंचिल्लक्षणम् विधि-मुखेन प्रवर्तते, क्वचित् प्रतिषेधमुखेन प्रवर्तत इतीष्टसिद्ध्या सूत्रं न कर्तव्यमित्यर्थः' इति निरस्तम्। उभयत्रविभाषास्थलेऽपि विधिमुखेन प्रवृत्तविकल्पमात्रेणेष्टसिद्धेर्भाष्यकृता दर्शयिष्यमाणत्वात्, दर्शितत्वाच्च। यदि वाशब्दो विकल्पपरतयैव व्याख्येय इत्याग्रहः, तर्हीत्थं व्याख्येयः — व्यक्ति-पक्षे [2]'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति परेण विकल्पेन पूर्वस्य नित्यस्य बाध-संभवेऽपि जातिपक्षे [3]'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति पूर्वस्य प्रवृत्तावनिष्टं स्यात्। अतो वाक्य-भेदेनादौ निषेधसमीकृते विषये पश्चाद्विकल्पविध्यर्थं निषेधविकल्पयोर्विकल्पवाचकः संज्ञा स्यादित्ये-तदर्थकं प्रकृतसूत्रमपेक्षितमिति सूचयितुं वाशब्द इति॥

[१, ३३०–३३३]

(**नारायणीयम्**) विभाषाग्रहणरहितवाक्ये दूषणकीर्तनमप्रस्तुताभिधानमित्यत आह[4] — **नित्येति**। विभाषाप्रस्तावेन कार्यवादिना नित्यत्ववादिनं प्रति दूषणेऽभिहिते सोऽपि तन्मते दूषणमभिधत्त इति [5]'नाप्रस्तुताभिधानमित्यर्थः। युगपदित्यस्यासत्त्ववचनत्वाच्चार्थवृत्तित्वाभावाद् द्वन्द्वः कथमित्यत्राह — **युगपदिति**। तत्रैकस्य प्राधान्यमितरस्य तु तदनुरोधेन संबन्धः सोऽन्वाचय इत्यन्वाचयलक्षणलक्षि-तोऽन्वाचय इह न गृह्यत इत्याह — **अन्वाचय इति**। तर्हि युगपद्विधानादस्य को भेदः, तमाह — **यस्येति**। [6]'यश्चोभयोः' इति [7]'न्यायानवतारं दर्शयति — **यस्येति**। **आरोप्येति**। [8]'परश्च' इत्यत्र तु मुख्यं परत्वं गृह्यत इति कथं युगपदुत्पत्तिप्राप्तिरित्यर्थः [9]'परवचनमनर्थकम्, पञ्चमी-

---

[1] न सिध्यतीत्यत आह — ब.
[2] परिभाषा ४०.
[3] परिभाषा ३९.
[4] अभिधानमित्याह — क.
[5] न प्रस्तुताभिधान — क.
[6] लौ. न्या. साहस्री पृष्ठम् २४५.
[7] न्यायावतारं — क.
[8] पा. सू. ३. १. २.
[9] का. वा. ३. १. २–१.

[1]'निर्दिष्टाद्धि परस्य' इति परवचनप्रत्याख्यानपक्षेऽप्याह — **निर्दिष्टेति**। **उक्तमिति**। सरूपसूत्रे। [2]"परश्च' इति सूत्रारम्भानारम्भयोराह — **तस्याश्चेति**। प्रत्ययमालाप्रसङ्गाभावे कथं यौगपद्यमित्याशङ्क्य, यौगपद्यं द्विविधम् — प्रकृत्यैक्ये तद्भेदे च प्रत्ययानां सर्वेषामपि प्रयोगलक्षणम्। तत्राद्यस्याप्रसङ्गेऽपि द्वितीयस्य प्रसक्तिश्चोद्यत इत्याह — **एकस्या इति**। **प्रकृत्यन्तरं** [3]प्रवृत्त्यन्तरम्। ननु तव्यदादिवाक्यस्यार्थविधिवाक्यस्य चैकवाक्यत्वे प्रत्ययत्रयात्मकसमुदायस्यैवार्थनिर्देशनमिति कथमेकैकेनार्थाभिधानम्, अत आह — **तव्यदिति**। षष्ठीसमासशङ्कानिवारणाय द्वन्द्वं कीर्तयन् द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकं संबन्धमाह — **आचार्यस्येति**। शीलयतेरर्थमाह — **पुनरिति**। पौनःपुन्यं च वस्तुसदनूदितम्, न त्विदं तद्विषयत्वे प्रयोजकम्। कथं पुनर्गालवग्रहणादगालवानां ह्रस्वप्रयोगाप्राप्तिः, तत्राह — **सर्वेति**। ननु प्रयोगनियम[4]प्रयुक्तं तद्विषयत्वम्, न तु कार्यताप्रयुक्तम्। अतः कथं नित्येऽपि पक्षे नायं प्रयोगः, तत्राह — **अनादित्वादिति**। **नास्तीति**। अनियमस्य लोकसिद्धत्वे नास्ति शास्त्रतो नियम इत्यर्थः। प्राचां कीर्तिसंपादनस्य फलमाह — **कीर्तावितिति**। ते च स्वर्गे संस्थिता आचार्यमनुगृह्णन्तीति भावः। **यथेति**। तेषां हि चरित्रं केनचिद्व्याजेन पुराणेषु कीर्त्यते, तद्विदद्भिरनुशासनव्याजेन प्राञ्चः कीर्त्यन्त इति भावः। यद्यपि गालवाद्युपादानवत् प्राग्ग्रहणमपि पूजार्थमिति शक्यते वक्तुम्, अथापि प्रतिनियतमुनित्वसंकीर्तनेनापि पूजोपपत्तेरविशेषकीर्तनं कीर्त्यर्थमिति भावः। आधुनिकानां प्राचां सत्त्वादनाद्यर्थ[5]विषयत्वस्यासंसूचनात् पूजार्थत्वस्य तत्राभाव इत्यप्याहुः। ननु कार्यपक्षे सादित्वाच्छब्दस्यानादिप्रतिपादनपरतया शास्त्रपूजाया व्याख्यातुमशक्यत्वात् कथं पूजार्थत्वमत्रापि पक्ष इत्यत आह — **कार्येति**। शास्त्रपूजार्थत्वाभावेऽपि ह्रस्वप्रयोगप्रशंसार्थं गालवोपादानं स्यात्। यथा [6]'चतुर्दशरात्रादिप्रयोगो बृहस्पत्यादिकर्तृकतया श्रूयते प्राशस्त्यावेदनाय तथेहापीत्यर्थः। पूजार्थत्वाद्विकल्पासिद्धिरिति दूषणं पक्षद्वयसाधारणमित्यत आह — **इदानीमिति**। अस्य दूषणस्य प्रागुक्तदूषणपरिहारो नास्तीति द्योतयितुम् 'इदानीम्' इत्युक्तम्। पक्षद्वयसाधारण्याभावमेव विशदयति — **कार्येति**। नित्यपक्षे [7]'विकल्पार्थत्वाविरोधेन शास्त्रपूजा भवति। कार्यपक्षे तु स्तुत्यर्थतया प्रयोगपूजार्थत्वे विकल्पार्थत्वाभाव इत्यर्थः। वाशब्दो न वाक्यालङ्कार इत्याह — **वाशब्द इति**॥

[१, ३३३–३३६]

(**लघुविवरणम्**) ननु [8]"विभाषा जसि' इत्यत्र न संदेहः, प्रतिषेधपक्षे [9]'द्वन्द्वे च' इत्यस्यापवाद इति प्राप्ते विभाषात्वनिश्चयाद् विधिपक्षे त्वप्राप्ता सर्वनामसंज्ञा पक्षे विधीयत इत्यप्राप्ते विभाषात्वनिश्चयादित्यत आह — **प्रकरणेति**। ननूभयग्रहणे कथं [10]संदेहः, यावतोभयशब्दे [11]'प्रथमचरम' इत्यनेन स्थानिवद्भावादयञ्मात्रस्य सर्वनामसंज्ञा, सर्वादिसूत्रेण [12]तूभयशब्दस्य समग्रस्येति

---

[1] निर्दिष्टत्वाद्धि — क.
[2] पा. सू. ३. १. २.
[3] वृत्त्यन्तरम् — क.
[4] प्रवृत्तं — क.
[5] विषयत्वस्य संसूचना पूजार्थत्वस्य — क.
[6] 'चतुर्विंशतिरात्रादिप्रयोगः' इत्युचितं भाति, तैत्तिरीयसंहितायां ७. ४. १. चतुर्विंशतिरात्रस्यैव बृहस्पतिकर्तृकत्वश्रवणानुरोधात्।
[7] विकल्पार्थत्वाद्विरोधेन — क.
[8] पा. सू. १. १. ३२.
[9] पा. सू. १. १. ३१.
[10] संशयः — ण.
[11] पा. सू. १. १. ३३.
[12] तुशब्दो नास्ति — ड, ढ.

भिन्न[1]विषयत्वादप्राप्तविभाषात्वनिश्चयादित्यत आह — **तत्र तयेति**। अन्वर्थसंज्ञाविज्ञाने यथा तदन्तविधिस्तथा प्रतिपादयति — **केवलस्येति**। **नेमशब्द इति**। संज्ञोपसर्जनप्रतिषेधस्य सर्वनामसंज्ञाप्रकरणे [2]सर्वत्र संबन्धादिति भावः। **तदाप्राप्तेति**। उभयशब्दव्यतिरिक्त एव तयबन्ते प्रवर्तनादित्यर्थः। **प्रमाण इति**। [3]'टिड्ढाणञ्' इत्यत्र दघ्नजादिसाहचर्यान्मात्रोऽपि प्रत्यय एव गृह्यत इति भावः। [4]'ऊर्णोतेर्विभाषा' इति वार्तिकमनुपपन्नम्, [5]'उतो वृद्धिः' इत्यनेन नित्यायां वृद्धौ प्राप्तायां तदपवादत्वेन [6]'ऊर्णोतेर्विभाषा' इत्यस्यारभ्यमाणस्य प्राप्ते विभाषात्वनिश्चयादित्यत आह — **विभाषेति**। तत्रानुवर्तमानस्यैकवाक्यत्वं निवर्तयति — **ऊर्णुश्चेति**। **नित्यमिति**। [7]'असंयोगाल्लिट् कित्' इत्यनेन। **परविप्रतिषेध इति**। कार्यातिदेश इति भावः। **वाक्यभेदेनेति**। पृथग्योगकरणसामर्थ्यादिति भावः॥

[१, ३३३–३३६]

(**विवरणम्**) कथम् 'इत उत्तरम्' [8]इत्यस्य लाभ इत्यत आह — **अधिकार इति**। [9]अधिकारकरणं समर्थयितुं 'त्रिसंशयाः' इत्युक्तं व्याचष्टे — **त्रिष्विति**। ननु वार्तिककृता [10]'द्वन्द्वे च' [11]'विभाषा जसि' इत्यभिधानाद् भाष्यकारस्य 'उभयशब्दः सर्वादिषु पठ्यते, तयपश्चायजादेशः' इत्यभिधानमसमञ्जसमित्यत आह — **प्रकरणेति**। [12]'प्रथमचरमतय' इति तु नोक्तम्, तत्र विभाषाशब्दाश्रवणात्। [13]'विभाषा जसि' इत्येव च नाभिहितम्, तस्यैव विचार्यत्वशङ्काप्रसङ्गात्। [14]'विभाषा जसि, [15]प्रथमचरमतय' इति च नोक्तम्, [16]'विभाषा जसि' इत्यस्यैव विचार्यत्वोपपत्तौ कस्मात् तदधिकारे विचार इति शङ्काप्रसक्तेः। [17]'द्वन्द्वे च, [18]'विभाषा जसि, [19]प्रथमचरमतय' इति न पठितम्, [20]'द्वन्द्वे च, [21]'विभाषा जसि' इत्यनेनैव विचारस्थलविशेषावगतेः। तथाहि — [22]'विभाषा जसि' इत्यत्र सर्वादीनीति तावदनुवर्तते। प्रथमचरमादीनां पृथग् जसि विकल्पारम्भाद् द्वन्द्व [23]इत्यप्यनुवर्तते। पूर्वादीनां जसि भेदेन विभाषारम्भात् [24]'द्वन्द्वे च' इति चकारेण च नञनुकर्षणार्थेन [25]'चानुकृष्टमुत्तरत्र नानुवर्तते' इति न्यायात् [26]'विभाषा जसि' इत्यस्य सर्वनामसंज्ञाविधानार्थत्वसूचनात्

---

[1] विषयत्वनिश्चयादप्राप्ते विभाषात्व — ण.
[2] सर्वत्राभिसंबन्धादिति — ण.
[3] पा. सू. ४. १. १५.
[4] 'ऊर्णोर्विभाषा' इति वार्तिकस्थाने 'ऊर्णोतेर्विभाषा' इति पाठश्चौखाम्बामुद्रिते दृश्यते। सोऽत्राभिमतः।
[5] पा. सू. ७. ३. ८९.
[6] पा. सू. ७. ३. ९०.
[7] पा. सू. १. २. ५.
[8] इत्यर्थलाभः — ञ.
[9] अधिकरणं समर्थयितुं — ञ.
[10] पा. सू. १. १. ३१.
[11] पा. सू. १. १. ३२.
[12] पा. सू. १. १. ३३.
[13] पा. सू. १. १. ३२.
[14] पा. सू. १. १. ३२.
[15] पा. सू. १. १. ३३.
[16] पा. सू. १. १. ३२.
[17] पा. सू. १. १. ३१.
[18] पा. सू. १. १. ३२.
[19] पा. सू. १. १. ३३.
[20] पा. सू. १. १. ३१.
[21] पा. सू. १. १. ३२.
[22] पा. सू. १. १. ३२.
[23] इत्यनुवर्तते — ञ.
[24] पा. सू. १. १. ३१.
[25] परिभाषा ७९.
[26] पा. सू. १. १. ३२.

सर्वनामसंज्ञायाश्च [1]'द्वन्द्वे च' इति निषेधेनाप्राप्ताया विधानेनाप्राप्तविभाषात्वनिश्चयात् त्रिसंशयत्वाभावेन विचारविषयत्वाभावात् । पारिशेष्यात् [2]'विभाषा जसि' इति प्रकरणोपलक्षणार्थमेवावतिष्ठते। तस्मात्साधूक्तम् — 'प्रकरण' इति। ननु तयग्रहणेऽपि कथं संशयः। यावतोभयशब्दे [3]'प्रथमचरम' इत्यनेन स्थानिवद्भावादयज्मात्रस्य सर्वनामसंज्ञा, सर्वादिसूत्रेण तूभयशब्दसमुदायस्येति भिन्नविषयत्वादप्राप्तविभाषात्वनिश्चयादित्यत आह — [4]**तत्रेति**। कथमन्वर्थसंज्ञाविज्ञानेन तदन्तविधिरित्यत आह — **केवलस्येति**। [5]**प्रत्ययग्रहणेति**। संज्ञाविधावपीति शेषः। **पूर्वेति**। सर्वादिषु पाठेनोभयशब्दस्य सर्वनामसंज्ञा जसोऽन्यत्र सावकाशा, द्वितयादिषु च विकल्पः, जस्युभयप्रसङ्गे यदि पूर्वविप्रतिषेध इत्यर्थः। **तदेति**। सर्वादिभ्योऽन्यत्रैव[6] प्रवर्तनादित्यर्थः। **त्रप्रन्तादीति**। अपिग्रहणात् प्रत्याहारसंनिविष्टमात्रजन्तादपीत्यर्थः। दघ्नच्सात्हचर्यान्मात्रोऽपि तद्धित एव गृह्यते, अर्थविशेषेण च तद्धितत्वनिश्चय [7]इत्यभिप्रेत्याह — **प्रमाण इति**। ननु "ऊर्णोतेर्विभाषा' इति वृद्धिविधौ प्राप्तविभाषैवेति नाप्राप्तविभाषाधिकारे तस्योपन्यासो युक्त इत्यत आह — **विभाषोर्णोरिति**। अर्थतः पठितमिति शेषः। ननु किमर्थं तर्हि पुरस्तात् कृतमित्यत आह— **इडिति**। एवं [8]'ह्यूर्णोतिनैव संबद्धमनुवर्तमानमिड्ग्रहणं न सूत्रान्तरेण संभन्त्स्यते। अन्यथा [10]'सार्वधातुकमपित्' इत्यनेनापि संबन्धः स्यादित्यर्थः। **तत्र** [11]'असंयोगाल्लिट् कित्' इत्यत्र। ननु [12]ङ्कारककारलक्षणविशेषणभेदाद् विशिष्टभेद इत्यत आह — **कार्यातिदेशेति**। यद्यपि ङित्कार्याणि कित्कार्याणि च सन्ति भिन्नानि, तथाप्यूर्णोतौ [13]कार्यान्तरासंभवाद् ङित्त्वकित्त्वयोरेक[14]कार्यत्वमुक्तम्। **वाक्यभेदेनेति**। पृथक्पाठसामर्थ्यादित्यर्थः। **गन्धनं** सूचनम्। **उपयमनं** स्वीकरणम्, विवाह इति यावत्। गन्धनग्रहणानुवृत्त्या गन्धनपूर्वके स्वीकरणे यदि कित्त्वं ततः प्राप्ते विभाषेत्यर्थः ॥

[१, ३३३–३३६]

(**उद्द्योतनम्**) 'इत उत्तरम्' इत्यस्य कथं लाभः, अत आह — **अधिकार इति**। अधि-

---

[1] पा. सू. १. १. ३१.
[2] पा. सू. १. १. ३२.
[3] पा. सू. १. १. ३३.
[4] अत्रेति — छ.
[5] प्रदीपे 'प्रत्ययग्रहण इति परिभाषया' इत्यत्र 'प्रत्ययग्रहणपरिभाषया' इति निर्णयसागरमुद्रिते पाठः।
[6] एवकारो नास्ति — च, छ.
[7] इत्यभिसंधायाह — अ.
[8] 'ऊर्णोर्विभाषा' इति वार्तिकस्थाने 'ऊर्णोतेर्विभाषा' इति चौखाम्बामुद्रिते पाठः। स विवरणकृदभिमतः। 'ऊर्णोतेर्विभाषा' इत्याकारकं सूत्रद्वयं वर्तते। तत्रैकेन हलादौ पिति सार्वधातुके परे ऊर्णोतेर्वृद्धिर्विधीयते विभाषया 'ऊर्णौति, ऊर्णोति' इति रूपद्वयसिद्ध्यर्थम्। तत्र 'उतो वृद्धिर्लुकि हलि' इत्यनेन नित्यतया प्राप्तत्वाद् वृद्धेर्विकल्पेन विधानम्। अन्येनेडादौ सिचि परस्मैपदे परे वृद्धिर्विकल्पेन विधीयते 'और्णावीत्, और्णवीत्' इति रूपद्वयसिद्ध्ये। तत्र च 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन प्राप्तायां वृद्धेर्विकल्पेन विधानमित्याशयः ॥
[9] हिशब्दो नास्ति — अ.
[10] पा. सू. १. २. ४.
[11] पा. सू. १. २. ५.
[12] ककारङ्कारलक्षण—अ.
[13] कार्यान्तरसंभवात् — छ.
[14] कार्यमुक्तम् — अ.

कारकरणस्य प्रयोजनं वक्तुं 'त्रिसंशयाः' इत्युक्तम्, तद्व्याचष्टे — **त्रिष्विति**। ननु वार्तिके [1]"द्वन्द्वे च, [2]'विभाषा जसि' इत्यभिधानाद् भाष्ये 'उभयशब्दः सर्वादिषु पठ्यते, तयपश्चायजादेशः' इत्ययुक्तम्, अत आह — **प्रकरणेति**। [3]"विभाषा जसि' इत्येवोक्तौ तस्यैव विचार्यत्वशङ्का स्यादिति[4] 'द्वन्द्वे च' इत्येतत् प्रकरणपरम्। तथा च सर्वनामसंज्ञाप्रकरणे यद्विभाषाग्रहणं तत्र तयग्रहणे संशयत्रयं भवतीति वार्तिकार्थः। यद्यपि [5]"विभाषा जसि' [6]"प्रथमचरमतय' इति पठितुं शक्यम्, तथापि वैचित्र्यात् [7]"द्वन्द्वे च' इति पठितमिति ज्ञेयम्। ननूभयशब्दस्य सर्वादित्वात् संज्ञा, अत्र तयप्प्रत्ययस्येत्यप्राप्तविभाषात्वनिश्चयान्न संशयः, अत आह — **तत्रेति**। [8]"येन विधिः' इति सूत्रे [9]"प्रयोजनम्' इति वार्तिकम्। [10]"प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य [11]च ग्रहणम्' इति परिभाषा संज्ञाविधावपि प्रवर्तत इत्यभ्युपेत्योक्तम् — **प्रत्ययेति**। तयशब्दस्य तदन्तविधिरित्यन्वयः। तदन्तविधौ सति संशयोपपत्तिमाह — **तत्रेति**। **तयान्तमिति**। द्वितयादिव्यावृत्त्यर्थमित्यर्थः। **नित्या** सर्वादिसूत्रविहिता। **पूर्वेति**। सर्वादिपाठाज्जसोऽन्यत्रोभयशब्दस्य संज्ञा सावकाशा। द्वितयादौ [12]विकल्पः सावकाशः। उभयशब्दस्य जस्युभयप्रसङ्गे पूर्वविप्रतिषेधश्चेत् तत्र नित्यैव संज्ञा, द्वितयादिष्वेव विकल्प इत्यप्राप्तविभाषेत्यर्थः। **उभयत्रेति**। द्वितयादावप्राप्ते, उभयशब्दे प्राप्ते च। ननु पूर्वविप्रतिषेधेनैव सिद्धौ प्रत्ययान्तरत्वं किमर्थमुक्तम्, अत आह — **आदेशेति**। ननु [13]"तयस्यायच्' इति षष्ठीनिर्देशेनादेशत्वनिश्चयात् कथं प्रत्ययान्तरत्वम्, अत आह — [14]**उभादिति**। [15]त्रन्नन्तादपीत्यपिना द्वयसजर्थादपीत्यर्थः। यद्यपि [16]लाक्षणिकत्वादपि तन्निवृत्तिः, तथापि समाधानान्तरमाह — भाष्ये **सदृशस्यापीति**। तद्व्याचष्टे — **प्रमाण इति**। दध्नच्साहचर्यात् मात्रोऽपि तद्धित **एव** गृह्यते। अर्थविशेषेण च तन्निश्चय इत्यभिप्रायः। ननु [17]"ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पार्थं सूत्रम्। तत्र [18]"असंयोगाल्लिट् कित्' इत्यादिभाष्यमयुक्तम्, अत आह — **विभाषेति**। वार्तिके इदं सूत्रमर्थतः पठितमित्यर्थः। [19]संशयत्रयमुपपादयति — **यदीति**। **वाक्यभेदेनेति**। असंयोगाल्लिट् कित्, ऊर्णोतेः पर इडादिर्लिट् वा कित्, इत्येवमित्यर्थः। तर्हि किमर्थं पुरस्तात् सूत्रं कृतम्, अत आह — **इडिति**। ऊर्णोतिनैव संबद्धस्येड्ग्रहणस्यानुवर्तनान्न [20]"सार्वधातुकमपित्' इत्यनेनेटः संबन्ध इति भावः। [21]**तत्र** [22]"असंयोगाल्लिद् कित्' इत्यत्र। **परेति**। [23]विकल्पस्य लुडवकाशः, [24]"असंयोगाल्लिट् कित्' इत्यस्य चेतत्यादयः। ऊर्णोतेरिडादौ लिटि परत्वात् [25]"असंयोगात्'

---

[1] पा. सू. १. १. ३१.
[2] पा. सू. १. १. ३२.
[3] पा. सू. १. १. ३२.
[4] इतिशब्दो नास्ति — म, आ.
[5] पा. सू. १. १. ३२.
[6] पा. सू. १. १. ३३.
[7] पा. सू. १. १. ३१.
[8] पा. सू. १. १. ७२.
[9] का. वा. १. १. ७२–८.
[10] परिभाषा २३.
[11] चशब्दो नास्ति — म.
[12] विकल्पस्यावकाशः — अ.
[13] पा. सू. ५. २. ४३.
[14] उभाविति — अ, म, आ, इ, ऊ.
[15] 'त्रन्नन्तादपि' इति वाक्यं नास्ति — आ.
[16] लाक्षणिकत्वादेवैतन्निवृत्तिः — उ.
[17] पा. सू. ७. २. ६; ७. ३. ८०. वार्तिके 'ऊर्णोर्विभाषा' इत्यत्र 'ऊर्णोतेर्विभाषा' इति चौखाम्बामुद्रिते पाठः। सोऽन्नम्भट्टादृतः।
[18] पा. सू. १. २. ५.
[19] संशयमुपपादयति — इ.
[20] पा. सू. १. २. ४.
[21] अत्र — अ, आ, म.
[22] पा. सू. १. २. ५.
[23] विकल्पस्यालिडवकाशः — म, आ, इ.
[24] पा. सू. १. २. ५.
[25] पा. सू. १. २. ५.

इत्यस्यैव प्राप्तावन्यत्राप्राप्तविभाषैवेत्यर्थः। **उभयत्रेति**। लिटि प्राप्ते, अन्यत्राप्राप्ते। व्यपदेशभेदस्योक्तत्वात् कथमेकत्वम्, अत आह — **कार्येति**। यद्यपि वचिस्वपियजादीनां कित्येव संप्रसारणं न ङितीति न सर्वकार्यैक्यम्, तथाप्यूर्णोतौ कार्यान्तरासंभवात् कित्त्वङित्त्वयोरेककार्यत्वमभिप्रेत्य 'गुणनिषेधस्य' इत्युक्तम्। **लङ इति**। आत्मनेपदस्येत्यर्थः। **वाक्यभेदेनेति**। 'ऊर्णोतेरिडादिप्रत्ययो वा ङित्' इत्येकं वाक्यम्। 'ऊर्णोतेः सार्वधातुकमपिद्वा ङित्' [1]इत्येकमित्यर्थः। पृथक्पाठसामर्थ्याद्वाक्यभेदेनेत्युक्तम्। **अथेति**। वाक्यभेदपक्ष एवासंबन्धोऽभिमतः[2]। एकवाक्यत्वे 'ऊर्णोतेः' इत्यस्येडादिप्रत्ययविषयतया सार्वधातुके प्रवृत्त्यभावेन प्राप्ताप्राप्तविभाषात्वासंभवात्। **पूर्वेति**। द्वितीयसूत्रस्य ऊर्णोतेः परो यः कश्चित् प्रत्ययो वा ङित् स्यादित्यर्थः। तत्र सार्वधातुके प्राप्तविभाषा, असार्वधातुकेऽप्राप्तविभाषेत्यर्थः। यद्वा वाक्यभेदाभावेऽपि इड्ग्रहणमननुवर्त्य [3]संशयत्रयोपपादनमिति ज्ञेयम्। ननु **गन्धनं** सूचनम्, **उपयमनं** विवाहः, तयोर्भेदात् कथं 'गन्धने' इत्यनेनोपयमने [4]प्राप्तिः, अत आह — **यदेति**। **गन्धनाङ्गमिति**। बहुव्रीहिः। गन्धनग्रहणानुवृत्त्या गन्धनपूर्वकोपयमनं यदि तत्र गृह्यते, तदा प्राप्तविभाषेत्यर्थः। **पूर्वेति**। [5]उपयमने 'गन्धने' इति नानुवर्तते। विवाहश्च गन्धनपूर्वकः, तदन्यश्च। तत्र पूर्वविप्रतिषेधे गन्धनपूर्वके विवाहे नित्यं कित्त्वमित्यप्राप्तविभाषा। परविप्रतिषेधे तूभयत्रेत्यर्थः। भाष्ये **गन्धन इति निवृत्तमिति**। पूर्वविप्रतिषेध [6]आश्रीयत इत्यर्थः। भाष्ये **अनुपसर्गाद्वेति**। वृत्त्यादेरत्रानुवृत्तौ प्राप्ते। अननुवृत्तौ [7]पूर्वविप्रतिषेधेऽप्राप्ते। परविप्रतिषेधे उभयत्रेति संशयः। पूर्वविप्रतिषेध इति 'वृत्त्यादिष्विति निवृत्तम्' इति [8]भाष्यस्यार्थः॥

[१, ३३३–३३६]

(**रत्नप्रकाशः**) इदानीं प्रसङ्गात् त्रिकोटिकसंशयाः प्राप्ताप्राप्तोभयत्रविभाषाः क्रमेण दर्शयितुमुपक्रमते — **अप्राप्त इति। त्रिसंशया इति**। त्रिष्वर्थेषु संशयो यासु ता इत्यर्थः। **द्वन्द्वे च, विभाषा जसीति**। प्रकरणपरिज्ञानायेदम्, संदेहस्तु तयान्ते। [9]'प्रथमचरमतय' इत्यत्र सर्वादीनीत्यनुवर्त्य 'सर्वादि यत् तयान्तम्' इत्याश्रयणे प्राप्ते विभाषा। अयचः प्रत्ययान्तरत्वे सर्वादीनीत्यननुवृत्तेरप्राप्ते। अयच् तयादेश एव, विप्रतिषेधे च परमित्युभयत्र। **अयच् प्रत्ययान्तरमिति**। [10]'उभादुदात्तो नित्यम्' इत्यत्र 'उभादुदात्तः' इति विभज्य 'अवयवे' इत्यनुवर्त्यावयववृत्तेरुभादवयविन्यर्थेऽयच्प्रत्ययो भवतीति व्याख्यानादिति भावः। अयचस्तयादेशत्वेऽपि विभक्तिनिरपेक्षतयान्तरङ्गा सर्वादित्वप्रयुक्ता नित्यैवोभयस्य सर्वनामसंज्ञा भवतीत्यप्राप्तविभाषैव तयान्ते भवति। एतेन

वप्राप्तविभाषेत्यर्थः' इत्यधिकं दृश्यते — ऋ.

[1] 'इत्येकमित्यर्थः' इत्यस्यानन्तरं 'पृथक्पाठ' इत्यतः प्राक् 'ऊर्णोतेरिडपित् सार्वधातुकं ङिदित्येवमित्यर्थः। ततश्च प्रौर्णुवीत्यत्र प्राप्तविभाषेत्यर्थः' इत्यधिकम् — ऋ.

[2] 'अभिमतः' इत्यस्यानन्तरं 'विभाषोर्णोरिति सूत्रं नानुवर्तत इत्यर्थः। तदेति। प्रौर्णुवीत्यत्र प्राप्ते, अन्यत्राप्राप्ते। परेति। प्रौर्णुवीत्यत्र परत्वात् सार्वधातुकमपिदित्यस्यैव प्रवृत्ता-

[3] संशयोपपादनं ज्ञेयम् — उ.

[4] प्राप्तम् — अ, म, ऋ.

[5] विभाषोपयमन इति सूत्र इत्यर्थः।

[6] आश्रित इत्यर्थः — म, आ, इ, उ, ऋ.

[7] पूर्वविप्रतिषेधे चाप्राप्ते — म, उ.

[8] भाष्यार्थः — म.

[9] पा. सू. १. १. ३३.

[10] पा. सू. ५. २. ४४.

'आदेशपक्षे पूर्वविप्रतिषेधो वक्तव्य इति प्रत्ययान्तरपक्ष आश्रितः' इति निरस्तम्। **तैलमात्रेति**। **तैलमात्रा** मानविशेषयुक्तो भागविशेष इत्यर्थः। [1]'हुयामाश्रुवसिभसिभ्यस्त्रन्' इत्यौणादिकस्त्रन्। [2]'आदिरन्त्येन सहेता' इत्यत्र स्वमित्यनुवृत्तस्य षष्ठ्यन्ततया विपरिणतस्य सदृशलक्षकत्वात् त्रन्नन्तस्यापि मात्रशब्दस्य ग्रहणं स्यादिति मन्यते। **असंनिविष्टस्य [3]न भवतीति**। यद्यप्यनुकरणमात्रमेव तत्र संनिविष्टम्, न त्वनुकार्यमपि, तथापि तत्तादात्म्यापन्नतया परिकल्पितः सोऽपि तत्र संनिविष्ट एवेत्याश्रयणान्नासंभवातिव्याप्ती इति भावः। [4]'प्रत्ययग्रहणे नाप्रत्ययस्य' इति परिभाषया लक्षणप्रतिपदोक्तपरिभाषया च त्रन्नन्तस्य ग्रहणं नेत्यपि सुवचम्। [5]**ऊर्णोतेर्विभाषेति**। अर्थत एवं पठितम्। सूत्रं तु [6]'विभाषोर्णोः' इति। **असंयोगाल्लिट् किदिति वेति**। तत्र [7]'विज इट्' इत्यतोऽनुवृत्तेनेटा सह "विभाषोर्णोः' इति सूत्रमनुवर्त्य तदपवादतया 'ऊर्णोतेरिडादिरपिल्लिट् किद्वा स्यात्' इति व्याख्यानादिति भावः। **अन्यत्र वेति**। स्वस्थान एव 'ऊर्णोतेरिडादिप्रत्ययो ङिद्वा स्यात्' इति व्याख्याने 'ऊर्णुनुविषे' इत्यादौ परेण [8]'असंयोगाल्लिट् कित्' इत्यनेन नित्यं कित्त्वस्यैव प्रवर्तनादिति भावः। **उभयत्र वेति**। पूर्वविप्रतिषेधस्य 'प्रतिपदोक्तोऽपवादः' इत्यस्य वाश्रयणेन 'प्रोर्णुवे' 'प्रौर्णुवि' इत्यत्र लड्लङुत्तमैकवचनस्य [10]"सार्वधातुकमपित्' इति प्राप्ते, 'प्रोर्णुविता' इत्यादावप्राप्ते विकल्पविधानादिति भावः। **अप्राप्त इति**। पूर्वविप्रतिषेधे मानाभावात्, निरवकाशतायां नाप्राप्तविषयकतायां वा अपवादताप्रयोजकत्वेन प्रतिपदोक्ततायास्तदप्रयोजकत्वाच्चेति भावः। **अन्यद्धि कित्त्वमन्यद्धि ङित्त्वमिति**। तथा चोभयविषयतया त्रिकोटिकता संशयस्यायुक्तेति भावः। विधेयस्यैक्ये हि संशयस्य त्रिकोटिकता संगच्छते। **एकं चेन्ङित्कितावि ति**। सर्वत्र तत्र ङित्त्वमेव वा कित्त्वमेव वा यदि विधीयते तदैकार्थविषयकतया त्रिकोटिकः संशयो युक्तो भवतीति भावः। एतेन 'कार्यातिदेशपक्षे गुणनिषेधस्य कार्यस्यैकत्वादेकत्वमनयोरित्यर्थः' इति निरस्तम्। गुणनिषेधस्य कथंचिदैक्येऽपि ततो वृद्धिनिषेधस्य भिन्नत्वात्। ताभ्यां च संप्रसारणस्य भिन्नत्वात्। **अथ हि नानेति**। **हि** यस्मात् अत्र ङित्त्वं कित्त्वं च पृथग्विहितम्, अतो न युक्तस्त्रिसंदेह इति भावः। कित्त्वङित्त्वयोर्भेदमभ्युपेत्यापि ङित्त्वापेक्षया संशय उपपादयितुं शक्यत इत्याशयेनाह — **यद्यपीति**। **एवमपीति**। तथापीत्यर्थः। **प्रौर्णुवीति**। लङुत्तमैकवचनम्। **इतीति**। इत्यादौ प्राप्तविभाषात्वसंभवादिति भावः। आदिशब्देन 'प्रोर्णुवे' 'प्रोर्णुवीय' इति लड्लिङुत्तमैकवचनस्य ग्रहणम्। कथं तत्र प्राप्तविभाषात्वमित्यत आह — **सार्वधातुकमपिदिति वेति**। तत्र [11]"विभाषोर्णोः' इतीटा सहानुवर्त्य 'ऊर्णोतेरिडपित् सार्वधातुकं ङिद्वा' इति व्याख्यानादिति भावः।

---

[1] उणादिसूत्रम् ६१७. वसधातुघटितोऽयमुणादिपाठो नारायणभट्टविरचितवृत्तिसहिते मद्रपुरीविश्वविद्यालयप्रकटिते सप्तमग्रन्थाङ्कयुते १९३३ सन्. वर्षीये पुस्तके परं दृश्यते। नान्यत्र।

[2] पा. सू. १. १. ७१.

[3] भाष्ये 'न भविष्यति' इत्यत्र 'न भवति' इति रत्नप्रकाशकृत्पाठ इति भाति।

[4] 'प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषाया अर्थानुवादोऽयमिति भाति॥ परिभाषा १११.

[5] वार्तिके 'ऊर्णोर्विभाषा' इत्यत्र 'ऊर्णोतेर्विभाषा' इति चौखाम्बामुद्रिते पाठः। सोऽत्र स्वीकृतः।

[6] पा.सू १. २. ३.

[7] पा. सू. १. २. २.

[8] पा. सू. १. २. ३.

[9] पा. सू. १. २. ५.

[10] पा. सू. १. २. ४.

[11] पा. सू. १. २. ३.

'अन्यत्र वा' इति 'उभयत्र वा' इति च प्राग्वत्। **विभाषोपयमन इति**। [1]'यमो गन्धने' इति पूर्वसूत्रं संपूर्णमनुवर्त्य 'उपयमनविषयकगन्धने गम्यमाने यमः सिच् कित्, आत्मनेपदे वा स्यात्' इति व्याख्याने प्राप्ते। 'यमः' इत्येतावन्मात्रमनुवर्त्य 'यमेरुपयमने वर्तमानात् सिच् किदात्मनेपदे' इति व्याख्याने पूर्वविप्रतिषेधे, परविप्रतिषेधपुनःप्रसङ्गयोर्वाश्रयणेऽप्राप्ते। परविप्रतिषेधसकृद्गत्योराश्रयणे उभयत्र। **अनुपसर्गाद्वेति**। [2]'विभाषोपयमने' इत्यनेन तुल्यमेतत्। वस्तुतस्तु [3]'उपपराभ्याम्' इति पृथङ्नियमसूत्रकरणात् [4]'वृत्तिसर्गे' इति सूत्रमनुपसर्गादेव क्रमेः सावकाशम्। तदा [5]'अनुपसर्गाद्वा' इत्यस्य सोऽपवाद एव संपन्न इत्यप्राप्तविभाषात्वं तस्य॥

[१, ३३३–३३६]

(**नारायणीयम्**) 'इत उत्तरम्' इत्यादिभाष्योक्तोपपत्त्यर्थमाह — **अधिकार इति**। विभाषाविशेषणमेतदित्याह — **त्रिष्विति**। अतद्विशेषणत्वे तु त्रिकोटिकः संशय इत्यर्थो वाच्यः स्यात्, तत्र बहुवचनानुपपत्तिरिति भावः। [6]'विभाषा जसि' इत्यत्र संदेह इत्युपक्रम्य 'उभयशब्दः' इत्युपन्यासोऽसंगत इत्यत आह — **प्रकरणेति**। ननु कथं तयब्ग्रहणे संदेहः, तत्र तयब्मात्रस्य संज्ञाकरणात्। सर्वादिपाठेन तूभयशब्दस्य संज्ञाकरणात्, अत आह — **तत्रेति**। **सर्वनामत्वसंभवादिति**। सर्वार्थवाचकत्वसंभवादित्यर्थः। प्रत्ययग्रहणपरिभाषायाः प्रतिप्रसवो वा तदन्तविधिरित्ययमत्रार्थः। प्राप्तविभाषात्वे 'उभयशब्दः' इति हेतुरुक्तः। स कथम्, सर्वादिपाठे सत्यपि [7]'तस्य तन्मात्रविषयकत्वे तयब्ग्रहणस्य प्रमाणाभावात्, अत आह — **तत्रेति**। अन्यत्रैवाप्राप्त्या अप्राप्तविभाषात्वमुक्तम्। तदुपपादयति — **अथेति**। नन्वादेशपक्षेऽप्यप्राप्तविभाषात्वोपपादनात् प्रत्ययान्तरपक्षः [8]'किमित्याश्रितः, तत्राह — **आदेशेति**। **वक्तव्य इति**। परशब्दस्य व्यवस्थावचनत्वादिष्टानिष्टविभागस्य दुर्ज्ञानतयेष्टवाचित्वाभावात्। [9]'अयच्यादेशत्वस्य प्रत्यक्षत्वात् प्रत्ययान्तरत्वसिद्धये सूत्रभेदः कर्तव्य इत्याशङ्क्य प्रस्तुताभिप्रायं प्रत्ययान्तरकथनमित्याह — **उभादिति**। अस्य दोषस्य [10]'पक्षद्वयासाधारण्यमाह — **प्रत्याहार इति**। ननु प्रत्याहारसंनिवेशो मात्रशब्देऽवसेयः, तत्त्वं चास्यापीति कथमेतन्निरासः, तत्राह — **प्रमाण इति**। न स्वरूपमात्रस्य। स चार्थविशेष इह नास्तीत्यर्थः। अर्थानुवादोऽयमित्याह — **विभाषेति**। लिङ्ग्रहणस्य सिंहावलोकितानुवृत्त्या प्राप्तविभाषात्ववर्णनाद्वरमि[दमि]त्यभिसंधायाह — **यदीति**। यदि [11]'असंयोगाल्लिट् कित्' इति प्राप्तकित्त्वविकल्पनाय सूत्रमिदं तर्हि तदनन्तरमिदं वाच्यमित्यत आह — **इडिति**। **परेति**। ऊर्णोतेः परस्येडादिलिटः कित्त्वं नित्यमित्यर्थः। ननु कार्यैक्याद् भेदः कथमनयोः, अत आह — **व्यपदेशेति**। ननु [12]'असंयोगात्' इत्यत्र [13]'विभाषोर्णोः' इत्यस्यानुवृत्तौ कथं व्यपदेशभेदः। उच्यते, उभयत्रविभाषात्वं तावद्व्यपदेशभेदात्। प्राप्तविभाषायां तु यद्यपि न व्यपदेशभेदः, तथाप्यनुवृत्तिरेव नि-

---

[1] पा. सू. १. २. १५.
[2] पूर्वं निर्दिष्टेन वार्तिकेनेत्यर्थः।
[3] पा. सू. १. ३. ३९.
[4] पा. सू. १. ३. ३८.
[5] पा. सू. १. ३. ४३.
[6] पा. सू. १. १. ३२.
[7] तस्य सर्वादिपाठे सत्यपि तयब्ग्रहणस्य तन्मात्रविषयकत्व इत्यन्वयः।
[8] किमित्यनाश्रितः — क.
[9] अयच्यादेशस्य — क.
[10] पक्षद्वयसाधारण्यमाह — क.
[11] पा. सू. १. २. ५.
[12] पा. सू. १. २. ५.
[13] पा. सू. १. २. ३.

ष्प्रमाणिका। स्वदेशस्थेनैव ङित्त्वविधेः संभवात् ततोऽनुवृत्त्यभावं सिद्धवत्कृत्य [1]'अन्यद्धि ङित्त्वम्' इत्युक्तम्। यद्वा, इङुपजीवनार्थप्रदेशान्तरपाठात् तत्र च ङिदित्यनुवृत्तेस्तत्संबद्धं वाक्यम् [2]'असंयोगात्' इत्यत्र संबध्यते इडादिमात्रस्य ङित्त्वनिवृत्तय इत्येवमयं ग्रन्थः समर्थ्यः। यदि तु सिंहावलोकितानुवृत्त्या प्राप्तविभाषात्वसमर्थनं तदा नायं क्लेशः। ऐक्याङ्गीकारे निमित्तमाह — **कार्येति**। सामान्यविशेषभावरहितयोरत्यन्तभिन्नयोर्घटपटादिवद्विशेषणविशेष्यभावानुपपत्तेः कथं गन्धनानुवृत्त्या प्राप्तविभाषात्वशङ्का, अत आह — **यदेति**। गन्धनमङ्गं यस्येति बहुव्रीहिः। 'वलाहकाद्विद्योतते' इत्यत्र निस्सरणाङ्गे विद्योतने विद्युतिवर्तनवद् गन्धनाङ्गे उपयमने [3]उपयमिवर्तनं क्वचित् संभवतीति भावः। तथाहि — यदान्यो वर उपस्थितस्तस्य च दूषणं सदसद्वाभिधायेतरो वर उपायच्छत तदा किं देवदत्त उपायच्छतेति प्रश्ने पूर्वोपस्थितवरस्तत्संबन्धी वा साभ्यसूयं प्रतिवक्ति 'उपायत' इति। अत्र प्रयोगे गन्धनाङ्गोपयमने यमिवर्तनम्, प्रसूच्य व्यूढवानित्यर्थसंप्रत्ययात्॥

[१, ३३६–३३७]

(**लघुविवरणम्**) ननु [4]"विभाषा वृक्षमृग' इत्यत्र प्राप्ते विभाषात्वं [5]"जातिरप्राणिनाम्' इत्यस्यानुवृत्त्या। न च तदनुवर्तयितुं शक्यते, तदुपात्तानां केषांचित् 'अप्राणिनाम्' इत्यनेन विशेषणविशेष्यभावायोगादित्यत आह — **चर्मादीति**। **प्रत्ययान्ता इति**। प्रत्ययोऽन्तोऽवयवो येषामिति बहुव्रीहिः। ततश्च प्रत्ययान्ताः समुदाया नोषादिव्यपदेशभाजः, उषादिव्यपदेशश्च न प्रत्ययान्त इत्यर्थः। भाष्ये [6]'उषविद' इत्यस्याप्राप्ते विभाषात्वं प्रत्ययादित्यस्याननुवृत्तौ [7]'सनाद्यन्ता धातवः' इत्ययं यदा तद्वदतिदेशस्तदा पूर्वविप्रतिषेधे सति। यदा संज्ञासंज्ञिसंबन्धार्थस्तदा पूर्वविप्रतिषेधं विनैवेति द्रष्टव्यम्। उभयत्रविभाषा तु तद्वदतिदेशपक्ष एव परविप्रतिषेधे सतीत्यवगन्तव्यम्। 'धात्वन्तराणि' इति तद्वदतिदेशपक्षेऽयुक्तमित्यत आह — **सनाद्यन्ता इति**। कर्तृस्थभावकानां कर्मापदिष्टा विधयो न चेत् कथं 'जायते' इत्यत्र यगात्मनेपदे [8]'उदाहृते इत्यत आह — **अच इति**॥

[१, ३३६–३३७]

(**विवरणम्**) ननु [9]"विभाषा वृक्षमृग' इत्यस्य प्राप्तविभाषात्वं [10]"जातिरप्राणिनाम्' इत्यस्यानुवृत्त्या। न च तदनुवर्तयितुं शक्यते, तदुपात्तानां केषांचित् 'अप्राणिनाम्' इत्यनेन विशेषणविशेष्यभावासंभवादित्यत आह — **चर्मेति**। प्रत्ययः [11]सनादिरन्तोऽवयवो येषां समुदायानामिति बहुव्रीहिः। ततश्च प्रत्ययान्ता नोषादयः, उषादयश्च समुदायैकदेशा न [12]प्रत्ययान्तसमुदायात्मका इत्यर्थः। [13]'सनाद्यन्ता धातवः' इति संज्ञाविधिरित्यभिप्रेत्य चोदिते न सनाद्यन्तानुद्दिश्य धातुसंज्ञा विधीयते।

---

[1] प्रदीपे 'अन्यन्ङित्त्वम्' इत्यत्र 'अन्यद्धि ङित्त्वम्' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. १. २. ५.
[3] उपयमनवर्तनम् — क.
[4] पा. सू. २. ४. १२.
[5] पा. सू. २. ४. ६.
[6] पा. सू. ३. १. ३८.
[7] पा. सू. ३. १. ३२.
[8] 'उदाहृते' इति नास्ति — ङ, ढ.
[9] पा. सू. २. ४. १२.
[10] पा. सू. २. ४. ६.
[11] सनादिरन्तावयवः — च.
[12] प्रत्ययान्तात्मकसमुदायात्मकाः — ञ.
[13] पा. सू. ३. १. ३२.

किं तु ये धातवस्ते सत्सु सनादिषु सनाद्यवयवकाः, [1]सनादयः स्वप्रकृतिधात्ववयववद् भवन्तीति सूत्रार्थमाश्रित्य परिहरति — **उच्यत इति**। भाष्ये [2]'उषविद' इत्यस्याप्राप्तविभाषात्वं 'प्रत्ययात्' इत्यस्याननुवृत्तौ [3]'सनाद्यन्ता धातवः' इत्ययं यदा तद्वदतिदेशस्तदा पूर्वविप्रतिषेधे सति। यदा संज्ञासंज्ञिसंबन्धार्थस्तदा पूर्वविप्रतिषेधं विनैवेति द्रष्टव्यम्। उभयत्रविभाषा तु तद्वदतिदेश एव परविप्रतिषेधे [4]सतीत्यगन्तव्यम्। ननु तद्वदतिदेशे कथं धात्वन्तराणीत्यत आह — **सनाद्यन्ता इति**। एवं हि यथानिर्देशमेवोद्देश्यविधेयभावो वत्यध्याहाराभावश्चेति भावः। **वाक्यभेदेनेति**। [5]'चिण् भावकर्मणोः' इति धातुमात्रात् परस्य च्लेर्भावकर्मणोश्चिणं विधाय पुनर्भावकर्मणोरित्यनेनैकवाक्यतामापन्नेन [6]'दीपजन' इत्यनेन चिणो विधानाद् वाक्यभेदेन संबन्धोऽभिप्रेतः। भाष्ये **कर्मापदिष्टाः** कर्मवद्भावेन प्राप्यमाणा इत्यर्थः। साधनगतापरिस्पन्दपरिस्पन्दभेदेन भावक्रिययोर्भेदः। ननु दीपादयो यदि कर्तृस्थभावकाः कथं तर्हि तन्मध्यपातिनो जनेः 'जायते स्वयमेव' इति कर्मापदिष्टो यगुदाहृतः [7]'अचः कर्तृयकि' इत्यत्रेत्यत आह — **अच इति**। **ण्यर्थवृत्तित्वात्** लक्षणयेति शेषः। स्वरूपलाभो हि प्रयोजक[8]व्यापारफलं प्रयोज्यलक्षणकर्मणि समवेतमिति कर्मस्थभाव इति भावः॥

[१, ३३६–३३७]

(**उद्द्योतनम्**) ननु जातिसूत्रं [9]'विभाषा वृक्ष' इत्यत्रानुवर्तयितुं न शक्यते, [10]मृगादेरप्राणित्वेन विशेषणासंभवात्, अत आह — **चर्मेति**। **तदा** अनुवृत्तिपक्षे। अत्र वृक्षादौ प्राप्तविभाषैव। मृगादौ गौणमात्रग्रहणे प्राप्तविभाषा, गौणमुख्यग्रहणे उभयत्र, मुख्यमात्रग्रहणेऽप्राप्त इति ज्ञेयम्। वृक्षादावुभयत्रविभाषाया असंभवात्। **कथमिति**। सनादिः **अन्तः** अवयवो येषां समुदायानामिति बहुव्रीहिः। ततश्च प्रत्ययान्तसमुदाया नोषादयः, तदेकदेशोषादयश्च न समुदाया इति नोषादिग्रहणेन समुदायग्रहणं संभवतीत्यर्थः। [11]'सनाद्यन्ताः' इत्यस्य संज्ञाविधायकत्वमभिप्रेत्य चोदितेऽर्थान्तरमाश्रित्य परिहरति — **उच्यत इति**। **सनाद्यवयवाः** इति बहुव्रीहिः। तथापि शङ्कानुद्धारादाह — **धातूनामिति**। अतिदेशादेव धातोरिति विहितं सनाद्यन्तादपि भवतीति भावः। भाष्ये [12]'उषविद' इत्यस्याप्राप्तविभाषात्वं [13]'प्रत्ययात्' इत्यस्याननुवृत्तौ [14]'सनाद्यन्ताः' [15]इत्यस्यातिदेशकत्वपक्षे पूर्वविप्रतिषेधे सति, संज्ञाविधायकत्वपक्षे पूर्वविप्रतिषेधं विनैव। अतिदेशपक्ष एव परविप्रतिषेधे सत्युभयत्रविभाषा, प्रत्ययान्तानां केवलानां च [16]'उषविद' इत्यनेन ग्रहणादिति ज्ञेयम्। नन्वतिदेशपक्षे कथं धात्वन्तरत्वम्, अत आह — **सनाद्यन्ता इति**। एवं हि यथाक्रममुद्देश्य[17]विधेयभावोऽध्याहाराभावश्चेति भावः। **वाक्यभेदेनेति**। धातुमात्राद् भावकर्मणोश्च्लेश्चिणं विधाय [18]'दीपजन'

---

[1] सनादयस्तत्र प्रकृति — ज.
[2] पा. सू. ३. १. ३८.
[3] पा. सू. ३. १. ३२.
[4] सतीत्येवावगन्तव्यम् — च.
[5] पा. सू. ३. १. ६६.
[6] पा. सू. ३. १. ६१
[7] पा. सू. ६. १. १९५.
[8] व्यापारे फलं — ट.
[9] पा. सू. २. ४. १२.
[10] मृगादेः प्राणित्वेन — अ, आ.
[11] पा. सू. ३. १. ३२.
[12] पा. सू. ३. १. ३८.
[13] पा. सू. ३. १. ३५.
[14] पा. सू. ३. १. ३२.
[15] इत्यस्यातिदेशत्वपक्षे — ऋ.
[16] पा. सू. ३. १. ३८.
[17] विधेयभावादध्याहाराभावश्चेति — अ, आ, ऊ, ऋ.
[18] पा. सू. ३. १. ६१.

इत्यनेनैकवाक्यतामापन्नेन [1]'पुनर्विशेषणाद्वाक्यभेद इत्यर्थः। वाक्यभेदे हेतुः — **पृथगिति। परेति।** भावकर्मणोर्नित्यमेव, अन्यत्र [2]विकल्पोऽप्राप्ते। **पूर्वेति।** दीपादेर्भावकर्मणोरन्यत्र च विकल्प इत्यर्थः। **एकेति।** कर्तृस्थ[3]भावकत्वरूपेत्यादिः। नन्वर्थस्याकर्मकत्वं धातोः [4]सोपसर्गत्वेन न गच्छति, अत आह — **अर्थान्तरेति।** उपसर्गवशाद्धातोः सकर्मकार्थान्तरवृत्तित्वं संपद्यत इत्यर्थः। भाष्ये **कर्माऽपदिष्टाः** कर्मवद्भावेन प्राप्यमाणाः। साधनगतोऽपरिस्पन्द[5]लक्षणो धात्वर्थो भावः, सपरिस्पन्दलक्षणश्च [6]क्रियेति भेदः। ननु दीपादीनां कर्तृस्थभावकत्वे तदन्तर्गतस्य जनेः [7]'जायते स्वयमेव' इति कर्मकर्तरि यगुदाहरणं स्वरप्रकरणे भाष्यकारस्य विरुद्धम्, अत आह — **अच इति।** अजन्तानां कर्तृयक्यादिरुदात्तो वा स्यात्। जायते स्वयमेव। जनादीनामुपदेश एवात्वमेतत्स्वरसिद्ध्यर्थमिष्यते। **ण्यर्थवृत्तित्वात्** लक्षणयेत्यादिः। स्वरूपलाभरूपं प्रयोजकव्यापारफलं [8]'प्रयोज्यव्यापारलक्षणं कर्मणि समवेतमिति कर्मस्थभावकत्वमित्यर्थः। भाष्ये **विभाषाग्रे।** [9]'आभीक्ष्ण्ये' इत्यनुवृत्तौ प्राप्ते, अननुवृत्तौ परविप्रतिषेधे उभयत्र, पूर्वविप्रतिषेधेऽप्राप्ते, इति ज्ञेयम्॥

[१, ३३६–३३७]

(रत्नप्रकाशः) **विभाषा वृक्षेति।** मृगपशुशकुन्यश्वबडबग्रहणे संदेहः। **जातिरप्राणिनामिति वेति।** तत् सूत्रं तत्रानुवर्त्य 'अप्राणिजातिवाचिनां वृक्षादीनां द्वन्द्व एकवद्वा' इति व्याख्यानादिति भावः। **अन्यत्र वेति।** [10]'जातिरप्राणिनाम्' इति तत्राननुवर्त्य गौणमुख्यन्यायस्य पुनःप्रसङ्गस्य वाश्रयणादिति भावः। **उभयत्रेति।** गौणमुख्यन्यायपुनःप्रसङ्गयोरनाश्रयणादिति भावः। **उषविदेति।** यदि [11]'सनाद्यन्ता धातवः' इति सूत्रं 'धातवः सनाद्यन्तावयवका भवन्ति, यथा समासाष्टजाद्यन्तावयवकाः' इति व्याख्यायते, तदा [12]'कास्प्रत्ययात्' इत्यतः प्रत्ययादित्यनुवर्त्य 'प्रत्ययान्तेभ्य उषादिभ्य आम् वा' इति व्याख्यानात् प्राप्ते। तत्र प्रत्ययादित्यननुवर्त्य व्याख्याने सकृद्गतौ, उभयत्र। पूर्वविप्रतिषेधे पुनः प्रसङ्गे [13]'सनाद्यन्ताः' इति सूत्रस्य धातुसंज्ञाविधिपरत्वे च, अप्राप्ते। **प्रत्ययान्ता इति।** [14]'सनाद्यन्ताः' इति सूत्रं धातुसंज्ञाविधिपरमेवेति सिद्धान्तयिष्यत इति भावः। **भावकर्मणोरिति।** [15]'चिण् भावकर्मणोः' इत्यत्र [16]'दीपजन' इति सूत्रमनुवर्त्य 'दीपादिभ्यो वा' इति वाक्यभेदेन व्याख्यानात् प्राप्ते। तत्र तदननुवृत्तौ पूर्वविप्रतिषेधे पुनःप्रसङ्गे वोभयत्र। परविप्रतिषेधे सकृद्गतौ, दीपादिसूत्रे 'कर्तरि' इत्यनुवृत्तौ वा अप्राप्ते। **एवमपि संदेह इति।** अन्य इति शेषः। **अकर्मकाश्चेति।** सर्वेषामेव सकर्मकत्वमापाद्य तथापि न दोष इति वक्ष्यतीति बुधेः सकर्मकत्वेऽपि न दोष इति भावः। **सकर्मका भवन्तीति।** अर्थान्तरे वर्तनादिति

---

[1] पुनर्विधानाद् वाक्य — इ, ऊ.
[2] विकल्पाप्राप्ते — अ, आ, इ, उ, ऋ; विकल्पाप्राप्तेः — म.
[3] भावकेत्यादिः — म, आ; भावकत्वेत्यादिः —उ.
[4] सोपसर्गत्वे न गच्छति — म; सोपसर्गत्वेन न भवति — ऋ.
[5] लक्षणश्च धात्वर्थः — ऋ.
[6] क्रियेति भावः — म, ऊ.
[7] महाभाष्यम् ६. १. १९५.
[8] प्रयोज्यलक्षणं — उ, ऊ.
[9] पा. सू. ३. ४. २२.
[10] पा. सू. २. ४. ६.
[11] पा. सू. ३. १. ३२.
[12] पा. सू. ३. १. ३५.
[13] पा. सू. ३. १. ३२.
[14] पा. सू. ३. १. ३२.
[15] पा. सू. ३. १. ६६.
[16] पा. सू. ३. १. ६१.

भावः। **कर्तृस्थभावकाश्चेति**। प्रायोऽभिप्रायेणेदम्। तेन [1]'अचः कर्तृयकि' इति सूत्रगते भाष्ये 'जायते स्वयमेव' इत्यन्तर्भावितण्यर्थस्य जनेः कर्मस्थभावकत्वाश्रयणेऽपि न दोषः। तत्र हि परत्वादेव नित्यश्चिणिति दीपादिसूत्रे जनेरप्यप्राप्तविभाषैव। एतेन [2]'अचः कर्तृयकि' इत्यत्र 'जायते स्वयमेव' इत्युदाहृतम्। तस्य ण्यर्थवृत्तित्वात् कर्मस्थभावकत्वमिति नास्ति तेनास्य विरोधः" इति निरस्तम्। अन्तर्भावितण्यर्थस्य जनेर्दीपादिसूत्रपठितजनेरन्यत्वाभावेन विरोधस्य स्फुटतया प्रतिज्ञामात्रेणाविरोधासिद्धेः। **विभाषाग्र इति**। तत्र [3]'आभीक्ष्ण्ये' इत्यनुवृत्तौ प्राप्ते, तदननुवृत्तौ परविप्रतिषेधे सकृद्गतावुभयत्र, पुनःप्रसङ्गविज्ञानेऽप्राप्ते ॥

[१, ३३६–३३७]

(**नारायणीयम्**) नन्वत्र येऽप्राणिजातिवाचिनो वृक्षादयस्तेषु प्राप्तविभाषात्वनिश्चयान्मृगादिषु प्राणिजाति[4]वाचकेष्वप्राप्तविभाषात्वनिश्चयात् संशयानुपपत्तिरित्याशङ्क्य मृगादिषु संशयमुपपादयति — **चर्मेति**। अप्राणिजातिग्रहणमनुवर्तमानं वृक्षादिभिरव्यभिचारादसंबद्धं मृगादिभिः संबध्यते। न च तैरप्यसंभवादसंबन्धः, तदनुवृत्तिसामर्थ्याद् गौणमृगादिग्रहणादित्यर्थः। निवृत्ते तस्मिन् पूर्वविप्रतिषेधानाश्रयेणैवाप्राप्तविभाषामुपपादयति — **तदिति**। प्रत्ययग्रहणानुवृत्तौ वाक्यार्थं उषादिभ्यः प्रत्ययान्तेभ्य इति चेत् तदयुक्तमिति चोदयति — **कथमिति**। अन्तशब्दस्यावयववचनत्वात् प्रत्ययावयवसमुदायः प्रत्ययान्तः, न तस्योषादिव्यपदेशः। प्रकृतिमात्रस्य न तस्य प्रत्ययान्तत्वमित्यर्थः। [5]**सनाद्यन्तावयवा इति**। सनादयोऽन्ता येषां ते तथोक्ताः। फलितमाह — **धातूनामिति**। अप्राप्तविभाषां पूर्वविप्रतिषेधानाश्रयेण प्रत्ययान्तराणां धात्वन्तरत्वेनोपपादितवान् भाष्यकारः। तत्र प्रागुक्तवाक्यार्थे धात्वन्तरत्वाभावात् धात्वन्तरत्वमुपपादयति — **सनादीति**। प्रागुक्तवाक्यार्थेऽपि प्रत्ययग्रहणनिवृत्त्या पूर्वविप्रतिषेधेन वा अप्राप्तविभाषात्वमेव। भावकर्मग्रहणस्य दीपादिसूत्रेऽनुवृत्तेर्दुःसंपादत्वादाह — **चिणिति**। [6]'चिण् भावकर्मणोः' इत्यत्रास्यानुवृत्तावप्युभयत्रविभाषाशङ्का पूर्वविप्रतिषेधेनास्याम्। तामप्युच्छेत्तुं 'कर्तरीति वर्तते' इत्युक्तं भाष्ये। **एवमपीति**। शुद्धे कर्मणि नित्यचिणोऽवकाशः, शुद्धे कर्तरि विकल्पितस्य। कर्मकर्तरि तूभयप्रसङ्गे पूर्वविप्रतिषेधः परविप्रतिषेधो वेति संदेह इत्यर्थः। न्याय्ये कर्तरीत्येवकारो द्रष्टव्यः, कर्मकर्तरीत्यत्रापिकारः। **नास्तीति**। नित्यचिणः प्राप्त्यभावात्। **सकर्मकस्येति**। [तदानीं सकर्मकस्येति] न बोद्धव्यम्, तदानीमकर्मकस्यैव कर्मवद्भावः, किं तु ततः प्रागवस्थायां सकर्मकस्य तस्यैव कर्मणा तुल्यक्रियकर्तुः संभवादित्यर्थः। **एकेति**। सर्वेषां तत्त्वं वक्तुमित्यर्थः। उपसर्गसंबन्धमात्रेणाकर्मकस्य सकर्मकत्वेऽतिप्रसङ्ग इत्यत आह — **अर्थान्तरेति**। ततश्च यत्र नार्थान्तरोपजनः, न तत्रातिप्रसङ्गः। 'अर्थान्तर' इत्यत्र कर्मसंबन्धयोग्येति द्रष्टव्यम्। एषां सर्वेषां कर्तृस्थभावकत्वे स्थलान्तरोदाहरणविरोधं परिहरति — **अच इति**। **ण्यर्थेति**। न चैतादृशविषये प्रस्तुतसंदेहः, अन्याय्यत्वात्। परविप्रतिषेधस्य संदेहाभावादुभयत्रविभाषां वारयति — **पूर्वेति** ॥

---

[1] पा. सू. ६. १. १९५.
[2] पा. सू. ६. १. १९५.
[3] पा. सू. ३. ४. २२.
[4] वाचकेऽप्राप्त — क.
[5] प्रदीपे 'धातवः सनाद्यवयवाः' इत्यत्र 'धातवः सनाद्यन्तावयवाः' इति पाठोऽभिमत इति भाति।
[6] पा. सू. ३. १. ६६.

[१, ३३७–३४१]

(**लघुविवरणम्**) ननु 'चादिभिर्योगे' इति निवृत्तौ पूर्वविप्रतिषेधेन प्राप्ता एव वामादयो विकल्प्यन्त इति कथमप्राप्ते विभाषेत्यत आह — **प्रतिषेधस्येति** । यङि कथमच्परत्वमित्यत आह– **यङ्लुकीति** । **यदीति** । यच्छब्दयोगे । **दैवेति** । अनार्षयोरित्यस्यानुवृत्त्यादिना तत्रापि संदेह इति भावः ॥

[1]इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वती[2]श्रीचरणविरचिते
भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥

[१, ३३७–३४१]

(**विवरणम्**) नञनुवृत्तिमपेक्ष्य संशयनिर्णयौ वार्तिकभाष्यकारयोरिति सूचयन्नाह — **प्रतिषेधस्येति** । [3]**यङ्लुकीति** । अचीति ग्रो विशेषणमिति मत्वैतदुक्तम् । कस्मिन्नित्यपेक्षायां पूरयति — **प्रतिषेध इति** । कस्य प्रतिषेध [4]इत्यत उक्तम् — **लृडिति** । अनार्षयोरित्यनुवृत्त्यादिना [5]'दैवयज्ञि' इत्यत्रापि संदेहादिः संभवतीत्यभिप्रेत्याह — **दैवेति** ॥

इति [6]श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्रसरस्वतीश्रीचरणविरचिते
महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥

[१, ३३७–३४१]

(**उद्द्योतनम्**) भाष्ये **तृन्नादीनामिति** । [7]"विभाषा तृन्नन्नतीक्ष्णशुचिषु' । नञ उत्तराण्येतानि वान्तोदात्तानि, 'अकर्ता' इत्यादि । ननु [8]"आक्रोशे' इत्यत्र अच्कावित्यनुवर्तते, तथा च तृन्नादिषु न [9]संशयत्रयसंभवः, अत आह — **यदीति** । आक्रोशे गम्यमाने नञ उत्तरमच्कान्तमन्तोदात्तम् । अपचः, अक्षिपः । शक्तोऽपि यः [10]पाकादि न करोति स निन्द्यते । आक्रोश इत्यननुवृत्तौ परविप्रतिषेधे उभयत्र, पूर्वविप्रतिषेधेऽप्राप्ते, इति ज्ञेयम् । ननु पूरयितव्यस्य संज्ञाया अभावात् संशयायोगः, अत आह — **पूरयितव्यस्येति** । अत्राप्यननुवृत्तौ परविप्रतिषेधे उभयत्र, पूर्वविप्रतिषेधेऽप्राप्ते । [11]नञोऽनुवृत्तिमपेक्ष्य भाष्यवार्तिकयोः संशयनिर्णयाविति सूचयन्नाह — **प्रतिषेधस्येति** । नन्वचि परतो ग्रो लत्वं विधीयते, 'यङि' इत्यनुवृत्तौ कथमच्परत्वम्, अत आह — **यङ्लुकीति** ।

---

[1] इति महाभाष्यप्रदीपविवरणे प्रथमस्य प्रथमे पादे — ण.

[2] श्रीचरणैर्विरचिते — ढ.

[3] यङ्लुकीति चेति — छ; यङ्लुकि चेति — अ, ट.

[4] इत्यत आह — ट.

[5] पा. सू. ४. १. ८१.

[6] 'श्रीमत्परमहंसपरिव्राजकाचार्य' इति नास्ति — अ; 'श्रीमत्परमहंस' इत्यादि 'विरचिते' इत्यन्तं नास्ति — ट.

[7] पा. सू. ६. २. १६१.

[8] पा. सू. ६. २. १५८.

[9] संशयसंभवः — ऋ.

[10] पाकादीन् न करोति — म, आ, उ.

[11] नञोऽननुवृत्तिमनपेक्ष्य — म.

प्रत्ययलक्षणेन [1]यङ्परत्वमपि संभवतीति भावः। भाष्ये **यङीति निवृत्तमिति**। पूर्वविप्रतिषेधश्चेत्यर्थः। प्राप्तविभाषात्वे सर्वत्र [2]साधारणहेतुमाह — **प्रकृतेति**। व्यक्तवाग्विषयादन्यत्रोदाहरति — **विप्रवदन्तीति**। विवक्षाभेदेनाप्राप्तविभाषापि संभवतीत्याह — **कर्त्रभिप्राय इति**। [3]हृक्रोर्गत्याद्यर्थत्वमाह — **तत्रेति**। कस्मिन् प्राप्त इत्यपेक्षायामाह — **प्रतिषेध इति**। कस्य प्रतिषेधः, अत आह — **लृट् त्विति**। [4]'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' इत्यतः 'गोत्रे' इत्यस्यानुवृत्त्यननुवृत्तिभ्यां संशयत्रयसंभवादाह — **दैवेति**। [5]'दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम्' इत्यत्रेत्यर्थः। 'गोत्रे' इति निवृत्तं परविप्रतिषेधश्च। तथा च गोत्रे प्राप्ते, अनन्तरेऽप्राप्ते, इत्युभयत्रविभाषेत्यर्थः। आदिना [6]'फक्फिञोरन्यतरस्याम्' इत्यादिग्रहः। तत्रापि [7]'यूनि' इत्यस्यानुवृत्त्यननुवृत्तिभ्यां संशयसंभवात्। यूनीत्यनुवर्तते, प्राप्तविभाषेति निर्णयः॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजि-
कुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ
महाभाष्यप्रदीपोद्द्योतने प्रथमस्याध्यायस्य
प्रथमे पादे षष्ठमाह्निकम्॥

[१, ३३७–३४१]

(**रत्नप्रकाशः**) **तृन्नादीनामिति**। [8]'किभाषा तृन्नन्नतीक्ष्णशुचिषु' इति सूत्रस्थानाम्। **आक्रोश इति वेति**। [9]'विभाषा तृन्नन्न' इत्यत्र [10]'आक्रोशे च' इत्यतः 'आक्रोशे' इत्यनुवर्त्य 'नञ उत्तरपदं तृन्नन्ताद्यन्तोदात्तम्' इति व्याख्यानादिति भावः। **अन्यत्रेति**। तत्र 'आक्रोशे' इति नानुवर्तते, पुनःप्रसङ्ग आश्रीयते। फलतोऽप्राप्तविभाषेति भावः। **उभयत्रेति**। सकृद्गतिन्यायाश्रयणादिति भावः। **आक्रोश इति निवृत्तमिति**। अस्वरितत्वादिति भावः। एतेन "[11]'आक्रोशे च' इत्यत्र यद्यच्कौ नानुवर्तेते ततोऽयं संशयः" इति निरस्तम्। तत्राच्कयोरननुवृत्तिं निश्चित्य 'आक्रोशे'-शब्दानुवृत्त्यननुवृत्तिभ्यामेव संशयस्य भाष्यकृतोपपादितत्वेन तद्विरोधेन तत्राच्कयोरननुवृत्त्यनुवृत्तिभ्यां तदुपपादनायोगात्। एतेन तत्राच्कयोरनुवृत्तिमाश्रयन्तो वृत्तिकृत्प्रमुखा अपि निरस्ताः। **एकहलादाविति**। [12]'संज्ञायाम्' इत्यस्या[न]नुवृत्तौ सकृद्गतिन्याये उभयत्र। पुनःप्रसङ्गेऽप्राप्ते। तेन 'उदपानम्' इत्यत्र [13]'उदकस्योदः संज्ञायाम्' इति नित्यमेवोदादेशः। **पदान्तस्यान्यतरस्यामिति**। [14]'श्वादेरिञि' इति संपूर्णसूत्रानुवृत्तौ प्राप्ते। 'श्वादेः' इति पदमात्रानुवृत्तौ सकृद्गतावुभयत्र। पुनःप्रसङ्गेऽप्राप्ते। **चादिभिर्योग इति वेति**। तत्र [15]'न चवाहाहैवयुक्ते' [16]'पश्यार्थैश्चानालोचने' इति सूत्रद्वयमनुवर्त्य 'चादिभिर्योगे विद्यमानपूर्वात् प्रथमान्तात् परयोर्युष्मदस्मदोर्वाम्नावादयो वा न

---

[1] यङ्परत्वमपीति भावः — उ, ऋ.
[2] साधारणप्राप्तिमाह — म.
[3] हृक्रोर्गत्याद्यर्थमाह — अ, आ, इ, ऊ. ऋ.
[4] पा. सू. ४. १. ७८.
[5] पा. सू. ४. १. ८१.
[6] पा. सू. ४. १. ९१.
[7] पा. सू. ४. १. ९०.
[8] पा. सू. ६. २. १६१.
[9] पा. सू. ६. २. १६१.
[10] पा. सू. ६. २. १५८.
[11] पा. सू. ६. २. १५८.
[12] पा. सू. ६. ३. ५७.
[13] पा. सू. ६. ३. ५७.
[14] पा. सू. ७. ३. ८.
[15] पा. सू. ८. १. २४.
[16] पा. सू. ८. १. २५.

स्युः' इति व्याख्यान इति भावः। **अन्यत्र वेति**। तत् सूत्रद्वयं नानुवर्तते, नञ्मात्रमनुवर्तते। चादियोगे पुनःप्रसङ्गविज्ञानादन्यत्रैव स निषेधः फलतीति भावः। **उभयत्रेति**। सकृद्गतिन्यायादिति भावः। **अचि विभाषेति**। यद्यत्र [1]'ग्रो यङि' इति सर्वमनुवर्तते, अचा यङ् विशेष्यते, यङन्तो लोपश्च स्थानिवद्रूपं लभत इत्याश्रीयते, तदा प्राप्ते। यदि 'यङि' इति नानुवर्तते, योगे च योगोऽसिद्धः, तदा 'जेगिलिता' इत्यादौ [2]'अचि विभाषा' इत्यस्यासिद्धत्वाद्वा प्रकरणे प्रकरणासिद्धौ पुनःप्रसङ्गविज्ञानाद्वा [3]'ग्रो यङि' इत्यस्य प्रवर्तनात् 'गिलति' इत्यादावेव [4]'अचि विभाषा' फलतीत्यप्राप्ते। यदि प्रकरणे प्रकरणमसिद्धं सकृद्गतिश्च, तदोभयत्र। **प्राप्ते चेति**। प्रकृतानुवर्तनादिति भावः। **अन्यत्र वेति**। यदि [5]'व्यक्तवाचाम्' इति नानुवर्तते, पुनः प्रसङ्गश्च तदेति भावः। **उभयत्रेति**। सकृद्गत्याश्रयणादिति भावः। **विभाषोपपदेनेति**। यद्यत्र [6]'स्वरितञितः' इत्यादिपञ्चसूत्र्यनुवर्तते, तदा प्राप्ते। यदि नानुवर्तते, तदा पुनःप्रसङ्गविज्ञानाश्रयणादप्राप्ते। सकृद्गत्याश्रयणे उभयत्र। **स्वरितञित इतीति**। इतिशब्दः प्रभृत्यर्थः। तेन [7]'णिचश्च' [8]'इत्यादिचतुस्सूत्र्याः संग्रहः। **हृक्रोरन्यतरस्यामिति**। यद्यत्र गत्यादिसूत्रमनुवर्तते, तदा गत्याद्यर्थयोरेवानयोरणौ कर्ता कर्म वेति व्याख्यानात् प्राप्ते। तदननुवृत्तौ पुनःप्रसङ्गेऽप्राप्ते। सकृद्गतावुभयत्र। **अभ्यवहारयतीति**। हरतिरत्र भक्षणार्थः। **विकारयतीति**। करोतिरत्राकर्मकः। **हरतीति**। दूरीकरोतीत्यर्थः। **करोतीति**। उत्पादयतीत्यर्थः। **यदीति वेति**। [9]'न यदि' इत्यनुवर्त्य व्याख्यानादिति भावः। तदननुवृत्तौ पक्षद्वयमन्यत्। **घुषिरविशब्दन इति वेति**। [10]'विभाषा संघुषास्वनाम्' इत्यत्र 'अविशब्दने' इत्यनुवर्तते। तेन संघुषेर्विशेषणादिति भावः। **मनसीति वेति**। तत्रैव च [11]'स्वान्त' इति सूत्रात् 'मनसि' इत्यनुवर्त्य तेनास्वनेर्विशेषणादिति भावः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्र-
सरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम्॥

[१, ३३७–३४१]

(**नारायणीयम्**) ननु तृन्नादिसूत्रे आक्रोशग्रहणानुवृत्तावपि प्राप्तविभाषात्वं न संभाव्यते, पूर्वसूत्रेऽच्कग्रहणानुवर्तनात्, अत आह — **आक्रोश इति**। ननु पूरयितव्य उत्तरपदे संज्ञायामुदभावविकल्पे [12]प्राप्तविभाषात्वम्, स एव तु विषयो न भवतीत्यत आह — **पूरयितव्यस्य चेति**। [13]**संज्ञो-**

---

[1] पा. सू. ८. २. २०.
[2] पा. सू. ८. २. २१.
[3] पा. सू. ८. २. २०.
[4] पा. सू. ८. २. २१.
[5] पा. सू. १. ३. ४८.
[6] पा. सू. १. ३. ७२.
[7] पा. सू. १. ३. ७४.
[8] अत्रादिशब्दस्य प्रकारार्थत्वात् 'अपाद्वदः' इति पूर्वसूत्रस्यापि ग्रहणं बोध्यम्। एतन्मते 'णिचश्च' इत्यस्य 'अपाद्वदः' इत्यतः प्राक्पाठो वा।
[9] पा. सू. ३. २. ११३.
[10] पा. सू. ७. २. २८.
[11] पा. सू. ७. २. १८.
[12] प्राप्ते विभाषात्वं — क.
[13] प्रदीपे 'संज्ञोदपानमिति' इत्यत्र 'संज्ञोपादानमिति' इति पाठोऽभिसंहित इति भाति।

पादानं संज्ञाशब्देनाभिधानम् । निषेधानुवृत्त्येत्थमभिधानमित्याह — **प्रतिषेधस्येति** । यङ्नुवृत्तौ किमचा यङ विशेष्यते उताचि यङि चानन्तरे लत्वविकल्पः । नाद्यः, असंभवात् । तत एव नान्त्योऽपि । न हि यङानन्तर्यकाल एवाजानन्तर्यसंभव इत्याशङ्क्यान्तिमं संभावयति — **यङिति** । मन्दाननुगृह्णाति — **प्रकृतेति** । **विप्रवदन्तीति** । विरुद्धं प्रलपन्तीत्यर्थः । स्वरितञिद्ग्रहणानुवृत्तावपि केचिदप्राप्तविभाषात्वमाचक्षते । भाष्यकारस्त्वित्थं स्वरितञित्सूत्रस्यार्थमाश्रित्य प्राप्तविभाषात्वमाहेत्याह — **कात्रेति** । [1]'गतिबुद्धि' इति प्राप्तिं प्रकटयति — **तत्रेति** । [लृटः] प्राप्तिरिति न मन्तव्यमित्याह — **प्रतिषेध इति** । तत्र हेतुः — **लृडिति** । किमेतत् परिगणनमाहोस्विदुदाहरणप्रदर्शनमित्यपेक्षायामाह — **दैवेति** ॥

इति श्रीमहोपाध्यायधर्मराजयज्वशिष्यशास्त्रिनारायणकृतौ कैयटटीकायां
प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥

---

[1] पा. सू. १. ४. ५२.

प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम्

इग्यणः संप्रसारणम्. १. १. ४५.

[१, ३४२ –३४३]

(**लघुविवरणम्**) **लिङ्गेति**। प्रथमानिर्देशो वाक्यार्थस्य संप्रसारणसंज्ञायां [1]लिङ्गम्, इतरविभक्तिनिर्देशो वर्णस्य संप्रसारणसंज्ञायामिति द्रष्टव्यम्। तथा सत्युभयोः संज्ञा भवत्वित्यत आह — **युगपदिति**। ननु वाक्यस्य संप्रसारणसंज्ञा प्रयोजनाभावादनुपपन्नेत्यत आह — **वाक्यशब्देनेति**। **अध्याहारादिति**। पूर्वसूत्रादितिकरणानुवर्तनाच्चेति द्रष्टव्यम्। **यण इति**। [2]'षष्ठी स्थानेयोगा' इत्यत्रास्यानुवर्तनात् स्थान इति लभ्यत इत्यवगन्तव्यम्। 'वर्णविधिः' इति हेतुगर्भमिदं विशेषणमित्यभिप्रेत्याह — **वर्णाश्रय इति**। निर्देशानुपपत्तौ हेतुः — **वाक्यार्थेनेति**। कार्यासंभवे हेतुः — **तस्य चेति**। यत् कथमपि न लभ्यते तत्र दुर्लभत्ववाचोयुक्तिरयुक्तेत्यत आह — **कार्यपक्ष इति**। **शास्त्रेति**। तत्र चेतरेतराश्रयदोष इति भावः। **परिहारान्तरेति**। भाविसंज्ञाविज्ञानेनास्मिन् पक्षे समर्थिते वाक्यभेदेनोभयसंज्ञाविधानमयुक्तं स्यादित्यर्थः। एकस्या एव संज्ञाया विधानात् कर्मधारयानुपपत्तिमाशङ्क्याह — **उभयोरिति**॥

[१, ३४२–३४३]

(**विवरणम्**) [**लिङ्गेति**] प्रथमानिर्देशो वाक्यार्थसंज्ञाया लिङ्गम्, इतरविभक्तिनिर्देशो वर्णसंज्ञायाः, तयोर्दर्शनादित्यर्थः। ननु वाक्यस्य संप्रसारणसंज्ञायां, विधिप्रदेशे [3]स एवादेशः स्यादित्यत आह — **वाक्येति**। ननु चेग् यण्स्थानिकत्वेनोपलक्षितो वाक्यार्थ एवेति को वर्णपक्षादस्य भेद इत्यत आह — **भवतीति**। इतिकरणश्च पूर्वसूत्रादनुवर्तत इत्यपि द्रष्टव्यम्। **तत्प्रतिपादितं** संज्ञया बोधितमित्यर्थः। संज्ञिन एव बोधितस्योपादानं तस्यार्थसमर्पकत्वासंभवाद्वार्थस्य समर्पितस्यानुपयोगाद्वा, [4]न चोभयमप्यत्रास्तीत्यभिप्रायः। **यणः स्थान इति**। [5]विध्यङ्गभूतपरिभाषाप्रवृत्त्यभावेऽपि [6]'षष्ठी स्थानेयोगा' इत्यत्र 'इग्यणः' इत्यस्यानुवृत्त्या स्थान इत्यस्य लाभ इति भावः। विधिशब्दः कर्मसाधनः, वर्णस्येति च संबन्धसामान्ये षष्ठ्याः समास इत्यभिप्रेत्याह — **वर्णाश्रय इति**। भाष्योक्तनिर्देशानुपपत्तौ हेतुमाह — **वाक्येति**। कार्यासंभवे हेतुः — **तस्य चेति**। **नित्येति**। अनेन 'अथापि कथंचित्' इत्यपि भाष्यं व्याख्यातम्। **लोक इति**। न च 'उप्तम्' इत्यादावप्यर्थावगमाद् यण्स्थानिकत्वमिको निश्चेतुं शक्यम्, समानार्थानां शब्दान्तराणां संभवात्, इक्स्थानिकत्वस्य यणः 'वपति' इत्यादौ वक्तुं शक्यत्वेन वैपरीत्यस्यापि [7]शास्त्रमपर्यालोचयतः संभवाच्छास्त्रैक-

---

[1] संज्ञाया लिङ्गम् — ड.
[2] पा. सू. १. १. ४९.
[3] 'तदेव' इत्युचितं भाति।
[4] न चोभयमत्रास्तीति — अ.
[5] अनूद्यमानेऽत्रेत्यादिः।
[6] पा. सू. १. १. ४९.
[7] शास्त्रं पर्यालोचयतः — च, छ, अ.

समधिगम्यं यण्स्थानिकत्वमिकः, तत्र चेतरेतराश्रयत्वमिति भावः। **भावीति**। भाविसंज्ञाविज्ञानेन वर्णसंप्रसारणसंज्ञापक्षे समर्थिते पश्चाद्वाक्यभेदेनोभयसंज्ञाभिधानस्यायोगादिति भावः। न भावप्रत्ययान्तेनोभयशब्दस्य समासः, येन साक्षाद्धर्मिणः संप्रसारणशब्दस्यैकत्वेनोभयोः संज्ञात्वमित्यनुपपन्नं स्यात्। संज्ञिनोश्चोभयत्वेऽपि संज्ञात्वस्यातद्धर्मत्वेन संबन्धाभावात् षष्ठीसमासानुपपत्तिः स्यात्। किं तु षष्ठीसमासोत्तरकालं भावप्रत्यय इत्याह — **उभयोरिति**। एकशेषश्च प्रतिपदम्, छान्दसं चैकवचनमिति भावः॥

[१, ३४२–३४३]

(**उद्द्योतनम्**) **लिङ्गेति**। प्रदेशेषु [1]'ष्यङः संप्रसारणम्' इत्यादिप्रथमानिर्देशो वाक्यार्थसंज्ञायां लिङ्गम्। [2]'संप्रसारणाच्च' [3]'संप्रसारणस्य' इत्यादि[4]विभक्त्यन्तरनिर्देशो वर्णस्य संज्ञायाम्। एतदनुपदमेव भाष्ये [5]वक्ष्यति। तर्ह्युभयमस्तु, अत आह — **युगपदिति**। तर्ह्यन्यतरस्यैवास्तु, अत आह — **एकतरेति**। ननु [6]वाक्यस्य संज्ञायां [7]'ष्यङः संप्रसारणम्' इत्यादौ वाक्यमेवादेशः स्यात्, अत आह — **वाक्यशब्देनेति**। ननु [8]'यण्स्थानिकत्वेन विशेषितो वर्णोऽपि[9] वाक्यार्थ एवेति वर्णपक्षादस्य को भेदः, अत आह — **भवतीति**। इतिकरणश्च पूर्वसूत्रादनुवर्तनीय इत्याशयः। **तत्प्रतिपादितं** संज्ञया बोधितम्। **स्वार्थमिति**। तदर्थमेव वाक्यसंज्ञाकरणादिति भावः। [10]'वाक्यमात्रग्रहणं तस्यार्थसमर्पकत्वाभावाद्वा तत्समर्पितार्थस्यानुपयोगाद्वा, तदुभयमप्यत्र नास्तीति भावः' [11]इत्याहुः। **यणः स्थान इति**। यद्यपि विध्यङ्गपरिभाषानुवादे नोपतिष्ठते, तथापि [12]'षष्ठी स्थाने' इत्यत्रैतत्सूत्रानुवृत्त्या तल्लाभ इति भावः। विधिशब्दः कर्मसाधनः, संबन्धसामान्ये षष्ठीसमास इत्यभिप्रेत्याह — **वर्णाश्रय इति**। भाष्योक्तनिर्देशानुपपत्तौ हेतुः — **वाक्येति**। कार्यासंभवे हेतुः — **तस्य चेति**। भवतिक्रियाया वाक्यार्थत्वादसत्त्वभूतत्वम्। **कार्येति**। संज्ञया तद् भाव्यते, विद्यमानस्य च [13]संज्ञेति तद्दुर्लभत्वम्। 'अथापि' इत्यस्य तात्पर्यमाह — **नित्येति**। **शास्त्रेति**। तथा चेतरेतराश्रयत्वमिति भावः। **परिहारान्तरेति**। वाक्यभेदेनोभयसंज्ञारूपेत्यादिः। **अत्रेति**। तेन वर्णसंज्ञापक्षे समर्थिते पश्चाद्वाक्यभेदेनोभयसंज्ञापक्षानुत्थानादिति भावः। उभयशब्दस्य संज्ञापरत्वं न संभवति, संप्रसारणमिति संज्ञाया एकत्वात्। नापि संज्ञिपरत्वम्, तस्य संज्ञात्वाभावेन त्वप्रत्ययान्तेन षष्ठीसमासानुपपत्तेः, अत आह — **उभयोरिति**। समासानन्तरं त्वप्रत्यय [14]इत्यर्थः। प्रतिपदमेकशेषः, छान्दसं चैकवचनमिति भावः॥

[१, ३४२–३४३]

(**रत्नप्रकाशः**) **एतद्वाक्यमिति**। [15]'पदसमूहो वाक्यम्' इति नैयायिकरीत्यैतद् बोध्यम्। वैया-

---

[1] पा. सू. ६. १. १३.
[2] पा. सू. ६. १. १०३.
[3] पा. सू. ६. ३. १३९.
[4] विभक्त्यन्तनिर्देशः — अ, म.
[5] वक्ष्यते — इ.
[6] वाक्यसंज्ञायां — म, आ, इ, उ, ऊ, ॠ.
[7] पा. सू. ६. १. १३.
[8] यणःस्थानिकत्वेन — म.
[9] अपिशब्दो नास्ति — म, आ, ऊ, ॠ.
[10] वाक्यस्यात्र ग्रहणं — म, आ.
[11] विवरणकारा इत्यर्थः॥ इत्यप्याहुः — इ, ऊ.
[12] पा. सू. १. १. ४९.
[13] संज्ञेति दुर्लभत्वम् — म, इ, उ, ॠ.
[14] इति भावः — म, आ.
[15] तर्कसंग्रहे शब्दपरिच्छेदे.

करणमते हि तिङन्तघटितमेव वाक्यं भवति। **संप्रसारणसंज्ञमिति**। तथा च [1]'ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे' इत्यादौ संप्रसारणशब्दप्रत्यायितयोर्यणिक्पदयोरजादिप्रत्याहारोपस्थापिताकारादीनामिव स्वार्थप्रत्यायकत्वाभ्युपगमात् 'ष्यङन्तस्य यणः स्थाने इग् भवति' इत्यादिरर्थः सिध्यतीति भावः। ननु [2]'ल्वादिभ्यः' इत्यादिनिर्देशेन [3]'दीर्घाज्जसि च' इति निषेधेन च लिङ्गेन प्रत्याहारप्रत्यायिताकारादीनां प्रत्यायकत्वं युज्यते, संप्रसारणशब्दप्रत्यायितयोः प्रत्यायकत्वे किं बीजमिति चेत् [4]'ल्वादिभ्यः' इत्यादि[5]निर्देशादिकमेव क्वचिदिष्टस्थले शब्दप्रत्यायितशब्दस्य प्रत्यायकत्वं भवतीति सामान्यापेक्षं लिङ्गमित्यवेहि। विशेषापेक्षं लिङ्गं तु [6]'ऋत्विग्दधृक्' [7]'विचतिवृश्चतिपृच्छतिभृज्जतीनाम्' इति निर्देशः। एतेन "वाक्यशब्देन वाक्यार्थ उच्यते। 'इग्यणः' इत्यत्र च [8]'भवतिक्रियाध्याहारात् 'इग्यणो भवति' इति योऽयं वाक्यार्थस्तस्येयं संज्ञेत्यर्थः" इति निरस्तम्। 'इग्यण इत्येतद्वाक्यम्' इति भाष्यस्वरसेन, उत्तरत्र सर्वेषां वाक्यशब्दानां स्वरसेन चाध्याहारलक्षणे विना 'इग्यणः' इति पदद्वयसंज्ञापरतयैव मदुक्तप्रकारेण व्याख्यानस्यौचित्यात्। एतदस्वरसेनैव तेनापि वाक्यस्यैव संज्ञाभ्युपगमाच्च। **वर्णविधिरिति**। वर्णसंप्रसारणसंज्ञाश्रयो विधिरित्यर्थः। एतेन 'वर्णाश्रयो विधिर्दीर्घादिरित्यर्थः' इति निरस्तम्। रामाभ्यामित्यादौ वर्णाश्रयदीर्घादेर्निराबाधत्वात्। **एष निर्देश इति**। [9]'संप्रसारणात्' इति [10]'संप्रसारणस्य' इति च। **कार्ययोरिति**। पूर्वरूपदीर्घयोः संभवोऽस्ति। [11]तथा च [12]'उदीचामातः स्थाने यकपूर्वायाः' इति सूत्रे स्थानेग्रहणेनानुवाद्यविशेषणसमर्पकात् परस्याः षष्ठ्याः स्थानार्थकता नेति ज्ञापनात् 'यणः समीपादिकः' इत्याद्यर्थबोध एव स्यादित्यभिमतविषये पूर्वरूपदीर्घौ न स्त इति भावः। एतेन 'वाक्यार्थेन पौर्वापर्याभावात् तस्य चासत्त्वभूतस्य [13]'स्थानित्वाभावादित्यर्थः' इति निरस्तम्। वाक्यार्थस्य संज्ञेति पक्षस्य स्वयमप्यस्वरसग्रस्ततासूचनात्। वाक्यार्थसंज्ञेति पक्षेऽध्याहृतभवतेर्विधीयमानसंप्रसारणसंज्ञायामेवान्वयस्योचितत्वेन द्वितीयभवतिशब्दाध्याहारे मानाभावेन [14]'उदीचाम्' इति सूत्रगतस्थानग्रहणस्यानर्थक्यं ज्ञापकसिद्धस्यासार्वत्रिकतां चाश्रित्य 'यणः स्थान इक् इत्यर्थः संप्रसारणसंज्ञो भवति' इति व्याख्येयतया तस्यार्थस्य [15]'संप्रसारणात्' [16]'संप्रसारणस्य' इत्यत्रोपस्थित्येष्टसिद्धौ प्रकृतव्याख्येयभाष्यस्यासंगतत्वापत्तेः। असत्त्वभूततोक्तेः स्वाज्ञानमात्रमूलकत्वाच्च। **निर्वृत्तिरिति**। विधिरित्यर्थः। **स एव हीति**। यण्स्थानिक इत्यर्थः। **दुर्लभ इति**। विधिप्रवृत्तेः पूर्वमिति शेषः। एतेन 'कार्यपक्षे न लभ्यते, नित्यपक्षे तु लभ्यत इति दुर्लभत्वमुक्तम्' इति निरस्तम्। तथात्वे 'कार्यपक्ष इति शेषः' इत्येतावत एव वक्तुमुचितत्वात्। नित्यपक्षेऽपि 'इष्टम्, उप्तम्' इत्यादिप्रयोगगतस्येको यण्स्थानिकत्वे मानाभावात्। नित्यत्वेन परिहारासंभवस्यानुपदमेव भगवता वक्ष्य-

---

[1] पा. सू. ६. १. १३.
[2] पा. सू. ८. २. ४४.
[3] पा. सू. ६. १. १०५.
[4] पा. सू. ८. २. ४४.
[5] आदिशब्देन दीर्घाज्जसि चेति निषेधस्य ग्रहणम्।
[6] पा. सू. ३. २. ५९.
[7] पा. सू. ६. १. १६.
[8] अर्थानुवादोऽयम्।
[9] पा. सू. ६. १. १०८.
[10] पा. सू. ६. ३. १३९.
[11] तथापि — ब.
[12] पा. सू. ७. ३. ४६.
[13] प्रदीपे 'स्थानित्वासंभवादित्यर्थः' इत्यत्र 'स्थानित्वाभावादित्यर्थः' इति रत्नप्रकाशकृत्पाठ इति भाति।
[14] पा. सू. ७. ३. ४६.
[15] पा. सू. ६. १. १०८.
[16] पा. सू. ६. ३. १३९.

माणत्वाच्च। **कथंचिल्लभ्येतेति**। अभ्युपगममात्रमेतत्, न हि कथंचित् स लभ्यते। **केनासाविति**। **असौ** यण्स्थानिक इक् ष्यङन्ताद्यवयवस्य [1]यणः स्थाने **केन** प्रमाणेन स्यादिति भावः। [2]**अनेनैवेति**। [3]"ष्यङः संप्रसारणम्' इत्यादिविधिवाक्येनैवेत्यर्थः। अनेनैव व्यवस्थाप्यतां नाम, किं तत इत्यत आह— [4]**तदितरेतराश्रयं भवतीति**। **तत्** व्यवस्थापनं व्यवस्थापितस्य संज्ञा चेति द्वयमित्यर्थः। अस्त्वेतरेतराश्रयमपि तत्, किं तत इत्यत आह — **इतरेतराश्रयाणि चेति**। **न प्रकल्पन्त इति**। न निष्पद्यन्त इत्यर्थः। **उभयसंज्ञात्वस्येति**। उभयोर्वर्णवाक्ययोः संज्ञा **उभयसंज्ञा**, तस्या भाव उभयसंज्ञात्वम्, तस्येत्यर्थः। [5]प्रकृतसूत्रस्थसंप्रसारणशब्दगतस्येति शेषः। तथा च ज्ञापकबलात् सूत्रावृत्त्योभयोः संज्ञा क्रियत इति भावः। एतेन 'तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयेणोभयोः संज्ञा सिध्यति' इति निरस्तम्। आवृत्तेः शब्दतन्त्रस्य च स्वल्पान्तरस्य प्रकृते संभवेऽप्यर्थतन्त्रैकशेषयोर्द्वन्द्ववत् सहविवक्षायामेव संभवेन प्रकृते सहविवक्षाया असंभवेनैकशेषनिरुपपदतन्त्रशब्दोपादानस्यायुक्तत्वात्॥

[१, ३४२–३४३]

(नारायणीयम्)

मुनीन्द्रमानसावासा सात्त्विकी मोदमुद्रिता।
स्वान्ते मे नीलमेघाभा मूर्तिः स्तान्मोहहारिणी॥
फणीन्द्रभाषितेर्भावा भान्तु तद्भक्तिभाजने।
मानसे मम मात्सर्यविधुरे धृतमाधवे॥

लिङ्गान्निर्णयसंभवे संदेहः कथमित्यत आह — **पक्षेति**। तर्हि द्वयमपि प्रमाणवत्त्वादाश्रयणीयमित्यत आह — **युगपदिति**। तर्हि निर्दोषोऽन्यतरः पक्ष आश्रयणीयः, तत्राह — **एकतरेति**। [6]पदसमुदायात्मकस्य वाक्यस्य संज्ञायां स एव प्रदेशेष्वादेशः स्यादित्यत आह — **वाक्येति**। पदार्थान्वयलक्षणो वाक्यार्थः, स एवेह कीदृश इत्यपेक्षायामाह — **इगिति**। **इतीति**। अनेन पूर्वसूत्रादितिरनुवर्तत इति दर्शितम्। वाक्यशब्देन मुख्यवाक्यपरिग्रहेऽपि दोषाभावात् तदर्थलक्षणा निष्फलेत्यभिसन्धायाह — **अथवेति**। ननु संज्ञया प्रत्यायितं वाक्यमेवादेशः स्यात्, अत आह — **तदिति**। न हि ष्यङः स्थाने पदसमुदायो दृश्यते लक्ष्य इति तन्मूलस्मृत्या न तस्यान्वाख्यानम्। किं तु तत्प्रतिपाद्यस्यार्थस्येति भावः। वर्णसंज्ञायां किमिकः संज्ञित्वमुत यण इत्यपेक्षायामाह — **यण इति**। [7]"षष्ठी स्थाने' इत्यत्रानुवृत्त्यानुवादेऽपि स्थानसंबन्धो लभ्यः। संबन्धान्तरापेक्षया स्थानसंबन्धस्यान्तरङ्गत्वाद्वा तस्यैव परिग्रहः। विधिशब्दस्य भावसाधनत्वे [8]'वर्णस्य विधानं न सिध्यतीत्युक्तं स्यात्। तत्र वर्णविशेषणानुपयोगः, [9]"ष्यङः संप्रसारणम्' इत्यादौ वर्णविध्युपपत्तेर्वर्णविध्यसिद्धिकीर्तनं चाशोभनमित्यतो व्याचष्टे — **वर्णेति**। निर्देशस्य कानुपपत्तिः, तामाह — **वाक्येति**। अनुपपद्यमानार्थत्वान्निर्देशोऽनुपपन्न इत्युच्यत इत्यर्थः। [10]कार्यासंभवे हेतुमाह — **तस्य चेति**। यद्वा

---

[1] यण्स्थाने — ब.
[2] भाष्ये 'अनेन ह्यसौ' इत्यत्र 'अनेनैव ह्यसौ' इति रत्नप्रकाशकृत्पाठ इति भाति।
[3] पा. सू. ६. १. १३.
[4] भाष्ये 'तदेतदितरेतराश्रयम्' इत्यत्र 'तदितरेतराश्रयम्' इति रत्नप्रकाशकृत्पाठः।
[5] प्रकृतसूत्रस्य संप्रसारण — ब.
[6] उपपद — क.
[7] पा. सू. १. १. ४९.
[8] वर्णस्य दीर्घादेर्न सिध्यतीति — क.
[9] पा. सू. ६. १. १३.
[10] कार्यसंभवे — क.

[१, ३४३–३४६]

(**लघुविवरणम्**) **नन्विति**। न तु ततो जातत्वादिति शेषः। **अन्यत्रेति**। [६]'एको गोत्रे' इत्यत्र। न उपजातो जात्यभिव्यञ्जनसंस्थानविशेषो यस्येति बहुव्रीहिः। व्यज्यतेऽनेनेति व्यञ्जनम्। यद्यपि काकाज्जाते प्राणिनि काकशब्दो मुख्यः, संप्रसारणाज्जाते त्वौपचारिकः संप्रसारणशब्दः, तथापि तस्माज्जातत्वेनावगते तच्छब्दप्रयोगोऽस्तीत्येतावन्मात्रं विवक्षितम्। भाष्ये 'अथवा दृश्यन्ते' इत्यनेनैकदेशवाचिना समुदायः संप्रसारणनिर्वृत्त इत्येवंरूपो लक्ष्यत इत्युक्तम्। अत एव पूर्वत्रार्थलक्षणा, इह तु [७]शब्दस्य लक्षणेति पक्षयोर्भेदः। **प्रतिपादितमिति**। अनुनिष्पादिन्यः संज्ञा अवयवा इति। 'अथवा आहायम्' इत्यनेन नित्यशब्दपक्षे परिहार उक्तः। **तत्फलस्येति**। साधुत्वेन प्रतिपादितस्य। **अदुहितरामिति**। दुहेर्लङुत्तमपुरुषैकवचनमिट् यणो लकारस्य स्थाने निर्वृत्त इति संप्रसारणसंज्ञा प्राप्ता यथासंख्यसंबन्धान्न भवति। यदि हि स्यात् "हलः' इति दीर्घः स्यात्। उकारस्य वकारस्थानिकस्य सत्यपि संप्रसारणत्वे न दोष इत्याह — **दिव इति**। ननु 'अक्षद्यू औ' इति स्थितेऽन्तरङ्गत्वादुवङः पूर्वं [९]'संप्रसारणाच्च' इति पूर्वरूपं स्यात्, ऊठो वकारस्थानिकस्य संप्रसारणत्वादित्यत आह — **अक्षद्युवावित्यत्रेति**। **पश्चादिति**। असमानाङ्गत्वादिति भावः। तत्र समानाङ्गप्रत्याख्यानेऽप्याह — **अथवेति**॥

[१, ३४३–३४६]

(**विवरणम्**) असत्येव काकत्वे तस्माज्जातत्वमात्रेण तत्प्रत्ययतच्छब्दप्रयोगौ भाष्यकृतोऽभिमताविति मन्वानः शङ्कते — **नन्विति**। **अन्यत्रेति**। [१०]'एको गोत्रे' इत्यत्र। न उपजातो **जात्यभिव्यञ्जकः** जातिव्यञ्जकः **संस्थानविशेषः** आकारविशेषो यस्येति बहुव्रीहिः। कथं तर्हि तत्प्रत्ययतच्छब्दप्रयोगावित्यत आह — **निर्ज्ञातमिति**। यद्यपि काकाज्जाते प्राणिनि काकशब्दो मुख्यः, इह [११]तु वर्णे औपचारिकः संप्रसारणशब्दः, तथापि तस्माज्जातत्वेनावगते तच्छब्दप्रयोग उभयत्र समान

---

[१] पूर्वरूपवाक्य इत्यर्थः।
[२] कार्यसंभवस्तु — क.
[३] क्तान्तेन समुदायाश्रयणात् — क.
[४] प्रकृतिशब्दस्य क्तिजन्तत्वादत्र पुँल्लिङ्गप्रयोगो बोध्यः।
[५] उभयशब्दस्य — क.
[६] पा. सू. ४. १. ९३.
[७] शब्दस्य विषये लक्षणेत्यर्थः।
[८] पा. सू. ६. ४. २.
[९] पा. सू. ६. १. १०८.
[१०] पा. सू. ४. १. ९३.
[११] तुशब्दो नास्ति — ञ.

इत्येतावता दृष्टान्तदार्ष्टान्तिकभाव इति द्रष्टव्यम्। योग्या क्रिया दर्शनादिरपीत्यत आह — **प्रकरणेति**। पूर्वस्मिन् परिहारे वर्णस्य लक्षणेत्युक्तम्, अत्र तु[1] पदैकदेशेन पदसमुदायो लक्ष्यते, तेन च तदर्थप्रतिपत्तिरिति भेदः। अथवा [2]पूर्वत्र संप्रसारणशब्देन वर्णे प्रतिपादिते [3]'संप्रसारणात्' इति दिग्योगे पञ्चमी, [4]'संप्रसारणस्य' इति च स्थाने षष्ठी। इह तु संप्रसारणशब्दात् स्वार्थवृत्तेर्हेतुपञ्चमी, संबन्धसामान्ये च षष्ठी। स्वार्थवृत्तिसंप्रसारणशब्दार्थाक्षिप्तस्य च पौर्वापर्यं स्थानित्वं चेति भेदः। **यथा चेति**। समुदाये संज्ञात्वेन विनियुज्यमाने पदात्मका अवयवा अनुनिष्पादिन्यः संज्ञा इति तत्र प्रतिपादितमिति भावः। 'अथवा' इति नित्यपक्षे परिहारान्तरम्, तदुपपादयति — **यथेति**। **तत्फलस्येति**। यणः प्रसङ्गे साधुत्वेन प्रतिपादितस्येक इत्यर्थः। यस्याभिनिर्वृत्तस्य संप्रसारणसंज्ञा भविष्यति स संप्रसारणशब्देन लक्ष्यत इति 'एवं तर्हि' इत्यनेनोक्तम्। न तत् सर्वत्र, किं तु विधिप्रदेश इत्याह — **ष्यङ इति**। **बुद्धीति**। धातुगणं पर्यालोचयतो यण्स्थानिकत्वमिकः सुबोधमिति भावः। ननु दुहेर्लङ्यात्मनेपदोत्तमपुरुषैकवचन इटि यण्स्थानिके संप्रसारणसंज्ञायाम् 'अदुहितराम्' इत्यत्र [5]'हलः' इति दीर्घः स्यादित्यत आह — **यथेति**। ननु तथापि [6]'दिव उत्' इत्युकारस्य [वकारस्थानिकत्वेन] संप्रसारणसंज्ञा स्यादित्यत आह — **दिव इति**। [ननु] इगिति सवर्णग्रहणादूठोऽपि [संप्रसारणसंज्ञायाम् 'अक्षद्यूवौ' इत्यत्र परपूर्वत्वं स्यादित्यत आह — **अक्षेति**।] **पश्चादिति**। संप्रसारणेन सहैकाङ्गवर्तित्वाभावात् परपूर्वत्वे च समानाङ्गग्रहणस्य चोदयिष्यमाणत्वादित्यर्थः। **आङ्गस्य** उवङ इत्यर्थः॥

[१, ३४३–३४६]

(**उद्द्योतनम्**) असत्येव काकत्वे तस्माज्जातत्वमात्रेण तत्प्रत्ययशब्दप्रयोगौ [7]भाष्यकृतोऽभिमताविति [8]मन्वानः शङ्कते — **नन्विति**। **अन्यत्र** [9]'एको गोत्रे' इत्यत्र। अनुपजातो जात्यभिव्यञ्जकः **संस्थानविशेषः** आकृतिविशेषो यस्येति विग्रहः। कथं तर्हि [10]तदानीं तत्प्रत्ययशब्दप्रयोगौ, अत आह — **निर्ज्ञातमिति**। यद्यपि काकापत्ये काकशब्दो मुख्यः, इह तु वर्णे औपचारिकः, तथापि तस्माज्जाते तच्छब्दप्रयोग[11]मात्रसाम्याद् दृष्टान्तदार्ष्टान्तिकता ज्ञेया। योग्यक्रिया दर्शनादिरपि, अतः — **प्रकरणेति**। एवं जलं प्रविश, तर्पणं कुर्वित्यर्थः। पूर्वपरिहारे [12]वर्णे लक्षणेत्युक्तम्, इह पदैकदेशलक्षितेन पदसमुदायेन वर्णप्रतीतिरिति भेदः। यद्वा पूर्वत्र लक्षणा, अत्राक्षेप इति भेदः। **यथेति**। समुदाये संज्ञात्वेन विनियुज्यमाने [13]पदात्मकावयवा अनुनिष्पादिन्यः संज्ञा इति तत्र प्रतिपादितम्। नित्यशब्दपक्षे परिहारान्तरम् — **अथवेति**। तदुपपादयति — **यथेति**। **तत्फलस्य** यणः स्थाने इग् भवतीति वाक्यार्थफलस्य, यणः प्रसङ्गे इक् साधुरिति प्रतिपादितस्येक इत्यर्थः। यस्याभिनिर्वृत्तस्य संप्रसारणसंज्ञा भविष्यति स संप्रसारणशब्देन लक्ष्यत इत्याह — भाष्ये **एवं तर्हीति**। तद् विधिस्थल एव, न सर्वत्रेत्याह — **ष्यङ इति**। शाटकशब्दस्य

---

[1] तुशब्दो नास्ति — अ.
[2] पूर्वं संप्रसारण — अ.
[3] पा. सू. ६. १. १०८.
[4] पा. सू. ६. ३. १३९.
[5] पा. सू. ६. ४. २.
[6] पा. सू. ६. १. १३१.
[7] भाष्यकृतोऽनभिमताविति — अ.
[8] 'मन्वानः' इति नास्ति — अ.
[9] पा. सू. ४. १. ९३.
[10] इदानीं — म.
[11] 'मात्र' इति नास्ति — उ.
[12] वर्णलक्षणेति — अ, आ.
[13] पदात्मिकावयवाः — उ, ऋ; पदात्मिका अवयवाः — म.

लोके तन्तुकार्यविशेषे व्युत्पन्नत्वाद् भाविसंज्ञाविज्ञानं युक्तम्, संप्रसारणशब्दस्य यण्स्थानिकेग्वाचकत्वस्याप्रसिद्धेः[1] कथमत्र भाविसंज्ञाविज्ञानम्, विधिप्रदेशेष्वितरेतराश्रयप्रसङ्गेन संज्ञाया अनिष्पत्तेः, अत आह — भाष्ये **अथवेति**। [2]तदवतारयति — **सिद्धमिति**। **बुद्धीति**। यण्बुद्धिं विहायेग्बुद्धिः कर्तव्या। तथा च धातुपाठपर्यालोचनेन यण्स्थानिकत्वमिकः सुबोधमिति भावः। भाष्ये **यजादीति**। धातुपाठ इत्यादिः। ननु दुहेर्लङ्यात्मनेपदोत्तमपुरुषैकवचन इटि लादेशत्वेन [3]यण्स्थानिके संप्रसारणसंज्ञायाम् 'अदुहितराम्' इत्यत्र [4]"हलः' इति दीर्घः स्यात्, अत आह — **यथेति**। यकारस्थानिकस्यैवेकारस्य संज्ञा, न लकारस्थानिकस्येत्यर्थः। [5]तर्हि 'द्युभ्याम्' इत्यत्र [6]"हलः' इति दीर्घः स्यात्, उकारस्य वकारस्थानिकत्वेन संप्रसारणत्वात्, अत आह — **दिव इति**। नन्विगिति सवर्णग्रहणेनोठोऽपि संप्रसारणत्वात् 'अक्षद्युवौ' इत्यत्र परपूर्वत्वं किं न स्यात्, अत आह — **अक्षेति**। **पश्चादिति**। [7]"अक्षद्यू' इति क्विबन्तस्य निष्पत्तौ प्रातिपदिकसंज्ञायां पश्चादौकारस्य संनिधानादित्यर्थः। संप्रसारणेन सहैकाङ्गवर्तित्वाभावो विवक्षितः, [8]"संप्रसारणात् परपूर्वत्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थम्' इति वक्ष्यमाणत्वादिति भावः। **आङ्गस्य** उवङः॥

(१, ३४३–३४६)

(**रत्नप्रकाशः**) **काकाज्जातः काक इति**। यद्यपि काकत्वजातियोगादेव काकत्वमेकस्यावश्यं ज्ञेयमित्यपरस्यापि तथैव काकत्वं ज्ञातुं शक्यते, तथाप्यनुपजातकाकत्वाभिव्यञ्जकपक्षविशेषं शाबं हस्तेन निदर्श्य 'अयं काकाज्जातः' इत्युक्ते श्रोतुर्यथा 'काकोऽयम्' इति बुद्धिर्जायते तथा यण्स्थानिक इक् परम्परया संप्रसारणशब्दबोधितत्वात् संप्रसारणमिति ज्ञातुं शक्यत इति भावः। **प्रविश पिण्डीमिति**। 'प्रविश गृहम्, पिण्डीं भक्षय' इति वाक्ययोरेकदेशावेतौ ज्ञेयौ। **प्रविश तर्पणमिति**। 'प्रविश नद्याम्' तर्पणं कुरु' इति वाक्ययोरेकदेशावेतौ। तत्रार्थप्रकरणादिना वाक्यार्थस्य ज्ञानं भवति, यथा कपाटमित्युक्ते 'पिधेहि' इति वा 'उद्घाटय' इति वा वाक्यार्थज्ञानं भवतीति भावः। एवं दत्तभामादिपदैकदेशप्रयोगेऽपि पदार्थोपस्थितिर्ज्ञेया। **एतस्य वाक्यस्येति**। समासेऽपि व्यपेक्षालक्षणमेव सामर्थ्यमिति वदतां नैयायिकादीनां मते व्यस्तानेकपदात्मकसमुदायस्येव समस्तानेकपदात्मकसमुदायस्यापि वाक्यत्वमित्याशयेनेदम्। तर्हि वैयाकरणानां मते 'संप्रसारणनिर्वृत्तात्' इति वा 'संप्रसारणनिर्वृत्तस्य' इति वा वाक्यं [न भवतीत्यस्वरसादाह — **अथवेति**।] **तत्र वचनाद् भविष्यतीति**। [9]"संप्रसारणाच्च' [10]"संप्रसारणस्य' इति सूत्रारम्भसामर्थ्याद् यण इत्यनुवाद्यसमर्पकादुत्तरस्या अपि षष्ठचाः स्थानार्थकत्वाश्रयणात् पूर्वरूपदीर्घादिकं भवतीति भावः। एतेन "'यथा ब्राह्मणशतं भोज्यताम्' इत्युक्ते सामर्थ्यात् संख्येया ब्राह्मणा भोज्यन्ते तथेहापि 'संप्रसारणात्' इत्युक्ते वाक्यार्थेन पौर्वापर्यासंभवात् तत्फलस्य वर्णस्य प्रतीतिः" इति निरस्तम्। तदभिमतवाक्यार्थस्य संज्ञा भाष्य-

---

[1] वाचकस्याप्रसिद्धेः — इ, ऋ.
[2] एतदेवावतारयति — म.
[3] यण्स्थानिकत्वेन संप्रसारण — म.
[4] पा. सू. ६. ४. २.
[5] ननु द्युभ्यामित्यत्र — म.
[6] पा. सू. ६. ४. २.
[7] 'अक्षद्यूरिति' इत्येव पाठः 'अ, आ, इ, उ, ऋ, म' कोशेषूपलभ्यते। औचित्यात् 'अक्षद्यू इति' इति शोधितम्।
[8] का. वा. ६. १. १०८–१.
[9] पा. सू. ६. १. १०८.
[10] पा. सू. ६. ३. १३९.

स्वरसलभ्या नेति प्रागेव प्रपञ्चितत्वात्। यण इगिति वाक्यार्थस्य संज्ञायां राजमार्गेणैव वाक्यार्थेन पौर्वापर्यादिसंभवाच्च। लोकसिद्धभाविसंज्ञाविज्ञानेन[1] वर्णसंज्ञापक्षः समर्थित एव वैयाकरणमनोरञ्जकः। अतः कुतर्कवासितान्तःकरणान् नैयायिकादीन् प्रति तद्बुद्धिपरीक्षार्थं प्रौढ्या कथंचिन्नित्यशब्दत्वाश्रयेण स पक्षः समर्थितश्चेदपि न कापि क्षतिरित्याशयेनाह — **अथवेति**। **इजादियजादिप्रवृत्तिरिति**। 'इयाज, इज्यात्, इष्टम्' इत्यादाविजादिप्रवृत्तिः, 'यजति, यजते, यष्टा, यक्ष्यति' इत्यादौ यजादिप्रवृत्तिः। **यणः स्थाने इममिकमिति**। अर्थस्य प्राधान्यात् तदनुरोधेन [2]'उदीचां माङो व्यतिहारे' इत्यत्र मेङ एचः स्थाने आत्वं प्रयुक्तमितिवत् 'इष्टम्' इत्यादौ यजादेर्यणः स्थाने इक् प्रयुक्त इति कल्प्यत इति भावः। **असाध्वभिमतस्येति**। 'यजाद्युपदेशात्' इति व्यवहितस्याप्यनुषङ्गोऽत्र ज्ञेयः। **साधुत्वमवस्थाप्यत इति**। साधुशब्देन साधुत्वस्य कुत्राप्यबोधनाद् बहुभिः प्रकारैश्च सूत्रार्थस्य व्यवस्थापितत्वात् प्रौढिरियं ज्ञेया॥

अत्रेदमवधेयम् — वर्णसंज्ञापक्षे 'यण इक्' इति यथासंख्यविज्ञानात् 'अदुहितराम्' इत्यादाविकारस्य लकारस्थानिकत्वेन यण्स्थानिकत्वेऽपि संप्रसारणसंज्ञा नेति [3]'हलः' इति दीर्घो न भवति। 'द्युभ्याम्' इत्यत्र [4]'च्छवोः' इत्यूठः संप्रसारणत्वेन पूर्वस्य यणि सति पश्चात् तस्य [5]'हलः' इति दीर्घे कृतेऽपि न दोषः, पश्चात् [6]'दिवः' इत्युत्वेनेष्टरूपसिद्धेः। एतेन "[7]'दिव उत्' इत्युत्वे यणादेशे च कृते "हलः' इति दीर्घत्वं तपरकरणान्न भवति 'द्युभ्याम्' इति" इति निरस्तम्। तपरकरणस्य वचनान्तरप्राप्तदीर्घवारकतायाः प्रागेव निरस्तत्वात्। 'द्युपरौ, द्युपानम्' इत्यादौ चरितार्थस्योत्वस्यान्तरङ्गेण वलि लोपेन बाधे प्राप्ते तदपवादस्योठ एवादौ प्रवर्तनीयत्वाच्च। 'द्युकामः' इत्यादौ त्वेकपदाश्रयोत्वापेक्षया द्विपदाश्रयो वलि लोप एव बहिरङ्गश्च। 'अक्षद्युवौ' इत्यत्र तूठः संप्रसारणत्वे यणनन्तरं तस्य [8]'हलः' इति दीर्घे सति तस्य पुनः संप्रसारणसंज्ञाभावात् समानाङ्गत्वाभावादाङ्गस्योवङो बलीयस्त्वाच्चोवङि पूर्वरूपं न भवति॥

[१, ३४३–३४६]

(**नारायणीयम्**) तज्जे तद्व्यवहारः काकव्यवहारवत्, इत्युक्तवन्तं दृष्टान्तमाक्षिपति — **नन्विति**। **अन्यत्रेति**। [10]'एको गोत्रे' इत्यत्र। तत्र हि जातेरेवापत्यप्रत्ययो नेति वक्तव्यमित्युपक्रम्य 'न वक्तव्यम्, काकापत्यस्य [11]काकत्वयोगात् काकपदेनैव व्यवहारादपत्यापत्यवत्संबन्ध[12]विवक्षाया अभावादित्युक्तम्। **अनुपजातेति**। जातिरभिव्यज्यते येन संस्थानविशेषेण तस्यानुपजातत्वाज्जातिपुरस्कारेण न तत्र काकशब्दप्रयोगः, किं तु काकजातत्वपुरस्कारेणेत्यर्थः। अत एव[13] तत्र सिद्धान्तभाष्यम् — येनैव [14]हेतुनैतद्वाक्यं काकापत्यं कुरापत्यमिति तेनैव वृत्तिरपि प्राप्नोतीति। तत्र यथा काकापत्यत्वव्यवहारो जात्यभिव्यञ्जनानुपजननदशायां तथा तज्जत्वनिमित्तः काकव्यव-

---

[1] संज्ञानेन — ब.
[2] पा. सू. ३. ४. १९.
[3] पा. सू. ६. ४. २.
[4] पा. सू. ६. ४. १९.
[5] पा. सू. ६. ४. २.
[6] पा. सू. ६. १. १३१.
[7] पा. सू. ६. १. १३१.
[8] पा. सू ६. ४. २.
[9] पा. सू. ६. ४. २.
[10] पा. सू. ४. १. ९३.
[11] काकत्वायोगात् — क.
[12] विवक्षायामित्युक्तम् — क.
[13] एवं तत्र — क.
[14] महाभाष्यम् ४. १. ९३.

हारः, अभेदोपचारादित्यर्थः। अन्ये तु काकत्वनिमित्ततयैव तत्र तत्प्रयोगस्तज्ज्ञे तद्व्यवहारमात्रे तु दृष्टान्तः, न तूपचार इत्याहुः। कथमत्र वाक्यार्थे तदेकदेशप्रयोगः, तत्राह — **प्रवेशनेति**। श्रुतपदान्वयसंभवे नाध्याहार उचित इत्यत आह — **पिण्ड्यामिति**। [1]विना शब्देन तदर्थानवगतेर्योग्यं निर्दिशति — **गृहेति**। दर्शनस्पर्शनादेरपि कर्मत्वसंभवादाह — **प्रकरणेति**। पूर्वस्मात्। दार्ष्टान्तिकमाह — **एवमिति**। पूर्वं संप्रसारणपदं निर्वृत्तार्थवृत्तीत्युक्तम्। इदानीं तु यथा पिण्ड्यादिपदं भक्षणादिकमाक्षिपति तथा संप्रसारणपदं निर्वृत्तार्थमिति भेद इति भावः। देवदत्तादिशब्दस्य संज्ञात्वेन विनियोगादविनियुक्तस्य दत्तादेः कथं संज्ञिबोधकत्वमिति शङ्कानुनिष्पादिन्यायेन दत्तादेरपि विनियोगाङ्गीकरणेन परिहृतेत्याह — **यथा चेति**। वचनादित्यस्य वचनसामर्थ्यादित्यर्थमभिप्रेत्याह — **तथेति**। सामर्थ्यमाह — **वक्यार्थेनेति**। उपात्तस्य चोदितकार्यान्वयसंभवे तत्संबन्धिनि तत्कार्यप्रतिपत्तौ दृष्टान्तमाह — **यथेति**। ननु किमत्र पक्षे निर्वृत्तस्य लक्षणया प्रतीतिः, उताक्षेपात्। नाद्यः, प्रथमपक्षाभेदात्। नान्त्यः, द्वितीयस्मादभेदात्। अत्राहुः — पूर्वं कार्यदर्शनाश्रयेणोक्तम्, इदानीं नित्यदर्शनाश्रयेणोच्यते। 'तत्फलस्य' इत्यस्य च तत्फलतया साधुत्वेन प्रतिपादितस्येत्यर्थ इति। अन्ये तु नाक्षेपः, न लाक्षणिकम्। किं तु मुख्यस्यैवोपात्तस्य कार्यमन्यद्वारकमवगम्यत इत्याहुः। एतस्मिन् सूत्रे भाविसंज्ञाविज्ञानमिति भ्रमं वारयति — **प्रदेशेष्विति**। अनुवाद[2]प्रदेशव्यवच्छेदायाह — **ष्यङ इति**। अथवेत्यत्र संप्रसारणान्वाख्यानप्रयोजनमुच्यत इति भाति। तदयुक्तम्, तदन्वाख्यानप्रयोजनस्यास्पृष्टत्वात्; तत्राह — **सिद्धं त्विति**। इङमात्रस्य लौकिकत्वाद्यण्स्थानिकत्वस्यालौकिकत्वादितरेतराश्रयशङ्कायां यण्स्थानिकत्वस्यापि लौकिकत्वं कीर्त्यत इत्यर्थः। ननु यण्स्थानिकत्वं कथं लौकिकम्, तत्प्रसङ्गे विधीयमात्वं हि तदित्याशङ्क्य विधीयमानत्वविशेषणमनर्थकम्, तत्प्रसङ्गे प्रयुज्यमानत्वात् [3]तस्यास्त्येव तदित्याह — **बुद्धीति**। विहितयज्युप[4]देशस्येजादिप्रयोगे यण्स्थानिकत्वमिकारेऽवगन्तुं शक्यं शास्त्रमन्तरेणैवेत्यर्थः। मात्रग्रहणेन विधानव्यवच्छेदः। यदि तर्हि यण्स्थानिकत्वमपि लौकिकं शास्त्रभाव्यं किमित्यपेक्षायां साधुत्वज्ञानमित्युक्तम्। तत्र विरुद्धधीविषयत्वं कथमेकस्येत्यत आह — **प्रागिति**। **अदुहितरामिति**। लङुत्तमपुरुषैकवचनमिट्, [तस्य] लकारस्थानितया संप्रसारणसंज्ञा प्राप्ता। यथासंख्यादपि यत्र नानिष्टनिरासः, तत्र कथम्, तस्मात् तद्भावितस्य संज्ञैष्टव्येत्यत आह — **दिव इति**। सत्यामपि संज्ञायां कार्ये नानिष्टमित्यर्थः। अर्धमात्रिकव्यञ्जनस्य मात्रिके सिद्धे तपरत्वं भाविदीर्घव्यवच्छेदार्थम्। ऊठस्तर्हि संज्ञा स्यात्, अत आह — **अक्षेति**। **पश्चादिति**। ऊठ उत्तरकालमित्यर्थः। संप्रसारणादचि पूर्वं इत्यत्र वस्तुतोऽचि परतो यत् संप्रसारणं विहितमित्याश्रीयत इति भावः। यद्वा, पश्चादित्यस्याङ्गबहिर्देश इत्यर्थः। पूर्वत्वे समानाङ्गग्रहणादचः प्रसारणस्य चैकाङ्गगतत्वमपेक्षितमित्यर्थः॥

आद्यन्तौ टकितौ. १. १. ४६.

[१, ३४६–३४९]

(**लघुविवरणम्**) [5]'यथासंख्यम्' इति वचनात् 'न ज्ञायते' इत्यनुपपन्नमित्यत आह — **लोकेति**।

---

[1] 'विना' इत्यतः प्राक् 'ननु' इत्यधिकं दृश्यते — क.
[2] प्रदेशे व्यव — क.
[3] तत्वस्यैतदित्याह — क.
[4] देशस्येष्टादि — क.
[5] पा. सू. १. ३. १०.

तव्यस्य स्थाने सर्वोऽपि इकारादिः प्राप्नोतीत्यत आह — **स्थान इति**। नन्वङ्गस्योदात्तत्वं [1]भवत् प्रथमातिक्रमे कारणाभावादट एव भविष्यतीत्यत आह — **तच्चेति**। 'खदिरबर्बुरौ' इत्येतदपेक्ष्य षष्ठ्यनुपपन्ना, भेदाभावादित्यत आह — **निर्धारण इति**। षष्ठ्यन्तं [2]'कङ्कटवान् खदिरः' इत्यनेन संबध्यत इति सूचयति — **तयोरिति**। पूर्वस्माद् भेदमाह — **एतदिति**॥

[१, ३४६–३४९]

(**विवरणम्**) नात्र [3]'यथासंख्यम्' इत्यपश्यतः [4]पूर्वः पक्षः, किं तु तदवश्यमाश्रयणीयमिति दर्शयितुमित्याह — **लोकेति**। **अभिन्नस्येति**। अपृथग्भूतस्येत्यर्थः। **सुतरामिति**। यत्र साहित्यस्य न नियमेन प्रतीतिस्तत्रापि किल न क्रमव्यवस्था, किमु वक्तव्यं साहित्यप्रतीताविति्यर्थः। [5]ननु न यथालोकं शास्त्रम्, लोके हीतिरहितोऽन्यादिशब्दोऽर्थपदार्थकः, शास्त्रे तु स्वरूपपदार्थक [6]इति शङ्कां निवर्तयितुं 'यद्यपि' इत्यादिभाष्यम्। तद्व्याचष्टे — **दर्शनमिति**। दर्शनस्यावसानं निश्चये सत्याकाङ्क्षाभावाद् भवतीत्यवसानवाचिनान्तशब्देन निश्चयोऽभिधीयत इत्याह — तस्येति। भाष्ये 'अस्ति [7]वेह' इत्यत्र आश्रीयमाण इति शेषः। यौ टकितावाद्यन्तौ [8]'भवतस्तौ कौ, किमागमावुतादेशाविति प्रश्नभाष्यार्थः। नेद्ग्रहणं निवृत्तये, किं तु देशविशेषस्थितयोः संज्ञात्वायेति परिहरति — **नैष इति**। **अन्तरतमश्च** अर्थतः श्रुतितश्च। नन्वङ्गस्योदात्तत्वं भवत् प्रथमातिक्रमे कारणाभावादट एव भविष्यतीत्यत आह — **तच्चेति**। ननु 'खदिरबर्बुरयोः' इति न तावत् खदिरबर्बुरप्रतियोगिनी षष्ठी, भेदाभावात्। नापि [9]"कण्टकवान्' इत्येतदपक्षया, तत एवेत्यत आह — **निर्धारण इति**। तस्याश्च 'कण्टकवान्' इत्यनेन संबन्धं सूचयति — **तयोरिति**। पूर्वस्माद् भेदमाह — **एतदिति**। पूर्वं नित्यमेव पदं साक्षात् [10]"प्रकृत्याद्यवयवक्रमेणोपदिश्यत इत्युक्तम्। अत एव 'समुदायम्' इत्याह। इह तु [11]"प्रतिकृतिः साक्षादुपदिश्यते नित्यस्याखण्डस्य बोधनायेत्याह। अत एव 'समुदायम्' इति नावोचत्, 'शब्दान्तरम्' इति चावोचद् भाष्यकारः॥

[१, ३४६–३४९]

(**उद्द्योतनम्**) [12]"यथासंख्यम्' इत्यपश्यतो नात्र पूर्वः पक्षः, किं तु तदवश्यमाश्रयणीयमिति दर्शयितुमित्याह — **लोकेति**। **अभिन्नस्य** अपृथग्भूतस्य। **सुतरामिति**। यत्र साहित्यस्य न प्रतीतिस्तत्रापि चेन्न क्रमव्यवस्था तर्हि साहित्यप्रतीतावव्यवस्थेति किं वाच्यमित्यर्थः। यथा लोके, न तथा व्याकरणे। इतिकरणरहितगोशब्दस्य लोकेऽर्थपरत्वात्, अत्र [13]'स्वं रूपम्' इति वचनेन शब्दपरत्वा-

---

[1] भवतु — ड, ढ, त.
[2] कण्टकवान् — त.
[3] पा. सू. १. ३. १०.
[4] पूर्वपक्षः — अ.
[5] 'ननु' इत्यधिकं भाति, तस्येहासंगतेः।
[6] इत्याशयेनेत्यर्थः। अस्य 'निवर्तयितुम्' इत्यनेनान्वयः।
[7] चेह — ट.
[8] 'भवतः' इति नास्ति — अ.
[9] 'कङ्कटवान्' इति भाष्यस्थाने 'कण्टकवान्' इति पूनामुद्रिते भाष्ये पाठः। सोऽत्र स्वीकृतः।
[10] प्रकृत्याद्यवयवं क्रमेणोप — अ, ट.
[11] प्रकृतिः — च, छ, ट.
[12] पा. सू. १. ३. १०.
[13] पा. सू. १. १. ६८.

दिति [1]लोकवैलक्षण्यकथनार्थम् 'यद्यपि' इति भाष्यम्। तत्र साध्यसाधनसंप्रतिपत्तिस्थानं दृष्टान्त इति प्रसिद्धम्, तस्य प्रकृतानुपयोगादाह — **दर्शनमिति**। निश्चयपर्यन्तं दर्शनाकाङ्क्षा, तस्मिन् सति निवर्तत इति दर्शनावसानवाचिनान्तशब्देन निश्चयोऽभिधीयत इत्यर्थः। तदेवाह — **यद्यपीति**। **दर्शनं** निश्चयः। भाष्ये [2]'अस्ति पुनः' इति काक्वा प्रश्नः। भाष्ये कौ **पुनरिति**। किमागमावुतादेशाविति्यर्थः। इद्ग्रहणं न निवृत्तये, किं तु देशविशेषोपलक्षणार्थमिति परिहरति — **नैष इति**। **देशः** [3]'चुटू' [4]'लशक्वतद्धिते' इत्यादिना निर्दिष्टः। **तत्र** [5]'आर्धधातुकस्येड् वलादेः' इत्यादौ। **इकारादिरिति**। टकारेणादिरिति प्रतीतौ 'इकार [6]आदिर्यस्य' इत्यर्थलाभादिति भावः। तर्हि इकारादिर्यः कश्चिदादेशः स्यात्, अत आह — **स्थान इति**। **अन्तरतमः** श्रुतितोऽर्थतश्च। ननु प्राथम्यादङ्गस्योदात्तत्वमट एव स्यात्, अत आह — **तच्चेति**। नन्वेवम् 'उदात्ताट्' इति निर्देशः स्यात्, अत आह — **सौत्रत्वादिति**। अदोषमेवाह — **न हीति**। ननु 'खदिरबर्बुरयोः' इति खदिरबर्बुरापेक्षया न प्रतियोग्यनुयोगिभावे संबन्धसामान्ये वा षष्ठी, भेदाभावात्, अत आह — **निर्धारण इति**। दृष्टान्तत्वमुपपादयति — **तयोरिति**। मध्य इत्यर्थः। **प्रतिपादनेति**। एका प्रकृतिः, एकः प्रत्ययः, तस्य च क्वचिदिकार आदावित्येवंरूपेणान्वाख्यानान्नानित्यत्वशङ्केति भावः। पूर्वस्माद् भेदमाह — **एतदिति**। पूर्वं नित्यमेव पदं प्रकृत्याद्यवयवक्रमेणोपदिश्यत इत्युक्तम्। इदानीं नित्यशब्दबोधनाय प्रकृत्यादिकमन्यदेवापूर्वं कल्प्यत इत्युच्यते। अत एव भाष्ये पूर्वत्र 'समुदायं प्रतिपद्यते' इत्युक्तम्। इह तु 'शब्दान्तरमुपदिशति' [7]इत्युक्तमित्याशयः। एतदेव विवृणोति— **अस्तीति**। **एधीति**। अस्तेर्लोटि सिपि "तासस्त्योः' इति सलोपः, सेर्हिः। सलोपस्यासिद्धत्वात् [8]'हुझल्भ्यः' इति हेर्धिः। [9]'ध्वसोरेद्धौ' इत्येत्वम्। **कल्पिताभ्यामिति**। 'स्तः' इत्यत्रापि अस् तस्, अस्तेरकारलोप इति, 'एधि' इत्यत्राप्येवमिति प्रकृतिप्रत्ययकल्पना तदर्थभेदकल्पना चेत्यर्थः॥

[१, ३४६–३४९]

(**रत्नप्रकाशः**) **समासनिर्देशोऽयमिति**। 'अयम्' इत्यनेन सूत्रगतसमाससजातीय एव निर्दिष्टः, न तु समाससामान्यम्। तेन समासविशेषे 'देवदत्तोऽजाधनो यज्ञदत्तोऽविधनः' इत्यादावभिमतसंबन्धः सिध्यतीति न दोषः। न्यायसाम्यात् तत्समासार्थबोधकवाक्येऽपि संदेह उक्तो ज्ञेयः — देवदत्तो यज्ञदत्तश्चाजा अवयश्च धनं ययोस्तौ भवतः, इति। लोके एतादृशस्थले वचनमन्तरेण क्रमव्यवस्था न सिध्यतीत्यभ्युपगम्य तद्व्यवस्थार्थमेव शास्त्रे वचनारम्भान्न दोष इति समाधत्ते — **यद्यपि तावदिति**। यद्यपीत्यर्थः। **लोक एष दृष्टान्त इति**। व्यवस्थाभावसाधको भवति तथापीति शेषः। एतेन 'दर्शनं दृष्टम्, तस्यान्तो निश्चयः। यद्यपि लोके एतद्दर्शनमित्यर्थः' इति निरस्तम्। '**दृष्टः** सिद्धोऽन्तोऽवसायो निश्चयो यस्य स दृष्टान्तः' इति दृष्टान्तशब्दस्य लोकप्रसि-

---

[5] पा. सू. ७. २. ३५.

[1] लोके वैलक्षण्य — म, आ.
[2] भाष्ये 'अस्ति वेह कश्चित्' इत्यत्र 'अस्ति पुनरिह कश्चित्' इत्यन्नंभट्टपाठ इति भाति।
[3] पा. सू. १. ३. ७.
[4] पा. सू. १. ३. ८.
[6] आदिरस्य — अ.
[7] इत्याशयः — अ, इ; वेत्याशयः — उ.
[8] पा. सू. ७. ४. ५०.
[9] पा. सू. ६. ४. १०१.
[10] पा. सू. ६. ४. ११९.

द्धार्थस्य व्यामोहजनकव्युत्पादनप्रदर्शनानौचित्यात् । **दृष्टान्तस्यापीति** । तत्सिद्धसंदेहस्यापीत्यर्थः । **पुरुषारम्भ इति** । पुरुषेणारभ्यमाणः संकेतविशेष इत्यर्थः। **संख्यातानुदेश इति** । [1]'यथासंख्यमनुदेशः समानाम्' इति वचनमित्यर्थः । [2]आगमयोरिव प्रत्यययोरपि टकितोः संभवात् पृच्छति— **कौ पुनरिति** । अवयवावशेषवाचकाद्यन्तपदसामानाधिकरण्याल्लब्धावयवताकयोरिव टकितोर्ग्रहणमित्याशयेनोत्तरमाह — **आगमाविति** । **युक्तं पुनरिति** । इत्यादिः 'तत्कथम्' इत्यतः प्राचीनो ग्रन्थो [3]'दाधा ध्वदाप्' इति सूत्रे व्याख्यातः । **संज्ञाधिकारोऽयमिति** । पूर्वेषां प्रायेण संज्ञासूत्रत्वादस्यापि तथात्वाश्रयणादभिमतसिद्धिरिति भावः । **टकारककारावितावि ति** । इताविति संभवमात्रेण विशेषणम्, न त्वतिप्रसङ्गवारकत्वेनापि । अत एव पक्षान्तरं युक्तिसहं वक्ष्यति । एतेन "यद्येवं संज्ञा संज्ञिप्रत्यायनार्था संज्ञिनं प्रत्याय्य स्वयमेव निवर्तत इति किमिद्ग्रहणेन, टकावित्येवास्तु । नैष दोषः । इत्संज्ञत्वेन देशविशेष उपलक्ष्यते । तेनेत्संज्ञकस्य यो देशस्तद्देशावस्थितौ टकौ संज्ञे भवत इति [4]'आलजाटचौ' इत्याटच्प्रत्यये टकारः संज्ञा न भवति" इति निरस्तम् । अस्मिन् शास्त्रे लोपार्थमित्संज्ञायाः कुत्राप्यकृतत्वेन 'स्वयमेव निवर्तते' इत्यन्तस्यासंबद्धप्रलापत्वात् । प्रत्ययाद्यन्तटकयोरित्संज्ञकदेशावस्थितत्वाविशेषेण [5]'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायापाताच्च । **तत्रेति** । तथा सतीत्यर्थः । **वलादेरितीति** । इतिशब्द इत्यादावित्यर्थे । **उपस्थितमिदं भवतीति** । टकारेणेति शेषः । **इकारादिरिति** । आन्तरतम्यादितव्यादिरिति भावः । **इह** [6]"आर्धधातुकस्येड् वलादेः' इत्यादौ । **सूत्रमिति** । सूत्रावयवत्वादौपचारिकम् 'इट्' इत्यस्य सूत्रत्वम् । **इकार आदिरस्येतीति** । अर्थे इति शेषः । तस्य बहुव्रीहेर्विग्रहस्तु 'इः ट् यस्य' इत्यादिर्बोध्यः । **अत्रेति** । यत्र तस्य बहुव्रीहेः पूर्वावयवस्य विशेषणमनुपात्तं तत्र [7]"आर्धधातुकस्येड् वलादेः' इत्यादावित्यर्थः । **अशक्यमिति** । [8]"सविशेषणानां वृत्तिर्न भवति' 'वृत्तस्य वा विशेषणयोगो न' इत्याश्रयणादिति भावः । **त्रिपदोऽयमिति** । त्रीण्यकारटकारोदात्तप्रकृतिकानि पदानि अवयवा यस्य सोऽयम् 'अडुदात्तः' इति शब्द इत्यर्थः । **उदात्तग्रहणेनाकारो विशेष्यत इति** । विशेष्येणापि विशेषणस्य विशेषेऽवस्थापनाद् विशेष्यतोपचारः । कथं विशेष्यत इत्यत आह — **अकार उदात्त आदिरस्येतीति** । अनादरेण कथंचिदर्थकथनपरमिदम् । विग्रहस्तु 'अः ट् उदात्तो यस्य सः' इति । एतेन 'विशेषणस्याप्युदात्तस्य सौत्रत्वान्निर्देशस्य परनिपातः' इति निरस्तम् । उदात्तस्य विशेष्यताया अपि संभवेन सौत्रत्वाश्रयणानौचित्यात् । **एतद् भवतीति** । उदात्तग्रहणं विशेषणं भवतीत्यर्थः । **वक्ष्यत्येतदिति** । [9]'न माङ्योगे' इति सूत्रे । तदुपपत्तिस्तत्रैव स्फुटेति नेहोक्ता, अनावश्यकत्वात् । इदानीं नित्यानामेव शब्दानां भागशो बोधनादागमागमिभावोऽप्युपपद्यते । एवं च सूत्रगतमित्पदमपि सार्थकं भवति, [10]'इट ईटि' [11]'समः सुटि' [12]'आटश्च' इत्यत्र च दोषो न भवतीत्याशयेनाह — **अथवेति** । **तेन** भागश उपदेशेन । **अयम्** अध्येता । **विशेषेण** स्वरूपविशेषेणोपलक्षितम् । **प्रतिपद्यते** जानाति । **तद्यथा खदिरबर्बुरयोरिति** । [विषयसप्तमी । यत्तु 'निर्धारणे षष्ठी' इति । तन्न,] भागश उपदेशेन खदिरबर्बुरयोरपि विशेषेण प्रतिपाद्यमानत्वेन

---

[1] पा. सू. १. ३. १०.
[2] आङ्योरिव — ब.
[3] पा. सू. १. १. २०.
[4] पा. सू. ५. २. १२५.
[5] लौ. न्या. प्रथमभागे पृष्ठम् ३९.
[6] पा. सू. ७. २. ३५.
[7] पा. सू. ७. २. ३५.
[8] महाभाष्यम् २. १. १.
[9] पा. सू. ६. ४. ७४.
[10] पा. सू. ८. २. २८.
[11] पा. सू. ८. ३. ५.
[12] पा. सू. ६. १. ९०.

निर्धारणषष्ठ्ययोगात्। पूर्ववाक्यगतस्य 'खदिरबर्बुरयोः' इति पदस्य वाक्यान्तरसंबन्धाश्रयणानौचित्याच्च। **सूक्ष्मपर्णाविति**। 'इत्युक्ते' इति शेषः। ननु शब्दानां प्रवाहरूपेण कारणीभूतसूक्ष्मध्वन्यात्मना वा नित्यत्वेऽप्याशुतिरोभाविनां खदिरबर्बुरादिवद् भागश उपदेशेन प्रतिपत्तिर्न भविष्यतीत्यस्वरसाद् रेखागवयन्यायेनासत्यावयवावयविभावकल्पनया प्रागुक्तक्रमेणोपदेशे विशेषेण सत्यप्रतिपत्तिर्भविष्यतीत्याशयेनाह — **अथवैतयेति** ॥

[१, ३४६–३४९]

(**नारायणीयम्**) यथासंख्यशास्त्राप्रवृत्तिमाश्रित्य पूर्वः पक्षः, तत्प्रवृत्त्याश्रयणेन सिद्धान्त इति न मन्तव्यम्, तदप्रवृत्तिनिमित्ताशङ्काभावात्। अतः शास्त्रान्न्यायाद्वा यथासंख्यमिति पूर्वपक्षं निरस्य शास्त्रादेवेति सिद्धान्तः क्रियत इत्याह — **लोकेति**। 'गोमान् देवदत्तो हिरण्यवान् यज्ञदत्तः' इत्यादौ क्रमनियमस्य दर्शनादिहापि यथासंख्यशास्त्रमन्तरेणापि क्रमो नियम्यतामिति पूर्वपक्षबीजम्। अत्र च 'प्रदर्शनाय' इत्यन्तेन 'समास' इत्यारभ्य 'नाम' इत्यन्तस्य भाष्यस्यार्थः प्रदर्शितः। 'पूर्वपक्षः' इत्यनेन 'प्रदर्शनाय' इत्येतदन्तोक्तसिद्धान्तं निरस्य पूर्वपक्षो न्यायाच्छास्त्राद्वा क्रमव्यवस्थेत्येवंरूपो नोच्यते, तस्य ग्रन्थबाह्यत्वात्। किं तु व्यवस्थासिद्धिमपेक्ष्य तदसिद्धिः पूर्वपक्ष इत्युच्यते। अयं च पूर्वपक्षे मुख्यपूर्वपक्षस्य निरासः। तदयमर्थः — सिद्धान्त्येव शास्त्रीयं क्रमनियमं वक्तुं लौकिकं तं निराचष्ट इति। क्रमपाठेऽपि समासत्वान्न क्रमनियम इत्युक्तम्, तत्राप्रयोजकत्वं समासस्य निरस्यति — **अभिन्नस्येति**। क्रमप्रतीतयोरुद्देश्यविधेययोः क्रमनियमः, इह तु युगपदधिकरणवचनत्वाद् द्वन्द्वस्य न पदार्थे क्रमोऽवगम्यत इति न तन्नियम इत्यर्थः। लौकिकवाक्यमात्रे पाठक्रमस्य क्रमानियामकत्वात् समासत्वविशेषणं विस्पष्टार्थमित्याह — **यद्यपीति**। 'गोमान् देवदत्तः' इत्यादिप्रयोगे तु वाक्यभेदात् क्रमसंबन्धः। यद्वा क्वचिल्लोके पाठक्रमात् क्रमसंबन्धेऽपि टीकोक्ते वाक्ये व्यभिचारान्न तस्य नियामकत्वमिति क्रमनियमे समासभिन्नत्वं प्रयोजकं न वर्ण्यमित्यर्थः। दृष्टान्तशब्देन तत्पूर्वकानुमानं विवक्ष्यते सर्वत्र भाष्ये। न चेह युज्यते तथा, समासत्वस्यानुमानत्वेनानुक्तेः। पाठक्रमात् क्रमनियमानुमाने [1]समासत्वनित्योपाधिकीर्तनादित्यतो व्याचष्टे — **दर्शनमिति**। दर्शनमात्रे वक्तव्ये [2]तन्निश्चयप्रदर्शनं प्रामाण्यायेत्यभिसंधायाह — **यद्यपीति**। **नैष इति**। नेत्संज्ञा विधीयते, किं त्वनूद्यत इत्यर्थः। अस्त्वङ्गस्योदात्तत्वम्, तत् प्रथमातिक्रमणे कारणाभावादादेरेव भविष्यति, अत आह — **तच्चेति**। ननूदात्तपदस्य परनिपातात् पृथक्पदत्वमित्यत आह — **विशेषणस्येति**। 'अनुवृत्त्या' इत्युक्तम्। तत्र किमडुदात्तपदं समस्तमनुवर्तते, उतोदात्तपदमात्रम्। नाद्यः, अजादेरटोऽपि पक्षे प्रसङ्गात्, आट उदात्तत्वाभावप्रसङ्गाच्च। नान्त्यः, समासैकदेशानुवृत्तेर्दुर्लभत्वादित्याशङ्क्य शब्दाधिकारेणैकदेशानुवृत्तिलाभमाह — **तत्र हीति**। यद्येवमनुवृत्तोदात्तग्रहणादाकारे विशेषिते किमनिष्टमित्यत आह — **अशक्य इति**। समासान्तर्गतस्याकारस्य विशेषणसंबन्धानर्हत्वादुदात्तपदेन समास एव [विशेष्य इति] विशेषणं तस्य तद् भवति। न च सोऽपि शक्य इत्यङ्गान्त्यस्योदात्तत्वप्रसङ्ग इत्यर्थः। वक्ष्यमाणं वस्तु प्रकृतचोद्यसमाधानोपयोगि विस्पष्टयति — **सूत्रस्येति**। प्रत्यासन्ने संज्ञापक्षे परिहारान्तरोपन्यास इति भ्रमः स्यात्, तदर्थमाह — **परिभाषेति**। 'ततः पश्चादिकारम्' इति संज्ञापक्षे न संगच्छते। न हि तस्मिन् पक्षे इकारस्य विधिः, किं तु तदादेः। तस्मात् परिभाषापक्षेऽयं परिहार इत्यर्थः। ननु यदि परिभाषापक्ष-

---

[1] असमासत्व — क.

[2] तन्निश्चित्तिप्रदर्शनप्रामाण्याय — क.

माश्रित्यागमशासनमङ्गीक्रियते, प्राप्तं तर्ह्यनित्यत्वम्, अत आह — [1]**न चेति**। यथादेशस्थले शब्द-[2]विपरिणामाभावेऽपि बुद्धिविपरिणाममात्रं तथागमस्थलेऽप्यपूर्वोपजनबुद्धिमात्रं, न वस्तुतस्तथात्वमिति नानित्यत्वमित्यर्थः। 'खदिरबर्बुरयोः खदिरबर्बुरौ' इति भेदाभावात् षष्ठ्यनुपपत्तिः, पौनरुक्त्यं चेत्याशङ्क्याह — **निर्धारण इति**। तस्यान्वयप्रकारमाह — **तयोरिति**। भाष्यस्थद्रव्यान्तरशब्दार्थमाह — **खदिरमिति**। दृष्टान्ते विवक्षितं साम्यमाह — **न तत्रेति**। विशेषोपदेशस्य विशिष्टद्रव्यधीहेतुत्वं न विशेषोपजननहेतुत्वमिति [3]कण्टकोपदेशदृष्टान्ताद्विवक्षितमित्यर्थः। इतव्य एव कस्मादनुपदिष्टः, तत्राह — **प्रतिपादनेति**। इतव्योपदेशे 'कर्तव्यम्' इत्यादिप्रयोगो न स्यात्। तस्मात् सर्वधातुसाधारणं रूपमुपदिश्य विशेषोपदेश इति भावः। पूर्वस्माद् भेदापरिस्फूर्तेराह — **एतदिति**। अपूर्वोपजननाङ्गीकारेणायं पक्षभेद इति भावः। न चैवमनित्यत्वापत्तिर्दोषः, इष्टत्वादित्याह — **असत्येति**। [4]यद्येवमर्थानभिधायिनोऽन्वाख्यानं स्यात्, अत आह — **सत्यस्येति**। साक्षात् [5]सत्यपदान्वाख्यानस्याशक्यत्वात् कल्पितविषयत्वमन्वाख्यानस्यास्थेयमित्याह — **अस्तीति**॥

[१, ३४९–३५१]

(**लघुविवरणम्**) परत्वात् [6]'परश्च' इत्येतद् भविष्यतीत्यत आह — **प्रत्ययपरत्वस्येति**। 'टित्करणात्' इत्येतदयुक्तम्, न हि टित् परो भवतीत्यस्तीत्यत आह — **ङीबिति**। **षष्ठ्या इति**। सत्यां सामग्र्यां [7]कार्यानुत्पत्त्ययोगात् कार्याभावेन कारणाभावोऽनुमीयत इत्यर्थः। [8]कारकत्वे दूषणमाह — **सर्वेणेति**। अवयवावयविसंबन्धे न भवतीत्यत्र हेतुमाह — **प्रत्ययेति**॥

[१, ३४९–३५१]

(**विवरणम्**) **प्रत्ययपरत्वस्यापीति**। यथा स्थानेयोगत्वस्यैवं प्रत्ययपरत्वस्यापीत्यर्थः। 'टित्करणात्' इत्ययुक्तम्, न हि टित् परो भवतीति वचनमस्तीत्यत आह — **ङीबिति**। अन्तशब्दस्यावयववाचित्वाद् विरोधं शङ्कते — **नन्विति**। **अत्रेति**। शब्दपरविप्रतिषेधादिति भावः। **आध्योः प्रध्योरिति**। अत्र [9]'आद्युदात्तश्च' इत्यनेन 'ओस्' इत्यस्याद्युदात्तत्वं प्राप्तम्। तदपि बाधित्वा [10]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वं प्राप्तम्। तदपि बाधित्वा [11]'उदात्तयणो हल्पूर्वात्' इत्याद्युदात्तत्वम्। तत्र [12]'नोङ्धात्वोः' इत्युदात्तत्वनिषेधो बाधकः स्यादित्यर्थः। षष्ठ्यधिकारे वचनं नाम षष्ठ्यधिकारेऽस्य [13]योगस्यानुवृत्तिव्याख्यानम्। तेन किं [14]फलतीत्यत आह — **यत्रेति**। **प्राप्ता** एतदुपस्थानात् प्रागिति शेषः। एतदुपस्थित्युत्तरकालं ह्ययवयवषष्ठीत्वात् प्राप्तेत्युक्तम्। **न त्विति**।

---

[1] प्रदीपे 'न हि व्यवस्थितस्य' इत्यत्र 'न च व्यवस्थितस्य' इति पाठः स्वीकृतः।
[2] विपरिणामभावेऽपि — क.
[3] भाष्ये 'कङ्कटवान् खदिरः' इत्यत्र 'कण्टकवान् खदिरः' इति पूनामुद्रिते पाठो दृश्यते। सोऽत्राभिमत इति प्रतीयते।
[4] यद्येवमर्थाभिधायिनः — क.
[5] सत्यत्वान्वाख्यान — क.
[6] पा. सू. ३. १. २.
[7] कार्यानुत्पादायोगात् — ण.
[8] कारणत्वे — ड, त.
[9] पा. सू. ३. १. ३.
[10] पा. सू. ३. १. ४.
[11] पा. सू. ६. १. १७४.
[12] पा. सू. ६. १. १७५.
[13] योगस्यानुवृत्तिर्व्याख्यानम् — छ.
[14] फलमित्याह — च; फलतीत्याह — छ.

[1]'सायंचिरम्' इत्यादौ षष्ठ्यभावादित्यर्थः। [2]अर्थशब्देन प्रयोजनवाचिना प्रयोजकोऽभिधीयत इति द्योतयति — **प्रयोजकाविति**। **अर्थभावाभावयोः** अभिधान इति शेषः। **सर्वेण** नञादिना, शत्रभावादेरर्थस्य **क्रियायाः** निष्पादनस्य प्रसङ्गादित्यर्थः। [3]**अप्रयोगात्त्विति**। इतरविभक्तिप्रयोगे सति षष्ठ्यप्रयोगादित्यर्थः। नन्वप्रयोगोऽसिद्धः, [4]'चरेष्टः' [5]'गापोष्टक्' इति षष्ठीप्रयोगादित्यत आह — **चरेरिति**। नदीस्रोतोन्यायेन पूर्वत्र परत्र चानुवर्तमानस्याकस्मात् [6]'चरेष्टः' इत्यत्र [7]'परश्च' इत्यस्य परित्यागायोगात् [8]'धातोः' इत्यनेन [9]सामानाधिकरण्यसंभवाच्च [10]'चरेः' इति पञ्चमीति भावः। **न त्विति**। एतत्सूत्रोपस्थानेनेति भावः। हेतुमाह — **प्रत्ययेति**। **अनर्थित्वादिति**। [11]आकाङ्क्षानिबन्धनः संबन्धः, तदभावान्न भवतीत्यर्थः। आनन्तर्यसंबन्धे च [12]'धातोः' [13]'ङ्याप्प्रातिपदिकात्' इत्यधिकारश्चानुगृहीतो भवति। धातोः परष्टग् भवति, प्रातिपदिकाड्ढग् भवति, स च भवन् गापोरनन्तरो व्रीहिशाल्योरनन्तर इत्यपि द्रष्टव्यम्। **नेति**। [14]'चरेष्टः' इत्यत्र युगपत् [15]'आद्यन्तौ' [16]'षष्ठी स्थानेयोगा' [17]'परश्च' इत्येतेषामुपस्थितौ पुरस्तादिदमिदमनन्तरमिदमुत्तरमिति विभागाभावादित्यर्थः॥

[१, ३४९–३५१]

(**उद्द्योतनम्**) **प्रत्ययेति**। यथा स्थानेयोगत्वस्य, एवं परत्वस्यापीत्यपेरर्थः। भाष्ये 'विषम उपन्यासः' इत्यादिना प्रत्ययपरत्वस्य बाधकं न भवतीत्युक्तम्। 'प्रयोजनम्' इति [18]'भाष्यं तद्दूषणपरत्वेनावतारयति — **सर्वेति**। भाष्ये **एतत्प्रयोजनं** ङीबाकारलोपरूपम्। 'प्रयोजनमेतत्' इति प्रदीपस्याप्ययमेवार्थः। **परत्वमेवेति**। तथा च प्रत्ययपरत्वस्यापि बाधकमेवेत्यर्थः। 'टित्परो भवति' इति वचनाभावात् 'टित्करणात्' इत्ययुक्तम्, अत आह — **ङीबर्थादिति**। कित्त्वमपि न परत्वनिमित्तम्, अत आह — **आकारेति**। **प्रयोजनं** ङीबाल्लोपरूपम्। अन्तशब्दस्यावयववचनत्वाद् विरोधं शङ्कते — **नन्विति**। [19]'समासान्ताः' इत्यत्राप्येष एव परिहार इत्याशयेनाह — **यथेति**। भाष्ये **नोङिति**। उपसर्गे घोः किः प्रत्ययस्वरेणोदात्तः। तत्स्थानिकयणः [20]परासर्वनामस्थानविभक्तेरुदात्तत्वम् [21]'उदात्तयणो हल्पूर्वात्' इति विहितमत्रेष्यते। किप्रत्ययस्य धात्ववयवत्वे [22]'नोङ्धात्वोः' इति निषेधः स्यादित्यर्थः। **पूर्वोक्तं** 'टित्करणादयं परो भवति, न

---

[1] पा. सू. ४. ३. २३.
[2] 'अर्थशब्देन' इत्यादि 'प्रसङ्गादित्यर्थः' इत्यन्तं नास्ति — च, छ.
[3] प्रदीपे 'अप्रयोगाच्चानुमीयते' इत्यत्र 'अप्रयोगात्त्वनुमीयते' इति पाठो निर्णयसागरमुद्रिते। सोऽत्र स्वीकृतः।
[4] पा. सू. ३. २. १६.
[5] पा. सू. ३. २. ८.
[6] पा. सू. ३. २. १६.
[7] पा. सू. ३. १. २.
[8] पा. सू. ३. १. ९१.
[9] सामानाधिकरण्यासंभवाच्च — च, छ; सामानाधिकरण्यायोगाच्च — ञ.
[10] पा. सू. ३. २. १६.
[11] आकाङ्क्षादिनिबन्धनः — च, छ.
[12] पा. सू. ३. १. ९१.
[13] पा. सू. ४. १. १.
[14] पा. सू. ३. २. १६.
[15] पा. सू. १. १. ४६.
[16] पा. सू. १. १. ४९.
[17] पा. सू. ३. १. २.
[18] भाष्यं दूषण — ऋ; भाष्यं देशदूषण — उ.
[19] पा. सू. ५. ४. ६८.
[20] परसर्वनामस्थान — अ, आ, ऋ.
[21] पा. सू. ६. १. १७४.
[22] पा. सू. ६. १. १७५.

पुनरादिः' इत्युक्तम्। **अधिकं** [1]'टितः' इति ङीपो विषयान्तरमित्यर्थः। **परत्वादिति**। शब्दपरविप्रतिषेधादित्यर्थः। यद्यपि 'नदट्, चेलट्' इत्यादिकं ङीपो विषयः संभवति, तथापि ढादिसाहचर्यात् प्रत्यय एव टिद् गृह्यते। 'नदट्' इत्यादौ टित्त्वसामर्थ्यादप्रत्ययान्तस्यापि भवतीति यद्युच्यते [2]तदैतदुक्तमिति मन्तव्यम्। भाष्ये **षष्ठ्यधिकारे वचनं** तत्रानुवृत्तिः। ततः फलितमाह— **— यत्रेति। प्राप्ता** एतदुपस्थानात् [3]प्रागेव स्थिता। **न त्विति**। [4]'सायंचिरम्' इत्यादौ षष्ठ्यभावादित्यर्थः। [5]**बाधनाय** षष्ठ्यभावेऽप्युपस्थानमिति शेषः। आद्यन्तशब्दयोरवयववाचित्वेनावयविनि षष्ठीं विनान्वयो न संभवतीति षष्ठीस्थल एवास्योपस्थानं नान्यत्रेति [6]षष्ठ्यधिकारवचनं विनापि सिध्यतीति भाष्यार्थमाह — **षष्ठ्या इति। प्रयोजकावाद्यन्तौ** [7]'एतेनार्थशब्देन प्रयोजनवाचिना वार्तिके प्रयोजकोऽभिधीयत इत्युक्तम्। 'आदिरन्तो वा न भविष्यति' इत्यनेन 'असंप्रत्ययः' इत्यस्य 'अभावः' इति व्याख्यानं कृतमित्यभिप्रेत्य शङ्कातात्पर्यमाह — **शब्देति। भावा भावयोः** अभिधान इति शेषः। शब्दस्यार्थकारकत्वे बाधकमाह — **सर्वेणेति। क्रिया** निष्पादनम्। 'शत्रुर्नास्ति' इति शब्दादपि तदभावः सिध्येदिति भावः। **अप्रयोगादिति**। विभक्त्यन्तरप्रयोगस्थले षष्ठ्यप्रयोगादित्यर्थः। यः प्रयुञ्जीत सोऽर्थो नास्तीत्यन्वयः। अप्रयोगोऽसिद्धः, [8]"चरेष्टः' [9]इत्यादौ दर्शनात्, अत आह — **चरेष्ट इति**। पूर्वत्र परत्र चानुवर्तमानस्य परत्वस्याकस्मात् [10]"चरेः' इत्यत्रानन्वये मानाभावात् 'धातोः' इत्यनेन सामानाधिकरण्यसंभवाच्च पञ्चम्येवेयमित्यर्थः। **न त्विति**। एतत्सूत्रोपस्थानेनेत्यर्थः। तत्र हेतुः — **प्रत्ययेति। आकाङ्क्षेति**। आकाङ्क्षानिबन्धनः संबन्धस्तदभावे न संभवतीत्यर्थः। **अनर्थित्वात्** आनन्तर्यसंबन्धेन निराकाङ्क्षत्वात्। धातोः परष्टग् भवति, प्रातिपदिकात् परो ढग् भवति। स च भवन् [11]'गापोरनन्तरः, व्रीहिशाल्योरनन्तर इति तदर्थ इत्यर्थः। यद्यपि बाध्यमात्रापेक्षायामयं न्यायो नास्तीत्युक्तम्, तथापि तथा सति स न्याय एवोत्सीदेदिति सा न पारमार्थिकी युक्तिरित्यभिप्रेत्य तदनाश्रयणे युक्त्यन्तरमाह — **पुरस्तादिति। न कार्येति**। [12]'चरेष्टः' इत्यत्र युगपत् [13]'आद्यन्तौ टकितौ' [14]'षष्ठी स्थानेयोगा' [15]'परश्च' इत्यनेकेषामुपस्थितौ पौर्वापर्यनियामकाभावादिति भावः ॥

[१, ३४९–३५१]

(**रत्नप्रकाशः**) अस्मिन् पक्षे परिभाषेयमतिप्रसक्तेत्याह — **टकितोरिति। परवचनादिति**। पुरस्तादपवादन्यायेन स्थानेयोगत्वमेवानेन बाध्यते, न प्रत्ययपरत्वमिति परत्वात् [16]'प्रत्ययः' [17]'परश्च' इति परत्वमेव भविष्यतीति भावः। **अपवादत्वादिति**। [18]"मिदचोऽन्त्यात् परः' इत्युत्तरसूत्र इवा-

---

[1] पा. सू. ४. १. १५.
[2] तदेवमुक्तमिति — अ; तदेदमुक्तमिति — इ, उ, ऋ.
[3] प्रागुपस्थिता — अ; प्रागवस्थिता — म, इ.
[4] पा. सू. ४. ३. २३.
[5] बाधाय — अ, आ, इ, उ, ऋ.
[6] षष्ठ्यधिकारं विनापि — ऋ.
[7] तेनार्थशब्देन — म, आ, ऋ.
[8] पा. सू. ३. २. १६.
[9] इत्यादेर्दर्शनात् — ऋ.
[10] पा. सू. ३. २. १६.
[11] धातोरनन्तरः — म, आ, ऊ, ऋ.
[12] पा. सू. ३. २. १६.
[13] पा. सू. १. १. ४६.
[14] पा. सू. १. १. ४९.
[15] पा. सू. ३. १. २.
[16] पा. सू. ३. १. १.
[17] पा. सू. ३. १. २.
[18] पा. सू. १. १. ४७.

त्रापि पुरस्तादपवादन्यायस्याप्रवृत्तेरिति मन्यते । एतेन 'बाध्यमात्रापेक्षायां पुरस्तादपवादन्यायो नास्तीति भावः' इति निरस्तम् । बाध्यसामान्यापेक्षाख्यन्यायस्य निर्मूलत्वात् । पुरस्तादपवादन्यायस्य विनिगमकस्य सत्त्वेन विनिगमनाविरहमूलकताया अपि तस्यायोगात् । **तत्र** श्नमि । **यदनवकाशं मित्करणमिति** । तस्मान्मिदचोऽन्त्यात् पर [1]इत्येष योग इति शेषः । **बाधत इति** । इति यत् तदिति शेषः । **इह** [2]'चरेष्टः' [3]'आतोऽनुपसर्गे कः' इत्यत्र । **उभयं** टकरूपम् । **टित इतीकार इति** । [4]'टिड्ढाणञ्' इत्यादिना ङीबित्यर्थः । **कितीत्याकारलोप इति** । [5]'आतो लोप इटि च' इत्यनेन । इदानीं कुतर्कवासनामलिनान्तःकरणः शङ्किता स्थानेयोगत्वापवादविषयत्वेन श्नमि पुरस्तादपवादन्यायो वारितः, न तु निरवकाशत्वेनेति प्रकृतटकयोरपि तेन स न्यायो वारणीय इत्याशयेनाह — **प्रयोजनं नामेति** । स्थानेयोगत्वापवादविषयताविघटकमिति शेषः । **नियोगत इति** । पाक्षिकतासंभावनाकलङ्कराहित्येनेति शेषः । **नियोगतः पर इति** । पर एव स्याच्चेदित्यर्थः । **कुतो नु खल्वेतदिति** । पुरस्तादपवादन्यायाप्रवृत्तेरुक्तत्वात् तदन्यस्य तदवधारणहेतोरभाव इति भावः । **टित्करणादिति** । ङीबादित्वसाधारणादिति शेषः । एतेन 'ङीबर्थादित्यर्थः' इति निरस्तम् । टित्करणशब्दस्य ङीबर्थशब्दपर्यायताभावात् टित्करणङीबर्थताहेतोः परसाधकतापटुत्वेन तत्कथनस्य प्रतिकूलत्वेन 'परो भविष्यति न पुनरादिः' इत्युभयसाधारण्येनैव तस्य हेतुताकथनौचित्यात् । तथैव भाष्ये दर्शितत्वाच्च । एतेन 'कित्करणात्' इति भाष्यं व्याख्यातम्, 'आकारलोपार्थात्' इति निरस्तम् । **च पर इति** । पर एवेत्यर्थः । इदानीं टितः [6]प्रत्ययस्यादित्वपरत्वयोः समुच्चयासंभवादस्तु तत्र [7]'परश्च' इत्यनेन परेणास्य बाधः । कितस्तु परत्वान्तत्वयोः समुच्चयसंभवात् परेण [8]'परश्च' इत्यनेन परत्वे बोधिते पुनःप्रसङ्गविज्ञानादनेन पश्चादन्तत्वं भविष्यतीत्याशयेनाह — **टितः खल्वपीत्यादिना** । **एष परिहार इति** । अपवादविषये परत्वस्याप्रयोजकत्वादिति भावः । **'एवं हीति** । [9]परत्वस्याप्रयोजकत्वे सति हीत्यर्थः । **टित्करणादिति** । प्रकृतपरिभाषाप्रवर्तकादिति शेषः । **आदिरिति** । आदिरेव स्यादित्यर्थः । [10]**उभयवान्** ....। यद्यपि क्लृप्तकल्पचयोः क्लृप्तस्य बलीयस्त्वेन क्लृप्तापवादत्वप्रयोजकताकेनानवकाशत्वेनैव श्नमि पुरस्तादपवादन्यायो वारयितुमुचितः, न तु कल्प्यापवादत्वप्रयोजकताकेन स्थानेयोगत्वापवादविषयत्वेन पाक्षिकेणेति टित्कितोः प्रत्ययोः परेण [11]'परश्च' इत्यनेन परत्वे सिद्धे सकृद्गतिन्यायेन कितोऽन्तत्वाभावे चेष्टं सिध्यति, तथापि [12]'तुष्यतु दुर्जनः' इति न्यायेन कुतार्किकोक्तं दूषणमभ्युपेत्य समाधानान्तरमाह — **सिद्धं त्विति** । **षष्ठ्यधिकार इति** । [13]'षष्ठी स्थानेयोगा' इत्यस्यानन्तरम् । षष्ठ्यधिकारे वचने को वा वाक्यार्थः स्यादित्यत आह — **आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्येतीति** । षष्ठीशब्दस्य निर्दिष्टलक्षकस्य षष्ठ्यन्ततया विपरिणामाश्रयणात् 'षष्ठीनिर्दिष्टस्य यौ टकितौ तौ तस्याद्यन्तौ स्तः' इत्यर्थो लभ्यते । तथा च [14]'चरेष्टः' [15]'आतोऽनुपसर्गे कः' इत्यादौ पञ्चमी-

---

[1] इत्येव योग इति — ब.
[2] पा. सू. ३. २. १६.
[3] पा. सू. ३. २. ३.
[4] पा. सू. ४. १. १५.
[5] पा. सू. ६. ४. ६४.
[6] प्रत्ययस्यादित्वान्तयोः — ब.
[7] पा. सू. ३. १. २.
[8] पा. सू. ३. १. २.
[9] भाष्ये 'स्यादेव ह्ययम्' इत्यत्र 'स्यादेवं ह्ययम्' इति रत्नप्रकाशकृत्पाठ इति भाति ।
[10] परत्वस्य प्रयोजकत्वे — ब.
[11] 'उभयवान्' इत्यस्यानन्तरं ग्रन्थपातः — ब.
[12] पा. सू. ३. १. २.
[13] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[14] पा. सू. १. १. ४९.
[15] पा. सू. ३. २. १६.
[16] पा. सू. ३. २. ३.

निर्दिष्टसंबन्धिनोष्टकितोर्नाद्यन्तताप्रसक्तिरिति भावः। नन्वस्य योगस्य षष्ठ्यधिकारे प्रक्षेपेऽपाणिनीयतादोषः, तत्रानुवर्त्य व्याख्यानेऽत्रत्यपाठोऽनर्थकः स्यादित्यस्वरसादाह — **आद्यन्तयोर्वेति**। **षष्ठ्यर्थत्वात्** षष्ठ्यर्थावयवानन्यत्वात्। **असंप्रत्यय इति**। अवयवसामान्यस्येति शेषः। **स्यादिति**। 'तथा च प्रत्ययः' इति शेषः। उत्तरान्वयी। **अन्तो वेति**। अन्तोऽपीत्यर्थः। 'टित्किताववयवावाद्यन्तौ स्तः' इति सूत्रार्थः। अत एव टित्किद्विधौ षष्ठ्या अवयवार्थतावगमात् स्थानेयोगत्वबाधश्च फलतीति प्रत्यये नातिप्रसङ्ग इति भावः। एतेन 'षष्ठ्याः प्रयोजकावाद्यन्तौ। षष्ठ्यभावाच्चाद्यन्ताभावावगतिरित्यर्थः' इति निरस्तम्। आद्यन्तयोः षष्ठ्यर्थत्वेन 'वलादेरार्धधातुकस्यादिरिट्' 'ह्रस्वस्यान्तस्तुक्' इत्याद्यर्थस्य तत्तदागमविधिनैव सिद्धौ प्रकृतसूत्रानर्थक्यापत्तेः। शब्दस्यार्थप्रयुक्तत्वेन शब्दाभावेऽप्यर्थसद्भावेन प्रत्ययस्याप्याद्यन्तता स्यादेवेत्याशयेन पृच्छति — **युक्तं पुनरिति**। **शब्दनिमित्तक इति**। शब्दो निमित्तमुत्पादकं यस्य स इत्यर्थः। **अर्थनिमित्तक एव शब्द इति**। अर्थबोधप्रयुक्त एव शब्दप्रयोग इत्यर्थः। उक्तं हि [1]'अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति। **तत्कथमिति**। तर्हि प्रत्ययस्याद्यन्तता केन वारणीयेति भावः। उत्तरमाह — **आद्यन्ताविति**। आद्यन्तरूपावयवावित्यर्थः। तेन द्विवचनमप्युपपन्नम्, प्रकृतसूत्रं च नानर्थकम्। **अत्रेति**। [2]'चरेष्टः' [3]'आतोऽनुपसर्गे कः' इत्यादौ। **त इति**। वयमिति शेषः। **न स्त इति**। इतीति शेषः। अलौकिकस्यार्थस्य शास्त्रीयस्य शब्दैकसमधिगम्यत्वात् शब्दाभावे [4]सोऽर्थो बुबोधयिषित एव न भवतीति मन्यामह इति भावः। तस्मादर्थबुबोधयिषाभावप्रयुक्त एव प्रत्ययविधौ षष्ठ्यभावः, न तु वैपरीत्यमित्याशयेनोपसंहरति — **तयोरिति**। आद्यन्तरूपावयवयोरित्यर्थः। बुबोधयिषाया इति शेषः। **अभाव इति**। अभावादेवेति भावः। [5]'अपिशब्दस्य भिन्नक्रमस्यावधारणार्थस्यात्र संबन्धात् 'अभावे सत्येव' इत्युक्तेन 'अभावादेव' इत्यर्थस्य फलितत्वाच्च। [6]'गापोष्टक्' [7]'व्रीहिशाल्योर्ढक्' इत्यादावपि सौत्रत्वात् पञ्चम्यर्थे व्यत्ययेन षष्ठी। तेन गापाभ्यां टक्, व्रीहिशालिभ्यां ढक्, इत्यादिरेवार्थ इति तत्राप्यस्याः परिभाषाया अप्रसङ्ग एव। प्रसङ्गेऽपि न दोष इत्यन्यदेतत्। यत्तूक्तम् 'पुरस्तादपवादन्यायस्तु यथोद्देशपक्षे संभवति, न कार्यकालपक्ष इति नाश्रितः' इति। तन्न, ज्ञापक[8]सिद्धकार्यकालपक्षस्य क्वचित् संज्ञापरिभाषाविषये इष्टमात्रसाधनाय प्रवर्तमानत्वेऽपि प्रकृतपरिभाषाया [9]'इको गुणवृद्धी' इति परिभाषावत् कार्यकालत्वासंभवात्। तत्संभवेऽपि यथोद्देशपक्षाश्रयेण तन्न्यायेन परिहारे बाधकाभावाच्च ॥

[१; ३४९–३५१]

(**नारायणीयम्**) बाध्यसामान्यापेक्षावाद्याह — **प्रत्ययेति**। बाध्यविशेषचिन्तावाद्याह — **पुरस्तादिति**। पुरस्तादपवादन्याये जाग्रति कथं प्रत्ययपरत्वबाधकत्वमस्येत्यत आह — **बाध्येति**। [10]'मिदचोऽन्त्यात्' इति दृष्टान्तेनोभयबाधनं वक्तुमशक्यम्, तत्रानुबन्धानर्थक्यादुभयबाधनात्। इह त्वनुबन्धस्य सावकाशत्वात् पुरस्तादपवादन्यायात् प्रत्यय[11]परत्वाबाधनमित्युक्तम्। तत्र ङीबादेः

---

[1] का. वा. १.
[2] पा. सू. ३. २. १६.
[3] पा. सू. ३. २. ३.
[4] सार्थः — ब.
[5] अतिशब्दस्य — ब.
[6] पा. सू. ३. २. ८.
[7] पा. सू. ५. २. २.
[8] सिद्धे कार्यकाल — ब.
[9] पा. सू. १. १. ३.
[10] पा. सू. १. १. ४७.
[11] परत्वबाधनम् — क.

[1]प्रयोजनत्वानिश्चयः परेणोच्यते। कुतोऽनिश्चय इत्यत आह — **सर्वेति**। उक्तमेव विशदयति — **सतीति**। टित्त्वकित्त्वयोः परत्वानिमित्तत्वाद् भाष्यायोगमाशङ्क्याह — **ङीबिति**। ङीबाद्यर्थत्वेऽनुबन्धस्य निश्चिते प्रत्ययपरत्वाबाधकत्वमस्य स्यात्। तन्निश्चयस्तु [न] टित्त्वादिनावयवत्वप्रतिपत्तेः सर्वापवादपक्ष इत्यर्थः। ङीबर्थतानिश्चायकलिङ्गाभावादभ्युपगमवादमात्रमेतदित्याह — **प्रयोजनमिति**। कित्त्वादन्तत्वे आल्लोपवचनस्य निर्विषयत्वात् परत्वनिश्चये तस्य सत्यपि विरोधाभावादन्तत्वमपि स्यादित्युक्तम्। तत्र विरोधं शङ्कित्वा परिहरति — **नन्विति**। टित्त्वस्यादित्वविध्यर्थत्वं देशविध्यर्थत्वं वेत्यनिश्चयात् 'स्यादेव' [2]इत्यादित्वविध्यर्थत्वोक्तिः कथमित्यत आह — **पूर्वेति**। बाध्यसामान्यचिन्तायां टित्त्वात् परत्वबाधनाद् [3]ङीबर्थत्वस्यासंभवेनैवेत्यर्थः। तर्हि पुनरुक्तिः किमर्थेत्यत आह — **अधिकमिति**। टिल्लक्षणङीपो विषयं वक्तुमित्यर्थः। सर्वापवादपक्षेऽत्राप्यादित्वविधौ सति कथमयं ङीपोऽवकाशः, तत्राह — **अत्रेति**। शब्दपरविप्रतिषेधादित्यर्थः। 'आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्य' इत्युक्तम्। तत्र गापोरिति षष्ठीनिर्देशादतिव्याप्तिरपरिहृतेत्याशङ्क्य [4]"षष्ठी स्थानेयोगा' इत्येतत्परिभाषापवादत्वादस्य यत्र स्थानसंबन्धप्रसङ्गस्तत्रैवोपस्थानम्। तत्प्रसङ्गश्चानियतयोगायां षष्ठ्यामिति गापोरित्यादावानन्तर्यसंबन्धनिश्चये न भवत्येतदुपस्थानमित्याह — **यत्रेति**। असंबन्धत्वादाद्यन्तयोः कथं षष्ठ्यर्थत्वम्, कथं वा टित्त्वादिनाद्यन्तावगतिरित्याशङ्क्यायामेष परिहार इत्यत आह — **षष्ठ्या इति**। यद्यत्र टित्त्वादिकमाद्यन्तार्थावगमकं स्यात् तदा प्रयोजकसद्भावात् षष्ठ्यपि स्यात्। न च दृश्यते षष्ठीत्यतः प्रयोजकाभावनिश्चयः। अनुक्तोपालम्भ इत्यत आह — **शब्देति**। वार्तिकाभिप्रायानभिज्ञस्यायमुपालम्भ इत्यर्थः। अभिप्रायाविष्करणार्थम् 'अर्थनिमित्तक एव' इत्यादिभाष्यम्। तत्रार्थस्य [5]शब्दनिमित्तत्वं कथमित्यत्राह — **अर्थ इति**। प्रयोजकाभावानुमापकस्य प्रयोज्याभावस्यासिद्धिमाशङ्क्य परिहरति — **चरेरिति**। यत्र तर्हि षष्ठीसत्त्वं कथं तत्राद्यन्ताभावानुमानम्, अत आह — **गापोरिति**। [6]षष्ठ्या संबन्धमात्रप्रयोजकतया संबन्धमात्रमनुमीयते। विशेषस्तु परवचनानुकूलो व्यवतिष्ठते, न त्वेतद्वचनानुकूलः, एतदपेक्षया परत्ववचनस्यान्तरङ्गत्वात्। तथा हि — स्थानसंबन्धप्राप्तौ तदपवादत्वेनास्य प्रवृत्तिः। तत्प्राप्तिश्चानियतयोगायां षष्ठ्याम्। गापोरित्यादौ च परत्ववचनेनैकवाक्यत्वादानन्तर्यविनिश्चयात् स्थानसंबन्धप्राप्त्यभावात् कुतस्तदपवादस्य प्राप्तिरिति भावः। ननु पुरस्तादपवादन्यायात् परत्वबाधकत्वमित्यस्ति परिहारः। स किमिति नोक्तः, तत्राह — **पुरस्तादिति**॥

मिदचोऽन्त्यात् परः. १. १. ४६.

[१, ३५२–३५३]

(**विवरणम्**) प्रयोजने पृष्टेऽपवादत्वाभिधानमसमञ्जसमित्यतः प्रश्नार्थमाह — **किमिति**। किं व्यावर्त्यत्वेन प्रयोजनमस्येति च 'किमर्थम्' इत्यस्यार्थ इति भावः। 'परप्रत्यय' इति न विशेष्यपरम्, ञ्नमः [7]प्रवृत्त्यङ्गीकारादित्याह — **तेनेति**। 'नपुंसकस्य' इति स्थानषष्ठी सूत्रेऽस्मिन्ननुपस्थिते, उपस्थिते त्ववयवषष्ठी। 'झलचः' इत्यस्य नपुंसकविशेषणत्वे विवादाभाव इति द्रष्टव्यम्।

---

[1] प्रयोजनत्वनिश्चयः — क.
[2] इति देशविध्यर्थत्वोक्तिः — क.
[3] ङीबर्थस्यासं — क.
[4] पा. सू. १. १. ४९.
[5] शब्दनिमित्तकत्वं — क.
[6] षष्ठीसंबन्ध — क.
[7] प्रत्ययत्वस्येत्यादिः।

प्रदीपे [1]यत्र स्थानषष्ठी प्राप्ता एतत्सूत्रोपस्थानेनावयवषष्ठीत्वेन व्यवस्थाप्यते तत्रास्योपस्थानम्। न च झलचो 'नपुंसकस्य' इत्यनेन विशेषणे तत्संभवतीत्याशङ्क्य [2]चेदमुक्तम् — **नपुंसकस्येति**। भाष्ये **नैवेश्वरः** राजा, **नापि धर्मसूत्रकाराः** धर्मशास्त्रकारा इत्यर्थः। एतच्चासंभवविषयत्वेन संकोचाभावायोक्तम्। **मग्न इति**। मस्जेर्निष्ठायां [3]'मस्जिनशोर्झलि' इति जकारात् पूर्वं नुमि [4]'अनिदिताम्' इति नलोपे [5]'स्कोः संयोगाद्योः' इति सलोपे [6]'चोः कुः' इति कुत्वे [7]'ओदितश्च' इति निष्ठानत्वे च रूपम्। अत्र चान्त्यादचः परे नुम्यविशेषेण संयोगसंज्ञायां यद्यपि [8]'स्कोः' इति सलोपः सिध्यति, तथापि तस्यासिद्धत्वान्नकारस्योपधात्वाभावान्नलोपो न स्यादिति भावः। **ऊमगमः** औणादिक इति भावः॥

[१, ३५२–३५३]

(**उद्द्योतनम्**) प्रयोजनप्रश्ने व्यावर्त्याभिधानमसंगतम्, अत आह — **किमिति**। व्यावर्त्यत्वेन प्रयोजनं किमस्येति 'किमर्थम्' इति भाष्यार्थः। श्नमः प्रत्ययत्वाङ्गीकारात् परत्वमात्रस्यापवादो न [9]'प्रत्ययत्वस्येत्यभिप्रेत्य भाष्ये 'प्रत्यय[10]परत्वस्य' इत्युक्तम्। तमर्थं वार्तिकारूढं करोति — **परस्य सत इति**। परेति विशेषणसामर्थ्याद् विशेषणप्रधानो निर्देशः। अन्यथा 'स्थानप्रत्ययापवादः' इत्येवावक्ष्यदित्यर्थः। ननु 'नपुंसकस्य' इति नुम्विधानेऽवयवषष्ठीत्वेन स्थानेयोगत्वस्याप्राप्त्या कथं तदपवादत्वमित्याशङ्क्य सूत्रार्थकथनपूर्वकं निराह — **नपुंसकस्येति**। **तदन्तेति**। विशेष्यसंनिधानात् पक्षद्वयेऽपि तदन्तविधिरेवेत्यर्थः। **स्थान इति**। एतदनुपस्थितिदशायामित्यर्थः। [11]**अस्मिन्निति**। [12]मित्त्वलिङ्गेनेत्यादिः। **नपुंसकस्येति**। झलन्तस्याजन्तस्य च नपुंसकस्यावयवो [13]योऽन्त्योऽच् ततः पर इत्यर्थलाभादित्यर्थः। भाष्ये **नास्ति संभव इति**। [14]'अलोऽन्त्यस्य' इत्यन्त्यस्याच एव स्थानित्वम्। तथा च नुमस्तत्स्थानिकत्वं ततः परत्वं च न संभवतीत्यर्थः। संभवमुपपादयति — **ततश्चेति**। अलोऽन्त्यपरिभाषयेत्यादिः। भाष्ये **ईश्वरः** राजा। **धर्मसूत्रकाराः** धर्मशास्त्रकाराः। [15]राजाद्यधीनत्वे तदिच्छया असंभवस्थल एवापवादस्य बाधकत्वं न तु संभवस्थलेऽपीति संकोचः सिध्येदिति भावः। 'लोके हि' इत्यस्य तात्पर्यमाह — **तत्रेति**। ईदृश्येवेत्यस्य विवरणम् — **यदिति**। भाष्ये **मग्न इति**। मस्जेर्निष्ठायां [16]'मस्जिनशोः' इति जात्पूर्वं नुमि [17]'अनिदिताम्' इति नलोपे [18]'स्कोः संयोगाद्योः' इति सलोपे [19]'चोः कुः' इति कुत्वे [20]'ओदितश्च' इति

---

[1] यत्र स्थाने षष्ठी — ञ; या स्थानषष्ठी — ट.
[2] चकारो नास्ति — ञ.
[3] पा. सू. ७. १. ६०.
[4] पा. सू. ६. ४. २४.
[5] पा. सू. ८. २. २९.
[6] पा. सू. ८. २. ३०.
[7] पा. सू. ८. २. ४५.
[8] पा. सू. ८. २. २९.
[9] प्रत्ययस्येत्यभिप्रेत्य — ऋ.
[10] परस्येत्युक्तम् — इ, ऋ.
[11] तस्मिन्निति — म, आ, इ, उ, ऋ.
[12] प्रदीपे 'मित्त्वात्त्वस्मिन्नुपस्थिते' इत्यत्र मित्त्वाच्चास्मिन्नुपस्थिते' इति निर्णयसागरमुद्रिते पाठः। एवमन्नंभट्टेनादिपूरणकथनात् 'मित्त्वात्' इति हेतुनिर्देशोऽस्य पाठे नास्तीति ज्ञायते।
[13] योऽन्त्याच् — उ, ऋ.
[14] पा. सू. १. १. ५२.
[15] राजाधीनत्वे — अ.
[16] पा. सू. ७. १. ६०.
[17] पा. सू. ६. ४. २४.
[18] पा. सू. ८. २. २९.
[19] पा. सू. ८. २. ३०.
[20] पा. सू. ८. २. ४५.

निष्ठानत्वे च रूपम्। यद्यप्यन्त्यादचः परेऽपि नुम्यविशेषेण संयोगसंज्ञायां सलोपः सिध्यति, तथापि तस्यासिद्धत्वेन नकारस्योपधात्वाभावान्नलोपो न स्यादित्यत्यन्त्यात् पूर्वत्वमुक्तम्। भाष्ये **अनुषङ्गः** नकारः। भाष्ये **मङ्क्ता** तृचि पूर्ववदेव सलोपे कुत्वे चर्त्वे नकारस्यानुस्वारे परसवर्णे च रूपम्। एवं तुमुनि मङ्क्तुम्। ऊमीमावौणादिकौ॥

[१, ३५२–३५३]

(**रत्नप्रकाशः**) **किमर्थमिति**। 'मिदचोऽन्त्यात् परः' इतीदं किमर्थमुच्यत इत्यर्थः। एतेन 'किमनेन व्यावर्त्यत इति प्रश्नः' इति निरस्तम्। तथापि प्रतिवचनस्य प्रश्नसामानाधिकरण्यालाभे[१] यथाश्रुताक्षरत्यागे मानाभावात्। स्थानेयोगप्रत्ययपरत्वापवाद इति तद्बाधनार्थमिति गम्यमानत्वात् प्रश्नप्रतिवचनयोरेतादृशवैयधिकरण्येऽपि न दोषः। **स्थानेयोगत्वस्येति**। स्थानेयोगत्वबोधक[२]'षष्ठी स्थानेयोगा' इति सूत्रस्येत्यर्थः। **प्रत्ययपरत्वस्य चेति**। प्रत्ययस्य सनादेः परत्वबोधक [३]'परश्च' इत्यधिकारसूत्रस्य चेत्यर्थः। एतेन 'परस्य सतः प्रत्ययस्यापवादः, तेन सामर्थ्यादयमर्थः — प्रत्ययपरत्वस्यापवाद इति' इति निरस्तम्। श्नमो धातुपरत्वस्यैव निराकरणीयतया 'परस्य सतः प्रत्ययस्यापवादः' इत्युक्तेर्व्याहतत्वात्। सनादीनां पूर्वं परत्वे बोधिते पश्चाद्वाक्यभेदेन प्रत्ययसंज्ञायामपि [४]'परश्च' इति सूत्रं वस्तुतः प्रत्ययपरत्वबोधकमिति व्यवहारे बाधकाभावाच्च। यदप्युक्तम् "**कुण्डानीति**। [५]'नपुंसकस्य झलचः' इत्यत्र झलज्भ्यां नपुंसकस्य तदन्तविधिरित्यस्ति स्थानेयोगत्वप्रसङ्गः। मित्त्वात्त्वस्मिन्नुपस्थिते नपुंसकस्याङ्गस्येत्यवयवषष्ठी संपद्यते" इति। तदपि न, 'मित्तस्याचामन्त्यात् परो भवति यस्य त्वयम्' इति यथोद्देशपक्षे व्याख्यानेन मिद्विधौ षष्ठ्यादेरवयवार्थकताया एव कल्पयितुमुचितत्वेन [६]समीपानन्तर्यस्थानार्थकताबाधफलकातिगौरवावहकार्यकालपक्षाश्रयणायोगात्। मिद्यत्र विधीयते तत्राचोऽन्त्यात्पर इत्युपस्थितं ज्ञेयमिति व्याख्यानमपि प्रकृतसूत्रस्य नोचितम्, तथापि गौरवस्यापरिहारात्। नपुंसकस्याङ्गस्येति षष्ठ्या अवयवार्थकताया [७]अच इत्येतदपेक्षत्वेन 'झलन्तस्याजन्तस्य च नपुंसकस्याङ्गस्याचामन्त्यात् परो नुम् स्यात्' इति सूत्रार्थसंपत्त्या तस्य नुमोऽङ्गावयवताया असिद्धेश्च। न चेष्टापत्तिः, अनुपदमेव पराद्यभक्तत्वपक्षदूषणानां नपुंसकाद्यवयवत्वपक्षाश्रयेण परिहारस्य, पञ्चारत्निनी इत्यादौ "इगन्तकाल' इति पूर्वपदप्रकृतिस्वरसिद्धेश्च भाष्यकृता वक्ष्यमाणत्वेन तद्विरोधात्। **इदं त्वयुक्तमिति**। प्रकृतसूत्रेण मितोऽन्त्यादचः परत्वमात्रं बोधितम्, न तु मिद्विधौ षष्ठ्या अवयवार्थकतेति [८]तस्याः स्थानार्थकतायाः सुस्थत्वादिति मन्यते। **स्थाने चेति**। सकारस्येति शेषः। [१०]'तुष्यतु दुर्जनः' इति न्यायेन शङ्कितमभिमतमङ्गीकृत्य समाधत्ते — **एतदपीति**। पयांसीत्युदाहरणमपीत्यर्थः। **किं तर्हीति**। तर्हि 'अपवादैरुत्सर्गा बाध्यन्ते' इत्यत्र किं मूलमिति भावः। **लौकिकोऽयं दृष्टान्त इति**। **अयम्** अपवादैरुत्सर्गा बाध्यन्त इत्येतन्मूलभूतः **लौकिक** एव दृष्टान्त इति भावः। भवतु

---

[१] अलाभेनेत्यर्थः।
[२] पा. सू. १. १. ४९.
[३] पा. सू. ३. १. २.
[४] पा. सू. ३. १. २.
[५] पा. सू. ७. १. ७२.
[६] समीपशब्दो भावप्रधानत्वात् सामीप्यपरो बोध्यः।
[७] प्रकृतमिदचोऽन्त्यादित्यत्रत्याच इत्येतदपेक्षत्वेनेत्यर्थः।
[८] पा. सू. ६. २. २९.
[९] षष्ठ्या इत्यर्थः।
[१०] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

किं तावता, 'सत्यपि संभवे बाधनम्' इति कथं लब्धमित्यत आह — **लोके हीति**। **अन्त्यादिति**। अल इति शेषः। अनुषङ्ग इति नकारस्य संज्ञा प्राचाम्। **भर्जिमर्च्योश्चेति**। 'भृजी भर्जने' इत्यस्यौणादिकेऽचि गुणे रपरत्वे च जकारात् पूर्वं ऊमागमः। 'मर्च शब्दार्थे' इत्यस्य चौरादिकस्य णिचि [1]'अचः इः' इतीप्रत्यये णिलोपे च चकारात् पूर्वं ईमागमः॥

[१, ३५२–३५३]

(**नारायणीयम्**) प्रयोजनमात्रप्रश्नोऽयं न भवति, देशविशेषलाभस्यान्यतोऽभावात्। किं तु तद्विशेषजिज्ञासया प्रश्न इत्याह — **किमिति**। देशविधेः कथं परत्वोपलक्षितप्रत्ययबाधकत्वम्, सजातीयविषयत्वाद्बाध्यबाधकभावस्य, अत आह — [2]**परस्येति**। परत्वं विशेषणं न तूपलक्षणम्। ततश्च 'स्वर्गी ध्वस्तः' इतिवत् क्रियासंबन्धस्य विशेषणमात्रपर्यवसानमित्यर्थः। अतः 'प्रत्यय-परत्वस्य' इति भाष्योपपत्तिरित्याह — **तेनेति**। [3]'नपुंसकस्य झलचः' इत्यत्र नपुंसकस्य [4]झलज्विशेषणत्वे 'झलचः' इति षष्ठ्याः स्थानेयोगत्वं प्रसक्तम्। न च [तत्] मिदचोऽन्त्यात् पर इत्यनेन बाधितुं शक्यते, झलज्वर्णापेक्षयान्त्याचोऽसंभवात्। अतः स्थानेयोगत्वं नपुंसकस्येति षष्ठ्याः प्राप्तं [5]बाध्यतेऽस्माद्वचनादित्याह — **नपुंसकस्येति**। नपुंसकाङ्गस्थानिकत्वस्यान्त्यादचः परत्वेन कथं न विरोध इत्याशङ्क्य स्थानषष्ठ्या अन्त्येऽल्युपसंहारादित्याह — **ततश्चेति**। 'अयम्' इत्यनेनापवादेनोत्सर्गबाधः परामृश्यते। स च न कस्यचिद् दृष्टान्तः, अतो व्याचष्टे — **निश्चय इति**। किंमूलोऽयं निश्चय इत्यत्राह — **तत्रेति**॥

[१, ३५३–३५७]

(**लघुविवरणम्**) **संघातस्येति**। समुदायावयवसंनिधौ समुदायग्रहणस्य न्याय्यत्वादिति भावः। पूर्वस्यादिरिति शङ्कां [6]निवर्तयति — **न हीति**। 'ता ता' इत्यादौ [7]'शेश्छन्दसि' इति [8]लोपः। **नुमेति**। [9]'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्यनपेक्ष्योक्तम्। [10]नुम्ग्रहणकरणमेव गुर्वित्यत्राह — **उत्तरपदस्येति**। **तद्ग्रहणेनेति**। ततश्च [11]पदावयवत्वं [12]नकारस्येति [13]पदाधिकारेण पदावयवस्यापि विधीयमानोऽनुस्वारः सिद्ध इत्यर्थः॥

[१, ३५३–३५७]

(**विवरणम्**) अन्त्यादचः परत्वं तस्यैव पूर्वस्यावयवत्वं च विरुद्धमित्यत आह — **संघातस्येति**। ननु नुमि कृते नान्तसमुदायोपधा अकार इति कस्मान्न दीर्घ इत्यत आह — **नान्तमिति**। [14]'अङ्गस्य'

---

[1] उणादिसूत्रम् ५८८.
[2] परत्वस्येति — क.
[3] पा. सू. ७. १. ७२.
[4] झल्विशेषणत्वे — क.
[5] बाध्यते तस्मात् — क.
[6] निरस्यति — ण.
[7] पा. सू. ६. १. ७०.
[8] लुक् — ण.
[9] परिभाषा ८०.
[10] नुम्ग्रहणमेव — त.
[11] 'पदावयवत्वम्' इत्यादि 'पदाधिकारेण' इत्यन्तं नास्ति — ड.
[12] नकारस्येत्यर्थः। — ण.
[13] 'पदाधिकारेण' इति नास्ति — त.
[14] पा. सू. ६. ४. १.

इत्यधिकारान्नान्तमङ्गं तत्र गृह्यत इति भावः। [**गौरवापत्तिः**] प्रतिपत्तिगौरवापत्तिरित्यर्थः। भाष्ये 'त्री ते वाजिना' इत्यादौ [1]"शेश्छन्दसि बहुलम्' इति शेर्लोपः। **नुमेति**। व्यञ्जनस्याविद्यमानत्वं स्वस्य स्वरप्राप्ताविति भावः। भाष्येऽभिनवं न कर्तव्यमित्युक्तम्, तथापि पक्षान्तरेऽनपेक्षितमत्र कर्तव्यमिति गौरवमित्याशङ्क्य पक्षान्तरेऽपि तदवश्यं करणीयमित्याह — **उत्तरेति**। भगशब्दादिनि तद्धितान्तत्वान्नकारः प्रातिपदिकान्तो भवतीति 'गर्गभगिनी' इत्यत्रानुच्यमाने उत्तरपदस्येत्यस्मिन्[2] णत्वप्रसङ्गः। सति तु तस्मिन् ईकार उत्तरपदान्तो न नकार इति णत्वाप्रसङ्गः। संभवति चोभयान्तो नकारो 'माषवापिणौ' इत्यादाविति भावः। **स हीति**। 'माषवापाणि' इत्यादौ [3]"अङ्गस्य' इत्यधिकारादङ्गस्य भक्तो नुम्, नोत्तरपदस्येत्यर्थः। 'द्विषंतपः, परंतपः' इत्यत्र [4]"द्विषत्परयोस्तापेः' इति खच्। [5]"खचि ह्रस्वः' इति ह्रस्वे च [6]'अरुर्द्विषदजन्तस्य' इति मुम्। तत्र द्विषंतप इति नोदाहरणमित्याह — **प्रसङ्गेति**। द्विषता पदेन [7]ग्रहणे च तकारस्य संयोगान्तलोपे मकारः पदान्त इति [8]"मोऽनुस्वारः' इति सिद्धोऽनुस्वार इत्यर्थः। 'वहंलिहः' इत्यादौ [9]"वहाभ्रे लिहः' इति खश्। वार्तिके 'शीभावे' इत्यस्यानन्तरमध्याहारेण दोषो भवतीत्युक्त्वा [10]"शीभावे दोषविशेषे सामान्यपर्यवसानाय [11]"नकारप्रतिषेधः' इति पश्चाद्योजनीयम्। अथवा नकारप्रतिषेध इति संबन्धसामान्ये षष्ठ्याः समासः। **प्रतिषेधः** निवर्तनमभावश्च। तेन यथासंभवं नकारे सति निवर्तनं कस्यचित् कर्तव्यम्, कस्यचिदभावः स्यात्, क्वचिच्च नकारस्य स्थानित्वनिवर्तनमिति योजनीयम्। टजभावाय नपुंसकत्वाय चाह — **बहुव्रीहिरिति**। उदाहरणं दूषयति — **परादीति**। **न हीति**। परादिपक्षे च तकारावयवत्वान्मकारस्य निरन्तरहल्द्वयाभावेन संयोगसंज्ञाभावान्नास्ति संयोगान्तलोप इति भावः। **नेति**। [12]पादन्तात् षष्ठ्यनुच्चारणादित्यर्थः। **व्यवहितमिति**। नपुंसकान्न परमित्यर्थः। धानाश्च शष्कुल्यश्चेति समाहारद्वन्द्वे तद्द्वित्वविवक्षायां 'धानाशष्कुलिनी' इति द्विवचनम्। एवमन्यत्रापि। तत्र ह्रस्वत्वे कृते नुमिति नास्ति दोष इत्यत आह — **नित्यत्वादिति**। परत्वादित्युक्ते त्विष्टवाचित्वात् परशब्दस्य ह्रस्व एव भविष्यतीति परो ब्रूयादिति परत्वादिति नोक्तम्। **तत्रेति**। [13]"अचश्च' इत्युपस्थितेन प्रातिपदिकस्य विशेषणादजन्तस्य ह्रस्वत्वेन भवितव्यमिति भावः। **तथैवेति**। नुमि कृते न स्त्रीप्रत्ययान्तं प्रातिपदिकम्, नाप्यजन्तमिति भावः। **नित्यादिति**। तथा चोच्यते — [14]परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसंनिपाते तेषां च मिथः प्रसङ्गे परबलीयस्त्वम्, इति। एतच्च युगपत्प्राप्तिमङ्गीकृत्योक्तम्[15]। वस्तुतस्तु विभक्तेः प्रागेव ह्रस्वादीति न युगपत्प्राप्तिरित्यपि द्रष्टव्यम्। यद्यपि भाष्येऽसिद्धपरिभाषैवोक्ता, तथापि 'द्विगुस्वरे भूयान्' इत्यनेकोप[16]लक्षणार्थबहुशब्दाद् भाष्ये आतिशायिकप्रत्ययप्रयोगेण [17]पूर्वत्रा-

---

[1] पा. सू. ६. १. ७०.
[2] पदस्येत्येतस्मिन् — अ.
[3] पा. सू. ६. ४. १.
[4] पा. सू. ३. २. ३९.
[5] पा. सू. ६. ४. ९४.
[6] पा. सू. ६. ३. ६७.
[7] ग्रहणेन तकारस्य — अ.
[8] पा. सू. ८. ३. २३.
[9] पा. सू. ३. २. ३२.
[10] शीभावे विशेषे — च छ, अ.
[11] वार्तिके 'नकारप्रतिषेधाः' इत्यत्र 'नकारप्रतिषेधः' इत्येकवचनान्तपाठोऽभिमत इति भाति।
[12] पदान्तात् — च, छ.
[13] पा. सू. १. २. २८.
[14] प्रत्ययोत्तरपदयोश्चेति सूत्रे प्रदीपे इदमुक्तम्।
[15] अङ्गीकृत्येत्युक्तम् — अ.
[16] लक्षणार्थं बहु — अ.
[17] पूर्वत्राप्यनेन परिहार — च.

प्यनेकपरिहारसूचनात् तदुपपादनाय स्वयं 'नित्यादपि' इत्युक्तमित्यविरोधः। भाष्ये च पञ्चारत्नि-शब्दः [1]'प्रमाणे लः, द्विगोर्नित्यम्' इति कृतमात्रज्लुङ् निर्दिष्टः, समाहारद्विगुर्वा ॥

[१, ३५३–३५७]

(**उद्द्योतनम्**) नन्वचः परत्वमजवयवत्वं च विरुद्धम्, अत आह — **संघातस्येति**। **भक्तः** अवयवः। **एकदेशस्य** अन्त्यस्याचः। नन्वन्त्याजपेक्षयैवादित्वं किं न स्यात्, अत आह — **न होति**। **पूर्वस्य** अचः। नुमि कृते उपधात्वसंपत्त्या दीर्घः कुतो न स्यात्, अत आह — **नान्तमिति**। [2]'अङ्गस्य' इत्यधिकारात् नान्तमङ्गं तत्र गृह्यत इति भावः। अभक्तत्वेऽपि दीर्घसिद्धिं शङ्कते — **नन्विति**। [3]**तदिति**। [4]'यस्मात् प्रत्ययविधिः' इति सूत्र इत्यादिः। **गौरवेति**। प्रतिपत्तीत्यादिः। भाष्ये **वाजिनेति**। वाजिनानि तानि तानि। अत्र [5]'शेश्छन्दसि बहुलम्' इति [6]शेर्लुकि नलोपो न स्यात्, प्रातिपदिकान्तत्वाभावादित्यर्थः। **नुमेति**। [7]'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति च [8]स्वस्य स्वरप्राप्तौ सत्याम्। [9]अत्र व्यवधानेन प्राप्तिरेव नास्तीति भावः। भाष्ये 'अभिनवं न कर्तव्यम्' इत्युक्तम्, तथापि पक्षान्तरे नापेक्षितम्, अस्मिन् पक्षे कर्तव्यमिति [10]गौरवमेवेत्याशङ्क्य पक्षान्तरेऽपि नुम्ग्रहणं [11]कर्तव्यमित्यभिप्रेत्याह — **उत्तरपदस्येति**। उत्तरपदान्तस्येत्यर्थः। इनेर्नकारस्तद्धितान्तत्वात् प्रातिपदिकान्तः। तत्र 'उत्तरपदान्तस्य' इत्यनुक्तौ णत्वप्रसङ्गः। [12]तदुक्तावीकार उत्तरपदान्तो न नकार इति णत्वाप्रसङ्गः। माषवापाणीत्यत्र नकारस्योत्तरपदान्तत्वं नास्तीत्याह — **स होति**। नुमित्यर्थः। अङ्गाधिकारादङ्गभक्तो नुम्, नोत्तरपदभक्त इत्यर्थः। [13]'माषवापिणौ' इत्यादौ नकारस्योत्तरपदान्तत्वं प्रातिपदिकान्तत्वं चास्तीति न विषयासंभवः। एवमपि परादित्वपक्षे नुम्ग्रहणं न कर्तव्यमिति मन्तव्यम्। **द्विषंतप इति**। [14]'द्विषत्परयोस्तापेः' इति खच्। [15]'खचि ह्रस्वः', [16]'अरुर्द्विषदजन्तस्य मुम्'। तत्र द्विषंतप इति [17]नोदाहरणमित्याह — **प्रसङ्गेति**। द्विषद्ग्रहणेन ग्रहणे सति तकारस्य संयोगान्तलोपे मकारः पदान्त इति मोऽनुस्वारः सिद्ध इत्यर्थः। भाष्ये **वहंलिह इति**। [18]'वहाभ्रे लिहः' इति खश्। [19]'अरुर्द्विषत्' इति मुमागमः। ननु पूर्वं शीभावः पश्चान्नुम् किं न स्यात्, अत आह — **नित्यत्वादिति**। टजभावाय नपुंसकत्वाय चाह — **बहुव्रीहिरिति**। द्विषंतप इत्येतद् दूषयति — **परादीति**। **सिद्ध इति**। तकारलोपे सतीत्यादिः। [20]'परेषां समाधानमाह — **अन्य इत्यपि**। **न होति**। तकारे विद्यमाने मकारो

---

[1] श्लो. वा. ५. २. ३७. सूत्रे भाष्ये.
[2] पा. सू. ६. ४. १.
[3] तत्रेति — उ, ऋ.
[4] पा. सू. १. ४. १३.
[5] पा. सू. ६. १. ७०.
[6] शेर्लोप इत्यर्थः। तेन लोपस्यैव विधानात्।
[7] परिभाषा ८०.
[8] स्वरस्य — अ, आ, इ, उ, ऋ, म. एवं कोशेषूपलम्भेऽपि विवरणमनुसृत्य 'स्वस्य' इति शोधितम्। स्वस्य व्यञ्जनस्येत्यर्थात्।
[9] अत इत्यादिः। नुमोऽविद्यमानवद्भावाभावादित्यर्थः।
[10] गौरवमित्याशङ्क्य — अ.
[11] कर्तव्यमित्याह — अ.
[12] 'तदुक्तौ' इत्यादि 'णत्वाप्रसङ्गः' इत्यन्तं नास्ति — इ.
[13] माणवापाणीत्यादौ — उ.
[14] पा. सू. ३. २. ३९.
[15] पा. सू. ६. ४. ९४.
[16] पा. सू. ६. ३. ६७.
[17] नोदाहरणीयमित्याह — म.
[18] पा. सू. ३. २. ३२.
[19] पा. सू. ६. ३. ६७.
[20] 'परेषाम्' इति नास्ति — अ, इ, उ.

न पदान्तः। तलोपेऽपि न पदान्तः, पदावयवावयवत्वेन पदावयवत्वाभावात्। अतोऽनुस्वारो न स्यादित्यर्थः। [1]अन्ये तु — तकारावयवत्वान्मकारस्य निरन्तर[2]हल्द्वयाभावेन संयोगसंज्ञाया अभावात् संयोगान्तलोपो नास्तीति भावः, इत्याहुः। तच्चिन्त्यम्, प्रत्यक्षसिद्धहल्द्वयस्य दुरपह्नवत्वात्। संयोगसंज्ञायाम् 'अनवयवत्वे सति' इति विशेषणाभावात्। 'द्वयोः' इति [3]प्रदीपस्वारस्याच्च। **शीभाव इति**। एतेन वार्तिकेऽनुस्वारान्तं लुप्तसप्तमीकं पृथक्पदम्। गुणादावनुस्वारान्ते दोष इत्यर्थः। 'शीभावे' इत्यादि तु वाक्यान्तरमिति सूचितम्। [4]अन्ये तु 'शीभावे दोषः' इति सामान्येनोक्त्वा शीभावे दोषविशेषपर्यवसानाय 'नकारप्रतिषेधः' इत्युक्तम्। यद्वा 'नकारप्रतिषेधः' इति संबन्धसामान्ये षष्ठीसमासः। **प्रतिषेधो** निवर्तनमभावश्च। तथा च नुम्रूप[5]नकारे सति गुणादेर्निवर्तनं कर्तव्यम्, स्थानिनो नकारस्याभावश्च स्यादित्यर्थं इत्याहुः। **यथेति**। संख्यासुपूर्वस्य पाच्छब्दस्य पदादेशो निर्दिश्यमानस्यैव भवति, न संख्यादिसहितस्येत्यर्थः। [6]'न हि स्वाङ्गम्' इति न्यायेन तदवयवेन नुमा कथं व्यवधानम्, अत आह — **श्रुतीति**। **तत्त्वत इति**। क्लीबात् परस्यौकारस्य शीभावे विधीयमाने तदवयवस्य नकारस्य व्यवधायकत्वमेव। अत एवोक्तम् — **श्रुतीति**। धानाश्च शष्कुल्यश्चेति समाहारद्वन्द्वे [7]द्वित्वविवक्षायां 'धानाशष्कुलिनी' इति द्विवचनम्। एवमन्यत्रापि। तत्र ह्रस्वानन्तरं नुमि नास्ति दोषः, अत आह — **नित्यत्वादिति**। परशब्दस्येष्टवाचित्वात् ह्रस्वत्वमेव पूर्वं किं न स्यादिति [8]'परो वदेत्, अतः परत्वादिति नोक्तम्। वार्तिके नपुंसकह्रस्वत्वमुपसर्जनह्रस्वत्वं चेत्यर्थः। नुमनन्तरमेव ह्रस्वोऽस्तु, अत आह — **तत्रेति**। नुमीत्यर्थः। ह्रस्वश्रुत्या [9]'अचश्च' [10]इत्युपतिष्ठते। तेन च प्रातिपदिकस्य विशेषणादजन्तस्य ह्रस्वेन भवितव्यमिति भावः। नन्वत्रापि नपुंसकह्रस्वत्वसंभवादुपसर्जन[11]ह्रस्वत्वस्य नोदाहरणम्, अत आह — **नपुंसकेति**। [12]**तथैवेति**। नुमि सति न स्त्रीप्रत्ययान्तं नाप्यजन्तमिति भावः। भाष्ये **द्विगुस्वर इति**। [13]'इगन्तकालकपालभगालशरावेषु द्विगौ' इति पूर्वपदप्रकृतिस्वरः। पञ्च अरत्नयः प्रमाणमनयोरिति मात्रचो [14]'द्विगोर्नित्यम्' इति लुक्, सभाहारद्विगुर्वा। **नित्यादिति**। तथा चाहुः — [15]'परनित्यान्तरङ्गप्रतिपदविधीनां [16]परबलीयस्त्वम्, इति। एतच्च युगपत्प्राप्तिमङ्गीकृत्योक्तम्। वस्तुतो विभक्तेः प्रागेव ह्रस्वादीति न युगपत्प्राप्तिरिति ज्ञेयम्। यद्यपि भाष्येऽसिद्धपरिभाषोक्ता, तथाप्यग्रे 'भूयान्' इति प्रयोगात् पूर्वत्रापि समाधानबहुत्वं सूचितम्। तत् 'नित्यादपि' इत्यनेनोक्तमिति मन्तव्यम्। पूर्वं नुमि सत्यपि स्वरसिद्धिमाह — भाष्ये **द्विगुस्वर इति**। असिद्धपरिभाषा, अन्तरङ्गस्य नित्यबाधकत्वं चोभयत्र समानम्, स्वरे संघातभक्तत्वमधिकमित्यभिप्रेत्य भाष्ये 'भूयान्' इति बहुशब्दादातिशायनिकः प्रयुक्तः॥

---

[1] विवरणोक्तिमनूद्य दूषयति — अन्ये त्वित्यादिना।
[2] हल्व्यवायाभावेन — अ.
[3] प्रदीपस्वरसाच्च — अ, इ, उ, ऋ.
[4] विवरणोक्तां वार्तिकयोजनामाह — अन्ये त्वित्यादिना।
[5] नकारेण गुणादेः — उ.
[6] लौ. न्या. प्रथमभागे पृष्ठम् ५४. 'स्वाङ्गं स्वव्यवधायकं न भवति' इति न्यायाकारः।
[7] तद्द्वित्व — उ.
[8] 'परो' इत्यन्तमेव 'उ' मातृकायां वर्तते।
[9] पा. सू. १. २. २८.
[10] इत्युपस्थिते च तेन — म, आ, ऋ; इत्युपस्थितेन — इ.
[11] ह्रस्वत्वेन नोदाहरणम् — इ.
[12] तदेवेति — ऋ.
[13] पा. सू. ६. २. २९.
[14] श्लो. वा. ५. २. ३७.
[15] प्रत्ययोत्तरपदयोश्चेति सूत्रे प्रदीप इदमुक्तम्।
[16] परपरबलीयस्त्वम् — म.

[१, ३५३–३५७]

(**रत्नप्रकाशः**) 'पयांसि, यशांसि' इत्यादेः प्रकृतसूत्रोदाहरणत्वं न युक्तमिति येन शङ्कितं प्राक्, स एव पृच्छति — **किं पुनरयमिति**। अन्त्यादचः परत्वेन बोधितोऽयमिति शेषः। संशयस्य त्रिकोटिकत्वे कारणं पृच्छत्यन्यः — **कथं वेति**। **यद्यन्त इति**। 'आद्यन्तौ' इति पूर्वसूत्रगतस्यैकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। **तत इति**। अन्त इत्यस्मात्। **पूर्वान्त इति**। स्वस्माद्यः पूर्वस्तस्यान्त इत्यर्थः। एवं परादिरित्यपि ज्ञेयम्। एतेन 'न हि संभवोऽस्ति यदचोऽन्त्यात् परश्च स्यात् पूर्वस्य चादिरिति सामर्थ्यात् परादित्वं विज्ञायते' इति निरस्तम्। यस्मात् पूर्वो मित् यस्माच्च परस्तयोरेवादित्वमन्तत्वं[1] संभवतीति स्पष्टत्वेन परान्तत्ववत् पूर्वादित्वस्याप्यप्रसक्तत्वेनैव सिद्धेरर्धजरतीयाश्रयणानौचित्यात्। मितः परस्यापि कस्माच्चित् पूर्वत्वेन [2]तस्यादित्वस्य, [3]कस्यचिदचामन्त्यात्परत्वस्य च संभवेन तदक्षरारूढासंभवस्यैवासंभवाच्च। **दीर्घत्वं नेति**। अङ्गस्य नान्तत्वाभावादिति भावः। दोषान्तरस्यानिवार्यतयाभक्तत्वपक्षस्त्यज्यत एवेत्यङ्गसंज्ञासूत्रगतेन तदादिग्रहणेन सिद्धमेतदिति नोक्तम्। तदादिग्रहणफलं तु 'भवामि, भविष्यामि' इत्यादौ विकरणविशिष्टस्याङ्गसंज्ञासिद्धिरेव। **त्रीति**। त्रीणीत्यर्थः। [4]"शेश्छन्दसि बहुलम्' इति शेर्लोपः। एवं 'ता ता' इत्यत्र तानि तानीत्यर्थः शिलोपश्च ज्ञेयः। **आद्युदात्तत्वं न प्राप्नोतीति**। नुमा व्यवधानेन [5]"सर्वस्य सुपि' इत्यस्याप्राप्तेरिति भावः। [6]"स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषा तु नेह प्रवर्तते, नकारस्य तत्राद्युदात्तं प्रति स्थानित्वाप्रसक्तेः। **न कर्तव्यमिति**। कर्तव्यमित्यापाद्यं न भवतीति भावः। कुत इत्यत आह — **क्रियते न्यास एवेति**। पूर्वमेव कृतत्वादिति भावः। **द्विषंतप इति**। तकारस्य संयोगान्तलोपे सति मुमः पूर्वमेव पदं संपन्नमिति मुमः पदान्तत्वाभाव इति भावः। एतेन "प्रसङ्गोच्चारितमेतत्। अत्र हि [7]"तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति मुमो द्विषद्ग्रहणेन ग्रहणमस्ति" इति निरस्तम्। तकारस्य लोपे 'मुमस्तन्मध्यपतितत्वाभावात्। न च संप्रति तन्मध्यस्थत्वाभावेऽपि पूर्वं तथा दृष्ट इति तद्ग्रहणेन ग्रहीष्यत इति वाच्यम्, तन्मध्यगतत्वस्य विशेषणत्वसंभवे तदपहायोपलक्षणत्वाश्रयणे मानाभावात्। प्रकृतभाष्यविरोधाच्च। **शीभावो न प्राप्नोतीति**। परत्वान्नित्यत्वाच्च नुमि कृते व्यवधानादिति भावः। **अतिसखीनीति**। बहुव्रीहित्वादत्र टजभावः। **णित्त्वे** णकारेत्कत्वे, सतीति शेषः। **अचो ञ्णितीति वृद्धिः प्राप्नोतीति**। एतेन [9]"गोतो णित्' [10]"सख्युरसंबुद्धौ' इति द्विसूत्रीं [11]"गाङ्कुटादिभ्योऽञ्णिन् ङित्' इत्यादि ङि[त्कि]त्प्रकरणद्वयं चातिदेशपरतया तत्रत्यप्रौढिभाष्यानुसारेण व्याचक्षाणा निरस्ताः। **औत्वं प्राप्नोतीति**। इदानीमत्र 'निर्दिश्यमानस्यादेशा भवन्ति, निर्दिष्टं च नुमा व्यवहितम्' इति समाधानं नोक्तम्, परादित्वस्यैव निराकरिष्यमाणत्वात्। एकत्रास्यापि समाधानस्य प्रदर्शयिष्यमाणत्वाच्च। **सुपि चेत्येवं भविष्यतीति**। संनिपातपरिभाषाया अनित्यत्वादिति भावः। **द्विषंतप इति**। द्विषच्छब्दतकारादेस्तपशब्दान्तस्य समुदायस्य परस्य मुमवयव इति तकारस्य [12]"संयोगान्तस्य' इति

---

[1] तन्निरूपितादित्वमन्तत्वं चेत्यर्थः।
[2] तन्निरूपितादित्वस्येत्यर्थः।
[3] कस्यचित्समुदायस्येत्यर्थः। अस्य अचामित्यनेनान्वयः।
[4] पा. सू. ६. १. ७०.
[5] पा. सू. ६. १. १९१.
[6] परिभाषा ८०.
[7] परिभाषा ९०.
[8] मुमस्तन्मध्ये पतितत्वाभावात् — ब.
[9] पा. सू. ७. १. ९०.
[10] पा. सू. ७. १. ९२.
[11] पा. सू. १. २. १.
[12] पा. सू. ८. २. २३.

लोपे सति मुमः पूर्वस्यैव पदत्वं स्थितमिति भावः। यत्तूक्तं 'परादिपक्षे तकारस्य मकारो भक्तः। तकारश्च पदान्त इति मकारोऽपि तद्भक्तत्वात् पदान्त इति सिद्धोऽनुस्वार इत्याहुः' इति। तन्न, प्रकृतभाष्यानुसारिप्रधानाप्रधानन्यायेन तत्तकारादिसमुदायावयवताया एव मुम उचितत्वेन मुमः पदान्तत्वायोगात्। अन्यथोपक्रमगतेन 'संघातस्य पूर्वस्य भक्तो न तदेकदेशस्य' इति स्वग्रन्थेन, उपसंहारगतेन 'संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुम्' इति भाष्येण च विरोधः स्यात्। 'पूर्वस्य समुदायस्यैवावयवः परस्य तु वर्णस्यैव' इत्यत्र विनिगमनाविरहाच्च। यदप्युक्तम् 'अन्ये तु तद्भक्तत्वात् तकारग्रहणेनास्य ग्रहणं भवतु, न तु पदान्तत्वम्। न हि द्वयोर्मकारतकारयोः पदान्तत्वमुपपद्यत इत्याहुः' इति। तदत्यन्तासंबद्धम्, तकारभक्तत्वे मानाभावात्। तकारस्थितिकाले मकारस्य पदान्तत्वाभावेऽपि तस्य लोपे पदान्तत्वसंभवाच्च। **नकारप्रतिषेध इति**। नकारघटितस्यैव शीभावः स्यादिति वाच्यमिति भावः। एतेन 'शीभावे विधीयमाने नकारस्य स्थानित्वप्रतिषेधो वक्तव्य इत्यर्थः' इति निरस्तम्। नकारस्य स्थानित्वप्रसक्तेरभावेन तन्निषेधायोगात्। **निर्दिश्यमानस्येति**। सूत्रे उच्चार्यमाणानुकार्यस्येत्यर्थः। सूत्रे त्वौङ इत्यस्योच्चारणमस्ति। तस्यानुकार्य औकार एव केवलः, न तु नकारविशिष्ट इति भावः। **नुमा व्यवहितत्वादिति**। नन्ववयवस्यावयविव्यवधायकत्वं कथमिति चेन्न, नकारविशिष्टस्यैव नकारं प्रत्यवयवित्वेन नकारविनिर्मुक्तस्य तं प्रत्यवयवित्वाभावात्। **आराशस्त्रिणी इति**। [1]'जातिरप्राणिनाम्' इत्येकवद्भावापन्नयोरेकशेषे द्विवचनम्। **निष्कौशाम्बिनी इति**। अत्र परत्वादुपसर्जनह्रस्वत्वम्। **पञ्चारत्निनी इति**। [2]'इगन्तकाल' इत्यादिना इगन्तादिषूत्तरपदेषु विधीयमानः पूर्वपदप्रकृतिस्वरो न सिध्यतीति भावः। [3]**नुमि कृतेऽनन्त्यत्वादिति**। विभक्त्युत्पत्तेः पूर्वमेवान्तरङ्गत्वात् ह्रस्वस्वरौ भवत इत्यजानन् विभक्त्युत्तरं नित्यत्वान्नुमि कृते तौ न प्राप्नुत इति मन्यते। **एते विधय इति**। विषयभेदेन द्वौ ह्रस्वौ, एकः स्वरश्चेति बहुवचनोपपत्तिः। **भूयान् परिहार इति**। स्वार्थे ईयसुन्। परिहारशब्दः परिहारसमुदायपरः। एकपरिहारापेक्षया परिहारद्वयसमुदायो हि **बहुः** विपुलो भवति। तदेवं मिद्विधाववयवावयविभावसिद्धिमन्तरेण पूर्वसूत्रादन्तशब्दमनुवर्त्य 'मिदचामन्त्यात् परोऽन्तावयवश्च भवति' इत्येवमर्थकतया प्रकृतसूत्रं भगवता समर्थितं यद्यपि, तथापि तत् प्रौढिवादमात्रम्। 'अचामन्त्यात् परोऽन्तावयवश्च स्यात्' इत्युक्ते परत्वेऽवधिभूतो योऽच् तस्यैव मितोऽन्तावयवत्वप्राप्तेः। अत एव ह्येतद्भाष्यश्रद्धाजाड्येनैतादृश एव प्रकृतसूत्रार्थ आश्रितः सिद्धान्तकौमुद्याम्—अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात्, इति। नन्वस्त्वयमेव प्रकृतसूत्रार्थः, को दोष इति चेत्, शृणु, मिद्विधौ षठ्याः स्थानार्थकता तथैव स्थितेति झलन्तस्याजन्तस्य च क्लीबस्य सर्वनामस्थाने, इगन्तस्य च तस्याजादौ विभक्तौ परतो निवृत्तत्वेन तदन्यस्य यस्य कस्यचिच्छब्दस्य नुम् स्यात्। एवमन्यत्राप्यूह्यम्। एवं च सति 'पञ्चारत्निनी' इत्यादिरूपस्यैवाप्रसिद्धया तदाश्रितस्वरविचारोऽयुक्तः स्यात्। किंच 'संघातभक्तोऽसौ' इति भाष्यमसंगतं स्यात्, नुमोऽन्त्याजवयवत्वेनोत्तरपदस्येगन्ततावि[4]रहात्। तथा च 'द्विगुस्वरे भूयान् परिहारः' इत्यपि भाष्यमसंगतं स्यात्। तथा चान्तरङ्गत्वेन द्विगुस्वरसाधनमपि तदीयमसंगतं स्यात्, [4]"अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इति नुमान्तरङ्गस्य द्विगुस्वरस्य बाधात्। ज्ञापकादिना तद्व्यवस्था-

---

[1] पा. सू. २. ४. ६.
[2] पा. सू. ६. २. २९.
[3] भाष्ये 'नुमि कृतेऽनजन्तत्वात्' इत्यत्र 'नुमि कृतेऽनन्त्यत्वात्' इति पूनामुद्रिते पाठः।
[4] इयं च परिभाषा न बहुव्रीहाविति सूत्रे भाष्ये प्रतिपादिता। तदनुरोधेनेदम्।

पने [1]'स्वगृहपायसभिक्षीयं स्यादिति। तस्मात् पूर्वसूत्रात् तदन्तग्रहणानुवृत्तिक्लेशं विनैव मित् 'तदचामन्त्यात् परः स्यात्, [2]'यस्य त्वयम्' इत्येतदर्थकतयैव प्रकृतसूत्रं व्याख्येयम्। एवं च व्याख्याते एतदनुरोधेन मिद्विधौ [या षष्ठी]या च पञ्चमी ते द्वे अवयवावयविभाव एव प्रयुक्ते इति विज्ञानात् तत्रत्यषष्ठ्याः स्थानेयोगत्वं श्नम्प्रत्ययस्य रुधादिपरत्वं च बाधितं भवतीति सर्वमनवद्यम्। एतेन 'तदत्र निर्दोषत्वात् पूर्वान्तपक्षस्थितिः'[3] इति निरस्तम्। तस्य पक्षस्यानेकदोषदुष्टताया उपपादितत्वात्। ननु [4]"यस्य त्वयम्' इत्युक्त्या मिद्विधौ षष्ठ्याः स्थानेयोगत्वमात्रं बाध्यतां नाम, [न प्रत्ययपरत्वमिति चेन्न,] सावयवावयविभाव एव भवति। [5]'तत्र तु सामीप्यानन्तर्ययोरन्तर्भावो भवति, अवयवस्यापि समीपेऽनन्तरे च संभवात्। वैपरीत्यं तु न भवति, मध्येऽवयवस्य प्रवेशसंभवेन तस्यानन्तर्यसामीप्याभ्यां संग्रहायोगात्। समीपेऽनन्तरे च जातस्यावयवत्वनियमाभावाच्च। किं च मिद्विधौ सर्वत्रावयवावयविभावे सति तदविरोधेनैवात्र तदचामन्त्यात् परत्वं बोधयितुं शक्यते। सामीप्यानन्तर्ययोः सतोस्तु हलन्तस्य मितस्तदविरोधेनान्त्यादचः परत्वं बोधयितुं न शक्यत इत्यतोऽपि तत्रावयवावयविभावः फलति। अपि च श्नमो मित्करणानुरोधेनापि तत्साधारण्येन मिद्विधावावयवावयविभाव एवाश्रयितुं युक्तः। तत्र सामीप्यानन्तर्ययोराश्रयणे तु तद्बाधेनान्त्यादचः परत्वं बोधनीयमित्युपजीव्यसंबन्धविरोधः स्यात्। अविरोधेनैव बोधसंभवे विरोधाश्रयणमन्याय्यम्॥

[१, ३५३–३५७]

(**नारायणीयम्**) नन्वन्तग्रहणानुवृत्तावपि पूर्वान्तत्वं कथं लभ्यत इत्याशङ्क्यान्त्याचः संनिधानात् तदपेक्षयान्त्यत्वपरिग्रहादित्याह — **पूर्वस्येति**। तर्हि कुण्डानीति कथं दीर्घः, स हि नान्ताङ्गस्य विधीयते, अत आह — **संघातस्येति**। अन्त्याचाक्षिप्तसमुदायभक्त इत्यर्थः। ननु श्रुतत्वादच आगमित्वं नाक्षिप्तस्य, अत आह — **नेति**। समुदायपारतन्त्र्यात् श्रुतस्यापि परित्यागः, प्रधानस्याक्षिप्तस्यागमित्वमित्यर्थः। ननूक्तन्यायादादिग्रहणानुवृत्तावपि [6]'पूर्वादित्वप्रतिपत्तेः कथं परादित्वं लभ्यम्, अत आह — **न हीति**। पूर्वादित्वासंभवेऽपि [7]'कथमसंनिहितपरपदार्थलाभः, तत्राह — **सामर्थ्यादिति**। आदित्वस्य सप्रतियोगिकत्वात् स्वात्मापेक्षया चादित्वानुपपत्तेः परिशेषलभ्यं परादित्वमित्यर्थः। अभक्तत्वेऽपि नान्तस्याकार उपधेति दीर्घः सिध्यतीत्यत आह — **नान्तमिति**। **स्मर्तव्यमिति**। स्याद्यर्थं तु कर्तव्यं तदवश्यमिति कर्तव्यत्वं नापादितम्। स्वरविधौ व्यञ्जनस्याविद्यमानत्वादिष्टसिद्धिमाशङ्क्य हल्स्वरप्राप्तौ तदित्यभिसंधायाह — **नुमेति**। भक्तपक्षे नुमोऽग्रहणाल्लाघवम्, इतरत्र गौरवमित्युक्ते 'क्रियते' इति परिहारोऽसंगतः, तत्राह — **उत्तरपदस्येति**। परादिपक्षो बहुदोषग्रस्तः, पूर्वान्तपक्षे कर्तव्यमेव नुम्ग्रहणम्, उत्तरपदप्रातिपदिकान्तत्वाभावादित्यर्थः। [8]'तद्धितप्रातिपदिकान्तत्वेऽप्युत्तरपदप्रातिपदिकान्तत्वाभावाद् गर्गभगिन्यां णत्वाभावः। प्रस्तुत उत्तरपदप्रातिपदिकान्तत्वाभावमाह — **स हीति**। नन्वतिव्याप्तिनिवारणाय तत्र समासान्तग्रहणमेव चोदयिष्यते [9]"प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थम्' इति। तत् कथं

---

[1] 'स्वगृहे पायसं त्यक्त्वा भिक्षामटति दुर्मतिः' इति न्यायाकारः।
[2] यस्य स्वयम् — ब.
[3] अर्थानुवादोऽयं बोध्यः।
[4] यस्य स्वयम् — ब.
[5] न तु — ब.
[6] पूर्वादित्वे प्रतिपत्तेः — क.
[7] कथं संनिहित – क.
[8] तद्धितशब्देन तद्धितान्तं गृह्यत इति बोध्यम्।
[9] का. वा. ८. ४. ११–१.

पूर्वान्तपक्षे नुम्ग्रहणमन्तरेण णत्वसिद्धिः। अत्राहुः — समासशब्देन समासार्थमुत्तरपदं गृह्यते। [1]'समासान्ताः' इति यथेति। वस्तुतस्तु [2]'पूर्वपदात् संज्ञायाम्' इति नियमापवादत्वादस्य णत्वस्य पूर्वपदमिह संनिधाप्यते। तेन चोत्तरपदाक्षेपाद् विना वचनेनोत्तरपदप्रातिपदिकपरिग्रह इत्यभिसंधिना 'उत्तरपदप्रातिपदिकान्तस्य' इत्युक्तम्। **प्रसङ्गेति**। [3]'द्विषत्परयोः' इति खज्विधौ सह निर्दिष्टत्वात् परंतपोदाहरणकाले द्विषंतपोदाहरणमित्यर्थः। किमिति प्रासङ्गिकत्वम्, अत आह — **अत्र हीति**। यथा हि पूर्वान्तपक्षे संयोगान्तलोपे सति मकारस्य पदान्तत्वादनुस्वारसिद्धिः, तथा अभक्तपक्षेऽपि तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात् पदावयवतकारलोपे मकारः पदान्त इत्यर्थः। ननु पूर्वान्तपक्षे द्विषंतपे कथमनुस्वारः, मुम्प्रवृत्तिवेलायां तान्तावधेः पदत्वेनाकारान्तावधेरपदत्वात् तद्भक्तस्य पदानवयवत्वात्। अत्राहुः — अस्तु तावत् तान्ते पदत्वम्। लुप्ते तकारे क्वचित् तेन विश्रमणीयमित्यकारान्ते विश्राम्यति, न तु मान्ते, मकारस्य पदानवयवत्वात्। पदैकदेशलोपे परिशिष्टपदावयवे पदत्वविश्रान्तेर्न्याय्यत्वात्। मकारस्तु [4]'तद्भक्ततया पदान्तकार्यं भजत इति। वस्तुतस्तु पदैकदेशभक्तस्य मकारस्य पदावयवत्वं लोपात् प्रागेवावयवावयवस्य समुदायावयवत्वात्। अन्त्यत्वं तु तलोपानन्तरमुपजायत इति न कोऽपि क्लेशः। [5]'टच्प्रसङ्गमाशङ्क्याह — **बहुव्रीहिरिति**। पूर्ववत् प्रासङ्गिकत्वं केचिदाहुरित्याह — **परादीति**। **मकारोऽपीति**। यथा पटान्त्यावयवदशावयवान्तिमतन्तोः पटान्त्यत्वम्। **न त्विति**। तत्त्वेनान्तिमतन्तोरेव पटान्त्यत्वम्। 'पटान्त्यावि मौ तन्तू' इत्यत्र [6]'तूपान्त्येऽन्त्यशब्दस्य प्रयोगसंभवात्। इह तु पदान्तत्वमुभयोरपि वर्णत्वेन वाच्यम्। तच्चाभेदविरुद्धमित्यर्थः। शीभावविधाने को नकारस्य प्रसङ्गः, येन प्रतिषेध उच्यते, अत आह — **शीभाव इति**। औङ इत्यनेन सनुम्कप्रतिपत्तेः कथं नुमोऽनिर्देशः, तत्राह — **यथेति**। [7]'अङ्गाधिकारे तस्य च तदुत्तरपदस्य च' इति [8]'पादः' इत्यनेन तदन्तप्रतिपत्तावपि सूत्रे षष्ठ्यन्ततयानुच्चारणान्निर्दिश्यमानत्वं न च तत्रापीत्यर्थः। [9]'स्वाङ्गमव्यवधायकम्' इति न्यायान्नुमा कथं व्यवधानमित्याशङ्क्य [10]'व्यवधायकत्वे निर्दिश्यमानपरिभाषाप्रवृत्तिर्न हीति सूचितं हेतुं दर्शयति भाष्यानुवादे[न—**यइति**।] उक्तानुवादो ह्यन्यहेत्वनाकाङ्क्षाप्रदर्शनाय। तदेतद्विशदयति — **श्रुतीति**। **श्रुतिः** श्रवणम्, तत्र संनिपतत्युपतिष्ठत इति श्रुतिसंनिपाति। सागमं हि रूपमनुमितौ संनिपतति। तदयमर्थः — निर्दिश्यमानपरिभाषया प्रत्यक्षस्य कार्यचोदनम्, तच्चागमेनापि व्यवहितमिति। यथा च नगराभ्यन्तरेऽपि देवतालये कश्चिन्नगरपदेन तदतिरिक्तविवक्षया ब्रवीति — नद्या नगरस्य चैतदनन्तरम्, यदुत देवतास्थानमिति, एवं निर्दिश्यमानपरिभाषायामतिरिक्तविवक्षणान्नुमस्तद्व्यवधायकत्वम्। तत्त्वतो भक्तेनापीत्यन्वयः। अन्तरङ्गबलीयस्त्वादभिमतसिद्धिमाशङ्क्याह — **नित्यत्वादिति**। [11]'अर्थाश्रयत्वादनेकोपाध्याश्रयत्वात् पूर्वोत्तरपदापेक्षत्वान्नास्त्यन्तरङ्गत्वमेषामित्यर्थः। अस्यापि नपुंसकत्वात् कथं तदुपसर्जनह्रस्वत्वोदाहरणम्, अत आह — **नपुंसकेति**। किं कृतस्य नुमोऽसिद्धत्वम्, नेत्याह — **नित्यादिति**। शास्त्रासिद्धत्वादन्तरङ्गं प्रथमतः प्रवर्तत इति भावः।

---

[1] पा. सू. ५. ४. ६८.
[2] पा. सू. ८. ४. ३.
[3] पा. सू. ३. २. ३९.
[4] तद्विभक्ततया — क.
[5] अच्प्रसङ्ग — क.
[6] तूपान्त्ये शब्दस्य प्रयोगाभावात् — क.
[7] का. वा. १. १. ७२–२१.
[8] पा. सू. ६. ४. १३०.
[9] लौ. न्या. साहस्री. पृष्ठम् १२७.
[10] 'व्यवधायकत्वे' इत्यस्य सूचितमित्यत्राप्यन्वयो बोध्यः।
[11] अर्थहेयत्वात् — क.

बहिरङ्गयोरपि स्वरह्रस्वयोर्बहिरङ्गतरापेक्षयान्तरङ्गत्वमाह — **स्वरेति**। पक्षान्तरे दूषणानां [1]सुपरिहरत्वात् किमुपेक्षा, नेत्याह — [2]**तस्मादिति**। पूर्वान्तिपक्ष इत्यस्यानन्तरमेवकारो द्रष्टव्यः ॥

एच इग्घ्रस्वादेशे. १. १. ४८.

[१, ३५७–३५९]

(**लघुविवरणम्**) अवर्णमेव मात्रेति भेदाभावात् षष्ठ्यनुपपन्नेत्यत आह — **अष्टेति**। ह्रस्वविधायक[3]शास्त्रेणैकवाक्यतायां कथं दीर्घप्राप्तिरित्यत आह — **स्वतन्त्रमिति**। **नैष इति**। परिभाषाद्वयानुग्रहाय पूर्वमचो ह्रस्वत्वे विहिते पश्चात् 'एचः' इत्यनेनैकवाक्यता क्रियत [4]इत्यर्थः। **एकारस्येति**। न च कण्ठ्यत्वादेकारस्याकारोऽपि पक्षे प्राप्नोतीति वाच्यम्, विप्रतिषेधे परस्य प्रयोजकत्वात्, एकारस्य तालव्यमिवर्णं च परमिति भावः। **वास्तव्यत्व इति**। [5]'वसेस्तव्यत् कर्तरि णिच्च' इति कर्तरि वास्तव्यशब्दः ॥

[१, ३५७–३५९]

(**विवरणम्**) आक्षेपार्थतां किमो दर्शयति — **विनापीति**। 'एचः' इति वक्तव्ये किमिति 'एङः' इत्युक्तम्, अत आह — **एङ इति**। समाहारशब्दः कर्मसाधनः, तस्य वर्णशब्देन षष्ठीसमासः, वर्णैकदेशस्य वर्णत्वाभावादिति सूचयितुमाह — **समाह्रियेति**। **मात्रा** मात्राकालः, **अवयवः** ऐचोरित्यर्थः। नन्वस्य ह्रस्वविधिलक्षणेनैकवाक्यत्वात् कथं दीर्घप्राप्तिरित्यत आह — **स्वतन्त्रमिति**। [6]चोदको गूढाभिसंधिरिति भावः। 'दे३वदत्त' इत्यत्र [7]'गुरोरनृतः' इति प्लुतः। ननु प्रवर्ततां दीर्घः, पुनस्तल्लक्षणेन ह्रस्वो भविष्यतीत्यत आह — **ह्रस्वस्येति**। एकवाक्यभावो नाम 'एच इक्' इत्यस्य ह्रस्वविशेषणभावः, न तूभयोरन्योन्यवियोगाभावः। अत एव पश्चात् प्रवर्तमानस्य निवर्तकत्वमप्युपपद्यते, नियामकत्वात्। एतदजानानश्चोदयति — **यदीति**। परिभाषाद्वयानुग्रहाय क्रमेण परिभाषाभ्यामन्वय इति परिहरति — **नेति**। [8]**तत्रेति**। इगित्यस्य ह्रस्व[9]विशेषणत्वेन ह्रस्व[10]श्रुतेरेज्विषये इकि संकोच एव, न कस्यचिद्बाध इति भावः। **एकारस्येति**। न च समुदायान्तरतमाभावादवयवान्तरतमो भवन् कदाचिदकारोऽपि स्यादिति वाच्यम्, [11]'पौर्वापर्ये पूर्वदौर्बल्यम्' इति न्यायात् परस्य प्रयोजकत्वेन पूर्वावयवस्य स्वान्तरतमादेशाप्रयोजकत्वादिति भावः। भाष्ये **तावेवेति**। प्रत्याहारसूत्र इति शेषः। ऐचोः परिहारान्तरमुक्तम् — **ऐचोश्चेति**। वास्तव्यशब्दो [12]'वसेस्तव्यत् कर्तरि णिच्च' इति [13]कर्तरि व्युत्पादितः ॥

---

[1] सपरिहारत्वात् — क.

[2] प्रदीपे 'तदत्र निर्दोषत्वात्' इत्यत्र 'तस्मादत्र निर्दोषत्वात्' इति पाठोऽभिमत इति भाति।

[3] वाक्येनैकवाक्यतायां — ड, ढ.

[4] इति भावः — ण.

[5] का. वा. ३. १. ९६ — २. वसतेस्तव्यत् — ढ.

[6] चोदकस्याभिसंधिरिति — ञ.

[7] पा. सू. ८. २. ८६.

[8] तत इति — च, छ.

[9] विशेषणत्वे ह्रस्व — च, छ.

[10] श्रुतेरेज्विषय इति संकोच एव — च, छ, ञ, ट.

[11] मीमांसासूत्रम् ६. ५. ५४.

[12] का. वा. ३. १. ९६–२.

[13] 'कर्तरि' इति नास्ति — ट.

[१, ३५७–३५९]

(**उद्द्योतनम्**) किंशब्दस्याक्षेपार्थत्वमाह — **विनेति**। 'एचः' इति वक्तव्ये 'एङः' इत्युक्तेस्तात्पर्यमाह — **एङ इति**। समाहारशब्दः कर्मसाधनः, वर्णशब्दस्तदवयवपरः, बहुव्रीहिः समास इत्यभिप्रेत्याह — **समाह्रियमाणेति**। बहुव्रीहिरयम्। भेदभिन्नस्यावर्णस्य **मात्रा** मात्राकालपरिच्छिन्नः। नन्वस्य ह्रस्वविधिनैकवाक्यत्वात् कथं दीर्घप्रसङ्गः, अत आह — **स्वतन्त्रमिति**। **अमूभ्यामिति**। अत्रापि दीर्घस्थाने दीर्घस्यैव प्रसङ्ग इत्यर्थः। **अयमिति**। ह्रस्वविधिनैकवाक्यत्वमित्याशयः। **देवदत्तेति**। [1]'गुरोरनृतः' इति प्लुतः। आदिनोदात्तादिग्रहः। [2]**अस्मिन्निति**। ह्रस्वविधिस्थले एतस्मिन्नुपस्थिते सतीत्यर्थः। ननु दीर्घानन्तरं पुनर्ह्रस्वः किं न स्यात्, अत आह — **ह्रस्वस्येति**। दीर्घेणेत्यादिः। एकवाक्यभावो नाम 'एच इक्' इत्यस्य ह्रस्वविशेषणत्वम्, न त्वन्योन्य[3]वियोगाभावः। अत एव निवर्तकत्वमुपपद्यते। एतदजानानः शङ्कते — **यदीति**। ह्रस्वविधौ स्थानिनिर्देशार्थम् 'एचः' इत्यस्यान्वयावश्यकत्वादन्यत्राप्रसङ्ग इत्यर्थः। परिभाषाद्वयानुग्रहाय क्रमेण द्वाभ्यामन्वयादिष्टसिद्धिरिति परिहरति — **नैष इति**। [4]**तत्रेति**। इगित्यस्य ह्रस्वविशेषणत्वे [5]'ह्रस्वश्रुतेरेज्विषये इकि संकोचमात्रम्, न कस्यचिदपि [6]'बाध इति भावः। **एकारस्येति**। एकारः केवलतालव्य ओकारश्च केवलौष्ठ्य इति मतानुसारेणेदम्। [7]'केचित्तु — एङः स्थानद्वयमतेऽपि [8]'पौर्वापर्ये पूर्वदौर्बल्यम्' इति न्यायेन परान्तरतमेन पूर्वान्तरतमबाधादिष्टसिद्धिरित्याहुः। अत्रेदं चिन्त्यम् — [9]'प्रतिहर्त्रपच्छेदोद्गात्रपच्छेदयोः क्रमेणोत्पत्तौ स न्यायः, यौगपद्ये तु

---

[1] पा. सू. ८. २. ८६.

[2] तस्मिन्निति — अ, आ, इ, ऋ.

[3] विनियोगाभावः — ऋ.

[4] तत इति — म, आ, इ, ऋ.

[5] श्रुतेरेज्विषय इति संकोच — इ; श्रुतेरिग्विषय इति संकोच — म, आ, ऋ.

[6] बाधक इति — म, आ.

[7] विवरणोक्तिमनूद्य दूषयति — केचित्त्वित्यादिना।

[8] मीमांसासूत्रम् ६. ५. ५४.

[9] मीमांसाषष्ठाध्यायपञ्चमपादे सप्तदशादिषु त्रिष्वधिकरणेषु विचारितोऽयं विषयः। ज्योतिष्टोमे श्रूयते — यद्युद्गातापच्छिद्येत, अदक्षिणो यज्ञः संस्थाप्यः। अथान्य आहृत्यः, तत्र तद्द्यात् यत् पूर्वस्मिन् दास्यन् स्यात्। यदि प्रतिहर्तापच्छिद्येत सर्वस्वं दद्यात्, इति। अस्यायमर्थः — प्रातःसवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालाया बहिः प्रसर्पन्ति। तदानीमेकस्य पृष्ठतोऽन्य इत्येवं पिपीलिकावत् पङ्क्त्याकारेण गन्तव्यम्। तत्र पुरतो गन्तुःकच्छं गृहीत्वैव पृष्ठतोऽन्यो गच्छेत्। एवं सति प्रमादाद्यद्युद्गाता गृहीतं कच्छं मुञ्चेत् तदा दक्षिणामदत्वा प्रक्रान्तो यज्ञः समापनीयः। तं समाप्य पुनरपि स यज्ञः प्रयोक्तव्यः। तस्मिन् प्रयोगे पूर्वं यद् दित्सितं द्रव्यं तद्द्यात्। यदा प्रतिहर्ता मुञ्चेत् तदा तस्मिन्नेव प्रयोगे सर्वस्वं दद्यात्, इति।

पूर्वपक्षः — तत्र यद्युद्गातृप्रतिहर्तारौ युगपन्मुञ्चेतां तदानीं पूर्वोक्तं प्रायश्चित्तनिमित्तं विहन्येत। एकैककर्तृको ह्यपच्छेदो निमित्तत्त्वेन श्रुतः। अयं तूभयकर्तृकत्वान्नैकेन व्यपदेष्टुं शक्यते। तस्माच्छ्रूयमाणस्य निमित्तस्य विहतत्वान्नास्ति प्रायश्चित्तम्, इति प्राप्ते उच्यते — द्वौ ह्यत्रापच्छेदौ। तयोरेकैकस्यैकैक एव कर्तेति नास्ति निमित्तस्य विघातः। कालमात्रैक्यादेकापच्छेदभ्रान्तिः। तस्मान्निमित्तविघाताभावादस्ति प्रायश्चित्तम्, इति॥ अनन्तराधिकरणे विचारः — अदक्षिणत्वं सर्वस्वदक्षिणत्वं चेति यत् प्रायश्चित्तद्वयं निमित्तभेदेन श्रुतं तन्निमित्तद्वयसंनिपाते समुच्चेतव्यम्। यद्यदक्षिणत्वसर्वस्वदक्षिण-

[1]विप्रतिषेधाद्विकल्पः स्यात्' इति तत्पूर्वन्यायेन तत्रापि विकल्प एव। [2]तत्राखण्डवर्णस्य युगपदुत्पत्तेरुत्पत्तिद्वयाभावेन विकल्पस्यैवोचितत्वात्। अत एव भाष्ये 'कदाचिदवर्णं कदाचिदिवर्णोवर्णे' इत्युक्तम्। ऐचोऽपीदमेव समाधानमित्युत्तरमूयस्त्वोपादानवैयर्थ्याच्च। न च परिहारान्तरत्वम्, न्यायाप्रवृत्तेरुक्तत्वात्। न चैङः स्थानद्वयमते [3]कथमकारनिरास इति वाच्यम्, सूत्रप्रत्याख्यानपक्षे एङोऽप्युत्तरस्य किंचिदाधिक्यस्याङ्गीकार्यत्वात्। भाष्ये **तावेवेति**। प्रत्याहारसूत्र इत्यादिः। भाष्ये **ब्राह्मणग्राम इति**। सप्तमी। आनयनकर्म च गवादिकम्। यद्वा, प्रथमान्तम्। **आनीयतां** प्राप्यताम्। एकब्राह्मणस्वामिकस्य शूद्रग्रामस्यापि [4]ब्राह्मणग्रामत्वाद् दृष्टान्तानुपपत्तिः, अत आह — **वास्तव्यत्व इति**। स्वामिनोऽस्वामिनो वा यत्र बहवो ब्राह्मणाः सन्ति तद्विषयप्रयोग उदाहरणमित्यर्थः। [5]'वसेस्तव्यत् कर्तरि णिच्च' इति कर्तरि व्युत्पादितो वास्तव्यशब्दः। भाष्ये **तत्र** ग्रामे। **अवरतः** अतिन्यूनत्वे। **पञ्चकारुकी** तक्षायस्काररजकनापितचर्मकाराः॥

[१, ३५७–३५९]

(**रत्नप्रकाशः**) एतत्सूत्रप्रयोजनवार्तिकमवतारयति — **किमर्थमिदमिति**। एतेन 'विनापि सूत्रेणेष्टसिद्धिरिति प्रश्नः' इति निरस्तम्। सूत्रं विनाभिमतसिद्ध्यभावस्य वक्ष्यमाणत्वात्। **अर्धं एकारोऽर्धं ओकारो वेति**। कण्ठतालुस्थानकत्व[कण्ठोष्ठस्थानकत्व] विवृततरत्वसाम्येनान्तरतमत्वात् प्राप्ताविति भावः। एतेन 'एङः प्रश्लिष्टावर्णत्वात् प्रश्लिष्टावर्णावर्धैकाराधौ कारौ प्राप्नुतः, न तु विश्लिष्टावर्णयोरैचोरिति भावः' इति निरस्तम्। द्विमात्रस्यैङः प्रश्लिष्टावर्णत्वेऽप्यर्धैकाराधौ कारयोः प्रश्लिष्टावर्णत्वे मानाभावात्। न हि मात्रिके वर्णे मात्रिकयोर्वर्णयोः प्रश्लेषः संभवति। **समाहारवर्णाविति**। अकारेकारयोरकारोकारयोश्च यौ समाहारौ तदात्मकौ वर्णाविति भावः। समा-

---

त्वयोः परस्परविरोधः, तर्हि प्रयोगभेदेन व्यवस्थापनीयम्। अपच्छेदयुक्ते प्रथमप्रयोगे दक्षिणा न दातव्या, उत्तरप्रयोगे सर्वस्वं दातव्यम्। सत्यपि प्रयोगभेदे कर्मण एकत्वात् समुच्चयः, इति प्राप्ते उच्यते — न ह्युत्तरप्रयोगेऽपच्छेदो विद्यते। न चासति निमित्ते प्रायश्चित्तं युक्तम्। तस्मात् प्रथमप्रयोग एव निमित्तद्वयवशात् प्रायश्चित्तद्वयं प्राप्तम्। तच्चान्योन्यविरुद्धत्वाद्विकल्प्यते, इति॥

अनन्तराधिकरणे विचारः — उद्गातृप्रतिहर्तृकृतयोरपच्छेदयोर्यौगपद्ये समानबलत्वादस्तु प्रायश्चित्तयोर्विकल्पः। यदा तु क्रमेणापच्छेदौ स्यातां तदानीमसंजातविरोधित्वेन प्रबलत्वात् श्रुतिलिङ्गादाविवोत्तरस्य प्रवृत्तिर्निरुध्यत इति चेत्, मैवम्, श्रुतिलिङ्गादावुत्तरस्य पूर्वसापेक्षत्वात् पूर्वेण विरोधे सत्युत्तरस्योत्पत्तिरेव नास्ति। इह तु ज्ञानद्वयं निरपेक्षं वाक्यद्वयादुत्पद्यत इति नास्त्युत्पत्तिप्रतिबन्धः। उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते। निरपेक्षस्यापि पूर्वज्ञानस्याविद्यमानोत्तरज्ञानबाधकत्वायोगः। तस्मादुत्तरकालीनापच्छेदनिमित्तं प्रायश्चित्तमनुष्ठेयमिति। 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इति। प्रकृतितः प्रथमं प्राप्तस्य प्रयाजपञ्चत्वस्य वैकृतेन 'नव प्रयाजा इज्यन्ते' इत्यनेन बाधवदिति सूत्रार्थः॥

[1] मीमांसासूत्रम् ६. ५. ५१.
[2] अत्राजन्तवर्णस्य — अ, ऋ; तत्राजन्तवर्णस्य — आ.
[3] कथमेकारनिरासः — अ, आ, ऋ.
[4] अपिशब्दो नास्ति — म, आ.
[5] का. वा. ३. १. ९६–२.

ह्रारशब्दस्य संबन्धि[1]शब्दत्वेन साकाङ्क्षस्यापि समासः। **मात्रावर्णस्येति**। मात्रात्मकोऽवर्णः, तस्येत्यर्थः। एवं 'मात्रेवर्णोवर्णयोः' इत्यत्रापि कर्मधारयात् षष्ठी ज्ञेया। एतेन 'अष्टादशभेद-भिन्नस्यावर्णस्य मात्रावयव इति भेदसद्भावात् षष्ठ्या निर्देशः' इति निरस्तम्। तत्र मात्रा-शब्दस्यासमस्तत्वे मानप्रयोजनयोरभावात्। **तयोः** ऐचोः। [2]**ह्रस्वादेशशासनेषु** ह्रस्वादेशविधिषु। प्रवर्तमानेष्विति शेषः। **कदाचिदवर्ण इति**। स्थानबाह्ययत्नसाम्यस्याविशिष्टत्वादिति भावः। [3]'विधिनियमसंभवे विधिरेव ज्यायान्' इत्याश्रित्य विधिपरत्वेन दोषमापिपादयिषुः संभवमात्रेण नियममङ्गीकरोति — **अस्तीति**। संभवतीत्यर्थः। **दीर्घास्त्विति**। भाव्यमानस्यापि सवर्णग्राह-कत्वं दृष्टम् [4]'अदसोऽसेर्दादु' इत्युकारस्य। **ननु चेति**। 'ह्रस्वादेशे' इति निर्धारणे सप्तमी, जात्येकवचनम्। 'ह्रस्वेष्वादेशेषु [य] इक् स एवैचः स्यात्' इत्यर्थाश्रयणान्न दीर्घप्रसङ्ग इति भावः। एतेन 'अयं हि वाक्यार्थः — एचो ह्रस्वप्रसङ्गे इगेव ह्रस्व इति' [इति] निरस्तम्। ह्रस्वशब्दस्यान्यस्याप्रस्तुतत्वेन विधिसंभवे नियमायोगात्। एतदाशयेनैव शङ्काया उदितत्वेन तत्रा-प्रस्तुतशब्दप्रक्षेपेण तत्परिहारानौचित्याच्च। 'ह्रस्वादेशे' इति विषयसप्तम्येवास्त्वित्याशयेनाहान्यः — **विषयार्थमिति**। व्याख्यानस्य लक्ष्यानुसरणौचित्येनान्यथा व्याख्यायातिप्रसङ्गापादनमनुचित-मित्याशयेनाह — **दीर्घाप्रसङ्गःस्त्विति**। एतेन 'एकवाक्यभावेनैवैच इगेव ह्रस्वो भवति नान्य इत्येवमनिको व्यावर्त्यन्ते' इति निरस्तम्। कथंचित् कार्यकालपक्षाश्रयेण प्रकृतसूत्रस्य ह्रस्वविधि-प्रदेशस्थताभ्युपगमेऽपि वाक्यभेदमन्तरेणानेजंशे विधायकत्वस्यैजंशे नियामकत्वस्य[च] ब्रह्मणाप्युप-पादयितुमशक्यत्वात्। भवतु ह्रस्वविधिप्रदेशे वाक्यभेदेनैव एजंशे नियामकत्वम्, तावताप्येचां दीर्घाणामिकां व्यावृत्तिः सिध्यतीति चेन्न, ह्रस्वविधीनामनेकत्वेन तत्र नियमवाक्यानामनेकत्वावश्य-कतया गौरवात्। तदेवं नियमार्थतया सूत्रं व्यवस्थाप्य मतान्तरावलम्बेन प्रौढया प्रत्याख्यातुमाह — **सवर्णनिवृत्त्यर्थेनेति**। **सिद्धमेतदिति**। 'एच इगेव ह्रस्वो भवति' इत्येतत् सिद्धमित्यर्थः। **एङः सस्थानत्वादिति**। इक एङा समानस्थानत्वादेङ इगेव भवतीति तावत् सिद्धमिति भावः। एकारैकारयोरिचुयशैः सह तालुस्थानकत्वमोकारौकारयोस्तु उपूपध्मानीयैः सहौष्ठस्थानकत्वं च [5]'बह्व्-चानां प्रातिशाख्ये उक्तमिति इकारोकारयोरेच्सस्थानत्वं बोध्यम्। **सस्थानतरावितिः**। 'एकारैकारयोः कण्ठतालु' 'ओकारौकारयोः कण्ठोष्ठम्' इत्येचां द्विस्थानकताया एव बहुशिक्षाप्रातिशाख्यसंमतत्वे-नार्धैकारार्धौकारयोरपि तथा द्विस्थानकत्वादिति भावः। **तावेवायमुपदिशेदिति**। अक्षरसमाम्नाय इति शेषः। नन्वेवं सति [6]'अदेङ् गुणः' इत्यत्र तपरकरणान्मात्रिकयोरेवैङोर्गुणसंज्ञा स्यादिति चेन्न, तस्मिन् पक्षे 'अदेदोद् गुणः' इत्येव सूत्रयितुं शक्यत्वात्। न चास्मिन् पक्षे मात्रागौरवमिति वाच्यम्, [7]'एङः पदान्तादति' [8]'एङि पररूपम्' इत्यत्रैकमात्रस्यैवैकारस्य निर्देशेनास्मिन् सार्धमात्रालाघवात्। तदेवमक्षरसमाम्नाये तयोर्मात्रिकयोरनुपदेशात् तौ न स्त इत्यनुमीयत इति फलितम्। **पार्षद-**

---

[1] शब्दत्वे साकाङ्क्षस्यापि — ब.

[2] भाष्ये 'ह्रस्वशासनेषु' इत्यत्र 'ह्रस्वादेश-शासनेषु' इति रत्नप्रकाशकृदभिमतः पाठ इति भाति।

[3] परिभाषा १०९.

[4] पा. सू. ८. २. ८०.

[5] शौनकीये ऋग्वेदप्रातिशाख्ये १. १. १९. श्लोके 'तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः' इति, २० श्लोके 'सकार-रेफलकाराश्च रेफं वर्त्स्यमेके शेष ओष्ठ्यो-ऽपवाद्य। नासिक्यान्' इत्यनेन नासिका-स्थानवर्णान् परित्यज्य शेषवर्णराशेः उका-रौकारौकारपवर्गोपध्मानीयानामोष्ठ्यत्वं चो-क्तम्।

[6] पा. सू. १. १. २.

[7] पा. सू. ६. १. १०९.

[8] पा. सू. ६. १. ९४.

कृतिरेषेति। पर्षद्विशेषे क्वचिद् भवा कृतिरध्ययनक्रियेत्यर्थः। **नैव लोके [1]नाप्यन्यस्मिन्निति**। सर्ववेदलोकसाधारणेऽस्मिन् व्याकरणे तत्साधारणानामेव वर्णानां परिग्रह इति भावः। **ऐचोश्चेति**। चकारो भिन्नक्रमः, 'उत्तरभूयस्त्वात्' इत्यस्यानन्तरं ज्ञेयः। तेन 'सस्थानत्वात्' इति हेतोः समुच्चयः सिध्यति। इयांस्तु विशेषः — 'एकारैकारयोः कण्ठतालु, ओकारौकारयोः कण्ठोष्ठम्' इति मते उत्तरभूयस्त्वं हेतुरिति। **भूयसी मात्रेति**। सार्धमात्रेति वदन्ति। **अल्पीयसीति**। अर्धमात्रा। उभयत्र स्वार्थे ईयसुन्। **[2]भूयसश्च ग्रहणानीति**। भूयोंशाभिप्राये शब्दप्रयोगा भवन्तीति भावः। **ब्राह्मणग्राम इति**। ब्राह्मणा यस्मिन् ग्रामे बहवो वर्तन्तेऽन्ये वर्णा अल्पे, तत्रायं प्रयोगो लोके दृष्ट इति तथात्राप्यैचोरुत्तरांशबाहुल्यात् तदन्तरतमाविवर्णोवर्णविव ह्रस्वौ भविष्यतो नान्य इति भावः। ननु यस्मिन् ग्रामे ब्राह्मणा एव [3]तिष्ठन्ति न तु जात्यन्तरं तद्ग्रामाभिप्रायेणैव ब्राह्मणग्रामशब्दप्रयोग इति विषमो दृष्टान्त इत्यत आह — **अवरतः पञ्चकारुकीति**। पञ्चानां कारुकाणां कुलालकर्मारवर्धकिनापितरजकानां समाहारः पञ्चकारुकी, एतच्छून्यो ब्राह्मणग्रामोऽप्रसिद्ध एवेति भावः। तदेतत् सूत्रप्रत्याख्यानं प्रौढिमात्रेण प्रवृत्तं न तु युक्तिसहमिति सर्वैरेव ज्ञातुं शक्यते। अर्धैकारार्धौकारवदेचामेकस्थानत्वमैचोरुत्तरभूयस्त्वं च क्वाचित्कमित्यर्धजरतीयाश्रयणानौचित्यात्॥

[१, ३५७–३५९]

(**नारायणीयम्**) सवर्णाकारनिवृत्तेरनन्यसाध्यत्वात् प्रश्नानुपपत्तिमाशङ्क्यान्यसाध्यत्वं सिद्धमित्याह — **विनेति**। सवर्णाकारनिवृत्तेरेज्मात्रविषयत्वेनोक्ताया विभज्य प्रदर्शनं कथमित्यत आह — **प्रश्लिष्टेति**। अत [4]एवात्रावर्णस्यापरिस्फुटत्वाद्ध्रस्वाप्राप्तिः। वर्णसमाहाराविति वाच्यमित्यत आह — **समाह्रियमाणेति**। कर्मणि घञन्तस्य समाहारशब्दस्य वर्णपदेन बहुव्रीहिः। यद्वा, अधिकरणसाधनस्य समानाधिकरण इति भावः। [5]मात्रासमाहारत्वानुपपत्तेर्मात्राशब्देन मात्रिको विवक्षणीयः। तस्यावर्णात्मकत्वाद् भेदाभावात् तन्निबन्धना षष्ठी कथमित्यत आह — **अष्टेति**। नियमरूपतयास्येतरनिवर्तकत्वात् कथं दीर्घप्रसङ्गः, अत आह — **स्वतन्त्रमिति**। [6]विधिज्यायस्त्वन्यायादिति भावः। ननु सवर्णग्रहणे विधि[7]संभवादेष न्याय्यः, भाव्यमानस्य तु तन्निषेधाद् ह्रस्वविधिनियमो व्यवतिष्ठत इत्यत आह — **भाव्यमानस्येति**। ह्रस्वादेशग्रहणात् कथं दीर्घाप्राप्तिः, न हि यत्प्रसङ्गे यस्य विधानं तस्य तत्साजात्यनियमः, तत्राह — **अयमिति**। गवां कृष्णेत्यादौ निर्धारणस्य सजातीयविषयत्वदर्शनादिहापि सप्तम्यास्तदर्थत्वाङ्गीकारादिति[8] भावः। कस्य विषयो निर्दिश्यते ह्रस्वादेशग्रहणेन, अत आह — **यत्रेति**। उपस्थानविषयो निर्दिश्यत इत्यर्थः। अयमर्थः — 'एच इक्' इत्युच्यमाने स्वातन्त्र्यात् सर्वेषामेचां निवृत्तिप्रसङ्गः। [9]'षष्ठी स्थाने' इत्यस्य संबन्धाश्रयणे परिभाषात्वात् प्लुतादिविधिष्वप्युपस्थानप्रसङ्गः। तत्र ह्रस्वादेशग्रहणं विषयसप्त-

---

[1] भाष्ये 'नान्यस्मिन् वेदे' इत्यत्र 'नाप्यन्यस्मिन् वेदे' इति निर्णयसागरीये पाठः।

[2] भाष्ये 'भूयस एव ग्रहणानि' इत्यत्र 'भूयसश्च ग्रहणानि' इति रत्नप्रकाशकृत्पाठः। निर्णयसागरमुद्रिते इदं पाठान्तरत्वेनाधो निर्दिष्टम्।

[3] तिष्ठन्तु — ब.

[4] एवात्र सवर्णस्यापरिस्फुटत्वात् — क.

[5] अत्रासमाहार — क.

[6] विधिनियमसंभवे विधिरेव ज्यायानिति न्यायाकारः।

[7] संभवादेव न्याय्यः — क.

[8] निर्धारणार्थत्वाङ्गीकारादित्यर्थः।

[9] पा. सू. १. १. ४९.

म्यन्तम्, उपस्थितिविषयनिर्देशात्, न तु निर्धारणसप्तम्यां प्रमाणमस्ति, [1]बहुवचनानिर्देशात्, इति। यदि तर्हि परिभाषात्वाङ्गीकारः, ह्रस्वादेशग्रहणं च विषयार्थम्, सिद्धं नः समीहितम्, अत्र दीर्घाप्रसक्तेः, अत आह — **अस्मिंश्चेति**। एकवाक्यतया संबन्धेनाचां ह्रस्वाप्रसङ्गात् परिभाषात्वेऽपि वाक्यभेद आवश्यकः। ततश्च [अचो] ह्रस्वो भवति, एचां त्विगिति ह्रस्वापवाद इग् भवन् आन्तरतम्याद् दीर्घः स्यादित्यर्थः। नन्वस्त्वन्तरतमः, दीर्घस्य तु प्रवृत्तस्य ह्रस्वो भविष्यति। न चापवादप्रवृत्तिवैयर्थ्यम्, सवर्णाकारनिवृत्त्यर्थत्वात्, अत आह — **ह्रस्वस्येति**। आकृतिपक्षे एकं लक्षणम्, तच्चैतद्विषये सकृद्बाधितम्, न पुनरस्ति तस्य व्यापार इत्यर्थः। व्यक्तिपक्षेऽपि वा एचामिग्विधानाद् ह्रस्वलक्षणस्यैतद्विषयेऽनारम्भानुमानम्। नियमार्थत्वादस्य न दीर्घप्रसङ्ग इत्युक्तम्। तदयुक्तम्, दीर्घाप्रसङ्गे सति नियमार्थत्वम्, नियमार्थत्वे च दीर्घाप्रसङ्ग [2]इतीतरेतराश्रयात्, अत आह — **एकेति**। ह्रस्वविध्येकवाक्यत्वं दीर्घाप्रसङ्गे हेतुः, न तु नियमार्थत्वम्। ततो नेतरेतराश्रयता। एकवाक्यतायां तु किमस्य कृत्यमित्यत उक्तम् — **निवर्तकत्वादिति**। अयमर्थः — यदि भिन्नवाक्यतयास्य संबन्धः स्यादादेशग्रहणमनर्थकं स्यात्, ह्रस्व इत्येव वाच्यं स्यात्। ततश्चादेशग्रहणाद् ह्रस्वादेशनकाले एचामिग्ह्रस्वं कुर्वन् एचामिकं कुर्यादिति लभ्यमेकवाक्यत्वमिति। तत्र त्वनिष्टमनूद्यावद्यति[3] — **यदीति**। [4]'अचश्च' इति परिभाषापवादत्वमस्य प्राप्तमित्यर्थः। **पूर्वमिति**। अन्यथा [5]'अचश्च' इत्यनवकाशम्। न च दीर्घप्लुतविधाववकाशः, [6]'अचश्च' इत्यत्र ह्रस्वानुवृत्तेरनवकाशत्वात्। **एकारस्येति**। भागद्वारकं तालव्यत्वम्। ननु कण्ठ्यभागस्यापि सत्त्वात् कण्ठ्योऽपि प्राप्नोति। अत्राहुः — शब्दपरविप्रतिषेधादिकारो भविष्यतीति। अवर्णस्य प्रश्लिष्टत्वान्न तज्जातिह्रस्वप्राप्तिरिति वयमवादिष्म। अवर्णाल्पीयस्त्वाद् ह्रस्वाप्राप्तावपि समुदायान्तरह्रस्वनिवृत्त्यर्थमिग्वचनं कस्मान्न स्यादित्यत आह — **ऐकार इति**। अल्पीयसोऽपि सत्त्वादनिक्प्राप्तिः कुतो नेत्यत आह — **भूयसा चेति**। व्याघ्रवनादिव्यपदेशोऽल्पीयांसमाश्रित्यापीत्यत आह — **तदिति**। असत्स्वन्येषु विशेषेषु भूयसा व्यपदेशः। इतरपरिभावकत्वं ह्यत्र प्रयोजकम्। भूयांश्चाल्पीयान् संभवति व्याघ्रादावल्पतरेऽपि। नन्वन्येषु सत्स्वपि ब्राह्मणस्वामिकतया तथा व्यपदेशः, अत आह — **ब्राह्मणानामिति**। [7]'वसेस्तव्यत् कर्तरि णिच्च' [8]इति भावः॥

षष्ठी स्थानेयोगा. १. १. ४९.

[१, ३६०–३६४]

(**लघुविवरणम्**) [9]**विभक्तीति**। पूर्वपदस्येति विशेषणीयम्। **असमास इति**। यद्यपि कर्मणि घञि सति षष्ठीत्यनेन सामानाधिकरण्यमुपपद्यते, तथाप्यपवादत्वात् स्त्रियां क्तिना घञो बाधनाद् युक्तिरिति प्राप्नोतीत्यर्थः। **स्थाननिमित्तेति**। स्थानप्रतियोगिकसंबन्धेत्यर्थः। लक्ष-

---

[1] बहुवचननिर्देशात् — क.
[2] इतीतरेतराश्रयं स्यादत आह — क.
[3] खण्डयतीत्यर्थः।
[4] पा. सू. १. २. २८.
[5] पा. सू. १. २. २८.
[6] पा. सू. १. २. २८.
[7] का. वा. ३. १. ९६–२.
[8] इति वास्तव्यशब्दनिष्पत्तिरित्यर्थः।
[9] प्रदीपे 'विभक्तेः श्रवणाप्रसङ्गः' इत्यत्र 'विभक्तिश्रवणाप्रसङ्गः' इति पाठो निर्णयसागरचौखाम्बामुद्रित उपलभ्यते। सोऽत्रादृतः।

णाभावादयुक्तमेत्वमित्यत आह — **निपातनादिति**। तृतीयान्तस्य समासे [1]लुकि कृते स्थानशब्दस्यैत्वं निपात्यत इति भावः। **षष्ठीदण्डको** नाम ग्रन्थविशेषः। वार्तिके, [2]'अवयवषष्ठ्यादीनां योगस्यासंदिग्धत्वात् तत्र नियमस्याप्राप्तिरिति योजना। सामानाधिकरण्यानुपपत्तिं परिहरति — **योगमिति**। योगशब्दस्तद्विशेषे वर्तत इति भावः। **स्थानिन इति**। [3]'अङ्गावतरणन्यायेनेति भावः। **अर्थ[निमित्तः] संबन्धः** स्वामिभृत्यादीनाम्, **योनिनिमित्तः संबन्धः** पितापुत्रादीनाम्, **मुखनिमित्तः** संबन्धः गुरुशिष्यादीनाम्। **ऋत्वनिमित्तः संबन्धः** यजमानर्त्विजामिति भाष्ये विवेकः। **अन्तरङ्गत्वादिति**। प्रसङ्गो हि षष्ठ्यन्तस्य, तन्निष्ठोऽन्तरङ्गः। अनन्तरादयस्तु [4]'प्रतियोगिनाम्, तन्निष्ठा बहिरङ्गा इत्यर्थः॥

[१, ३६०–३६४]

(**विवरणम्**) [5]'**विभक्तीति**। पूर्वपद इति शेषः। **युक्तिरिति**। षष्ठीत्यनेन सामानाधिकरण्याय [6]'स्त्रीत्वविशिष्टे कर्मणि घञोऽपवादत्वात् क्तिन् स्यादित्यर्थः। **निपातनादिति**। तृतीयान्तस्य समासे विभक्तेर्लुक्यकारस्य निपातनादेत्वमित्यर्थः। ननु [7]'अस्तेर्भूः' इत्यादौ स्थानशब्दाप्रयोगे कथं स्थाननिमित्तः संबन्ध इत्यत आह — **यथेति**। स्थानं संबन्धोपपादकम्, संबन्धस्तु श्रुतानामेव भ्वस्त्यादीनामिति बोद्धव्यम्। 'प्रयोगः' इत्यत्र स्वाभाविक इत्यनुषज्यते। अनेन '[8]च स्थानशब्दो निवृत्तिवचनो नोपपद्यत इत्युक्तं भवति। **षष्ठीदण्डको** नाम ग्रन्थविशेषः। निर्णीयाभिधाय पुनः संदिग्धाभिधानमयुक्तमित्यत आह — **शब्द इति**। **नियमेन** [9]'स्थानेयोगेवेत्यनेनेति शेषः। **शासिनेति**। शास इत्यनेन [10]'स्थानषष्ठीत्वान्नोपधा विशेषयितुं शक्यत इति भावः। अवयवषष्ठ्यादीनामभिलषितानां निवर्तनाय नियमस्याप्राप्तिरिति वार्तिके प्रतिज्ञाभागस्यार्थः। **सर्वनाम्नोऽपीति**। [11]'बहुव्रीहौ सर्वनामसंख्ययोः' इत्येतद्बाधेनेत्यर्थः। **योगमिति**। सामान्यवाचिना योगशब्देन योगविशेषलक्षणार्थेन नञः समास इति भावः। भाष्ये **तस्य** अधिक्रियमाणस्य, [12]'**अनिर्देशार्थम्** अनुच्चारणार्थमित्यर्थः। ननु शब्दस्यानुच्चारितस्य संप्रत्ययायोगात् संप्रत्ययमङ्गीकृत्यानुच्चारितत्वाभिधानमसमञ्जसमित्यत आह — **स्वरितत्वेति**। अन्यत्र कृतलिङ्गासङ्गस्यान्यत्र कार्यकारित्वेऽतिप्रसङ्ग इत्यत आह — [13]'**तत्संबन्धिन इति**। भाष्ये यद्यप्यण्रूपं संप्रसारणमङ्गस्य विशेषणम्, तथापि स्थानषष्ठ्या अन्त्येऽल्युपसंहारे सत्यङ्गस्येत्यवयवषष्ठी वस्तुतोऽण्संप्रसारणापेक्षयेत्य-

---

[1] 'लुकि' इत्यस्यानन्तरं चकारोऽधिकः —ड, ढ, त.
[2] 'अवयवषष्ठ्यादीनाम्' इत्यस्यानन्तरं 'चाप्राप्तिः' इत्यधिकम् — ड, ढ.
[3] सर्वादिसमुदाये क्रियमाणा सर्वनामसंज्ञा समुदायस्य प्रयोगाभावात् तत्रासंभवन्ती तदङ्गेषु सर्वेत्यादिष्ववतरति तद्वदिति भाव इति भाति। अङ्गावतारण — ड, ढ.
[4] प्रतियोगिनः — ड, ढ, त.
[5] प्रदीपे 'विभक्तेः श्रवणाप्रसङ्गः' इत्यत्र 'विभक्तिश्रवणाप्रसङ्गः' इति निर्णयसागर-चौखाम्बामुद्रिते पाठः।
[6] स्त्रीत्वविशिष्टकर्मणि — च, छ, ट.
[7] पा. सू. २. ४. ५२.
[8] चकारो नास्ति — च.
[9] स्थाने योगेत्यनेनेति — च, छ, ञ.
[10] स्थाने षष्ठीत्वात् — ञ.
[11] का. वा. २. २. ३५–१.
[12] 'अनिर्देशार्थः' इति पुँल्लिङ्गपाठो भाष्ये दृश्यते।
[13] प्रदीपे 'तत्संबद्धस्थानिनः' इत्यस्य स्थाने 'तत्संबन्धिनः स्थानिनः' इति चौखाम्बामुद्रिते पाठः।

भिप्रेत्य 'अणपि' इत्याद्युक्तमित्यविरोधः । **अर्थनिमित्ताः** स्वस्वामिभावादयः, **योनिनिमित्ताः** पितापुत्रत्वादयः, **मुखनिमित्ताः** गुरुशिष्यत्वादयः, **स्रुवनिमित्ताः** ऋत्विग्यजमानत्वादयः । स्थानशब्दस्यार्थवाचित्वेऽर्थस्याभिधेयरूपस्य शब्दप्रयोगहेतुत्वेनादौ बुद्धिसंनिधानादन्तरङ्गत्वात् प्रसङ्गवाचित्वेऽपि प्रसक्तस्यैवानन्तर्यादिसंभवात् प्रसङ्गस्य [1]'प्रथमं संनिहितत्वादित्यर्थः । ननु [2]'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषयैव सिद्धमिति किमनेनेत्यत आह — **अस्यैवेति** ॥

[१, ३६०–३६४]

(**उद्द्योतनम्**) [3]**'विभक्तीति**। पूर्वपद इत्यादिः । **युक्तिरिति** । षष्ठीत्यनेन सामानाधिकरण्याय स्त्रीत्वविशिष्टकर्मणि घञोऽपवादः क्तिन् स्यादित्यर्थः । सप्तम्यर्थमाह — **स्थाननिमित्तेति** । बहुव्रीहिः । **योज्यम्** अनुषञ्जनीयम् । तथा च तृतीयायाः [4]"सुपो धातु' इति लुक्यकारस्यैत्वं निपातनादित्यर्थः । लोके प्रकरणादिवशात् संबन्धविशेषनिर्णयः, अत्र सूत्रादित्याह — **यथेति** । **स्थाननिमित्त इति** । स्थानं संबन्धनिमित्तम्, संबन्धस्तु श्रुतानामस्त्यादीनामिति ज्ञेयम् । स्थानशब्दार्थमाह — **अर्थ इति** । **अर्थे चेति** । प्रतिपाद्यप्रतिपादक[5]"भावसंबन्धेनेति यावत् । तेन स्थान्यर्थाभिधानसमर्थ एवादेशो भवतीति सिद्धम् । **अस्तेरिति** । आर्धधातुकेऽस्तेरर्थे भूः [6]प्रयोज्य इत्यर्थः । निरर्थकसंग्रहाय मतान्तरमाह — **अन्ये त्विति** । अयमर्थः शब्दनित्यत्वानुकूल इत्याह — **स्वाभाविक इति** । 'प्रयोगः' इत्यत्राप्येतदनुषञ्जनीयम् । **अतिप्रसङ्गः** अवयवषष्ठ्यादौ । **षष्ठीदण्डकः** ग्रन्थविशेषः । 'यावन्तो वा' इत्यस्य पूर्वेण गतार्थत्वं निराह — **शब्द इति** । निर्णयाभिधानानन्तरं संदिग्धाभिधानमयुक्तम्, अतो वाह — **शब्द इति** । **नियमेन** [7]'स्थानेयोगे'वेत्यनेन । **शासिनेति** । शास इति षष्ठ्या अन्त्येऽल्युपसंहृतत्वेनोपधयान्वयाभावेन योग्यतया धातुमात्रस्योपधा ग्राह्येत्यर्थः । अवयवषष्ठ्यादीनामिष्टानां निवर्तनाय नियमस्याप्राप्तिरिति [8]'वार्तिकार्थः । **सर्वनाम्नोऽपीति** । [9]"बहुव्रीहौ सर्वनामसंख्ययोः पूर्वनिपातः' इत्येतद्बाधेनेत्यर्थः । अयोगशब्दस्याव्यक्तयोगार्थकत्वमानयति — [10]**'योगमिति** । सामान्यवाचिनो योगशब्दस्य तद्विशेषलक्षकस्य नञ्समास इत्यर्थः । भूम्नि मतुबपि सामर्थ्यलभ्य इत्याह — **षष्ठ्या इति** । मतुबित्यस्य तात्पर्यमाह — **मत्वर्थीय इति** । **अकार इति** । अर्शआदेराकृतिगणत्वाद्योगशब्दादच्प्रत्यय इत्यर्थः । भाष्ये **यद्येवमिति** । इद्विधाववयवषष्ठीत्वेन स्थानषष्ठीलिङ्गाभावात् तदर्थं शाविधौ 'शासः' इति पुनर्वक्तव्यमित्यर्थः । ननु चानुकृष्टं स्वरितयुक्तं चाधिकारद्वयमेव, त्रित्वं त्वयुक्तम्, अत आह — **पारार्थ्येति** । [11]"सृष्टीः' इत्यादिवल्लाक्षणिकोऽधिकारशब्द इति भावः । **अविशेषेणेति** । [12]"सहस्य सः'

---

[1] प्रथमसंनिहितत्वादित्यर्थः — अ.

[2] परिभाषा १२.

[3] प्रदीपे 'विभक्तेः श्रवणाप्रसङ्गः' इत्यत्र 'विभक्तिश्रवणाप्रसङ्गः' इति निर्णयसागर-चौखाम्बामुद्रिते पाठः ॥ विभक्तेरिति — म.

[4] पा. सू. २. ४. ७१.

[5] 'भाव' इति नास्ति — अ, इ, ऋ.

[6] प्रयुज्यत इत्यर्थः — म, आ, ऋ.

[7] षष्ठी स्थानेयोगेत्यनेन — म.

[8] वाक्यार्थः — अ.

[9] का. वा. २. २. ३५–१.

[10] योग इति — ऋ.

[11] 'सृष्टीरुपदधाति' इत्यत्र सृजधातुघटितमन्त्रसाहचर्यात् सृजधातुरहितानामपि 'एकयास्तुवत प्रजा अधीयन्त, सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैताम्, त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्' इति त्रयाणां मन्त्राणां सृष्टिशब्देनाजहल्लक्षणया यथा बोध्यत्वं तद्वदित्यर्थः । इदं च ईदूदेत्सूत्रे उपपादितम् ॥ सृष्टिरित्यादिवत् — अ, आ, इ, म.

[12] पा. सू. ६. ३. ७८.

इति पूर्वसूत्रे यादृशं स्थानषष्ठीयुक्तं निर्दिष्टं तादृशमेवोत्तरत्राकृष्यत इत्यर्थः। एतेन यत्र चकारस्तत्र स्वरितत्वयुक्तस्यापि तादृशस्यैवानुवृत्तिर्न शब्दमात्रस्य, अन्यथा चकारवैयर्थ्यापत्तेरित्युक्तं भवति। भाष्ये **एतदुत्तरत्रेति**। सूत्रान्तरे तत्सदृशशब्दान्तरस्यानुमितत्वादर्थान्तरपरत्वं युक्तमिति भावः। नन्वनुच्चारितस्य संप्रत्ययायोगात् तदङ्गीकृत्यानुच्चारणोक्तिरयुक्ता, अत आह — **स्वरितत्वेति**। अन्यत्र कृतलिङ्गस्यान्यत्र कार्यकरत्वेऽतिप्रसङ्गः, अत आह — [1]**तत्संबन्धिन इति**। भाष्ये **अङ्गस्येति**। [2]'हलः' इति सूत्रस्यायमर्थः — अङ्गावयववाद्धलः परं यदणरूपं संप्रसारणं तदन्तस्याङ्गस्य दीर्घः स्यात्, इति। संवीतः। हलः किम्? उतम्। अङ्गावयवात् किम्? निरुतम्। तदन्तस्य किम्? विद्धम्। अणः किम्? तृतीयः। अत्र यद्यपि 'अङ्गस्य' इति हलो विशेषणम्, अणरूपं संप्रसारणमङ्गस्य, तथापि स्थानषष्ठ्या अन्त्येऽल्युपसंहारे सति 'अङ्गान्त्यस्याणः संप्रसारणस्य' इत्येवं वस्तुतोऽङ्गस्येत्यवयव[3]षष्ठ्यन्तस्याण्संप्रसारणविशेषणत्वमपि संभवतीत्यभिप्रेत्य भाष्ये 'अणपि' इत्याद्युक्तम्। [4]'अण्ग्रहणाननुवृत्तावपि [5]"द्वितीयतृतीय' इति निपातनाद्दीर्घाभाव इति वक्ष्यते। तथाप्यनुवृत्तिपक्षमाश्रित्य 'अणपि' इत्युक्तम्। **स्थानषष्ठीत्वादिति**। नियमेनावयव[6]षष्ठीत्वव्यावर्तनात्। अत एव 'अङ्गस्य' [7]इत्यस्यावृत्तावप्यवयवषष्ठी न लभ्यत इति भावः। ननु 'देवदत्तस्य पुत्रः' इति जन्यजनकभावार्थकत्वात् षष्ठ्याः कथमवयववावयविस्वस्वामित्वार्थकत्वम्, अत आह — **संबन्धेति**। सामान्यस्य [8]'सर्वविशेषैः संबन्धोपपत्तेरित्यर्थः। भाष्ये **अर्थनिमित्ताः** स्वस्वामिभावादयः, **योनिनिमित्ताः** पितापुत्रत्वादयः, **मुखनिमित्ताः** गुरुशिष्यत्वादयः, **स्रुवनिमित्ताः** ऋत्विग्यजमानत्वादयः। व्याख्यानेऽपि हेतुमाह — **अन्तरङ्गत्वादिति**। स्थानशब्दस्यार्थवाचित्वे तस्य शब्दप्रयोगहेतुत्वेनादौ बुद्धिसंनिधानादन्तरङ्गत्वम्। प्रसङ्गवाचित्वेऽपि प्रसक्तस्यैवानन्तर्यादिसंभवादादौ बुद्धिस्थत्वम्। मुख्ययुक्तिमाह — **लक्ष्येति**। ननु पादन्तस्याङ्गस्य स्थानित्वात् कथं [9]'तन्मात्रस्य स्थानित्वलाभः, अत आह — **तेनेति**। पाद इत्यावर्तते। एकमङ्गविशेषणार्थम्, इतरत् स्थानिनिर्देशार्थम्, अङ्गस्येति चावयवषष्ठीति भावः। ननु सूत्रात् [10]"परिभाषार्थाप्रतीतेः 'न कर्तव्या' इत्ययुक्तम्, अत आह — **अस्यैवेति**। [11]"ननु [12]"निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषयैव सिद्धम्, किमनेनेत्यत आह — **अस्यैवेति**" [13]इति केचित्। तच्चिन्त्यम्, 'न कर्तव्या' इति भाष्यानन्तरं शङ्कानुत्थानात्। **स्थानेन** प्रसङ्गेन, लक्षणयादेशेन वा। एवं सति [14]"आदेः परस्य' [15]"अलोऽन्त्यस्य' इति च निर्विषयं स्यात्, अत आह — **अल इति**। परत्वादनवकाशत्वाच्च ताभ्यामेतदेव बाध्यत [16]इति भावः॥

---

[1] प्रदीपे 'तत्संबद्धस्थानिनः' इत्यत्र 'तत्संबन्धिनः स्थानिनः' इति चौखाम्बामुद्रिते पाठः।
[2] पा. सू. ६. ४. २.
[3] षष्ठ्यन्तस्याणः संप्रसारण — अ, आ.
[4] तद्ग्रहणाननुवृत्तावपि — म.
[5] पा. सू. २. २. ३.
[6] षष्ठ्या व्यावर्तनात् — अ, इ; षष्ठीव्यावर्तनात् — ऋ.
[7] इत्यस्यानुवृत्तावपि — अ; इत्यस्याननुवृत्तावपि — म, आ; इत्यस्यानुवृत्तस्यापि — ऋ.
[8] सर्वविशेषे संबन्धोपपत्तिरित्यर्थः — अ.
[9] तावन्मात्रस्य — अ.
[10] परिभाषाप्रतीतेः — म; परिभाषार्थप्रतीतेः — अ, आ, इ.
[11] विवरणोक्तिमनूद्य खण्डयति—नन्वित्यादिना।
[12] परिभाषा १२.
[13] इतिशब्दो नास्ति — अ, म, आ, ऋ.
[14] पा. सू. १. १. ५४.
[15] पा. सू. १. १. ५२.
[16] इत्याहुः — म, आ.

[१, ३६०–३६४]

(**रत्नप्रकाशः**) **किमिदं स्थानेयोगे[ती]ति**। समस्तं वा व्यस्तं वेति भावः। व्यस्ते 'योगा' इत्ययुक्तम्, 'युक्तिः' इति क्तिन्नन्तस्यैव स्त्रियां वृत्तेः। समस्ते 'स्थाने' इति सप्तमीश्रवणमयुक्तम्, [1]'सुपो धातुप्रातिपदिकयोः' इति लुक एवोचितत्वादिति संदेहबीजम्। **स्थानेयोगेति**। प्रसङ्गरूपार्थविशेषपर्यवसन्ना ज्ञेयेति भावः। तेन [2]'अस्तेर्भूः' इत्यादावस्त्यादिप्रतिनिधित्वेनैव [3]विधीयन्ते। प्रतिनिधिना च प्रतिनिधेयं निवर्तत इति तु लोकसिद्धमेव। यथा 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इत्युक्ते दर्भाणां निवृत्तिः। **तृतीयाया वा एत्वमिति**। निपातनादित्यनुषज्यते। एत्वे कृते [4]'अतो गुणे' इति पररूपमिति भावः। यत्तूक्तम् 'देवदत्तस्य यज्ञदत्त इति [5]पुत्रत्वादिद्वारकः संबन्धोऽवगम्यते, एवम् [6]'अस्तेर्भूः' इत्यत्रास्यां परिभाषायां सत्यां स्थाननिमित्तः संबन्धोऽवसीयते' इति। तन्न, 'देवदत्तस्य यज्ञदत्तः' इत्यत्र संबन्धसामान्यवाचिन्याः षष्ठ्याः प्रकरणादिना जन्यजनकभावसंबन्धपर्यवसानद्वारा पुत्रलक्षकताभ्युपगमेन 'देवदत्तपुत्रो यज्ञदत्तः' इति शाब्दबोधस्य स्वीक्रियमाणत्वेन तत्र षष्ठ्या [7]पुत्रत्वादिद्वारकसंबन्धावगमस्य सकलानुभवविरुद्धत्वात्। न च [8]'नामार्थयोरभेदान्वयः' इति नियमेन विभक्त्यर्थनामार्थयोरभेदान्वयो न स्यादिति वाच्यम्, नामार्थयोरभेद एव संबन्ध इति तस्य नियमस्याकारः सर्वसंमत इति विभक्त्यर्थनामार्थयोर्भेदेनाभेदेन [च] संबन्धे बाधकाभावात्। न च विभक्तौ लक्षणाङ्गीकारो दोषः, तस्य दोषत्वे मानाभावात्। नैयायिकादिनिर्युक्तिकवचनमात्रेण तस्य दोषत्वस्वीकारे तदुक्तस्य व्याकरणविरुद्धस्य सर्वस्य स्वीकारापत्तेश्च। एवं च दार्ष्टान्तिके 'स्थाननिमित्तः संबन्धोऽवसीयते' इति तदुक्तमयुक्तमिति स्पष्टमेव। यदप्युक्तम् 'तिष्ठन्त्यस्मिन् शब्दा इति स्थानम्, [9]'अर्थे हि शब्दास्तिष्ठन्ति। तेनास्तेरर्थे भूरादेश इत्यर्थः' इति। तदपि न, [10]'भ्रस्जो रोपधयो रम्' इत्यादौ रोपधादेरनर्थकत्वेन तदसंभवात्। **किमर्थमिति**। सत्यपि सूत्रेऽवयवषष्ठ्यादिष्वतिप्रसङ्गवारणाय व्याख्यानपरिभाषा शरणीकरणीयैवेति व्यर्थमिदं सूत्रमित्याशयः। **एकशतमिति**। षष्ठ्यर्थे दण्डके तावन्तः पठिता इति भावः। सोऽपि पाठ उपलक्षणपर एव, ततोऽप्यधिकार्थसंभवादित्याशयेनाह — **यावन्तो वेति**। **अवयवषष्ठ्यादिष्विति**। आदिशब्देन [11]'अजाद्यतः' इति वाच्यषष्ठ्याः, [12]'गापोष्टक्' इति परषष्ठ्याश्च संग्रहः। **अतिप्रसङ्ग इति**। तासामपि स्थानार्थकत्वमेव स्यादित्यर्थः। **उपधामात्रस्येति**। शासेरन्यस्य चेत्यर्थः। **योगस्य** संबन्धस्य। **किं वक्तव्यमेतदिति**। 'संदेहे नियमः प्रवर्तते' इत्येवं वक्तव्यं वेति भावः। **हस्तदक्षिण इति**। हस्तेन दक्षिण इत्यर्थः। मयूरव्यंसकादिः। एतेन 'हस्तो दक्षिणोऽस्येति बहुव्रीहिः' इति कैयटो निरस्तः, दक्षिणशब्दस्य सर्वनामत्वेन पूर्वनिपातप्रसङ्गात्। यदप्युक्तं तेनैव 'भाष्यकारवचनात् सर्वनाम्नोऽपि परनिपातः' इति। तदपि न, यावत्पर्यन्तं सूत्रकारपरिकल्पितोपायेन शिष्टप्रयोगः साधयितुं शक्यते तावत् तद्वचनसामर्थ्येन तस्य साधुत्वाङ्गी-

---

[7] पुत्रादि — ब.

[1] पा. सू. २. ४. ७१.
[2] पा. सू. २. ४. ५२.
[3] भ्वादय इति शेषः।
[4] पा. सू. ६. १. ९७.
[5] पुत्रादिद्वारकः — ब.
[6] पा. सू. २. ४. ५२.
[8] मुक्तावल्यां शब्दखण्डे उक्तोऽयम्।
[9] प्रदीपे 'अर्थे च शब्दाः' इत्यत्र 'अर्थे हि शब्दाः' इति रत्नप्रकाशकृत्पाठ इति भाति।
[10] पा. सू. ६. ४. ४७.
[11] पा. सू. ४. १. ४.
[12] पा. सू. ३. २. ८.

कारानौचित्यात्। अन्यथा भाष्यकारप्रयोगाणां पाणिनिवचनैः क्रियमाणं व्युत्पादनं स्वप्रभृतिशिष्ट-कर्तृकमयुक्तं स्यात्, भाष्यकारप्रयोगसामर्थ्यादेव तेषां साधुत्वसिद्धेः। **अव्यक्तयोगा अयोगेति**। शाकपार्थिवादित्वाद्व्यक्तशब्दस्य लोप इति भावः। एतेन 'योगमन्तरेण षष्ठ्या एवाभावाद्वि-शिष्टो योगो यस्य नास्तीति सामर्थ्याद् गम्यते' इति कैयटो निरस्तः। योगमन्तरेण कर्तृकर्म-करणादौ षष्ठ्या दर्शनात्। एतेन 'षष्ठ्या अवश्यंभावी योग इति सामर्थ्याद् भूम्नि मत्वर्थीयः।' इत्यपि तदुक्तिः प्रत्युक्ता, औचित्यादेव तत्र भूम्नि स इति ज्ञातुं शक्यत्वात्। **विशिष्टा वेति**। किंचिल्लिङ्गेनेति शेषः। **किंचिल्लिङ्गमिति**। कलादिकम्। **शासिग्रहणं कर्तव्यमिति**। "शा हौ' इति सूत्र इति भावः। किमर्थं कर्तव्यमित्यत आह — **स्थानेयोगार्थमिति**। पूर्वसूत्रेऽवयव-षष्ठ्यन्तः स स्थित इति तस्यानुवृत्त्या निर्वाहाभावादिति भावः। अनुवृत्तिर्नाम तत्सजातीय-शब्दान्तरानुमानमेव। तथा च [२]"शा हौ' इत्यत्रानुमीयमानः शास इति शब्दस्तल्लिङ्ग एव[३] लक्ष्यानुरोधेनानुमीयत इत्याशयेनाह — **न कर्तव्यमिति**। **अधिकारो नाम त्रिप्रकार इति**। यद्यपि स्वरितत्वादेवानुवृत्तिसिद्धेरधिकृतानु[४]कर्षणार्थश्चकारो न कर्तव्य [५]इत्यन्यत्रोक्तं भगवतैव, तथापि यथान्यासं [६]चकारसत्त्वासत्त्वाभ्यां द्वैविध्यमधिकारस्य संभवति, परिभाषाप्यधिकारशब्देन निर्दिश्य प्रसङ्गादुपपादिता [७]भवतीत्याशयेन त्रिप्रकारत्वमुक्तम्। **एकदेशस्थ इति**। परिभाषारूपः। **चकारेणेति**। यथा "ग्रन्थान्ताधिके च' इति चकारेण पूर्वसूत्रगतं 'सहस्य सः' इत्यनुकृष्यते। **अपरो-ऽधिकार इति**। अयमेव मुख्योऽधिकारः। **अनुवृत्तं सदिति**। कलादिलिङ्गविशिष्टतया ऊहितं सदिति भावः। **संप्रत्ययमात्रमिति**। यद्धर्मविशिष्टोऽधिकृतस्तद्धर्मविशिष्टस्यैव व्यक्त्यन्तरस्य संप्रत्ययो युक्तः, न तु धर्मान्तरविशिष्टस्य। अन्यथा गुणशब्देऽधिकृते वृद्धिशब्दस्योत्तरत्र संप्रत्ययः स्यादिति भावः। **तत्प्रकृतिमास्कन्त्स्यतीति**। स्वाश्रयद्वारा स्थानिसमर्पकषष्ठ्यन्तसंबन्धि भविष्य-तीति भावः। तथा च 'इत्थंलिङ्गा षष्ठी' इत्यत्रेत्थंलिङ्गत्वं षष्ठ्याः परम्पराप्राप्तमेवाश्रीयत इत्युक्त-प्रायमेव। तदेवं नियमार्थतया सूत्रं व्यवस्थाप्येदानीमन्यार्थकतां वक्तुं तस्य नियमार्थत्वे दोषमाह — **यदीति**। **अङ्गस्य हलः [अणः] संप्रसारणस्येति**। [९]'हलः' इति सूत्रे [१०]'अङ्गस्य' [११]'संप्रसारणस्य' इति पूर्वसूत्रद्वयानुवृत्तौ सत्यामिति भावः। **हलपि विशेष्य इति**। 'अङ्गस्य यो हल् तस्मात्' इत्येवमिति भावः। **संप्रसारणमपि विशेष्यमिति**। 'तस्माद्धलः परं यत् संप्रसारणं तदन्तस्या-ङ्गस्य' इत्येवमिति भावः। नन्वेकेन 'अङ्गस्य' इति षष्ठ्यन्तेनानेकं [न] विशेषितमेवेति कथं भाष्योपपत्तिरिति चेन्न, विशेषणस्यापि [१२]विशेषणविशेषे व्यवस्थाप्यमानत्वसाम्येनोपचाराद्विशेष्य-त्वोक्तिसंभवस्य [१३]प्रागप्युक्तत्वात्। ननु 'अङ्गस्य' इति शब्दस्यावृत्त्या विशेषणत्वं विशेष्यत्वं चोभयं युज्यत एवेति चेन्न, स्थानषष्ठ्यन्तस्यावृत्त्यावयवषष्ठ्यन्तताया वैपरीत्यस्य वा असंभवात्। **देवदत्तस्येति**। संबन्धसामान्यवाचकत्वेनावस्थिताया: षष्ठ्याः पुत्रेण योगे जन्यजनकभावपरत्वं पाणिना योगेऽवयवावयविभावपरत्वं कम्बलेन योगे स्वस्वामिभावपरत्वमित्यभिमतसिद्धिरिति भावः। **आर्था**

---

[१] पा. सू. ६. ४. ३५.
[२] पा. सू. ६. ४. ३५.
[३] कलादिलिङ्ग एवेत्यर्थः।
[४] करणार्थः — ब.
[५] लुटि च क्लृप इति सूत्र इति भावः।
[६] चकारसत्त्वाभ्यां — ब.
[७] भवत्वित्याशयेन — ब.
[८] पा. सू. ६. ३. ७९.
[९] पा. सू. ६. ४. २.
[१०] पा. सू. ६. ४. १.
[११] पा. सू. ६. ३. १३९.
[१२] विशेषणविशेष्ये — ब.
[१३] आद्यन्तौ टकितावित्ति सूत्रे 'तत्र वाक्य एवो-दात्तग्रहणेनाकारो विशेष्यते' इत्येतद्भाष्य-व्याख्यानावसरे स्वेनोक्तमित्यर्थः

इति । आधाराधेयाद्यर्थनिमित्तका आधाराधेयभावादयः । **यौनाः** योनिनिमित्तकाः पुत्रत्वपितृत्व-मातृत्वभार्यात्वादयः । **मौखाः** मुखनिमित्तका गुरुत्वशिष्यत्वादयः । **स्रौवाः** स्रुवनिमित्तका यज-मानत्वाध्वर्युत्वादयः । **अनन्तरादय इति** । अनन्तरशब्दोऽत्र भावप्रधानः । आदिशब्देन सामीप्य-परत्वावयवत्वादयो गृह्यन्ते । एतेन 'सामीप्यानन्तर्यादयः षष्ठ्यर्था न भवन्ति' इति वदन्तः परास्ताः । **स्थान इति व्याख्यास्याम इति** । लक्ष्यानुसारेणेति शेषः । **यतः षष्ठ्युच्चारितेति** । 'सूत्रपाठे' इति शेषः । तथा च [1]"पादः पत्' इति पाच्छब्दात् षष्ठ्युच्चारिता सूत्रपाठ इति 'सुपदः' इत्यादौ पाच्छब्दस्यैव पदादेशो भवति, [न] तु पाच्छब्दान्तस्य तत्रानुच्चारितषष्ठीप्रकृतेः सुपाच्छब्द-स्येति भावः । **न कर्तव्येति** । अपूर्वतयेति शेषः । तथा च प्रकृतसूत्रार्थप्रकटनार्थतया तस्य पाठेऽपि न दोषः ॥

[१, ३६०–३६४]

(**नारायणीयम्**) समासासमासयोरर्थभेदात् किं प्रश्नेन, अत आह — **समास इति** । **युक्तिरिति** । युज्यत इति युक्तिः । कर्मणि क्तिन् । स च स्त्रियां घञपवादः । आधारत्वं न सप्तम्यर्थः, योगस्य स्थानानाधारत्वात्, स्थान्यादेश[2]निष्ठत्वात् तस्य, अत आह — **स्थानेति** । [3]'यस्य च भावेन' इति सप्तम्या लक्षणार्थाया आर्थिकं निमित्तार्थत्वमिति साक्षान्निमितार्थविभक्तेः समास उक्तः । तत्रैत्वस्यालाक्षणिकत्वात् 'निपातनात्' इति हेतुस्तत्रानुषञ्जनीय इत्याह — **निपातनादिति** । संबन्धमात्रनिमित्तायाः षष्ठ्याः कथं सनिमित्तकसंबन्धबोधकत्वमित्याशङ्क्य [4]'वचन-मन्तरेण लोकेऽप्यविनाभावान्निमित्तावगम इति किमु वक्तव्यमिह शास्त्रे, यत्रेदं वचनमस्तीत्याह — **यथेति** । [5]**पुत्रादिद्वारक इति** । पुत्रशब्देन तदुत्पादनक्रिया लक्ष्यते, तत्स्वीकारादिर्वा । शब्दादि-नित्यत्वाविरोधिनमर्थं स्थानशब्दस्य दर्शयति — **स्थानमिति** । **तेनेति** । एवं ह्यस्तिभवत्योरर्थ-निमित्तः संबन्धो भवति । यद्यस्त्यभिधेयं [6]'भवतिरभिदधाति [तर्हि] अपूर्वार्थस्तु शब्दादिनित्यत्व-विरोधीति न [7]'तदाश्रयणेनान्वाख्यानमित्यत आह — **स्वाभाविक इति** । अनेनेत्यत्रैवकारो द्रष्टव्यः । योगनियमार्थत्वादस्य कथं प्रश्नः, अत [8]'आह — **विनापीति** । अन्तरङ्गत्वात्[9]'स्थाननिमित्तकसंबन्धस्य न्याय्यत्वात् । **अतिप्रसङ्ग इति** । 'यत्रैका षष्ठी' इति वक्ष्यमाणः । संबन्धनिमित्तक्रियाणामेक-शतत्वानिश्चयात् कथं संबन्धेयत्ता, अत आह — **षष्ठीति** । **षष्ठीदण्डको** ग्रन्थविशेषः । 'यावन्तो वा' इत्यनेनैकशताधिक्यं[न]द्योत्यते, किं तु न्यूनतेत्याह — **शब्द इति** । तत्रातिप्रसङ्गो नाम तदसिद्धिरित्याह — **नियमेनेति** । सिद्धान्ते त्ववयवषष्ठीत्वेन संमतास्त्वित्यक्षरार्थः[10]। उपधामात्रस्ये-ष्टत्वादन्त्यस्यापादन[11]विरोधाच्च मात्रशब्दो नावधारणे, किं तु कात्स्न्र्यं इत्याह — **पचादीति** । कथं पुनः शासिग्रहणे सत्येष प्रसङ्गः, अत आह — **शासिनेति** । षष्ठीमात्रस्य सूत्रे श्रुतत्वात् तस्यानियत-योगत्वविशेषः कथं लभ्य इत्याशङ्क्य विध्यनुसारेण विशेषपरत्वमुद्देशवाचिन इत्याह — **अनिय-**

---

[1] पा. सू. ६. ४. १३०.
[2] निष्ठत्वं तस्य — क.
[3] पा. सू. २. ३. ३७.
[4] वचनमात्रेण लोकेऽपि विनाभावात् — क.
[5] प्रदीपे 'पुत्रत्वादिद्वारकः' इत्यत्र 'पुत्रादि-द्वारकः' इति पाठोऽभिमत इति भाति ।
[6] भवतिरपि दधाति — क.
[7] तदाश्रयणेनान्वाख्यानमित्याह — कः
[8] आह — भवितेति । अन्तरङ्गत्वात् — क.
[9] स्थाननिमित्तक — क.
[10] 'अवयवषष्ठ्यादयस्तु' इति भाष्यस्यायमर्थः ।
[11] 'अन्यस्यापादन' इति युक्तं भाति ।

मेति। षष्ठीसमासे हस्तविशेषस्याव्यावर्तकत्वादाह — **हस्त इति**। अपिशब्दाद्विशेषणस्य वामस्य। कथम् 'अयोगा' इत्यनेन योगानभिव्यक्तिर्लभ्या, अत आह — **योगमिति**। मतुपा इह भूमाद्युपाधिनिर्देशव्याख्यानात् कथं [1]तदवगमकत्वम्, अत आह — **षष्ठ्या इति**। [2]लिङ्गमाह — **कलेति**। [3]एकदेशस्थस्याधिकारत्वानुपपत्तेराह — **पारार्थ्येति**। **सर्वशास्त्राभिज्वलनं** स्वलिङ्गवद्देशे सर्वत्र व्यवहारः। तस्यैकदेशस्थत्वेन विरोध इत्याशङ्क्य यथोद्देशपक्षे स्वदेशस्थस्यैव स्वसाध्यनियमसंचारणं [4]स्वलिङ्गवत्स्वित्यभिप्रेत्याह — **परिभाषेति**। चानुकर्षणस्य सुप्रसिद्धमुदाहरणमाह — **यथेति**। [5]सूत्रत्रये चग्रहणात् 'अविशेषेण' इत्युक्तम्। एकत्रानुकर्षणमपरत्रान्यथानुवृत्तिरिति वैषम्याभावोऽविशेषशब्दार्थः। एकदेशस्थेऽधिकारे भेदाभावाल्लिङ्गासङ्गानासङ्गौ न संभवतः। चानुकृष्टेऽपि तत्त्वप्रत्यभिज्ञानात् तथात्वमिति स्वरितत्वनिबन्धनेऽधिकारे शब्दान्तरानुमानात् तदासङ्गोपपत्तिरित्युक्त्वा तत्रानुपपत्तिरुक्ता 'संप्रत्ययमात्रम्' इति। तत्रानुच्चारितस्य संप्रतीतिरेव कथमित्याकाङ्क्षायामाह — **स्वरितत्वेति**। अन्यदीयं लिङ्गं कथमन्यार्थम्, अत आह — **आदेश इति**। यथा संज्ञायां कृतं लिङ्गं संज्ञचर्थं ङ्मुडादौ तथादेशे कृतं लिङ्गं स्थान्यर्थं भविष्यति। विशेषणत्वं सिद्धवत्कृत्यानेकविशेषणत्वानुपपत्तिश्चोद्यत इति भाति। तदयुक्तम्, विशेषणत्वस्यैवानुपपत्तेरित्यतो विशेषणत्वानुपपत्तिचोद्यपरतया व्याचष्टे — **अङ्गस्येति**। [6]'अङ्गस्य' इत्यधिकारसूत्रे षष्ठ्या अनिश्चितयोगत्वादेतत्परिभाषाप्रवृत्त्या स्थानसंबन्धाश्रयणाद्धलादिविशेषणत्वानुपपत्तिरित्यर्थः। हलेव च साक्षादङ्गेन विशेष्यते, हला त्वितरत्। तत्र तद्विशेष्यविशेष्यमपि विशेष्यत्वेन भाष्य उक्तम्। कथं पुनः पुत्रादिसंबन्धाद्वा अतद्विशेषणत्वायाः षष्ठ्या विशेष्यान्तरबोधकत्वम्, अत आह — **संबन्धेति**। सामान्यस्य सकलविशेषानुस्यूतत्वमिति नानाविशेषस्तत्तत्संबन्धेऽवगम्यत इत्यर्थः। व्याख्याननिमित्तमाह — **अन्तरङ्गत्वादिति**। प्रसङ्गादुच्चारितस्य पश्चादानन्तर्यादिकमुपजायत इत्यन्तरङ्गत्वं तस्य। निर्दिश्यमानपरिभाषायाः फलमाह — **तेनेति**। परिभाषार्थे [7]सूत्रानुगत्यभावमाशङ्क्याह — **अस्येति**। अतिप्रसङ्गं परिहरति — [**अलोऽन्त्यस्येति** ॥]

स्थानेऽन्तरतमः। १. १. ५०.

[१, ३६४–३६६]

(**लघुविवरणम्**) **लक्षणमपीति**। शक्यते ह्युद्दिश्यमानप्रतिनिर्दिश्यमानयोरान्तरतम्येन लक्षण एव प्रतिपत्तिः। **यणस्त्विति**। रेफवर्जिताः सानुनासिका इति भेदेनेत्यर्थः। द्वयर्थत्वमात्रेण सादृश्ये तसस्तमपि प्राप्नोतीत्यत आह — **सादृश्येति**। प्रत्यक्त्वमात्मनः, पराक्त्वमन्यस्य धर्मः। [8]'आदिशब्देन भवदादिसामानाधिकरण्यं विवक्षितम्। **वाक्यभेद इति**। अनुवर्तमानेन स्थानेग्रहणेन प्रसङ्गवाचिनाद्यं वाक्यम्, इहस्थेन स्थानेग्रहणेन तात्वादिवाचिना द्वितीयं [9]'वाक्यमिति भावः। 'सोष्मणः' इत्ययुक्तम्, ऊष्मशब्देनैव हकारस्याभिधानादित्यत आह — **ऊष्मत्वेति** ॥

---

[1] तदवयवगमकत्वम् — क.
[2] योगमाह — क.
[3] एकदेशस्थत्वस्याधिकारानुपपत्तेः — क.
[4] स्वलिङ्गवदस्त्विति — क.
[5] 'ग्रन्थान्ताधिके च' 'द्वितीये चानुपाख्ये' 'अव्ययीभावे चाकाले' इति सूत्रत्रय इत्यर्थः।
[6] पा. सू. ६. ४. १.
[7] सूत्रानुगम्यभावम् — क.
[8] एतेन प्रदीपे 'प्रत्यक्त्वपराक्त्वादयो धर्माः' इति पाठोऽभिसंहित इति प्रतीयते। कोशेषु 'प्रत्यक्त्वादयो धर्माः' इत्येवोपलभ्यते।
[9] 'वाक्यम्' इति नास्ति — ड, ढ, त.

[१; ३६४–३६६]

(**विवरणम्**) क्वचिदित्यनेन [1]"इको यणचि' [2]इत्याद्युदाहरणमिति ये मन्यन्ते तन्मतनिराकरणायायं[3] प्रश्नोपन्यासो न त्विहोदाहरणासंभवोऽभिप्रेत इति दर्शयति — **लक्षणमिति**। शक्यते हि 'इकारस्य यकारः' इत्यादि [4]"इको यणचि' इत्यत्रैव स्थित्वा प्रतिपत्तुमिति भावः। **षट्षष्टिरिति**। ऌवर्णस्य दीर्घाभावादिति भावः। **यणस्त्विति**। रेफस्यानुनासिकस्याभावादिति भावः। **संख्यातानुदेशः** क्रमेणान्वय इत्यर्थः। **शब्दत इति**। प्रत्यायकाः समसंख्याः, प्रत्याय्यानां विषमसंख्यत्वेऽपीति भावः। तत्स्थानापत्त्या न तदर्थत्वमादेशानाम्, किं तु स्वभावतो नित्यत्वाच्छब्दार्थसंबन्धानामित्यभिप्रेत्य भगवतोक्तम् — 'एकार्थस्य' इत्यादि। तावत्युक्ते तसस्तमपि प्राप्नोति, थसस्तामपीत्यत आह — **सादृश्येति**। उत्तमपुरुषेण नियमेन प्रत्यक्त्वम्, मध्यमेन पराक्त्वं प्रतीयते, [5]प्रथमेन त्वनियतम्। बहुवचनेन भवद्युष्मदादि[6]समानाधिकरणयोग्यत्वं[7] संगृहीतम्। **वाक्येति**। अनुवर्तमानेन स्थानग्रहणेन प्रसङ्गवाचिनैकं वाक्यम्, इहत्येन ताल्वादिवाचिना द्वितीयं वाक्यमिति विभागः। सहशब्दप्रयोगोपपत्तये धर्मपर ऊष्मशब्द इत्याह — **ऊष्मत्वेति**॥

[१, ३६४–३६६]

(**उद्द्योतनम्**) **क्वचिदिति**। उदाहरणासंभवाभिप्रायेण न प्रश्नः, किं तु "इको यणचि' इत्याद्युदाहरणं ये मन्यन्ते तन्निरासार्थमित्यर्थः। ननु लक्षणमस्य नोदाहरणम्, किं तु प्रयोग एव, अत आह — **अस्येति**। यथासंख्यसूत्रस्य तु लक्षणमेव विषयः। [9]"कर्मण्यण्' इत्यादेः प्रयोग एव। अस्य द्वयमप्युदाहरणम्। [10]"इको यणचि' इत्यत्रैव स्थित्वा इकारस्य यकारो भवतीत्यादेर्ज्ञातुं शक्यत्वात्। प्रयोगे त्विकारस्थानिको यकार [11]इति प्रतीयत एवेति। संख्यातानुदेशोऽत्र न संभवतीत्याह — **इक इति**। त्रयाणामष्टादश [12]भेदाः, ऌवर्णस्य दीर्घाभावाद् द्वादशेति षट्षष्टिः। सानुनासिकनिरनुनासिकत्वेन यवला [13]द्विविधाः। [14]रेफस्यानुनासिकाभावाद्यणः सप्त। **संख्यातानुदेशः** क्रमेणान्वयः। [15]**यत्नः** सूत्रारम्भः। **शब्दत इति**। [16]प्रत्याय्यानां विषमसंख्यत्वेऽपि [17]प्रत्यायकानां समसंख्यत्वादिति भावः। ननु क्लृपिव्यतिरिक्ते ऌकाराभावात् तत्र च यणोऽप्रसङ्गात् स्थानित्रयमादेशचतुष्टयमिति न संख्यातानुदेशः, अत आह — **घस्लादेश इति**। तस्त्स्थानापत्त्या तदर्थत्वं नादेशानाम्, किं तु शब्दार्थसंबन्धानां नित्यत्वात् स्वभावत एवेत्यभिप्रेत्य 'एकार्थस्य' इत्यादि-

---

[1] पा. सू. ६. १. ७७.
[2] इत्युदाहरणमिति — ट.
[3] 'अयम्' इति नास्ति — ट.
[4] पा. सू. ६. १. ७७.
[5] प्रथमे त्वनियतम् — च.
[6] समानाधिकरणशब्दो भावप्रधानो बोध्यः।
[7] योग्यत्वं गृहीतम् — ञ.
[8] पा. सू. ६. १. ७७.
[9] पा. सू. ३. २. १.
[10] पा. सू. ६. १. ७७.
[11] इतिशब्दो नास्ति — अ, इ, ऋ.
[12] भेदात् — अ, इ.
[13] द्विधा — अ, इ.
[14] रेफस्य सानुनासिकाभावात् — अ, इ, ऋ.
[15] प्रदीपे 'संख्यातानुदेशो न सिध्यतीत्यर्थः' इत्यत्र 'संख्यातानुदेशो न सिध्यतीति यत्नः' इत्यन्नंभट्टपाठ इति भाति।
[16] प्रत्ययानाम् — अ; प्रत्याहारस्थानाम् —आ.
[17] प्रत्याहारकाणां — आ.

भाष्यम्। तत्र तसस्तमपि प्राप्नोति, थसस्तामपि, अत आह — **सादृश्येति**। [1]अन्तरतमत्वेत्यर्थः। उत्तमपुरुषेण प्रत्यक्त्वं मध्यमेन पराक्त्वमाभिमुख्यं वा प्रतीयते। प्रथमेन त्वनियतम्। बहुवचनेन युष्मदस्मत्सामानाधिकरण्ययोग्यत्वग्रहः। भाष्ये **प्रमाणत इति**। मात्राकालस्य मात्राकालः, ह्रस्वस्य ह्रस्व इति यावत्। **वाक्यभेद इति**। अनुवर्तमानेन प्रसङ्गवाचिना स्थानग्रहणेनैकं वाक्यम्, अत्रत्येन तालवादिवाचिना द्वितीयम्। द्वितीयवाक्ये तृतीयाया व्यत्ययेन सप्तमी, स्थानेनान्तरतम इत्यर्थः। नियमार्थमिदम्। तेनानियमप्रसङ्गे नियम इति सामर्थ्याद्यत्रानेकमान्तरतम्यमिति [2]लभ्यत इति ज्ञेयम्। ननु 'इकः प्रसङ्गे स्थानेनान्तरतमो यण् भवति' इत्येवमेकवाक्यत्वसंभवे वाक्यभेदोऽमानकः, तथा चोक्तनियमो न सिध्येत्, अत आह — **वाक्येति**। लिङ्गत्वमेवाह — **स्थानकृत इति**। एकवाक्यत्वपक्षे सादृश्यान्तराप्रसक्तेस्तमब् व्यर्थः। [3]'वाग्घसति' इत्यादौ चतुर्थस्य स्थानकृतातिशयाभावेन तमपापि द्वितीयतृतीयनिवृत्तिर्न स्यात्। [4]वाक्यभेदे तु पूर्वेण [5]सदृशमात्रस्य प्राप्तौ द्वितीयेन नियम उपपद्यते। हकारस्यापि नियमेन द्वितीयाद्यनिवृत्तावपि पूर्ववाक्येन तमप्सहितेन तन्निवृत्तिरुपपन्नेति भावः। सहशब्दप्रयोगोपपत्तये भावप्रधान ऊष्मशब्द इत्याह — **ऊष्मत्वेति**। ननु सुसदृशस्यैव [6]सदृशान्तरादिशब्दवाच्यत्वात् तमपो वैयर्थ्यम्, अत आह — **ईषदिति**॥

[१, ३६४–३६६]

(**रत्नप्रकाशः**) एतत्सूत्रेण व्यवस्थापनीयं किंचिद् यथासंख्यसूत्रेणैव परेण व्यवस्थापनीयमिति सूचयितुं पृच्छति — **किमुदाहरणमिति**। **इको यणचीति**। एकैकस्येकश्चत्वारोऽपि यणः पर्यायेण प्रसक्ता इति प्रकृतसूत्रेण सदृशतम एव भवतीति नियम्यत इति भावः। एतेन 'सूत्रस्यास्य लक्षणमप्युदाहरणं प्रयोगोऽपीत्युभयोपन्यासः' इति निरस्तम्। [7]'वृद्धिरादैच्' इत्यत्रैव लक्षणस्यैतच्छास्त्रविषयताया उपपादितत्वेन विशिष्यैतत्सूत्रस्य 'लक्षणमुदाहरणं भवति' इति कथनानर्थक्यात्। यद्यपि 'इको यण्' इत्यत्र [8]'हशि च' इत्युत्वे आद्गुणेऽन्तरतम ओकारो भवतीति प्रकृतसूत्रोदाहरणं संभवति, तथापि तत्तात्पर्यकत्वेन [9]'इको यणचि' इति सूत्रं न दर्शितम्, 'संख्यातानुदेशेनाप्येतत् सिद्धम्' इत्युत्तरग्रन्थविरोधात्। संख्यातानुदेशविषयताख्यापनाय [10]'तस्थस्थमिपां तांतंतामः' इतिवत् [11]'इको यणचि' इत्येतस्य निर्देशोपपत्तेः। यदप्युक्तं तेनैव 'इको ह्रस्वादिभेदात् षट्षष्टिः, यणस्तु सप्तेति वैषम्यात् संख्यातानुदेशो न सिध्यतीति भावः' इति। तदपि न, तस्य सिद्धान्तिग्रन्थत्वेन तादृशाज्ञानमूलकत्वोपपादनानुधावनस्य व्यर्थत्वात्। इक्पदेन द्विरेफगर्भऋकारद्विलकारगर्भऌकारयोश्चतुर्विंशतिभेदानामेकलकारगर्भऌकारदीर्घस्य षड्भेदानां [च] ग्रहणे बाधकाभावेन 'षण्णवतिरिकः' इति वक्तुमुचितत्वाच्च। **संख्यातानुदेशेनापीति**। [12]'आदिरन्त्येन' इति सूत्रस्य संज्ञासूत्रत्वाश्रयेणैतावन्मात्रपर्यालोचनयेक्पदोपस्थितैर्यण्पदोपस्थितानां साम्यादिति भावः। वस्तु-

---

[1] अन्तरतमत्वेनेत्यर्थः — म, आ.
[2] लभ्यमिति — म.
[3] वाग्घरति — म.
[4] वाक्यभेदेऽपि तु — ऋ.
[5] सदृशमात्रेऽस्य प्रसक्तौ — अ.
[6] सदृशान्तरशब्दादिवाच्यत्वात् — अ, आ, इ.
[7] पा. सू. १. १. १.
[8] पा. सू. ६. १. ११४.
[9] पा. सू. ६. १. ७७.
[10] पा. सू. ३. ४. १०१.
[11] पा. सू. ६. १. ७७.
[12] पा. सू. १. १. ७१.

तस्त्विकारस्योच्चारितत्वेन स्वेन च मध्यगानामिव स्वसवर्णानामप्युपस्थापनसंभवेनानुच्चारितानामप्युकारादीनामिक्पदोपस्थापितानां [1]'दीर्घाज्जसि च' इत्यनेन सवर्णप्रत्यायकत्वस्य ज्ञापितत्वेन चेक्पदेन षण्णवतेरुपस्थानाद् यथासंख्यसूत्राप्रवृत्तिरेवोचिता, पक्षान्तरे तु युज्यते। एतेन 'प्रत्याहारपाठे शब्दतः साम्यमस्तीति भावः' इति निरस्तम्, अर्थत एव साम्यस्यात्र वक्तुमुचितत्वात्। तथैव यथासंख्यसूत्रे भगवता निदर्शितत्वाच्च। **द्वयर्थस्य द्वयर्थ इति**। ननु तस्थसोस्तांतमोश्च द्वयर्थत्वाविशेषात् कथमनेन निर्णय इति चेन्न, युष्मदर्थाभिन्नद्वयर्थस्य थसस्तादृशस्तम्, युष्मदन्यार्थाभिन्नद्वयर्थस्य तसस्तादृशस्ताम्, इत्यत्र तद्भाष्यतात्पर्यात्। एतेन 'सादृश्यहेतुधर्मोपलक्षणमेतत्। तेन प्रत्यक्त्वादयोऽपि धर्मा गृह्यन्ते' इति निरस्तम्। 'एकार्थस्यैकार्थः' इत्यस्य निर्दुष्टत्वेनास्मदर्थरूपप्रत्यक्त्वोपलक्षणत्वकल्पकताया एवाभावेन तदाद्युपलक्षकतायाः सुतरामभावात्। **संख्यातानुदेशेनेति**। शब्दतोऽर्थतश्च साम्यादिति भावः। **तत्र स्थानत एवेति**। अनेकादेशप्रसङ्गे सति तत्र यः स्थानिसदृशतमः स एवादेशो भवति। स्थानतोऽस्थानतश्चान्तरतम्ये स्थानतोऽन्तरतम एव भवतीति वाक्यभेदेन व्याख्यानलाभाय स्थानग्रहणमन्यदपि कृतमिति भावः। एतेन 'वाक्यभेदस्य तमब्ग्रहणमेव लिङ्गम्। स्थानकृत एव हि सादृश्ये गृह्यमाणे सादृश्यान्तरपरित्यागात् तमग्रहणमनर्थकं स्यात्' इति निरस्तम्। पुनःस्थानग्रहणेनैव वाक्यभेद इति भाष्यस्वरसात्। द्वितीयस्थानग्रहणाभावे वाक्यभेदस्य तमग्रहणेन भाष्यकृन्निदर्शितप्रयोजनेनैवोपपन्नेन संपादयितुमशक्यत्वाच्च। **प्रमाणत इति**। [2]ह्रस्वदीर्घप्लुतचतुर्मात्रार्धमात्ररूपबाह्ययत्नाः प्रमाणशब्देन गृह्यन्त इति ज्ञेयम्। **सोष्मण इति**। ऊष्मत्वगुणयुक्तस्येत्यर्थः। हस्येति शेषः। **द्वितीया इति**। खफछठथाः। [3]'वर्गे वर्गे [च] प्रथमावघोषौ युग्मौ सोष्माणावनुनासिकोऽन्त्यः' इति प्रातिशाख्यात् तेषां सोष्मत्वम्। **तृतीया इति**। जबगडदाः। **तमग्रहणादिति**। ईषत्सदृशेऽपि सदृशत्वव्यवहारो दृश्यत इत्यत्यन्तसदृशपरिग्रहस्तु तमग्रहणेन भवतीति भावः॥

[१, ३६४–३६६]

(**नारायणीयम्**) 'दण्डाग्रम्' इत्युदाहरणस्य सुप्रसिद्धत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **क्वचिदिति**। उदाहरणे पृष्टे तद्वक्तव्यम्, तदनुशासनलक्षणकीर्तनं तु किमर्थम्, अत आह — **अस्येति**। अन्तरतम[4]गुणप्रवृत्तिर्लक्षण इति भावः। अन्यथासिद्धं कथमुदाह्रियते, अत आह — **इक इति**। संख्यावैषम्यस्योक्तत्वात् तत्र कथं यथासंख्यपरिभाषाप्रवृत्तिः, अत आह — **प्रत्याहारेति**। **प्रत्याहारपाठः** अक्षरसमाम्नायः, तत्रेको यणश्च प्रत्येकं चत्वार एव शब्दाः। तद्बोधकत्वं चात्रेक्पदस्य यण्पदस्य[च]। ततश्चात्रत्योद्देश्यनुदेशिनोरर्थत एव साम्यम्। चतुर्भ्योऽधिकानां तु नेगादिपदार्थत्वम्। प्रतीतपदार्थकेन तत्प्रत्यायनात् शब्दग्रहणम्, अर्थतस्तेषां संख्यावैषम्यात्। तथाहि — अत्रेक्पदेन प्रत्याहारस्था इकारादयः प्रत्याय्यन्ते। तेषां चैकैकस्य बहवोऽर्था ग्रहणकशास्त्रायत्ताः। यण्पदप्रतीयमानानां चैकैकस्य द्वावर्थाविति नास्ति साम्यं रेफातिरिक्तानामेव। प्रत्याहारपठितस्यापि लृकारस्य यण्स्थानित्वादर्शनात् पुनरपि वैषम्यं तदवस्थमित्यत आह — **घस्लादेश इति**। द्वयर्थस्ताम् द्वयर्थस्य थसः प्राप्नोतीत्यत आह — **सादृश्येति**। स्थानग्रहणानुवृत्तावेकस्य

---

[1] पा. सू. ६. १. १०५.
[2] ह्रस्वादिशब्दा भावप्रधाना बोध्याः।
[3] शौनकीयम् ऋग्वेदप्रातिशाख्यम्. पटलः १, श्लो. १३.
[4] 'इको' इत्यत्र हशि चेत्युत्वे आद्गुणो जायमानोऽन्तरतम ओकारो भवतीति भावः।

प्रसङ्गवाचित्वमपरस्य ताल्वादिवाचित्वम्। ततश्चैकवाक्यत्वे गुणादिकृतसादृश्यपरिग्रहो न स्यात्, अत आह — **स्थानेति**। संभवत्येकवाक्यत्वे वाक्यभेदे किं प्रमाणम्, अत आह — **वाक्येति**। ऊष्मपदस्य शुक्लादिवदुभयवचनत्वं वृत्तिविषये भावप्रधानत्वं वाश्रित्याह — **ऊष्मत्वेति**। गुणिपरत्वे तु सहार्थो न लभ्येत। तमग्रहणमन्तरेणापि गौणमुख्यन्यायादीषत्सदृशग्रहणं न भविष्यतीत्यत आह — **ईषदिति**। मुख्यतयेति भावः॥

[१, ३६६–३७०]

(**लघुविवरणम्**) **पदप्रकृतिरिति**। पदानि प्रकृतयो यस्या इति बहुव्रीहिः। भाष्ये 'यदि प्रकृतितः' [1]इत्यस्यार्थः — प्रकृतिं [2]सौत्रस्थानशब्दस्याधिकरणसाधनतयाभिधेयं स्थानिनमपेक्ष्यान्तरतमशब्दार्थस्य [3]विशेषणत्वेन प्रतिपत्तिरिति। [4]"इको गुणवृद्धी' इत्यस्य 'चायकः' इत्युपन्यासोऽयुक्तः, [5]"अचो ञ्णिति' इत्यत्र निर्दिष्टस्थानिकत्वेनेक्परिभाषाया अनुपस्थानादित्यत आह — **अच इति**। कथमिवैकस्मिन् वाक्ये नियमद्वयलाभ इत्यत आह — **योगेति**। तत्र च[6] लिङ्गं निपातनसहकृतस्य 'शक्यार्थे' इत्यस्य विशेषणस्योपादानम्। तुल्यजातीय एकारश्चेदैकारस्य निवृत्तिर्न कृतेत्यत आह — **कण्ठेति**। भाष्ये एकारग्रहणं [7]कण्ठतालव्यस्योपलक्षणम्। 'एवमपि' इति भाष्यमयुक्तम्, नियमेन [8]'कण्ठतालव्यस्य यि प्रत्यये आयाद्यादेशनिवर्तनादित्यत आह — **एकारस्येति**। अत्यन्तसजातीयत्वेन तस्यैव नियमेन व्यावृत्तिर्युक्तेति भावः। क्यजन्तस्य रैशब्दस्य भाषायां प्रयोगाभावे [9]हेतुः — **क्यच्त्विति**। **समानाक्षराणि**[10]"दश समानाः' इति लक्षितानि 'अ आ' इत्येवमादीनि दश। करणे गौरवमित्यत आह — **अन्यथेति**। ननु 'रदाभ्यां निष्ठायाः' इत्युच्यमाने चरितमित्यत्र रेफस्यानन्तरा निष्ठेति नत्वं स्यादित्यत आह — **चरितमिति**॥

[१, ३६६–३७०]

(**विवरणम्**) ननु सूत्रस्यानन्यथासिद्धोदाहरणप्रदर्शनेन प्रयोजनस्योक्तत्वात् पुनः प्रश्नानुपपत्तिरित्यत आह — **यदीति**। [11]"अर्थादुक्तदोषं वार्तिकेन स्पष्टीकर्तुं पुनः प्रश्न इति भावः। **एकैक इति**। अक इति बोधित इति भावः। दीर्घाणां युगपत्सर्वेषामुच्चारणमेककर्तृकमशक्यमित्यत उक्तम् — **पर्यायेणेति**। अस्तु तर्हि विच्छिद्य पाठ इत्यत आह — **पदेति**। पदानां प्रकृतिरिति विग्रहः। अन्ये तु बहुव्रीहिरित्याहुः। 'सा किं प्रकृतितः' इत्यस्य भाष्यस्यार्थः — सान्तरतमनिर्वृत्तिरन्तरतमस्य विशेषणत्वेन प्रतिपत्तिः, सौत्रस्थानशब्दस्याधिकरणव्युत्पत्त्याभिधेयं स्थानिनं प्रति, आहोस्विदादेशं प्रतीति। सप्रतियोगिकत्वात् सादृश्यस्याह — **य आदेशस्येति**। ननु [12]"इको गुणवृद्धी' इत्युक्त्वा 'चायकः' इत्युदाहरणमयुक्तम्, [13]"अचो ञ्णिति' इत्यत्र [14]"निर्दिष्टस्थानिकत्वेनेक्परिभाषा-

---

[1] इत्येतस्यार्थः — ण.
[2] 'सौत्र' इति नास्ति — ड, ढ.
[3] विशेषणेन — ड.
[4] पा. सू. १. १. ३.
[5] पा. सू. ७. २. ११५.
[6] चकारो नास्ति — ड, ढ, त.
[7] कण्ठ्यतालव्यस्योप — ण.
[8] कण्ठ्यतालव्यस्य — ण.
[9] हेतुमाह — क्यच्त्विति — ड.
[10] पूर्वव्याकरणवचनमिदमिति एओङ्सूत्रे उद्द्योते।
[11] अर्थादुक्तं दोषं — च, ञ.
[12] पा. सू. १. १. ३.
[13] पा. सू. ७. २. ११५.
[14] निर्दिष्टस्थानिकत्वादिक् — ट.

नुपस्थानादित्यत आह — **अच इति**। ननु ऋवर्णस्याजिकोरन्तर्भावात् पुनरुपन्यासो मुधेत्यत आह— **ऋकारस्येति**। सोपस्कारत्वात् सूत्राणामाह — [1]**यदेति**। कथमिवैकस्मिन् वाक्ये नियमद्वयलाभ इत्यत आह — **योगेति**। तत्र च लिङ्गं निपातनसहकृतस्य शक्यार्थ इत्यर्थविशेषस्योपादानम्। [2]'यि प्रत्यये' इति विधिवैयर्थ्यप्रसङ्गात् तुल्यजातीयस्य नियम इत्युक्तं भाष्ये। तत्र तुल्यजातीयत्वमेत्वेन चेदैकारस्य स्यादायादेश इत्यत आह — **कण्ठेति**। भाष्ये एकारग्रहणं [3]कण्ठतालव्योपलक्षणं द्रष्टव्यम्। नन्वैकारस्य नियमेन यि प्रत्यय आयादेशस्य निवर्तितत्वात् कथं 'रैयतीत्यत्रापि प्राप्नोति' इति चोद्यमित्यत आह — **एकारस्यैवेति**। एकारस्यात्यन्तसजातीयत्वेन तस्यैव नियमेन निवृत्तिर्युक्तेति भावः। एवं व्याख्याने हेतुमाह — **क्यच्त्विति**। **समानाक्षराणि** 'अ आ' इत्यादीनि दश। ननूपधाग्रहणमधिकं कर्तव्यमिति गौरवे चोदिते कथं 'क्रियते' इत्युत्तरमित्याशङ्क्य पक्षद्वयतुल्यत्वान्न गौरवं दोषत्वेनोद्भावनीयमित्याह — **अन्यथेति**। यथोद्देशपक्ष एतदुक्तम्। कार्यकालपक्षे तु पर्यायः स्यादप्रतिपत्तिर्वेति द्रष्टव्यम्। ननु 'तः' इत्यनुच्यमाने [4]'रदाभ्याम्' इति निष्ठा विशेष्येत, तथा च चरितमित्यत्रापि स्यादित्यत आह — **चरितमित्यादाविति**। [5]**आनन्तर्येण** रेफदकाराभ्यां सहेति शेषः। न च गौरवं दोषः, पक्षान्तरेऽपि तुल्यत्वादित्याह — **अन्यथेति** ॥

[१, ३६६–३७०]

(**उद्द्योतनम्**) ननु सूत्रस्यानन्यथासिद्धप्रयोजनकथनात् प्रश्नानुपपत्तिः, अत आह — **यदीति**। उक्तमेव वार्तिकारूढं कर्तुं पुनः प्रश्न इति भावः। यद्यप्येतद्वार्तिकव्याख्यानानन्तरमेव 'किमुदाहरणम्' [6]'इत्यादिभाष्यं युक्तम्, तथाप्युदाहरणकथनानन्तरं वार्तिकं सुबोधमितीदं पश्चात्कृतमिति ज्ञेयम्। भाष्ये **एकत्वेनेति**। स्थानिनां प्रत्येकमेकत्वात्। दीर्घाणामष्टत्वादुदात्तादि[7]भेदेनाष्टचत्वारिंशत्वाद्वा बहुत्वमित्यभिसंधायाह — **यद्यपीति**। सर्वदीर्घाणां युगपदेकेनोच्चारणमशक्यम्, अत आह — **पर्यायेणेति**। 'यथा, सा' इत्यनयोरनन्वयादाह — **येनेति**। यथाशब्दो लक्षणया संहितापाठपरः। तथा च संहितापाठेनान्तरतमशब्दनिष्पत्तिः [8]'कर्तव्येति भाष्यार्थः। संहितापाठस्य संशयहेतुत्वं व्यतिरेकमुखेनाह — **विच्छिद्येति**। तर्हि विच्छिद्यैव पाठोऽस्तु, अत आह — **पदेति**। संहिताया विशेषणमिदम्। षष्ठीसमासो [9]'बहुव्रीहिर्वा। स्वरूपकथनमेतत्। **नित्यत्वात्** [10]'प्रवाहानादित्वात्, पाणिनिना संहितयैव सूत्राणां पाठादिति यावत्। अत एव [11]"वृद्धिरादैजदेङ् गुणः' इत्याद्युपपन्नमिति भावः। 'सा किम्' इति भाष्याभिप्रेतं संशयस्वरूपमाह — **पदेति**। उक्तसंशयस्य फलभूत[12]संशयपरतया भाष्यं योजयति — **तत्रेति**। भाष्ये **सा** [13]अन्तरतमता। **प्रकृतितः** प्रकृतेः, स्थानिनो विशेषणं भवति, **आदेशतः** आदेशस्य वेति विवक्षितम्। तदुभयोपादानं 'स्थानिन्यन्तरतमे' 'स्थाने प्राप्यमाणानाम्' इति चेति ज्ञेयम्। 'इहैव' इत्येतदुपपादयति — **यणामिति**।

---

[1] 'यदेति' इत्यस्यानन्तरं 'योगेति' इति प्रतीक एवास्ति — च, छ.
[2] पा. सू. ६. १. ७९.
[3] कण्ठताल्वोरुपलक्षणम् — ञ.
[4] पा. सू. ८. २. ४२.
[5] आनन्तर्ये रेफ — च, छ, ञ, ट.
[6] इति भाष्यं — म, आ, ऋ.
[7] भेदेनाष्टाचत्वारिंशत्वाद्वा — ऋ.
[8] कर्तव्येति यथेति भाष्यार्थः — इ.
[9] बहुव्रीहिपक्षो दूषित उद्द्योते।
[10] प्रवाहानादिनित्यत्वात् — अ.
[11] महाभाष्यम् १, १, १.
[12] संशयपर्यवसन्नतया — म, आ, ऋ.
[13] अन्तरतमा — ऋ.

पूर्वं दूषितस्येदानीमुदाहरणत्वेनोपादानमयुक्तम्, अत आह — **आदेशेति**। **भवतीति**। [1]'यथासंख्यम्' इत्यादेशनियमार्थस्य स्थानिनियमस्थलेऽप्रवृत्तेरिति भावः। भाष्ये [2]**नेतेति**। दीर्घस्य गुणस्य दीर्घ इगन्तरतमः स्थानी, न ह्रस्व इत्यर्थः। ननु [3]'इको गुणवृद्धी' इत्युक्त्वा [4]'चायकः' इत्युदाहरणमयुक्तम्, [5]'अचो ञ्णिति' इत्यत्र निर्दिष्टस्थानिकत्वेनेक्परिभाषानुपस्थानात्, अत आह — **अच इति**। ननु ऋवर्णस्याजिकोरन्तर्भावात् पुनरुपन्यासो व्यर्थः, अत आह — **ऋकारस्येति**। भाष्ये **आस्तारको** [6]**निपारक इति**। 'स्तृञ् आच्छादने, [7]पॄ पालनपूरणयोः' इति ऋकारान्तौ क्र्यादिषु प्वादी। **यदेति**। यद्यपि सूत्रे एतावन्नास्ति, तथापि सूचनात् सूत्रमिति सूत्रेष्वपेक्षितपूरणं युक्तमिति भावः। सूत्रान्तरेषु तथा, अत्र तु[8] भाष्यवार्तिककारैरेव यदुच्यते सूत्रानारूढं तदेव ग्राह्यमित्याहुः। **योगविभागेनेति**। तत्र लिङ्गं [9]'शक्यार्थे' इत्यर्थविशेषोपादानमेव। **सामान्येनेति**। [10]एज्मात्रस्येत्यर्थः। सामान्येन नियमे 'यि प्रत्यये' इति विधिवैयर्थ्यप्रसङ्गात् 'तुल्यजातीयस्य नियमः' इत्युक्तं भाष्ये। तत्र तुल्यजातीयत्वमेकारत्वेन चेदैकारस्यायादेशप्रसङ्गः, अत आह — [11]**कण्ठेति**। भाष्ये 'एकारः' इति कण्ठतालव्योपलक्षणमित्याशयः। ननु कण्ठतालव्यनियमेन ऐकारस्यापि निवृत्तत्वात् 'एवमपि' इत्याद्ययुक्तम्, अत आह — **एकारस्यैवेति**। अत्यन्तसजातीयत्वेन तस्यैव नियमेन निवृत्तिर्युक्तेति भावः। अत्र क्यजेव छान्दसः, रैशब्दस्तु लोकेऽपि प्रत्ययान्तरे साधुरित्याह — **क्यजन्तस्येति**। भाषायां क्यजभावे हेतुमाह — **क्यच् त्विति**। **गविति**। एभ्य एव क्यच्, नान्यस्मादित्यर्थः। अको ह्रस्वा दीर्घाश्च **समानाक्षराणि** दश। तत्र लृवर्णान्तस्य ऋकारान्तस्य च प्रातिपदिकस्याभावात् सप्तावशिष्यन्ते। नन्वेवं [12]'वाच्यति' इत्याद्यसिद्धिप्रसङ्गादिदं मतान्तरप्रदर्शनमात्रं न भाष्यकृतोऽभिप्रेतमिति वक्ष्यते, तथा च ऐकारान्तादपि क्यचि न बाधकम्, अतः प्रकृतेरेव छान्दसत्वमाह — **अन्य इति**। ननु 'गोहः' इति षष्ठ्या अन्त्येऽल्युपसंहारनिरासाय 'उपधायाः' इति वक्तव्यमेव, अत आह — **एतत्परिभाषेति**। [13]'पुमः खय्यम्परे' इत्यादौ सावकाशस्य [14]'अलोऽन्त्यस्य' [15]इत्यस्येदं बाधकमिति भावः। ननु गौरवे चोदिते 'क्रियते' इत्ययुक्तम्, अत आह — **अन्यथेति**। [16]'वान्तो यि प्रत्यये' [17]इत्यादावस्या अपि सावकाशत्वात् परया बाधप्रसङ्गात् 'उपधायाः' इत्युभाभ्यां वक्तव्यमित्यर्थः। यथोद्देशपक्ष एतदुक्तम्। कार्यकालपक्षे पर्यायोऽप्रतिपत्तिर्वा स्यादिति ज्ञेयम्। ननु 'तः' इत्यनुच्यमाने 'रदाभ्याम्' इति निष्ठा विशेष्येत। तथा च चरितमित्यादावपि नत्वप्रसङ्गः, अत आह — **चरितमिति**। व्यवधानमेवाह — **निष्ठाया इति**। [18]**आनन्तर्येण** रदाभ्यामित्यादिः। न च गौरवम्, तवापि तुल्यत्वादित्याह —

---

[1] पा. सू. १. ३. १०.
[2] तेनेति — ऋ.
[3] पा. सू. १. १. ३.
[4] नायकः — म.
[5] पा. सू. ७. २. ११५.
[6] निवारक इति — आ, इ, म.
[7] वॄञ् वरण इति — म; वॄञ् वृत्यामिति — इ.
[8] तुशब्दो नास्ति — अ.
[9] शक्यार्थविशेषणोपादानमेव — म.
[10] एङमात्रस्येत्यर्थः — अ, म.
[11] कण्ठस्य तालुनश्च प्रत्येकं स्थानत्वाश्रयेण प्रत्येकं यत्प्रत्ययान्तत्वम्, 'ए ऐ तु कण्ठ्यतालव्यौ' इतीति शेखर उक्तम्। विवरणकृदन्नंभट्टयोः 'कण्ठतालव्यौ' इत्यभिमतमिति भाति।
[12] नाव्यतीत्याद्यसिद्धि — म, आ; नाव्यतिवाच्यतीत्याद्यसिद्धि — ऋ.
[13] पा. सू. ८. ३. ६.
[14] पा. सू. १. १. ५२.
[15] 'इत्यस्य' इति नास्ति — अ, म.
[16] पा. सू. ६. १. ७९.
[17] इत्यादौ तस्या अपि — ऋ.
[18] आनन्तर्ये रदाभ्याम् — अ, ऋ.

अन्यथेति। यद्यपि दकारस्य न धातुदकारेणानन्तर्यम्, तथापि निष्ठाया इति षष्ठ्याः सुसदृशे दकारे उपसंहारान्निष्ठाद्वारकमेवानन्तर्यमत्र ग्राह्यमिति भावः॥

[१, ३६६–३७०]

(**रत्नप्रकाशः**) **किमर्थमिति**। [यत्तु 'यदीदं नोच्येत तदा किं स्यादिति प्रश्नः' इति। तन्न,] प्रयोजनप्रश्नोऽयमिति मूर्खेणापि ज्ञातुं शक्यत्वेन तदनुगुणतयैव "एतदर्थमिदमुच्यते' इत्युत्तरपरग्रन्थोपसंहारेण च तदपहाय दोषविषयकतया प्रश्नोपपादनस्यायोगात्। **एकत्वनिर्देशादिति**। एकत्वेन निर्देशात्। उपलक्षणमेतत् [२]'एकः पूर्वपरयोः' इति द्वित्वनिर्दिष्टस्य। [**अनेकादेशनिर्देशादिति**।] गुणवृद्धिदीर्घपूर्वसवर्णादिशब्दैरेकवचनान्तैरप्यनेके आदेशा निर्दिश्यन्त इति भावः। **सर्वप्रसङ्ग इति**। पर्यायेणेति शेषः। **अक इतीति**। इदं दिक्प्रदर्शनमात्रतयोक्तम्। [३]'एकः पूर्वपरयोः' इत्यधिकारेण हि तत्र स्थानिनो द्वित्वनिर्देशोऽस्ति। **अस्ति प्रयोजनमेतदिति**। दूषणदित्सया प्रयोजनाङ्गीकरणमेतत्। **किं तर्हीति**। किं दूषणं [४]तेऽभिधित्सितमिति भावः। पक्षद्वयेऽपि दूषणं दातुं सूत्रार्थं विकल्पयति — **यथा पुनरियमिति**। 'यथा' इत्यव्ययेन 'या' इत्यर्थो निर्दिष्टः। पुनश्शब्दो वाक्यालङ्कारार्थोऽनर्थकः। तथा च 'येयं पुनः' इत्यर्थः संपन्नः। अत एव 'सा' इति तच्छब्देन परामर्शोऽप्युपपन्नः। एतेन 'येन प्रकारेण संहितापाठलक्षणेनेत्यर्थः' इति निरस्तम्। तथात्वे यथासाशब्दयोरुभयोरप्यनन्वितार्थकत्वापत्तेः। **प्रकृतित इति**। स्थानिन इत्यर्थः। **अन्तरतमे षष्ठीति**। पूर्वसूत्रात् षष्ठीत्यनुवर्तत इति भावः। **उभयथापीति**। अपिर्ह्यर्थे। यतः संहिता तुल्या, अतो भवति संदेह इति भावः। **किं चात इति**। कस्मिन् पक्षे किं दूषणं स्यादिति भावः। **इहैवेति**। यणामर्धमात्राणामेकमात्रा एवैकोऽन्तरतमा इति भावः। **सर्वत्र षष्ठीति**। इक्त्वाविशेषात्। [५]'इको यणचि' इति सूत्रमपि प्रकृतितो नियमपक्षेऽस्योदाहरणं भवतीति भावः। **इको गुणवृद्धी इति**। इकः सर्वस्य गुणवृद्धी यत्रेष्टे तत्रेति भावः। एतेन [६]'इको गुणवृद्धी' इति सूत्रमेव निर्दिष्टमिति मन्यमानस्य "**नायक इति**। [७]'अचो ञ्णिति' इत्यत्राप्ययमेव दोष इत्युपन्यासः" इत्युक्तिः प्रयुक्ता। [८]"इको गुणवृद्धी' इत्यस्य पदोपस्थितिपरतया व्यवस्थापितत्वेन नायकादिवृद्ध्युदाहरणासामञ्जस्येन च प्रकृत[९]भाष्यस्य [१०]'इको गुणवृद्धी' इति सूत्रपरत्वायोगात्। इकारोकारापेक्षया ऋकारस्य गुणवृद्धिप्रसङ्गे दोषवैलक्षण्यमस्तीति प्रतिपादयितुमाह — [११]**तथा ऋवर्णस्येति**। **एकारैकारयोर्मा भूदिति**। एच इत्यनुवृत्त्या प्रसक्तिरिति भावः। **एक्ष्वति**। एतद्भाष्यस्वरसेन सप्तमीबहुवचने प्रत्याहारेषु [१२]'चोः कुः' इति भवत्येवेति गम्यते। तथाच 'अच्शु, इच्शु, एच्शु, ऐच्शु' इति न भवति। 'एक्षु' इतिवत् 'अक्षु, इक्षु, ऐक्षु' इत्यस्यैव युक्तत्वात्। **यान्तरतमा प्रकृतिरिति**। 'अको विवृताः, एङौ विवृततरौ, ऐचौ विवृततमौ, विवृततमतर आकारः' इति प्रातिशाख्यान्तरावलम्बनेन ओकारोऽन्तरतमो [१३]विवृताकारस्य अवः, औकारोऽन्तरतमो [१४]विवृत-

---

[१] एवमर्थमित्यस्यार्थानुवादोऽयम्।
[२] पा. सू. ६. १. ८४.
[३] पा. सू. ६. १. ८४.
[४] तेऽभिदित्सितमिति — ब.
[५] पा. सू. ६. १. ७७.
[६] पा. सू. १. १. ३.
[७] पा. सू. ७. २. ११५.
[८] पा. सू. १. १. ३.
[९] 'भाष्यस्य' इत्यस्यानन्तरं चकारोऽधिकः — ब.
[१०] पा. सू. १. १. ३.
[११] यथा — ब.
[१२] पा. सू. ८. २. ३०.
[१३] विवृताकारकस्य अवादेशस्येत्यर्थः।
[१४] विवृततमताकारविशिष्टस्य आवादेशस्येत्यथः।

तमतरस्य आव इति भावः। **वान्तग्रहणं न करिष्यत इति**। [1]'तुष्यतु दुर्जनः' इति न्यायेन परिहारान्तरकथनपरमेतत्। वस्तुतस्तु वान्तग्रहणे कृतेऽपि न दोषः, अज्निमित्ततया सिद्धस्य वान्तादेशस्य यादिप्रत्ययनिमित्ततामात्रस्याधिकस्य तेन बोधनात्। एजनुवृत्तावपि 'क्लृप्तकल्प्ययोः क्लृप्तं बलवत्' इति न्यायेन पूर्वत्र वान्तादेशौ प्रति स्थानित्वेन क्लृप्तयोरेव ओदौतोरत्रापि स्थानित्वसंभवात्। **उभयतो नियम इति**। विनिगमनाविरहादिति भावः। एतेन 'योगविभागेनेति भावः' इति निरस्तम्। [2]'विप्रतिषिद्धं चानधिकरणवाचि' [3]'ब्रह्मभ्रूणवृत्रेषु क्विप्' इत्यादाविव योगविभागमन्तरेणैवोभयतो नियमस्य संभवात्। **इहापीति**। 'क्षिज्योरेवैचः' इति नियमप्रदर्शनाद्दोष इति भावः। **एकार इति**। तेन 'सांनाय्यनिकाय्यपरिचाय्योपचाय्य' इत्यत्र ण्यत्यायादेशः सिध्यतीति भावः। एतेन '**तुल्यजातीयस्येति**। कण्ठ्यतालव्यस्येत्यर्थः' इति निरस्तम्। व्याख्येयभाष्येण 'एवमपि रायमिच्छति' इत्यादिशङ्काभाष्येण च विरोधात्। ननु [4]'सांनाय्यनिकाय्य' [5]'परिचाय्योपचाय्य' इति निपातनादेवायादेशः सिध्यतीति 'रैयति' इत्यत्रायादेशशङ्कानुदयसाधारणः स इति चेन्न, भाष्यविरोधेनैतादृशक्लिष्टकल्पनाया अनौचित्यात्, फलाभावाच्च। **रायिश्छान्दस इति**। उच्चारणार्थेनेकारेण रैशब्दस्यायं 'रायि' इति निर्देशः। [6]'गोसमानाक्षरनान्तात्' इति परिगणनादेजन्तात् क्यज् लोके नास्तीति छान्दसत्त्वं क्यचोऽङ्गीकर्तव्यम्। तथाच तत्प्रकृतिभूतो रैशब्दोऽपि छान्दस एवेत्युक्तं भवति। एतेन रैशब्दस्य सर्वथा भाषायां प्रयोगो नास्तीति वदन्तः प्रत्युक्ताः, उक्तभाष्यस्य प्रकरणानुरोधेन प्रयोगविशेषपरतयैवोपपत्तेः। **क्रियते न्यास एवेति**। यत्रैकमादेशं प्रति प्रत्येकमनेकेषां स्थानित्वं प्रसक्तं तत्रैव प्रकृतितोऽन्तरतमस्य स्थानित्वं व्यवस्थापयितुं शक्यते। [7]'ऊदुपधाया गोहः' इत्यत्र तु गोह इत्येकस्यैव स्थानित्वमिति प्रकृतपरिभाषया निर्वाहाभावादुपधाग्रहणं तत्रावश्यं कर्तव्यमिति भावः। एतेन "अन्यथा परत्वात् [8]'अलोऽन्त्यस्य' इत्यनेन गोह इति षष्ठ्यन्त्येऽल्यनुसंह्रियेतेति भावः" इति निरस्तम्। अप्रसक्तिमज्ञात्वा परेण बाधोक्तेरचातुर्यात्। **निष्ठात इति**। षष्ठीतत्पुरुषः। तथा च सिद्धान्ते रदाभ्यां परत्वं तकारस्यैवापेक्षितमिति चरितमित्यादौ व्यवहितस्य तस्य नो न। तग्रहणाभावे तु तत्र प्रागुक्तरीत्या अप्रसक्ताया अपि प्रकृतपरिभाषायाः कथंचित् प्रवृत्त्यभ्युपगमे तत्रापि तस्य नः स्यादिति दोष इत्याशयेन वक्ष्यति — क्रियते न्यास एवेति। एतेन 'चरितमित्यादौ व्यवधानान्न भवति, निष्ठाया इति षष्ठ्यास्तकार एवोपसंहारात् तस्यैवानन्तर्येण नत्वविधानात्' इति निरस्तम्। प्रकृतपरिभाषायास्तत्राप्रसक्तेरज्ञानात्। रदाभ्यामित्यनेन निष्ठाया एव विशेषितत्वेन पश्चात् षष्ठ्यास्तकारेऽनुसंहारेऽपि तकारस्य रदाभ्यां विशेषितत्वाभावेन व्यवहितस्य नत्वप्रसङ्गस्य दुरुद्धरत्वाच्च। एवमेव हि तदपवादपक्षे 'अन्त्यस्यानन्त्यस्य चेको गुणवृद्धी भवतः' इत्युक्तं भगवता। यदप्युक्तम् "**क्रियते न्यास एवेति**। अन्यथा भिन्नवद्भ्यामित्यत्र दकारस्य नत्वं स्यात्। स हि नकारस्य सुसदृशः, [9]'यथा तृतीयास्तथा पञ्चमाः' इति वचनात्" इति। तदपि न, प्रकृतपरिभाषापेक्षया जश्त्वस्यासिद्धत्वेन 'दकारस्यैव स्यात् सुसदृशत्वात्' इति दोषस्याप्रसक्तेः। 'व्यवहितस्यापि स्यात्' इति दोषस्तु मयापादितोऽस्त्येवेत्यन्यदेतत्।

---

[1] लो. न्या. द्वितीयभागे पृष्ठम् ३५.
[2] पा. सू. २. ४. १३.
[3] पा. सू. ३. २. ८७.
[4] पा. सू ३. १. १२९.
[5] पा. सू. ३. १. १३१.
[6] का. वा. ३. १. ८—२.
[7] पा. सू. ६. ४. ८९.
[8] पा. सू. १. १. ५२.
[9] महाभाष्यम् १. १. ९.

[१, ३६६–३७०]

(**नारायणीयम्**) 'किमुदाहरणम्' इति प्रश्नपूर्वकं प्रयोजनस्योक्तत्वात् तत्प्रश्नोऽनुपपन्न इत्याशङ्क्य प्रश्नविषयं दर्शयति — **यदीदमिति**। चोदयति — **यद्यपीति**। **निर्दिश्यमानत्वम्** आदेशयोगितया प्रतिपाद्यमानत्वम्। तच्चैकैकस्येति परिहरति — **तथापीति**। एकैकस्य बहवः पर्यायेण स्युरिति दोषः स्यादस्यानारम्भणे, तेनेदमारभ्यमित्यर्थः। 'यथा' इति विशेषणार्थः कः, [1]किं च तदुपादानप्रयोजनम्, अत आह — **येनेति**। तर्हि यस्मिन् पाठे न संदेहः स एवास्तु, तत्राह — **पदेति**। संहितापाठे वा कथं संदेहः, तत्राह — **तत इति**। सप्तम्यन्तपक्षे विधेयानिर्देशप्रसङ्गात् प्रथमान्तत्वनिश्चय इत्यत्राह — **तत्रेति**। **स्थानीति**। स्थानपदमजन्ततयाधिकरणल्युडन्ततया वा स्थानिपरमिति भावः। सर्वेषामनन्तरतमत्वाविशेषात् 'इहैव' इति कथम्. अत आह — **यणामिति**। **भवतीति**। यथासंख्य[2]परिभाषया [3]सर्वस्य साधनात्। निर्दिष्टस्थानिकत्वादिक्[4]परिभाषानुपस्थानमिति कथमिक इति षष्ठ्यामिष्टस्थान्यबोधकत्वापादनमित्याशङ्क्येग्ग्रहणमजुपलक्षणम्, अच इति षष्ठ्यामेतदापादनमित्याह — **अच इति**। यद्वा, [5]'इको गुणवृद्धी' इत्यस्यापि परिभाषात्वात् [6]'गुणानां च परार्थत्वात्' इति न्यायात् कथं स्यात् तत्र व्यापारः, अत आह — **अच इति**। विध्येकवाक्यतापन्न इग्ग्रहणेऽस्याः प्रवृत्तिरिति भावः। इऊमध्ये विद्यमानस्य पृथगुपन्यासः किमर्थः, अत आह — **ऋवर्णस्येति**। स्थानिविशेषलाभार्थमेज्ग्रहणानुवृत्तिरिति पक्षेऽयं दोष इत्याह — **एच इति**। कदा तर्हि न दोषः, अत आह — **[यदा] त्विति।**] **सामान्येनेति**। [एज्मात्रस्येत्यर्थः।] एकारत्वेन तुल्यत्वं न विवक्षितम्, ऐकारस्याव्यावृत्तिप्रसङ्गादित्याह — **कण्ठेति**। कण्ठतालव्योपलक्षणं भाष्ये एकारग्रहणम्। एकारत्वेन तुल्यजातीयत्वमनेनोक्तमिति परश्चोदयतीत्याह — **एकारस्येति**। परिहारान्तरसत्त्वात् स्वाभिप्रायमप्रकाश्य तदुक्तम्। 'रायिश्छान्दसः' इति प्रायिकः पाठः। सोऽयुक्तः, क्यजन्तानुकरणे रैयिरिति भवितव्यम्। प्रकृत्यनुकरणेऽ[7]धातुरित्यतिदेशाद् इक्प्रत्ययो न स्यात्। तत्र क्यजन्तानुकरणात् तस्य च छान्दसत्वं केचिदाहुरित्याह — **क्यजन्तस्येति**। न केवलं [8]भाषायामप्रयोगस्तस्य छान्दसत्त्वे हेतुः, किं तु लक्षणाभावोऽपीत्याह — **क्यच् त्विति**। छन्दसि सर्वविधिविकल्पनादसमानाक्षरादपि क्यजस्तीति भावः। क्यजन्तानुवादः प्रस्तुताभिप्रायेण, प्रकृतेरेव [9]भाषायामप्रयोग इत्याहुरित्याह — **अन्ये त्विति**। एवकारो भिन्नक्रमः, रैशब्दस्येत्यनन्तरं द्रष्टव्यः। असत्युपधाग्रहणेऽलोऽन्त्यप्रसङ्गमाशङ्क्याह — **एतदिति**। [10]'राज्ञः क च' इत्यादावस्याप्रसङ्गेऽलोऽन्त्यविधेश्चरितार्थत्वादनेकस्थानिप्रसङ्गे स्थानिनियमोऽनेन स्यादित्यर्थः। **परत्वादिति**। अन्तरतमपरिभाषायास्तु [11]'अकः सवर्णे' इत्यादिरवकाशः। अत्र ह्यलोऽन्त्यविधेरप्रसङ्गः, विशेष्यासंनिधेस्तदन्तविध्यभावात् पूर्वपरयोर्वर्णयोः स्थानित्वात्। [12]'राज्ञः क च' इत्यादिरप्यलोऽन्त्य[13]विधेर्नावकाशः, तत्रान्तरतमस्थानिसत्त्वात्। अथवा परत्वेन बाध-

---

[1] किंचित् तदुपादान — क.
[2] परिभाषायाः — क.
[3] दीर्घस्यापि स्थाने यणः साधनादित्यर्थः।
[4] परिभाषानवस्थापनम् — क.
[5] पा. सू. १. १. ३.
[6] मीमांसासूत्रम् ३. १. २२.
[7] अतिदेशादधातुरितीत्यन्वयो भाति।
[8] भाषायामप्रसङ्गः — क.
[9] भाषायां प्रयोगः — क.
[10] पा. सू. ४. २. १४०.
[11] पा. सू. ६. १. १०१.
[12] पा. सू. ४. २. १४०.
[13] विधेः सावकाशः — क.

कत्वं लक्ष्यम्। तकारग्रहणाभावे श्रुतत्वान्निष्ठाया[1] रदाभ्यामानन्तर्यं विशेषितं स्यादिति चरितमित्यादावतिप्रसङ्ग इत्याशङ्क्यावगतानुसंहारस्य षष्ठ्यन्तस्य रदौ विशेषणम्, न तु [2]रदविशेषितायाः षष्ठ्या अनुसंहार इति समाधत्ते — **चरितमिति**। निष्ठाभक्तस्यापीटस्तकारव्यवधायकत्वमस्ति। नन्विह तकारग्रहणं नास्ति। मास्तु, निष्ठाग्रहणमेव तकारार्थमित्युक्तम्। कथं पुनर्व्यवधाने दकारस्य प्राप्तिः, तत्राह — **स हीति**। सुसदृशे षष्ठ्युपसंहारात्तस्य चाव्यवहितस्यासंभवाद्व्यवहितेऽपि प्राप्तिरित्यर्थः॥

[१, ३७०–३७३]

(**लघुविवरणम्**) भाष्ये पक्षद्वयोपन्यास उपलक्षणमित्यभिप्रेत्याह — **अथ लक्षणान्तरेति**। स्थानिनिवृत्तिर्न दोषायेत्यत आह — **दधीति**। स्थानिनिवृत्तौ हेतुः — **वचनेति**। अभिन्नरूपप्रवृत्तौ हेतुः — **शब्देति**। ननु 'बिसम्' इत्यत्रापि न दोषः, [3]षत्वविधावादेशो यः सकार इत्युच्यते, आदेशस्य चायं सकार इत्यत आह — **यदेति**। **न चानेनेति**। प्रमाणेन येषां साधुत्वं प्रतिपन्नं न तत् तेषामन्यथयितुं शक्यते, [4]प्रामाणिकत्वादेवेति भावः। ननु 'संबन्धिशब्दत्वात्' इति वक्तव्ये 'स्वभावसिद्धत्वात्' इति किमित्युक्तमित्यत आह — **तुल्येति**। अर्थादि[5]कृत आन्तर्ये सति तदेव प्रयोजकमिति प्रदर्शनाय [6]प्रथमं निदर्शनमित्यभिप्रेत्याह — **गणेति**। दृष्टान्ते विवक्षितमंशमाह — **संकीर्णानामिति**। यत्र स्थानप्रमाणाद्यनेकत आन्तर्यं तत्र स्थानकृतमेवान्तर्यं बलीय इति प्रदर्शनाय भाष्ये 'तथा यानि' इति निदर्शनान्तरम्। तत्र **युक्तक**शब्दः संघातवाची। संघुष्ट-[क]शब्दो मिलितत्वमाह॥

[१, ३७०–३७३]

(**विवरणम्**) भाष्ये पक्षद्वयोपन्यास उपलक्षणमित्याह — **अथेति**। यद्यपि द्वितीयतृतीययोर्यत्र षष्ठी तत्रोपस्थानं तुल्यम्, तथापि वाक्यभेदाभेदाभ्यां पक्षद्वयोद्भव इत्यपि द्रष्टव्यम्। 'स्थानिनिवृत्तिः' [7]इत्यनेन विवक्षितं दर्शयति — **दधीति**। **भिन्नरूपस्त्विति**। पर्यायस्तु यद्यपि भिन्नरूपः, तदर्थप्रत्यायकश्च, तथापि तस्मिन्नादेशे स्थान्ययम्, अयमादेश इति विनिगमनाभावात् क्रमेणोभयोः स्थानित्वमादेशत्वं चेति वाच्यम्, तथा च सूत्रमनारम्भसमं स्यादिति भावः। शास्त्रप्रवृत्तौ हेतुः — **वचनेति**। सदृशादेशे हेतुः — **शब्देति**। [8]'यदि चैवम्' इत्यनेन स्थान्यपेक्षयादेशे वैरूप्यं यत्र प्रसक्तं [9]तत्र स एव दोष इत्युक्तम्, स पाक्षिक इत्याह — **यदेति**। ननु निर्वर्तकत्वेऽस्यार्धधातुकेऽप्यस्त्यादीनामस्त्यादेशाः स्युरिति कस्मान्नोक्तमित्यत आह — **अस्तेरिति**। नन्वन्तरतम इत्युक्तत्वात् सदृश [10]एव भविष्यतीति कथमिष्टा व्यवस्था न सिध्यतीत्यत आह — **पुनरिति**। दधि मध्वित्यादौ स्वादिशास्त्रस्य सकृत्प्रवृत्तिवदस्यापि सकृदेव प्रवृत्तिरित्यत आह —

---

[1] निष्ठायां — क.
[2] रदाविशेषितायाः — क.
[3] षत्वविधान आदेशः — ण.
[4] प्रामाणिकत्वादिति भावः — ङ, ढ.
[5] कृतान्तर्ये — ढ, त.
[6] पृथङ् निदर्शनं — ङ.
[7] 'इत्यनेन' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — च, छ.
[8] यदि चैवेत्यनेन — ञ, ट.
[9] तत्रैव दोष इत्युक्तम् — ञ.
[10] एवकारो नास्ति — ञ.

प्रयोजनमिति। तत्र हि प्रथमप्रवृत्त्यैव पदत्वं सिद्धमिति निष्प्रयोजनत्वान्न द्वितीयादिप्रवृत्तिरिति युज्यते। नैवमिह प्रथमप्रवृत्तिरपि सप्रयोजनेति भावः। भाष्ये कस्य व्यवस्थेत्यपेक्षायां पूरयति — **साधुत्वेति**। अन्येन निर्वृत्तानां मध्येऽनेनान्तरतमस्यैव साधुत्वप्रतिपत्तिरिति [1]भाष्ययोजनां सूचयन्नाह — **निर्वृत्तेष्विति**। **अभिमतस्येति**। [2]'अकः सवर्णे दीर्घः' इत्यादिनेति शेषः। ननु माभूत् [3]'अकः सवर्णे दीर्घः' इत्यादिनेष्टा व्यवस्था 'स्थानेऽन्तरतमः' इत्यनेन भविष्यतीत्यत आह — **अक इति**। प्रमाणेन येषां साधुत्वं प्रतिपादितं न तत् तेषामन्यथा दर्शयितुं शक्यते, प्रामाणिकत्वादेवेति भावः। ननु द्वितीयपक्षेऽपि यत्र षष्ठी [4]तत्रैवैतत्, [5]कोऽस्य भेद इत्यत आह — **तेनेति**। **आत्मानमिति**। [6]'अनश्च' इति टच्। नन्वन्तरतमशब्दस्य सदृशतमवाचित्वेन 'संबन्धिशब्दत्वात्' इति वक्तुमुचितमित्यत आह — **तुल्येति**। **कस्यांचित्** धर्मनिर्णयादिक्रियायामित्यर्थः। अर्थादिकृत आन्तर्ये सति तदेव प्रयोजकमिति प्रदर्शनाय प्रथमनिदर्शनमित्याह — **गुणेति**। दृष्टान्ते [7]विवक्षितमंशमाह — **संकीर्णानामिति**। भाष्ये **प्रसवः** वत्सः। यत्र स्थानप्रमाणाद्यनेकत आन्तर्यं तत्र स्थानत एवान्तर्यं बलीय इत्यत्र निदर्शनं वक्तुं 'तथा यानि' इत्युक्तम्। तेन द्वितीयस्थानग्रहणलभ्यमपि प्रयोजनमन्यथासिद्धमिति भावः। तत्र **युक्तक**शब्दः संघातवाची। **संघुष्ट**[क]शब्दो मिलितत्वमाह। **अन्तरिक्ष इति**। अत एव निदाघसमयेऽपि निशि गृहाङ्गणे शयानानां [8]शैत्योपलम्भः। **सूर्यविकार इति**। अत एव [9]दावाग्नेर्मध्याह्नादौ सूर्यकिरण[10]संपर्कात् क्रौर्यातिशयो दृश्यते ॥

[१, ३७०–३७३]

(**उद्द्योतनम्**) पक्षद्वयव्याख्यानपूर्वकं [11]तदुपलक्षितं तृतीयं पक्षमाह — **स्वतन्त्रमिति**। यद्यपि लक्षणान्तरसापेक्षत्वं द्वितीयतृतीययोस्तुल्यम्, तथापि वाक्यभेदाभेदाभ्यां द्वैविध्यं ज्ञेयम्। स्थानिनिवृत्तिमुपपादयति — **यदीति**। **भिन्नरूपस्त्विति**। यद्यपि पर्यायो भिन्नरूपस्तदर्थश्च, तथापि तयोः स्थान्यादेशभावे विनिगमकाभावेन क्रमेण द्वयोः स्थानित्वमादेशत्वं च वाच्यम्, तथा च सूत्रमनारब्धसमं स्यादिति भावः। शास्त्रप्रवृत्तौ हेतुः — **वचनेति**। सदृशादेशे हेतुः — **शब्देति**। प्रत्येकं वर्णानां वर्णा आदेशा इति पक्षे षत्वप्रसङ्गः, न तु समुदायस्य समुदाय आदेश इति पक्ष इत्याह — **यदेति**। **अस्य** 'स्थानेऽन्तरतमः' इति विधेः। [12]**पुनःपुनरिति**। प्रयोगार्हशब्दस्य प्रयोजनं विनाप्यादेशाङ्गीकारेऽप्रामाणिकक्षणिकादेशपरम्पराप्रसङ्ग इति भावः। पौनः पुन्ये हेतुः —[13]**प्रयोजनमिति**। [14]'इष्टा व्यवस्था' इति भाष्यार्थमाह — **ततश्चेति**। आदेश एव साधुर्न स्थानी। क्षणिकादेशपरम्परापक्षे सर्वस्यापि स्थानित्वान्न साधुत्वव्यवस्था स्यादित्यर्थः। अन्येन निर्वृत्तानां मध्येऽनेनान्तरतमस्यैव साधुत्वप्रतिपत्तिः क्रियत इति भाष्यार्थं सूचयन्नाह — **निर्वृत्तेष्विति**। **अभि-**

---

[1] भाष्ये योजनां — छ.
[2] पा. सू. ६. १. १०१.
[3] पा. सू. ६. १. १०१.
[4] तत्रेत्येतत् — च, ज, ट.
[5] कोऽस्य ते भेदः — छ, ट.
[6] पा. सू. ५. ४. १०८.
[7] विवक्षितमाशयमाह — ज.
[8] अतिशैत्योपलम्भः — च, छ.
[9] दवाग्नेः — च, छ.
[10] संपर्के तत्क्रौर्यातिशयः — च, छ; संपर्कात् तत्क्रौर्यातिशयः — ज.
[11] तदुपलक्षिततृतीयं — अ, इ.
[12] प्रदीपे 'पुनरन्येन' इत्यत्र 'पुनः पुनरन्येन' इत्यन्नम्भट्टपाठ इति भाति।
[13] प्रयोजनेति — अ, म, आ, इ, ऋ.
[14] इष्टव्यवस्था — अ, आ, ऋ.

मतस्येति। 'दण्डाग्रम्' इत्यादिरूपस्येत्यर्थः। ननु [1]'अकः सवर्णे दीर्घः' [2]इत्यनेनेष्टासिद्धावपि 'स्थानेऽन्तरतमः' इत्यनेन सेत्स्यति, अत आह — **अक इति**। लक्षणान्तरेण सर्वेषां दीर्घाणां साधुत्वप्रमितावनेन निवर्तनमशक्यम्, तस्याप्रामाण्यापत्तेरित्यर्थः। तृतीयकल्पः सिद्धान्त इत्याशयेनाह — **तेनेति**। नन्वात्मानं प्रतीत्यर्थे प्रत्यात्मं कथम्, अत आह — **आत्मानमिति**। [3]वीप्सार्थेऽव्ययीभावः। [4]"अनश्च' इति टच्। सर्वस्यापि कस्यचिदन्तरतमत्वादाह — **स्थानीति**। नन्वन्तरतमशब्दस्य सादृश्यातिशयवाचित्वेन 'संबन्धिशब्दत्वात्' इति [5]किं नोक्तम्, अत आह — **तुल्येति**। **कस्यांचित्** धर्मनिर्णयादिक्रियायाम्। निमित्तसप्तमी। अर्थादिकृतसादृश्ये सति तदेव [6]प्रयोजकमिति वक्तुमाद्यमुदाहरणमित्याह — **गुणेति**। दार्ष्टान्तिकेऽपीष्टसिद्धिमाह — **एवमिति**। दृष्टान्तान्तरस्य प्रयोजनमाह — **तिरश्चामिति**। तत्र [7]विवक्षितमर्थमाह — **संकीर्णानामिति**। भाष्ये **प्रसवः** वत्सः। "यत्रानेकमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयः' इत्यत्र दृष्टान्तमाह — भाष्ये **तथा यानीति**। तद्व्याचष्टे — **यथेति**। भाष्ये **युक्तक**शब्दः संघातस्य वक्ता। **संघुष्टक**शब्दो मिलितत्वस्य। यद्यपि चेतनेषूक्त[8]न्यायेनापि व्यवथा सिध्यति, तथाप्यत्यन्तसदृशदृष्टान्तार्थम् 'अचेतनेष्वपि' इति भाष्यमित्याशयेनाह — **न्यायस्येति**। आन्तरतम्यं संबन्धनियामकमिति न्यायस्येत्यर्थः। **अन्तरिक्ष इति**। अत एव ग्रीष्मकाले निश्यङ्गणे शयानानां शैत्योपलम्भः। यद्यप्यार्द्रेन्धनादेव धूमोत्पत्तेरब्विकारत्वम्, तथापि समुद्रगमनहेतुतयान्तरिक्षाब्विकारत्वं भाष्योक्तं परम्परयेति वक्तुं सर्वासां तद्विकारत्वोक्तिरिति ज्ञेयम्। ज्योतिर्विकार इत्यत्र ज्योतिश्शब्दार्थमाह — **सूर्येति**। अत्रागमोऽन्वेषणीयः। [10]"दवाग्नेर्मध्याह्ने सूर्यकिरणसंपर्कात् क्रौर्यातिशयदर्शनात् तद्विकारत्वनिश्चय इति केचित्, तच्चिन्त्यम्, उष्ण"[11]द्रव्यद्वयमेलने तत्संभवात्॥

[१, ३७०–३७३]

(**रत्नप्रकाशः**) कुतर्कवासनामलिनान्तः[12]करणः पण्डितंमन्यः कश्चित् प्रकृतसूत्रमनर्थकमेवेति वक्तुं विकल्पयति — **किं पुनरिति**। एतेन 'किं स्वतन्त्रमिदं लक्षणम्, आहोस्विल्लक्षणान्तरेण निर्वृत्तानामनेन नियमः क्रियते, अथ लक्षणान्तरशेषभूतमिति प्रश्नः' इति निरस्तम्। द्विधैव विकल्पस्य प्रकटतया तस्य त्रिविधपरतयोपपादनानौचित्यात्। 'उक्तं वा' इत्यादिभाष्यस्य नियमविधित्वसमाधानपरत्वेन तदपेक्षयापि तस्य त्रिविधत्वासंभवाच्च। यदप्युक्तं तेनैव '**स्थानिनिवृत्तिरिति**। यदा दधिशब्दस्य दधिशब्द आदेशः क्रियते तदा प्रयोजनाभावः। भिन्नस्वरूपस्त्वादेशस्तदर्थस्याप्रत्यायक इति शब्दव्यवहारोत्साद एवेति भावः' इति। तदपि न, 'सर्वस्थानिनिवृत्तिः स्यात्' इत्यनेन साक्षादेवार्थबोधाय क्रियमाणस्य शब्दप्रयोगस्योच्छेदः स्यादिति दूषणस्यापादितत्वेन तस्य सुबोधत्वेन चासंगतविकल्पपरतया व्याख्यानानौचित्यात्। न हि 'स्थानेऽन्तरतमः' इति वचनेन

---

[1] पा. सू. ६. १. १०१.
[2] इत्यनेनेष्टसिद्धावपि — म, आ.
[3] यथार्थभूतवीप्सायामित्यर्थः।
[4] पा. सू. ५. ४. १०८.
[5] किंशब्दो नास्ति — म.
[6] प्रयोजनमिति — अ.
[7] विवक्षितार्थमाह — म.
[8] यत्रानेकविधमान्तर्यं — म.
[9] न्यायेनापि शब्दव्यवस्था — अ, आ, इ, ऋ.
[10] विवरणोक्तिमनूद्य खण्डयति — दवाग्नेरित्यादिना।
[11] द्रव्यमेलनेन तत्संभवात् — अ; द्रव्यद्वयमेलनेन तत्संभवात् — ऋ.
[12] करणपण्डितंमन्यः — ब.

दधिशब्दस्यावयवद्वारा स्थानतोऽन्तरतमो दधिशब्दान्य आदेशः संभवति, येन विकल्पो युज्येत। तुष्यतु वा स भिन्नरूपेणादेशेन, तथाप्यर्थसाम्येनैव स आदेशो भविष्यतीति तस्य तदर्थाप्रत्यायकत्व-प्रयुक्तः शब्दव्यवहारोत्सादो नापाद्य एव। **अस्त्विति**। [1]'सकृल्लक्ष्ये लक्षणं प्रवर्तते' इत्येतत् 'रामाणाम्' इत्यादौ पुनर्नुडाद्यभावार्थमवश्यमाश्रयणीयमेवेति शब्दव्यवहारोच्छेदो न भविष्यतीति भावः। एतेन 'वचनसामर्थ्याच्छब्दव्यवहारस्य चानादित्वादिति भावः' इति निरस्तम्। तयोः पञ्चम्यन्तपदयोर्भाष्यगतपदैः सहैकवाक्यत्वाभावेनासंबद्धप्रलापत्वात्। **न कश्चिदन्य इति**। [2]'अस्तेर्भूः' इत्यादिवदिति भावः। **इण्कोरिति षत्वं प्राप्नोतीति**। [3]'इण्कोः' इत्यनुवर्तमाने [4]'आदेश-प्रत्यययोः' इत्यनेनेति भावः। एतेन 'यदा बिसशब्दस्य बिसशब्द आदेशस्तदा षत्वं नास्ति, न हि तदा सकार आदेशः। यदा तु सकारस्य सकार आदेशस्तदा षत्वप्रसङ्ग इति [5]'वैरूप्यापत्तिः' इति निरस्तम्। नैयायिकादिभिः सह विचारवेलायामादेशादेशिभावस्यार्थवत्येव विश्रान्तिमाश्रित्य व्यवहर्तुमुचितत्वेन तत्र भाष्यकृतान्यैश्च तथैव व्यवहृतत्वेन प्रकृते च तान् प्रति भाष्यकृता दधिशब्दस्य दधिशब्द एव, मधुशब्दस्य मधुशब्द एवादेशो भविष्यतीत्युक्तत्वेन [6]'आदेशप्रत्यययोः' इति सूत्रं चावयवषष्ठ्यन्तमेवेति पक्षस्यैव युक्तियुक्तस्य प्रकृतभाष्यादिसकलभाष्यानुगुणत्वेन च सर्वविरोधेन [7]'वैरूप्यापादनायोगात्। ननु 'बिसमित्यादौ षत्वं न' इति वक्ष्यामीति चेन्न, तथापि प्रयोगप्रतिकूलव्यर्थादेशपरम्परापादकस्यास्य सूत्रस्य करणानौचित्यादित्याशयेनाह — **अपि चेति**। **इष्टा व्यवस्थेति**। प्रयोगानुकूलतयेति शेषः। **न प्रकल्पेतेति**। प्रयोजनमन्तरेण प्रवृत्तस्य लक्षणस्य विक्षिप्तवत् पुनः प्रवृत्तेरिति भावः। **निर्वृत्तिर्न सिध्यतीति**। इष्टस्येति शेषः। **सर्वे सर्वत्रेति**। दैत्यारिरित्यादौ सर्वत्र ईकारादयोऽपि दीर्घाः स्युरिति भावः। 'निर्वृत्तिर्न सिध्यति' इति सामान्यत उक्तम्, 'सर्वे सर्वत्र प्राप्नुवन्ति' इति च तद्विरुद्धमिति मत्वा पृच्छति — **किं तर्हीति**। यदि सर्वे सर्वत्र भवन्ति तर्हि किमुच्यते — निर्वृत्तिर्न सिध्यतीति [इति] भावः। **न साधीय इति**। किं-शब्दानुषङ्गात् साधीय एव तर्हि निर्वृत्तिः सिद्धा भवतीत्यर्थलाभः। **इष्टा व्यवस्थेति**। दैत्यारि-रित्यादावाकार एव दीर्घो न त्वीकारादयः, एवं श्रीश इत्यादावीकार एव, न त्वाकारादय इत्येव-रूपेति भावः। **न प्रकल्पेत** न सिध्यतीत्यर्थः। [8]'अकः सवर्णे दीर्घः' इत्यनेन लक्षणेन सर्वेषां दीर्घाणां पर्यायेण साधुत्वस्य बोधितत्वात् प्रकृतसूत्रेण तेषामसाधुत्वं बोधयितुं न शक्यत इति मन्यते। तदिदं विक्षिप्तनैयायिकादिभिः[9] सामान्यविशेषपर्यालोचनेनैव वाक्यार्थनिर्णयो भवतीति विशेषमवि-द्वद्भिः कृतां शङ्कामतिक्षुद्रां ज्ञात्वा [10]'इको गुणवृद्धी' इति सूत्रे कृतमेव समाधानमत्रापि ज्ञेयमित्य-तिदिशति — **उक्तं वेति**। **षष्ठ्यधिकार इति**। वर्तमान इति शेषः। **कर्तव्य इति**। व्याख्येय इत्यर्थः। कथमित्यपेक्षायामाह — **स्थानेऽन्तरतमः षष्ठीनिर्दिष्टस्येति**। 'षष्ठी' इत्यनु-वर्तमानस्य तन्निर्दिष्टलक्षकतयोपपत्तिरिति भावः। एतेन 'यत्र षष्ठी तत्रेदमुपतिष्ठते। तेनैक-वाक्यतानेन सूत्रेण विधिवाक्यानामिति विधानकाल एवान्तरतम आदेशो विधीयते' इति निरस्तम्। प्रकृतभाष्यस्य तादृशार्थकत्वे मानप्रयोजनयोरभावात्। **प्रत्यात्ममिति**। आत्मानमात्मानं प्रती-त्यर्थः। 'संबन्धिशब्दत्वात् सिद्धम्' इति समाधानं तुल्यास्यसूत्रे उक्तमेवेति तदुपेक्ष्य सूत्रप्रत्या-

---

[1] परिभाषा १२०.
[2] पा. सू. २. ४. ५२.
[3] पा. सू. ८. ३. ५७.
[4] पा. सू. ८.३. ५९.
[5] द्वैरूप्यापत्तिः — ब.
[6] पा. सू. ८. ३. ५९.
[7] द्वैरूप्यापादनायोगात् — ब.
[8] पा. सू. ६. १. १०१.
[9] कृतामित्यनेनान्वयः।
[10] पा. सू. १. १. ३.

ख्यानसाधारणं हेतुमाह — **स्वभावसिद्धत्वादिति**। यथा लोके वचनमन्तरेण स्वभावेनैव प्रत्यात्मनिष्टव्यवस्था भवति तथा शास्त्रेऽपि भविष्यतीति भावः। **समाजेषु** उत्सवादिप्रयुक्तेषु संघातेषु। **समाशेषु** सम आशो भोजनं येषां तेषु। **समवायेषु** सोमादिषु [?]। अन्तरतमवचनशब्दः प्रकृतसूत्रपर एव, न तु वचनान्तरपर इति भ्रमितव्यमित्याह — **योगश्चाप्ययमिति**। **नैव कृशा इति**। न हि कृशा [इत्यर्थः। **अर्थः**] ब्राह्मणत्वादिजातिः, विद्या, ऐश्वर्यादिकं च। **तैरेव सहासत इति**। तथा च ब्राह्मणादयो ब्राह्मणादिभिरेव सहासते, तत्रापि पण्डिताः पण्डितैः, शूराः शूरैः, धनिका धनिकैरिति भावः। तदेवं ज्ञानविशेषयुक्तेषु मनुष्येषु स्वभावसिद्धां व्यवस्थां निदर्श्य तिर्यक्षु तां दर्शयति — [1]**तथा गाव इति**। **यो यस्याः प्रसवो भवति तेन सह शेरत इति**। यो यो यस्या यस्याः प्रसवो वत्सो भवति तेन [तेन] सह तत्तद्गव्यः शेरत इत्यर्थः। स्वेन स्वेन प्रसवेन सह शेरत इति तु फलितम्। **गोयुक्तकानीति**। युगलानीत्यर्थः। **संघुष्टकानि** वियुक्तानि, [2]भवन्तीति शेषः। **पश्यन्तीति**। सन्तीति शेषः। **एवं तावच्चेतनावत्स्विति**। स्वाभाविकी व्यवस्था दृष्टान्ततया निर्दिशितेति शेषः। **अचेतनेष्वपीति**। सा निदर्श्यत इति शेषः। **बाहुवेगमिति**। अनतिक्रम्येति शेषः। **आन्तरिक्ष्यः सूक्ष्मा आप इति**। तासां सद्भावे 'नीलं नभः' इति सकलजनानुभवः प्रमाणम्। तदेव जलं संगृह्य मेघा वर्षन्तीत्यपि युक्तिः संगच्छते। **तासां विकारो धूम इति**। लघुसूक्ष्मरूपत्वसाम्येन तदब्विकारता धूमस्यापि ज्ञेया। [3]**निर्वात इति**। सवाते तिर्यग्गमनदर्शनादिदं [4]विशेषणम्॥

[१, ३७०–३७३]

(**नारायणीयम्**) [5]नित्यस्य शब्दस्य निर्वृत्तिः प्रतिपादनमेवेति कोऽनयोर्भेद इत्याशङ्क्य [6]प्रतिपादकशब्देन नियमो विवक्षित इत्याह — **किमिति**। सिद्धान्तोऽपि संशयकाले बुद्धिस्थ इत्याह — **अथेति**। इष्टापादनमाशङ्क्यानिष्टपर्यवसानं विकल्पमुखेन दर्शयति — **दधीति**। **प्रयोजनाभाव इति**। अतस्तस्यानादेशत्वमिति भावः। अस्तु तर्हि विरूप आदेशः, अत आह — **भिन्नेति**। ननु प्रयोजनाभावादन्तरतमप्रवृत्त्या न भाव्यमित्युक्तम्, अत आह — [7]**वचनेति**। ननु वचनाद् विरूपादेशः प्रवर्तताम्, अत आह — **शब्देति**। विरूपस्य तदर्थप्रतिपादनसामर्थ्यविरहाच्छब्दव्यवहारोच्छेदापत्तेः प्रयोजनाभावेऽपि वचनसामर्थ्यात् सरूपः प्रवर्तत इति नानिष्टं किंचिदित्यर्थः। न च व्यवहारोच्छेदापादनमिष्टमिति शक्यं वक्तुमित्युक्तम् — **अनादित्वादिति**। [8]ननु फलाभावे वचनारम्भः किमर्थः, अदृष्टार्थः। ननु साधुत्व[9]ज्ञानपूर्वकप्रयोगाददृष्टम्, तच्च साधुत्वज्ञानं विनाप्यनेन वचनेन दध्यादिशब्दे निर्वृत्तम्। एवं तर्हि दूषणेनास्य पक्षस्य निराकरणान्नैतदुक्तम्[10]। शास्त्रप्रवृत्ति[11]मात्राददृष्टसिद्धिरिति तु मन्दम्, शास्त्रप्रवृत्तिमात्रस्य साधुत्वज्ञापनहीनस्यादृष्टहेतुत्वे

---

[1] यथा गाव इति — ब.

[2] एतेन भाष्ये 'संघुष्टकानि' इत्यस्यानन्तरं रत्नप्रकाशकृत्पाठे 'भवन्ति' इति नास्तीति ज्ञायते।

[3] 'भाष्ये 'निवाते' इत्यस्य स्थाने 'निर्वाते' इति पाठोऽभिमतः।

[4] विशेषः — ब.

[5] नित्यशब्दस्य — क.

[6] प्रतिपादनशब्दे नियमः — क.

[7] वचनादिति — क.

[8] न फलाभावे — क.

[9] ज्ञापनपूर्वक — क.

[10] नैतद्युक्तम् — क.

[11] मात्राददृष्टासिद्धिरिति — क.

प्रमाणाभावात्, तादृग्विधशास्त्रस्येहाप्रणयनाच्च । अदृष्टार्थत्वे चास्यासकृत्प्रवृत्त्यापादनमुपरिष्टादुक्तम् । तत्र हि फलानुद्देशप्रसक्तिरसकृदपि स्यादिति टीकाकारो वक्ष्यति । आदेशो यः सकार इत्याश्रयणाददोष इत्याशङ्क्याह — **यदेति** । [1]आन्तरतम्येन व्यवस्थासिद्धेः कथमव्यवस्थेत्याशङ्क्य 'तद्यथा' इत्यादि[2]भाष्योक्तामव्यवस्थां स्पष्टयति — **पुनरिति** । सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् [3]कथमीदृशाव्यवस्था, अत आह — **प्रयोजनमिति** । निर्वृत्तानां प्रवृत्तिनियमस्य कर्तुमशक्यत्वात् कथं नियमार्थत्वमित्याशङ्क्य साधुत्वं [4]नियम्यमित्याह — **लक्षणेति** । अस्मिन् पक्षे निर्वृत्तिमुपजीव्य नियमप्रवृत्तेः कथं तदसिद्धिः, अत आह — [5]**अभिमतस्येति** । ननु यथा ङ्याप्प्रातिपदिकवाक्यादविशेषविहितानां [6]'कर्मणि' इत्यादिना [7]'बहुषु बहुवचनम्' इत्यादिना च नियमः, तथात्रापि "अकः सवर्णे' इति विहितानां 'स्थानेऽन्तरतमः' इति नियमोऽस्तु, अत आह — **अक इति** । **शक्यमिति** । तस्यापि प्रमाणत्वात् तत्प्रमितसाधुत्वपरित्यागायोगात् । [8]'ङ्याप्प्रातिपदिकात्' इत्यत्र तु न कर्मणि सर्वा अपि विभक्तयः साधव इत्युक्तम्, येन द्वितीयैव तत्र साधुरित्यनेन विरोधः स्यात् । किं तु प्रातिपदिकार्थसामान्ये विभक्तीनां साधुत्वं तेनोक्तम्, तच्च द्वितीयैवेत्यादिनियमाविरुद्धमेव । इह तु प्रत्येकम् 'अकः सवर्णे दीर्घाः साधवः' इति प्रतिपत्त्यान्तरतम एव साधुरिति पुनः प्रतिपादनेऽस्य हानिरित्यर्थः । एतत्सूत्रस्य स्वातन्त्र्यनिवारणं क्वाप्यप्रतिपादितमिति कथम् 'उक्तं वा' इत्युच्यते, अत आह — **इक इति** । तत्र हि [9]'इको गुणवृद्धी', [10]'इग्यणः' [11]'उरण्' इति च वाक्यत्रयस्वातन्त्र्यनिवारणायेदमुक्तम् । तदन्यस्याप्यनिष्टस्वातन्त्र्यस्य साधारणमित्यर्थः । समासान्तोपपत्तय आह — **समास इति** । [12]समासनिमित्ततया वीप्सार्थः प्रदर्शितः । आत्मशब्दः स्वशब्दसमानार्थः । आत्मत्वं च सर्वसाधारणमिति क इहात्मपदार्थ इति न ज्ञायते, अत आह — **स्थानीति** । आदेशप्रतिसंबन्धिनः [13]स्वशब्देन निर्देश इत्यर्थः । संभवन्निह संबन्धिन्यायः कस्मान्नोक्तः, अत आह — **तुल्येति** । आन्तरतम्यस्य संबन्धनिमित्तत्वे वाप्येतन्निषेधः किमर्थ इत्याशङ्क्य विशिष्टान्तर्यस्य संबन्धकारणत्वं वक्तुमित्याह — **गुणेति** । अभिधेयकृतसादृश्यस्य दृष्टान्तेऽसंभवादर्थशब्दः प्रयोजनवाचीत्याह — **विद्येति** । [14]दार्ष्टान्तिकेऽभिधेयकृतं सादृश्यमाह — **एवमिति** । अभिधेयस्यापि प्रयोजनत्वेनानुगतिः । दृष्टान्तान्तरकीर्तनं किमर्थमित्याशङ्क्याह — **तिरश्चामिति** । इदं चात्र दृष्टान्तेऽधिकं विवक्षितमित्याह — **संकीर्णानामिति** । दिवसे संकीर्णानामपि रात्रावसंकरेण संबन्धः । दार्ष्टान्तिकेऽपि कालभेदेन तदुभयमाह — **एवमिति** । तिर्यग्विषय उदाहरणान्तरं किमर्थम्, अत आह — **यथेति** । अयमर्थः — अन्तरतमसंबन्धो वचनमन्तरेणेत्युक्त्वा किंकृतं सादृश्यमित्यपेक्षायाम् 'अर्थकृतम्' इत्युक्तम् । कथं पुनश्चोदनायामप्रतीतविशेषस्य प्रवृत्तिवेलायां प्रतीतिरिति शङ्कां द्वितीयदृष्टान्तेन पराकृत्यानर्थकेषु कथमित्याशङ्का तृतीयदृष्टान्तेन पराकृतेति । भवत्वेवं चेतनेषु, अचेतनेषु शब्देषु कथमन्तरतमसंबन्ध इत्याशङ्का 'यद्यपि शब्दा अचेतनाः, यस्त्वसौ [प्रयुङ्क्ते] तदर्थप्रतिपत्त्या, स चेतनः' इति निराकर्तुं

---

[1] आन्तरतम्यव्यवस्था — क.
[2] भाष्योक्तामवस्थां — क.
[3] कथमीदृशव्यवस्था — क.
[4] 'नियमे साधु' इत्यर्थे यत्प्रत्ययो बोध्यः ।
[5] अभिमतेति — क.
[6] पा. सू. २. ३. २.
[7] पा. सू. १. ४. २१.
[8] पा. सू. ६. १. १०१.
[9] पा. सू. ४. १. १.
[10] पा. सू. १. १. ३.
[11] पा. सू. १. १. ४५.
[12] पा. सू. १. १. ५१.
[13] समासान्तनिमित्ततया — क.
[14] स्वशब्दपर्यायात्मशब्देनेत्यर्थः ।
[15] दृष्टान्तेऽभिधेय — क.

शक्येति । विषयव्याप्त्यर्थमेवाचेतनोदाहरणकीर्तनमित्याह — **न्यायस्येति**। 'सूक्ष्मा आपः' इत्यनेन किं परमाणुरूपा विवक्षिता इत्याशङ्क्य दुर्लक्ष्यत्वात् सूक्ष्मत्वोक्तिरित्याह — **सूक्ष्मः समुद्र इति** । काष्ठादिस्थजलविकारत्वात् कथमान्तरिक्षाब्विकारत्वम्, अत आह — **तदिति** । ज्योतिष आकाशदेशत्वानैयत्यात् कथमर्चिष ऊर्ध्वगमनम्, अत आह — **सूर्येति** ॥

[१, ३७३–३७७]

(**लघुविवरणम्**) नन्विदमोऽर्धतृतीयमात्रत्वमनुपपन्नम्, त्रिमात्रत्वात् तस्येत्यत आह — [1]**अत्वेति**। परत्वादत्वम्, अन्तरङ्गत्वाच्चैकादेश इति भावः। [2]'प्लुतश्च विषये स्मृतः' इत्यनेन न्यायेन त्रिमात्रो न भविष्यतीत्यत आह — **प्लुतेति**। **संज्ञा चेति**। संज्ञाविधौ भाव्यमानत्वाभावादैजादिभिर्भिन्नकालानामपि[3] ग्रहणात् सा स्यादित्यर्थः। **समुदायेति**। ह्रस्वादिभेदभिन्नऋवर्णसमुदायापेक्षयेत्यर्थः। **रश्रुतेरिति**। रेफाधिकरणस्य रेफाधिकरणावित्यर्थः। **भेदेति**। ह्रस्वादीति शेषः। प्रधानत्वमिह भूयस्त्वं विवक्षितमित्यभिप्रेत्याह — **इममेवेति** ॥

[१, ३७३–३७७]

(**विवरणम्**) [4]**तदनाश्रयणेनेति** । मन्दबुद्धिप्रतिपत्त्यर्थमिति शेषः। ननु नास्त्यर्धमात्रिक इगित्यत आह — **इदमेवेति** । यदुक्तम् 'इदमेव' इति, तत्राह — **नित्या इति**। 'अर्धतृतीयमात्रिकस्येदमः' इत्यनुपपन्नम्, त्रिमात्रत्वात् तस्येत्यत आह — **अत्वेति** । परत्वादत्वेऽन्तरङ्गत्वादेकादेश इति भावः। [5]**संज्ञा चेति**। संज्ञाविधौ भाव्यमानत्वाभावादिति भावः। **तत्रेति**। प्रमाणत आन्तर्यादित्यर्थः । **समुदायापेक्षयेति** । ऋवर्णह्रस्वादिसमुदायापेक्षयेत्यर्थः । **गुणवृद्धिशास्त्रस्येति**। प्रतीक् लक्षणभेदाद् ऋवर्णविषयगुणवृद्धिशास्त्रस्येत्यर्थः । 'रश्रुतेः' इत्यनेनैकदेशद्वारान्तर्यमुक्तम् । **एतद्बाधेनेति** । अपवादत्वाद् [6]'अनेकाल्शित्' इत्यस्येत्यर्थः। न च सर्वादेशत्वे ऋवर्णादेशत्वाभावः शङ्कनीयः, समुदायादेशत्वेऽन्तवर्तित्वादृवर्णस्य तदादेशत्वस्यापि खट्वर्श्य इत्यादाविव वक्तुं शक्यत्वादिति भावः। ऋवर्णस्य स्थानित्वे तदादेशस्याणो रपरत्वम्, तस्य च स्थानित्वमङ्गस्येति षष्ठया अन्त्येऽल्युपसंहारे, न ततः प्रागिति षष्ठ्यनुपसंहारे ऋवर्णादेशत्वाभावः, तदभावे च कुतो रपरत्वम्, तदभावे च कुतस्तरामनेकाल्त्वम्, तस्मिंश्चासति कुतस्तमां सर्वादेशत्वम्, उपसंहारे [7]च समुदायसंबन्धिस्थानषष्ठ्यभावात् स्थानषष्ठीनिबन्धन[8]सर्वादेशत्वस्याप्यभावः। न च षष्ठ्यनुपसंहारेऽपि समुदायान्तःपातिऋवर्णाश्रयेणाणो रपरत्वम्, प्रत्यक्षे ऋवर्णस्थानित्वे चरितार्थस्य [9]'उरण् रपरः' इत्यस्यानुमानिकेऽस्मिन्[10] प्रवृत्त्ययोगात्। खट्वर्श्य इत्यादौ तु [11]'पूर्वपरयोः' इत्यधिकारात् प्रत्यक्षमेव स्थानित्वमिति हृदि निधाय परिहाराभिप्रायमाह — **अङ्गस्येति षष्ठीति**।

---

[1] अत्वे कृत इति — ड, ढ, त.
[2] श्लो. वा. १. २. १७—१.
[3] अपिशब्दो नास्ति — ड, ढ.
[4] प्रदीपे 'तदनाश्रयेण योगारम्भे' इत्यत्र 'तदनाश्रयणेन योगारम्भे' इति निर्णयसागरमुद्रिते पाठः।
[5] संज्ञया चेति — च, छ, ञ.
[6] पा. सू. १. १. ५५.
[7] चकारो नास्ति — च.
[8] सर्वादेशस्याप्यभावः — ञ.
[9] पा. सू. १. १. ५१.
[10] तस्मिन् — ञ, ट.
[11] पा. सू. ६. १. ८४.

पूर्वति। तद्वाधने ऋवर्णस्य स्थानित्वाभावाद् रपरत्वमेव न स्यादिति भावः। ननु 'अथवा' इत्याद्ययुक्तम्, रेफवतो रेफवद्भ्यामान्तर्यादित्यत आह — **निर्वृत्तस्येति**। **न हीति**। यद्यपि 'स्थाने' इति स्थानकृतमान्तर्यमुक्तम्, तथापि द्वितीये वाक्ये तत्, न प्रथमवाक्य इत्यदोषः। [1]**यत्नस्येति**। परिहारान्तराभिधानरूपस्येत्यर्थः। परिहारतत्त्वमाह — **भवेदिति**। वार्तिके नष्टाश्व-दग्धरथवदिति [2]बहुव्रीहिः। 'अथवा' इत्यनेन पूर्वोक्तेन पौनरुक्त्यं परिहरति — **यदेति**। यद्यपि भाष्यकृता तदुक्तम्, तथापि वार्तिकस्य सूत्रोररीकारेण प्रवृत्तौ भाष्यकारस्य 'अथवा' इति पूर्वोक्तमसमञ्जसं स्यादिति भावः। **प्रधानत्वं** नाम भूयस्त्वमभिप्रेतमित्याह — **इममिति**। भूयस्त्वन्यायः क्वेत्यपेक्षायामाह — **ह्रस्वेति**॥

[१, ३७३–३७७]

(**उद्द्योतनम्**) **तदनाश्रयेण** मन्दबुद्धिप्रतिपत्त्यर्थमिति भावः। व्यतिक्रमशब्दस्य प्रकृतोपयुक्त-मर्थमाह — **स्थानित्वेनेति**। ननु [3]नियामकत्वपक्षे नायं प्रसङ्गः; अत आह — **इदमेवेति**। [4]अर्ध-मात्रिकेगभावाद्वा नायं प्रसङ्गः, अत आह — **इदमेवेति**। 'इदमेव' इत्युक्तं निराह — **नित्या इति**। ननु कुक्कुटादौ मात्रिकव्यञ्जनदर्शनाद्यणपि तथा स्यात्, अत आह — **कुक्कुटेति**। नन्विद-मस्त्रिमात्रत्वात् 'अर्धतृतीय' इत्ययुक्तम्, अत आह — [5]**अत्वेति**। परत्वादत्वे परत्वान्तरङ्गत्वा-भ्यामेकादेश इति भावः। नन्वत्रापि 'नैव लोके' इत्येव कुतो नोक्तम्, अत आह — **नैवेति**। **विशेषेति**। अन्तरङ्गादपि प्रतिपदविधेर्बलीयस्त्वात्। [6]"प्लुतश्च विषये स्मृतः' इति प्लुतो न भविष्यति, अत आह — **प्लुतेति**। 'भाव्यमानेन' इति समाधाने सति 'गुण' इति वार्तिका-नुत्थानमाशङ्क्याह — **संज्ञयेति**। **संज्ञा चेति**। संज्ञाविधौ [7]संज्ञिनो भाव्यमानत्वाभावादिति भावः। गुणवृद्धित्वेनैवैच्प्राप्तेः [8]पुनस्तद्ग्रहणं व्यर्थम्, अत आह — **एज्भाव इति**। आदिना [9]"दिव औत्' इत्यादिग्रहः। **मात्रिक इति**। न च 'भाव्यमानेन' इति [10]परिहारोऽत्र संभवतीति वाच्यम्, 'अमूभ्यां' इत्यादिवदुपपत्तेः। वस्तुतो वार्तिकसंगमनमात्रमेतत्, 'नैव लोके' इति परिहारस्य दुरुद्धरत्वात्। नैकैकत्र सर्वप्रसङ्गः, किं तु व्यवस्थयेत्याह — [11]**तत्रेति**। **अकार एव** तुल्यप्रमा-णत्वात्। तथा च ह्रस्वस्य गुणविधौ न किंचिदनिष्टमिति भावः। **समुदायापेक्षयेति**। ऋवर्णस्य ह्रस्वादिसमुदायापेक्षयेत्यर्थः। नन्वादेशानन्तरभाविना रपरत्वेन कथं व्यवस्थेत्याशङ्का-निरासाय 'अण् प्रसज्यमान एव' इति भाष्यम्। तस्य तात्पर्यमाह — **उरणिति**। **गुणेति**। प्रतिलक्ष्यं लक्षणभेदादृवर्णविषयगुणवृद्धिशास्त्रस्येत्यर्थः। "रश्रुतेः' इत्यनेन रेफवत्त्वमान्तर्यमित्युक्तम्। [12]**सर्वादेशाविति**। ऋवर्णान्तिस्येति यावत्। समाधानतात्पर्यमाह — **अङ्गस्येति**। **पूर्वमेवेति**।

---

[1] प्रदीपे 'तदर्थस्य प्रयत्नस्याकरणात्' इत्यत्र 'तदर्थस्य यत्नस्याकरणात्' इति निर्णय-सागरमुद्रिते पाठः।

[2] नष्टाश्वशब्दे दग्धरथशब्दे चेति भावः।

[3] नियामकपक्षे — म.

[4] 'अर्धमात्रिक' इत्यादि 'इदमेवेति' इत्यन्तं नास्ति — अ, आ, ऋ.

[5] तत्रेति — आ, ऋ.

[6] श्लो. वा. १. २. १७ — १.

[7] संज्ञिनोऽभाव्यमानत्वादिति — म.

[8] पुनस्तद्ग्रहणमयुक्तमत आह — म, आ.

[9] पा. सू. ७. १. ८४.

[10] परिहारोऽप्यत्र — ऋ.

[11] प्रदीपे 'अत्र ह्रस्वस्य' इत्यस्य स्थाने 'तत्र ह्रस्वस्य' इत्यन्नंभट्टपाठः।

[12] सर्वादेश इति — म.

ऋस्थानिकत्वाभावे रपरत्वाभावेनानेकाल्त्वाभावात् [1]'अनेकाल्शित्' इत्यपवादस्य तदानीमभावादिति भावः। **अनुसंह्रियते** उपसंह्रियते। **आनुपूर्व्या** [2]'अलोऽन्त्यस्य' [3]इत्येतत्प्रवृत्त्यनन्तरम्, तदुपजीव्येति यावत्। न च समुदायादेशत्वेऽपि तदन्तर्गतऋकारादेशत्वेन रपरत्वं संभवतीति वाच्यम्, बाधकाभावेनालोऽन्त्यपरिभाषया समुदायस्थानित्वस्यासंभवादिति भावः। रश्रुतित्वेनान्तर्यस्योक्तत्वात् 'अनान्तर्यम्' इत्ययुक्तम्, अत आह — **निर्वृत्तस्येति**। ननु 'अनान्तर्यमान्तर्यम्' इति क्वाप्यप्रसिद्धम्, अत आह — **न हीति**। **स्थानं** कण्ठादि। **अर्थः** अभिधेयः। **गुणः** घोषवत्त्वादिः। **प्रमाणं** [4]ह्रस्वत्वादिः। 'स्थानकृतमान्तर्यं बलवत्' इति द्वितीयवाक्य उक्तम्, न प्रथमवाक्येऽपीति भावः। **परिग्रहाच्चेति**। 'उपसरजः' इत्यादौ व्यञ्जनस्यार्धमात्रिकस्य मात्रिकोऽकारो दीर्घापेक्षयान्तरतमो भविष्यतीति [5]भाष्यकृतोक्तत्वादित्यर्थः। प्रमाणत आन्तर्यस्य [6]संभवादनान्तर्यासिद्धिं शङ्कते — **ऋवर्णस्येति**। **तदर्थस्येति**। ऋवर्णैकदेशह्रस्वाद्यपेक्षया 'अनान्तर्यम्' इति परिहारो नोच्यत इत्यर्थः। [7]**यत्नस्य** परिहारान्तररूपस्य। **दीर्घस्येति**। यद्यप्येकग्रन्थेनैव शङ्काद्वयं युक्तम्, दीर्घेऽपि 'तदर्थस्य' इत्यस्यैव समाधानत्वात्, तथापि पूर्वत्रेष्टसिद्धिः, दीर्घेऽनिष्टप्रसङ्ग इति सूचयितुं भेदेन शङ्काद्वयम्। 'स्त इति चेत्' इत्यस्यानन्तरं 'तदर्थस्य' इति समाधानमनुषञ्जनीयमिति सूचयन् तदेव विवृणोति — **भवेदिति**। सूत्रारम्भाङ्गीकारेण 'अनान्तर्यम्' इति परिहारः, अयं तु तदनङ्गीकारेणेति न पौनरुक्त्यमित्याह — **यदेति**। वार्तिके [8]'नष्टाश्वदग्धरथवत्' इति बहुव्रीहिः। **प्रधानत्वं** भूयस्त्वमभिप्रेतमित्याह — [10]**इममिति**। 'खट्वा एलका' इत्यत्र [11]दीर्घस्य मात्राद्वयम्, एकारे चावर्णमात्रेति मात्रात्रयमवर्णस्य, इवर्णस्य त्वेका [12]मात्रेत्यवर्णस्य भूयस्त्वम्। एवं 'माला औपगवः' इत्यत्रापीति[13] ज्ञेयम्। तर्हि भूयस्त्वन्यायः क्व, अत आह — **ह्रस्वेति** ॥

[१, ३७३–३७७]

(**रत्नप्रकाशः**) तदेवं दृष्टान्ते उपपादिता स्वाभाविक्यान्तर्यप्रयुक्ता व्यवस्था दार्ष्टान्तिके सुज्ञानेति तेनेष्टव्यवस्था सर्वत्र शास्त्रेऽत्र न सिध्यतीति च मत्वा तदुपपादनमुपेक्ष्य विचारान्तरमुपक्रमते — **व्यञ्जनस्वरव्यतिक्रम इति**। [14]यण इकि इको यणि चेत्यर्थः। **तत्कालप्रसङ्ग इति**। यणोऽर्धमात्र एवेक् स्यात्, इकश्च यथायथमेकमात्रो द्विमात्रस्त्रिमात्रश्च यण् स्यादिति मन्यते पण्डितंमन्यः। **नैव लोक इति**। वृद्धव्यवहाराद्वर्णानां [15]प्रमाणमवगन्तव्यम्। वृद्धाश्चार्धमात्रिकं स्वरं मात्रिकादिव्यञ्जनं च न स्वीकृतवन्त इति भावः। एतेन 'नित्याः शब्दा अन्वाख्यायन्ते।

---

[1] पा. सू. १. १. ५५.
[2] पा. सू. १. १. ५२.
[3] इत्यस्य प्रवृत्त्यनन्तरम् — ऋ.
[4] 'ह्रस्वत्वादि' इत्युचितं भाति। ह्रस्वादि — अ; ह्रस्वादिः — ऋ.
[5] 'इको गुणवृद्धी' इति सूत्र इति भावः।
[6] संभवादनान्तर्यस्यासिद्धि — ऋ.
[7] 'तदर्थस्य प्रयत्नस्य' इति प्रदीपस्थाने 'तदर्थस्य यत्नस्य' इति निर्णयसागरमुद्रिते पाठः।
[8] सिद्धेः — म.
[9] नष्टाश्वशब्दे दग्धरथशब्दे च बहुव्रीहिर्बोध्य इत्यर्थः।
[10] इदमिति — म.
[11] आकारस्येत्यर्थः।
[12] मात्रेत्यवर्णभूयस्त्वम् — म, आ.
[13] इतिशब्दो नास्ति — म.
[14] यण इति — ब.
[15] परिमाणमित्यर्थः।

निर्वृत्तिपक्षेऽप्युच्चारणस्याशक्यत्वादिति भावः' इति निरस्तम्। नित्यत्वे चानित्यत्वे च वर्णानां पुरुषप्रयत्नाधीनाभिव्यक्तिकत्वाविशेषात्। व्यञ्जनस्य मात्रिकादेरुच्चारणासंभवेऽपि स्वरस्यार्धमात्रिकस्योच्चारणसंभवाच्च। **नैव लोक इति**। 'कुक्कुटः, पित्तम्' इत्यादौ व्यञ्जनद्वयसंयोगो नैकं व्यञ्जनं मात्रिकमिति भावः। **अर्धतृतीयमात्रस्येदम इति**। परत्वात् त्यदाद्यत्वे पररूपे च कृते इशः प्रवृत्तिरिति भावः। तदैव ह्यर्धतृतीया मात्रा यस्य सोऽर्धतृतीयमात्र इति सार्धमात्राद्वयात्मकता [1]इदमः संभवति। न च विशेषविहित इश् त्यदाद्यत्वापवाद इति वाच्यम्, [2]"सत्यपि संभवे बाधनं भवति' इति तक्रकौण्डिन्यन्यायेन लक्ष्यमात्रसाधनार्थं क्वचित् स्वीकारेऽपि युक्तिसहस्य व्यापकस्य [3]"असति संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्यात्' इति न्यायस्यैव स्वीकर्तुमुचितत्वेन अत्वेशोरुभयोरेकत्र संभवेनापवाद्यापवादकभावायोगात्। **भाव्यमानेनेति**। 'नैव लोके' इति समाधानमत्र न संभवति, अर्धतृतीयमात्राप्रसिद्धावपि द्विमात्रत्रिमात्रयोः प्रसिद्धत्वेनैकमात्रापेक्षया तयोरन्यतरापादनपरिहारस्य तेनायोगात्। एतेन 'नैव लोक इति परिहारो नोक्तः, यदा विशेषविहितत्वादत्वमिश्भावेन बाध्यत इति न्यायस्तदा त्रिमात्रस्य संभवात् स्यादेव' इति निरस्तम्। भाष्यानुगुणव्यापकपक्षाश्रयेणैव 'नैव लोके' इति हेत्वनुपन्यासस्योपपन्नत्वेन लक्ष्यमात्रोपयोगिदुर्बलक्वाचित्कपक्षाश्रयेण तदुपपादनायोगात्। **गुणवृद्धयेज्भावेष्विति**। गुणवृद्धिसंज्ञकैजादेशेष्वित्यर्थः। 'अत्' इति तपरनिर्देशादातोऽनण्त्वाच्च एज्ग्रहणं कृतम्, तेषामेव त्रिमात्रचतुर्मात्राणां गुणवृद्धिसंज्ञाप्रसङ्गात्। तत्र खट्वेन्द्र इत्यादौ गुणो जायमानस्त्रिमात्रः स्यात्, चतुर्मात्रस्यैङोऽप्रसिद्धेः। [4]"खट्वैडका' इत्यादौ तु वृद्धिश्चतुर्मात्रः स्यात्", [5]त्रिमात्रस्य ऐचोऽभावादिति भावः। **तपरे गुणवृद्धी इति**। [6]"वृद्धिरादैच्'सूत्रे [7]व्याख्यातमिदम्। **एज्भाव इति**। गुणवृद्धयेज्भावे 'भाव्यमानोऽण्' इति परिहारो न संभवति, अत्र तु सोऽपि संभवतीति सूचयितुं पृथङ्निर्देशः। एतेन "प्रत्याहारः [8]"पूतक्रतोरै च' [9]"मनोरौ वा' इति संग्रहार्थः" इति निरस्तम्। मात्रिकयोरैकारौकारयोरप्रसिद्धत्वेन भाव्यमानत्वहेतुकपरिहारस्य तत्रासंभवात्। 'अर्धतृतीयमात्र एच् प्राप्नोति, नैव लोके न च वेदेऽर्धतृतीयमात्र एजस्ति' इति भाष्यस्वरसाच्च। ननु 'कुर्वाते' इत्यादावपि 'नैव लोके' इति न्यायेनैव परिहाराद् भाव्यमानन्यायो नाश्रयणीय एवेति चेन्न, अर्धतृतीयमात्रस्यैकारस्याप्रसिद्धत्वेऽपि तादृशस्य टेर्द्विमात्र एव भवति, न तु त्रिमात्र इत्यत्र विनिगमनाविरहात्। **सर्वप्रसङ्ग इति**। कर्तेत्यादौ मात्रिकस्य ऋवर्णस्य मात्रिक एवाकारो भविष्यतीतीष्टसिद्धावप्यन्यत्रैङेव गुणः स्यात्। वृद्धिप्रसङ्गे त्वादैचस्त्रयोऽपि पर्यायेण स्युरिति भावः। **न वेति**। गुणवृद्धिविधिव्यापारोत्तरं प्रकृतपरिभाषाप्रवृत्तेः पूर्वम् [10]"उरण् रपरः' इति सूत्रप्रवृत्तेर्न दोष इति भावः। एतेन "'उरण्रपरः' इत्यनेन गुणवृद्धिशास्त्रस्यैकवाक्यतायां विधीयमान एवाण् रपर इति रश्रुतिस्थानेऽरारौ गुणवृद्धी भवत इत्यर्थः" इति निरस्तम्। रपरत्वविधेर्गुणवृद्धिविधिनैकवाक्यताया ब्रह्मणापि संपादयितुमशक्यत्वात्। उत्तरसूत्रे स्थानेग्रहणद्वयानुवृत्त्या करिष्यमाणस्यैव व्याख्यानस्यात्र निदर्शितत्वेन तद्विरोधाच्च। **सर्वादेशप्रसङ्ग इति**। पूर्वमेव रपरत्वविधिप्रवृत्तिं मन्यते।

---

[1] अदसः संभवति — ब.
[2] महाभाष्यम् १. १. ४७.
[3] महाभाष्यम् ६. १. २.
[4] 'खट्वैलका' इति भाष्ये दृश्यते।
[5] ऐजित्यादिः। अत एव पुँल्लिङ्गप्रयोगः।
[6] प्लुतावैच इत्यत्र चतुर्मात्रस्यैव प्लुतस्य भाष्यकृदिष्टत्वादिति भावः।
[7] पा. सू. १. १. १.
[8] व्याख्यातमिति — ब.
[9] पा. सू. ४. १. ३६.
[10] पा. सू. ४. १. ३८.
[11] पा. सू. १. १. ५१.
[12] पा. सू. १. १. ५१.

तदाश्रयत्वादिति । समुदायेऽवयवानां नान्तरीयकत्वेऽपि तेषु षष्ठ्यर्थान्वयाभावात् स्थानित्वमप्रसक्तमेवेति निर्दिश्यमानालोऽन्त्यविध्युत्तरमेव रपरविधिना भवितव्यमित्युपजीव्यबाधासंभव इति भावः। इदानीं रपरविधेः पूर्वं प्रकृतपरिभाषाप्रवृत्त्यापीष्टं साधयितुं शक्यत इत्याह — **अथवेति** । **अनान्तर्यमेवेति** । [1]यक्षानुरूपबलिन्यायेन प्रौढिमात्रमेतत् । आभ्यन्तरविवृतप्रयत्नसाम्येन ऋकारस्य अदातोरेवान्तरतमयोः सत्त्वेन तयोस्तेनान्तर्याभावकथनस्यानौचित्यात् । सर्वेषामचां विवृत एवाभ्यन्तर इत्यपाणिनिमतावलम्बनेन वा गुणविधौ मात्रिकस्य ऋवर्णस्य मात्रिकोऽकारो द्विमात्रस्य तु द्विमात्र एङ् गुण इत्यान्तर्यसत्त्वादनान्तर्यं न संभवतीति वृद्धिविधिपरतया कथंचिद्योजनीयम्। एतेन 'संप्रयोगो वा' इत्युत्तरग्रन्थोऽपि व्याख्यातः। नष्टाश्वदग्धरथतास्थानापन्नानान्तर्यस्याभावात्। एतेन 'न हि स्थानार्थगुणप्रमाणकृतमेवान्तर्यं परिभाषितम्, रूपान्तरेणापि सादृश्यसंभवात् परिग्रहाच्चेति भावः' इति निरस्तम्। अनान्तर्यस्यैव तत्र शशविषाणकल्पत्वेन तत्कृतान्तर्योपपादनस्य शशविषाणकृतकार्मुकोपपादनसमत्वात्। यदप्युक्तं तेनैव "ऋवर्णस्य मात्रिकस्य मात्रिकोऽकारो गुणोऽन्तरतमोऽस्त्येव, तथा दीर्घस्य तुल्यप्रमाणत्वादेकारौकारावन्तरतमौ स्त इति चेत्, भवेदेतद् यदि भेदापेक्षा क्रियते। ऋवर्णमात्रस्य ह्रस्वाद्यवान्तरभेदानपेक्षायां स्थानकृतमान्तर्यं न केनचिदिति 'अनान्तर्यमेव' इत्याद्युक्तम्" इति। तदत्यन्तासंबद्धम्, [2]बकबन्धनीयत्वात्, अपाणिनीयत्वात्, पाणिनिमतपरिज्ञानाभावमूलकत्वाच्च। **अवर्णप्रधानत्वादिति**। एचः पूर्वभागस्यावर्णात्मकत्वादिति भावः। अत्र दृष्टान्तः 'ऐचोश्चोत्तरभूयस्त्वात्' इति बोध्यः। **उभयान्तर्यादिति** । उभयान्तरतमे संभवति तदुपेक्ष्यैकान्तरतमस्वीकारानौचित्यादिति भावः ॥

[१, ३७३–३७७]

(**नारायणीयम्**) सूत्रस्यैवानारम्भात् कस्यातिव्याप्त्युद्भावनम्, अत आह — **लोकेति**। ननु न्यायस्यैवातिप्रसङ्गोद्भावनमिदमस्तु, कथमनेनारम्भाङ्गीकारावगतिः। उच्यते, असत्प्राप्त्याशङ्का वचनादेव, न तु न्यायतः, तस्य विद्यमानेष्वन्तरतमप्रापकत्वात्। वचनस्य तु [3]कार्यदर्शने भवत्यसत्प्रापणशङ्का। **निर्वर्तकमिति** । स्वतन्त्रमिति न मन्तव्यम्, अस्वातन्त्र्यात्, [स्वातन्त्र्यस्य] प्रागेव निरस्तत्वात्। किं तूत्पादकमिति कार्यवादिनश्चोद्यम्। [4]"पक्षान्तरैरपि [5]'परिहाराः' इति न्यायात् परिहार इत्याह — **नित्या इति**। कार्यमतेऽप्याह — **निर्वृत्तीति** । 'सयँ्यन्ता' इत्यादौ मात्रिको यणस्तीति शङ्कां परिहरति — **कुक्कुटादिष्विति** । **औकारश्च स्यादिति** । परिहारस्तु 'नैव लोके' इति वा [6]"भाव्यमानः' इति वा। किमेकैकस्य ऋवर्णस्य सर्वप्रसङ्गः, उत ऋवर्णसमुदायस्य। नाद्यः, वृद्धेः सर्वस्या एकैकऋवर्णविषयप्राप्तावपि गुणस्य व्यवस्थितविषयत्वात् सर्वप्रसङ्गाभावात्। नान्त्यः, प्रत्येकं सर्वप्रसङ्गाभावे समुदायस्यापि तदयोगात्। न हि [7]"प्रत्येकं संबन्धः समुदाये संभवतीत्याशङ्क्य यथास्मिन् ग्रामे सर्वेषामागतानां भोजनमित्यत्र ग्रामस्थगृहेषु प्रत्येकं [8]'सर्वभोजनाभावेऽपि समुदाये तद्व्यपदेशः, एवं समुदाये सर्वप्रसङ्गोक्तिरित्याह — **अत्रेत्यादिना**।

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[2] बकबन्धनसदृशत्वादिति भावः। **बकबन्धन**-न्यायः — लौ. न्या. द्वितीयभागे पृष्ठम् ५१.
[3] शब्दस्य कार्यत्वमत इत्यर्थः।
[4] महाभाष्यम्. माहेश्वरसूत्रम् २.
[5] परिहार इति — क.
[6] 'भाव्यमानः सवर्णान्न गृह्णाति' इति परिभाषयेत्यर्थः। परिभाषा १९.
[7] समुदाये प्रत्येकं संबन्ध इत्यन्वयः स्यादिति भाति।
[8] स्वभोजनाभावेऽपि — क.

[1]'उरण्' इति ऋस्थानिकमणमनूद्य रपरत्वविधेः कथं प्रसज्यमानस्यैव रपरत्वम्, अत आह — **उरिति**। वर्णैकदेशानां [2]वर्णग्रहणेनाग्रहणपक्षे कथमृकारस्य रेफवत्त्वम्, अत आह — **रभुतेरिति**। ननु सर्वादेशतयालोऽन्त्यबाधने [3]ऋवर्णस्थानिकत्वाभावाद्रपरत्वस्यैवाप्राप्तिः, अत आह — **ऋवर्णस्येति**। पूर्वमलोऽन्त्यविधिः रपरत्वसिद्धये प्रवर्तते। पश्चात्तदपवादनिमित्तसत्त्वान्निवर्तते। यथोक्तं [4]"निपात एकाच्' इत्यत्र तदन्तविधिराद्यन्तवत्सूत्रप्रवृत्तये प्रवर्तते, पश्चाल्लिङ्गान्निवर्तत इति। प्रवृत्तस्योपजीव्यस्य च बाधायोग इति परिहारभावमाह — **अङ्गस्येति**। तत्र त्वेतादृशस्यापि लिङ्गाद्बाधो निवेदितः। ननु ऋवर्णस्थानिकत्वे रपरत्वम्, तस्मिंश्च सत्यान्तर्यादृवर्णस्थानिकत्वमितीतरेतराश्रय इत्यत आह — [5]**आनुपूर्व्येति**। अलोऽन्त्यविधिनैव ऋवर्णस्थानिकत्वम्, न तु रपरत्वेन। अतो नोक्तदोषः। रपरत्वं तु सर्वप्रसङ्गनिवृत्तिनिमित्तमित्यर्थः। आन्तर्यस्योक्तत्वात् तदभावलक्षणमान्तर्यं कथं कथ्यते, अत आह — **निर्वृत्तस्येति**। स्थानार्थगुणप्रमाणत इत्यभियुक्तैरभिधानात् कथमन्यादृशसादृश्यस्वीकार इत्याशङ्क्य प्रायोऽभिप्रायं तदित्याह — **न हीति**। इदमान्तर्यमसंभवीति चोदयति — **ऋवर्णस्येति**। **तदर्थस्येति**। यत्र प्रमाणकृतमान्तर्यं तत्र तदेवास्तु। यत्र तु तन्नास्ति तत्रेदं व्यवस्थापकमित्यर्थः। ननु न्यायस्य वचनेन बाधात् कथं विनान्तरतम्येन स्थान्यादेशभावः, तत्राह — **यदेति**। पूर्वपरयोस्तत्समुदायस्य वा स्थानित्वेन प्राधान्यं, न वर्णमात्रस्येत्यत आह — **इममिति**। प्राधान्येन भूयस्त्वं लक्ष्यते, भूयसा च व्यपदेश इति भावः। भूयस्त्वन्यायस्यायमविषय इत्याह — **ह्रस्वेति**॥

उरण् रपरः. १. १: ५१.

[१, ३७८–३८१]

(**लघुविवरणम्**) विधायकत्वे कथमस्यान्यनिवर्तकत्वमित्यत आह — **षष्ठीति**। अन्यनिवृत्त्यर्थपक्षेऽपि रपरत्वं विधीयत एवेति न प्रथमपक्षाद् द्वितीयस्य विशेष इत्यत आह — **आहोस्विदिति**। अन्येषां पाठोऽनुपपन्नः, विधायकत्वेऽस्यान्यनिवृत्त्यर्थत्वाभावादेवकारायोगादित्यत आह — [6]**तत्रेति**। भाष्ये 'कृतिः' इत्यादौ नित्स्वरेणाद्युदात्तत्वम्। 'कृतम्' इत्यादौ [7]प्रत्ययस्वरेणान्तोदात्तत्वे शेषनिघातेनानुदात्तत्वम्। 'प्रकृतम्' इत्यादौ "गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरे शेषनिघाते च [8]"उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम्। प्रथमपक्षे दोषान्तरमाह — **प्रतिपदेति**। ननु नियामकाभावे कदाचिदवर्णमपि भवतीति 'अवर्णाप्रतिपत्तिः' इत्ययुक्तमित्यत आह — **ततश्चेति**। 'पक्षाक्षेप' इत्यत्र प्रथमेति विशेषणं द्रष्टव्यम्। एतद्दोषपरिजिहीर्षयान्यनिवृत्त्यर्थमिति वदतो नियमपक्षो यद्यभिप्रेत इति भाष्यार्थः। **विचारयतीति**। 'न जायते' इत्यन्तेन। **कर्तेति**। [9]"स्थानेऽन्तरतमः' इति परिभाषा नोपतिष्ठते, ऋवर्णसमुदायस्यान्तरतमगुणवृद्ध्यभावादिति भावः। अनुवर्तमानेन स्थानशब्देन 'उरण् रपरः' इति षष्ठी स्थानेयोगा प्रतिपाद्यत इत्यादेशः

---

[1] पा. सू. १. १. ५१.
[2] वर्णग्रहणेन ग्रहण — क.
[3] ऋवर्णस्थानिकत्वात् — क.
[4] पा. सू. १. १. १४.
[5] अनुपूर्वेति — क.
[6] अत्रेति — ण, त; यत्रेति — ड, ढ.
[7] प्रत्ययस्वरेणाद्युदात्तत्वे — ड.
[8] पा. सू. ६. २. ४९.
[9] पा. सू. ८. ४. ६६.
[10] पा. सू. १. १. ५०.

प्रसज्यमानत्वेनाविशेषित [1]इत्यभिप्रेत्य भाष्ये 'यद्येवम्' इति चोद्यम्, तदयुक्तम्, अन्तरेणापि स्थानग्रहणानुवृत्तिं [2]'षष्ठी स्थानेयोगा' इत्यनेन स्थानेयोगा षष्ठी सिद्धेति स्थानग्रहणमनुवर्तमानं प्रसज्यमानत्वेनादेशं विशेषयितुं भविष्यतीत्यत आह — **न हीति**। विधेयेन साक्षाद् यत्र षष्ठचन्तार्थस्य संबन्धस्तत्र सा परिभाषेति 'विध्यङ्ग' इत्यनेनोक्तम्। किमत इत्यत आह — **तत इति**। स्थानग्रहणानुवृत्त्या 'उः स्थाने' [3] इत्यनभिधान इत्यर्थः। अभिप्रायान्तरमाह — **अथवेति** ॥

[१, ३७८–३८१]

(**विवरणम्**) ननु 'अन्यनिवृत्त्यर्थम्' इत्यन्यशब्देन स्थान्यभिधीयते, तद्व्यतिरिक्तं वा। नाद्यः, आदेशस्य स्थानि[4]निवर्तकत्वस्वाभाव्येन स्थानिनिवर्तकत्वस्यावक्तव्यत्वात्। न द्वितीयः, 'उरण्' [5]इत्येतावतः स्थानिव्यतिरिक्तनिवर्तने सामर्थ्याभावादित्यत आह — **षष्ठीति**। यत्र षष्ठ्या ऋवर्णस्यादेशप्रसक्तिस्तत्रेत्यर्थः। [6]स्वातन्त्र्येण विधायकत्वस्य [7]'इको गुणवृद्धी' इत्यत्र [8]निवारितत्वेन पुनराशङ्कानुपपत्तिं निराकर्तुं भाष्ये 'अन्यनिवृत्त्यर्थम्' इत्युक्तम्। तदन्यनिवृत्त्यर्थत्वमस्य तात्पर्याच्चेत्, नियामकत्वमस्य वाच्यम्। तथा च 'अथ मतमेतत्' इति वक्ष्यमाणादस्य विशेषो न स्यादित्याशङ्क्यानुषङ्गिकं तदिति दर्शयितुमाह — **तत्रेति**। विधेयद्वयमेकत्र कथमित्यत उक्तम् — **तस्य चेति**। रपरत्वस्य प्रथमपक्षेऽपि विधानात् को द्वितीयस्य भेद इत्यत आह — **आहोस्विदिति**। **सामर्थ्यादिति**। युगपदणनणोरेकस्यासंभवादिति भावः। भाष्ये 'कृतिः' इत्यादौ नित्स्वरेणाद्युदात्तत्वम्। 'कृतम्' इत्यादौ प्रत्ययस्वरेणान्तोदात्तत्वे शेषनिघातेनानुदात्तत्वम्। 'प्रकृतम्' इत्यादौ [9]'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरे शेषनिघाते च [10]'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम्। [11]'ञ्नित्यादिः' इत्यादौ [12]'उच्चैरुदात्तः' इत्यादिषु षष्ठीनिर्दिष्टमज्ग्रहणमनुवर्तत इति पक्षेऽच इत्युपस्थानात् षष्ठी[13]सद्भावेन 'उरण्' इत्यस्योपस्थानमिति द्रष्टव्यम्। नियमपक्षे [14]वक्ष्यमाणं दोषमत्राप्याकृष्य दर्शयति — **प्रतिपदेति**। **तेषामिति**। अनेन विधीयमानस्याणो [15]विधीयमानमिति शेषः। [16]ह्रस्वस्य लाभेऽपि दीर्घस्याकारो गुणो न लभ्यते, वृद्धिस्तु नियमेनाण् न लभ्यत इति दुर्लभत्वमुक्तम्। भाष्ये 'कर्ता' इत्याद्युदाहरणमुपलक्षणं दीर्घान्तस्य। 'किम्' इत्यस्य विशेष्यापेक्षायामाह — **कारणमिति**। [17]पूर्वत्र क्वचिदवर्णस्याप्रतिपत्तिः, [18]क्वचिन्नियमेनेति व्याख्या, उत्तरत्र तु नियमेनाप्रतिपत्तिरिति [19]व्याख्येयमिति दर्शयितुमाह — **ततश्चेति**। अथवा ऋवर्णमात्रापेक्षया गुणविधौ नियमेनावर्णस्य वृद्धिविधौ [20]वाप्रतिपत्तिरिति व्याख्या पूर्वत्र भाष्ये,

---

[1] इत्यभिप्रेत्याह — यद्येवमिति — ड, ढ, ण.
[2] पा. सू. १. १. ४९.
[3] इत्यभिधान इत्यर्थः — त.
[4] निवर्तकत्वाभावेन — ञ; निवर्तकत्वे स्वाभाव्येन — ट.
[5] इत्येतावता — च; इत्येतावति — ट.
[6] स्वातन्त्र्येणाविधायकत्वस्य — ञ.
[7] पा. सू. १. १. ३.
[8] विचारितत्वेन — ञ.
[9] पा. सू. ६. २. ४९.
[10] पा. सू. ८. ४. ६६.
[11] पा. सू. ६. १. १९७.
[12] पा. सू. १. २. २९.
[13] सद्भावे उरणित्यस्योपस्थानमिति — ञ.
[14] वक्ष्यमाणदोष — छ, ट.
[15] विधीयमान इति — ञ.
[16] ह्रस्वलाभेऽपि — च, छ, ट.
[17] 'पूर्वत्र' इत्यस्यानन्तरं 'गुणे' इत्यधिकम् — ञ.
[18] 'क्वचित्' इत्यस्यानन्तरं 'वृद्धौ' इत्यधिकम् — ञ.
[19] 'व्याख्येयम्' इत्यादि 'वाप्रतिपत्तिरिति' इत्यन्तं नास्ति — ञ.
[20] वा, अप्रतिपत्तिः, इति पदच्छेदः।

उत्तरत्रापीवर्णोवर्णयोरपि विधानान्नियमेनाप्रतिपत्तिरिति सूचयितुमाह — **ततश्चेति**। अथवा कदाचिद्यद्यवर्णस्य प्रतिपत्तिः कथं तर्हि 'अवर्णाप्रतिपत्तिः' इति वार्तिकमित्यत आह — **ततश्चेति**। एतद्दोषपरिजिहीर्षया 'अन्यनिवृत्त्यर्थम्' इति वदतो नियमपक्षो यद्यभिप्रेत इति 'अथ मतं' इति [1]भाष्यस्यार्थः। [2]नियमपक्षेऽपि वाक्यभेदस्तुल्य इत्याह — **स चेति**। **विचारयति** 'न जायते' इत्यन्तेनेति शेषः। ननु पूर्वपक्षवादिना पृष्टे नियमवादिनं प्रति, नियमवादिनः स्वपक्षे स्वयमेव दोषोद्भावनमयुक्तमित्यत आह — **स एवेति**। तमग्रहणसहितस्याप्यवकाशं दर्शयितुं [3]'झयो होऽन्यतरस्याम्' इत्युक्तम्। **कर्तेति**। ऋवर्णस्य गुणवृद्धिविधौ स्थानेऽन्तरतमपरिभाषा नोपतिष्ठते, ऋवर्णसमुदायस्यान्तरतमगुणवृद्ध्यभावादिति भावः। **परत्वादिति**। यद्यपि भाष्ये विनिगमनाभाव उक्तः, तथापि कार्यकालपक्षे सः। यथोद्देशपक्षे तु संभवत्येव विनिगमनमिति दर्शयितुं 'परत्वात्' इत्युक्तमित्यविरोधः। ननु प्रतिपदविहिता अप्यण एवेति कुतो रपरत्वाप्राप्तिरित्यत आह — [4]**यत्र होति**। **तच्छेषेति**। आनन्तर्यादिति भावः। **विधीति**। ऋवर्णविषयेति शेषः। अनुवर्तमानस्थानग्रहणेन 'उः स्थाने' इति लभ्यते, न तु प्रसज्यमानत्वेनादेशः। स्थानशब्दस्य रपर इत्यनेन संबन्धे वाण उः समीपादिरूपस्यापि संभवात् तदादेशत्वेन [5]'विशेषितोऽण् न स्यादित्युक्तं 'यद्येवम्' इत्यनेन। तदयुक्तम्, [6]'षष्ठी स्थानेयोगा' इति उरिति षष्ठ्याः स्थानेयोगत्वेन स्थानशब्देनानुवर्तमानेन चादेशत्वेन प्रसज्यमानत्वेन चाणो लब्धुं शक्यत्वादित्यत आह — **न हीत्यादिना**। विधेयेन साक्षाद्यत्र[7] षष्ठ्यन्तार्थस्य संबन्धस्तत्र सा परिभाषेति 'विध्यङ्ग' इत्यनेनोक्तम्। ननु [8]'इग्यणः' इत्यनुवाद्येऽपि यथा संख्यातानुदेशः, एवमिह 'उरण्' इत्यनुवाद्येऽपि [9]'षष्ठी स्थानेयोगा' इति किं न स्यादित्यत आह — **तथा चेति**। किमत इत्यत आह — **तत इति**। स्थान इत्यस्य 'उः' [10]इत्यनेनासंबन्ध इत्यर्थः। इतिशब्दो [11]हेत्वर्थः, यतोऽत इत्यर्थः। **सामीप्येति**। ततश्च [12]'कुम्भकार ऋषभीयति' इत्यादावणादेरपि रपरत्वप्रसङ्ग इत्यर्थः। 'प्रसज्यमानः' इति भाष्यदर्शनादाह — **तच्चेति**। भाष्यं तात्पर्यार्थकथनपरं नाक्षरार्थाभिधान[पर]मिति प्रकारान्तरमाह — **अथवेति**। तदेवं स्थानग्रहणद्वयानुवृत्तेर्नादेशान्तराणां[13] बाधकोऽण् विधीयते, अकारादीनामन्याय्यस्य विकल्पस्य प्रसङ्गाच्च। नापि नियमः, अणिति प्रत्याहारवैयर्थ्यप्रसङ्गात्। [14]गुणवृद्ध्योरेवाणनण्प्रसङ्गात् तत्र च नियमेनेकारोकारयोः प्रापणायोगात्, स्थानग्रहणद्वयानुवृत्तिवैयर्थ्यप्रसङ्गाच्च। नापि विहितस्य रपरत्वम्, प्रसज्यमानत्वेन विशेषणायोगात्। [तस्मात्] चतुर्थ एव पक्ष इति स्थितम्॥

---

[1] भाष्यार्थः — ज.
[2] नियमपक्षे वाक्य — ज; नियमपक्षे हि वाक्य — च, छ.
[3] पा. सू. ८. ४. ६२.
[4] यत्रेति — ज.
[5] विशेषितोऽयं न स्यात् — ज.
[6] पा. सू. १. १. ४९.
[7] यत्र प्रकृतेः संबन्धः — ज.
[8] पा. सू. १. १. ४५.
[9] पा. सू. १. १. ४९.
[10] इत्यनेन संबन्ध इत्यर्थः — च, छ, ज, ट.
[11] हेत्वर्थः। समीपेति। ततश्च तृतीयादाव-प्यणो रपरत्वप्रसङ्ग इत्यर्थः — ज.
[12] कुम्भकार इत्यादौ — च, छ; कुम्भकारीयतीत्यादौ — ट.
[13] नादेशान्तरबाधकः — ज.
[14] गुणवृद्ध्योरेवानण्प्रसङ्गात् — च, छ; गुणवृद्ध्योरेवावर्णरूपयोः प्रसङ्गात् — ज.

[१; ३७८–३८१]

(**उद्द्योतनम्**) ननु 'अन्यनिवृत्त्यर्थम्' इत्यत्रान्यशब्देन स्थान्यभिधीयते, अन्यद्वा। नाद्यः, [1]आदेशस्य स्थानिनिवर्तकत्वस्वाभाव्येनावक्तव्यत्वात्। न द्वितीयः, 'उरण्' इत्येतावन्मात्रस्यान्य-[2]निवृत्तौ सामर्थ्याभावात्, अत आह — **षष्ठीति**। यत्र षष्ठ्या ऋवर्णस्यादेशप्रसक्तिस्तत्रेत्यर्थः। [3]'इको गुणवृद्धी' इति सूत्रे [4]"उरण्रपरत्वे च' इति स्वतन्त्रविधायकत्वं निरस्तम्; अत्रान्यनिवर्तकत्वं निरस्यत इति न पौनरुक्त्यमिति सूचयितुं भाष्ये 'अन्यनिवृत्त्यर्थम्' इत्युक्तम्। तदुपपादयति — **तत्रेति**। उः स्थानेऽण्विधावर्थादितरनिवृत्तिर्भाष्याभिप्रेतेत्यर्थः। एकस्मिन् वाक्ये विधेयद्वयासंभवादाह — **वाक्यभेदेनेति**। 'क्रियते' इत्येतदेव विवृणोति — **उः स्थान इति**। एवकाररहित-भाष्यपाठेऽन्यनिवृत्तिपरत्वमुपपादयति — **तत्रेति**। एवकारसहितपाठेऽप्येवकारोऽनुवादः, एतस्यैव सर्वत्राण्विधायकत्वेन मुख्य[5]नियमत्वासंभवादित्याह — **अन्येषामिति**। **सामर्थ्यादिति**। युगपदण-नणोरेकस्यासंभवादित्यर्थः। नन्वान्तरतम्यादृकारस्थाने उदात्तादिः ऋकार एव स्यादिति नानिष्टम्, अत आह — **अन्तरतमस्येति**। ननु तस्यैवोदात्तत्वादिसंभवात् कथमुदात्तादिषु दोषः, अत आह — **स चेति**। [6]तत्राण्प्रसङ्ग एवानेनोच्यत इत्यर्थः। 'न वा' इत्यनास्थावादः, पूर्वं [7]पश्चाद्वा [8]स्वरप्रवृत्तेरावश्यकत्वात्। भाष्ये 'कृतिः' इत्यत्र [9]"ञ्नित्यादिर्नित्यम्' इति ऋकारस्योदात्तत्वम्। 'कृतम्' इत्यत्र प्रत्ययस्वरेणान्तोदात्तत्वे शेषनिघातेनानदात्तत्वम्। 'प्रकृतम्' इत्यत्र [10]"गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वे शेष[11]निघाते च [12]"उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम्। एवं 'हृतिः, हृतम्, प्रहृतम्' इत्यत्रापि। [13]"उच्चैरुदात्तः' इत्यादौ 'अचः' इत्यनुवृत्तिपक्षे[14] [15]"ञ्नित्यादि-र्नित्यम्' इत्यादावच इत्युपस्थानात् षष्ठीसद्भावेन 'उरण्' इत्यस्योपस्थानं ज्ञेयम्। 'नॄः पाहि' इत्यत्र प्रथमयोः पूर्वसवर्णदीर्घमाक्षिप्य समाधत्ते — **यद्यपीति**। **अनुनासिकः**[16] 'अत्रानु-नासिकः' इति विहितः। वक्ष्यमाणदोषमत्राप्याह — **प्रतिपदेति**। [17]"ऋत इद्धातोः' [18]"उदोष्ठ्य-पूर्वस्य'। आदिना [19]"उरत्' इत्यादिग्रहः। **रपरत्वमिति**। अनेन [20]योऽण् विधीयते तस्यैव रपरत्व-विधानादित्यर्थः। **अणेवेति**। प्रसज्यमानस्यैव रपरत्वे रश्रुतिर्नियामका। पश्चाद्भावे तु न नियमः संभवतीति भावः। भाष्ये [21]**भर्तेति**। ऋकारान्तस्य 'भॄ भृतौ' इत्यस्य [22]प्वादिस्थस्य रूपम्।

[1] आदेशे स्थानि — अ.
[2] निवृत्तावसामर्थ्यात् — म, आ, ऋ.
[3] पा. सू. १. १. ३.
[4] का. वा. १. १. ३ — १६.
[5] नियमत्वासंभवादाह — म.
[6] तत्राप्यण् — अ, इ.
[7] 'पश्चाद्वा' इत्यस्यानन्तरम् 'अपि' इत्यधिकम् — म, आ, इ, ऋ.
[8] स्वप्रवृत्तेः — आ.
[9] पा. सू. ६. १. १९७.
[10] पा. सू. ६. २. ४९.
[11] निघातेनास्यैवानुदात्तत्वादिसंभवात् तस्यैवानुदात्तस्य स्वरितत्वम् — म, आ, ऋ.
[12] पा. सू. ८. ४. ६६.
[13] पा. सू. १. २. २९.
[14] 'पक्षे' इत्यस्यानन्तरम् 'अपि' इत्यधिकम् — म, आ, ऋ.
[15] पा. सू. ६. १. १९७.
[16] पा. सू. ८. ३. २.
[17] पा. सू. ७. १. १००.
[18] पा. सू. ७. १. १०२.
[19] पा. सू. ७.४. ६६.
[20] योऽप्यभिधीयते — अ.
[21] भाष्ये 'कर्ता, हर्ता' इत्यस्य स्थाने 'कर्ता, भर्ता' इत्यन्नंभट्टपाठ इति ज्ञायते।
[22] भ्वादिस्थस्य — आ, ऋ; क्र्यादिस्थस्य — म.

ह्रस्वस्य तु प्रमाणतोऽकारस्यैव संभवात्। [1]'कर्ता' इत्यपि 'कृ विक्षेपे' इत्याद्युपलक्षणम्। 'किम्' इत्यस्य विशेष्यमाह — **कारणमिति**। अनियमेन कदाचिदवर्णस्यापि प्राप्तेः [2]'अवर्णाप्रतिपत्तिः' इति वार्तिकानुपपत्तिः, अत आह — **ततश्चेति**। [3]**तत्र** वार्तिके। पूर्वत्राप्ययं दोषो लगतीत्याह — भाष्ये **पूर्वस्मिन्नपीति**। **स एव** पूर्वपक्ष्येव, सिद्धान्तिनं पृच्छतीत्यर्थः। उक्तदोषपरिहाराय 'अन्य-निवृत्त्यर्थम्' इति वदतो नियमो यद्यभिप्रेत इति 'अथ' इति भाष्यार्थः। [4]'तदेव विशदयति — **नानेनेति**। [5]**'स चेति**। पूर्ववद्वाक्यभेदेनेत्यर्थः। 'सिद्धा' इति भाष्यतात्पर्यमाह — **न चेति**। एतेन 'पूर्वस्मिन् पक्षे' इति भाष्यस्य [6]'गुणवृद्ध्योरनियम इति पक्षे' इति व्याख्या सूचिता। 'पूर्वस्मिन्नपि[7] पक्षे एष दोषः' इत्युक्तस्य तु नोद्धारः, इवर्णोवर्णयोरप्यण्त्वेन 'अणेव' इति नियमेन तन्निवृत्तेरसंभवादिति ध्येयम्। **भवान्** नियमवादी। **विचारयति** विमृशति। **स एव** पक्षाक्षेप-वाद्येव। तमब्ग्रहणसहितस्याप्यवकाशमाह — **झय इति**। **कर्तेति**। ऋवर्णस्य गुणवृद्धिविधौ स्थानेऽन्तरतमपरिभाषा नोपतिष्ठते। ऋवर्णसमुदायस्यान्तरतमगुणवृद्ध्यभावादिति भावः। भाष्ये कार्यकालपक्षाश्रयेण विनिगमकाभाव उक्तः। 'तर्ह्युभयाप्राप्तेरुदात्तादिषु दोषो नास्तीति शङ्कते — भाष्ये [8]**अतः किमिति**। यथोद्देशपक्षेण परिहरति — भाष्ये **अत इति**। तदभिप्रायमाह — **परत्वादिति**। [10]'"कार्यकालपक्षाश्रयणेन[11] भाष्ये विनिगमकाभाव उक्तः, यथोद्देशपक्षाश्रयणेन प्रदीपे 'परत्वात्' इत्युक्तमित्यविरोधः" इति केचित्। तच्चिन्त्यम्, 'अत एषः' इति भाष्योक्तस्यैव परत्वस्य स्पष्टीकरणेन विरोधशङ्कानवकाशात्। ननु वाक्यभेदेन रपरत्वं विधीयमानं सर्वत्र स्यात्, अत आह — **यत्रेति**। **तच्छेषभूतं** नियमशेषभूतम्। आनन्तर्यात् तत्रैव रपरत्वविधानादिति भावः। **विधीति**। ऋवर्णविषयैरित्यर्थः। 'यद्येवम्' इति भाष्येणानुवर्तमानस्थानशब्देन उः[12]स्थानित्वं लभ्यते, न तु प्रसज्यमानत्वेनादेशः, एकस्योभयविशेषणत्वासंभवादित्युक्तम्, तदयुक्तम्, [13]'षष्ठी स्थानेयोगा' इत्यनेन उः स्थानित्वलाभेनानुवर्तमानस्यादेश[14]विशेषणत्वोपपत्तेः, अत आह — **न हीति**। **तत्र** 'उरण्रपरः' इत्यत्रानुवादे। 'उः स्थाने य आदेशः सोऽणेव' इति नियमे 'उः' इत्यनुवाद्यत्वात्। अनुवादे परिभाषानुपस्थाने लिङ्गमाह — **तथा चेति**। आत इति षष्ठ्यैव 'स्थाने' इति लब्धे स्थानग्रहणमनुवादे तदनुपस्थानं ज्ञापयतीत्यर्थः। परिभाषानुपस्थानेऽनुवर्तमानस्थानग्रहणस्यादेश-विशेषणत्वे 'उः' इत्यस्याविशेषणादतिप्रसङ्गः स्यादित्याह — **तत इति**। तथा च 'कुम्मकार ऋषभीयति' इत्यत्रापि रपरत्वप्रसङ्ग इति भावः। 'आदेशोऽविशेषितो भवति' इति भाष्यं [15]प्रतीकत आदाय व्याचष्टे — **आदेश इति**। अनुवर्तमानस्थानशब्दस्यादेश[16]विशेषणत्वेन प्रसज्यमा-नत्वलाभेऽप्युःस्थानिकत्वेनाविशेषितो भवतीत्येवं व्याचष्टे — **अथवेति**। 'अण् प्रसज्यमानः'

---

[1] हर्तेत्यपि — अ, ऋ.
[2] अवर्णाप्रतिपत्तेरिति — म, आ, ऋ.
[3] एतेन प्रदीपे 'ततश्चावर्णस्यैव' इत्यत्र 'ततश्च तत्रावर्णस्यैव' इत्यन्नंभट्टपाठ इति प्रतीयते।
[4] एतदेव — अ, इ, ऋ.
[5] न चेति — अ.
[6] गुणवृद्ध्योरनियमपक्ष इति — अ, इ, ऋ.
[7] अपिशब्दो नास्ति — म.
[8] तर्ह्युभयप्राप्तेः — अ, ऋ.
[9] ततः किमिति — अ.
[10] विवरणोक्तिमनूद्य दूषयति — कार्यकालेत्या-दिना।
[11] पक्षाश्रयेण — ऋ.
[12] स्थानत्वं — अ, इ.
[13] पा. सू. १. १. ४९.
[14] विशेषणत्वोपपत्तिः — अ; विशेषणत्वेनोप-पत्तेः — ऋ.
[15] प्रतीकतयादाय — म, आ.
[16] विशेषणत्वे प्रसज्यमानत्व — म, आ.

इति भाष्यानुसारादाह — **तच्चेति** । 'प्रसज्यमानः' इति भाष्यं तात्पर्यकथनपरं नाक्षरार्थपरमित्याशयेनाह — **अथवेति**। अस्मिन् कल्पे प्रागुक्तदोषद्वयं नास्तीत्याह — **इदानीमिति**। अत्राकारादीनां परस्परविकल्पस्याष्टदोषदुष्टस्य प्रसङ्गान्नान्यबाधकोऽण्विधिः, नापि नियमः, प्रत्याहारग्रहणवैयर्थ्यात् । [1]गुणवृद्ध्योरेवानण्प्रसङ्गादकारग्रहणमात्रेण तन्निवृत्तेः । नापि विहितस्य रपरत्वम्, गुणवृद्ध्योरवर्णाप्रतिपत्तेरनुद्धारात् । तस्माच्चतुर्थ एव पक्षः स्थितः ॥

[१, ३७८–३८१]

(**रत्नप्रकाशः**) एकस्थानेग्रहणानुवृत्त्या संभवन्तावर्थौ दूषयित्वा द्वितीयमपि स्थानेग्रहणमनुवर्त्य तृतीयमर्थं व्यवस्थापयितुं प्रश्नमुत्थापयति — **किमिति** । एतेन 'षष्ठीप्रकरणाद्यत्र षष्ठी तत्रेदमुपतिष्ठते । तत्र किमादेशान्तराणां बाधकमणं [2]निर्वर्तयति, तस्य च वाक्यभेदेन रपरत्वम्, आहोस्विद्रपरत्वमात्रमनेन क्रियते — उः स्थाने लक्षणान्तरेण निष्पन्नो योऽण् स रपर इति प्रश्नः' इति कैयटो निरस्तः । यत्र यत्र षष्ठी तत्र तत्रास्योपस्थितौ [3]'तोर्लि' इत्यादावस्योपस्थितौ 'धातृलता' इत्यादौ 'धातर्लता' इत्याद्यापत्तेः । तथा च 'अन्यनिवृत्त्यर्थम् — उः स्थानेऽणेव भवति रपरश्च' इति भाष्येण विरोधस्यापि स्पष्टत्वात् । अत्रैव स्थानेग्रहणानुवृत्त्यार्थद्वयसंभवेन क्लिष्टव्याख्यानानौचित्याच्च । यदप्युक्तं तेनैव 'तत्र केषांचित् पाठः — अण् भवति, रपरश्च, इति । तत्रापूर्वोऽण् विधीयमान आदेशान्तराणां बाधकः । अन्येषां पाठः — अणेव भवतीति । तत्र सामर्थ्यादन्यनिवृत्तिः । सा चैवकारेण प्रदर्श्यते' इति । तदपि न, 'अन्यनिवृत्त्यर्थम्' इत्यस्याभिनयरूपत्वेन 'उः स्थानेऽणेव भवति' इत्येवकारसहितपाठस्यैव प्रामाणिकत्वेन पाठान्तरकल्पनाया-[4]स्तत्साम्यतयैवकारसहितपाठनस्य चायुक्तत्वात् । तन्मूलभूतादेशान्तरबाधकाण्विधायकतायां दूषितत्वाच्च । **उदात्तादिषु दोष इति** । [5]'स्थानेऽन्तरतमः' इत्यस्य परेणानेन बाधादिति भावः । एतेन 'अन्तरतमस्य बाधकोऽण् प्रसज्यत इति भावः । स तूदात्तादिगुणो भवति न वेति सर्वथा दोषः' इति कैयटो निरस्तः । बाधकाण्विधिपक्षस्य निरस्तत्वेनोदात्तादेरेवाणः प्रसक्तत्वात् । **नॄँः पाहीति** । [6]'अत्रानुनासिकः' इति जायमानोऽनुनासिकोऽणेव स्यादिति भावः । एतेन "यद्यप्यस्मिन् पक्षे पूर्वसवर्ण ॠकारो न लभ्यते, तथापि [7]'नॄन् पे' इति निपातनाद् भवति" इति कैयटो निरस्तः । तदभिमतबाधकाण्विधिपरतायां निरस्तत्वेन यथाश्रुतनियमपरभाष्यानुसारेणात्र पूर्वसवर्णदीर्घस्य रश्रुतेरेव न्याय्यत्वात् । "नॄन् पे' इत्यत्र पूर्वसवर्णदीर्घनिपातनकल्पनापेक्षया तत्स्वारस्येन प्रकृतभाष्यस्य नियमपरताश्रयणस्यैवौचित्याच्च । **अवर्णाप्रतिपत्तिरिति** । अवर्ण एवेति नियमो न स्यादिति भावः । इदं चाचां विवृत एवाभ्यन्तरयत्न इत्यपाणिनिमतानुसारेण ज्ञेयम् । पाणिनिमतेऽकारस्यैवाभ्यन्तरयत्नसाम्येन सिद्धेः । ननु [9]'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इतिवत् [10]'तत्राभ्यान्तरयत्नत आन्तर्यं बलीय इत्यत्र किंमानमिति चेन्न, आभ्यन्तरयत्नस्य तत्त्वादेवान्तरङ्गत्वेनान्तरङ्गस्य बलीयस्त्वस्य लोकसिद्धताया भगवतैवोक्तत्वात् । **किं हि साधीय**

---

[1] गुणवृद्ध्योरेवानणां प्रसङ्गात् — म, आ; गुणवृद्ध्योरेवाण्प्रसङ्गात् — इ.
[2] निवर्तयति — ब.
[3] पा. सू. ८. ४. ६०.
[4] 'तत्साम्येन' इत्युचितं भाति ।
[5] पा. सू. १. १. ५०.
[6] पा. सू. ८. ३. २.
[7] पा. सू. ८. ३. १०.
[8] पा. सू. ८. ३. १०.
[9] महाभाष्यम् १. १. ५०.
[10] अनेकविधान्तर्यवत्स्थल इत्यर्थः ।

इति। 'किम्' इति काकूक्तिसूचितनिषेधेन खल्वर्थस्य हेरन्वयः। तेन [1]'ऋवर्णस्यासवर्णे प्रसक्ते तत्रावर्णं स्यात्, न त्वेङैचौ' इति यत् तत् साधीयो न खलु, इत्यर्थलाभः। एतेन 'किं साधुतरं कारणमित्यर्थः' इति कैयटो निरस्तः। कारणशब्दाध्याहारेण क्लिष्टतया व्याख्याने मानप्रयोजनयोरभावात्। **पूर्वस्मिन्नपि पक्ष एष दोष इति**। पूर्वस्मिन् पक्षे **एषोऽपि** एतत्सजातीयो [2]दोषोऽप्यस्तीत्यर्थः। पूर्वम् 'उदात्तादिषु दोषः' इत्यनेन ऋवर्णस्योदात्तादय ऋवर्णात्मका न स्युरित्युक्तम्। [3]इदानीमकारेकारोकारा अपि विनिगमनाविरहात् पर्यायेण स्युः, [4]न त्वकारमात्रमिति दूषणयोर्भेदः। ननु द्वितीयपक्षे यो दोष उक्तो 'गुणवृद्ध्योरवर्णाप्रतिपत्तिः' स दोषः पूर्वस्मिन् पक्षे नास्त्येव। परं तु 'उदात्तादिषु दोषः' इत्येक एव दोषो द्वेधोपपादितः — ऋवर्ण इष्टो न स्यात्, अणस्त्रयोऽपि पर्यायेण स्युः, इति। स च [5]दोषः स्थानेऽन्तरतमसूत्रेण ऋकारप्रसङ्गे [6]ऋकार एवोदात्तादिरूपो भवतीति बोधिते ततोऽणनण्प्रसङ्गाभावेन 'अणेव' इति नियमस्य तदधीनरपरत्वस्य चाप्रवृत्तेरप्रसक्त एवेत्याशयवन्तं प्रत्याह — **अथ मतमेतदिति**। यद्येवं मन्यस इत्यर्थः। 'अणेव भवति, रपरश्च' इति पूर्वस्मिन् पक्षेऽवर्णस्य प्रतिपत्तिः सिद्धेत्यन्वयः। **यत्तु तदुक्तमिति**। किं तु यदुक्तम् 'उदात्तादिषु दोषः' इति तदिह दोषो जायते न वेतीत्यर्थः। तदेवं पराभिमतमनूद्य दोषं प्रतिजानीते — **जायते स दोष इति**। जायत एवेत्यर्थः। एतेन 'स एव पक्षाक्षेपवाद्याह — नानेनान्येषां बाधकोऽपूर्वोऽण् विधीयते। किं त्वणनण्प्रसङ्गेऽणेव भवतीति नियमः क्रियते, स च रपरः। न च गुणवृद्धिप्रसङ्गे इकारोकारप्रवृत्तिः' इति कैयटो निरस्तः। 'उः स्थानेऽणश्चानणश्च प्रसङ्गेऽणेव भवति' इति भाष्यस्य 'अन्यनिवृत्त्यर्थम् — उः स्थानेऽणेव' इति प्रागुक्तवचनविवरणरूपतयैवोपपत्तौ तयोर्मतभेदपरतयोपपादने मानप्रयोजनयोरभावात्। [7]'विधिनियमसंभवे विधिरेव ज्यायान्' इति परिभाषया [8]'वाक्यभेदाश्रयणेन विधिपरत्वसंभवे नियमपरत्वाश्रयणासंभवस्यैव वक्तुमुचितत्वमिति विधिपक्षोट्टङ्कनोत्तरं नियमपक्षोट्टङ्कनानौचित्यात्। एतदाशयेनैव नियमपक्षमुट्टङ्क्य तत एकवाक्यतया रपरत्वमात्रविधिपक्षस्योट्टङ्कितत्वाच्च। **सावकाशयोरिति**। [9]'स्थानेऽन्तरतमः' इति परिभाषा [10]'अकः सवर्णे दीर्घः' [11]'झयो होऽन्यतरस्याम्' इत्यादिसूत्रविहितव्यवस्थापनेन सावकाशा। 'उरण् रपरः' इति गुणवृद्धिव्यवस्थापनेनेति भावः। **दोषो जायत इति**। परत्वात् प्रकृतपरिभाषायाः। ननु परशब्द इष्टवाचक इत्याश्रयणात् स्थानेऽन्तरतमपरिभाषयैव व्यवस्था भविष्यतीत्यस्वरसादाह — **ये चाप्येत इति**। **न प्राप्नोतीति**। नियमविषय एव तत्प्रवृत्तेरिति भावः। उपलक्षणमिदं दूषणं [12]'विधिनियमसंभवे विधिरेव ज्यायान्' इति नियमपक्ष एव न संभवतीत्यस्य। तदेवमत्यन्तदुष्टं नियमपक्षं स्वराणां विवृत एवाभ्यन्तरो यत्न इति मते दुष्टं द्वितीयपक्षं चोपेक्ष्य पक्षान्तरं परिगृह्णाति — **सिद्धं त्विति**। **किं वक्तव्यमेतदिति**। स्थानेग्रहणानुवृत्तिमजानतः प्रश्नः। एतेन **'सिद्धं त्विति**। विधिवाक्यैरस्यैकवाक्यतायां विधानकाल एवाणो रपरत्वं क्रियत इत्यर्थः' इति कैयटो निरस्तः। विधिवाक्यैरस्यैकवाक्यतासंभवात्[13]। स्थानेग्रहणद्वयानुवृत्त्या समाधानपर-

---

[1] ऋवर्णस्यावर्णे — ब.
[2] दोषो नास्तीत्यर्थः — ब.
[3] इदानीमृकारेकारोकाराः — ब.
[4] न त्वृकारमात्रमिति — ब.
[5] अप्रसक्त एवेत्यनेनान्वयोऽस्य।
[6] ऋकार एवोदात्तादि — ब.
[7] परिभाषा १०९.
[8] 'वाक्यभेदाश्रयणेन' इत्यस्य 'नियमपरत्वाश्रयण' इत्यनेनान्वयो बोध्यः।
[9] पा. सू. १. १. ५०.
[10] पा. सू. ६. १. १०१.
[11] पा. सू. ८. ४. ६२.
[12] परिभाषा १०९.
[13] असंभवादिति छेदः।

प्रकृतभाष्यविरोधाच्च। **यद्येवमिति**। एवमपीत्यर्थः। **आदेशोऽविशेषित इति**। [1]'उदीचामातः स्थाने' इति स्थानग्रहणेनानुवाद्यविशेषणसमर्पकात् षष्ठ्याः स्थानेयोगत्वावस्थित्यभावस्य सूचितत्वेन 'उः' इति षष्ठ्याः स्थानेयोगत्वव्यवस्थापनेनानुवृत्तस्य स्थानेग्रहणस्योपक्षीणत्वादिति भावः। **आदेशश्च विशेषित इति**। द्वितीयं स्थानेग्रहणमनुवर्त्य [2]'उः स्थानेऽण् स्थाने सत्येव रपरः' इति व्याख्यानादिति भावः॥

[१, ३७८–३८१]

(**नारायणीयम्**) इह स्वातन्त्र्याशङ्काभावे निमित्तमाह — **षष्ठीति**। नियमतयान्यनिवर्तकत्वं न विवक्षितम्, तस्य पक्षस्योपरिष्टाद्वक्ष्यमाणत्वात्। किं तु विधित्वेऽपीतरबाधकत्वमित्याह — **तत्रेति**। ननु रपरत्वविधिपरत्वादस्य कथमन्यापवादत्वेनाण्विधानमित्याशङ्क्य वाक्यभेदेनोभयविधानमित्याह — **तस्येति**। अयमर्थः — स्वातन्त्र्ये लोके ऋकाराप्रयोगापत्तेः षष्ठीनिर्देशेष्वस्योपस्थानम्, उपस्थितस्य च यदि गुणादिवाक्येनैकवाक्यत्वं तदा स्थान्यन्तरस्यादेशान्तराप्रसङ्गः, अतो भिन्नवाक्यत्वम्। ततश्च तत्तद्विध्यपवादत्वेन विध्यन्तरमिदमिति। सार्वधातुकार्धधातुकयोरिको गुणो भवति, ऋकारस्य त्वणिति वाक्यार्थः। एवमन्यत्रापि। ततश्चोदात्तादिप्रदेशेष्वण् ऋकारस्य प्राप्नोतीति। उभयोरपि विधिविभक्तिनिर्देशे कथं रपरत्वमात्रस्य विधिर्नाण इत्याशङ्क्यापूर्वार्थगोचरत्वाद्विधेरणोऽन्यतो [3]लाभादपूर्वत्वाभावादुभयविधौ वाक्यभेदप्रसङ्गाच्च युक्तो रपरत्वमात्रविधिरित्याशयवानाह — **आहोस्विदिति**। नियमरूपतयान्यनिवृत्तिर्न विवक्षिता चेदेवकाररहित एव पाठः समीचीनो न तत्सहित इत्याशङ्क्य पाठद्वयमपि समर्थयते — **तत्रेति**। यद्वा, अन्यनिवृत्तिमुपक्रम्यावधारणहीनः पाठो न शोभत इत्याशङ्क्याह — **तत्रेति**। यदि तर्ह्यवधारणमन्तरेणापि निवृत्तिविवक्षा क्वचिदेवकारपाठोऽयुक्तः, तत्राह — **अन्येषां त्विति**। ननु पूर्वविप्रतिषेधादन्तरतमनिर्वृत्तिर्भविष्यति, तत्राह — **अन्तरेति**। नाप्राप्तिन्यायसत्त्वादपवादस्यान्तरतमपरिभाषां प्रति न विप्रतिषेधोपपत्तिरित्यर्थः। नन्वन्तरतमोदात्ताद्यपवादत्वेनाण् निर्वर्त्यमानः किमुदात्तगुणक उत नेति पृच्छन्तं प्रति किं तवैतद्विचारेण, अभिमतसाधकं नेत्याह — [4]**स त्विति**। यदि संनिधानादुदात्तग्रहणस्य संबन्धस्तदा प्रथमकोट्युपपत्तिः। अथ संनिहितवाक्यार्थबाधकत्वादुरण्विधानस्य तस्यासंबन्धस्तदा द्वितीयकोट्युपपत्तिः। उत्तरकोटिरुपपन्नतरा। तथा वक्ष्यति [5]'न पुनरिवर्णोवर्णे' इति। अस्मिन् पक्षे दोषान्तरमाह — **प्रतिपदेति**। अनुवादसामर्थ्यादवर्णसिद्धिमाशङ्क्याह — **भूतस्य चेदिति**। गुणवृद्धिविधेरन्यत्रैतत्परिभाषोपस्थानोपपत्तेस्तद्विधावपि कदाचिदणोऽपि लाभात् सामर्थ्यासिद्धिः। विशेष्यं निर्दिशति — **किमिति**। विनिगमनाविरहमात्रं चेत् अवर्णाप्रतिपत्तिकीर्तनं वार्तिके कथम्, अत आह — **ततश्चेति**। गुणवृद्धिविधाविवर्णोवर्णप्रसङ्गेन प्रथमपक्ष आक्षिप्ते 'अथ' इत्यनेन शाखाचङ्क्रमणन्यायादन्यनिवृत्तिवादी नियमरूपं वाक्यार्थं दर्शयतीति भाति, तदयुक्तम्, आनुषङ्गिकदोषनिस्तारेऽप्यन्यनिवृत्तिपक्षे प्रातिस्विकतयोक्तदोषस्यानिस्तारात्। किं चान्यनिवृत्तिवादिग्रन्थत्वे 'यत्तु' इति विमर्श आक्षेपवादिनः, 'जायते' इति ग्रन्थश्चान्यनिवृत्तिवादिन इति व्याख्येयम्। तत्त्वयुक्तम्, स्वपक्षे स्वेनैव दोषाभिधानायोगात्। तस्मादाक्षेप्तैव संभाव्य-

---

[1] पा. सू. ७. ३. ४६.
[2] उः स्थानेऽण्स्वस्थाने — ब.
[3] लाभादपूर्वत्वालाभात् — क.
[4] प्रदीपे 'स चोदात्तादिगुणः' इत्यत्र 'स तूदात्तादिगुणः' इति पाठो निर्णयसागरमुद्रिते वर्तते।
[5] भाष्ये 'न पुनरिवर्णोवर्णौ' इत्यत्र 'न पुनरिवर्णोवर्णे' इति पाठोऽभिमत इति भाति।

पक्षान्तरदूषणं च विमर्शपूर्वकं तत्र दर्शयतीत्याह — **स एवेत्यारभ्य गृह्णातीत्यन्तेन**। विनिगमनाविरहपरं भाष्यं न भवति, किं तु निर्धारणहेतुकीर्तनात् तत्परमिति दर्शयन्निर्धारणहेतुमुपपादयति — **अन्तरतमेति**। तेषामप्यूवर्णस्थानिकाण्त्वाद्रपरत्वं कस्मान्नेत्यत्राह — **यत्र हीति**। कथं पुनरुदात्तादिषु दोषस्यास्मिन् पक्षे परिहार इत्यत्राह — [1]**रपरत्वमात्रमिति**। अणोऽविधानान्नान्तरतमबाधकत्वमित्यर्थः। यद्येवं विहिताणनुवादेन रपरत्वं विधेयमिति कथं प्रसङ्गे रपरत्वलाभ इत्याशङ्क्य स्थानग्रहणानुवृत्तिसामर्थ्याद्विधीयमानोऽणित्यनुवाद इत्याह — **विधानेति**। एतद्वाक्यनिरपेक्षतया तत्तद्वाक्येनाणि निर्वृत्ते कथं विधीयमानत्वेनानुवादः सुशकः, तत्राह — **विधीति**। नन्वेकवाक्यत्वे स्थान्यन्तराणामादेशान्तरं न स्यादिति दोषः। [2]'एच इक्' इत्यत्र समाधिरुक्त इति न विस्तीर्यते। विशिष्टस्थानिकतया विशेषणादविशेषितत्वं कथम्, अत आह — **प्रसज्यमानत्वेनेति**। ननु [3]'षष्ठी स्थानेयोगा' इति परिभाषया स्थान इत्यस्यार्थस्य लाभात् स्थानग्रहणं प्रसज्यमानत्वेनादेशं विशेषयितुमेवेत्यत आह — **न हीति**। न्यायप्राप्ते लिङ्गमप्याह — **तथा चेति**। ननु भाष्ये प्रसङ्गे रपरार्थत्वे स्थानग्रहणस्य 'आदेशोऽविशेषितः' इत्युच्यते, 'यद्येवम्' इत्युत्थानात्। ततश्चास्मिन् व्याख्याने [4]'भाष्यासांगत्यमित्याशङ्क्य 'यद्येवम्' इत्यस्य यद्यप्येवमर्थमित्यभिप्रेत्याह — **तत इति**। यद्यपि स्थानग्रहणमनुवर्तते, तथापि तदन्यार्थमिति प्रसज्यमानत्वविशेषणं न लभ्यत इत्यर्थः। 'आदेशोऽविशेषितः' इत्यस्य स्वारस्यभङ्गभिया 'यद्येवम्' इत्येतत् स्वरसतया योजयन्नाह — **अथवेति**। आदेश इत्यत्रेतिर्द्रष्टव्यः। आदेश इति विशेषो न लभ्यत इति यावत्। पदशस्तदलाभेऽपि लभ्यतेऽर्थादित्याशङ्क्य संभवि संबन्धान्तरमस्येति चोद्यमेतन्निरस्यते — **ततश्चेति**। **प्रथमान्तमिति**। कर्मणि ल्युडन्तमिति भावः। **अस्तीति**। प्रतिपदविहितेत्वादिषु च रपरत्वं सिद्धमित्यपि द्रष्टव्यम्॥

[१, ३८२–३८५]

(**लघुविवरणम्**) पैतृष्वसेय इत्यत्र [5]'ढकि लोपः' इति वचनाड्ढक्, लोपश्च। ननु 'यद्यत्र लोपो रपरः स्यात् [6]तदा असति लोपे यणादेशे [7]च यदेव रूपं तदेव लोपेऽपीति लोपविधानमनर्थकं स्यादित्यत आह — **लोपेति**। **उद्भूतेति**। अत एव द्विवचननिर्देशः। ननु व्यपदेशिवद्भावेन ऋवर्णान्तत्वाभावेऽपि "आद्यन्तवदेकस्मिन्' इत्यनेन[8] भविष्यतीत्यत आह — **न चेहेति**। अर्थात् साक्षाद्वा विशेषणेन समानविभक्त्यन्तं विशेष्यं यत्रोपादीयते तत्र [10]'येन विधिः' इति तदन्तविधिः, न चेह तथेति भावः। इह तदन्तविध्यभावेऽपि यदि [11]प्रदेशेषु [12]ऋवर्णान्तस्याण्स्थानित्वं स्यात् तर्हि तदनुरोधेनानुवादेऽप्येकदेशद्वारा ऋवर्णान्तं [13]गृह्येत, तदपि नास्तीत्याह — **न चेति**। **अकङादे-**

---

[1] प्रदीपे 'रपरत्वं क्रियत इत्यर्थः' इत्यत्र 'रपरत्वमात्रं क्रियत इत्यर्थः' इति पाठोऽभिमत इति भाति।

[2] पा. सू. १. १. ४८.

[3] पा. सू. १. १. ४९.

[4] भाष्यासाङ्गत्यमाशङ्क्य — क.

[5] पा. सू. ४. १. १३३.

[6] तथासति — त.

[7] चकारो नास्ति — ड, ढ.

[8] पा. सू. १. १. २१.

[9] 'अनेन' इति नास्ति — ड, ढ.

[10] पा. सू. १. १. ७२.

[11] प्रदेशे — त.

[12] ऋवर्णान्तस्यैवाण्स्थानित्वं — ढ, त.

[13] गृह्यते — ड.

स्त्विति। न चावयवानामादेशत्वे किंचिल्लिङ्गमस्तीत्यर्थः। कर्मधारये निमित्तशब्दस्य वैयर्थ्यमभिप्रेत्य बहुव्रीहिं दर्शयति — **एकादेशेति** ॥

[१, ३८२–३८५]

(**विवरणम्**) [1]ननु वार्तिकोक्तविधिविशेषस्य ज्ञातत्वात् तस्य चोपलक्षणत्वे प्रमाणाभावात् 'के पुनः' इति प्रश्नानुपपत्तिमाशङ्क्याह — [2]**रीरिविधिष्विति**। सौधातकिरित्यत्र [3]"सुधातुरकङ् च' इतीञ्। पैतृष्वसेय इत्यत्र [4]"ढकि लोपः' इति [5]ढकि लोपविधानाड्ढक्। नन्वत्र लोपो रपरश्चेदसति लोपे यणादेशे च यद्रूपं तदेव रूपमिति लोपवैयर्थ्यप्रसङ्ग इत्यत आह — **लोपेति**। रपरत्वाभिधानमुखेन सर्वादेशत्वं लोपस्याभिधित्सितम्, न [6]तु रपरत्वं विवक्षितम्। [7]तेनैतन्न चोदनीयम् — यदि सर्वादेशो लोपः, तत उः स्थाने न भवतीति कथं रपरः स्यादिति। [8]"आनङृतो द्वन्द्वे' [9]"ऋदुशनः' [10]"रीङृतः' [11]"रिङ शयक्' इत्यानङादीनां भाष्योदाहृतानां [12]विधिवाक्यानि। **समुदायस्येति**। इतरेतरयोगे [13]ह्ययं द्वन्द्वः, इतरेतरयोगश्च समुदाय इति भावः। **उद्भूतेति**। अत एव द्विवचननिर्देशः। समुदायस्य नार्थान्तरत्वमित्याह — **अवयवाविति**। अगृहीताभिप्रायस्य 'अवयवग्रहणादिति चेत्' इति चोद्यमिति द्रष्टव्यम्। ननु 'उः' इत्येतावता कथमूवर्णान्तस्येति शक्यते विज्ञातुमित्यत आह — **वर्णग्रहणादिति**। नन्विकाङ्गे विशेष्यमाणे तदन्तविधेर्ऋवर्णान्तस्य गुणेन भाव्यमित्यत आह — **अङ्गस्येति षष्ठीति**। ननु ऋवर्ण ऋवर्णान्तः, [14]"आद्यन्तवदेकस्मिन्' इति व्यपदेशिवद्भावादित्यत आह — **न चेति**। यत्र हि साक्षादर्थाद्वा विशेषणेन समानविभक्त्यन्तं विशेष्यमुपादीयते तत्र [15]"वर्णग्रहणं सर्वत्र' इति तदन्तविधिः, न चेह तथेति भावः। **भूतानुवादादिति**। समानविभक्त्यन्तविशेष्यरहितभूतानुवादादित्यर्थः। इह तदन्तविध्यभावेऽपि यदि प्रदेशेषु ऋवर्णान्तस्य षष्ठीनिर्देशेन स्थानित्वं स्यात्, ततस्तदनुरोधेनानुवादेऽप्येकदेशद्वारा ऋवर्णान्तं गृह्येत, [16]तदपि नास्तीत्याह — **न चेति**। भाष्ये चस्त्वर्थः। [17]औपसंख्यानिकस्य रपरत्वस्य प्रतिषेध इत्याह — **उपेति**। समुदाय आनुषङ्गिकः, स्थानिनौ तु द्वावित्यत्र गमकमाह — **अत एवेति**। 'षष्ठीनिर्दिष्टयोः' इत्यत्र नायं[18] दृष्टान्तः, किं तूभयसंबन्धिनोऽन्यतरेण व्यपदेश[19] इत्येतावन्मात्र इत्याह — **एक इति**। **समुदायस्येति**। प्रत्येकमवयवानामादेशत्वे प्रमाणाभावादित्यर्थः। सलोपे कर्तव्ये रुत्वस्यासिद्धत्वाद् [20]भाष्ये सलोप उक्तः। **अकारोऽपीति**। यथा तव सकार इति भावः। **उत्वे**

---

[1] अत्र 'ननु' इति न सुन्दरं भाति।
[2] 'रीरिविधिष्विति बहुवचन' इति प्रदीपे विशिष्टमेकवाक्यतयाभिमतम्। 'रीरिविधिष्विति।' इति प्रतीकतया मुद्रणं दृश्यते।
[3] पा. सू. ४. १. ९७.
[4] पा. सू. ४. १. १३३.
[5] 'ढकि' इति नास्ति — अ.
[6] तुशब्दो नास्ति — अ.
[7] तेनैवं न — अ.
[8] पा. सू. ६. ३. २५.
[9] पा. सू. ७. १. ९ ४.
[10] पा. सू. ७. ४. २७.
[11] पा. सू. ७. ४. २८.
[12] 'विधि' इति नास्ति — अ.
[13] त्वयं — अ.
[14] पा. सू. १. १. २१.
[15] का. वा. १. १. ७२–२७.
[16] ततश्च नास्तीत्याह — अ.
[17] 'औपसंख्यानिकस्य' इत्यस्यानन्तरं चकारोऽधिकः — च, छ, ट.
[18] 'अयम्' इति नास्ति — च, छ, ट.
[19] अन्यतरेणाद्यन्तव्यपदेशः — अ.
[20] आदौ सलोपः — अ.

चेति। दृष्टान्तवैषम्यमत्र। निमित्तशब्दार्थवत्त्वाय बहुव्रीहिं लक्षणां च दर्शयति — **एकादेशेति** ॥

[१, ३८२–३८५]

(**उद्द्योतनम्**) ननु वार्तिके विशेषस्यैव प्रतीतेस्तस्योपलक्षणत्वायोगात् 'के पुनः' इति प्रश्नायोगः, अत आह — **बहुवचनेति**। **सौधातकिरिति** भाष्ये। [1]'सुधातुरकङ् च' इतीञ्,[2] अकङादेशश्च। **पैतृष्वसेय इति**। [3]'ढकि लोपः' इति लोपविधानाड्ढक्। ननु लोपस्य रपरत्वे लोपाभावे [4]यणादेशे यद्रूपं तदेव रूपमिति लोपविधिवैयर्थ्यप्रसङ्गः, अत आह — **लोपेति**। **सर्वेति**। वैयर्थ्यपरिहारायालोऽन्त्यपरिभाषां बाधित्वा सर्वादेश एव स्यादित्यर्थः। अत्र रपरत्वाभिधानमुखेन सर्वादेशत्वमेव विवक्षितम्, न तु[5] रपरत्वम्। तेन यदि सर्वादेशो लोपस्तदा उः स्थाने न भवतीति कथं रपरः स्यादिति न शङ्कनीयम्। समुदायस्थानिकत्वेऽप्युःस्थानिकत्वमप्यस्तीति रपरत्वप्रसङ्गोऽपि वा। 'होता' इत्यादौ रेफस्य [6]श्रवणं नापाद्यम्, किं तु नकारस्येत्याह — **रेफस्येति**। [7]'आनड्ऋतो द्वन्द्वे' [8]'ऋदुशनस्पुरुदंसोऽनेहसां च' [9]'रीङृतः' [10]'रिङ शयग्लिङषु' इत्यानङादीनां विधयः। **समुदायस्येति**। इतरेतरयोगेऽयं द्वन्द्वः, स च समुदायरूप इति भावः। [11]'समुदायस्य ऋवर्णत्वाभावात् कथमवयवस्य स्थानित्वम्, अत आह — **पूर्वेति**। **उद्भूतेति**। विवक्षितेति यावत्। अत एव द्विवचनमिति भावः। समुदायश्च न समुदायिभिन्न इत्याह — **अवयवाविति**। अगृहीताभिप्रायस्य 'अवयवग्रहणादिति चेत्' इति चोद्यम्। तस्यार्थमाह — **आनङीति**। चोद्यस्य 'एकादेश उपसंख्यानम्' इत्यत्रैव पर्यवसानमाह — **तस्मादिति**। ननु 'उः' इत्यत्र ऋवर्णान्तस्येति[12] कथं लाभः, अत आह — **वर्णग्रहणं चेति**। नन्विकाङ्गे विशेष्यमाणे तदन्तविधेर्ऋवर्णान्तस्य गुणेन भाव्यम्, अत आह — **अङ्गस्येति**। ननु ऋवर्णस्यापि ऋवर्णान्तत्वमन्तवद्भावेन[13] स्यात्, अत आह — **न चेति**। [14]न केवलमव्याप्तिर्दोषः, किं तु मूले कुठारं निदधाति — **न चेति**। अनुवादे [15]'आद्यन्तवत्' इति परिभाषानुपस्थानादित्यर्थः। [16]यत्र साक्षादर्थाद्वा समानविभक्त्यन्तं विशेष्यमुपादीयते तत्रैव वर्णग्रहणे तदन्तविधिः, न चेह तथेति न तदन्तविधिरित्यप्याहुः। नन्विह तदन्तविध्यभावेऽपि प्रदेशेषु ऋवर्णान्तस्य षष्ठीनिर्देशेन स्थानित्वं स्यात्, [17]तदनुरोधेनानुवादेऽपि ऋवर्णान्तं गृह्येत, अत आह — **न चेति**। [18]अर्थवता व्यपदेशिवद्भावमुदाहरति — **यथेति**। तदुपपादयति — **अर्थस्येति**। एकोऽच् यस्येति बहुव्रीहिः। तत्रेकारमात्रस्य भेदाभावेनान्यपदार्थत्वासंभवादर्थसहितो धातुरन्यपदार्थः। तदेकदेशो धातुरिति व्यपदेशिवद्भाव इत्यर्थः। एकादेशस्योपसंख्यानपक्षे प्रतिषेधोऽपि

---

[1] पा. सू. ४. १. ९७.
[2] 'इञ्' इति नास्ति — म, आ.
[3] पा. सू. ४. १. १३३.
[4] 'यणादेशे' इति नास्ति — म, आ.
[5] तुशब्दो नास्ति — म, आ.
[6] ग्रहणं — अ.
[7] पा. सू. ६. ३. २५.
[8] पा. सू. ७. १. ९४.
[9] पा. सू. ७. ४. २७.
[10] पा. सू. ७. ४. २८.
[11] समुदाय ऋवर्णत्वाभावात् — अ.
[12] इतिशब्दो नास्ति — अ.
[13] आद्यन्तवदित्यनेनेति भावः।
[14] 'न केवलम्' इत्यादि 'न चेति' इत्यन्तं नास्ति —अ, आ, ऋ.
[15] पा. सू. १. १. २१.
[16] विवरणोक्तिमाह — यत्रेत्यादिना।
[17] तदनुरोधिनानुवादेऽपि — अ.
[18] अर्थवतो व्यपदेशि — अ.

वक्तव्यः, [1]नान्यदेत्याह — **उपसंख्यानस्येति**। भाष्ये **इह चेति**। चस्त्वर्थः। प्रतिषेधाभावेऽनिष्टमाह — **रपरत्व इति**। समुदाय आनुषङ्गिकः, द्वयोरेव स्थानित्वमित्यत्र नियामकमाह — **अत एवेति**। 'षष्ठीनिर्दिष्टयोः' इत्यत्र न दृष्टान्तः, किं तूभयसंबन्धिनोऽन्यतरेण व्यपदेशमात्र इत्याह — **एक इति**। **समुदायस्येति**। प्रत्येक[2]वर्णानामादेशत्वममानकमिति भावः। ननु [3]ङसोऽकारादेशस्योकारस्य प्रत्ययादेशत्वात् [4]'अप्रत्ययस्य' इति प्रतिषेधः स्यात्, अत आह — **असिति**। **अकारोऽपीति**। यथा तव सकार इति भावः। नन्वकारादेशस्योकारस्य प्रत्ययत्वात् [5]'लुप्यतेऽत्र प्रत्ययः' इत्ययुक्तम्, अत आह — **सकारेति**। **तस्याः** प्रत्ययसंज्ञायाः। **तां** प्रत्ययसंज्ञाम्। सकारस्य तु प्रत्ययत्वं संभवतीत्याह — **उत्वे चेति**। **स च लुप्त इति**। [6]'रात्सस्य' इत्यनेन एवं च सलोपे कर्तव्ये रुत्वस्यासिद्धत्वान्न 'मातूः' इति रूपप्रसङ्ग इति भावः। निमित्तग्रहणार्थवत्त्वाय पूर्वपदे लक्षणाङ्गीकारेण बहुव्रीहिमाह — **एकादेशेति**। **तस्मात्** [7]एकादेशादित्यर्थः। 'एकादेशरूपं यत् षत्वनिमित्तमुकाररूपं तस्मात्' इत्यर्थे कर्मधारयोऽपि साधुरित्याहुः॥

[१,३८२–३८५]

(**रत्नप्रकाशः**) **यः स्थान इति**। प्रकरणात् 'उः' इति संबध्यते। [**रीरिविधिष्विति**।] रीरिप्रभृतिषु विधिष्वित्यर्थः। **अकडित्यादि**। यणोऽप्युपलक्षणमेतत्, ग्रहणकशास्त्रादन्यत्र पूर्वेणैव णकारेणाण्प्रत्याहाराश्रयणात्। एतेन **'पैतृष्वसेय इति**। लोपवचनं तु सर्वादेशार्थं स्यात्' इति कैयटः, 'रपरत्वाभिधानमुखेन सर्वादेशत्वं लोपस्याभिधित्सितम्। रपरत्वं चाविवक्षितम्। 'तेनैतन्न चोदनीयम् — यदि सर्वादेशो लोपस्तदा उःस्थाने न भवतीति कथं रपरः स्यादिति' इति तद्विवरणं च निरस्तम्। यणादेशे रपरे रेफद्वयं तत्र भवति, लोपे रपरे त्वेक एव रेफ इति वैषम्यसत्त्वेन यणादेशेन लोपस्य रपरत्वानर्थक्यायोगेन भाष्यस्य 'लोपोऽपि रपरः स्यात्' इत्येवंपरतयैवोपपन्नत्वात्। न च यणादेशे रपरे [9]'रो रि' इति लोपे सत्येक एव रेफः स्यादिति यणादेशलोपरपरत्वयोरविशेष इति वाच्यम्, कार्यकालपक्षे [10]'रो रि' इत्यन्तरङ्गं लोपं प्रति यणादेशस्यासिद्धत्वेन तदप्रवृत्तौ वैषम्यस्य सत्त्वात्। 'मद्रह्रदः' इत्यत्र द्विर्वचनस्यासिद्धत्वात् [11]'रो रि' इति लोपो नेति हयवरट्सूत्रे [12]तेनाप्युक्तत्वात्। एवमुपपन्नस्य यथाश्रुतभाष्यस्य यथोद्देशपक्षमाश्रित्यान्यथा व्याख्यातुमयुक्तत्वाच्च। किं च यथोद्देशपक्षे लोपविधानसामर्थ्यात् स रपरो नेत्येतावदेव लभ्यते, न तु तस्य सर्वादेशता, अलोऽन्त्यसूत्रप्रवृत्त्या लोपविधेरानर्थक्याभावात्। तथा च सर्वादेशपरतया व्याख्यानमयुक्तम्। **होतापोतारावितिति**। रेफस्य [13]'संयोगान्तस्य' इति लोपेऽपि तस्यासिद्धत्वान्नलोपो न स्यादिति भावः। **न चायमुरेवेति**। [14]'एकः पूर्वपरयोः' इत्यधिकारात् समुदाय एव स्थानित्वेन निर्दिष्ट इति मन्यते। **अवयवग्रहणात् सिद्धमिति**। द्वन्द्वस्य सर्वपदार्थप्रधानत्वेन

---

[1] नान्यथेत्याह — अ, म.
[2] वर्णानामादेशममानमिति — अ.
[3] जसोऽकारादेशस्य — म, ऋ.
[4] पा. सू. ८. ३. ४१.
[5] लुप्यते तत्र — अ, आ, ऋ.
[6] पा. सू. ८. २. २४.
[7] एकादेशादेवेत्यर्थः — म, आ, इ, ऋ.
[8] तेनैतच्च चोदनीयम् — ब.
[9] पा. सू. ८. ३. १४.
[10] पा. सू. ८. ३. १४.
[11] पा. सू. ८. ३. १४.
[12] कैयटेनापीत्यर्थः।
[13] पा. सू. ८. २. २३.
[14] पा. सू. ६. १. ८४.

ततो निष्पन्नषष्ठ्यर्थस्य प्रत्येकमन्वयात् [1]तदैव तत्रैकग्रहणोपपत्तेश्च पूर्वपरयोः [2]प्रत्येकं स्थानित्वं स्थितमिति उःस्थानेऽपि तत्राण् भवत्येवेति भावः। **मिश्रा अपि न भुज्यन्त इति**। एतादृश-स्थलेऽप्यवयवाश्रयेण वचनं प्रवर्तते किल, किमु वक्तव्यं यत्र द्वयोः स्थानित्वं वाचनिकं तत्रान्यत-राश्रयेण वचनं प्रवर्तत इत्यत्रेति भावः। एतदाशयमबुध्वा समुदायेऽवयवोऽस्तीत्येतावन्मात्रेण समुदायसंबन्धिनोऽवयवसंबन्ध उक्त इति मन्यमान आह — **आदेशे रान्तप्रतिषेध इति**। [3]"तुष्यतु दुर्जनः' इति परिहारान्तरमाह — **यदीति**। **ऋवर्णान्तस्येति**। [4]"वर्णग्रहणं च सर्वत्र' इति प्रयोजनवार्तिकस्यापि सत्त्वेन 'उः' इति विशेषणेन तदन्तविध्याश्रयेणेदम्। **खट्वर्श्य इति**। अत्र पूर्वपरसमुदाय ऋवर्णान्तो भवतीति भावः। **न चैतदृवर्णान्तमिति**। अङ्गस्थाने प्रसक्तस्य गुणस्य [5]'अलोऽन्त्यस्य' इत्यनेनान्त्येऽलि ऋकारे व्यवस्थापितत्वेन तस्य ऋकारस्य ऋवर्णान्तता नेति मन्यते। **अर्थवतेति**। [6]"पदं नामार्थः, ऋङ् नामार्थः' इति [7]'आद्यन्तवदेकस्मिन्' इति सूत्रगतभाष्यानुसारे-णेदम्। वस्तुतस्तु "अयं मे ज्येष्ठोऽयं मे मध्यमः' इति न्यायेनैव व्यपदेशिवद्भावस्योपपादित-त्वेनानर्थकेऽपि व्यपदेशिवद्भावः प्रवर्तत एवेति युक्त एवायं पक्षः। **तस्मान्नैवमिति**। यस्मादर्थ-वतैव व्यपदेशिवद्भावः, तस्मात् **एवम्** ऋवर्णान्तस्य स्थाने योऽण् स रपर इति वक्तुं न शक्य-मित्यर्थः। किं तत इत्यत आह — **न चेदेवमिति**। उपसंख्यानस्यातिप्रसक्तौ तद्वारणाय वचनान्तर-मपि कर्तव्यमित्याह — **इह चेति**। **मातुरिति**। मातुः करोतीत्यादौ [8]'इदुदुपधस्य' इति षत्वं स्यादिति स्वयमेव स्वाशयं प्रकटीकरिष्यति। एतेन "रपरत्वे कृते विभक्तिसकारस्य रुत्वम्। पूर्वस्य [9]"रो रि' इति लोपः। [10]"ढ्रलोपे' इति दीर्घत्वम्, तत्र मातूरिति प्राप्नोतीति भावः" इति कैयटो निरस्तः। रुत्वस्यासिद्धत्वेन संयोगान्तलोपस्यैव तत्र प्रवृत्तेः। तथैव भाष्ये दर्शितत्वेन तदुपेक्षायोगाच्च। **अन्यतरत इति**। अन्यतरेणेत्यर्थः। आद्यादित्वात् तसिः। **नवं शक्यमिति**। [11]रपरत्वाभ्युपगमेन सर्वमिष्टं साधयितुं न शक्यमिति भावः। **षत्वं प्रसज्येतेति**। [12]"इदुदुपधस्य' इति सूत्रेणेति शेषः। तत्र 'अप्रत्ययस्य' इति बहुव्रीहिः। उणादयश्चाव्युत्पन्ना इत्येकादेशस्य पूर्वान्तत्वेन ग्रहणे 'मातुः' इति समुदायोऽविद्यमानप्रत्यय इति तदीयस्य विसर्जनीयस्य षत्वं स्यादिति भावः। एतेन "'अस्' इत्ययं समुदायः प्रत्ययः, न त्वकार इति तदादेशोऽप्यप्रत्यय इति भावः" इति निरस्तम्। सकारस्थितिकालेऽकारस्य प्रत्ययत्वाभावेऽपि प्रत्ययावयवताया निर्विवादत्वेन तदा-देशस्यापि प्रत्ययावयवत्वे सति सकारलोपोत्तरमेकदेशविकृतन्यायेनैकादेशस्यैव प्रत्ययत्वे बाधकाभावात्। **प्रत्ययविसर्जनीयश्चायमिति**। 'अप्रत्ययस्य' इति प्रत्ययस्य न भवति यः स इत्यसमर्थसमासः। अवयवलक्षकप्रत्ययशब्देन नञः समर्थ एव वा तत्पुरुषः, ततः षष्ठी। सा [13]"विसर्जनीयस्येत्यनया समानाधिकरणा। तथा चैकादेशविसर्गः प्रत्ययो भवत्येवेति षत्वप्रसङ्गो नेति मन्यते। एतेन 'प्रत्ययावयवत्वादकारोऽपि प्रत्ययः। [14]अतस्तदादेशोऽपि प्रत्यय इति भावः' इति निरस्तम्। निर्युक्तिकतया प्रत्ययावयवस्य प्रत्ययत्वतदभावकथनयोः परस्परव्याघातात्। 'अप्रत्ययस्य' इति

---

[1] तथैव — ब.
[2] प्रत्येकस्थानित्वं — ब.
[3] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[4] का. वा. १. १. ७२–२७.
[5] पा. सू. १. १. ५२.
[6] महाभाष्यम् १. १. २१.
[7] पा. सू. १. १. २१.
[8] महाभाष्यम् १. १. २१.
[9] पा. सू. ८. ३. ४१.
[10] पा. सू. ८. ३. १४.
[11] पा. सू. ६. ३. १११.
[12] परत्वाभ्युपगमेन — ब .
[13] पा. सू. ८. ३. ४१.
[14] विसर्जनीयस्य स इत्यतस्तदनुवृत्तेरिति भावः।
[15] अतस्तदेकादेशोऽपि — ब.

बहुव्रीहेः षष्ठीति पक्ष एव समीचीनः, न तु नञ्तत्पुरुषात् सेति पक्षः, असमर्थसमासताया गौणोत्तरपदसमासताया वाश्रयणीयतया [1]तस्यातिक्लिष्टत्वादित्याशयेनाह — [2]**लुप्यतेऽत्र प्रत्यय इति**। यस्मिन् सकारे सत्येकादेशस्य उतो रपरत्वप्रतिषेधपक्षे तस्यैव रुत्वे ततो विसर्गे तद्विसर्गान्तस्याविद्यमानप्रत्ययत्वं न संभवति, अतः प्रत्ययत्वेनोपचरितः स सकारोऽस्मिन् पक्षे लुप्त इति भावः। एतेन 'सकारसंनिधिकालेऽकारेण नैव लब्धा प्रत्ययसंज्ञा, [3]समुदायविशेषणत्वात् तस्या इति कुतस्तदादेशस्तां लप्स्यते। उत्वे च कृतेऽवशिष्टः सकार एव प्रत्ययसंज्ञः, स च लुप्त इति भावः' इति निरस्तम्। सकारे सत्यकारेणालब्धेऽपि प्रत्ययत्वे तस्य प्रत्ययावयवत्वानपायेन तदादेशस्यापि तदवयवत्वे सति 'ततोऽवशिष्ट एव प्रत्ययः' इत्युक्तेरत्यन्तमौख्यावहत्वात्। अन्यथा 'रामम्' इत्यादौ 'अभवम्' इत्यादौ चामि पूर्वे कृतेऽवशिष्टस्य मकारस्य प्रत्ययत्वे [4]'सुपि च' [5]'अतो दीर्घो यञि' इति दीर्घप्रसङ्गात्। तथा 'अभीयात्' इत्यत्रैकादेशोत्तरम् 'अभ्' इत्यस्यैवोपसर्गत्वे सति [6]'एतेर्लिङि' इति ह्रस्वप्रसङ्गाच्च। **भ्रातुष्पुत्रशब्दं पठतीति**। एतेन 'आकृतिगणस्य पाठ आधुनिकः' इति वदन्तः परास्ताः। आधुनिकपाठाश्रयेण भाष्यकारोक्तप्रकृतज्ञापकोपपादनायोगात्। **एकादेशनिमित्तादिति**। यत्तु 'एकादेश एकादेशशास्त्रं निमित्तं विधायकं यस्य तस्मात्परस्य' इति। तदयुक्तम्, एकादेशरूपनिमित्तात् परस्येत्येवोपपत्तावेकादेशशब्दे लक्षणाश्रयणानौचित्यात्। तादृशार्थाभिमतौ 'एकादेशात्' इत्येव वक्तव्यत्वापत्तेश्च। एकादेशस्तु स्थानिभूतरेफसंपादनद्वारा विसर्गस्य निमित्तं भवति॥

[१, ३८२–३८५]

(**नारायणीयम्**) आदिग्रहणाभावाद् रीरिविध्योश्च सुज्ञानत्वात् कथं प्रश्न इत्याशङ्क्याह — **बह्विति**। नन्वलोऽन्त्यलोपे रपरे यद्रूपं साध्यं तद्यणादेशेऽपि सिध्यतीति लोपवचनं किमर्थम्, अत आह — **लोपेति**। पूर्वमलोऽन्त्यविधिप्रवृत्त्या ऋस्थानिकत्वे लोपस्यावगते रपरत्वप्रवृत्तौ लोपफलाकाङ्क्षया सर्वादेशत्वकल्पनया प्रवृत्तोऽप्यलोऽन्त्यविधिर्बाध्यत इत्यर्थः। रपरत्वेऽपि संयोगान्तलोपप्रवृत्त्येष्टसिद्धिमाशङ्क्याह — **रेफस्येति**। पूर्वस्य च परस्य च पृथक् स्थानित्वाद् ऋवर्णस्थानित्वमस्तीत्यत आह — **पूर्वेति**। एवमतिरिक्तसमुदायमङ्गीकृत्यावयवोद्भूततोक्ता। स एव नास्तीत्याह — **अवयवावेव चेति**। नकारात् परस्याकारस्यानुबन्धत्वान्न तमपेक्ष्यातिप्रसङ्गचोद्यमेतत्। किं त्वाकारमित्याह — **आनङीति**। प्रतिषेधान्तत्वं ग्रन्थस्य निवारयन्नुपसंख्यानान्तत्वमाह — **तस्मादिति**। 'उच्येत' इत्युत्तरे उक्तिग्रहणस्य कर्तव्यत्वशङ्कां निरस्यति — **उरिति**। एतावता कथं प्रस्तुतचोद्यपरिहारः, तत्राह — **खट्वर्श्य इति**। [यद्यपि] इगन्ताङ्गस्य गुणवादः, तथापि कथं तदन्तविध्यभाव इत्याशङ्क्य यथाविध्यनुवादप्रवृत्तिरिति विधिपर्यालोचनेनार्थनिश्चयोऽस्य कार्यः। विधिश्च ऋवर्णमात्रस्येति तथैवानुवादोऽपीत्याह — **न चेति**। खट्वर्श्य इत्यत्राप्यवयवयोः स्थानित्वमिति भावः। यत्र व्यपदेशिवद्भावस्तत्रार्थवत्तेति व्याप्तेरुदाहरणमाह — **यथेति**। अप्रयोजकत्वं निरस्यति — **अर्थस्य होति**। [7]यद्युपसंख्यानं क्रियत इति ग्रन्थाभावादाह — **उपसंख्यानस्येति**।

---

[1] तस्याक्लिष्टत्वात् — ब.
[2] लुप्यते तत्र — ब.
[3] समुदायसंनिवेशिनीत्वादित्यस्यार्थानुवादः।
[4] पा. सू. ७. ३. १०२.
[5] पा. सू. ७. ३. १०१.
[6] पा. सू. ७. ४. २४.
[7] यद्यप्युपसंख्यानं — क.

समुदायस्य [1]स्थानित्वान्नैतन्न्यायविषयत्वमस्येत्याशङ्क्याह — **अवयवाविति**। न केवलं द्विवचनश्रुतिरत्र प्रमाणम्, अपि तु लिङ्गमपीत्याह — **अत एवेति**। पञ्चम्यर्थाभावादाह — **तृतीयान्तादिति**। अन्यतरतो व्यपदेशे हेतुत्वेनोक्तस्य [2]द्वितयस्थानिकत्वस्य दृष्टान्तेऽसंभवमाशङ्क्य द्वितयसंबन्धित्वमात्रं हेतुः, स चास्ति दृष्टान्त इत्यभिप्रेत्याह — **एक इति**। 'पुत्रः' इत्यनेनैकस्योभयसंबन्धित्वमुक्तम्। दार्ष्टान्तिके तु संबन्धित्वप्रकारमाह — [3]**तत्स्थानिकत्वेनेति**। नन्वयं परिहारोऽतिव्यापक इति प्रागुक्तम्, अत आह — **अकङादेरिति**। यथात्र पूर्वपरयोः स्थानित्वं, न तथाकङादावणश्चानणश्चादेशत्वम्, तत्समुदायस्यैव [4]तथात्वादवयवस्यादेशत्वे प्रमाणाभावादित्यर्थः। ननु [5]'यो ह्युभयोरपि' इति न्यायादेव ऋस्थानिकत्ववत् प्रत्ययस्थानिकत्वमपीति कथं नाम नास्ति प्रत्ययत्वं विसर्जनीयस्य, येन षत्वं स्यात्, अत आह — **असिति**। अकारस्य प्रत्ययत्वे हि त्वदुक्तन्यायः, तदेव नास्तीत्यर्थः। प्रत्ययानादेशस्य कथं प्रत्ययत्वमित्याशङ्क्य स्थानिनः प्रत्ययत्वमुपपादयति — **प्रत्ययेति**। समुदायधर्मस्यावयवेष्वनुगतेरित्यर्थः। 'लुप्यते' इति भाष्याद्विद्यमानस्य प्रत्ययत्वाभाव उक्तः। स कथम्, अवयवानां समुदायधर्मानुगमादित्याशङ्क्याक्तपरिमाणस्य प्रत्ययसंज्ञा न सामान्यतो दृष्टानुमानादवयवेष्वापाद्येत्याह — **सकारेति**। यदि तर्हि नैकादेशः प्रत्ययः, अकारवत् सकारस्यापि न प्रत्ययत्वमिति 'लुप्यते' इति भाष्यमसंगतम्, अत आह — **उत्वे चेति**। एकादेशस्य निमित्तमेकादेशो निमित्तमिति वानुपपन्नमेव, अतो व्याचष्टे — **एकादेशेति**। कर्मधारयोऽपि युज्यते शास्त्रपरतां विनापि। सरेफस्य तत्त्वे तदप्ययुक्तमिति शास्त्रपरता दर्शिता।

[१, ३८५–३९१]

(**लघुविवरणम्**) नन्वन्तादिग्रहणेनानुवर्तमानेनापि न रेफो विशेषयितुं शक्यते, तस्योपसर्जनत्वेन विशेषणान्वयायोगादित्यत आह — **यद्यपीति**। आर्थं तु प्राधान्यं रेफस्येति विशेषणान्वयो युज्यत इत्यभिप्रेत्याह — **तथापीति**। **तात्पर्येति**। सूत्रमेतद्रेफमात्रविधिपरमिति भावः। भाष्ये अट्स्वरनिवृत्तये माङः प्रयोगः, निघाताभावाय हेः, लङसिद्धये स्मस्य। एकवचनानुदाहरणे कारणमाह — **नित्यत्वादिति**। कल्पीति न पदसंघात इति कर्मधारयोऽनुपपन्नः, समासान्तरं [6]त्वनाशङ्क्यमेवेत्यत आह — **पदशब्देनेति**। निर्दिश्यमानपरिभाषेह नास्तीति शङ्कते — **नन्विति**। ननु मा भूत् सरेफस्यानुमीयमानत्वात् [7]'आदेः परस्य' इति रेफस्यौत्वम्, "निर्दिश्यमानस्य' इति त्वनुपपन्नम्, सौत्रस्य यस्य षष्ठ्या निर्देशो न तस्यादेशः, किं तु तेन प्रत्यायितस्येत्यत आह — **प्रत्याय्येति**। **प्रवृत्तौ वेति**। [9]"एकाच उपदेशे' इत्यत्र [10]"नेड् वशि कृति' इत्यस्यानुवृत्त्योपदेशे[11] वशादेः कृत इट्प्रतिषेध इति भावः। ननु रेफस्य परादित्वेऽपृक्तत्वाभावाद्विलोपो[12] न प्राप्नोतीति

---

[1] स्थानित्वं नैतन्न्याय — क.
[2] द्वितीयस्थानिकत्वस्य — क.
[3] तत्स्थानित्वेनेति — क.
[4] तथात्वादवयवस्यादेशत्वादेकप्रमाणाभावादित्यर्थः — क.
[5] 'यो द्वयोः षष्ठीप्रसङ्गे' इति भाष्योक्तो न्यायोऽर्थतोऽनूदितः।
[6] तुशब्दो नास्ति — ढ.
[7] पा. सू. १. १. ५४.
[8] परिभाषा १२.
[9] पा. सू. ७. २. १०.
[10] पा. सू. ७. २. ८.
[11] 'उपदेशे' इति नास्ति — ड, ढ.
[12] विलोपादि न प्राप्नोतीति — ण.

कस्मान्नोक्तमित्यत आह — **अन्तरङ्गत्वादिति** । **पूर्वान्तपक्ष इति** । नार्कुट इत्यादौ चान्तरङ्गे विसर्जनीये कर्तव्ये बहिरङ्गाया वृद्धेरसिद्धत्वान्न दोष इति भावः ॥

[१, ३८५-३९१]

(**विवरणम्**) **यद्यपीति** । तथा चानुवर्तमानमन्त [1]इत्यादि अणित्यनेन संबन्धुमर्हतीति भावः । **प्राधान्यादिति** । रपरशब्दतात्पर्यविषयत्वादित्यर्थः । [2]नन्वरारादिरूपेण विधानात् [3]कथमभक्त-परादित्वशङ्केत्यत आह — **यद्यपीति** । [4]**अविधानात्** [5]सूत्रेऽनुच्चारणादित्यर्थः । **तात्पर्यपर्यालोचन-न्यायः** प्राप्ताप्राप्तविवेकन्यायः । **केवलेति** । रेफमात्रविधौ सूत्रमेतदवतिष्ठत इत्यर्थः । वार्तिके **प्रतिषेधः** अभावो निवर्तनं च । [6]तथा च यथासंभवं क्वचिदभावः स्यादिति योजनीयम्, क्वचिच्च निवर्तनं वक्तव्यमिति । एवं च द्वन्द्वान्ते श्रूयमाणप्रतिषेधशब्देन षष्ठीसमास उपपन्न इति द्रष्टव्यम् । गीः पूरित्यत्र [7]'क्विप् च' इति क्विप् । [8]'ऋत इद्धातोः' [9]'उदोष्ठ्यपूर्वस्य' इतीत्वोत्वे । **पदमिति भाष्ये** । [10]'पदस्य' [11]'पदात्' इत्यनुवर्तमानं षष्ठ्यन्तमित्यर्थः । भाष्ये माङः [12]प्रयोगोऽटोऽभावाय । तस्मिन् ह्यटः स्वरः स्यात् । हिप्रयोगः [13]'तिङ्ङतिङः' इति निघातस्य [14]'हि च' इत्यनेन निषेधाय । स्मशब्दो [15]'माङि लुङ्' इति लुङ्बाधनेन [16]'स्मोत्तरे लङ् च' इति लङ्[सिद्धये ।] नृकुटीशब्दाद् भवाद्यर्थेऽण् । नृपतिशब्दात्तु [17]'दित्यदित्यादित्य' इति ण्यः । ननु रेफान्तान्न सुब्विहित इति कथं तदन्तस्य प्रत्ययलक्षणेनापि पदसंज्ञेत्यत आह — **यस्मादिति** । **नित्यत्वादिति** । यद्यपि धातोः परः कर्तृवाचिनि सार्वधातुकेऽनन्तरो विकरणो विधेयः, न चाभक्ते रेफे सति तथा विकरणः संभव-तीति सोऽप्यनित्यः, तथापि सार्वधातुकेऽभिधेयत्वेन स्थिते कर्तरीति व्याख्यायमाने सार्वधातुक इति विषयसप्तम्यां वा कृतेऽप्याङ्गे धातोः परो विकरणः प्राप्नोतीति स नित्य इति भावः । **द्वयोरपीति** । असत्यपि विकरणे तसो ङित्त्वादित्वप्रवृत्तेरित्यर्थः । **अथ व्यवहितेऽपीति** । [18]'परश्च' इति परशब्दस्य व्यवहितेऽपि प्रवृत्तौ न कश्चिद्दोष इति द्रष्टव्यम् । **नुकल्पेति** । ईषदसमाप्तो ना नूकल्पः, [19]तच्छब्दादित्यर्थः । **पदसंज्ञेति** । [20]'स्वादिषु' इत्यनेन । ननु प्रत्ययस्य कथं पदत्व-मित्यत आह — **पदशब्देनेति** । पदस्य संघातः पदसंघातः, कल्पिश्चासौ पदसंघातश्चेति समासः । भाष्ये **उपदेश इति वर्तत इति** । [21]'तास्यनुदात्तेत्' इत्यतः । [22]'अतो लोपः' इत्यत्र [23]'अनुदात्तोपदेश'

---

[1] इत्यादिना ऋवर्णेन संबन्धुं — च, छ.
[2] नन्वकारादिरूपेण — ट.
[3] कथं परादित्व — च.
[4] अनियमात् — ञ.
[5] सूत्रेणानुच्चारणादित्यर्थः — च, छ, ट; पूर्वमनुच्चारणादित्यर्थः — ञ.
[6] 'तथा च' इति नास्ति — ञ.
[7] पा. सू. ३.२. ७६.
[8] पा. सू. ७. १. १००.
[9] पा. सू. ७. १. १०२.
[10] पा. सू. ८. १. १६.
[11] पा. सू. ८. १. १७.
[12] प्रयोग उदात्ताभावाय — ञ.
[13] पा. सू. ८. १. २८.
[14] पा. सू. ८. १. ३४.
[15] पा. सू. ३. ३. १७५.
[16] पा. सू. ३. ३. १७६.
[17] पा. सू. ४. १. ८५.
[18] पा. सू. ३. १. २.
[19] तथा तदित्यर्थः — ञ.
[20] पा. सू. १. ४. १७.
[21] पा. सू. ६. १. १८६.
[22] पा. सू. ६. ४. ४८.
[23] पा. सू. ६. ४. ३७.

इत्यत उपदेश इति वर्तत इति द्रष्टव्यम्। **पररूपेणेति**। [1]'अतो गुणे' [2]'एङि पररूपम्' इत्यनेन। भाष्ये उपदेशग्रहणं प्रकृतिविशेषणमिति चोद्यम्। निर्दिश्यमानपरिभाषेह नास्तीति शङ्कते — **नन्विति**। ननु मा भूत् सरेफस्यानुमीयमानत्वेन [3]'आदेः परस्य' इति रेफस्यौत्वम्, निर्दिश्यमानस्येत्यनुपपन्नम्, सौत्रस्य यस्य षष्ठ्या निर्देशो न तस्यादेशः, किं तु तेन प्रत्यायितस्य प्रयोगस्थस्येत्यत आह — **प्रत्याय्येति**। एतच्च 'निर्दिष्टस्य' इत्युच्चारितस्येत्यर्थमङ्गीकृत्योक्तम्। प्रतिपादितस्येत्यर्थश्चेत् न कदाचिदनुपपत्तिरिति द्रष्टव्यम्। **यदि त्विति**। स्थानिनो मात्रिकत्वे-नानाश्रयणादिति भावः। [4]भाष्ये 'अव्यवस्था' इत्यकारप्रश्लेषमभिप्रेत्य 'व्यवस्था न प्रकल्पते' इति व्याख्यातम्। तत्र यथावार्तिकं [5]तावद्व्याख्याति — **नित्यत्वादिति**। कथं तर्हीटमङ्गीकृत्य 'इडपि' इत्यादि भाष्यमित्यत आह — [6]**प्रवृत्तौ वेति**। [7]'एकाच उपदेशे' इत्यत्र [8]'नेड् वशि' इत्यनुवृत्त्योप-देशे वशादेरिट्प्रतिषेध इत्यङ्गीकृत्येदमुक्तम्। भाष्ये **प्रकर्तेति**। तृन्। **एष स्वरः** पूर्वपदप्रकृतिस्वर इत्यर्थः। **कृदुपदेशे** कृत्संज्ञाविधानसमये **तार्थं** तकारादिप्रत्ययप्रतीत्यर्थं, कृद्ग्रहणमिति भाष्योदाह्-तवार्तिकार्थः। ननु रेफस्य परादित्वेऽपृक्तत्वाभावाद्विलोपो न प्राप्नोतीति कस्मान्नोक्तम्। न च हल्ङ्यादिलोपे संयोगान्तलोपेन वकारनिवृत्तिरिति वाच्यम्, [9]'रात् सस्य' इति नियमादित्यत आह — **अन्तरङ्गत्वादिति**। **पूर्वान्तपक्ष इति**। नार्कुट इत्यादौ त्वन्तरङ्गे विसर्जनीये कर्तव्ये बहिरङ्गाया वृद्धेरसिद्धत्वाद् दोषाभाव इति भावः॥

[१, ३८५–३९१]

(**उद्द्योतनम्**) **यद्यपीति**। तथा चान्तत्वादिकमण एव विशेषणं युक्तमिति भावः। **प्राधान्या-दिति**। रपरशब्दतात्पर्यविषयत्वादित्यर्थः। नन्वरारोरेव विधानात् [10]'कथमभक्तत्वपरादित्व-पक्षसंभवः, अत आह — **यद्यपीति**। **अविधानात्** सूत्रेऽनुच्चारणात्। [11]**तात्पर्यति**। प्राप्ताप्राप्त-विवेकेनेत्यर्थः। [12]**केवलेति**। रेफमात्रविधावेव सूत्रस्य [13]**अवस्थानात्** चरितार्थत्वादित्यर्थः। भाष्ये **गीरिति**। गॄ निगरणे, पॄ [14]पालनादौ। [15]'क्विप् च' इति क्विप्। [16]'ऋत इद्धातोः' [17]'उदोष्ठ्य-पूर्वस्य'। भाष्ये 'ग्रामणि' इत्यस्य नपुंसकत्वार्थं कुलमिति विशेष्योपादानम्। ननु गॄसंबन्धिनो रेफस्य लत्वविधाने नोक्तदोषः, आनन्तर्यादिसंबन्धस्याभक्तत्वेऽपि संभवात्, अत आह — **अवयवेति**। भाष्ये [18]**निजेगिल्यते** गॄ यङ [19]'ऋत इद्धातोः' इतीत्वं रपरत्वम्, [20]'सन्यङोः' इति द्वित्वम्,

---

[1] पा. सू. ६. १. ९७.
[2] पा. सू. ६. १. ९४. पररूपग्रहणानुवृत्ति-प्रदर्शनायैतत्सूत्रोपादानं बोध्यम्।
[3] पा. सू. १. १. ५४.
[4] भाष्ये त्वव्यवस्था — अ.
[5] तावद्व्याख्या — नित्यत्वादिति — अ.
[6] प्रवृत्तौ चेति — च.
[7] पा. सू. ७. २. १०.
[8] पा. सू. ७. २. ८.
[9] पा. सू. ८. २. २४.
[10] कथमभक्तपरादित्व — अ.
[11] 'तात्पर्येति' इति नास्ति — अ, आ.
[12] केवलमिति — अ, आ, इ, ऋ.
[13] उपस्थानात् — म, इ.
[14] पालनपूरणादौ — ऋ.
[15] पा. सू. ३. २. ७६.
[16] पा. सू. ७. १. १००.
[17] पा. सू. ७. १. १०२.
[18] स्वर्जेगिल्यते — इ.
[19] पा. सू. ७. १. १००.
[20] पा. सू. ६. १. १०९.

[1]'कुहोश्चुः' इत्यभ्यासस्य [2]चुत्वम्, [3]'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः। भाष्ये **[4]यङेति**। ग्रोऽनन्तरो यङश्चानन्तरो यस्तस्य रेफस्य लत्वम्, 'स्वर्जेगिल्यते' इत्यत्र रेफो न यङोऽनन्तर इत्यर्थः। भाष्ये **अथवेति**। ग्रः परस्य यङः पूर्वस्य च[5] लाभः। भाष्ये **अच इति**। [6]'उपदेशेऽजन्तानां कर्तृयक्याद्युदात्तत्वं वा स्यादिति सूत्रार्थः। भाष्ये **स्वरविधाविति**। यद्यपि यत्र स्वरविधिः प्राप्नोति तत्र स न्यायः। अत्र व्यवधानात् स एव न प्राप्नोति, तथापि [7]स्वरविधौ विवक्षित एव स न्याय इति भावः। भाष्ये [8]'अडुदात्तत्वेनान्यथासिद्धिपरिहाराय माङ्प्रयोगः। तावन्मात्रे [9]'तिङ्ङतिङः' इत्याष्टमिकसर्वानुदात्तत्वेनैतस्य बाधः स्यात्, अतः 'हि' इत्युक्तम्। [10]'हि च' इति सूत्रेण हिना युक्तेऽनुदात्तत्वनिषेधादेष स्वरः सिध्यति। स्मशब्दो [11]लङबोधनाय। भाष्ये **ववृते** वृतेर्लिटि द्वित्वम्, [12]'उरत्', [13]तस्यैश्। [14]रेफस्यालोपमुपपादयति — **अभ्यासेति**। [15]'नृकुटीशब्दाद् भवाद्यर्थेऽण्, नार्कुटः। नृपतिशब्दात् [16]'दित्य[दित्या]दित्य' इति तस्मिन्नेवार्थे ण्यः, नार्पत्यः। ननु रेफान्तान्न सुब्विहित इति कथं प्रत्ययलक्षणेन तदन्तस्य पदसंज्ञा, अत आह — **यस्मादिति**। [17]'न लुमताङ्गस्य' इति सूत्रे भाष्यकृद्वचनमिदम्। एकवचनत्यागे हेतुमाह — **एकवचन इति**। **नित्यत्वादिति**। यद्यपि धातोः परः कर्तृवाचिनि [18]'सार्वधातुकेऽनन्तरो विकरणो विधेयः। न चाभक्ते रेफे सति तथा विकरणः संभवतीति [19]'सोऽप्यनित्यः, तथापि 'सार्वधातुकेऽभिधेयत्वेन स्थिते कर्तरि' इति व्याख्यायमाने, सार्वधातुक इति विषयसप्तम्यां, कृतेऽप्याङ्गे धातोः परो विकरणः प्राप्नोतीति[20] स एव नित्य इति भावः। **द्वयोरपीति**। असत्यपि विकरणे तसो ङित्त्वादित्व[21]प्रवृत्तेरित्यर्थः। **अथेति**। यद्यप्यणः परो विधीयमानो विकरणात् परो न लभ्यते, तथापि परशब्दस्याव्यवहितवाचित्वे विकरणो न स्यादित्येवं दूषणं भाष्यस्थाव्यवस्थोपपादनाय 'अथ' इत्याद्युक्तम्। यदि व्यवहितेऽपि परशब्दस्तदा कदाचिद्रेफात् परो विकरण इति, कदाचिद्विकरणात् परो रेफ इत्यपि संभवाद्रेफात् पर एव विकरण इतीष्टव्यवस्था न सिध्येदिति तात्पर्यनिष्कर्षः। र्ववधारणं परादित्वे न कर्तव्यम्, अभक्तत्वेऽपि[22] कर्तव्यमित्याह — **परादाविति**। **तदादीति**। [23]'यस्मात् सुप्तिङविधिः' इति वचनादित्यर्थः। **नृकल्पेति**। ईषदूनो ना नृकल्पः, तच्छब्दादित्यर्थः। [24]'समुदायस्थरेफस्य वृद्धचनन्तरमावित्वाद् वृद्धेश्चेञधीनत्वात् समुदायभक्तत्वम्। **न त्विति**। तथा च

---

[1] पा. सू. ७. ४. ६२.
[2] श्चुत्वम् — म.
[3] पा. सू. ७. ४. ८२.
[4] यङीति — ऋ.
[5] चकारो नास्ति — अ.
[6] अत्र सिद्धान्तभूतोऽर्थ उक्तः सूत्रस्येति मन्तव्यम्। उपदेशपदानुवृत्तेः पूर्वान्तपक्ष एव प्रयोजनस्य वक्ष्यमाणत्वात्।
[7] स्वरविधावविवक्षित एव — म, आ.
[8] 'अट्' इति नास्ति — म, आ, इ.
[9] पा. सू. ८. १. २८.
[10] पा. सू. ८. १. ३४.
[11] लुङबोधनाय — अ, आ, इ, ऋ.
[12] पा. सू. ७. ४. ६६.
[13] तप्रत्ययस्य एशित्यर्थः।
[14] रेफस्य लोपम् — अ.
[15] नृकुटिशब्दात् — अ, म, आ, ऋ.
[16] पा. सू. ४. १. ८५.
[17] पा. सू. १. १. ६३.
[18] सार्वधातुकेऽनन्तरे विकरणः — म.
[19] सोऽपि नित्यः — ऋ.
[20] इतिशब्दो नास्ति — म, आ, इ, ऋ.
[21] प्रवृत्तिरित्यर्थः — अ.
[22] अपिः पूर्वान्तपक्षसमुच्चायकः॥ अपिशब्दो नास्ति — अ, आ, ऋ.
[23] महाभाष्यम् १. १. ६३.
[24] समुदायस्य रेफस्य — अ, इ, ऋ.

कल्पग्रहणे न स गृह्यत इत्यर्थः। **पदसंज्ञा** [1]'स्वादिषु' इत्यनेन। [2]'कल्पिपद' इत्ययुक्तम्, प्रत्ययस्य पदत्वाभावात्, अत आह — **पदशब्देनेति**। स्वावयवस्य स्वेन पौर्वापर्यासंभवात् कथं रेफान्तस्य पदसंज्ञा, अत आह — **तेनेति**। **तयोः** कल्पशब्दरेफयोः। तथा च कल्पे परतो रेफान्तस्य पदसंज्ञा भवतीति भावः। रेफः समुदायावयवस्य **आत्मनः** स्वस्य, पदान्ततां विहन्तुं नोत्सहत एवेत्यन्वयः। पदस्य संघातः पदसंघातः, [3]कल्पिश्चासौ पदसंघातश्चेति भाष्ये विग्रहः। भाष्ये **उपदेश इति**। [4]'तास्यनुदात्तेत्' इत्यतः। तथा चोपदेशेऽजन्तत्वात् स्वरसिद्धिरित्यर्थः। [5]'अतो लोपः' इत्यत्र [6]'अनुदात्तोपदेश' इत्यत उपदेशानुवृत्तिः। **धिनुत इति**। [7]'धिन्विकृण्व्योर च' इत्युप्रत्यय[8]संनियोगेनाकारोऽन्तादेशो विधीयते। तस्योपदेशकालेऽभावादुप्रत्यये परतो लोपो न स्यादिति भाष्यार्थः। तत्रैकवचनानुदाहृतौ हेतुमाह — **एकवचन इति**। परत्वात् [9]'वार्णादाङ्गं [10]बलीयः' इति च सार्वधातुकगुणेन भाव्यमित्याशयेनाह — **विकरणस्य वेति**। **पररूपेण** [11]'अतो गुणे' इत्यनेन। भाष्ये उपदेशग्रहणं प्रकृतिविशेषणं मत्वा 'धिनुतः' इति चोद्यम्। आर्धधातुकोपदेशकालेऽकारान्तत्वमुपपादयति — **संनियोगेनेति**। निर्दिश्यमानपरिभाषा नेह प्रवर्तत इति शङ्कते — **नन्विति**। परत्वादित्यर्थः। **णल इत्यनेन** सूत्रस्थेन। **प्रत्यायितमिति**। 'चकार' इति प्रयोगस्थाकारप्रत्यायकत्वादेतस्येत्यर्थः। **प्रवर्तते** [12]प्रत्यक्षश्रुतत्वादित्यर्थः। **सरेफस्येति**। णलो रेफसाहित्यमानुमानिकम्, न तु सूत्रे साक्षाच्छ्रुतमिति [13]'आदेः परस्य' इति न प्रवर्तत इत्यर्थः। नन्वेवमपि निर्दिश्यमानस्येत्यनुपपन्नम्, सूत्रे यस्य [14]षष्ठ्या निर्देशः, न तस्यादेशः, किं तु तेन प्रत्यायितस्य प्रयोगस्थस्य, अत आह — **प्रत्याय्येति**। एतच्च **निर्दिष्टस्य** उच्चारितस्येत्यर्थमङ्गीकृत्योक्तम्, प्रतिपादितस्येत्यर्थे नानुपपत्तिरिति ज्ञेयम्। 'णलः' इत्युक्तेरयं भाष्योक्तः परिहारः, 'प्रत्ययस्य' 'लिटः' [15]इति वोक्तौ नायं परिहारः, स्थानिनो [16]मात्रिकत्वेनानाश्रयणादित्याह — **यदि त्विति**। व्यतिरेकमुखेन भाष्यसमर्थनार्थमिदमुक्तम्, न त्वेवं सूत्रे निर्देशोऽस्ति, तथापि णल्ग्रहणाभावे प्रत्ययमात्रस्य लिण्मात्रस्य वौत्वप्रसङ्गात्। भाष्ये **अचीकरदिति**। कारि चङ इति स्थिते रेफस्य णिभक्तत्वेनाकारस्योपधात्वाभावाद्ध्रस्वाप्राप्तिरित्यर्थः। वार्तिके 'इटोव्यवस्था' इत्यत्राकारप्रश्लेषेण भाष्यकृतेटमङ्गीकृत्य [17]'तत्र व्यवस्था न प्रकल्पते' इति व्याख्यातम्। इटोऽप्राप्तेस्तदयुक्तमिति मत्वा यथाश्रुतवार्तिकं स्वयं व्याख्याति — **नित्यत्वादिति**। रेफस्य परादित्वेन वशादित्वादिण्निषेधः। भाष्यमपि संगमयति — **प्रवृत्तौ वेति**। इट इत्यादिः। [18]'एकाच उपदेशे' इत्यत्र [19]'नेड् वशि' इत्यनुवृत्त्योपदेशे वशादेरिट्प्रतिषेधादत्रेट् प्रवर्तत एवेति भाष्याभिप्रायोऽनेनोक्तः। भाष्ये **अजादाविति**। रेफस्य परादित्वेऽजादित्वासंभवादित्यर्थः। भाष्ये **प्रकर्ता प्रहर्ता** तृन्। तुर्वर्जिते तादौ निति कृत्यनन्तरो गतिः प्रकृतिस्वर इति सूत्रार्थः। **कृदिति**। पूर्वं कृद्ग्रहण-

---

[1] पा. सू. १. ४. १७.
[2] कल्पपद — अ, म, ऋ.
[3] कल्पश्चासौ — ऋ.
[4] पा. सू. ६. १. १८६.
[5] पा. सू. ६. ४. ४८.
[6] पा. सू. ६. ४. ३८.
[7] पा. सू. ३. १. ८०.
[8] संनियोगेनाकारान्तादेशः — अ, म, आ.
[9] परिभाषा ५५.
[10] बलवदिति च — अ.
[11] पा. सू. ६. १. ९७.
[12] प्रत्यक्षकृतत्वादित्यर्थः — म.
[13] पा. सू. १. १. ५४.
[14] षष्ठीनिर्देशः — ऋ.
[15] इति चोक्तौ — म, आ, इ, ऋ.
[16] मात्रिकत्वेनाश्रयणात् — अ.
[17] 'तत्र' इति नास्ति — अ, ऋ.
[18] पा. सू. ७. २. १०.
[19] पा. सू. ७. २. ८.

स्याप्रयोजनत्वमुक्त्वा प्रयोजनमनेन कथ्यते। 'कृदुपदेशकाले यस्तादिः' इत्येवं प्रतिपत्त्यर्थं कृद्ग्रहणम्। किं प्रयोजनम्? इडर्थम्, इति [1]'तादौ' इति सूत्रस्थवार्तिकार्थः। तत्र यथा 'प्रलविता, प्रलवितुम्' इत्यत्रैष स्वरस्तथा 'प्रकर्ता' इत्यादौ रेफादावप्येष स्वरः सिध्यतीति भाष्यार्थः। ननु रेफस्य परादित्वेऽपृक्तत्वाभावाद्विलोपो न प्राप्नोतीति किं नोच्यते। न च हल्ङ्यादिलोपे संयोगान्तलोपेन तन्निवृत्तिः, [2]'रात् सस्य' इति नियमात्, अत आह — **अन्तरङ्गत्वादिति**। विभाषाश्रयत्वात् प्रकृति[3]प्रत्ययानपेक्षतयान्तरङ्गत्वम्। लोपविधेर्बलवत्त्वाच्च पूर्वं विलोपः पश्चादित्वरेफाविति रेफः सोरादिः। **रात्सस्येति**। [4]'हल्ङ्याब्भ्यः' इत्यत्र हलन्तात् सोर्लोप इति तेनात्र लोपो न प्रवर्तत इति भावः। **पूर्वान्तेति**। नार्कुट इत्यादावन्तरङ्गे विसर्जनीये कर्तव्ये बहिरङ्गाया वृद्धेरसिद्धत्वाद्विसर्गाप्रसङ्गः। दोषान्तरं च भाष्य एव परिहृतमिति भावः॥

[१, ३८५-३९१]

(**रत्नप्रकाशः**) **किं पुनरयमिति**। ननु उः स्थाने प्रसज्यमानस्यैवाणो रपरत्वविधानाद् रेफविशिष्टस्यैवाण ऋकारादेशत्वेन यस्य ऋकारोऽवयवस्तस्यैव तावण्रेफावयवाविति सुज्ञानत्वेनायं विचारोऽनुपपन्न इति चेन्न, पाणिनीयशिक्षानुसारेण ऋकारस्य गुणवृद्धिविधावकार एवान्तरतम इति स्थानेऽन्तरतमसूत्रेणैव व्यवस्थोपपत्तौ द्वितीयस्थानग्रहणानुवृत्तिमन्तरेणैव प्रकृतसूत्रं व्याख्येयमिति पक्षस्यैव पाणिन्यभिमतत्वौचित्येन तत्रास्य विचारस्य युक्तत्वात्। एतेन 'यद्यपि प्रसज्यमान एवाण् रपरो विधीयते, तथाप्यानङ इव साक्षात् अर् आर् इत्येवमविधानात् तात्पर्यपर्यालोचनन्यायेन केवलावस्थानात् पक्षत्रयविमर्शः' इति निरस्तम्। साक्षादुच्चारितसमुदायघटकानामेवावयवत्वं नान्येषामित्यत्र मानाभावात्। तथात्वे द्वाभ्यामित्यादौ त्यदाद्यत्वादेरादेशस्यावयवत्वाभावे [5]'सुपि च' इति दीर्घाभावप्रसङ्गाच्च। किं च 'अथादिरिति वर्तते ततः परादिः' इति भाष्यमनुपपन्नं स्यात्, प्रसज्यमानस्याणो रपरत्वविधिकाले परस्याभावात्। **यद्यन्त इति वर्तत इति**। तथा च 'उः स्थाने योऽण् स रपरः स्यात्, स रः पूर्वस्यान्तः' इति व्याख्यानात् पूर्वान्तपक्षसंभव इति भावः। एवं परादिपक्ष उन्नेयः। एतेन 'यद्यपि रपर इत्यत्रान्यपदार्थस्य प्राधान्यम्, तथापि रेफस्य विधेयतया प्राधान्यात् तस्यैवान्तत्वं विशेषणमिति भावः' इति निरस्तम्। 'उः स्थाने योऽण् स रपरः स्यादन्तश्च' इत्युक्ते शब्दस्वारस्येनाण एवान्तत्वप्रसक्तेः, विधीयमानत्वस्य [6]प्राधान्यत्वप्रयोजकत्वे मानाभावाच्च।

ननु तर्हि रेफस्यान्तत्वादित्वसिद्धिः कथमिति चेच्छृणु, यस्यावयव ऋकारस्तदादेशोऽप्यण् तस्यैवावयव इति तस्यावयवत्वोपदेशाकाङ्क्षाविरहात् तस्मात् परस्य कंचित्प्रत्यवयवत्वस्याक्लृप्तत्वेन तदुपदेशाकाङ्क्षावतो रेफस्यावयव्याकाङ्क्षावतान्तादि[7]ग्रहणेन नष्टाश्वदग्धरथवत् संबन्धादिति। वस्तुतस्त्वादेशप्रत्ययेतरस्य वर्णस्य यस्य यत्संबन्धितया विधानं स तस्यावयव एव भवितुमर्हति, अनर्थकस्य वर्णस्य स्वातन्त्र्येणार्थप्रयुक्तशब्दसमभिव्याहारायोगात्। अत एव "अनुनासिकात्परोऽनुस्वारः' [8]"न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति विहितयोरनुस्वारैचोस्तदवध्यवय-

---

[1] पा. सू. ६. २. ५०.
[2] पा. सू. ८. २. २४.
[3] प्रत्ययानपेक्षया — अ.
[4] पा. सू. ६. १. ६८.
[5] पा. सू. ७. ३. १०२.
[6] 'प्राधान्यप्रयोजकत्वे' इत्युचितं भाति।
[7] आदिशब्दो नास्ति — ब.
[8] पा. सू. ८. ३. ४.
[9] पा. सू. ७. ३. ३.

वत्वम्। एवं च प्रकृतेऽपि रस्यावधिभूताणवयवत्वमेवोचितमिति व्यर्थ एवायं विचार इत्यन्यदेतत्। आद्यपक्षमेव व्यवस्थापयितुमुद्देशव्युत्क्रमेण दोषान् निदर्शयति — **अभक्त इति। ग्रो यङीतीति**। गिरतेरवयवस्य रेफस्य लः स्याद्यङीत्यर्थकेनेत्यर्थः। 'ग्रः' इत्यस्यावयवषष्ठीत्वं विनापि तत्र लत्वं साधयितुं शक्यत इत्याह — **नैष दोष इति। अनन्तरयोगैषेति**। एतेन 'अनन्तरादिषु षष्ठी नास्ति' इति वदन्तः परास्ताः, प्रकृतभाष्यविरोधात्। **स्वर्जेगिल्यत इति**। परस्येव पूर्वस्याप्यानन्तर्याविशेषादिति भावः। विषयव्याप्तये उपायान्तरमाह — **ग्र इति पञ्चमीति**। तथा च [1]'तस्मादित्युत्तरस्य' इति परिभाषया परस्यैव लत्वं भविष्यतीति भावः। **अचः कर्तृयकीत्येष इति**। अजन्तस्य धातोरादिरुदात्तः स्यात् कर्त्रर्थके यकीत्यर्थकेन [2]'अचः कर्तृयकि' इत्यनेन विधीयमान इत्यर्थः। **स्वरविधौ व्यञ्जनमिति**। यद्यपि यस्य व्यञ्जनस्य स्वरप्रसक्तिस्तदविद्यमानवदिति परिभाषार्थः, तथापि बहुषु दूषणेषु सत्स्वेकस्य दूषणस्य परिहारेऽप्यभक्तपक्षो न स्थापित एवेति स नोद्भावितः। **पिपरुरिति**। पॄ लङ झि शपः श्लुः, द्वित्वम्, [3]'अर्तिपिपर्त्योश्च' इतीत्वम्। [4]'सिजभ्यस्त' इति जुस्, [5]'जुसि च' इति गुणः। **ववृत इति** 'अभ्यासस्य' इत्यवयवषष्ठी नेति वक्तुं न शक्यत इति भावः। **नार्कुट इति**। नॄकुट्यां भव इत्यर्थः। तत्र [6]पदविधौ तदादिशब्दानुवृत्त्या रेफान्तस्य पदत्वम्। पूर्वान्तपक्षेऽप्यत्रायं दोषः प्राप्नोति। **किरत इति**। एकवचने नित्यत्वाद् गुणं बाधित्वा विकरणो भवति, तत इत्वम्, ततो रपरत्वमिति व्यवस्थासंभवाद् द्विवचनमुदाहृतम्। तत्र त्वित्वविकरणयोरुभयोर्नित्यत्वात् परत्वादित्वे ततो रपरत्वं विकरणश्च युगपत्प्रसक्ताविति अभिमतव्यवस्था न सिध्यतीति भावः। पूर्वं रेफप्रवृत्तौ हि विकरणस्य धातुपरत्वं न स्यात्, [7]'विकरणप्रवृत्तौ च रेफस्याण्परत्वम्'। उभावपि साक्षादेव परत्वमन्यत्रानुभूताविति व्यवहितपरत्वं स्वीकर्तव्यमित्यत्र विनिगमकाभावः। विकल्पे त्विष्टासिद्धिः। **पूर्वान्तः करिष्यत इति**। यद्यप्यस्य पक्षस्य निर्दुष्टत्वादन्ते निर्देश उचितः, तथाप्यत्रोक्तदोषाणां सुपरिहराणामपि साकल्येन तत्परिहारमनुक्त्वा तान् परादिपक्षेऽप्यापाद्य ततस्तत्पक्षेऽन्यानि बहूनि दृढदूषणानि दत्त्वा पुनरस्य पक्षस्य दूषणानि [9]सुपरिहराणीति मनसैव तत्परिहारं बुध्वा समापनान्न दोषः। **रोरवधारणमिति**। अभक्तपक्षेऽपि कर्तव्यमेव, तदादिग्रहणेन रेफान्तस्यैव पदत्वात्। **नार्कुट इति**। अत्र कार्यकालपक्षाश्रयेण वृद्धेरसिद्धत्वाद्विसर्गाभावो बोध्यः। **नार्कल्पिरिति**। नॄकल्पस्यापत्यमित्यर्थः। अत्र अत इञि कृते वृद्धौ च ततः प्रवृत्तो रेफः परस्य कल्पिशब्दस्यैवावयवः स्यात्, न तु तदवयवस्य कल्पस्येति कल्पप्रत्ययनिमित्ता पदसंज्ञा रेफान्तस्यैवेति भावः। यद्यपि कल्पप्रत्ययोऽर्थवान्, कल्पिशब्दोऽनर्थकः, तथाप्यत्र शब्दस्वरूपविशेषानुपादानेनार्थवत्परिभाषाप्रवृत्त्ययोगेन प्रधानाप्रधानन्यायेन कल्पप्रत्ययघटितानर्थकसमुदायस्यैव प्रधानस्याद्यवयवः स उचित इति न दोषः। तदेतत् सूचयति — **कल्पिपदसंघातभक्त इति**। पद्येते अर्थावाभ्यामिति पदौ कल्पेजौ, तयोः संघातः कल्पिपदसंघातः, तस्य भक्तोऽवयव इत्यर्थः। **उपदेश इति वर्तत इति**। [10]'तास्यनुदात्तेत्' इत्यतः। तथा च 'गीर्यते' इत्यत्र धातुरुपदेशेऽजन्त इति न दोष इति भावः। **धिनुत इति**। एकवचनेऽकारलोपाभावेऽप्याद्गुणेनैव धिनोतीति सिध्यतीति द्विवचनमुदाहृतम्। यत्तूक्तम् ['विकरणस्य वा]

---

[1] पा. सू. १. १. ६७.
[2] पा. सू. ६. १. १९५.
[3] पा. सू. ७. ४. ७७.
[4] पा. सू. ३. ४. १०९.
[5] पा. सू. ७. ३. ८३.
[6] पदसंज्ञाविधावित्यर्थः।
[7] पूर्वमित्यस्यानुषङ्गः।
[8] न स्यादित्यनुषज्यते।
[9] सुपरिहाराणीति — ब.
[10] पा. सू. ६. १. १८६.

गुणे पररूपे च धिनोतीति सिध्यति' इति। तन्न, समानाश्रयत्वाभावेन [1]"वार्णादाङ्गम्' इति परिभाषाया अप्रवृत्त्यान्तरङ्गस्याद्गुणस्यैवौचित्यात्। **आर्धधातुकोपदेश इति**। [2]"धिन्विकृण्व्योर च' इत्यकारादेशविध्युत्तरं चानुकृष्टस्य प्रत्ययस्य विधानात् तदुपदेशकाले धातुरदन्त इति भावः। एतेन 'संनियोगेन चाकारस्य विधानादार्धधातुकप्रतिपत्तिकालेऽकारान्तप्रतिपत्त्या सिद्धो लोपः' इति निरस्तम्। तत्र 'धिन्विकृण्व्योः' इति षष्ठीनिर्दिष्टानुवादेनादेशप्रत्यययोर्यौगपद्येन विधानायोगेन तयोरेकस्मिन् काले प्रतिपत्त्ययोगात्। उपदेशशब्दस्याज्ञातज्ञापनार्थत्वेन ज्ञापकव्यापारोत्तरभावित्वेन ज्ञानस्य तत्कालेऽदन्तत्वेऽपि तत्पूर्वोपदेशकाले तदभावाच्च। **निर्दिश्यमानस्येति**। यद्यपि [3]"अर्थवत आगमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति न्यायेन रेफविशिष्टो णल्ग्रहणेन गृह्यते, तथापि [4]"स्वं रूपम्' इति सूत्रेण यस्य संज्ञित्वं बोधितं तन्मात्रस्यैव स्थानित्वं निर्दिश्यमानपरिभाषया व्यवस्थाप्यत इति भावः। एवं च तस्य रेफेण व्यवधानोक्तिरपि युज्यत एव। एतेन "ननु [5]"आदेः परस्य' इति रेफस्यौत्वेन भाव्यम्। नैष दोषः, णल इत्यनेन यत् प्रत्यायितं प्रयोगविषयमकारमात्रं तस्याकारान्तादङ्गादुत्तरस्यादेशः प्रवर्तते, सरेफस्य त्वनुमीयमानत्वादादेशाभावः। प्रत्याय्यप्रत्यायकामेदविवक्षायां षष्ठीनिर्दिष्टस्यादेशा इत्युच्यते" इति निरस्तम्। 'औत्वं प्राप्नोति' इति दोषापादनस्य रेफपर्यवसायित्वेन तत्परिहारपरे 'निर्दिश्यमानस्य' इत्यस्मिन् पुनः [6]"आदेः परस्य' इति शङ्कानौचित्यात्। [7]"अर्थवत आगमः' इति परिभाषाया विद्यमानत्वेन 'णलः' इत्यनेन प्रयोगविषयाकारमात्रप्रतीतेः सरेफस्यानुमेयत्वोक्तेश्चायोगात्। 'प्रत्याय्य' इत्यादेर्व्यर्थासंबद्धप्रलापत्वाच्च। यत्तूक्तं विवरणकृता "ननु 'निर्दिश्यमानस्य' इत्यनुपपन्नम्, सौत्रस्य [यस्य] षष्ठ्या निर्देशो न तस्यादेशः, तेन प्रत्यायितस्य प्रयोगस्थस्येत्यत आह — **प्रत्याय्येति**।" इति। तदपि न, "रूपसामान्याद्वा' इति [8]"अइउण्' इत्यत्र भाष्यकारनिदर्शितदिशा [9]"स्वं रूपम्' इति सूत्रविषयपरतया 'निर्दिश्यमानस्य' इति वचनस्योपपन्नत्वेनाभेदोपचाराश्रयणायोगात्। प्रायेणात्र शास्त्रे [10]"स्वं रूपम्' इति सूत्रविषयस्य सत्त्वेनात्रैव विशिष्य तदनुपपत्त्युद्भावने बीजाभावाच्च। **आस्तरितेति**। स्तृञ् आच्छादने। परत्वाद् गुणे कृते ततो नित्यत्वादणो रपरत्वे सति तृचो रेफादित्वेन [11]"नेड् वशि कृति' इतीण् न स्यादिति तदेवेटोऽव्यवस्थेति भावः। एतेन 'नित्यत्वाद् गुणे कृते' इति कैयटो निरस्तः। [12]"यस्य तु निमित्तं लक्षणान्तरेण विहन्यते नासावनित्यः' इति न्यायेन रपरत्वविधिनेटो निमित्तस्य वशन्यवलादित्वस्य विघातेऽपि तस्य गुणापेक्षयानित्यत्वायोगात्[13]। यदप्युक्तं तेनैव 'प्रवृत्तौ वा रेफात्पूर्वं इडित्यनिष्टा व्यवस्था प्राप्नोति' इति। तदपि न, तत्रेटः प्रतिषेधे विद्यमाने तत्प्रवृत्त्यभ्युपगमपूर्वकानिष्टव्यवस्थापादनस्याध्येतृमनःखेदमात्रफलकस्यानौचित्यात्। यत्तु विवरणकृतोक्तम् [14]"'एकाच उपदेशे' इत्यत्र [15]"नेड् वशि कृति' इत्यनुवृत्त्योपदेशे वशादेः कृत इट्प्रतिषेध इत्यङ्गीकृत्यैवमुक्तम्" इति। तन्न, 'गुणे रपरत्वे च कृते तत इड् भवति' इति पूर्वान्तपक्षे इटो

---

[1] परिभाषा ५५.
[2] पा. सू. ३. १. ८०.
[3] का. वा. १. १. २०—५.
[4] पा. सू. १. १. ६८.
[5] पा. सू. १. १. ५४.
[6] पा. सू. १. १. ५४.
[7] का. वा. १. १. २०—५.
[8] का. वा. अइउण्सूत्रे.
[9] माहेश्वरसूत्रम् १.
[10] पा. सू. १. १. ६८.
[11] पा. सू. १. १. ६८.
[12] पा. सू. ७. २. ८.
[13] परिभाषा ४७.
[14] अनित्यत्वायोगादिति छेदः।
[15] पा. सू. ७. २. १०.
[16] पा. सू. ७. २. ८.

या व्यवस्था भवति सा परादित्वपक्षे न प्रकल्पते, रपरत्वविध्युत्तरं [1]'नेड् वशि' इतीडागमनिषेधादित्येवंपरतया यथाश्रुतभाष्यस्योपपन्नत्वेन व्यर्थक्लिष्टकल्पनायोगात्। **एष स्वर इति**। अनन्तरगतिप्रकृतिस्वरः। **उक्तमेतदिति**। [2]'तादौ च निति कृत्यतौ' इति सूत्र एव। **कृदुपदेश इति**। उपदेशे यः कृत् तादिस्तुभिन्नस्तदन्ते उत्तरपदेऽनन्तरो गतिः प्रकृत्या स्यादित्येतदर्थलाभार्थं तत्सूत्रे कृद्ग्रहणं कृतमिति तद्वार्तिकार्थः। 'इडर्थम्' इत्युपदेशपरतया व्याख्यानप्रयोजननिदर्शनपरम्। तेन प्रलपितादिसिद्धिरिति भावः। तथा चात्र रस्य परादित्वेऽपि [3]तृन्नादीनामुपदेशे तादित्वसत्त्वान्न दोष इति भावः। **गीरिति**। गृधातोः क्विप्यन्तरङ्गत्वात् [4]'वेरपृक्तस्य' इति वकारलोपे ततः प्रत्ययलक्षणेनाङ्गसंज्ञामाश्रित्य [5]'ऋत इद्धातोः' इतीत्वे ततः सुपि ततो [6]'रात् सस्य' इति सलोपे रान्तस्य पदत्वेऽपि धातुत्वाभावेन [7]'वोरुपधायाः' इति दीर्घो न स्यादिति भावः। तदेवं परादित्वपक्षोऽपि दूषित इति पूर्वान्तपक्ष एव स्थितः। तत्र र्ववधारणं कर्तव्यमित्यापादितं तत् कृतमेवेति न दोषः। विसर्जनीयप्रतिषेधोऽपि न कर्तव्यः, कार्यकालपक्षे तदभावस्य साधितत्वात्। यक्स्वरस्तूपदेशानुवृत्त्या भाष्यकृता समर्थित इति न कोऽपि दोषः॥

[१, ३८५–३९१]

(**नारायणीयम्**) कथं पुनर्वृत्तिगतविशेषणस्य विशेषणान्वयः, येन रेफेऽन्तत्वादिसंदेह इति शङ्कते — **यद्यपीति**। अर्थप्रधानत्वाद्विशेषणसंबन्धमुपपादयति — **तथापीति**। यद्यपि शब्दशास्त्रेऽर्थप्राधान्यमनुपयोगि, तथाप्यनुवर्तमानस्य विशेषणस्य प्रधानेनाणान्वयासंभवादनवृत्तिसामर्थ्यादुपसर्जनेनान्वय इति भावः। ननु विहिताणो रपरत्वविधाने स्यादेव विमर्शः, प्रसङ्गे रपरत्वविधानात्त्वकारादीनां विधिगोचरत्वम्, तत्र च पूर्वान्तत्वं निश्चितमिति नाभक्तत्वादि[विशय इत्यत आह — **यद्यपीति**। **अविधानादिति**। न ह्यस्य विधेः अर् आर्] इति विषयः, येन न स्यात् संदेह इत्यर्थः। यद्येवं [8]'कथमरारादिविधिमङ्गीकृत्य ऋवर्णगुणादि[9]'विधावरारादीनामान्तरतम्यमुक्तम्, अत आह —**तात्पर्येति**। एतद्वाक्यस्य गुणादिवाक्यस्य च तात्पर्ये पर्यालोचिते रेफविशिष्टस्य विधिगोचरत्वमनुमेयमिति तस्यादेशतां स्वीकृत्य [10]'ऋवर्णान्तिरतम्यमुक्तमिति भावः। केवलमवस्थानादिति पाठः। [11]'अरादिरूपतयावस्थानादित्यर्थः। केवलावस्थानादिति पाठस्तु क्लेशतो व्याख्येय इत्युपेक्ष्यते। पञ्चम्यामानन्तर्यषष्ठ्यां वेष्टसिद्धिमाशङ्क्याह — **अ इति**। यद्यपि साक्षादभ्यासग्रहणमादिहल्विशेषणम्, तथाप्यनादेर्निवर्त्यमानस्यापि तदीयत्वमवगम्यत एवेत्याह — **अभ्यासेति**। यस्मात् सुब्विधानं [12]'तस्य पदत्वमिति कथं [13]'विसर्जनीयप्रसङ्गः, तत्राह — **यस्मादिति**। **नित्यत्वादिति**। ततश्च कृते तस्मिन् इत्वं रपरम्। न च [14]'रेफस्याभक्ततया विकरणस्य धातोः परत्वाभावः, विधिवेलायामेव तदपेक्षणात्, न प्रयोगवेलायामपि। ननु धातोः

---

[1] पा. सू. ७. २. ८.
[2] पा. सू. ६. २. ५०.
[3] तृजादीनां — ब.
[4] पा. सू. ६. १. ६७.
[5] पा. सू. ७. १. १००.
[6] पा. सू. ८. २. २४.
[7] पा. सू. ८. २. ७६.
[8] कथमाकारादिविधिम् — क.
[9] विधावकारादीनाम् — क.
[10] ऋवर्णान्तिरतममुक्तमिति — क.
[11] अनादिरूपतया — क.
[12] प्रत्ययलक्षणेनेति शेषो बोध्यः।
[13] प्रकृते रेफान्तात् सुब्विध्यभावादिति भावः।
[14] रेफस्य भक्ततया — क.

परो विकरणो भवतीति सरेफस्याधातुत्वाद्रेफात् प्राग् भविष्यतीति शङ्कते — **अथेति**। यद्यप्येवं [1]प्रत्ययस्य धातोः परत्वेन व्यवस्था, तथापि मध्ये सति प्रत्यये रेफस्याणः परत्वेन न स्याद् व्यवस्थेत्येषा प्रत्ययाव्यवस्था प्राप्नोतीत्याह — **तदापीति**। न च प्रागुक्तन्यायाद्विधिसमये रेफस्याणः परत्वमपेक्षितम्, न प्रयोग इति वाच्यम्, प्रसङ्गे रपरत्वचोदनादरादिरूपस्य तात्पर्यतो विधिगोचरत्वेन प्रयोगेऽपि रपरत्वस्यापेक्षितत्वादिति भावात्, [2]अभिमतेः किं प्रत्ययस्य धातोः परत्वं गौणमुत रेफस्याण इत्यनिश्चयात्। पक्षान्तरसाधारण्यं निवारयति — **परादाविति**। 'परादावपि' इति भाष्यादभक्तत्वपक्षे र्ववधारणस्याकर्तव्यतामाशङ्क्य चतुर्थ्यर्थत्वमेव परादिपक्षे, अत्र त्वेतदर्थमपीत्याह — **अभक्तेति**। संघातभक्तत्वात् कल्पमात्रभक्तत्वं कस्मान्नेत्याशङ्क्य यदवस्थायां रेफागमनं तदवस्थायां यः संनिहितस्तद्भक्तत्वं वाच्यम्, स च संघात एवेत्याह — **नूकल्पेति**। नन्वस्तु संघातभक्तत्वम्, तावता कथं रेफान्तस्य पदत्वम्। न हि ततः कल्पो विहितः, तत्राह — **ततश्चेति**। ननु किं पदात्मकः संघातो विवक्षितः, उत पदयोः संघात इति। नोभयमपि, कल्पेस्तदवयवयोश्चापदत्वादित्यत्राह — **पदेति**। अक्षरव्याख्यानम् — **तेनेति**। क्वचित् 'कल्पपदसंघात' इति पाठे कल्पशब्दस्य निरुक्तपदसंघातत्वस्याप्यनुपपत्तेस्तमनूद्य समर्थयते — **क्वचित्त्विति**। प्रथमातिक्रमे कारणमाह — **एकवचन इति**। नन्वार्धधातुकोपदेशेऽकारान्तमित्युच्यमाने तदुपदेशात् प्राक् प्रकृतेरकारान्तत्वेन भाव्यम्। यथा 'अतिथ्यागमनेऽस्य गृहेऽन्नम्' इत्युक्तेऽन्नसिद्धेरतिथ्यागमनप्राक्कालीनत्वमित्याशङ्क्य 'चोरागमने कवाटपिधानम्' इतिवदेककालत्वेऽप्येतादृशव्यवहारोपपत्तिरित्याह — **संनियोगेनेति**। **नन्विति**। उक्तं ह्येतत् — [3]'आदेः परस्य' [4]'अलोऽन्त्यस्य' इति निर्दिश्यमानपरिभाषया न बाध्यत इति। भवेदेतत्, यदि रेफवतः [5]कार्यित्वप्रतिपत्तिः स्यात्। यथा [6]'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यत्र 'अप'शब्दसमुदायस्य निर्दिश्यमानत्वेऽप्यकारस्येकारः, अकारवत्तयैव [7]कार्यिताप्रतिपत्तेः, इह तु न रेफवतः [8]कार्यित्वप्रतिपत्तिरित्याह — **नैष इति**। कथं पुनः रेफवान् [9]कार्यितया नावगम्यते, रेफस्य [10]णल्भक्तत्वेन तद्ग्रहणेन ग्रहणात् 'णलः' इत्यनेन सरेफप्रतिपत्तेरित्याशङ्क्य निर्दिश्यमानपरिभाषया तद्रहितस्य [11]कार्यित्वप्रतिपत्तिरिति वक्ति — **णल इति**। ननु 'अतः' इत्यादिनिर्देश एवाकारस्य निर्दिश्यमानत्वम्, 'णलः' इति तु निर्देशः प्रत्ययस्येत्यादिवन्नाकारस्येत्याशङ्क्य प्रत्ययादिपदं नाकारमात्रावेदकम्, प्रत्ययत्वस्यागमयुक्तसमुदायनिष्ठत्वात्, णल्पदं तु साक्षादकारमात्रमावेदयति। न ह्ययं संज्ञाशब्दः, येन सागमकं साक्षात् प्रतिपादयेत्। किं त्वनुकरणशब्दः। स चानुकार्यं साक्षादावेदयति। अनुकार्यं चाकारमात्रमेव, सानुबन्धकरूपस्याप्रयोगसमवायिन औत्वविधावननुकार्यत्वात्। अकारविशेषप्रतिपत्तयेऽसन्नेव[12] संप्रति भूतपूर्वोऽनुबन्धोऽनुकृतः। प्रतिपत्तावकारमात्रमेव प्रतिपद्यते। ततो [13]युक्तमकारस्य निर्दिश्यमानत्वमित्याह — **प्रयोगेति**। ननु निर्दिश्यमानत्वं षष्ठ्यन्ततयोच्चार्यमाणत्वम्, तच्च प्रत्यायकस्य सानुबन्धकस्य धर्मः। प्रत्याय्यस्य तु निरनुबन्धकस्यादेशविधिरिति कथं निर्दिश्यमानस्यादेशोक्तिः, अत आह —

---

[1] प्रत्ययस्याधातोः — क.
[2] अभिमते किं — क.
[3] पा. सू. १. १. ५४.
[4] पा. सू. १. १. ५२.
[5] कार्यत्व — क.
[6] पा. सू. ६. ३. ९७.
[7] कार्यता — क.
[8] कार्यत्व — क.
[9] कार्यतया — क.
[10] हल्भक्तत्वेन — क.
[11] कार्यत्व — क.
[12] संप्रत्यसन्नेवेत्यन्वयः।
[13] युक्तमाकारस्य — क.

प्रत्याय्येति। [1]'पादः पत्' इत्यादावप्येवमेव। तत्र तु प्रत्याय्यप्रत्यायकयोः स्वरूपाभेदः, इह तु तद्भेद इत्येष विशेषः। कथं पुनर्भक्तेन व्यवधानम्, अत आह — **यदीति**। एतच्च प्राक् प्रपञ्चितम्। ननु विशिष्टरूपानुपादानेऽपि 'णलः' इति निर्देशेऽपि सागमकस्य न कार्यं चेत् क्व तर्हि तद्भक्तस्य तद्ग्रहणेन ग्रहणमिति न्यायप्रवृत्तिः, अत आह — **यदिति**। एतच्च समनन्तर-ग्रन्थे विवृतम्। **स्यादेवेति**। समुदायस्य। न च तथोक्तम्, तस्मान्नादेश इत्यर्थः। एवं च ब्रुवता तद्भक्तन्यायस्य विषयो दर्शितः। **प्रवृत्तौ वेति**। उपदेशग्रहणापकर्षणादिति भावः। अपृक्तलोपात् प्रागित्वे रपरत्वं चेदपृक्त[2]लोपाप्रसक्तिः, अत आह — **अन्तरङ्गत्वादिति**। पूर्वान्त-पक्षोक्तदोषस्य बहिरङ्गपरिभाषया परिहार्यत्वादाह — **इतीति**॥

अलोऽन्त्यस्य १. १. ५२.

[१, ३९१–३९३]

(**लघुविवरणम्**) 'अलन्त्यस्य' इत्युच्यमाने सूत्रविपर्यासः स्यादित्यत आह — **प्रथमेति**। 'इदं नियमार्थम्' इत्ययुक्तम्, अप्राप्तान्त्यादेशविधानेन सूत्रस्य विध्यर्थत्वादित्यत आह — **अन्त्यस्येति**। 'तत्र क्रियेत' इत्यस्यानन्तरमवश्यकर्तव्योऽसौ योग इत्यध्याहारमभिप्रेत्याह — **अवश्येति**। एवं तर्हि 'अन्त्यविशेषणेऽपि' इत्ययुक्तमित्यत आह — **अथेति**। स्थाने विज्ञातस्य कस्येत्याकाङ्क्षायां सयुक्तिकमाह — **षष्ठीति**। [3]**ततश्चेति**। [4]अल्भक्तत्वादिति भावः। 'उपपत्त्या' इत्यन्तः पूर्वशेषः। सौत्रिकत्वेऽप्यमनुसंहारो न भवतीत्याह — **अनुसंहार इति**॥

[१, ३९१–३९३]

(**विवरणम्**) भाष्ये [5]'प्रसज्येत' इत्यस्यानन्तरं 'तन्निवृत्तयेऽनेकाल् सर्वस्येति वक्तव्यं स्यात्' इति शेषः। ननु 'अलन्त्यस्य' इत्युच्यमाने सूत्रभेदः कुतो न भवतीत्यत आह — **प्रथमेति**। बहुत्वमविवक्षितमिति दर्शयितुमेवमुक्तमिति भावः। उपन्यासमात्रमेतत्, न त्वयं पक्षो विवक्षित इति दर्शयितुं प्रयोजनाभिधानार्थभाष्यव्याख्यानात् पूर्वमेवास्मिन् पक्षे दोषमाह — **अस्मिन्निति**। इदमा सूत्रं [6]न परामृश्यते, तस्य विध्यर्थत्वात्। किं त्वल्पदमिति दर्शयंस्तस्य नियमार्थतामुपपादयति — **अन्त्यस्येति**। अलात्मकस्याप्यादेशस्याक्षेपादित्यर्थः। **न त्विति**। [7]'षष्ठी स्थानेयोगा' इती-हानुवर्तते। तत्रैवमभिसंबन्धः — यः स्थाने षष्ठ्या बोधितस्तदन्त्यस्येति। न च वाक्यं तथे-त्यर्थः। **पदस्य त्विति**। अन्त्यस्येत्यनेन सामानाधिकरण्येन संबध्यते। पदस्येत्यधिकृतस्य वस्वा-दिभिर्विशेषणात् [8]'तदन्तः समुदायः षष्ठ्या बोधितः। सोऽन्त्योऽनडुच्छब्दः पदमिति भावः। पर-कीयाभिप्रायं 'यदि खलु' इति वदता स्वाभिप्रायोऽन्यादृशः सूचितः, स कीदृश इत्यत आह —

---

[1] पा. सू. ६. ४. १३०.
[2] लोपप्रसक्तेः — क.
[3] 'ततश्चेति' इत्यादि 'इति भावः' इत्यन्तं नास्ति — ण, त.
[4] अलभक्तत्वादिति — ढ.
[5] प्रसज्यते — च.
[6] 'न' इति नास्ति — छ.
[7] पा. सू. १. १. ४९.
[8] यदन्तः समुदायः — च; तदन्तस्यान्त्यो-ऽनडुच्छब्दः — अ.

अवश्येति। नन्वेवमवश्यकर्तव्यश्चेद्योगः कस्मात् 'अन्त्यविशेषणेऽपि' इत्युक्तमित्यत आह — **अथेति**। स्थाने विज्ञातस्य कस्येत्यपेक्षायामाह — **षष्ठीति**। नन्वेवं [1]"विज्ञातायाः' इति कस्मान्नोक्तमित्यत आह — [2]**आदेश इति**। 'षष्ठीमात्रम्' इत्युपलक्षणम्, यदि षष्ठयुच्चारणेन विधीयमानमात्रमित्यपि द्रष्टव्यम्। किं योगशेष [त्वम्] इत्यपेक्षायामाह — **षष्ठीति**। **संबन्धार्थमिति**। अन्त्यस्याल इत्यादिः। स्थानेयोगत्वमेव बाध्यत इत्यत्र हेतुः — **तुल्येत्यादिरुपपत्त्येत्यन्तः**। 'अलोऽन्त्यस्य' इत्यनुसंहारः सापवाद इत्याह — **अन्विति**॥

[१, ३९१–३९३]

(**उद्द्योतनम्**) ननु 'अलः' इति षष्ठी, न प्रथमाबहुवचनम्, बहुत्वानुपयोगात्। तथा च संशयायोगः, अत आह — **षष्ठीति**। बहुत्वस्यादेशभेदाभिप्रायत्वसंभवादिति भावः। भाष्ये 'प्रसज्येत' इत्यनन्तरं 'तन्निवृत्तयेऽनेकालिति कर्तव्यं स्यात्' इति शेषः। षष्ठयन्तत्वे 'अलन्त्यस्य' इत्ययुक्तम्, सूत्रभेदश्च कृतः स्यात्, अत आह — **प्रथमेति**। अत्र स्वयं दोषान्तरमाह — **अस्मिन्निति**। 'अलेवान्त्यस्य' इत्युक्ते लोपस्यानल्त्वेन सर्वादेशत्वप्रसङ्ग इत्यर्थः। अयं पक्षो [3]भाष्यकृतोऽनभिप्रेत इति द्योतयितुं भाष्यव्याख्यानात् पूर्वमेव दोषोपन्यासः। भाष्ये **अर्थः** प्रयोजनम्। विरजीकरोतीत्यत्र सर्वादेशः प्राप्नोतीत्यन्वयः। इदमा सूत्रं न परामृश्यते, तस्य विध्यर्थत्वात्। किं त्वल्पदमिति दर्शयन् तस्य नियमार्थतामुपपादयति — **अन्त्यस्येति**। अन्यतः प्राप्ते नियम इति प्राप्तिमाह — **अल इति**। अलात्मकस्यादेशस्यापीत्यर्थः। **आक्षेपादिति**। अत्र वाक्यभेदः। अन्त्यस्येति स्थानषष्ठ्याक्षिप्ता अलनलात्मका आदेशा अन्त्यस्य भवन्ति, तत्रालात्मक एवादेशोऽन्त्यस्य भवतीति। **दोषेति**। दोषप्रतिपादनपरत्वादतिप्रसङ्गकथनाय 'वाक्यस्य' इत्युक्तम्, न तु परमार्थतयेत्यर्थः। **न त्विति**। [4]"षष्ठी स्थाने' इतीहानुवर्तते, यः स्थानषष्ठ्या बोधितस्तदन्त्यस्येति[5]। न च [6]वाक्यं तथा। तेन [7]"वाक्यस्य टेः' इत्यादौ षष्ठीनिर्देशेऽपि न दोष इति भावः। **पदस्य त्विति**। अन्त्यस्येत्यनेन सामानाधिकरण्येन संबध्यते। आष्टमिकस्य "पदस्य' इत्यस्य [9]"अपदान्तस्य मूर्धन्यः' इत्येतत्पर्यन्तमधिकृतत्वात् पदस्य वस्वादिभिर्विशेषणात् वस्वन्तस्य पदस्य, इतरेषां पदरूपाणां निर्देशादन्त्यस्यानडुत्पदस्य दत्वं प्राप्नोति, एवं परमविद्वद्भ्यामित्यादावपीत्यर्थः। 'यदि खलु' इत्यनेन स्वाभिप्रायोऽन्यथा सूचितः, तमाह — **अवश्येति**। **अपवादेति**। 'अलोऽन्त्यस्य' इत्यस्य [10]"आदेः परस्य' [11]"अनेकाल्शित् सर्वस्य' इत्यपवादौ। तत्र [12]"अतो भिस ऐस्' इत्यादौ [13]"अनेकाल्शित्' इत्येव परत्वाद् भवति। तत्सूत्रेऽनेकाल्ग्रहणाभावे [14]"आदेः परस्य' इत्येतदेव निर्बाधं [15]प्रवर्तेतेति 'अनेकाल्' इत्यवश्यं कर्तव्यमित्यर्थः। नन्ववश्यकर्तव्यत्वे [16]"अन्त्य-

---

[1] विज्ञातेति — च, छ, ञ, ट.
[2] अथवेति — ट.
[3] भाष्यकृतोऽनभिमत इति — अ, इ.
[4] पा. सू. १. १. ४९.
[5] तदन्तस्येति — अ, म, आ, इ, ऋ.
[6] वाच्यं तथा — म.
[7] पा. सू. ८. २. ८२.
[8] पा. सू. ८. १. १६.
[9] पा. सू. ८. ३. ५५.
[10] पा. सू. १. १. ५४.
[11] पा. सू. १. १. ५५.
[12] पा. सू. ७. १. ९.
[13] पा. सू. १. १. ५५.
[14] पा. सू. १. १. ५४.
[15] प्रवर्तत इति — अ, म.
[16] अन्त्यस्य विशेषणेऽपि — अ.

विशेषणेऽपि' इत्युक्तिरयुक्ता, अत आह — **अथेति**। भिसादौ शित्करणेनैवापवादविप्रतिषेधोपपत्तेरनेकाल्ग्रहणं न कर्तव्यमिति लाघवं कथंचिद्वक्तुं शक्यमिति भावः। स्थाने विज्ञातस्य कस्येत्यपेक्षायामाह — **षष्ठीति**। तर्हि वार्तिके 'विज्ञातायाः' इति निर्देशः स्यात्, अत आह — **आदेशो वेति**। 'षष्ठीमात्रम्' इत्युपलक्षणम्, षष्ठ्युच्चारणेन विधीयमानमात्रमपीति ज्ञेयम्। आगमेषु प्रवृत्तावनिष्टमाह — **तत्रेति**। [1]'आर्धधातुकस्य' इति षष्ठ्या अन्त्येऽल्युपसंहारादित्यर्थः। भवत्वाकारस्यैवागमः, अत आह — **ततश्चेति**। [2]'दाधा घ्वदाप्' इति सूत्रे प्रणिधापयतीत्यत्र पुगन्तस्य घुसंज्ञाया अभावान्नेर्णत्वं न प्राप्नोतीत्याशङ्क्य [3]'न वार्थवतो ह्यागमस्तद्ग्रहणेन गृह्यते' इति [4]धाग्रहणेन ग्रहणमुक्तम्। आकारागमत्वे घुसंज्ञाया अभावाण्णत्वं न स्यादित्यर्थः। किं योगशेषत्वम्, अत आह — **षष्ठीति**। तर्हि तदनन्तरमेवेदं सूत्रं किमिति न कृतम्, अत आह — **अत्रेति**। **संबन्धार्थमिति**। [5]'ङिच्च' [6]इत्यत्र 'अन्त्यस्यालः' इति संबन्धः, उत्तरसूत्रद्वये चापवाद्यत्वेनेत्यर्थः। योगशेषत्वे निष्पन्नमर्थमाह — **तत्रेति**। स्थानेयोगत्वमेव, न त्वन्त्येऽल्युपसंहारः। योगत्वस्यैव [7]बाधे हेतुमाह — **तुल्येत्याद्युपपत्त्येत्यन्तेन**। सामीप्यसंबन्धेन स्थानसंबन्धस्य [8]'बाधस्तुल्यजातीयत्वाद्युक्त इत्यर्थः। [9]'अन्त्येऽल्यनुसंहारस्तु विजातीयत्वान्न बाध्यत इत्याह — **षष्ठ्यास्त्विति**। तुल्यजातीयत्वादनुसंहारोऽनुसंहारान्तरेण बाध्यत इत्याह — **अनुसंहार इति**। अन्त्येऽलीत्यादिः॥

[१, ३९१–३९३]

(**रत्नप्रकाशः**) 'अलन्त्यस्य' इत्येवेदं सूत्रं मात्रालाघवेन कर्तुमुचितम्। तथा चास्य नियमार्थतासंभवेन [10]'अनेकाल्शित् सर्वस्य' इति सूत्रेऽनेकाल्ग्रहणमपि न कर्तव्यमिति महल्लाघवम्। यथाश्रुतन्यासे तु तत्सूत्रे तदपि कर्तव्यमिति महद् गौरवमित्याशयेन पृच्छति — **किमिदमिति**। **अन्त्यविशेषणमिति**। तथात्वे यथाश्रुतन्यास एव गौरवग्रस्त आश्रयणीय इति भावः। **आदेशविशेषणमिति**। तर्हि [11]'अलन्त्यस्य' इति सूत्रं कर्तुमुचितमिति भावः। एतेन 'षष्ठीप्रथमयोर्निर्देशस्य साम्यात् प्रश्नः' इति कैयटः, "ननु 'अलन्त्यस्य' इत्युच्यमाने सूत्रभेदः कुतो न भवतीत्यत आह — — **प्रथमेति**। बहुत्वमविवक्षितमिति दर्शयितुमेवमुक्तमिति भावः" इति विवरणं च निरस्तं। अन्त्यस्येत्यनेन सामानाधिकरण्येन षष्ठ्येकवचनताया एवात्रौचित्येन प्रथमाबहुवचनकल्पनायां तदर्थाविवक्षायां च मानाभावेन "यदि पुनः 'अलन्त्यस्य' इत्युच्यते" इति स्वाभिमतन्यासान्तरस्य प्रष्ट्रैव साक्षाद्दर्शितत्वेन च यथाश्रुतसूत्रावलम्बनेन तत्प्रश्नोपपादनानौचित्यात्। सूत्रदूषणार्थं प्रवृत्तस्य सूत्रभेदस्यादूषणत्वाच्च। अत एव 'यदि पुनः' इति प्रतीकगतः 'प्रथमाबहुवचनमल इति यदि व्याख्यायेतेत्यर्थः' इति कैयटः परास्तः। तस्य तदभिप्रायकत्वे 'यदि पुनरादेशविशेषणम्' इत्येव वक्तुमुचितत्वात्। तथैवोक्तौ बहुवचनतदर्थत्यागयोः सूचनसंभवात्। **अन्त्यस्य प्रसज्येतेति**। तत्परिहारार्थम् [12]'अनेकाल्शित् सर्वस्य' इति सूत्रेऽनेकाल्ग्रहणमपि कर्तव्यमिति शेषः। **अनेकाल्शि-**

---

[1] पा. सू. ७. २. ३५.
[2] पा. सू. १. १. २०.
[3] का. वा. १. १. २०–५.
[4] वाग्रहणेन — अ; धातुग्रहणेन — आ.
[5] पा. सू. १. १. ५३.
[6] 'इत्यत्र' इत्यस्यानन्तरम् अपिशब्दोऽधिकः – अ.
[7] बाधहेतुमाह — अ.
[8] बाधः। स तु तुल्य — म, आ; बाधः। स तुल्य — ऋ.
[9] अन्त्येऽल्यनुपसंहारस्तु — अ; अन्त्येऽल्युपसंहारस्तु — ऋ.
[10] पा. सू. १. १. ५५.
[11] अलन्त्यमिति सूत्रं — ब.
[12] पा. सू. १. १. ५५.

त्सर्वस्येत्येतदिति। तत्रानेकाल्ग्रहणमिति भावः। 'शित् सर्वस्य' इति तु वक्तव्यमेव [1]'नानुबन्धकृतमनेकाल्त्वम्' इति ज्ञापयितुम्। **इदं नियमार्थमिति**। अल्, [2]अन्त्यस्य, इति विभज्य 'आदेशोऽन्त्यस्य स्यात्' इत्युत्तरभागं व्याख्याय ततो 'भावरूपादेशश्चेदन्त्यस्य, तर्ह्यलेव' इति पूर्वभागो व्याख्यास्यत इति भावः। एतेन 'अन्त्यस्यादेशा भवन्तीत्यलोऽप्याक्षेपादल्ग्रहणमनेकाल्[3]व्यावृत्त्यर्थमिति भावः' इति कैयटः,' 'इदमा सूत्रं न परामृश्यते, अप्राप्तान्त्यादेशत्वविधानेन तस्य विध्यर्थत्वात्। किं त्वल्पदमिति दर्शयन् तस्य नियमार्थतामुपपादयति — **अन्त्यस्येति**। अलात्मकस्यादेशस्याक्षेपादित्यर्थः' इति विवरणं च निरस्ते। पदद्वयस्यैकवाक्यतायां विधिपरत्वमेव सूत्रस्य प्राप्तमिति नियमपरताया [4]ब्रह्मणापि दुरुपपादत्वात्। आदेशविशेषसमर्पकाल्पदे स्वसमभिव्याहृते विद्यमाने तदुपेक्ष्यान्त्यपदेनादेशसामान्याक्षेपायोगात्। अल्पदसहितस्यैव सूत्रत्वेन 'सूत्रं विधिपरम्, अल्पदं नियमार्थम्, इत्युक्तेर्व्याहतत्वाच्च। अत एव "अस्मिंश्च पक्षे [5]'रहोरजसां लोपश्च' इति लोपः सर्वादेशः प्राप्नोति — विरजीकरोति" इति कैयटः 'उपन्यासमात्रमेतत्, न त्वयं पक्षो विवक्षित इति दर्शयितुं प्रयोजनाभिधानार्थभाष्यव्याख्यानात् पूर्वमेवास्मिन् पक्षे दोषमाह — **अस्मिन्निति**।' इति विवरणं च निरस्ते। 'लोपः सर्वादेशो यथा न भवति तथैवास्माभिर्व्याख्यातत्वात्। तदभिमतैकवाक्यतायां नियमार्थताया एव सूत्रस्याप्रसक्तत्वेन "[6]'अनेकाल्शित् सर्वस्य' इत्येतन्न कर्तव्यम्" इत्युक्तेरप्ययुक्तत्वेन लोपस्य सर्वादेशत्वापादनेनास्य पक्षस्यायुक्तत्वकथनस्य स्वाज्ञानमात्रविजृम्भितत्वाच्च। **वाक्यस्यापि पदस्यापीति**। अत्र वाक्यशब्द[7]प्रयोगादेव ज्ञायते — इदं दूषणं शिथिलमिति। न हि किंचिदत्र शास्त्रे वाक्यं स्थानितया निर्दिष्टमस्ति। पदान्तस्य प्राप्नुवन्नादेशो निर्दिश्यमानपरिभाषया यस्मिन् विश्रान्तः स न कथंचित् तस्य वा व्यपदेशिवद्भावेनान्त्यस्य स्यात्, तत्र पुनर्विध्यानर्थक्यात् तदन्त्यस्य पदस्य वा स्यात्। पदशब्दप्रयोगादपि तथा। न हि सुबन्तं वा तिङन्तं वा स्थानितया निर्दिष्टमस्ति, येन तस्य कथंचित् संभावना स्यात्। यत्तु कैयटेनोक्तम्, 'पदस्य तु परमानडुद्भ्यामित्यत्रानडुच्छब्दस्यान्त्यस्य सर्वस्य दत्वं स्यात्' इति। तन्न, कथंचित् तत्रानडुच्छब्दस्य पदत्वेऽपि "निर्दिश्यमानस्यादेशा भवन्ति' इत्यनेनैवानडुह्शब्दस्य दत्वं प्राप्तमिति पुनस्तस्यैव दत्वविधाने वचनानर्थक्यात्। अथोच्येत — वाक्यपदशब्दौ तत्रानेकालुपलक्षकौ, इति। तदपि न, वर्णसमूहान्त्यताया वर्णस्यैव युक्तत्वात्। अन्यथा 'एतस्या ब्राह्मणपञ्चक्तेरन्त्य आनीयताम्' इत्युक्ते द्वयोस्त्रयाणां वान्ते विद्यमानानामानयनं स्यात्। स्यादेवेति चेन्न, अनुभवविरोधात्। [8]'संयोगान्तस्य लोपः' इत्यादौ समुदायस्यान्त्यत्वं तु वचनादाश्रीयते। लोकेऽपि हि 'एतद्ब्राह्मणपञ्चक्तेरन्त्यं युग्ममानीयताम्' इत्युक्ते द्वावानीयेते। तस्मात् 'अलन्त्यस्य' इति न्यासे न कोऽपि दोषः, लाघवं च महदिति स्थितम्॥ इदानीं तस्यापाणिनीयतैव दोष इत्याशयेन पाणिनीयं सूत्रमाश्रित्य कांचिद्युक्तिं प्रदर्शयितुमाह — **यदीति**। **तन्न क्रियेतेति**। अनेकाल्ग्रहणं न क्रियेतेत्यर्थः। **तन्न करिष्यत इति**। अवश्यं तत् कर्तव्यम् [9]'अतो भिस ऐस्' इत्यादौ [10]'आदेः

---

[1] परिभाषा ६.
[2] अन्त्यमिति विभज्य — ब.
[3] प्रदीपे 'अल्ग्रहणमनल्व्यावृत्त्यर्थम्' इत्यत्र 'अल्ग्रहणमनेकाल्व्यावृत्त्यर्थम्' इति रत्नप्रकाशकृदभिमतः पाठ इति भाति।
[4] ब्रह्मणोऽपि — ब.
[5] पा. सू. ५. ४. ५१.
[6] पा. सू. १. १. ५५.
[7] प्रयोगादेवं ज्ञायते — ब.
[8] परिभाषा १२.
[9] पा. सू. ८. २. २३.
[10] पा. सू. ७. १. ९.
[11] पा. सू. १. १. ५४.

परस्य' इत्येतद्बाधनार्थमिति प्रौढिवादमात्रमेतत्। [1]'अलन्त्यस्य' इति न्यासे तु [2]'आदेः परस्य' इत्यत्राल्पदानुवृत्त्या तस्य [3]'अतो भिस ऐस्' इत्यादावप्रवृत्तिरेव। इदानीं सूत्रप्रयोजनकथनपरं वार्तिकमवतारयति — **किमर्थमिति**। **स्थाने विज्ञातस्येति**। षष्ठी, स्थाने, इति पदे अनुवर्त्य षष्ठीनिर्दिष्टस्य स्थाने यः प्रसक्तः स तस्यान्त्यस्याल एव स्थाने स्यादिति व्याख्येयमिति भावः। **अनुसंहार इति**। व्यवस्थापनमित्यर्थः। सर्वस्य हि प्रसक्त आदेशोऽनेनान्त्येऽलि व्यवस्थाप्यते। एतेन "[4]'षष्ठी स्थानेयोगा' इत्यनुवर्तते। तेन या षष्ठी स्थानेयोगत्वेन विज्ञाता सान्त्यमलमनुसंह्रियते" इति कैयटो निरस्तः। [5]'वसुस्रंसुध्वंस्वनडुहाम्' इत्यादौ षष्ठ्या अन्त्यालुपस्थितौ वसुस्रंसुध्वंस्वनडुहन्त्याल् इत्येतावन्मात्रस्य षष्ठ्यन्तार्थत्वेन तस्य 'दः' इत्यनेनान्वयाभावप्रसङ्गात्। तादृशसूत्रार्थेऽभिमते 'अन्त्येऽलि' इत्येव लाघवात् कर्तव्यतापत्तेः। 'अलेवान्त्यस्य भवति' ङिदेवानेकालन्त्यस्य भवति' इति पूर्वभाष्यस्वरसभङ्गात्। अत एवास्वरसात् तेन 'आदेशो वा यो निश्चितः सोऽन्त्यस्यालः स्थान इत्यनुसंह्रियते' इत्युक्तम्। **इतरथेति**। स्थानेग्रहणमननुवर्त्य षष्ठीनिर्दिष्टस्य य उच्यते सोऽन्त्याल एव भवतीति व्याख्याने आश्रीयमाण इत्यर्थः। एतेन 'यदि षष्ठीमात्रमनुसंह्रियेतेत्यर्थः' इति निरस्तम्। षष्ठ्यनुसंहारस्य दूषितत्वात्। **टित्किन्मितोऽपीति**। 'लविता' इत्यादौ ऋकारात् पूर्वमिडादिः स्यात्। 'पञ्चारत्निनी' इत्यादौ नुमोऽन्त्यावयवत्वे [6]'इगन्तकाल' इति पूर्वपदप्रकृतिस्वरो न स्यादिति भावः। किंदंशे दोषाभावेऽपि तुल्यन्यायतया ग्रहणम्। ननु मित् अन्त्यस्य चेत् तर्हि [7]'मिदचोऽन्त्यात् परः' इत्येतत् सूत्रमयुक्तार्थकं स्यादिति चेत्, किं ततः? तस्मिन् पक्षे सोऽप्येको दोषो भवतु। यत्तूक्तम् "दापयतीति पुगाकारस्यान्तः स्यात्। ततश्च यदुक्तम् "अर्थवतो ह्यागमः' इति, तन्न युज्येत" इति। तन्न, तत्रार्थवद्ग्रहणमविवक्षितमिति स्वोक्त्या सह विरोधात्। अवयवावयवस्य समुदायावयवतायां अवश्याश्रयणीयत्वेन तत्र पुग्विशिष्टस्य घुग्रहणेन ग्रहणे बाधकाभावाच्च। 'योगशेषे च' इति वार्तिकमवतारयति — **यदि पुनरिति**। **योगशेष इति**। योगस्य [9]'सार्वधातुकार्धधातुकयोः' इत्यादेः शेषोऽवयव इत्यर्थः। तदुपपत्तिस्तु 'यत्र षष्ठी तत्रालोऽन्त्यस्येत्युपस्थितं ज्ञेयम्' इति व्याख्यानात्। एतेन "[10]'षष्ठी स्थानेयोगा' इत्यनेनास्यैकवाक्यता। अत्र तु प्रकरणे[करणं] [11]'ङिच्च' इत्यादेः संबन्धार्थम्। तत्रायमर्थो भवति — शास्त्रे या षष्ठी सान्त्येऽलि, सा च स्थानेयोगैव, इति। न तु स्थाने विज्ञातस्य पश्चादनुसंहारः, प्रतिपत्तिगौरवप्रसङ्गादिति भावः" इति निरस्तम्। प्रागपि तेन [12]'षष्ठी स्थानेयोगा' इति सूत्रमनुवर्त्य व्याख्यातत्वेनास्मिन् पक्षेऽपि वाक्यभेदस्यानपायेन, पूर्वस्मिन् पक्षेऽपि तत्सूत्रमत्रानुवर्त्य 'शास्त्रे या षष्ठी सान्त्येऽलि, सा च स्थानेयोगैव' इति व्याख्यातुं शक्यत्वेन; अस्मिन् पक्षेऽपि 'शास्त्रे या षष्ठी सा स्थानेयोगा, सान्त्येऽल्येव' इति व्याख्यातुं शक्यत्वेन पक्षद्वयस्य भेदायोगात्। यदप्युक्तम् "[13]'आद्यन्तौ टकितौ' [14]'मिदचोऽन्त्यात् परः' इत्येताभ्यां स्थानेयोगत्वमेव बाध्यते, तुल्यजातीयत्वात् संबन्धस्य संबन्धान्तरेण बाधोपपत्त्या।

---

[1] अलन्त्यमिति न्यासे तु — ब.
[2] पा. सू. १. १. ५४.
[3] पा. सू. ७. १. ९.
[4] पा. सू. १. १. ४९.
[5] पा. सू. ८. २. ७२.
[6] पा. सू. ६. २. २९.
[7] पा. सू. १. १. ४७.
[8] का. वा. १. १. २०–५.
[9] पा. सू. ७. ३. ८४.
[10] पा. सू. १. १. ४९.
[11] पा. सू. १. १. ५३.
[12] पा. सू. १. १. ४९.
[13] पा. सू. १. १. ४६.
[14] पा. सू. १. १. ४७.

षष्ठचास्तु यद्रूपं तदन्त्य एवाल्यवस्थितमिति पूर्ववद्दोषप्रसङ्गः" इति। तदपि मतभेदाज्ञानमूलकमिति तन्निरासेनैव निरस्तं ज्ञेयम् ॥

[१, ३९१–३९३]

(**नारायणीयम्**) अलः 'अन्त्यस्य' इत्यनेन सामानाधिकरण्यादन्त्यविशेषणत्वनिश्चयात् प्रश्नानुपपत्तिः, अत आह — **षष्ठीति**। [1]अन्त्याविशेषणत्वाय न्यासभेदः स्वीकार्य इति शङ्कां वारयति — **प्रथमेति**। न केवलमस्मिन् पक्षेऽन्त्यस्याविशेषितत्वम्, दोषोऽप्ययमस्तीत्याह — **अस्मिन्निति**। वाक्यान्तरेणान्त्यविधेरप्राप्तत्वान्नियमार्थत्वोक्तिः कथम्, अत आह — **अन्त्यस्येति**। इदमित्यनेन सूत्रं न परामृश्यते, किं त्वल्ग्रहणम्। तस्य नियमार्थत्वमितरव्यावर्तकत्वम्। तदयमर्थः — अल्ग्रहणे सत्यनेकालामन्त्यविध्यप्राप्तिरिति। **दोषेति**। यथा 'असति राजनि मृत्तिकामपि चोरा गृह्णीयुः' इति दोषपरोक्तिः। **न त्विति**। [2]'वाक्यस्य टेः' इति टिविशेषणम्, न स्थानषष्ठचन्तम्। ननु सति दोषेऽधिकोक्तिः, यथा-[3]अन्त्यादिग्रहणोक्तिः, इह तु दोष एव क इत्यत आह — **पदस्य त्विति**। नन्विष्यते तत्र दत्वम्, अत आह — **सर्वस्येति**। उपसंहृतस्य [4]पुनरनुपसंहारादित्यर्थः। 'अभिप्रायः' इत्यनेन तदकरणमाशामात्रमिति सूचितमित्याह — **अवश्येति**। **अथेति**। मण्डूकगत्या [5]'आदेः परस्य' इत्यत्राल्ग्रहणानुवृत्त्याश्रयणाद् अतो भिस ऐसः सर्वादेशत्वस्य सिद्धिरिति प्रतिपत्तेर्गरीयस्त्वेऽप्यक्षरलाघवानुरोधो यदीति भावः। **तत्रापीति**। [6]'आदेः परस्य' इत्यत्राल इत्यनुवर्तनीयम्। तस्य षष्ठचन्तस्यानुपयोगात् प्रथमान्ततया विपरिणाम इति भावः। स्थाने विज्ञातस्य कस्येत्याकाङ्क्षायामाह — **षष्ठीति**। वचनापेक्षः प्रत्ययापेक्षो[वा] 'विज्ञातस्य' इति निर्देश इति भावः। **आदेशो वेति**। 'स्थाने' इत्यनुवर्त्यम्। स्थाने भवन्नन्त्यस्यालो भवतीत्यर्थः। 'इतरथा' इत्यस्याननुसंहार इत्यर्थस्य व्यवच्छेद्यं व्याचष्टे — **यदीति**। परिभाषात्वादस्य विधिशेषत्वस्य सर्वदा भावाद् 'यदि पुनः' इत्यस्य कोऽभिप्रायः, तत्राह — **षष्ठी स्थान इति**। स्थाने विज्ञातानुसंहारे दोषाभावात् पक्षान्तरोत्थापने किं निमित्तमित्याशङ्क्य लाघवं निमित्तमाह — **तत्रेति**। ननु षष्ठीटिदादिविषये [7]"आद्यन्तौ' इत्यादिशास्त्रं स्थानेयोगशस्त्रस्य बाधकमिति तच्छास्त्रप्राप्तालोऽन्त्यविधिर्न टिदादिष्वित्यत आह — **आद्यन्ताविति**। षष्ठीमुद्दिश्य द्वयं विहितम् — स्थानसंबन्धित्वम्, अन्त्यालगतत्वं च। तत्र टिदादिविषये संबन्धान्तरं षष्ठचा विधीयमानमौत्सर्गिकं स्थानसंबन्धं बाधते, नेतरत्। न हि 'ब्राह्मणेभ्यो दधि दीयतां हिरण्यं च' इत्युक्त्वा 'तक्रं कौण्डिन्याय' इति कौण्डिन्ये तक्रविधिर्न भुक्तदक्षिणां बाधते, अपि तु दध्येव, एवमिहापीत्यर्थः। ननु योगशेषपक्षे [8]"आदेः परस्य' इत्यादिरलोऽन्त्यविध्यपवादो न स्यात्, असंन्निधानाद्वाध्यस्येत्याशङ्क्य संनिधेर्बाधाप्रयोजकत्वं, द्वितीये विहितस्य लुकश्चतुर्थषष्ठयोरलुग्दर्शनादित्यभिप्रेत्याह — **अनुसंहार इति** ॥

---

[1] अन्त्यविशेषणत्वाय न्यायभेदः — क.
[2] पा. सू. ८. २. ८२.
[3] अन्यादि — क.
[4] पुनरुपसंहारादित्यर्थः — क.
[5] पा. सू. १. १. ५४.
[6] पा. सू. १. १. ५४.
[7] पा. सू. १. १. ४६.
[8] पा. सू. १. १. ५४.

डिच्च. १. १. ५३.

[१, ३९४–३९५]

(**विवरणम्**) अनन्यथासिद्धडित्करणवशेनास्य [1]'अनेकाल्शित्' इत्येतदपवादता, तातङि तु डित्करणमन्यथासिद्धमिति[2] तद्विषयेऽस्यापवादत्वाभावाद् विप्रतिषेधोपपत्तिरिति परिहरति — **नेति**। **दौर्बल्यात्** अपवादत्वापादनसामर्थ्याभावादित्यर्थः। **डित्त्वादिति**। नानन्यथासिद्धडित्करणबलेनापवादत्वमस्य, किं तु [3]'अनेकाल्शित्' इति [4]प्राप्तेऽस्यारम्भात्। [5]यस्मिन्नाप्राप्ते यदारभ्यते स तस्यापवाद इति हि स्थितिरिति भावः॥

[१; ३९४–३९५]

(**उद्द्योतनम्**) विप्रतिषेधमाक्षिपति — **नन्विति**। **नैष**[6] **इति**। अनन्यथासिद्धडित्करणेनास्य [7]'अनेकाल्' इत्येतदपवादता। तातङि डित्करणमन्यथासिद्धमिति [8]'तद्विषये त्वस्यापवादत्वाभावाद्विप्रतिषेधोपपत्तिरित्यर्थः। **दौर्बल्यात्** अपवादत्वापादनसामर्थ्याभावात्। 'प्रयोजनम्' इति शङ्काभाष्यतात्पर्यमाह — [9]**सर्वादेश इति**। **डित्त्वादिति**। [10]'नानन्यथासिद्धडित्करणेनास्यापवादत्वम्, किं तु येन [11]'नाप्राप्तन्यायेन, [12]'अनेकाल्' इति प्राप्तेऽस्यारम्भादिति भावः। डित्त्वमात्रं न सर्वादेशप्रयोजकम्, अत आह — **गुणेति**॥

[१, ३९४–३९५]

(**रत्नप्रकाशः**) 'तातङि' इत्यादिवार्तिकमवतारयति — **तातङिति**। **डित्करणस्य सावकाशत्वादिति**। तथा चानन्यार्थडकारेऽनङादौ 'डिच्च' इति सूत्रं सावकाशं सत् संभवत्प्रयोजनान्तरङकारे तातङि परेण [13]'अनेकाल्शित् सर्वस्य' इत्यनेन बाध्यत इति भावः। तदेतद्वार्तिकमाक्षिपति —**प्रयोजनं नामेति**। गुणवृद्धिप्रतिषेधार्थत्वे ज्ञाते सर्वादेशत्वज्ञानम्, सर्वादेशत्वे ज्ञाते गुणवृद्धिप्रतिषेधार्थत्वज्ञानमित्यन्योन्याश्रयाद्विप्रतिषेधो न युज्यत इति भावः। **डित्करणादिति**। साधारणादिति शेषः। एतेन 'गुणवृद्धिप्रतिषेधार्थादिति भावः' इति निरस्तम्। 'न पुनरन्त्यस्य' इत्यनेनान्वयानापत्तेः। समाधत्ते — **एवमिति**॥

---

[1] पा. सू. १. १. ५५.
[2] अन्यथापि सिद्धमिति — अ, ट.
[3] पा. सू. १.१. ५५.
[4] प्राप्त आरम्भात् — अ.
[5] यस्मिन् प्राप्ते — च, छ, ट.
[6] प्रदीपे 'नैतदस्ति' इत्यत्र 'नैष दोषः' इत्यन्नंभट्टपाठ इति भाति।
[7] पा. सू. १. १. ५५.
[8] तद्विषयस्यापवादत्वाभावात् — इ, ऋ.
[9] प्रदीपे 'सति सर्वादेशत्वे' इत्यत्र 'सर्वादेशे सति' इत्यन्नंभट्टपाठ इति भाति।
[10] नान्यथासिद्ध — अ, इ.
[11] नाप्राप्तिन्यायेन — म, आ, इ, ऋ.
[12] पा. सू. १. १. ५५.
[13] पा. सू. १. १. ५५.

[१, ३९४–३९५]

(**नारायणीयम्**) **नैतदिति** । न हि धर्मसूत्रकारादिवचनादपवादस्य बाधकत्वम्, किं तु विशेषशास्त्रं स्वविषये झटिति प्रवर्तते। सामान्यशास्त्रं तु विषयान्तरलाभात् कियतीं कालकलां विलम्बयतीति झटिति प्रवृत्तेन तत्पदमवष्टब्धमिति ततो निवर्तते। यत्र तु विशेषशास्त्रमपि [1]संदेहाद्विलम्बितप्रवृत्तिकं [2]तत्र विप्रतिषेधः, विशेषाभावादुभयोरित्यर्थः । ङित्त्वफलत्वेन गुणादिप्रतिषेधस्य निश्चयात् कथमनिश्चितत्वकीर्तनम्, अत आह — **सतीति** । **अन्त्यस्यैवेति** । ननु विप्रतिषेधात् सर्वादेशेन भाव्यम् । न च गुणादिप्रतिषेधस्य [3]फलानिश्चयाद्विप्रतिषेधाभावः, तत्फलानिश्चयेऽपि संभावनयापि विप्रतिषेधस्योपपादितत्वात् । तदाहुः — 'तातङोऽङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः। न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ॥' इति। एवं तर्हि गत्यन्तरसंभवात् क्लेशतो विप्रतिषेध इह नोपपादितो भाष्यकृता। तत्र तत्र तु तातङन्यायादिति वदन्त्येवाभियुक्ताः। ङित्त्वस्य सर्वादेश[4]निमित्तत्वाभावादाह — **गुणेति** । नन्वसति ङित्त्वे सर्वादेशता स्यात्, अत आह — **अन्तरेणापीति**। **विज्ञायत इति**। तच्च सर्वादेशतामन्तरेण नोपपद्यत इति सर्वादेशत्वम्। गुणादिनिषेधफलनिश्चयाद्विप्रतिषेध [5]एवानेनोपपाद्यत इत्यप्याहुः ॥

आदेः परस्य १. १. ५४.

[१, ३९५]

(**रत्नप्रकाशः**) [6]'अलोऽन्त्यस्य' इत्यादिसूत्रत्रयमुत्सर्गापवादसमुदायरूपं विषयतया निर्दिश्य तद् इतिशब्देन परामृश्य तत्र वक्तव्यमाह — **अपवादविप्रतिषेधादिति** । अपवादयोर्विप्रतिषेधाद् विरोधादित्यर्थः । अपवादयोस्तुल्यबलत्वमुपपादयति — **आदेः परस्येत्यस्येति** ॥

अनेकाल्शित् सर्वस्य. १. १. ५५.

[१, ३९६–३९७]

(**लघुविवरणम्**) ननु शित् सर्वस्येत्यनुच्यमाने 'शित्करणात् सर्वादेशः' इति कथमित्यत आह— **सतीति**। नन्वेवं प्रयोजनाभावादित्संज्ञा शस्य न स्यादित्यत आह — **अनेकाल्त्वेति**। [7]न ह्यवश्यं तदेव प्रयोजनमनुबन्धानाम्, यदित्संज्ञायां स्यात्। अनेकाल्त्वस्यापि [8]पूर्वमेव [9]प्रयोजनत्वसंभवात्। भाष्ये 'ननु चात्रापि' इति विप्रतिषेधो विवक्षितः। **अस्त्यन्यदिति**। [10]यदि शकारस्यान्यत् प्रयोजनं न स्यात् तदा शकारस्य लोपेत्संज्ञे सर्वादेशत्वं प्रतीक्षेयाताम्। इह त्वन्यच्छकारोपदेशस्य प्रयो-

---

[1] संदेहादविलम्बित — क.
[2] तत्राविप्रतिषेधः — क.
[3] फलत्वानिश्चयादित्यर्थः। भावप्रधानो बोध्यः।
[4] निमित्ताभावात् — क.
[5] एवानेनोपपद्यते — क.
[6] पा. सू. १. १. ५२.
[7] 'न ह्यवश्यम्' इत्यादि 'प्रयोजनत्वसंभवात्' इत्यन्तं नास्ति — ण, त.
[8] इत्संज्ञातः पूर्वमेवेत्यर्थः।
[9] प्रयोजनत्वाभावात् — ड, ढ.
[10] यदि हि शकारस्य — त.

जनमिति प्रागेवान्तरङ्गत्वाल्लोपेत्संज्ञे इति [1]न सर्वादेशत्वं लभ्यत इति भावः। तत्र [2]'एकान्ता अनुबन्धाः' इत्यस्मिन् पक्षेऽसरूपविधौ दोषः। सर्वादेशे च दोषः। दाप्प्रतिषेधे दैपः पृथङ् निर्देशः कर्तव्यः, तत्र हेतुः — 'अनाकारान्तत्वात्' इति भाष्योदाहृत[3]वार्तिकस्यार्थः। [4]ज्ञापनमावश्यकं न भवतीत्याह — **अनेकान्तेषु चेति** ॥

इति [5]श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम् ॥

[१, ३९६–३९७]

(**विवरणम्**) ननु सूत्रे [6]शित्करणाभावे कथमभिधीयते 'शित्करणादेव सर्वादेशः' इति, अत आह — **सतीति**। तर्हि शकारादिति वक्तुं युक्तम्, किमिद्ग्रहणेनेत्यत आह — **अनेकेति**। इत्कार्यान्तराभावेऽपि शकारोच्चारणस्य [7]सप्रयोजनत्वात् [8]लोप एवेत्कार्यमिति शकारस्येत्संज्ञा प्रवर्तत एवेति सूचयितुमिद्ग्रहणमिति भावः। भाष्ये **ननु चात्रापीति**। अपवादविप्रतिषेधोऽभिमतः। **अस्त्यन्यदिति**। यदि हि शकारस्यान्यत् प्रयोजनं न स्यात् तदा शकारस्य लोपेत्संज्ञे सर्वादेशत्वं प्रतीक्षेयाताम्, इह त्वन्यच्छकारस्य प्रयोजनमिति प्रागेवान्तरङ्गत्वाल्लोपेत्संज्ञे इति न सर्वादेशत्वं लभ्यत इति भावः। यदि सर्वादेशत्वात् प्रागेव प्राप्तिर्लोपेत्संज्ञयोः, [9]स्यादेतदेवम्। न तु प्राप्तिरस्तीति प्रतिपादयितुम् — अन्त्यस्यायमित्यादिभाष्यम्, तदाक्षिपति — **नन्विति**। ततश्च सर्वादेशत्वं विनापि प्रत्ययादित्वाल्लभ्यत एवेत्संज्ञेति भावः। परमार्थमाह — **अथवेति**। असत्यपि सूत्रे शित्करण इत्यर्थः। शिश्यौ [10]यावन्नादेशौ तावन्नेत्संज्ञालोपौ। आदेशौ च परत्वात् सर्वस्यैवेति भावः। तत्र [11]'एकान्ता अनुबन्धाः' इत्यस्मिन् पक्षेऽसरूपविधौ कविषयेऽणपि प्राप्नोतीति दोषः। सर्वादेशे च [12]'पथिमथ्यृभुक्षामात्' इत्यादयः सर्वादेशाः स्युरिति दोषः। 'अदाप्' इति दाप्प्रतिषेधे दैपो भेदेन निर्देशः कर्तव्यः, तत्र हेतुः पकारसंनिधौ 'दै' इत्यस्याकारान्तत्वाभावादिति भाष्योदाहृतवार्तिकार्थः। ज्ञापनमावश्यकं [13]न भवतीत्याह — **अनेकान्तेषु चेति** ॥

इति भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम् ॥

[१, ३९६–३९७]

(**उद्द्योतनम्**) ननु सूत्रे शित्करणाभावे 'शित्करणादेव सर्वादेशः' इति कथमुच्यते, अत

---

[1] 'न' इति नास्ति — ड.
[2] परिभाषा ५.
[3] वार्तिकार्थः — ड.
[4] ज्ञापकम् — ड, ढ, त.
[5] 'श्रीमत्' इत्यादि 'भाष्य' इत्यन्तं नास्ति –ण; 'श्रीमत्' इत्यादि 'प्रथमे पादे' इत्यन्तं नास्ति–त.
[6] शिद्ग्रहणाभावे — ट.
[7] प्रयोजनवत्त्वात् — च, छ.
[8] लोपश्चेत्कार्यमिति — अ.
[9] स्यात् तदेदम् — अ.
[10] यावदादेशौ तावतैवेत्संज्ञालोपौ — अ.
[11] परिभाषा ५.
[12] पा. सू. ७. १. ८५.
[13] 'न' इति नास्ति — च.

आह — **सतीति** । तर्हि 'शकारात्' इति वक्तव्यम्, किमिद्ग्रहणेन, अत आह — **अनेकेति** । इत्कार्यान्तराभावेऽपि शकारोच्चारणस्य सप्रयोजनत्वात् लोप एवेत्कार्यमिति शकारस्येत्संज्ञा स्यादेवेति सूचयितुमिद्ग्रहणमिति भावः। इशपेक्षयैतस्य वैलक्षण्यमाह — **आदेरिति**। 'ननु चात्रापि' इति भाष्यमपवादविप्रतिषेधाभिप्रायम् । भाष्ये **अस्त्यन्यदिति** । यदि शकारस्यान्यत् प्रयोजनं न स्यात् [1]तदा लोपेत्संज्ञे सर्वादेशत्वं प्रतीक्षेयाताम्, अत्रान्यदेव शकारस्य प्रयोजनमस्तीति प्रागेवान्तरङ्गत्वाल्लोपेत्संज्ञे इति सर्वादेशत्वं न लभ्यत इति भावः। यदि सर्वादेशत्वात् प्रागेव लोपेत्संज्ञयोः प्राप्तिः स्यात् तदान्त्यादेशता स्यात्, न तु प्राप्तिरस्तीति प्रतिपादयितुम् 'अन्त्यस्यायम्' इत्यादिभाष्यम्। तदाक्षिपति — **नन्विति** । [2]'जसः शी' इत्यत्र सर्वनाम्नः, [3]'जश्शसोः शिः' इत्यत्र नपुंसकादिति विवेकः। ततश्च सर्वादेशत्वाभावेऽपि शकारस्य प्रत्ययादित्वात् [4]'लशक्वतद्धिते' इतीत्संज्ञा[5] लभ्यत एवेत्यर्थः। **विहितेति**। नपुंसकाद्विहितयोर्जश्शसोः शिरित्यर्थः। परमार्थसमाधानमाह — **असतीति** । सूत्रे शिद्ग्रहणेऽसत्यपीत्यर्थः। [6]'शिश्यौ यावन्नादेशौ तावन्नेत्संज्ञालोपौ। आदेशौ च परत्वात् सर्वस्यैवेति भावः। अनुबन्धा एकान्ता अनेकान्ता वेति [7]कल्पद्वयम्। तत्रैकान्तत्वपक्षे ज्ञापकाश्रयणं, नेतरस्मिन्नित्याह — **अनेकान्तेष्विति** । तत्रानुबन्धानामेकान्तत्वपक्षेऽसरूपविधौ कविषयेऽणपि प्राप्नोतीति दोषः। सर्वादेशे च [8]'पथिमथ्यृभुक्षामात्' इत्यादयः सर्वादेशाः स्युरिति दोषः। [9]'अदाप्' इति दाप्प्रतिषेधे दैपो भेदेन निर्देशः कर्तव्यः, [10]अत्र हेतुः पकारस्य संनिधौ 'दै' इत्यस्याकारान्तत्वाभावात्, इति [11]भाष्ये उदाहृतस्य [12]'तस्य लोपः' इति सूत्रस्थवार्तिकस्यार्थः ॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने
प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम् ॥

[१, ३९६-३९७ [

(**रत्नप्रकाशः**) **शित्करणादेवेति**। इत्पदमनुबन्धपरम्। प्रयोजनं विनेत्संज्ञाभावात शकारानुबन्धकरणादेवेत्यर्थः। सर्वादेशत्वे सति ततः शकारस्य [13]'तस्य लोपः' इति लोपः कर्तव्य इति भावः। न च तत्रेत्संज्ञकस्य 'तस्य' इत्यनेन परामर्शादित्संज्ञां विना लोपो न स्यादिति वाच्यम्, अनित्संज्ञकानुबन्धानामवश्यं लोपस्य कर्तव्यत्वेन विना वचनं तेषां लोपाङ्गीकारे इत्संज्ञकानामपि तथैव लोपसंभवेन [14]'तस्य लोपः' इति सूत्रस्यानर्थक्यापत्त्या तत्परिहाराय तत्र 'तस्य' इत्यस्यानुबन्ध-

---

[1] 'तदा' इत्यस्यानन्तरं 'शकारस्य' इत्यधिकम् — म, आ, इ, ऋ.
[2] पा. सू. ७. १. १७.
[3] पा. सू. ७. १. २०.
[4] पा. सू. १. ३. ८.
[5] 'इत्संज्ञा' इत्यस्यानन्तरम् अपिशब्दोऽधिकः—म.
[6] शिश्योर्यावन्नादेशता तावत् — अ.
[7] विकल्पद्वयम् — म, आ, ऋ.
[8] पा. सू. ७. १. ८५.
[9] पा. सू. १. १. २०.
[10] तत्र — अ, इ.
[11] भाष्योदाहृतस्य — अ, ऋ.
[12] पा. सू. १. ३. ९.
[13] पा. सू. १. ३. ९.
[14] पा. सू. १. ३. ९.

सामान्यलक्षकताश्रयणस्यैवोचितत्वात्। एतेन 'अनेकाल्त्वसंपादनेन कृतार्थः शकार इतीत्संज्ञत्वाल्लुप्यत एव' इति निरस्तम्। इत्सज्ञां विनापि तेनानेकाल्त्वं संपादयितुं शक्यत इति तस्येत्संज्ञायां मानाभावात्। इत्संज्ञां विना लोपस्योपपादितत्वाच्च। **अष्टाभ्य औशिति**। सर्वत्र शकारानुबन्धकरणादेव सर्वादेशत्वं सिध्यतीति शित्करणं व्यर्थमिति सूचयितुमेतदुपन्यासः, न त्वितरापेक्षया औशि कश्चिद्विशेषोऽस्तीति। एतेन "[1]'आदेः परस्य' इत्यादेः प्राप्त इति भावः" इति निरस्तम्। तत्कथनस्य व्यर्थप्रलापत्वात्। न हि तत् केनचिन्न ज्ञेयम्, येन वक्तव्यं स्यात्। अन्यथा [2]"इदम इश्' इत्यत्र 'अन्त्यस्य प्राप्नोतीति भावः' इति वक्तव्यत्वापत्त्या तदनुक्त्या मूर्खत्वापत्तेश्च। **अस्त्यन्यदिति**। पूर्वोक्तयोरिशौशोः शकारस्य प्रयोजनान्तरासंभवात् तत्सार्थक्याय सर्वादेशता तेन भवतीत्युक्तमिति मन्यते। विनिगमनाविरहात् सर्वादेशार्थं विशेषणार्थं च तत् शित्करणमिति सुज्ञानत्वेन तदुत्तरमुपेक्ष्य शित्करणस्यानर्थक्यं दृढीकर्तुं शिप्रभृतेस्तद्विषयत्वासंभवमुपपादयति — **अन्त्यस्येति**। यद्यपि 'सर्वनाम्नः, नपुंसकात्' इति पञ्चमीनिर्देशात् [3]'आदेः परस्य' इत्येतस्यालोऽन्त्यापवादस्य प्रसक्तिरस्ति, तथापि तस्यापि सर्वादेशत्वमनेकाल्त्वप्रयुक्तं बाधकमिति तेनैव भवितव्यमत्रेति सूचयितुमेवमुक्तम्, नालोऽन्त्यसूत्रमत्र प्रवर्तत एवेत्याशयेन। एतेन 'अन्त्यस्य' इत्येतद्भाष्यसमर्थनाय प्रवृत्तम् 'एवं तर्हि सर्वनाम्न इति षष्ठीं मन्यते, नपुंसकादिति च विहितविशेषणमिति ज्ञापकत्वमेव शित्करणस्य' इति निरस्तम्। प्रकृतभाष्यस्य कृत्वाचिन्तामात्रपरतयोपपन्नत्वेन तदुपपादनाय 'सर्वनाम्नः' इत्यादेरन्यथावर्णनानौचित्यात्। विहितविशेषणपक्षे पञ्चमीनिर्देशेन विधीयमानत्वानपायेन [4]"आदेः परस्य' इत्यस्य तत्राप्रवृत्तौ मानाभावाच्च। अत एवास्वरसेन तेनापि पक्षान्तरमेव परिगृहीतम् — अथवा असत्यपीह शिद्ग्रहणेऽनेकाल्त्वादेव 'आदेः परस्य' इत्येतद्बाधित्वा सर्वादेशो भविष्यतीति शिद्ग्रहणं ज्ञापकमेव, इति। यच्चोक्तं तेन 'अनेकान्तेषु चानुबन्धेषु नास्ति तत्कृतमनेकाल्त्वमित्येकान्तेष्वेव ज्ञापकेन प्रयोजनम्' इति। तन्न, अनुबन्धानामेकान्तत्वमारोपितम्, पारमार्थिकमनेकान्तत्वमिति पक्षद्वयस्यात्यन्तभेदाभावेनोभयसाधारण्येनैव ज्ञापकोपयोगात्। **शित्सर्वस्येत्याहेति**। यस्यानुबन्धस्यादेशप्रवृत्तेः पूर्वमित्संज्ञा संभवति तदनुबन्धप्रयुक्तमनेकाल्त्वं सर्वादेशविधावाश्रितं चेत् शिद्ग्रहणं व्यर्थं स्यादिति तत्र तदनाश्रयणं ज्ञापयतीति भावः। **उक्तमिति**। [5]"तस्य लोपः' इति सूत्रे। **तन्न वक्तव्यमिति**। सवादेशांश इवेतरांशेऽपि ज्ञापकसत्त्वादिति भावः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम्॥

[१, ३९६-३९७]

(**नारायणीयम्**) असतीह शिद्ग्रहणे कथं शिद्ग्रहणात् सर्वादेश इत्युच्यते, अत आह — **सतीति**। न चेत्संज्ञायां लोपे चानेकाल्त्वं नास्तीति वाच्यम्, तथा सति शकारवैयर्थ्यापातात्। यदि तर्हि फलाभावान्न शकारस्येत्संज्ञा, श्रवणं तस्य स्यादित्याशङ्क्य सर्वादेशत्वात् प्रागित्संज्ञाभावः,

---

[1] पा. सू. १. १. ५४.
[2] पा. सू. ५. ३. ३.
[3] पा. सू. १. १. ५४.
[4] पा. सू. १. १. ५४.
[5] पा. सू. १. ३. ९.

उत्तरकालं तु भवत्येवेत्संज्ञा, सर्वादेशत्वसंभवादनेन शकारस्य फलवत्त्वादित्याह — [1]**अनेकाल्त्वेति**। नन्वसत्यपीह शिद्ग्रहणेऽनुबन्धकृतानेकाल्त्वाभावेऽप्यन्त्यस्यौत्वेऽकारेण वृद्धौ सत्यां नानिष्टं किमपीत्यत आह — **आदेरिति**। ततश्च सकारश्रवणप्रसङ्गः। उत्तरं तु पूर्ववत् — सति शकारेऽनेकाल्त्वाद्विप्रतिषेधात् सर्वादेशः। कृतकार्यस्य चेत्संज्ञायां लोप इति। भाष्ये **अस्त्यन्यदिति**। ततश्चान्तरङ्गत्वादित्संज्ञादिकमिति नानेकाल्त्वमित्यर्थः। **आदेर्भाव्यमिति**। ततश्च सर्वादेशत्वं विनापि [2]'लशकु' इति शकारस्येत्संज्ञाप्राप्तेर्नानुपूर्व्या सिद्धिरित्यर्थः। अन्त्यस्यायमित्यादिभाष्योक्तज्ञापनप्रकारे सत्यपि ज्ञापितवस्तुनि शिद्ग्रहणं न कर्तव्यम्, अनुबन्धस्य सर्वादेशाधीनत्वात्। अतः सर्वनाम्न इति पञ्चम्या [3]'आदेः परस्य' इत्यादेः प्राप्तत्वेऽप्यनेकाल्त्वाद्विप्रतिषेधेन सर्वादेशः सिद्ध इति शिद्ग्रहणमुक्तवस्तुज्ञापनाय। तदा हि ज्ञाप्यवस्तुनि सति शिद्ग्रहणमर्थवत्, सर्वादेशतया विनापि शस्यानुबन्धत्वसत्त्वादित्यभिसंधायाह — **अथवेति**। 'तत्र' इति वार्तिके निर्दिष्टं विषयमाह — **एकान्तेष्विति**। पक्षान्तरे कथं ज्ञापनानाकाङ्क्षा, अत आह — **अनेकान्तेषु चेति**। ज्ञापनफलाभावेऽपि 'सर्वनाम्नः' इति पञ्चमीपक्षे शिद्ग्रहणं कर्तव्यम्, अनुबन्धस्यानेकान्तत्वेनानेकाल्त्वाभावात्। षष्ठीपक्षे तु 'अन्त्यस्यायम्' इत्यादिभाष्योक्तन्यायासिद्धेः शिद्ग्रहणं न कर्तव्यम्॥

इति महामहोपाध्यायधर्मराजयज्वशिष्यशास्त्रिनारायणकृतौ कैयटटीकायां
प्रथमस्याध्यास्य प्रथमे पादे सप्तममाह्निकम्॥

---

[1] अनेकेनेति — क.

[2] पा. सू. १. ३. ८.

[3] पा. सू. १. १. ५४.

महाभाष्यप्रदीपव्याख्यानोपयुक्तानां मातृकाणामनुक्रमणिका

अ. अडैयार्कोशागाराल्लिखिता आस्माकीनकोशालये T. No. 155 अङ्किता। इयमुद्द्योतन-मातृका प्रथमाध्यायप्रथमपाददृतीयाह्निकारम्भे किंचिद्भागहीना पञ्चमाध्याये 'रजःकृषि' (५. २. ११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तभागहीना च।

आ. Government Oriental Mss, Library, Madras R. No. 271 अङ्किता आन्ध्रलिपिमयी। इयमुद्द्योतनमातृका। अस्यां प्रथमाध्यायप्रथमपाददृतीयाह्निकात् प्रभृति नवमाह्निके 'प्रत्ययस्य लुक्श्लुलुपः' (१. १. ६१) इति सूत्रे किंचिद्भागपर्यन्तं वर्तते। चतुर्दशोत्तरशतं पत्राणि सन्त्यस्याम्।

इ. G. O. M. L. R. No. 1500 अङ्किता आन्ध्रलिपिमयी मातृकोद्द्योतनस्येयम्। अत्र प्रथमाध्यायप्रथमपादचतुर्थाह्निके 'तुल्यास्यप्रयत्नं सवर्णम्' (१. १. ९) इति सूत्रान्तिमभागादारभ्य त्रिनवतितमपत्रान्तेऽष्टमाह्निके 'द्विर्वचनेऽचि' (१.१.५९) इति सूत्रे किंचिद्भागपर्यन्तमुपलभ्यते। एकोनविंशतितमत्र्यशीतितमपत्रे न स्तः। चतुर्नवतितमपत्रात् अष्टसप्ततिशततमपत्रान्तं न दृश्यते। एकोनाशीतितमपत्रात् सप्तनवतिशततमपत्रान्त उपलभ्यमाने 'समर्थः पदविधिः' (२. १. १) इति सूत्रे 'संख्याविशेषो व्यक्ताभिधानम्' इति वार्तिकव्याख्यानात् प्रभृति 'चतुर्थी तदर्थार्थ' (२. १. ३६) इति सूत्रे किंचिद्भागपर्यन्तं चोपलभ्यते। त्रिनवतितमपत्रादुपरि एकोनाशीतितमपत्रात् प्राक् मध्ये धर्मराजयज्वशिष्यशास्त्रिनारायणकृतकैयटीयटीकायुक्तो भागः 202-229 पत्रान्तो योजितो दृश्यते।

ई. G. O. M. L. R. No. 4273 अङ्किता मातृकोद्द्योतनस्यान्ध्रलिपिमयी। अस्यां चत्वारिंशत्पत्रात्मिकायां केवलपत्राणि पञ्चान्तिमानि विहायावशिष्टेषु पञ्चत्रिंशति पत्रेषु प्रथमाध्यायप्रथमपादप्रथमद्वितीयाह्निके उपलभ्येते। प्रतिपृष्ठं नव पङ्क्तयो वर्तन्ते।

उ. G. O. M. L. R. No. 2038 अङ्कितोद्द्योतनमातृका काकिदपत्रलिखिता आन्ध्रलिपिमयी। अस्यां षट्पञ्चाशत् पत्राणि सन्ति। प्रतिपुटं मार्कि पञ्चाशत् पङ्क्तयो वर्तन्ते। अत्र प्रथमाध्यायप्रथमपाददृतीयाह्निकात् प्रभृति सप्तमाह्निके 'मिदचोऽन्त्यात्परः' (१. १. ४७) इति सूत्रे किंचिद्भागपर्यन्तं समुपलभ्यते।

ऊ. G. O. M. L. R. No. 1515 अङ्किता मातृकोद्द्योतनस्यान्ध्रलिपिमयी। अत्रादौ सप्तत्रिंशति पत्रेषु धर्मराजयज्वशिष्यशास्त्रिनारायणकृतकैयटीयटीकायुक्तो भागः, यत्र तृतीयाह्निकात् प्रभृति पञ्चमाह्निके 'अदसो मात्' इति सूत्रे किंचिद्भागपर्यन्तं वर्तते। अष्टत्रिंशात् पत्रात् प्रभृत्यन्नंभट्टीयोद्द्योतनग्रन्थः। अत्र पञ्चमाह्निकारम्भात् प्रभृति 'इग्यणः संप्रसारणम्' (१. १. ४५) इति सूत्रे किंचिद्भागपर्यन्तं दृश्यते। आहत्य सप्तनवतिपत्राणि सन्त्यत्र।

ऋ. G. O. M. L. R. No. 2248 Vol. I देवनागरीलिपिमयी काकिदपत्रलिखितोद्द्योतनमातृका । अत्र प्रथमाध्यायद्वितीयपादारम्भात् प्रभृति द्वितीयाध्यायसमाप्त्यन्तं वर्तते । षष्टयुत्तरचतुश्शती पत्राण्यस्यां सन्ति । प्रतिपुटं विंशतिः पङ्क्तयो वर्तन्ते । R. No. 2248 Vol. II अत्र तृतीयाध्यायात् प्रभृति 'केशाद्वोऽन्यतरस्याम्' (५. २. १०९) इति सूत्रपर्यन्तं वर्तते त्रिनवतिचतुश्शतीपुटान्ते । 'रजः कृषि' (५. २. ११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति । द्वितीयाह्निकात् षष्ठाध्यायसमाप्त्यन्तं वर्तते । पञ्चनवत्युत्तरषट्शती पुटानि सन्त्यत्र कोशे । R. No. 2248 Vol. III षण्णवत्युत्तरषट्शतीतः पुटात् प्रभृति नवोत्तरशतसहस्रपुटपर्यन्तेऽस्मिन् कोशे सप्तमाष्टमाध्यायौ विद्येते ।

ऋ. बडोदा Oriental Institute No. 10310 अङ्किता आन्ध्रलिपिमयी तालपत्रकोशात्मिकोद्द्योतनमातृका । अस्यां प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति प्रथमाध्यायद्वितीयपादसमाप्त्यन्तं विद्यते । त्र्युत्तरद्विशती पत्राणि सन्ति । प्रतिपुटं सप्त पङ्क्तय उपलभ्यन्ते । षट्सहस्री ग्रन्था आहत्यात्र सन्ति ।

ऌ. (a) बडोदा O. I. No. 7778 अङ्किता तालपत्रकोशात्मिकोद्द्योतनमातृका आन्ध्रलिपिमयी । अस्यां तृतीयाध्यायारम्भात् षष्ठाध्यायतृतीयपादान्तमुपलभ्यते । द्व्युत्तरत्रिशती पुटानि सन्ति । प्रतिपुटं सप्त पङ्क्तयश्च । त्रयोदशसहस्री ग्रन्थाः सन्त्यत्र ।

(b) No. 6257 अङ्कितस्तालपत्रकोश आन्ध्रलिपिमयः । अत्र विंशत्युत्तरद्विशती पत्राणि सन्ति । प्रतिपुटं सप्त पङ्क्तयः । सप्तशत्युत्तरसप्तसहस्री ग्रन्था अत्र सन्ति । षष्ठाध्यायचतुर्थपादात् प्रभृत्यष्टमाध्यायान्तमत्र विद्यते ।

क. शास्त्रिनारायणकृतायाः कैयटीयव्याख्याया मातृका । इयं G. O. M. L. R. No. 39 अङ्किता, तस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 226 अङ्किता । अस्यां प्रथमाध्यायप्रथमपादप्रथमाह्निकात् प्रभृत्यष्टमाह्निके 'न पदान्त' (१. १. ५८) इति सूत्रपर्यन्तमुपलभ्यते ।

ख. G. O. M. L. R. No. 1515. तस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 236 अङ्किता । अस्यां प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति पञ्चमाह्निके 'अदसो मात्' (१. १. १२.) इति सूत्रपर्यन्तमेव विद्यते ।

च. G. O. M. L. R. No. 3866 मातृकायाः प्रतिकृतिरास्माककोशालये T. No. 200 अङ्किता । इयं बृहद्विवरणस्य मातृका । अत्रारम्भात् प्रभृति प्रथमाध्यायद्वितीयपादतृतीयाह्निके 'सरूपाणामेकशेषः' (१. २. ६४) इति सूत्रे किंचिद्भागपर्यन्तं दृश्यते ।

छ. G. O. M. L. R. No. 3894 अस्याः प्रतिकृतिरास्माककोशालये T. No. 207 अङ्किता बृहद्विवरणस्य मातृका । अत्रापि सरूपसूत्रपर्यन्त एव भागो दृश्यते ।

ज. पुण्यपत्तने (पूना) Bandarkar Oriental Research Institute No. 184/1882-83. D. No. 58 अङ्किता काकिदपत्रलिखिता बृहद्विवरणमातृका । अस्यां पत्राण्य-

ष्टाविंशतिः, प्रायशः प्रतिपुटं चतुर्दश पङ्क्तयः प्रतिपङ्क्ति द्वात्रिंशदक्षराणि च सन्ति। अस्यां प्रथमाध्यायप्रथमपादारम्भात् प्रभृति तृतीयाह्निके वृद्धिरादैच्सूत्रे किंचिद्भागपर्यन्तमेव वर्तते।

झ. पुण्यपत्तने (पूना) B. O. R. I. No. 37/1872-73 No. 57 काकिदपत्रलिखिता बृहद्विवरणमातृकाशीतिपत्रयुता। अस्यां प्रथमाध्यायप्रथमपादारम्भात् प्रभृति पञ्चमाह्निके 'ओत्' (१. १. १५) इति सूत्रपर्यन्तं विद्यते।

ञ. बडोदा O. I. No. 591 अङ्किता काकिदपत्रलिखिता देवनागरीलिपिमयी बृहद्विवरणमातृका। अस्यां त्रिनवतिपत्राणि, प्रतिपुटं प्रायशो विंशतिः पङ्क्तयः, प्रतिपङ्क्ति चत्वारिंशदक्षराणि च सन्ति। आदितो नवाह्निकभागोऽत्र वर्तते।

ट. बडोदा O. I. Acc. No. 10035 ग्रन्थलिपिमयी तालपत्रकोशात्मिका बृहद्विवरणस्य मातृका। अस्यां प्रथमाध्यायप्रथमद्वितीयपादौ तृतीयपादे 'स्वरितेनाधिकारः' (१. ३. ११) इति सूत्रपर्यन्तं च वर्तन्ते। अत्र चतुष्षष्टयुत्तरशतं पत्राणि, प्रतिपुटं सप्ताष्टाः पङ्क्तयश्च सन्ति। आहत्याष्टशतीषट्सहस्री ग्रन्था वर्तन्ते।

ड. G. O. M. L. R. No. 3866 मातृकायाः प्रतिकृतिरस्मदीयकोशालये T. No. 207 अङ्किता। लघुविवरणस्येयं मातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति प्रथमाध्यायतृतीयपादे 'यथासंख्यमनुदेशः समानाम्' (१. ३. १०) इति सूत्रपर्यन्तमेवोपलभ्यते।

ढ. G. O. M. L. R. No. 3894 मातृकायाः प्रतिकृतिरस्मदीयकोशालये T. No. 224 अङ्किता लघुविवरणस्य मातृका। अस्यां च प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रथमाध्यायतृतीयपादे 'यथासंख्यमनुदेशः समानाम्' (१. ३. १०) इति सूत्रपर्यन्तमेव वर्तते।

ण. बडोदा O. I. Acc. No. 13002 अङ्किता काकिदपत्रलिखिता देवनागरीलिपिमयी लघुविवरणस्य मातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति नवमाह्निकान्त एव भागो वर्तते। पञ्चत्रिंशत् पत्राण्यत्र सन्ति।

त. G. O. M. L. D. No. 1304 अस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 225 अङ्किता लघुविवरणमातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् 'न पदान्त' (१. १. ५८) इति सूत्रपर्यन्तो भागोऽस्ति।

ब. बडोदा O. I. Acc. No. 11203 अङ्किता देवनागरीलिपिमयी काकिदपत्रलिखिता, अस्याः प्रतिकृतिरस्मदीयकोशालये T. No. 498 अङ्किता रत्नप्रकाशस्य मातृका। अस्यां प्रथमाध्यायात् चतुर्थाध्यायान्तो भाग एव वर्तते।

म. मद्रपुरीराजकीयप्राच्यकोशागारमुद्रितं प्रदीपोद्द्योतनसहितं नवाह्निकभागयुतं महाभाष्यम्।

आकरग्रन्थानां सूची

ऋ. सं. — ऋक्संहिता.

का. वा. — कात्यायनवार्तिकम्.

चौ. — चौखाम्बामुद्रितं महाभाष्यं नवाह्निकपर्यन्तं प्रदीपोद्द्योतसहितम्, उपरि प्रदीपमात्रसहितम्.

तै. आ. — तैत्तिरीयारण्यकम्.

तै. ब्रा. — तैत्तिरीयब्राह्मणम्.

तै. सं. — तैत्तिरीयसंहिता.

नि. — निर्णयसागरमुद्रितं महाभाष्यम्. प्रदीपोद्द्योतसहितम्.

परिभाषा. — परिभाषेन्दुशेखरः चौखाम्बा. १९४३. विद्याविलासमुद्रितः।

पा. शि. — पाणिनीयशिक्षा.

पा. सू. — पाणिनिसूत्रम्.

पू. — पुण्यपत्तन (पूना) नगरप्रकाशितं महाभाष्यम्. F. Kielhorn महाशयशोधितम्।

प्रवर्तकीयम्—प्रवर्तकोपाध्यायकृतमहाभाष्यप्रदीपप्रकाशः आस्माकीनकोशालये T. No. 99 अङ्कितः।

लौ. न्या. — लौकिकन्यायाञ्जलिः.

लौ. न्या.साहस्री. — (भुवनेश) लौकिकन्यायसाहस्री.

श. कौ. — शब्दकौस्तुभः.

श्लो. वा. — श्लोकवार्तिकम्. महाभाष्यस्थम्.

ह. — हरयाणासाहित्यसंस्थानप्रकाशितं प्रदीपोद्द्योतसहितं महाभाष्यम्.

TABLE DES MATIÈRES

page

प्रथमाध्याये प्रथमपादे पञ्चममाह्निकम् १

षष्ठमाह्निकम् १३२

सप्तममाह्निकम् २६५

महाभाष्यप्रदीपव्याख्यानोपयुक्तानां मातृकाणामनुक्रमणिका ३६३

आकरग्रन्थानां सूची ३६६

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār*, œuvres éditées et traduites. Introduction par Jean Filliozat. 1956.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Edition critique traduction et introduction. 1956.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Rgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu (Brahma-Jijñāsā) selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N. R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Edition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī (Dohā)*. Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi (La Démonstration du Sphoṭa) par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N. R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva (Brahma-Sūtra* I, 1, *adhikaraṇa* 2 à 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J. K. Balbir. तुलसीदास रचित राम-चरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N. R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Edition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.
18. N. R. Bhatt — *Rauravāgama,* édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.
19. R. Dessigane, P. Z. Pattabiramin et J. Filliozat — *La légende des jeux de Çiva à Madurai d'après les textes et les peintures.* Vol. I Texte — Vol. II Planches. 1960.
20. Claude Jacques — *Gayāmāhātmya.* Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū.* Avec introduction, traduction et notes. 1962.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres.* 1962.
23. N. R. Bhatt — *Mṛgendrāgama* (*Kriyāpāda* et *Caryāpāda*) *avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha*, édition critique. 1962.
24. N. R. Bhatt — *Ajitāgama*, édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati*, Introduction, traduction et notes. 1ère partie. Le Rituel quotidien. 1963. 2ème partie. Rituels occasionnels. 1968.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P. Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram.* 1964.
28. Ch. Vaudeville — *Bārahmāsā.* Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P. Z. Pattabiramin — *Parures divines du sud de l'Inde.* 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād.* Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P. Z. Pattabiramin — *La légende de Skanda.* 1967.
32. M. E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā.* 1967.
33. J. Filliozat — *Un catéchisme tamoul du XVIe siècle en lettres latines.* 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord.* Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F. Gros — *Le Paripāṭal*, Texte tamoul, introduction, traduction et notes. 1967.
36. P. S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita.* I. Texte, traduction et notes. 1967.
37. *Index des mots de la littérature tamoule ancienne*, Vol. I. 1967 ; Vol. II. 1968 ; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhva.* 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr.* Légendes, Histoire, Monuments, avec le *Pañcavaradakṣetramāhātmya* édité par K. Srinivasacharya. 1970.
40. B. Dagens — *Mayamata.* Traité sanskrit d'architecture. Edition critique, traduction et notes. Ière partie 1970.
41. N. S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa.* Edition et traduction annotée. 1971.
42. P. Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde.* I. Andhra. 1971.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva.* 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal.* Texte rédigé en 1825. Présentation par François Gros. Vol.I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ.* 1971.

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M. S. Narasimhacharya. Etude et Traduction. 1972.

47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande.* Introduction par Jean Filliozat. 1972.

48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū.* Introduction, traduction et notes. 1972.

49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai.* 1973.

50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X. S. Thani Nayagam. 1973.

51. *Mahābhāṣyapradīpavyākhyānāni,* Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, Adhyāya I, Pāda I, Āhnika 1-4, édition critique par M. S. Narasimhacharya. Présentation par P. S. Filliozat. 1973

52. Alix Raison — *La Hārītasaṃhitā:* Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.